ERRATA.

From page 488 onwards to end of Fasciculus VI, "Avadana Kalpalata," Vol. II—

For	page	809	*read*	489
,,	,,	810	,,	490
,,	,,	811	,,	491
,,	,,	812	,,	492
,,	,,	813	,,	493
,,	,,	814	,,	494
,,	,,	815	,,	495
,,	,,	816	,,	496
,,	,,	817	,,	497
,,	,,	818	,,	498
,,	,,	819	,,	499
,,	,,	820	,,	500
,,	,,	821	,,	501
,,	,,	822	,,	502
,,	,,	823	,,	503
,,	,,	824	,,	504
,,	,,	825	,,	505
,,	,,	826	,,	506
,,	,,	827	,,	507
,,	,,	828	,,	508
,,	,,	829	,,	509
,,	,,	830	,,	510
,,	,,	831	,,	511
,,	,,	832	,,	512
,,	,,	833	,,	513
,,	,,	834	,,	514
,,	,,	835	,,	515
,,	,,	836	,,	516
,,	,,	837	,,	517
,,	,,	838	,,	518
,,	,,	839	,,	519
,,	,,	840	,,	520
,,	,,	841	,,	521
,,	,,	842	,,	522
,,	,,	843	,,	523
,,	,,	844	,,	524
,,	,,	845	,,	525
,,	,,	846	,,	526
,,	,,	847	,,	527
,,	,,	848	,,	528
,,	,,	849	,,	529
,,	,,	850	,,	530
,,	,,	851	,,	531
,,	,,	852	,,	532
For	page	853	*read*	533
,,	,,	854	,,	534
,,	,,	855	,,	535
,,	,,	856	,,	536
,,	,,	857	,,	537
,,	,,	858	,,	538
,,	,,	859	,,	539
,,	,,	860	,,	540
,,	,,	861	,,	541
,,	,,	862	,,	542
,,	,,	863	,,	543
,,	,,	864	,,	544
,,	,,	865	,,	545
,,	,,	866	,,	546
,,	,,	867	,,	547
,,	,,	868	,,	548
,,	,,	869	,,	549
,,	,,	870	,,	550
,,	,,	871	,,	551
,,	,,	872	,,	552
,,	,,	873	,,	553
,,	,,	874	,,	554
,,	,,	875	,,	555
,,	,,	876	,,	556
,,	,,	877	,,	557
,,	,,	878	,,	558
,,	,,	879	,,	559
,,	,,	880	,,	560
,,	,,	881	,,	561
,,	,,	882	,,	562
,,	,,	883	,,	563
,,	,,	884	,,	564
,,	,,	885	,,	565
,,	,,	886	,,	566
,,	,,	887	,,	567
,,	,,	888	,,	568
,,	,,	889	,,	569
,,	,,	890	,,	570
,,	,,	891	,,	571
,,	,,	892	,,	572
,,	,,	893	,,	573
,,	,,	894	,,	574
,,	,,	895	,,	575
,,	,,	896	,,	576

536

BIBLIOTHECA INDICA:
A
COLLECTION OF ORIENTAL WORKS
PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, NOS. 777, 826, 848, 860, 886, 1168, 1257, 1262, 1295, 1310 and 1354.

14269

बोधिसत्त्वावदानकल्पलता ।

BODHI SATTVĀVADĀNA KALPALATĀ

A BUDDHIST SANSKRIT WORK ON THE EXPLOITS AND GLORIES OF BUDDHA BY KṢEMENDRA.
WITH ITS TIBETAN VERSION.

CENTRAL ARCHAEOLOGICAL LIBRARY
New Delhi

BSa5
Kṣe/D.H.

NOW FIRST EDITED BY
RAI SARAT CHANDRA DAS, BAHADUR, C.I.E.
AND
MAHĀMAHOPĀDHYĀYA SATIS CHANDRA VIDYĀBHŪṢAṆA, M.A., PH.D.

VOL. II.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET.
1918.

OFFICE OF THE DIRECTOR GENERAL OF ARCHAEOLOGY
Library Regr No V.86
A384
INDIA.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 14269
Date 21.4.1961
Call No. B.Sa.5./Kha./D.H.

CONCLUDING REMARKS OF THE LAST TIBETAN EDITOR.

མཚན་དཔེའི་རི་མོ་ངོ་མཚར་བཀོད་པ་རྒྱ་མཚོའི་ཞིང་གི་རྡུལ་སྙེད་
གྲངས་མཐོང་ན་མི་མཐུན་མེད་པའི་སྐུ།

སྙན་འཇེབས་སྒྲ་དབྱངས་ཚིག་དོན་གཅིག་གིས་སྣ་ཚོགས་འགྲོ་
བའི་རང་རང་སྐད་དང་དབང་པོར་འཇུག་པ་ཚངས་པའི་གསུང་།

ཇི་ལྟ་ཇི་སྙེད་ཤེས་བྱའི་གནས་ལ་གློག་གྱུར་མ་དེ་ཙུང་ཟད་མི་མངའ་
རྣམ་པ་ཐམས་ཅད་མཁྱེན་པའི་ཐུགས།

ཤཱ་ཀྱའི་སྐྱེས་མཆོག་ཟས་གཙང་སྲས་ཞེས་གྲགས་སྙན་གདུགས་
དཀར་སྲིད་རྩེར་འཁོར་རིས་དུས་ཀུན་དགེ་ལེགས་ཆར་དུ་བསྐྱིལ།

ཡིད་འཕྲོག་རིན་ཆེན་གདུབ་བུས་ལེགས་སྤྲས་འཛམ་མཉེན་ཕྲུག་
སོར་རྩེ་མོས་བསྐུལ་བའི་རྒྱུད་མངས་སྒྲར།

སྲིད་ཞིའི་ཆོས་ཀུན་ཉམས་དང་འགྱུར་བའི་རྒྱན་གྱི་སྒྱུར་ལེན་དེ་
ཟའི་ན་ཆུང་དབྱངས་ཅན་མ།

མི་ཕྱེད་དད་པའི་སྙིང་གི་ཟེ་འབྲུར་ཐུགས་རྗེའི་འཇོ་སྒེག་གར་གྱིས་རྟག་
ཏུ་ལེགས་བཞུགས་ནས།

སྨྲ་བ་ལྡེ་ཡི་བང་མཛོད་འབུམ་སྡེར་འཛད་མེད་ངག་གི་འདོད་པ་
འཇོ་བའི་ཤེས་པ་སྩོལ།

མཁྱེན་རབ་རྣ་བ་སྒྲིམ་པོར་བསྐྱེད་བསྒྲིངས་མང་ཐོས་སྦྱོང་ཕུ་དར་བབས་ལས།

རྒྱལ་བའི་རྣམ་ཐར་ལོ་ལ་འདབ་བརྒྱ་རྩ་ཡོངས་འདུའི་འཁྲི་ཤིང་

གཡུར་ཟའི་རྩར།

བསོད་ནམས་ཕུང་པོ་སྨིན་པའི་འབྲས་བཟང་དཔྱོད་ལྡན་འཆི་མེད་དགའ་སྟོན་རེ།

སྤྲེལ་མཛད་དགེ་བའི་དབང་པོ་ཡབ་སྲས་འཕགས་ཡུལ་མཁས་

མང་གཙུག་གི་རྒྱན།

ཨེ་ཤེས་ཉི་མ་འོག་མིན་མཁའ་དཀྱིལ་ནས།
ཤར་བའི་རྣམ་འཕྲུལ་འོད་ཟེར་ཆེས་འབར་གཟིགས།
གདུལ་དཀའི་གདུང་སྲུན་སེལ་ལ་སྙིང་སྟོབས་ཁུར།
ལྷ་ནས་ལྷར་འདེགས་དོན་ཀུན་སྒྲུབ་པའི་དཔལ།
གང་དེ་སྟོན་དང་ད་ལྟའི་མཛད་བཟང་ཅན།
རྣམ་མཁྱེན་སེམས་པོའི་རལ་རྐྱུང་སྤྲུབས་འཁྲིལ་ལས།
རྨད་བྱུང་གདམས་ཀྱི་ཐིགས་གཅིག་གཏྲའི་རྒྱུན།
ལོག་རྟོག་དྲི་མ་འདྲུད་པའི་ཞབས་བསིལ་མཆོག།
དཀྲིའི་གཞུང་ལུགས་སེ་ལོང་གཙང་མའི་ངོས།
སྒྲ་དོན་རྒྱན་གྱི་བཞིན་རས་རབ་ཤར་བ།
ལེགས་བཤད་དཀྱུས་རིང་མིག་གི་ཟླར་མདའ་ཡིས།
ཤེས་ལྡན་ཀུན་གྱི་བདེན་པ་ཅིག་ཙར་ཕྲོགས།
བོད་ཀུན་དྲང་སྲོང་མང་པོས་ཀླུན་དད་ཀྱིས།
སྙོད་མཆོན་རྟོགས་བརྗོད་མགྲིན་སྟོན་ལ་ཕབ་མཐར།
སྤྱོང་ཚིག་མཚན་མ་ཅམ་ལ་བླར་བཟུང་ནས།
དམ་པའི་གསུང་ཞེས་འདུད་རྣམས་སྐལ་བ་ལྷ།

གཏི་སྨུག་སྨུན་འཐིབས་ལོག་སྒོམ་ཁྲུང་བྲུ་རྡ།

སྒྲོམ་པས་རབ་འཁྲིལ་ཉོན་མོངས་དུག་གི་ལྕེས།

ཐར་འདོད་སྒྲོག་ལ་རྒྱལ་བ་ཕྲུག་རྒྱའི་ཁྲུ།

ཐ་སྙད་རྩི་ལ་ཕྲག་དོག་དབང་གི་གཤུད།

ཁྲིངས་དང་རྣམ་འགྱུར་ཀྱིན་གྱི་ཆ་ཤས་གང་།

ལྷུ་ཡང་སྒྲིབ་སྦྱོར་རི་དྭགས་གཟུགས་ཀྱིས་མཛེས།

སྙན་བསྒྱུར་ག་བུར་གཟེགས་མ་འབུམ་འཛོམ་པ།

བསྟན་བཙོས་ཀུནྡའི་གཉེན་ལ་འཁྲུ་སེམས་ཅན།

རྣམ་དཔྱོད་མཛེས་པའི་དཀྱིལ་འཁོར་བག་ལ་ཞ།

རེས་འགའ་གདོལ་གདམ་དུ་བའི་མཛུག་མ་རྐྱང་།

བརྩམས་ཆོས་རྒྱ་སྐར་ཁྲོད་ན་གཉོང་པའི་གཟས།

འགྲན་དེ་ཆེར་སྒྲོམ་མང་པོ་འི་ངག་སྒྲོས་རྒྱན།

སྐྱུང་གིས་རྩེར་གཡེངས་སྒྲུར་མ་ལྟེས་དབང་གིས།

མཐོན་པོར་ཆགས་མིན་གོང་མའི་ལྐུང་ལས་ཀྱིས།

ས་གསུམ་རྣམ་འདྲེན་འཕགས་པའི་བདག་རྐྱེན་ལས།

རྟོགས་བརྗོད་ཆེ་འདི་ཁ་བའི་སྙན་ལྡིངས་དར།

ཕྲ་མོ་འི་འགྱུར་བཙོས་ཙམ་ལ་ལོ་ཆེན་དུ།

སྒྲོམ་སེམས་མགྲོན་བུས་མིག་དབང་ཕྱིད་མིན་པར།

གཙུག་ལག་གངས་རིའི་སྒྲོ་ན་བརྡ་སྒྲོད་ཀྱི།

རྩམ་གསུམ་རྫོགས་པའི་ཀླུ་ཆེན་ཤོང་སྟོན་རྫེ།

ཀླུ་གྲོས་ཛམྦུའི་སྐྱེ་མས་ཉེར་བཏུངས་པ།

ཆོས་ཕྱུང་རྒྱ་མཚོའི་སྙིང་པོ་ལེགས་བཤད་གསེར།
འདྲེན་བྱེད་གངས་ཅན་བསྟན་པའི་ཤིང་རྟ་ཆེ།
དོན་གྱི་གནས་ལྷ་རིག་པ་ལོ་ཆེན་དབང་།
གནའ་བོའི་ལུགས་སྲོལ་སྐྲུན་མེས་ཁྲོལ་པོའི་སྐུན།
བསལ་ཆེ་གཅམ་བྲུས་བསྡུགས་དང་མཚུངས་མེད་པར།
ཆོས་ཀུན་མཁྱེན་པའི་ཉི་མ་འོད་བེ་ཆེ།
རྒྱལ་བསྟན་ཡོངས་ཀྱི་མཁར་ཤར་ཆོས་སྐྱོང་བཟང་།
རྩལ་འདིའི་འཆད་ཉམ་མ་སྐྱོགས་ཨུཏྤ་ལ།
ཇ་གོང་མཛེས་རྒྱན་གསར་པའི་སྤེལ་ལེགས་སུ།
སྐལ་བར་ཐོབ་འདི་བསྟན་ལ་གཅེས་འཛིན་པ།
བཤེས་གཉེན་རིམ་བྱོན་བཀའ་དྲིན་ཕ་མཐའ་ཡས།
ཁྲིད་པར་ལྷ་རིག་ལང་ཚོ་ན་དར་བློས།
དྲང་སྲོང་ཕུར་བུའི་ཁེངས་པ་འབྲོག་ཉུས་ཅན།
ས་ལའི་ལྗོངས་ཀྱི་ལྷ་དབང་སྨོན་འགྲོ་པ།
ངེས་པར་ཐམས་ཅད་མཁྱེན་དེའི་རྣམ་དཔྱོད་མ་ཐུ།
དགེ་དབང་ཞལ་ལྷུང་དཔྱོད་ཀྱི་བསེར་བུ་ཡིས།
མཁས་མང་འདོད་ལྡན་པ་སྨྲ་ཉེར་བསྐྱང་ནས།
ཚིག་དོན་མཚུ་སྒྲིས་ཆེས་དམར་རོ་བདའ་བར།
ཡིད་ཀྱི་ཤིང་རྟ་ཡན་བརྒྱུར་རྒྱུག་པ་བྲེལ།
དེ་ཙམ་སྤོན་སྦྱུང་གདམ་གྱི་སྐྱོར་བློས་ལས།
ད་ལྟ་འཕྲི་ཤིང་རྩ་གཏེར་ལྟ་ཞིག་གི།

མཁས་དབང་དཔའ་བོའི་གསུང་རབ་བཀྲ་ཡང་།
སྒྲོལ་བའི་བློ་གྲོས་གྲུ་གཟིངས་ཉིན་སྐར་བཞིན།
ཀྲི་ཀིའི་མཚན་ལྟས་དྲང་སྲོང་ཚིག་གི་མདངས།
ཆོས་བརྒྱད་ལྟུགས་ཀྱི་གདུན་བུ་བདུན་སྐྱེས་པ།
བསྟན་འཛིན་ཁྲབ་འཇུག་གྲ་གྲུའི་གར་མཁན་པལ།
དྲང་པོའི་གླིགས་བུ་གཙན་གཟན་མདུན་གྱི་རྩུ།
འོན་དེ་རྒྱལ་བསྟན་ལྷ་ཕྲག་དྲུག་པའི་དུས།
གནམ་བསྐོས་ས་སྐྱོད་ལས་ཤུགས་དར་ལ་དྲག།
སྐྱེ་རྒྱུའི་ལེགས་བྱས་མཚོ་མཛིང་ཟབ་རྒྱ་ཆེས།
སྔོན་བྲིན་མཁས་པའི་སྤྱན་ཟླ་འབྱུང་སྲིད་སྐམ།
དེ་ཕྱིར་སློབ་ལམ་དུས་ནས་འགྲོ་ཀུན་ལ།
བརྩེ་བས་བདག་གཞན་བཟེ་བའི་རྣམ་ཐར་དྲི།
ལོ་རྒྱུས་མ་ལ་ཡ་རླུང་གིས་དྲངས་པས།
ཡིད་ཀྱི་ཚ་གདུང་སེལ་བའི་མཛའ་གཙུགས་མ།
ཟླ་མེད་བྱང་ཆུབ་ཆེད་དུ་བྲ་དཀའི་ཚོགས།
གྲངས་མེད་བསྐལ་གསུམ་བསགས་པའི་བདེན་དཔང་དུ།
ས་ཡི་ལྷ་མོ་ཀུན་བཟོད་ལས་འཕགས་ཕྱིར།
བརྟན་འཕྲེང་གཞན་འདྲིད་གླེང་མོའི་རྗེས་འགྲོ་མིན།
གདུལ་དཀའི་ཞིང་འདིར་པད་མཆོར་ངང་པ་ལྟར།
དགྲེས་དགུར་འཇུག་པའི་ལྷག་བསམ་སྙིང་སྟོབས་ལ།
སྤུས་བཅས་ཕྱོགས་བཅུའི་སངས་རྒྱས་མ་ལུས་པས།

ཆེས་ཆེར་བསྔགས་པའི་གདམས་སྙན་སྙིང་ལ་སིམས།

དཔྱོད་བཟོད་རྒྱ་མཚན་ཤེས་ནས་དད་པའི་བློ།

ཀུན་རྟོག་འབུམ་ཕྲག་རྫིང་བུར་ཤར་བའི་གཟུགས།

གཞན་ཀྱིན་རླུང་གིས་བསྐྱོད་མིན་རྗེ་བའི་ངོས།

བྲིས་པའི་རི་མོ་གཡོ་མེད་དངོས་པོ་འི་གཤིས།

བློ་གསལ་རྒྱ་མཚོར་དག་འབབ་གླིགས་བས་སྐྱུང་།

འཛིང་མེད་པར་གྱི་མ་དྲིས་ཆུ་གཏེར་ཆེ།

འཕེལ་འགྲིབ་མེད་གང་བྱེད་པོ་གཏྲའི་ཡབ།

རབ་དཀར་སེམས་ཀྱི་རྩེ་མོ་མཁའ་ལ་བསྙེག།

དྲི་བྲལ་འབྱོར་བའི་འོ་མཚོ་ལེགས་འཁྱིལ་བར།

སྒོ་གསུམ་བརྩོན་པའི་ལྡོན་པ་བསྐྱིལ་བ་ལས།

སྙིང་པོ་ཚོགས་གཉིས་ཆེར་སྤྱངས་རྩི་བཅུད་སར།

བྱང་ཆུབ་མཆོག་གི་ཟུངས་སུ་འགྱུར་བར་ཤོག།

ནམ་མཁའི་མཐས་གདུགས་དེ་སྙེད་ལུས་ཅན་ཀུན།

བསོད་ནམས་ས་བོན་གྲངས་མེད་སྐྱེ་སྲིད་ཞིང་།

བདབ་སྨིན་གཡུར་དུ་ཟླ་བའི་སྐྱེ་མ་ལ།

སྤྱོད་པའི་རྩེ་དགའ་ཁྱིང་ནས་དགོད་གྱུར་ཅིག།

ལྷར་སྣང་སྣ་ཚོགས་གྲུབ་མཐའི་མཚན་སྤུན་སྦྲིང་།

སྒྲ་ཚད་བཟོ་གསོ་ནང་རིག་རྟ་བདུན་ཅན།

གྱུང་ཤར་ཐོས་བསམ་སྒོམ་པ་སྒྲུབ་པའི་བསྟན།

ལུང་རྟོགས་སྣང་བ་དམ་པའི་དཔལ་འབར་ཤོག།

འཇམ་དཔལ་མི་ཡི་ཟློས་གར་བཅོང་ཁ་པའི།
རིང་ལུགས་ཞྭ་སེར་ཅོད་པན་འཆང་བའི་སྐྱེ།
འཛམ་གླིང་སྐྱེ་རྒུའི་བསོད་ནམས་མཆོད་སྡོང་དུ།
ཉི་ཟླས་སྨུན་སེལ་དེ་སྲིད་བརྟན་གྱུར་ཅིག།
ཚངས་པས་ཀ་བ་མེད་པ་གནས་ཀྱི་སྒོ།
ལྷ་ནས་མང་པོས་བཀུར་བའི་རྒྱལ་སྲིད་དུ།
ཉེར་བསྐོས་ས་ཡི་བརྒྱ་བྱིན་མཆོད་ཡོན་བྱུང་།
དབང་ཐང་དཔལ་མགྲིན་ཅན་དང་སྐལ་མཉམ་ཤོག།
སྤྱི་དང་ཁྱད་པར་རྒྱ་ཧོར་གངས་ཅན་འདིར།
རིང་པོར་འཚོ་བའི་ཉ་ལྦེབས་ཁེག་ཡངས་པར།
སྨིག་འབྲས་རྡེ་བྲལ་བདེ་སྐྱིད་ས་ཀྲྀ་ཀ།
ཆེར་སྤྱངས་ཐར་པའི་སྒྲད་བུར་རྒྱུ་བར་ཤོག།
ཡོངས་འདུའི་འབྲས་བཟང་གཏོང་བར་ལག་རྐྱོང་བའི།
བྱེད་པོར་གཏོགས་ཀུན་འདིར་བསྟན་ནམ་པར་ཐར།
འཛིན་ལས་ལྡོག་བྱེད་ཕྱོག་དང་རང་གི་རྒྱུད།
ཚུང་ཟད་ཙམ་ཡང་ལྷན་ཅིག་གནས་མིན་ཤོག།

ཉེ་རིང་མེད་པར་ཀུན་ལ་རབ་འཇུག་རྒྱལ་བའི་ཐུགས་རྗེ་ཉིན་བྱེད་པ་དང་། སྲིད་ཞིའི་རྒྱུད་པའི་ལྷུན་སྤུག་རབ་བཅིལ་པན་བདེའི་པད་དཀར་དགའ་ཚལ་དུ། མཆོག་གསུམ་དམ་པར་བསྟོད་བསྔགས་དར་དེར་བློ་གྲོས་བྱུང་བ

གཞོན་ནུའི་སྨྲས།

དུས་མཁྱེན་རྒྱལ་པོ་ཡི་བསོད་ནམས་དེ་སྙིང་འགྲོ་ཀུན་གྱིས་ཐོབ་བཀྲ་ཤིས་ཤོག།

རྟོགས་བརྗོད་རིན་པོ་ཆེ་འདི་ཉིད་ཀྱང་པར་དུ་བཀོས་པ་པར་མཁན་རྣམས་ཀྱི་ཡན་ལག་ངལ་བའི་དཀའ་ཐུབ་ལྷུར་ལེན་པ་ཙམ་དུ་ཟད་མོད། འོན་ཏེ་རྒྱ་གར་གྱི་པཎ་ཆེན་ཁ་སྐུ་ཅན་རྣམས་ཀྱིས་དེ་བཞིན་གཤེགས་པའི་རྣམ་པར་ཐར་པ་གསར་དུ་བརྩམས་པ་དང་། སྐད་གཉིས་སྨྲ་བའི་ལོ་ཙཱ་བ་རྣམས་ཀྱིས་བསྒྱུར་ཅིང་རྗེས་འཇུག་གི་བསྟན་འཛིན་མཚན་ཉིད་དང་ལྡན་པ་རྣམས་ཀྱིས་དར་རྒྱས་སུ་མཛད་པ་ནི་རང་ཉིད་མཁས་པར་སྒྲུབ་པའི་མངོན་པའི་ང་རྒྱལ་དང་གྲུ་ཆོས་ཀྱིས་ཚུལ་དེར་ཞུགས་པ་མ་ཡིན་པར་དེ་བཞིན་གཤེགས་པ་ལ་དད་པ་མེད་པའི་འགྲོ་བ་རྣམས་དད་པ་གསར་དུ་སྐྱེལ་བ་དང་། དད་པ་དང་ལྡན་པ་རྣམས་གོང་ནས་གོང་དུ་འཕེལ་བར་འགྱུར་བས་རང་གཞན་གྱི་བསོད་ནམས་དཔག་ཏུ་མེད་པ་གསོག་པའི་ཕྱིར་དགོས་ཅིག་ཏུ་ལ་ལས།

དད་པ་སྟོན་འགྲོ་མ་ལྷུར་བསྐྱེད་པ་སྟེ།
ཡོན་ཏན་ཐམས་ཅད་བསྐྱུང་ཞིང་འཕེལ་བར་བྱེད།
རྟོགས་པ་སེལ་ཞིང་ཆུ་བོ་རྣམས་ལས་སྒྲོལ།
དད་པས་བདེ་འགྲོའི་གྲོང་ཁྱེར་མཆོག་པ་ཡིན༎

ཞེས་པ་དང་། མཁས་མཆོག་དཔའ་བོས།

གྲགས་པའི་མཚན་མར་གྱུར་པ་བཟང་པོ་འདི་རྣམས་ཀྱིས།
བདེ་བར་གཤེགས་གྱུར་ལམ་རྣམས་གང་ཡིན་བསྟན་པར་འགྱུར།
ཡིད་ལ་དད་པ་མེད་པ་རྣམས་ཀྱང་དད་པར་འགྱུར།
ཆོས་དང་ལྡན་པའི་གཏམ་གྱིས་དགའ་བ་ཉིད་དུ་འགྱུར།

ཞེས་གསུངས་པའི་དོན་དང་མཐུན་ཞིང་།

ལོ་ཆེན་ཆོས་སྐྱོང་བཟང་པོའི་

བཀའ་དྲིན་ལས་ས་ལོ་འཛམ་དཔལ་རྡོ་རྗེ། དགོན་པད་དཀར་ཆོས་སྐྱོང་། སྐྱོགས་སྟོན་སྨོན་གྲུབ་ལོ་ཙཱ་བ། དཔལ་ཁང་ལོ་ཙཱ་བ་དབྱངས་ཅན་སྙེམས་པའི་སྨེ་སོགས་སྐད་གཉིས་སྨྲ་བའི་ལོ་ཆེན་མང་དུ་བྱོན་ཞིང་། དེ་དག་ལས་བརྒྱུད་པའི་ཡང་སློབ་དང་ཉིང་སློབ་རྒྱ་ཆེར་གྱུར་པའི་ནང་ཚན་སྐང་གནའ་འོད་ཟེར་རྒྱལ་མཚན་དང་གྲངས་ཆེན་ལོ་ཙཱ་བའི་དྲིན་ལས་སློན་འགྲོ་པ་ཡབ་སྲས་སོགས་ཚད་ཐུབ་ཀྱི་མཁས་པ་ཁ་ཡར་བྱུང་ཡང་དེང་སང་ནི་ཟུར་མཁར་བློ་གྲོས་རྒྱལ་པོའི་གསུང་ལས།

རྩོལ་དེ་ལྟ་ན་ཡང་སྤུར་རྒྱལ་འདིར། གཞན་ཀུན་ཕྱོགས་མེད་གཏོང་བ་དང་། རང་ལེགས་བཤད་འཚོལ་བར་ཀློམ་ན་ཡང་། དོན་བྱིན་ལེན་གཉིས་ཀ་གསེར་ལས་དཀོན།

ཞེས་གསུངས་པ་ལྟར་གློགས་བམ་འདི་ཉིད་ལ་གཟིགས་པ་ལྷུར་ལེན་པ་དཀོན་པ་འདྲ་ཞིག་འདུག་ཀྱང་། བདེ་བར་གཤེགས་པའི་བསྟན་པ་ལྔ་བརྒྱ་ཕྲག་བཅུར་གནས་པར་བཤད་པའི་ད་ལྟ་ལྔ་ཕྲག་དྲུག་པའི་ནང་དུ་ཡོད་པས་གཞུང་ལུགས་འདི་དག་འཆད་ཉན་གྱིས་གདན་ལ་འབེབས་པའི་མཁས་པ་འགའ་ཞིག་འོང་སྲིད་སྙམ་རང་གིས་རང་ལ་བློ་བས་ཉེ་བར་བསྒྲིམས་ཏེ་སྐད་གཉིས་ཤན་སྦྱར་གྱི་མ་དཔེ་འདི་བཞིན་རྒྱ་དཔེ་དང་བསྡུན་ནས་ཐམས་ཅད་མཁྱེན་པ་ལོ་ཆེན་ཆོས་སྐྱོང་བཟང་པོས་ཞུས་དག་མཛད་པའི་དཔེ་རྒྱུན་ཡིན་པས་འཁྲུལ་བ་ག་ལ་སྲིད་ཀྱང་། བྱ་དཔེ་གཅིག་ནས་གཅིག་ཏུ་བརྒྱུད་པར་ཡི་གེ་ནོར་བའི་སྐྱོན་འདྲ་ཡོད་འདུག་པ་ནས་རིན་སྤུངས་ས་སྐྱོང་དབང་པོའི་ཕྱུག་དགེ་ཁྲངས་དག་ཏུ་བྱེད་པ་དང་བསྡུན་འདར་ལོ་ངག་དབང་ཕུན་ཚོགས་ཀྱིས་འབྲུ་ཞུས་དང་དོགས་གནས་ཀྱི་སར་སྦྲའི་དཔྱད་པས་གདན་ལ་འབེབས་པ་དང་རྒྱ་བོད་

ཀྱི་ཚིག་ཀང་རེ་གཉིས་ཅན་པ་སྔོན་པ་དང་བསྒྱུར་དུ་བཅུག།   ཁྱད་པར་ཡལ་
འདབ་གཉིས་པའི།   བདག་གིས་རྒྱ་མ་སྒྲུབས་ནས་ནི།   ཞེས་སོགས་ཨེ་ཁོ་
ཀ་གཅིག་གི་ཕྲེད་སྨྲ་མའི་ཀང་པ་གཉིས་པའི་སྐད་དོད་ཀང་པ་གཞན་རྣམས་ལྟར་
ཁ་སྒོ་ཡང་མའི་སྦྱིབ་སྦྱོར།   ཡལ་འདབ་གསུམ་པའི་སྙིང་སྟོབས་ལྡན་རྣམས་
ཉང་ན་ནི།   ཞེས་སོགས་ཨེ་ཁོ་ཀ་གཅིག་གིས་ཕྲེད་ཕྱི་མའི་ཀང་པ་དང་པོར་
དགར་བའི་ཚར་གྱི་སྐད་དོད་འབྲུ་གསུམ་ཅན་པར་ཕྲི་ཡ་ནི་ཞེས་པ་བཅུག།
ཡལ་འདབ་དྲུག་པའི་ཕྱིས་ཀྱང་ལམ་ནི་དེ་ཉིད་ནས།   ཞེས་སོགས་ཨེ་ཁོ་ཀ་
གཅིག་གི་ཕྲེད་སྨྲ་མའི་ཀང་པ་དང་པོའི་སྐད་དོད་ཅན་པ་ཀང་པ་ཕྱི་མ་གསུམ་
དང་མཐུན་པར་ཁ་སྒོ་ཕན་པའི་སྦྱིབ་སྦྱོར།   ཡལ་འདབ་བརྒྱད་པར་སི་ཤེས་
རྨོངས་པ་སེལ་བའི་བཅོམ་ལྡན་འདས་ནི་སྙིང་རྗེ་བསོད་ནམས་ལ་བརྟེན་པས།
ཞེས་སོགས་ཨེ་ཁོ་ཀ་གཅིག་གི་ཕྲེད་སྨྲ་མའི་ཀང་པ་གཉིས་པ་ནས་འབབ་པའི་
སྐད་དོད་ཡིག་འབྲུ་གསུམ་ཅན་པར་ཨ་གོང་དུ་མཚམས་སྦྱར་མ་སྦྲིག་མེད་ལ་
ཨ་ནུའི་ཨ་བཅུག་པའི་དངོས་བསྟན་བ་ཤུ་མ་ཞེས་པ་བཅུག།   ཡལ་འདབ་
དགུ་པའི།   ཉི་ཟླའི་འོད་ཟེར་ཉམས་བྱེད་རིན་ཆེན་རྣམས་དང་ས་སྐྱོངས་འོད་ལྡན་
གླང་པོ་དང་།   ཞེས་སོགས་ཨེ་ཁོ་ཀ་གཅིག་གི་ཕྲེད་སྨྲ་མའི་ཀང་པ་དང་པོར་
འོད་ཟེར་གྱི་སྐད་དོད་ཡིག་འབྲུ་བཞི་ཅན་པར་སྣ་ན་ཏྲཱ་ཀཾ་ཞེས་པ་བཅུག།   ཡལ་
འདབ་བཅུ་གཉིས་པར།   དེ་ནས་དུས་ཀྱིས་བདག་གི།   ཞེས་སོགས་ཨེ་ཁོ་
ཀ་གཅིག་གི་ཕྲེད་ཕྱི་མའི་ཀང་པ་དང་པོའི་ཞེས་བྱ་བའི་སྐད་དོད་ཡིག་འབྲུ་
གསུམ་ཅན་པར་ནཱ་མཱི་ཡ་ཞེས་པ་བཅུག།   ཡལ་འདབ་བཅུ་བཞི་པའི།   ཟང་
ཟྱེད་རྣམས་ཀྱིས་མཐོང་བར་གྱུར།   ཅེས་པའི་མཐོང་བར་གྱུར་གྱི་སྐད་དོད་ཅན་
པ་དྲྀཥྚ་སོགས་ཡིག་འབྲུ་དྲུག་བཅུག།   ཡལ་འདབ་སུམ་ཅུ་རྩ་དྲུག་པའི་རྒྱ

སྐད་ཙ་དུ་ར་སོགས་རྐང་བ་གཅིག་བོད་སྐད་དུ་མ་བསྒྱུར་འདུག་པ། ཡོངས་སུ་སྤྱོད་པ་བཞི་ཡི་ནི། ཞེས་པ་བསྒྱུར། ཡལ་འདབ་ཞེ་གཅིག་པའི་བྲུདྡྷ་སོགས་བོད་སྐད་རྐང་པ་གཅིག་ཆད་པ། འཇིགས་པ་རྫོགས་ཤིང་ཁོང་ཆུད་པས། ཞེས་པར་བསྒྱུར། ཡལ་འདབ་བཞི་བཅུ་རྩ་བདུན་པའི། དེ་དག་དྲིགས་པས་ཁེངས་པ་དང་། ཞེས་པའི་སྐད་དོད་ཆད་པ་རྐང་བ་གཞན་རྣམས་དང་མཐུན་པར་ཁ་སྐོ་ཕན་པའི་སྡེབ་སྦྱོར།

ཡལ་འདབ་ལྔ་བཅུ་རྩ་གཉིས་པའི། ཆོས་མིན་མང་བའི་རྒྱལ་སྲིད་ཅེས་སོགས་རྐང་པ་གཉིས་ཀྱི་སྐད་དོད་ཆད་པ་རྐང་ པ་གཞན་གཉིས་དང་མཐུན་པར་ཁ་སྐོ་ཕན་པའི་སྡེབ་སྦྱོར། ཡལ་འདབ་དྲུག་ཅུ་རྩ་དྲུག་པའི། མཁའ་དང་རལ་གྱི་འགྲོགས་པ་ཡི། ཞེས་པའི་སྐད་དོད་རྐང་པ་གཅིག་ཆད་པ་རྐང་པ་གཞན་གསུམ་དང་མཐུན་པར་ཁ་སྐོ་ཕན་པའི་སྡེབ་སྦྱོར། ཡལ་འདབ་བདུན་ཅུ་རྩ་དགུ་པའི། རང་གི་གནས་སུ་ས་བདག་དེ། ཞེས་པའི་སྐད་དོད་རྐང་པ་གཅིག་ཆད། ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་བཞི་པའི། གཏེར་ནི་བརྒྱ་ཡིས་བསྐོར་བ་དེ། ཞེས་པའི་སྐད་དོད་རྐང་པ་གཅིག་ཆད་པ་རྣམས་འདར་ལོ་ཙཱ་བའི་རྣམ་དཔྱོད་ལས་ལེགས་པར་འདོན་ཞིང་།

ཡང་ཡལ་འདབ་གཉིས་པའི། ཀྱི་མ་ས་སྐྱོང་དཔལ་གྱི་སྟེས། ཞེས་སོགས་ཤོ་ལོ་ཀ་གཅིག་གི་རྒྱ་སྐད། ཡལ་འདབ་དྲུག་པའི་ནང་གི། དེ་ནས་གསུམ་པའི་གྲོང་ཁྱེར་བི་དྷ་རྱ་རང་བཞིན། ཞེས་སོགས་ཤོ་ལོ་ཀ་གཅིག་དང་། ཡལ་འདབ་ཞེ་བརྒྱད་པའི་ནང་གི། དེ་ཡིས་གསལ་བར་འདི་བརྗོད་ཆོ། ཞེས་སོགས་ཤོ་ལོ་ཀ་གཉིས། ཡལ་འདབ་རེ་གཉིས་པའི་ནང་གི། ས་ཡི་བདག་པོ་ཚངས་པས་བྱིན། ཞེས་སོགས་ཤོ་ལོ་ཀ་གཉིས་ལ་སྐད་ཤན་སྦྱར་ཡོད

པའི་གླེགས་བམ་རྣམས་སྒོ་མཐུན་པར་རྒྱ་སྐད་མི་འདུག་པས། ཡལ་འདབ་གཉིས་པའི་ཨེ་ཡོ་ཀ་གཅིག་བུ་སྐྱེལ་སྦྱོར་དབང་ཛོ་ཛེ། ཡལ་འདབ་དྲུག་པའི་ཨེ་ཡོ་ཀ་གཅིག་བུ་སྐྱེལ་སྦྱོར་ཅི་དབང་ཛོ་ཛེ། ཡལ་འདབ་ཉེ་བརྒྱད་པའི་ཨེ་ཡོ་ཀ་གཉིས་པོ་སྐྱེལ་སྦྱོར་ཁ་སྒོ་དཡང་མ། ཡལ་འདབ་རེ་གཉིས་པའི་ཨེ་ཡོ་ཀ་གཉིས་པོ་སྐྱེལ་སྦྱོར་ཀང་བཀྱའི་སྒོ་ནས་ངེད་རང་གིས་རྒྱ་སྐད་དུ་བསྒྱུར། ཡལ་འདབ་དགུ་པའི་ནང་གི། མེ་དང་མཚུངས་པའི་འོད་ལྡན་པ། ཞེས་པའི་ཚེས་སུ་རྒྱ་དཔེར་དེ་ཀྲྀ་སོགས་ཚིག་ཀང་གཅིག་གི་རྒྱ་སྐད་མ་གདོགས་བོད་སྐད་མི་འདུག་པར། གསལ་བས་དེ་རྣམས་བར་ཁྲབ་པས། ཞེས་བོད་སྐད་དུ་བསྒྱུར། ཡལ་འདབ་རེ་དྲུག་པའི་ནང་གི། དེ་ལ་དུང་གི་ཁ་ཞེས་པ། ཁྲི་ནི་འཛིགས་སུ་རུང་བ་ཡོད། ཅེས་པ་འདི་ཚེགས་མཚམས་སུ་རྒྱ་དཔེར་པནྠྲ་སྠི་སོགས་ཚིག་ཀང་གཉིས་ཀྱི་སྐད་དོད་འདུག་པ་སྐད་ཤན་སྦྱར་ཡོད་པའི་གླེགས་བམ་ཆོར་བོད་སྐད་དུ་མ་བསྒྱུར་བར་ས་སྟོང་བཞག་འདུག་ཅིང་། ཐམས་ཅད་མཁྱེན་པ་བཙོང་ཁ་པ་ཆེན་པོ་འི་གསུག་དཔེ་སྐད་ཤན་སྦྱར་མེད་པ་དེར་ཡང་ཚིག་ཀང་གཉིས་པོ་དེ་མི་འདུག་པས། ལམ་གནས་མཐར་དག་གང་མཐོང་བ། གདོན་མི་ཟ་བར་རྣམ་འཇོམས་པ། ཞེས་པའི་ཚིག་ཀང་གཉིས་པོ་འདི་རྒྱ་དཔེ་ལས་བོད་སྐད་དུ་བསྒྱུར་ཡོད་པ་སྨྲར་ཡང་རྒྱ་བོད་ཀྱི་ཡི་གེ་ཁྲངས་བཙུན་པའི་རིགས་རྙེད་ན་མཁས་པ་རྣམས་ཀྱིས་ལོ་ཚན་འདི་རྣམས་ལ་དག་མི་དག་གི་དཔྱད་པ་མཛད་དགོས་ཡོད་ཅིང་། རྣམ་དབྱེད་ཀྱི་རྩལ་དང་ལྡན་པ་རྣམས་ལ་སྐད་ཤན་སྦྱར་ཡོད་པ་འདི་བློ་བསྐྱེད་ཤིན་དུ་ཆེ་བ་འོང་འདུག་པས་པར་དུ་བསྐྲོས་ཤིང་མཚན་བུ་རྣམས་བཀོས་ཚེ་གླེགས་བམ་ཐྲིག་པོར་སོང་ངེས་པས། རྩལ་ཁྲོད་དུ་གཡོ་འགྱུལ་མེད་པར་འཛེག་པ་རྣམས་ལ་མཚན་གྱི་དགོས་པ་མེད་

ཅིང་། བློ་གྲོས་དང་བརྩོན་པར་ལྡན་པ་རྣམས་ཀྱིས་མཚན་བྱ་རྣམས་སྤྱར་བྲིས་ཚོག་པའི་དབང་དུ་བྱས་དེ་པར་གྱི་མ་དཔེའི་སྤུ་གོན་བྱས་པ་བཞིན་ས་སྐྱོང་ཕྱུག་མཛོད་འཕྲིན་ལས་རྒྱ་མཚོས་བཀོད་པས་ཁྱབ་པར་བྱས་ནས་ཞུས་དག་པ་རབ་འབྱམས་པ་དགེ་འདུན་ཆོས་འཕེལ། ལོ་ཙཱ་བ་ཀུན་དགའ་དབང་ལྡན། པར་ཡིག་པ་བྱམས་གླིང་པ་ལེགས་ལྡན་སློབ་མར་བཅས་པ་བཞི་དང་། པར་མཁན་མཁས་པ་ཡོན་བདག་ཚོ་རིང་སོགས་པར་མཁན་རྣམས་ཀྱིས་ལུས་ངག་ཡིད་གསུམ་འབད་པས་བསྒྲིམས་དེ་ཁྲི་མི་ཞེས་པ་ཤིང་ཕོ་འབྲུག་ལོའི་ཟླ་བ་ལྔ་པའི་ཚེས་ལྔ་རེས་གཟའ་ཕུར་བུ་དང་སྐར་མ་རྒྱལ་གྱི་འགྲུབ་སྦྱོར་ཡོད་པའི་ཉིན་དབུ་བཙུགས། ཤིང་མོ་སྦྲུལ་གྱི་ལོའི་ཁ་སྐར་གྱི་ཟླ་བའི་ཚེས་བཅོ་ལྔ་ལ་ལེགས་པར་གྲུབ་པའི་དགེ་བས་ལུས་ཅན་མཐའ་དག་རྣམ་འདྲེན་བྱ་རམ་ཤིང་པ་སློབ་པ་ལམ་གྱི་གནས་སྐབས་ཀྱི་མཛད་པ་དང་མཚུངས་པར་བསླབས་དེ་འབྲས་བུ་ཆོས་གཟུགས་ཀྱི་སྐུ་མངོན་དུ་བྱེད་པའི་དགའ་སྟོན་མཆོག་ལ་སྤྱོད་པར་གྱུར་ཅིག།

ཨོཾ་སུ་པྲ་ཏིཥྛ་བཛྲ་ཡེ་སྭཱ་ཧཱ།། དགེ་ལེགས་འཕེལ།།

བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་བརྗོད།

CHAPTER I.

ལས་བཅུ་སྤྱོད་པའི་རྟོགས་བརྗོད་ནི།

གང་ཞིག་བདེ་སྨག་ཏུ་བསྐྱུན་མགྲ་ཡི་དབའ་རླབས་མེད་དུ་བྱུང་བའི་འཁྲིང་བ་སྐྱེ།
སྙིང་སྟོབས་སྐྱོ་བའི་ས་དང་རང་བཞིན་དྲི་མེད་ཡེ་ཤེས་གསལ་བའི་བསམ་པ་ཅན།
དེ་དག་གིས་ཀྱང་སྐྱབ་བྱེད་རྒྱལ་པོའི་བཀའ་ཡི་སྙིང་ཡིག་ལས་ཀྱི་འཛིང་ཆགས་པ།
བཀྲ་བ་དག་ནི་འགྲོད་པར་མི་འགྱུར་དོགས་འགྲུས་ཀྱི་རྒྱུ་ཚོའི་གཏེར་གྱིས་བཞིན། 1

དེ་བཞིན་མཉན་ཡོད་དུ་ནི་འཕྱར་ཉམས་ཀྱིས།
བསྐུལ་བར་གྱུར་པའི་སྒྲ་སྟེགས་བུད་མེད་དག།
སྟོན་པའི་གྲགས་པ་གཞོན་པར་བརྩོན་གྱུར་པ།
ཕྱུས་དང་བཅས་པ་དཀྲུལ་པར་སླུང་བར་གྱུར། 2

དེ་ནས་དག་བྱེད་སྐྱང་གི་ཚོགས། ཡོངས་སུ་འཕེན་བྱེད་དྲི་མེད་རྒྱ།
རྫིང་བུ་གདུང་མེད་ཅེས་བྱ་བ། རིན་ཅེན་ཚོགས་ཀྱི་ཕྲེང་སྣས་ཅན། 3

གསེར་གྱི་པད་ཚོགས་གེ་སར་གྱིས། ཀང་དྲུག་སེར་པོར་བྱེད་པ་ཡིས།
པདྨའི་ཁྲིར་གནས་བཅོམ་ལྡན་འདས། དགེ་སློང་ཉམས་ཀྱིས་ཡོངས་བསྐོར་བ། 4

बोधिसत्त्वावदानकल्पलता।

दशकर्म्मप्लुत्यवदानम्।

नमो रत्नत्रयाय[1]।

ये हेलोच्छलितप्रभावलहरीजाताद्भुतश्रेणयः
सत्त्वोत्साहभुवः स्वभावविमलज्ञानप्रकाशाशयाः।
आज्ञालेख्यलिपिं विधातृनृपतेः संसक्तकर्म्मावलीम्
चित्रं तेऽपि न लङ्घयन्ति कुटिलां वेलामिवाम्भोधयः॥ १॥

श्रावस्त्यां प्रेरितास्तद्वद्दृष्टैस्तीर्थिकाङ्गनाः।
कीर्त्तिभङ्गोद्यताः शास्तुः सदेहा नरकेऽपतन्॥ २॥

ततः पुण्यनदीसंघपरिक्षिप्तामलाम्भसि।
सरस्यनवतप्ताख्ये रत्नसोपानसञ्चये॥ ३॥

हेमाब्जपुञ्जकिञ्जल्कपिञ्जरीकृतषट्पदे।
पद्मासनस्थो भगवान् भिक्षुभिः परिवारितः॥ ४॥

---

१ Orig. omits the invocation. has नमोबुद्धाय।

ཐམས་ཅད་མཁྱེན་པ་ལས་ཀྱི་རྒྱུད། འགོས་བྲ་མིན་པར་སྟོན་མཛད་ཅིང་།
རང་ལས་སྤྱོད་པ་ཉམས་པར་བཀྲ། གསུང་བར་ཡང་དག་བརྗོད་པར་གྱུར། 5

ལས་ནི་འཆད་པའི་གནས་སྐབས་དེར། བཅོམ་ལྡན་གསུས་ལ་མཉེས་ཀ་ཤིར་པས།
ཤཱ་རིའི་བུ་ནི་འཁོར་པ་དག། མཽ་གལ་བུ་ལ་རབ་ཏུ་བསྐོས། 6

བྱ་རྒོད་ཕུང་པོའི་རི་གནས་ལ། ཁབ་དང་སྐྱེད་པས་སྨྲར་མ་ནི།
བཀྲ་ཤིས་རྫོགས་པར་བྱེད་པ་ཡིན། ཤཱ་རིའི་བུ་ཅན་དེ་ཡིས་ཕྱིན། 7

སོར་མོ་རངས་བྲུས་འདྲུབ་པ་ཡིས། ལས་ཀྱི་མཐུ་ཉིད་མ་ཡིན་པ།
བྱ་བ་འཁོར་བས་འཛིགས་པ་ཡིས། སྐྱུར་དང་བཅས་པ་དེ་ལ་སྨྲས། 8

ཚུར་ཤོག་ཚུར་ཤོག་མགྱོགས་པར་རོ། བཅོམ་ལྡན་ཀུན་མཁྱེན་ཛིང་བུ་ནི།
གདུང་བ་མེད་པར་དགེ་སློང་ལ། ལས་ནི་ཉེ་བར་སྟོན་པར་བརྗོན། 9

ལས་ལ་ཆགས་ནས་སྐྱུར་མིན་ཞིང་། ཐོགས་པར་གལ་ཏེ་ཁྱོད་བསྐྱབས་ན།
རྫུ་འཕྲུལ་ཆེན་པོས་ཁྱོད་སྣང་བྱ། བདག་གིས་སྟོབས་ཡང་བལྟ་བར་བྱོས། 10

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། ཤཱ་རིའི་བུ་ཡིས་དེ་ལ་སྨྲས།
རེ་ཞིག་བདག་གི་ཐུ་བ་ཡོང་། དེ་ནས་ཁྱོད་སྟོབས་བདག་གིས་ཤེས། 11

ཞེས་སྨྲས་བྱ་རྒོད་ཕུང་པོ་ཡི། རི་ཡི་རྩེ་ལ་དེ་ཡིས་བཏགས།
མོ་གལ་བུ་ཡིས་བལྟངས་པ་ཡི། ཚེ་ན་རི་ནི་འགུལ་བར་གྱུར། 12

सर्व्वज्ञः कर्म्मतन्त्रस्य दर्शयन्नविलङ्घ्यताम् ।
स्वकर्म्मश्रुतिवैचित्र्यं वक्तुं समुपचक्रमे ॥ ५ ॥

कर्म्माख्यानक्षणे तस्मिन् भगवान् भक्तवत्सलः ।
शारिपुत्रसमाह्वाने मौद्गल्यायनमादिशत् ॥ ६ ॥

सूच्या सूत्रेण संघाटीकुर्व्वाणं रचनाचिताम्[1] ।
स शारिपुत्रमासाद्य गृध्रकूटाचलाश्रमे ॥ ७ ॥

अङ्गुलीपञ्चकेनैव सूचीकर्म्म प्रभाववान् ।
विलम्बभीत्या कृत्वास्य तमभाषत सत्वरः ॥ ८ ॥

एह्येहि तूर्णं भगवान् सरस्यनवतप्तके ।
कर्म्मोपदेशं भिक्षूणां सर्व्वज्ञः कर्त्तुमुद्यतः ॥ ९ ॥

कर्म्मव्यग्रतयाक्षिप्रं विलम्बं विदधासि चेत् ।
तन्महर्द्धा नयामि त्वां विपुलं पश्य मे बलम् ॥ १० ॥

इति तस्य वचः श्रुत्वा शारिपुत्रस्तमब्रवीत् ।
अचलं नय मे तावत्ततो जानामि ते बलम् ॥ ११ ॥

इत्युक्त्वा गृध्रकूटाद्रिशिखरे स बबन्ध तत्[2] ।
मौद्गल्यायनकृष्टे च तस्मिन् गिरिरकम्पत ॥ १२ ॥

---

१ H. रचनोचितां ।
२ W₂ suggests शरीरं as the antecedent of तत् ।

ཤཱ་རིའི་བུ་ཡིས་ལྷུན་པོ་ལ། རི་ནི་ལྷུང་བར་འཇིགས་ནས་བདགས།
དེ་ནས་དེ་ཡིས་གླངས་པའི་ཚེ། ལྷ་ཡི་གནས་ཀུན་རྣམ་པར་གཡོས། 13

དེ་ནས་སྟོན་པའི་གདན་གསེར་གྱི། པད་ཙ་ནོར་བུའི་རང་བཞིན་ལ།
ཤཱ་རིའི་བུ་ཡིས་དེ་བཞིན་བདགས། ཕ་རོལ་ནས་མེད་ཉིད་དུ་གྱུར། 14

རྫུ་འཕྲུལ་རིམ་པས་མི་གཡལ་བ། ཤཱ་རིའི་བུ་ཡིས་ཕམ་བྱས་པ།
ཞིན་ཏུ་སྤྲ་བར་དེས་ཕྱིན་ཚེ། བཅོམ་ལྡན་འདས་ཀྱིས་དྲུང་དུ་སོང་། 15

དེ་དག་རྫུ་འཕྲུལ་ཆེས་བསྐྱོད་པས། ཀླུ་ནི་དགའ་བོ་ཉེ་དགའ་དག།
ས་འོག་ནས་ནི་རབ་འཐོན་དེ། འཇིགས་ནས་བཅོམ་ལྡན་ལ་ཕྱག་བཙལ། 16

ཤཱ་རིའི་བུ་ནི་རྒྱལ་བའི་མཐུ། དེ་ནས་དགེ་སློང་རྣམས་ཀྱིས་དྲིས།
ཡེ་ཤེས་སྤྱན་ལྡན་བཅོམ་ལྡན་གྱིས། སྔོན་བྱུང་དག་ནི་རབ་གསུངས་པ། 17

བྲ་ཧྨ་ཎ་སེར་སྔོན་བྱུང་བ། དྲང་སྲོང་དུང་དང་བྲིས་པའོ།
དེ་དག་ཆར་དང་ཆར་མེད་ནི། འགལ་བརྗོད་ཕན་ཚུན་འགྲན་པར་གྱུར། 18

དེ་ནས་ནམ་ཞིག་དུང་ཁྲིས་པའི། གང་པས་རལ་པ་ལ་རེག་པ།
དྲིས་པས་དེར་སྐྱས་ཉི་ཤར་ཚེ། ཁྱོད་ཀྱི་མགོ་བོ་བྲེ་གྱུར་ཅིག། 19

དུང་གིས་སྐྱས་པ་བདག་ཚིག་གིས། ཉིན་བྱེད་འཆར་བར་མ་གྱུར་ཅིག།
དེས་འདི་བརྗོད་ཚེ་མཛེས་པ་ཡི། འགྲོ་བ་ཐུན་པ་དང་བཅས་གྱུར། 20

गिरिपातभयान्मेरौ[1] शारिपुत्रो बबन्ध तत्।
तेन कृष्टे ततोऽप्यस्मिन् विचचाल सुरालयः ॥ १३ ॥

शास्तुरासनहेमाब्जनाले मणिमये ततः।
शारिपुत्रेण बद्धं तत् परस्याशक्यतां ययौ ॥ १४ ॥

ऋद्धिक्रमेण मौद्गल्यः शारिपुत्रेण निर्ज्जितः।
तस्मिन् पूर्व्वतरं प्राप्ते ययौ भगवतोऽन्तिकम् ॥ १५ ॥

तयोर्महर्द्धिविक्षोभान्नागौ नन्दोपनन्दकौ।
पातालादुत्थितौ भीत्या भगवन्तं प्रणेमतुः ॥ १६ ॥

जयिनः शारिपुत्रस्य प्रभावमथ भिक्षुभिः।
पृष्टो बभाषे भगवान् प्राग्वृत्तं ज्ञानलोचनः ॥ १७ ॥

अभूतां शङ्खलिखितौ वाराणस्यामृषी पुरा।
वर्षावर्षविवादेन संघर्षोऽभूत्तयोर्मिथः ॥ १८ ॥

कदाचिदथ शङ्खेन पद्भ्यां स्पृष्टजटः क्रुधा ॥
लिखितः प्राह तं मूर्द्धभेदः सूर्योदयेऽस्तु ते ॥ १९ ॥

शङ्खोऽवदन्मद्वचसा नोदेष्यति दिवाकरः।
इत्युक्ते तेन सुचिरं सान्धकारमभूज्जगत् ॥ २० ॥

१ Orig. मेरो।

དྲིས་པས་དེ་ལ་བརྗེ་བ་ཡིས། ས་ཡི་རང་བཞིན་མགོ་བོ་བྲུས།
ཉི་མ་ཤར་ཚེ་འཕྲུལ་ལ་ནི། ནོར་འཛིན་དུམ་བུ་བགྱུར་གྱུར་ཏོ། 21

སྐྱེ་བ་གཞན་ལ་དུང་དེ་རིང་། མཽ་གལ་གྱི་བུ་ཉིད་གྱུར།
བྲིས་པ་ཤཱ་རིའི་བུ་འདི་སྟེ། དེ་ལས་དེའི་ཚེའང་གྱོལ་བར་གྱུར། 22

དེ་དག་གིས་ནི་སྔོན་བྱུང་མཐའ། འདི་ནི་ཀུན་མཁྱེན་གྱིས་གསུངས་ཚོ།
ལས་ཀྱི་རྒྱུད་ནི་བཀྲ་བ་དེ། སྣར་ཡང་ཐུབ་པ་ནམས་ཀྱིས་དྲིས། 23

བཅོམ་ལྡན་ལས་ནི་གང་དག་གིས། འབྲས་བུ་མེད་བྱུང་འབྱུང་བ་འདི།
ཡེ་ཤེས་རང་བཞིན་ཁྱོད་ཀྱི་ཡང་། ལུས་ལ་གང་གིས་རིག་པར་གྱུར། 24

རྡོ་བའི་ཟེར་མས་ཁྱོད་ཞབས་ཀྱི། མཐེ་བོང་སྣད་པ་ཅི་ཡིས་སྣད།
སེང་ལྡེང་ཐུར་མས་ཞབས་ཕྱུག་ནས། མི་དང་བཅས་པ་འདི་ནི་ཅི། 25

བསོད་སྙོམས་མ་ཐོབ་ལྷུང་བཟེད་ནི། སྟོང་པར་རིང་ཁྱོད་ལ་སྨད་ཅི།
མཛེས་མ་རབ་བྱུང་དེ་ཡིས་ནི། རྫུན་གྱིས་ཁྱོད་ལ་སྨད་པ་ཅི། 26

མི་བདེན་སྨད་དང་བཅས་གྱུར་པས། ཁྱོད་ལ་སྨྲ་བར་བྱེད་པ་ཅི།
བེ་རན་ཏུ་ཙ་ཁྱོད་ཀྱིས་སྤྱོད། ཀོ་ཊ་ར་ཡི་ནས་གསོལ་ཅི། 27

कल्पितं लिखितेनास्य कृपया मृण्मयं शिरः ।
सूर्य्योदयेऽथ सहसा शतधा वसुधां ययौ ॥ २१ ॥

जन्मान्तरे स शङ्खोऽद्य मौद्गल्यायनतां गतः ।
लिखितः शारिपुत्रोऽपि[१] तद्विजेता तदाप्यभूत्[२] ॥ २२ ॥

सर्व्वज्ञेनेति कथिते वृत्तान्ते प्राक्तने तयोः ।
तत्कर्म्मतन्त्रवैचित्र्यं पप्रच्छुर्मुनयः पुनः ॥ २३ ॥

भगवन् कर्म्मणां केषामङ्कुतोऽयं स्फुटोद्गमः ।
तव ज्ञानमयस्यापि येन संस्पृश्यते वपुः ॥ २४ ॥

पादाङ्गुष्ठः क्षतः कस्मात्तव पाषाणधारया ।
विद्धः खदिरशूच्यायं सव्रणश्चरणश्च किम् ॥ २५ ॥

शून्यपात्रः किमप्राप्य भिक्षामद्यागतो भवान् ।
मिथ्याक्षिप्तोऽसि सुन्दर्य्या किं प्रव्राजिकया तया ॥ २६ ॥

वन्ध्या मानविका[३] किन्ते सापवादाभवन्मृषा ।
भुक्ताः किं कोद्रवयवा[४] वैरन्तेषु त्वया पुरा ॥ २७ ॥

---

१ W_1 and W_2 ०पुत्रोऽयम् ।
२ Orig. तदाप्यभूत् ।
३ मानविकाशब्दस्तु वाकारयुतएव ।
४ Orig. कोटर० । W_2 कोढर० or कोड्डर० ।

བཅོམ་ལྡན་འདས་ཀྱིས་ལོ་དྲུག་ནི། དཀའ་བ་སྤྱད་པར་གྱུར་པ་ཅི །
ཁྱོད་ཀྱི་ལུས་ལ་རབ་གནོད་གྱིས། ནད་གྱིས་ཅི་ཡི་སླད་དུ་རེག། 28

ཤཱ་ཀྱའི་རིགས་ནི་འཇིག་པའི་ཚོ། ཁྱོད་ཀྱི་དབུ་ནི་བསྐྱུང་གྱུར་ཅི།
ཅི་སླད་ཁྱོད་ཀྱི་ལུས་མཆོག་ལ། རླུང་གིས་སྐྱ་རྒྱབ་བསྐྱུང་བར་གྱུར། 29

དེ་དག་ཉམས་ཀྱིས་འདི་དྲིས་ཚོ། བཅོམ་ལྡན་འཛུམ་བཅས་དེར་གསུངས་པ།
ཉོན་ཅིག་རྒྱུན་ཆད་མེད་པར་ནི། ཆོས་པར་བཀྲ་བ་ལས་ཀྱི་རྒྱུན། 30

ལུས་ཅན་ལས་ཀྱི་འཆིང་བ་ནི། ཆས་ཞུགས་གཡོག་པོ་དམ་པ་བཞིན།
འགྲོ་ན་ཕྱི་ནས་འགྲོ་བར་བྱེད། སྡོད་ན་སྡོན་དུ་སྡོད་པར་བྱེད། 31

ནགས་ཉམས་དག་ཏུ་འཇུག་ཅིང་ཕྱོགས་སུ་ཉམས་པར་གྱུ་ལ་རྒྱ་གཏེར་འགོང་པར་བྱེད།
རི་ཡི་དབང་ཕྱུག་ལ་འཇོག་བཀྲ་ཕྲིན་གནས་ནི་ཀུན་དུ་མཐའ་ནས་མངོན་པར་འཇུག། 32

ས་འོག་སྣང་བ་མེད་པའི་ཡུལ་དུ་རབ་འཇུག་ལས་ཉམས་དུས་ཀྱི་བ་རླབས་བཞིན།
འདི་དག་དེག་དུ་སྐྱེ་བའི་རྗེས་སུ་འཇུག་པའི་ལམ་ནི་གང་ནའང་འགོག་པ་མེད།
ལས་ཀྱི་འཕྲི་ཤིང་རིང་པོ་གསར་པ་ཉིད་ལ་རྟག་ཏུ་འབྲས་བུ་སྨིང་པས་ཁྱབ།
ངོ་མཚར་དང་བཅས་ལུས་ཅན་ལྡན་ཅིག་སྤྱོད་ཅིང་དེ་ལའང་ངེས་པར་གཡོ་བ་མེད།
གང་ཞིག་དགེ་བ་ཉམས་ཀྱིས་བཀུག་དང་ཡོངས་སུ་དཀྲིས་དང་ཉམས་པར་གསལ་བ་དང་།
རབ་བཅད་གཅུས་དང་ངེས་པར་བདོར་དང་ཕྱི་མར་བྱས་ཀྱང་ཟད་པ་ཉིད་མི་འགྱུར། 33

वर्षाणि षट् भगवतः किमभूद्[1] दुष्करक्रिया ।
प्रस्कन्दि[2]व्याधिना स्पृष्टं कस्माच्च भवतो वपुः ॥ २८ ॥

शिरोऽर्त्तिरभवत् किं ते तस्मिन् शाक्यकुलक्षये ।
वायुना स्पृष्टः खेदोऽभूत् कस्माद्दिव्यतनोस्तव ॥ २९ ॥

इति तैर्भगवान् पृष्टस्तानभाषत सस्मितः ।
श्रूयतामनवच्छिन्नं वैचित्र्यं कर्म्मसन्ततेः ॥ ३० ॥

गच्छन्ति गच्छतः पश्चात् पुरस्तिष्ठन्ति तिष्ठतः ।
सद्भृत्या इव सन्नद्धा कर्म्मबन्धाः शरीरिणाम् ॥ ३१ ॥

गाहन्ते गहनानि दिक्षु विचरन्त्युल्लङ्घयन्त्यम्बुधिम्
आरोहन्ति गिरीश्वरानभिसरन्त्याक्रम्य शक्रालयम् ।
पातालं प्रविशन्त्यशोकविषयं कर्म्माणि कालोर्म्मिवत्
नास्त्येषामनिशं जनानुसरणे मार्गावरोधः क्वचित् ॥ ३२ ॥

दीर्घा कर्म्मलता नवेव सततं व्याप्ता पुराणैः फलैः
साश्चर्य्या सहचारिणी तनुभृतां तत्राप्यलं निश्चला ।
याक्लिष्टा परिवेष्टिता विघटिता प्रोत्पाटिता मोटिता
निर्घृष्टा कणशः क्षतापि कुशलैर्नैव प्रयाति क्षयम् ॥ ३३ ॥

---

१ W_1 किमेतद् दुष्करक्रिया ।

२ W_1 प्रस्कन्दी ।

གང་ཞིག་ཟླ་བ་མཛེས་པའི་ལུས་ལ་སྐྱོན་གྱི་ཐིག་ལེ་ནག་པོ་དང་།
གང་ཞིག་མ་རུངས་རྣམ་པའི་སྦྲུལ་ནག་ནོར་བུ་འོད་ཟེར་རལ་ཅན་འཛིན།
ལྷ་ཚོགས་གཟུགས་ཀྱིས་བཀྲ་བའི་སྐྱོད་པ་ལུས་ཅན་རྣམས་ལ་སྟོན་བྱེད་པ།
འདི་ནི་བཀྲ་བའི་རིམ་པས་ཡོངས་སྨིན་ལས་ཀྱི་སྦྲུལ་པའི་རི་མོ་ཡིན། 34

གཞལ་དུ་མེད་པའི་ནོར་སྐྱེད་ཅིང་། སྲུ་མང་ཆུང་མ་དང་ལྡན་པའི།
ཁྱིམ་བདག་ཁར་བ་ཊ་ཞེས་པ། ཀར་པ་ཊཊ་ནི་སྟོན་བྱུང་གྱུར། 35

དེ་ཡིས་མཛའ་བས་བསྐྱངས་པ་ཡི། ཁྱིམ་པ་རྒུག་དྲ་ཞེས་བྱ་བ།
ནོར་མ་བགོས་པའི་སྤུན་ཟླ་ནི། མ་མི་གཅིག་པ་དེ་ཁྱིམ་གནས། 36

ནམ་ཞིག་ཁྱིམ་བདག་དེ་ལ་ནི། ཁྱིམ་བསམ་གཏམ་ཀྱི་བར་སྐབས་སུ།
ཆུང་མ་ནག་མོ་ཞེས་བྱ་བ། གྲུ་གྱུ་ཅན་གྱིས་དལ་བུས་སྨྲས། 37

ཛེ་ཡི་སྨྲས་པོ་རྫོངས་པ་ལས། བག་མེད་དྲང་པོར་ཁྱོད་ཀྱི་ནི།
ཁྱིམ་དུ་མ་མི་གཅིག་པས་སྤུན། དུག་གི་ལྷོན་པ་རྣམ་པར་བསྐྱེད། 38

འགོད་བྲལ་གཅིག་པུ་འདི་ཡིས་ཀྱང་། འགོད་ལྡན་བུ་མང་ཁྱོད་ཀྱི་ནི།
བགོས་བ་མིན་པའི་ནོར་དག་ལས། ཕྱེད་ནི་ཚུལ་གྱིས་ལེན་པར་འགྱུར། 39

ནད་བཞིན་འཕེལ་བ་འདི་ལ་ནི། གསད་པ་ཁོ་ན་སྨན་གྱི་མཆོག
གཉེན་ནི་གཅོད་པ་དག་ལས་ཀྱང་། མི་རྣམས་ནོར་གཅོད་བཟོད་པར་དཀའ། 40

कान्तः काये वहति मलिनं दोषबिन्दुं यदिन्दुः
क्रूराकारः किरणजटिलं यन्मणिं कृष्णसर्पः ।
नानारूपैः शबलचरितं देहिनां दर्शयन्ती
सेयं चित्रक्रमपरिणता कर्म्मनिर्म्माणलेखा ॥ ३४ ॥

अभूद्गृहपतिः पूर्व्वं कर्पटे खर्व्वटाभिधः ।
अप्रमेयधनोत्पत्तिर्बहुपुत्रकलत्रवान् ॥ ३५ ॥

अविभक्तधनस्तस्य भ्राता वैमात्रकः शिशुः ।
मुग्धनामा गृहे तस्थौ वात्सल्यात्तेन पालितः ॥ ३६ ॥

कदाचित्तं गृहपतिं कालिका नाम वल्लभा ।
उवाच कुटिला स्वैरं गृहचिन्ताकथान्तरे ॥ ३७ ॥

आर्य्यपुत्र त्वया गेहे सत्त्वेन[१] प्रमादिना ।
मोहादसोदरो भ्राता विषवृक्षो विवर्द्धितः ॥ ३८ ॥

एकोऽपि बहुपुत्रस्य व्ययिनस्तव निर्व्ययः ।
अविभक्तधनादस्य न्यायेनैष हरिष्यति ॥ ३९ ॥

अस्य व्याधेरिवैतस्य वधएवायमौषधम् ।
बन्धुच्छेदादपि नृणां धनच्छेदो हि दुःसहः ॥ ४० ॥

---

१ W_{2} नाममादीना ।

ཟབ་མོའི་འདུ་འགོད་རྩོམ་པ་ཡིས། འཕྲོར་བར་སྐྱེ་བ་འོས་གྱུར་པ།
ཆེན་པོ་གྲོད་པ་ལྷུང་གྱུར་ན། གཉིས་འཕྲུང་དབང་པོ་འགྲེལ་བ་བཞིན། 41

ཞེས་པ་དེ་ཡི་གདུག་པའི་ཚིག། ཐོས་ནས་བསམ་པ་རབ་འདར་ཞིང་།
མཛའ་བའི་ཞགས་པས་དབང་བྱས་ཏེ། དེ་ལ་གཙུགས་པས་རབ་སྨྲས་པ། 42

རེ་ཞིག་ཁྱོད་ཀྱིས་ཟན་པ་བཟོད། འོན་ཀྱང་འདི་ནི་ཤིན་ཏུ་སྡིག།
ཕྱི་རོལ་ཡན་ལག་ནོར་ཐོབ་སླད། ལྷན་སྐྱེས་ཡན་ལག་སྲུ་ཞིག་གཅོད། 43

ནོར་ལ་ཆགས་རྣམས་ནོར་དོན་དུ། སྡིག་པ་བསམ་པ་རིགས་མ་ཡིན།
ནོར་རྣམས་བསྲུང་བར་གྱུར་མོད་ཀྱང་། སྐད་ཅིག་གིས་ནི་བརླག་པར་འགྱུར། 44

ཡང་ཡང་ལས་རླབས་རྩོམ་པ་ཡིས། རབ་སྐྱེད་འཁྲུགས་པའི་རྣམ་འཕྲུལ་ཅན།
དཔལ་རྣམས་རི་གཟར་ཆུ་བོ་བཞིན། བགྲོད་པ་དག་ནི་སུ་ཡིས་བཟློག། 45

དེ་སྐད་སྨིན་ལེགས་བདག་གི་ཡིད། སྤྲིན་ལྷ་གསོད་ལ་ཡོངས་མི་འཇུག།
ནོར་ཉམས་བདག་ནི་འཚོ་བ་ཡང་། སྤྱོད་ཚུལ་ཉམས་ན་འགྲོ་བ་གང་། 46

ཞེས་སྨྲས་བདག་པོ་དེ་ཡིས་ཡིད། སྣ་ཚོགས་རིགས་པ་ཉེར་བསྟན་ནས།
དལ་གྱིས་སྡིག་པ་དག་ལ་ནི། དེ་ཡིད་མངོན་པར་ཕྱོགས་པར་བྱས། 47

མཛའ་སྒྲུམ་མང་པོས་བསྐྱེད་བ་ཡིས། ལྷན་སྐྱེས་སྤྱི་བོར་སྐྱེས་པ་བཞིན།
བུད་མེད་སྤུ་གྲིའི་སོ་ནོན་གྱིས། འཕྲལ་ལ་བཅད་ནས་འདོར་བར་བྱེད། 48

गम्भीरायव्ययारम्भसंसारोचितजन्मनाम्।
विपन्निपातो महतां द्विपेन्द्रपतनोपमः॥ ४१॥

इति तस्या वचः श्रुत्वा क्रूरमुत्कम्पिताशयः।
स तामुवाच प्रणयात् स्नेहपाशवशीकृतः॥ ४२॥

हितमुक्तं त्वया तावत् किन्त्वेतदतिपातकम्।
सहजं कश्चिनत्त्यङ्गं वहिरङ्गधनाप्तये॥ ४३॥

न युक्तमर्थशक्तानामर्थार्थं पापचिन्तनम्।
क्षणेनायान्ति वित्तानि रक्षितान्यपि संक्षयम्॥ ४४॥

मुहुःकर्म्मोर्म्मिसंरम्भसम्भवक्षोभविभ्रमाः।
गच्छन्त्यः केन वार्य्यन्ते शैलकुल्या इव श्रियः॥ ४५॥

तस्मान्न मे मनः सुभ्रु भ्रातृद्रोहे प्रवर्त्तते।
वित्तभ्रंशेऽस्ति मे वृत्तिर्वृत्तभ्रंशे तु का गतिः॥ ४६॥

इति तस्य ब्रुवाणस्य नानायुक्तिनिदर्शनैः।
शनैः सा विदधे पत्युः पातकाभिमुखं मनः॥ ४७॥

वर्द्धितान् बहुभिः खेदैः सहजान् मूर्द्धजानिव।
छित्त्वा हरन्ति सहसा क्षुरधाराः खराः स्त्रियः॥ ४८॥

རྨོངས་བས་བཙོམ་པའི་བློ་དང་བྲད་མེད་ནི།
འཁྲུག་ཅིང་གཞན་ལ་རབ་གདུག་བྲ་མིན་ལ།
འཇུག་པའི་སྐད་དུ་བརྗོད་པ་སྔོན་སྦྱོར་ཞིང་།
སྡིག་བ་ངེས་བར་ལྷུང་བར་བྱེད་བ་ཉིད། 49

གཉེན་དང་གྲོགས་ལ་ཆགས་བྲལ་ཞིང་། སེམས་ནི་རང་བདེས་རྒྱས་གྱུར་པ།
དཔལ་ལྡན་ནོམས་ལ་དུད་པ་བཞིན། བྲད་མེད་ཀྱིལ་ལ་བློ་གྲོས་གང་། 50

དེ་ནས་དེ་ཡིས་སྤྲུན་ཟླ་ནི། མེ་དོག་བདུ་སྐད་ལ་དྲངས་ནས།
མི་མེད་ནགས་སུ་ཇོ་བ་ཡིས། ཚོ་ངེ་ཐོས་པ་མེད་པར་བསད། 51

དེ་ཉིད་ང་ཡིན་སྡིག་པ་དེ། སྐྱེ་བ་སྟོ་མ་ཉམས་སྐྱུད་ནས།
མཐེ་བོང་སྣང་པའི་མཚན་ཉིད་ཅན། ད་ལྟའང་ལྷག་མའི་ཆ་ཤས་འཛིན། 52

དེར་དཔོན་དོན་གྲིན་ཞེས་བྱ་བ། གཟིངས་ནི་གང་བར་གྱུར་པ་སྟོན།
རྗེས་སུ་མཐུན་པའི་རླུང་དག་གིས། རིན་ཆེན་གླིང་ནས་ཡང་དག་འོངས། 53

དེ་ནས་དེར་དཔོན་གཉིས་པ་ནི། དོན་ཉམས་དེ་ལ་བརྗེད་གྱུར་པ།
སྣང་བས་གཟིངས་ལ་སྨྲས་བ་ཡི། བྲུག་པ་བྲ་བར་རབ་དུ་བཙོམས། 54

ཅི་སྟེ་དོན་གྲིན་གྱིས་མཐོང་ནས། ཡང་དང་ཡང་དུ་ཀློག་གྱུར་ཀྱང་།
སྣང་བས་འོང་དེ་སྡིག་པ་ཡི། འབད་ལས་སྐད་ཅིག་ལོག་མ་གྱུར། 55

वक्त्रा परं क्रूरतरक्रियासु
प्रवर्त्तनायैव दृढाभियोगा ।
पापा निपाताय भवत्यवश्यं
मोहाहतानां युवतिर्मतिश्च ॥ ४९ ॥

बन्धुमित्रविरक्तानां स्वसुखक्षीवचेतसाम् ।
श्रीयुतानामिव नतिः स्त्रीजितानां मतिः कुतः॥ ५०॥

अथ भ्रातरमाहूय नीत्वा पुष्पोच्चयाय सः ।
न्यवधीदश्रुताक्रन्दमश्मना विजने वने ॥ ५१ ॥

अहमेव स तत्पापं भुक्त्वा पूर्व्वेषु जन्मसु ।
वहाम्यद्यापि शेषांशमङ्गुष्ठक्षतलक्षणाम् ॥ ५२ ॥

सार्थवाहोऽर्थदत्ताख्यः पूर्णप्रवहणः पुरा ।
पवनस्यानुकूल्येन रत्नद्वीपात् समाययौ ॥ ५३ ॥

द्वितीयः सार्थवाहोऽथ नष्टार्थस्तं समाश्रितः ।
द्वेषात् प्रवहणे छिद्रं प्रच्छन्नं कर्त्तुमुद्ययौ ॥ ५४ ॥

अथ दृष्टोऽर्थदत्तेन वार्य्यमाणः पुनः पुनः ।
पापप्रयत्नो द्वेषान्धः क्षणं न विरराम सः ॥ ५५ ॥

དེ་ནས་དོན་མཐུན་བདག་ཁྲིམས་ནས། ཁྲོ་ལྡན་རོལ་པར་རྫོངས་པ་ནི།
མི་བཟང་ཤཱཀྱི་རབ་བསྒྱུར་ནས། སྒོག་དང་བྲལ་བ་ཉིད་དུ་བྱས། 56

དེ་ཉིད་ང་ཡིན་དེ་བསད་ལས། སྡིག་འབྲས་སྐྱེ་བ་གཞན་ར་སྨྲ་ནས།
ལྷག་མའི་ཆ་ཤས་ད་ལྟ་ཡང༌། གང་པར་སེང་ལྡེང་སོ་འཛིན་ནོ། 57

ཡག་ན་ལྷུང་བཟེད་བརྩེ་བ་ཡིས། བརྒྱན་པའི་ཀློ་ལྡན་རང་སངས་རྒྱས།
ཀུ་པ་རི་མ་ཞེས་པ་སྟོན། ཀ་ཤིའི་གྲོང་དུ་བསྒྲུད་སྒྲང་ཀུགས། 58

དེ་ཡི་ལྷུང་བཟེད་ཡོངས་ཁེངས་པ། མཐོང་ནས་སྣང་བས་སྨུན་བྱུང་བ།
འབྲས་མེད་གཡོ་ལྡན་ཞེས་པ་ཡིས། ལག་པ་ཡིས་ནི་ས་ལ་བོ། 59

དེང་ཟས་བཅད་ལས་འཁྲུངས་པའི། སྡིག་དེ་སྐྱེ་བ་མང་པོར་ནི།
སྨྲད་ཀྱང་འབྲས་བུ་ལྷག་མ་ཡིས། ལྷུང་བཟེད་སྟོང་པ་ཉིད་དུ་གྱུར། 60

བ་ཤི་ཥྛ་ཞེས་བྱ་བར་སྟོན། དགྲ་བཅོམ་ཉིད་གྲོལ་སེམས་རབ་དང༌།
རབ་ཞིའི་དགའ་ཚལ་གྲོང་པ་ཡིས། བུས་པའི་གཙུག་ལག་ཁང་ན་གནས། 61

དེ་ཡི་སྐུན་ཟླ་རབ་བྱུང་ནི། བྷ་ར་དྭཱ་ཛ་སྐྱེ་བོ་ཡི།
བཀུར་སྟི་དག་གིས་དེ་མཐོང་ནས། སྡང་བའི་མི་ཡིས་གདུངས་བར་གྱུར། 62

ཡོན་དན་ཅན་རྣམས་བཀུར་མཐོང་ནས། དེ་ཉམས་སྨད་དུ་སྐྱེ་བོ་རྣམས།
རབ་དུ་འབད་བྱེད་བདག་ཉིད་ནི། ཡོན་དན་གཟུང་ཕྱིར་བརྩོན་མ་ཡིན། 63

ततः सार्थपतिः कोपात् तं मात्सर्य्यविमोहितम्।
तीव्रशक्तिप्रहारेण चकार गतजीवितम्॥ ५६॥

अहं स तद्वधात् पापफलं भुक्त्वान्यजन्मसु।
वहाम्यद्यापि शेषांशं चरणे खदिरव्रणम्॥ ५७॥

प्रत्येकबुद्धः पिण्डाय पात्रपाणिर्दयार्द्रधीः।
विवेश काशनगरीमुपारिष्टाभिधः पुरा॥ ५८॥

सम्पूर्णपात्रमालोक्य तस्य विद्वेषदूषितः।
युवा चपलको नाम पाणिनापातयद्भुवि॥ ५९॥

अहं स पापं तद्भक्तच्छेदोत्थं बहुजन्मसु।
भुक्त्वापि फलशेषेण प्रयातः शून्यपात्रताम्॥ ६०॥

वशिष्ठाख्यः पुराहं त्वं प्राप्तश्चित्तप्रसादवान्।
उवास प्रशमारामे विहारे पौरकल्पिते॥ ६१॥

भ्राता प्रव्रजितस्तस्य भरद्वाजः सदोदितम्।
विलोक्य जनसत्कारं ययौ द्वेषाग्नितप्तताम्॥ ६२॥

गुणिनां मानमालोक्य प्रयत्नं तद्विनाशने।
जनः करोति नत्वात्मगुणाधानसमुद्यमे॥ ६३॥

ཆེན་པོ་ལ་འོངས་གོས་བཟུང་ཞིག། སྐྱེ་བོ་ཀུས་པས་སྤུལ་བ་ནི།
དྲང་པོའི་སེམས་ལྡན་བ་ཤཱ་རིདྭ། མཛའ་བས་སྤྱན་སྔ་དེ་ལ་ཕྱིན། 64

དེ་བླངས་ཡོན་ཏན་ལ་སྨང་དེ། ཁོང་དང་བྲལ་བ་ཉིད་མ་གྱུར།
ཕན་པ་ཉམས་དང་མཛའ་བས་ཀྱང་། ངན་པ་རང་གི་སེ་འགྱུར་རོ། 65

དེ་ཡིས་གཙུག་ལག་ཁང་སྐྱོང་མ། དབེན་སར་ཡང་དག་བསོས་ནས་ནི།
གོས་ནི་བཟུང་དག་དེ་ལ་ཕྱིན། བཀུར་སྟི་བྱས་ནས་རབ་སྨྲས་པ། 66

གོས་བཟུང་འདི་ནི་སྐྱེད་བཟང་མ། ཁྱོད་ཀྱིས་གྲོན་ལ་སྐྱེ་བོ་དག།
འདྲི་ན་བ་ཤཱ་རིདྭ་ཡིས་ནི། ཕྱིན་ཞེས་དལ་གྱིས་སྨྲ་བར་བྱ། 67

དེ་སྐད་རེས་བརྗོད་དེ་ཡིས་ཀྱང་། ཁས་བླངས་དེ་ཡིས་བསྟན་པ་བྱས།
གང་གྲིས་བ་ཤཱ་རིདྭ་ལ་ནི། སྐྱེ་བོ་སྐྱོང་བར་དགོས་པར་གྱུར། 68

ཚུལ་ཁྲིམས་མ་ཚང་བརྗོད་པས་དེས། དེ་ནས་གྲོང་པས་མ་ར་ཆོད་དེ།
རིང་དུ་སོང་གྱུར་ཆེན་པོ་ཉམས། བཀུར་སྟི་ཉམས་པས་འཛེགས་པ་ཉིད། 69

ཕྲ་ར་དྲ་ཛ་དེ་བདག་སྟེ། འཕགས་ལ་སྨད་པས་སྐྱེ་གཞན་ལ།
བསོད་ནམས་མིན་སྤྱད་དེས་ལྕུག་ལས། མཛེས་མས་རིང་ཡང་ཐོན་གྱིས་སྨད། 70

བདག་སྟོན་བྲམ་ཟེའི་ཕྲུག་དོག་གིས། བ་ར་ཀྲ་སེར་ཕྲུབ་པ་ནི།
ཤྲཱི་ལྡན་མངོན་ཤེས་ལྡུ་པ་ཡིས། གྲགས་པ་ཕྲག་དོག་དག་གིས་བཅོམ། 71

महार्हवस्त्रयुगलं भार्ये भक्तजनार्पितम् ।
तस्मै वशिष्ठः प्रददौ प्रीत्या सरलमानसः ॥ ६४ ॥

तदादाय गुणद्वेषी न वैराद्विरराम सः ।
नोपकारैर्नवा प्रीत्या निर्जितां याति दुर्ज्जनः ॥ ६५ ॥

एकान्ते स समाहूय विहारपरिचारिकाम् ।
दत्वास्यै वस्त्रयुगलं जगाद कृतसत्कृतिः ॥ ६६ ॥

इदं त्वया वस्त्रयुगं परिधाय सुमध्यमे ।
वशिष्ठेनार्पितमिति प्रश्ने वाच्यः शनैर्जनः ॥ ६७ ॥

इति स्वीकृत्य तेनोक्ता तदादिष्टं चकार सा ।
येनाभवद्वशिष्ठस्य जनो विप्लवशङ्कितः ॥ ६८ ॥

शीलवैकल्यवादेन सोऽथ पौरैरपूजितः ।
दूरं ययौ महान्तो हि सत्कारभ्रंशभीरवः ॥ ६९ ॥

सोऽहमार्य्यापवादेन भरद्वाजोऽन्यजन्मसु ।
भुक्त्वाप्यपुण्यं तच्छेषात् सुन्दर्य्याश्च क्षपार्द्दितः ॥ ७० ॥

ब्राह्मणेनेर्ष्यया पूर्व्वं वाराणस्यां मया मुनेः ।
दर्पादेन हृता कीर्त्तिः पञ्चाभिज्ञस्य धीमतः ॥ ७१ ॥

མེ་ཏོག་བཞུ་ཅན་གྲགས་པ་ཡི། པ་དྨ་ལྷར་མཛེས་སྨད་འཚོང་མ།
བཟང་མོ་ཞེས་བྱ་བུད་མེད་མཆོག། བཱ་ར་ཎཱ་སིར་སྔོན་བྱུང་གྱུར། 72

གཡོ་ལྡན་གྱ་གྱུའི་བསམ་པ་ཅན། པད་ཙ་ཞེས་པས་ནམ་ཞིག་དེ།
མཐོང་ནས་མཚན་མོ་སྤྱད་པའི་སླད། གོས་དང་རྒྱན་དག་དེ་ལ་བྱིན། 73

དེ་ནས་གཡོ་བའི་ཆགས་པ་ཅན། མཚམས་ལ་འགྲོགས་པར་མངོན་ཕྱོགས་པའི།
ཉིན་མོར་བྱེད་པ་ནམ་མཁའ་ཡི། ཁྱིམས་ཀྱི་མཐར་ནི་བབས་པའི་ཚེ། 74

བཟང་མོ་རང་གི་ཁྱིམ་སོང་ནས། མེ་ཏོག་གོས་དང་རྒྱན་རྣམས་ཀྱིས།
མཛེས་པ་ཉིད་ཀྱི་རྒྱན་ལ་ནི། སླར་ཡང་སྤྲོས་པའི་རྒྱན་དག་བྱས། 75

སྨྲུག་སྐྱི་གང་བའི་མཐིལ་ལ་རབ་ཆགས་ཤིང་།
རྡོ་ཤལ་མཆོག་ནི་མགྲིན་པར་དཔྱངས་ནས་ཀྱང་།
བྱ་བ་དོན་གཉེར་མི་ལོང་ལ་ཕྱོགས་དེ།
སྨད་འཚོང་སྤྱོད་པའི་དོན་བཞིན་དེ་ཡིས་བྱས། 76

མགྲིན་པ་ལ་གཞན་བཞིན་གཞན་མཆུ་ལ་གཞན།
དེ་བཞིན་གཟུགས་ཅན་མ་དེས་སྙིང་ལ་གཞན།
ནམ་བཀྲ་རང་གི་བྱ་བ་གཟུགས་བརྙན་བཞིན།
སྐྱེས་བུ་ཆགས་བྱེད་ཉིད་ཀྱིས་ཀུན་རྣམས་བཟུང་། 77

वाराणस्यामभूत्पूर्व्वं भद्रा नाम वरानना ।
वेश्या यशःपताकेव कान्ता कुसुमधन्वनः ॥ ७२ ॥

तां कदाचिन्मृणालाख्यो विटः कुटिलचेष्टितः ।
दृष्ट्वा तस्यै ददौ रात्रिभोगायांशुकभूषणम् ॥ ७३ ॥

ततस्तरलरागायाः सन्ध्यायाः सङ्गमोन्मुखे ।
गगनाङ्गनपर्य्यन्ते[1] लम्बमाने दिवाकरे ॥ ७४ ॥

गत्वा स्वभवनं भद्रा पुष्पांशुकविभूषणैः ।
लावण्याभरणा चक्रे पुनरुक्तं प्रसाधनम् ॥ ७५ ॥

अलक्तके पादतलावसक्ते
कण्ठावलम्बिन्यपि तारहारे ।
कार्य्यार्थिनी दर्पणसम्मुखी सा
चकार वेश्याचरितं यथार्थम् ॥ ७६ ॥

कण्ठेऽन्यदन्यत् वदनेऽन्यदोष्ठे
बभार तन्वी हृदये तथान्यत् ।
सा भूषणं शोभनमेव पुंसाम्
मूर्त्तं स्वकर्त्तव्यमिवातिचित्रम् ॥ ७७ ॥

---

१ W 1 पर्य्यन्ते ।

ཡིད་སྐྱེས་གྱོལ་བའི་གྲགས་པ་ཟླ་བའི་གཟུགས་ནི་དང་པོ་བཞིན།
ལན་བུ་ཐིག་ལེའི་རི་མོས་འཛེ་སྐྱིག་ལྡན་པར་རབ་སྨྲས་ཤིང་།
རབ་འགྲོ་བདུག་པའི་དུ་བས་རབ་རིབ་ཐུན་མཚམས་བཞིན་བཀྲ་བ།
ཆགས་པ་དར་བྱས་ཡན་ལག་དང་བཅས་ཆགས་བ་དེ་རབ་མཛེས། 78

དེ་ནས་གཡོག་མོ་རྒྱ་སྤྲིན་མ། ཞེས་པ་སྦྱར་བར་རབ་ཞུགས་དེ།
དེར་སྨྲས་སྐད་ཅིག་འགྲོགས་འདོད་པའི། གཉེན་ཞུ་གསར་པ་ཀྱི་ནི་སྟོད། 79

ཀུནྡ་པ་ནི་བགྱི་ཕྲག་ལྔ། ཚྭ་བཞིན་དུ་ནི་སྤྱིར་བར་བྱེད།
འདི་ནི་ཁྱོད་ཀྱི་གཏེར་ཞིང་འོངས། ནང་ཞུགས་ཉིད་ནི་ཡི་རོལ་ཐོང་། 80

རབ་མང་ནོར་ལྡན་གཏོང་ཕོད་ཅན། བྲིལ་བས་ཕུན་རིང་མི་སྤོད་པ།
འདོད་བསྐྱིབས་འདོད་ལྡན་བཟོད་པ་ཅན། སྐལ་བ་བཟང་མོ་ག་ལ་ཐོབ། 81

ཅེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། ཡོན་དང་ཆགས་པའི་བར་དུ་ནི།
སྐད་ཅིག་འཕྱུང་མོ་ཕྱུག་པ་བཞིན། བཟང་མས་འཛུམ་བཅས་རབ་སྨྲས་པ། 82

གཞན་ལས་སྨྲ་ནི་ཕྲང་པ་དག། ལས་སྨྲང་དག་གི་བུད་མེད་བཞིན།
དེ་དུས་དོན་གཉེར་གཞན་ལ་ནི། ལག་བཟེད་ཉིད་དུ་ཇི་ལྟར་འགྱུར། 83

སྐྱེ་བོ་ཉམས་བཞིན་ཐམས་ཅད་ཀྱི། དབང་དུ་གྱུར་ཀྱང་སྐད་ཅིག་ནི།
གང་གིས་སྦྱོན་ཉིད་འཐམས་པ་དེ། སྨད་འཚོང་བུད་མེད་རྣམས་ཀྱིས་བདག། 84

कलिततरुणरागा साङ्गरागा बभौ सा
तिमिरशबलसन्ध्येवोल्लसद्धूपधूमैः ।
मनसिजजयकीर्त्तिं मूर्त्तिमाद्यामिवेन्दो-
रलकतिलकलेखां लीलया सूचयन्ती ॥ ७८ ॥

ततः प्रविश्य त्वरिता दासी मकरिकाभिधा ।
तामूचे क्षणसंगार्थी वहिरास्ते युवा नवः ॥ ७९ ॥

कार्षापणानां तृणवद् वितीर्य्य शतपञ्चकम् ।
प्रविश्येव विनिर्याति सोऽयं ते निधिरागतः ॥ ८० ॥

प्रभूतद्रविणत्यागी व्यग्रत्वादचिरस्थितिः ।
छन्नकामः क्षमी कामी सुभगे लभ्यते कुतः ॥ ८१ ॥

इति तस्या वचः श्रुत्वा भद्रा प्रोवाच सस्मिता ।
क्षणं दोलायमानेव मध्ये दाक्षिण्यलोभयोः ॥ ८२ ॥

कथं रथ्याङ्गनेवाहमन्यस्मादात्तवेतना ।
गच्छामि प्रार्थितान्यस्य तत्क्षणोत्तानपाणिताम् ॥ ८३ ॥

प्रपाणामिव सर्व्वस्य स्वाधीनानामपि क्षणम् ।
पूर्व्वसेवा कृता येन स स्वामी वेश्ययोषिताम् ॥ ८४ ॥

མཚན་མོ་གཅིག་པུ་འདི་ཉིད་ནི། པད་ཚལ་ཉིས་ལ་ཅི་ཞིག་བརྗོད།
གཞན་གྱིས་སྤྲོ་དྲི་འོང་དུ་ཆུག། བདག་ཅག་ཏོག་ཏུ་གསར་པ་སྟོམ། 85

བཟང་མོས་འདི་བརྗོད་ཚུང་ངུ་དེས། མཆོག་ཏུ་སྦྲང་རྩི་ལ་ཆགས་བཞིན།
གསར་པ་གསར་པའི་རོར་ཆགས་ཤིང་། ཁྲིམས་པས་དེ་ལ་རབ་སྨྲས་པ། 86

གལ་དེ་འོང་བ་བདུང་གྱུར་ན། སོང་བ་ནང་པར་འོང་མི་འགྱུར།
སྐད་འཚོང་ནམས་དང་ཚོང་པ་ལ། སྐལ་བས་ཉོ་པ་མང་བར་འགྱུར། 87

འདི་ནས་ཕུང་ཟད་འདི་ནས་དང་། ཕུང་ཟད་ཉིན་མཚན་དུ་གསོག་པ།
སྐད་འཚོང་ནམས་ཀྱི་སྐྱེས་བུ་ཡིས། རྙེད་པའི་མེ་ཏོག་འཐུ་བ་བཞིན། 88

སྐད་འཚོང་མ་ལ་ཏོག་ཏུ་མཛའ། སྦྲོང་བ་ནམས་ཀྱི་རིག་པ་བཞིན།
ཆོས་ཀྱི་སྐད་མིན་འདོད་སྐད་མིན། ནོར་ཉིད་སྐད་དུ་ཀྲུས་པར་བྱེད། 86

མང་དང་འགྲོགས་པས་སྐད་འཚོང་མ། མི་གཙང་བ་ཉིད་མི་འགྱུར་ཞིང་།
འདི་ཡི་བརྟུལ་ཞུགས་མི་ཉམས་དེ། སྐར་ལ་དོན་དུ་གཉེར་བྱར་འགྱུར། 90

གཞན་དག་ཕྱིར་འཕོན་གཞན་ན་འཇུག། གཞན་དག་ཕྱི་ནས་རབ་ལྟ་བའི།
སྐད་འཚོང་གང་དེ་མཛེས་པ་སྟེ། ས་ཡི་བདག་པོའི་མདུན་ས་བཞིན། 91

ཚོང་པ་དབུལ་པོའི་སྤྲང་བཞིན་དུ། སྟོང་པར་ཁྱིམ་ན་གང་འདུག་པ།
སྐད་འཚོང་ནམས་ལ་འདི་ལས་ནི། ལྷག་པ་སྐལ་ངན་གཞན་པ་ཅི། 92

एकैवेयं मृणालेन क्रीता रात्रिः किमुच्यते ।
परः प्रातः समायातु नवारम्भाः सदा वयम् ॥ ८५ ॥

इत्युक्ता भद्रया क्षुद्रा मधुलुब्धेव सा परम् ।
सक्ता नवनवास्वादे कुपिता तामभाषत ॥ ८६ ॥

न गतः प्रातरागन्ता प्राप्तः संत्यज्यते यदि ।
भाग्यैर्भवति वेश्यानां वणिजाञ्च बहुक्रयः ॥ ८७ ॥

इतः किञ्चिदितः किञ्चिच्चिन्वन्तीनां दिवानिशम् ।
वेश्यानां पौरुषो लोभः कुसुमावचयोपमः ॥ ८८ ॥

न धर्म्माय न कामाय धनायैव प्रसाध्यते ।
वेश्या याचकविद्येव बहुप्रणयिनी सदा ॥ ८९ ॥

नायात्यशुचितां वेश्या व्रतमस्या न लुप्यते ।
भजते बहुसङ्गेन प्रत्युताभ्यर्थनीयताम् ॥ ९० ॥

निर्यान्त्यन्ये विशन्त्यन्ये प्रतीक्षन्ते बहिः परे ।
यस्याः सा शोभते वेश्या सभा भूमिपतेरिव ॥ ९१ ॥

दौर्भाग्यं पण्यकामिन्याः किमन्यन्नास्त्यतोऽधिकम् ।
तुलेव क्षीणा वणिजः शून्याः सीदन्ति यद्गृहे ॥ ९२ ॥

སྐལ་ངན་གྱིས་ནི་འཛོན་བྱེད་མེད། འཕྲོན་མ་སྦྱོང་བར་ཉལ་བ་ནི།
སྤྱ་རྡོ་འདོད་ལྡན་ཆོམས་ཀྱི་སྣ། རྗོན་གྱི་འཁྲུག་པར་གྲུབ་པར་བྱེད། 93

འཕྲུལ་ལ་རྩེ་བ་ཡོངས་བཏང་ནས། རིང་ན་གནས་ལ་བསྐྲུགས་པ་ན།
ཟློང་འགྲིམས་ས་རུ་སྨད་འཚོང་མ། འཕྲེང་བ་བཞིན་དུ་སྒྱུར་དུ་བཀྲས། 94

འདི་ནི་དགེ་མཚན་ཙམ་དོན་གཉེར། བྱ་བས་བྲེལ་ཞིང་མང་དུ་སྤྱིར།
ནང་ཞུགས་ཉིད་ན་སྤྲི་རོལ་འགྲོ། ཅི་ཉམས་ནོར་ནི་བླང་བར་མཛོད། 95

ཕན་པ་འདི་ཐོས་བཟང་མོ་དེས། དེ་བཞིན་ཞེས་དེ་ཁ་ཡིས་བླང་།
སྨད་འཚོང་རང་བཞིན་ཆགས་པ་སྟེ། རིག་པ་སྐྱེ་བོ་ཆགས་བྱེད་ཉིད། 96

སྐད་ཅིག་ཉིད་ནི་དེར་བཟོད་མཛོད། བདག་གིས་ཆས་དང་རྒྱན་ས་ཚར།
ཞེས་པའི་འཕྲིན་ནི་སྐྱེལ་བ་ལ། པད་ཙ་ལ་ནི་གཡོག་མོ་བཏང་། 97

འདོད་ལྡན་མཛེས་པ་ཞེས་བྱ་བ། མང་པོ་སྤྲིན་པས་སྐད་ཅིག་ནི།
གླང་པོས་པདྨ་ཅན་བཞིན་དེ། སྤྱད་པས་འཁྲུགས་པ་ཉིད་གྱུར་དོ། 98

དེ་ནས་དེ་ནི་སོང་བ་དང་། མཆུ་ནི་སོས་བཅད་ལྐུག་མ་དང་།
དེ་ཡིས་བརྩེ་མེད་འཁྱུད་པ་ཡིས། སྐད་ཅིག་གིས་ནི་རྐྱིང་ཉིད་ཐོབ། 99

སྤྱར་ཡང་རྒྱན་ནི་རབ་བཟུང་ན། པདྨའི་ཙ་ལ་སྒྱུར་བར་ནི།
བྲོན་ཞེས་སྐྱང་བ་སྤྲས་པ་ཡིས། གྲོགས་མོ་དེ་ནི་ཉམས་པར་སྤྲངས། 100

अभाग्यैर्ग्राहकाभावे गणिका शून्यशायिनी ।
मिथ्या वर्णयति प्रातः कामुकैर्द्वारभञ्जनम् ॥ ९३ ॥

सद्यःक्रयपरित्यागा दूरवर्त्तिप्रतीक्षया ।
माला इवाशु शुष्यन्ति वेश्याः पण्यप्रसारके[1] ॥ ९४ ॥

एष कौतुकमाचार्यो कार्य्यव्यग्रो बहुप्रदः ।
प्रविश्यैव विनिर्याति का क्षतिर्गृह्यतां धनम् ॥ ९५ ॥

श्रुत्वैतत् स्वहितं भद्रा तथेति प्रत्यपद्यत ।
लोभः स्वभावो वेश्यानामौचित्यं जनरञ्जनम् ॥ ९६ ॥

क्षम्यतां क्षणमत्रैव नाहं सज्जप्रसाधना ।
[विससर्ज मृणालाय दासीं सन्देशवादिनीम् ॥ ९७ ॥

क्षणं सुन्दरकाख्येन बहुदानेन कामिना ।
सा पद्मिनी गजेनेव भुक्ता व्यालोलतां ययौ ॥ ९८ ॥

ततस्तस्मिन् गते दन्तच्छेदोच्छिष्टरदच्छदा ।
निर्दयालिङ्गनैस्तेन नीता निर्म्माल्यतां क्षणात्[2]] ॥ ९९ ॥

विससर्ज्ज मृणालाय पुनरात्तप्रसाधना ।
सा सखीं गूढविद्वेषां तूर्णमागम्यतामिति ॥ १०० ॥

---

१ W_1 वेश्यापण्यः प्रसारके ।
२ W_1 and W_2 omit the portion bracketted.

དེ་ཡིས་སྨྲས་བའི་ཟླ་མ་ལས། དེ་ཡི་སྤྱོད་ཚུལ་པད་ཅན་ཞེས།
འདི་ཉིད་དུ་ནི་བཟང་མོ་དག། ཞོག་ཅེས་ཁྲོ་བ་སྨྲས་པས་སྨྲས། 101

དེ་ནས་འཕྲིན་ཐོས་དྲི་བཟང་གིས། ཀིང་དྲུག་པ་ནི་འགུགས་མ་དེས།
པད་ཅན་བསྙེན་པའི་སྐྱིད་མོས་ཚལ། ཀིང་འཕྲུང་མི་དོག་གྱིས་པར་སོང་། 102

དེ་ནི་འོང་བ་མཐོང་གྱུར་ནས། ཆགས་སྡང་དུག་ནི་མི་བཟོད་པ།
འཁོར་བ་རྣམ་པ་དང་བཅས་བཞིན། དེ་ནི་རྣམ་འགྱུར་ལྡན་པར་གྱུར། 103

དེ་ཡི་བསམ་པ་གཡོ་བ་ཡིས། བདག་དོན་གཉེར་བར་བདགས་པ་ཡི།
ཀྱུན་རྣམས་ཆགས་ལས་བཞིན་དང་ནི། ཉེ་བར་སྤྱད་པས་ཉམས་པར་བྱས། 104

སྐྱེ་མ་རང་སྤྱོད་གྱུ་གྱུའི་ཚོགས་པ་བཞིན་དུ་ནུ་མའི་ངོས་དག་ལ།
སེན་མོ་འཁྲུག་པོར་རབ་བདབ་རྣམས་ཀྱིས་རི་མོ་གསར་པ་འཇོད་བྱེད་ཅིང་།
མཆུ་འདབ་མཛེས་པ་གཡོན་ཅན་ལྷག་མས་ཉམས་ཞིང་བཞིན་ན་ཟད་གྱུར་པ།
ལག་འགྲོ་མ་འདིས་བདག་གི་ཡན་ལག་ཀུན་ལ་མི་བཟད་དུག་རྣམས་སྦྲོ། 105

སྐད་ཅིག་དེ་བསམས་ཆེ་བར་རབ་ཁྲོས་པའི།
མི་ཡིས་རབ་བསྐྱེད་དུ་བའི་རྣམ་འཕྲུལ་ནི།
སྨིན་མའི་རྣམ་འགྱུར་དུས་ཀྱི་བཞིན་ལྡན་དེས།
སྐྲག་བ་ཀྱིས་པ་དེ་ལ་རབ་སྨྲས་པ། 106

ज्ञात्वा मृणालस्तद्वृत्तं पैशून्यात् कथितं तया ।
इहैवायातु भद्रेति गूढ़कोपः समभ्यधात् ॥ १०१ ॥

ततः सा प्राप्तसन्देशा सौरभाकृष्टषट्पदा ।
मृणालजुष्टमुद्यानं प्रययौ फुल्लपादपम् ॥ १०२ ॥

तां दृष्ट्वैव समायातां रागद्वेषविषोत्कटः ।
संसार इव साकारः सविकारो बभूव सः ॥ १०३ ॥

सोऽचिन्तयच्चपलया मदर्थमुपकल्पितम् ।
कृतमन्योपभोगेन लोभलुप्तं प्रसाधनम् ॥ १०४ ॥

नखोल्लेखैर्वक्रैः कुटिलचरितं हन्त लिखितम्
वहन्ती प्रत्यग्रं निजमिव समग्रं स्तनतटे ।
विटोच्छिष्टक्लिष्टाधरदलरुचिः क्षामवदना
भुजङ्गी सर्वाङ्गं विषमविषमेषा दिशति[1] मे ॥ १०५ ॥

क्षणं विचिन्त्येति पृथुप्रकोपः
कृशानुधूमोद्गमविभ्रमेण ।
भ्रुवोर्विकारेण स कालवक्त्रः
प्रोवाच तां साध्वससन्निरुद्धाम् ॥ १०६ ॥

---

१ H दृजति । $^{W}_{2}$ gives two readings दृजति and दिशति ।

མང་དང་སྐད་ཅིག་ལ་འགྲོགས་སྐྱིད་འཚོང་གང་།
དེ་ནི་དང་པོ་གཞན་ནོར་ཅི་ལ་འཛིན།
བདག་དོན་ཉིད་དུ་གྲུས་པའི་ཆས་འདི་དག།
ཁྱོད་ཀྱིས་རྟོལ་གྱི་ཕྲིགས་པའི་ལྷག་མར་གྲུས། 107

ཞེས་སྨྲས་གཟུགས་བཟང་མོ་ཡི་འོག་པག་ནི།
གཡོ་ཞིང་བསྐྱོད་པའི་གསལ་བའི་སྒྲ་དག་གིས།
དྲིན་མཛོད་བུ་མོ་གཞོན་ནུ་གསད་པའི་འོས།
སྨྲུངས་ཞེས་དམན་པས་སློང་བར་བྱེད་པ་བཞིན། 108

སྤུང་བའི་འཕྲེང་བ་སྒྲ་སྒྲོག་གདིབས་པ་ཡི།
འཁྲི་ཤིང་ཚོམས་ཀུང་བཞིན་ནི་རབ་བདུད་པས།
ལག་པའི་ཡལ་འདབ་ཀུན་དུ་གཡོབ་བྱེད་ཅིད།
བརྩེ་བས་རིང་ནས་ཟློག་པར་བྱེད་པ་བཞིན། 109

འཇིགས་རུང་བསྣུན་པའི་སྟག་བཞིན་བརྩེ་མེད་དེས།
ཡན་ལག་འཁྲི་ཤིང་སྙག་ཉམས་རི་དགས་ནི།
གཡོ་ཡང་མིག་ཅན་བསད་ནས་མགྲོགས་པ་ཡིས།
གདུམ་བོ་མཆོན་ཆ་ཁྲག་སྨགས་རབ་ཏུ་སོང་། 110

क्षणेन वेश्या बहुसङ्गता या[1]
गृह्णाति सा किं परवित्तमादौ ।
मदर्थमेवाहित एष वेशः
कृतस्त्वया स्वेदकणावशेषः ॥ १०७ ॥

इति ब्रुवाणः सुतनोः प्रकम्प-
विलोलकाञ्च्यास्तरलस्वनेन ।
प्रसीद बालामबलामबध्यां
रक्षेति दैन्यादिव याच्यमानः ॥ १०८ ॥

लताभिरप्याकुलभृङ्गमाला-
विराविणीभिर्दययैव दूरात् ।
निवार्यमाणः प्रणताननाभिः
समन्ततः पल्लवपाणिकम्पैः ॥ १०९ ॥

घोराकृतिर्व्याघ्र इवाघृणोऽसौ
त्रासावसन्नाङ्गलतां कुरङ्गीम् ।
हत्वा नृशंसस्तरलायताक्षीं
रक्ताक्तशस्त्रः प्रययौ जवेन ॥ ११० ॥

१ H, W_1 and W_2 read क्षणेन यस्या बहुसङ्गतायाः ।

གང་ཞིག་ཁྲོ་བའི་ལོང་བས་མིག་བཀག་པ།
དེ་དག་ཉམས་ལ་བྲ་མིན་ཅི་ཞིག་ཡོད།
རྟག་ཏུ་ཡིད་ནི་བརྩེ་བས་དབུལ་བ་ཡིས།
སྤྱོད་ཚུལ་བརྩེ་མེད་འཇིགས་རུང་ཉམས་ལ་ཡང་། 111

དབེན་པར་བཟང་མོ་སྡིག་ཅན་གྱིས་བསད་ཅེས།
དེ་ནས་དེར་ནི་འབངས་མོས་སྒྲ་བསྒྲགས་ཤིང་།
སྐྱེ་བོ་འདུས་ཚེ་ཉི་ཚེ་སངས་རྒྱས་ཀྱི།
ནགས་མཐར་དེ་ནི་རང་དགའ་དག་ཏུ་ཞུགས། 112

དེ་མདུན་ཁྲག་གིས་སྦགས་པའི་མཚོན་བཞག་ནས།
སྐྱེ་བོའི་ཚོགས་ཀྱི་ནང་དུ་དེ་བྲོས་ཚེ།
རྟག་འཛིན་གྲོང་པས་སྡིག་པ་མེད་མོད་ཀྱང་།
རང་སངས་རྒྱས་ནི་འཕྲུལ་ལ་གཟུང་བར་འགྱུར། 113

མ་རུངས་གནོད་བྱེད་ལ་འོས་གསོད་པའི་སར།
དེ་ནས་རྒྱལ་པོའི་བཀའ་ཡིས་དེ་ཁྲིར་ཚེ།
པདྨའི་ཅ་ལག་འཕྲུལ་ལ་འགྱོད་པ་སྐྱེས།
སྡིག་པ་འདི་ནི་བདག་གིས་བྱས་ཞེས་སྨྲས། 114

तेषामकार्य्यं किमिवास्ति येषां
क्रोधान्धरुद्धानि[1] विलोचनानि ।
दयादरिद्राणि मनांसि नित्यं
नैर्घृण्यघोराणि च चेष्टितानि ॥ १११ ॥

पापेन भद्रा विजने हतेति
कोलाहले तत्र कृतेऽथ दास्या ।
जनाभिसारे सुरुचेर्विवेश
प्रत्येकबुद्धस्य स काननान्तम् ॥ ११२ ॥

धृत्वा तदग्रे रुधिरार्द्रशस्त्रं
तस्मिन् प्रविष्टे जनतान्तरालम् ।
पौरैरपापोऽपि गृहीतचिह्नैः
प्रत्येकबुद्धः सहसा गृहीतः ॥ ११३ ॥

नीतेऽथ तस्मिन् नृपशासनेन
क्रूरापराधोचितवध्यभूमिम् ।
जातानुतापः प्रसभं मृणालः
पापं मयैतत् कृतमित्युवाच ॥ ११४ ॥

---

१ W_1 क्रुधान्धरूढ़ानि ।

དེ་ནས་དེ་ཡི་ཚིག་གིས་རང་སངས་རྒྱས།
དཔྱད་ནས་རྒྱལ་པོས་ཕྲུག་འཚོལ་བཏང་བའི་ཚེ།
ངན་བྲིད་ལ་ཞོས་བཟོད་པ་དཀའ་བའི་བཀའ།
ཉམས་སྐྱོང་འདི་ནི་པདྨའི་ཚོ་བས་ཐོབ། 115

དེ་ང་དྲག་པོའི་སྡིག་དེས་སྐྱེ་བ་མང་།
འབྲུམ་གྱིས་དམྱལ་བའི་ནང་དུ་ཡོངས་སྨྱུད་ནས།
དེ་ཡི་ལས་འབྲས་ལྷག་མ་ད་ལྟ་ཡང་།
སྨུ་སྡིགས་བུ་མོའི་རྫོན་གྱིས་མངོན་པར་སྤྲར། 116

གྲོང་ཁྱེར་གཉེན་ལྡན་དག་ན་སྡོན། བཙོམ་ལྡན་རྒྱལ་བ་ཉོམ་པར་གཟིགས།
གྲོང་པའི་ལོངས་སྤྱོད་ཀྱིས་མཆོད་ཅིང་། དགེ་སློང་ཚོགས་ཀྱིས་བསྐོར་དེ་གནས། 117

བྲམ་ཟེ་ན་ཁ་ར་ཞེས་པ། མཆོད་དང་ལྡན་པ་དེ་མཐོང་ནས།
གྲོང་པ་ལ་སླས་དགེ་སློང་ནི། མགོ་རིག་ལོངས་སྤྱོད་འོས་པ་མིན། 118

ཀོ་ཊ་ར་ཡི་ནས་རྩལ་གྱིས། འདི་དག་གི་ཉི་ཁ་ཟས་བསྒྲུབས།
མགོ་རིག་སྐྱུར་བག་ལྡན་པའི་ཁ། མཆོག་གི་ཁ་ཟས་འོས་པ་མིན། 119

བྲམ་ཟེ་དེ་དག་ཚོགས་དེ་ལས། སྐྱེ་བ་མང་པོར་དེ་ཡི་ཕྱིག
སྨྱུད་ཅིང་ད་ལྟ་ལས་ལྷག་གིས། ཀོ་ཊ་ར་ཡི་ནས་ཀྱི་ཟས། 120

मुक्ते ततस्तद्वचसा विचार्य्य
प्रत्येकबुद्धे प्रणिपत्य राज्ञा ।
रसज्ञतां दुःसहशासनस्य
नीतो मृणालः कुहनोचितस्य ॥ ११५ ॥

अहं स पापं बहुजन्मलक्षै-
र्भुक्त्वा तदुग्रं नरकान्तरेषु ।
अद्यापि तत्कर्म्मफलावशेषात्
मिथ्यैव[1] तीर्थाङ्गनयाभियुक्तः ॥ ११६ ॥

बन्धुमत्यां पुरि पुरा विपश्यी[2] भगवान् जिनः ।
भोगैरभ्यर्चितः पौरैस्तस्थौ भिक्षुगणैर्वृतः ॥ ११७ ॥

पूज्यमानं तमालोक्य ब्राह्मणो मठराभिधः ।
उवाच पौरान् विशिखा भोगयोग्या न भिक्षवः ॥ ११८ ॥

पुराणैः कोद्रवयवै[3]र्भोज्यमेषां विधीयताम् ।
न मुण्डकानां विकटं दिव्याहारार्हमाननम् ॥ ११९ ॥

इति वाक्यात् स विप्रोऽहं तत्पापं बहुजन्मसु ।
भुक्त्वाद्य कोद्रवयवाहारः शेषेण[4] कर्म्मणः ॥ १२० ॥

१ W_1 and W_2 मिथ्येव ।   २ W_1 विपस्वी ।
३ W_2 read कोटरयवैः and notes at the margin—कोद्रवयवैः ।
४ W_1 कोद्रवयवाहारेण कर्म्मणः ।

གང་ཚེ་བདག་སྔོན་བྲམ་ཟེ་ཡི། ཁྲིཙུ་ཨུད་ད་ར་ཞེས་གྱུར།
དེའི་ཚེ་བདག་གི་རིགས་མཆོག་ལ། སྨད་པ་ཡིས་ནི་མི་དགེ་ཐོབ། 121

ལས་དེ་ད་ལྟ་ལོ་དྲུག་ཏུ། དཀའ་བ་སྤྱད་པ་བདག་གིས་བསྒྲུབས།
དེ་ལས་ལྷག་པ་བྱང་ཆུབ་ཀྱིས། བསྐྱུངས་པ་ཡིས་ནི་ཐོབ་མ་གྱུར། 122

ཁྲིམ་བདག་ནོར་ལྡན་ཞེས་བྱ་བ། ཀར་པ་ཏར་ནི་སྔོན་བྱུང་སྟེ།
དཔལ་ལྡན་ཞེས་བྱ་དེ་ཡི་བུ། ལུས་ནི་ཉོལ་གནས་མིན་པར་གྱུར། 123

དེ་ནི་སྨན་པ་ཁ་བའི་བཞིན། ཞེས་པ་ནོར་མང་རེ་བ་ཡིས།
ཉོལ་གནས་བྱས་ཀྱང་དེ་ཡི་ཕས། དེ་ལ་ཅི་ཡང་བྱིན་མ་གྱུར། 124

དུས་ཀྱིས་གཟིར་བ་ཉིད་གྱུར་ཏེ། ཡང་ཡང་དེ་ཡིས་བོས་པར་བྱས།
དེ་ཡིས་ཕ་ལས་ཅུང་ཟད་ཀྱང་། ཁས་བླང་སྨྲས་པ་ཐོབ་མ་གྱུར། 125

སྨན་པ་ཁྲོ་བའི་རིམས་ཀྱིས་གདུངས། སྲིད་པས་གཡོ་བའི་ཤུགས་རིངས་ཅན།
ནད་པ་ཡིས་ཀྱང་འགོངས་པ་དེས། སྡུག་བསྔལ་ལས་ནི་རབ་བསམས་པ། 126

ཀྱེ་མ་བསམ་པ་དྲང་པོ་དག། གཡོ་དང་ལྡན་པ་བདག་གིས་བསླུས།
བདག་གི་ལག་ནས་ནད་པ་ཡིས། གཏེར་འདས་ད་ནི་ཅི་ཞིག་བྱ། 127

ཚ་བའི་སྨན་བཞིན་སྨན་པ་ནི། ནད་པ་རྣམས་ཀྱིས་སྔོན་དུ་བསྐུར།
གདུང་བ་བསོས་པར་གྱུར་པའི་ཕྱིར། དྲན་ཡང་ཁ་ནི་སྨུགས་འབྱིན་བྱེད། 128

यदाहमभवं पूर्व्वमुत्तरो नाम मानवः।
पुङ्खस्यापवादेन मयाप्तमशुभं तदा॥ १२१ ॥

षड्वर्षाण्यधुना तेन कर्म्मणा दुष्करक्रिया[1]।
चरितं न क्षणाद्दोषैर्न प्राप्तं त्वधिकं ततः॥ १२२ ॥

पुराभवद्गृहपतिर्धनवान्नाम कर्व्वटे[2]।
श्रीमान्नाम सुतस्तस्य बभूवास्वस्थविग्रहः॥ १२३ ॥

वैद्यस्तिक्तमुखो[3] नाम तं बहुद्रविणाशया।
स्वास्थ्यं निनाय तत्पिचा दत्तं चास्मै न किञ्चन॥ १२४ ॥

कालेनातुरतां यातः स्वास्थ्यं तेन पुनः पुनः।
स नीतस्तत्पितुः किञ्चित् प्राप्तं न त्वार्त्तिंभाषितम्[4]॥ १२५ ॥

अमर्षज्वरसन्तप्तस्तृष्णातरलितः श्वसन्।
सोऽचिन्तयद्भिषग्दुःखादातुरेणापि लङ्घितः॥ १२६ ॥

अहोवताहं धूर्त्तेन वाहितः शरणाशयः।
किं करोम्यधुना हस्तान्नतो मे निधिरातुरः॥ १२७ ॥

कटुकौषधवद्वैद्यः पूर्व्वमार्त्तस्य सम्मतः।
चिकित्सितातुरः पश्चात् स्मृतोऽपि मुखकूणनम्॥ १२८ ॥

---

१ H मया। २ W_1 कर्पटे। ३ W_1 विमर्लितक्तमुखः।
४ Orig नद्यार्त्तिंभाषितम्। H नत्वर्त्ति भाषिता।

དོན་གྲུབ་ལ་ནི་ནོར་ལྡན་དང་། སྐྱོལ་ཟིན་དག་ལ་གྲུ་པ་བཞིན།
མ་ལུས་ནད་ལས་གྲོལ་གྱུར་པ། སུ་ལ་སྨན་པ་ཉེ་བར་མཁོ། 129

མཆོད་དང་ཞབས་ལ་གཏུགས་བྱས་ནས། ནད་པས་སྨན་པ་རབ་བསྟོད་དེ།
ཕྱི་ནས་མིང་ནི་བསྒྲགས་པ་ན། བསོས་པ་རྣམས་ཀྱིས་ཕྲུད་ཀྱིས་འདེབས། 130

ཇོན་པ་གྲོལ་པོ་སྨན་པ་ཡིས། འཆིང་ལས་རི་དགས་ཆོས་ཀུན་དང་།
ནད་བསོས་སོང་བ་བསོད་ནམས་ཀྱིས། ཕྱི་ནས་སྤྱོད་ཡུལ་དག་ཏུ་ལྷུང་། 131

དེ་ལྟར་རབ་ཏུ་སེམས་བྱེད་ཅིང་། དེ་ནི་རིག་ཏུ་ཡོངས་སུ་གདུངས།
སྨན་པ་བཞིན་དུ་ཁྲོ་ལྡན་ན། སླར་ཡང་དེ་ཡིས་ཐོབ་པར་གྱུར། 132

དེ་ནས་ཁྲོ་བ་བསྒྲིབས་པ་ཡི། སྨན་པས་འགལ་བའི་སྦྱོར་བ་ལས།
རྒྱུ་མ་འཚད་པར་བྱེད་པའི་སྨན། འཕྲུལ་ལ་ཉམས་བྱེད་དེ་ལ་བྱིན། 133

དེས་བྱིན་གནོད་པ་འཕྲངས་པ་ལས། དེ་ཡི་རྒྱུ་མ་དུམ་བུ་གྱུར།
སྡིག་པའི་གཡང་ལ་ལྷུང་བ་ཡི། ཆགས་པས་ལོང་ཉམས་ཅི་མི་བྱེད། 134

སྨན་པ་ང་ཉིད་དེ་ཡི་སྡིག། སྐྱེ་བ་ཁྲི་ཕྲག་བགྲོར་སྤྱད་ནས།
ལས་ཀྱི་ལྷག་མས་ད་ལྟ་ཡང་། རབ་གནོན་ནད་ཀྱི་ཆ་ཤས་བསྟེན། 135

ཉ་ཡིས་འཚོ་བ་རྣམས་ཀྱིས་སྟོན། ཉ་ནི་ལུས་ཆེན་གཉིས་དག་བཟུང་།
ལུས་ནི་གཅོད་བ་མཐོང་གྱུར་ནས། ཉ་པའི་བུ་ཡིས་དགའ་བར་བྱས། 136

सिद्धार्थस्येव धनवान् उत्तीर्णस्येव नाविकः ।
निःशेषव्याधिमुक्तस्य वैद्यः कस्योपयुज्यते ॥ १२९ ॥

सपादपतनैर्मानैरार्त्तैराराध्यते[1] परम् ।
पश्चात्स कीर्त्तिते नाम्नि स्वस्थैः फुत्क्रियते भिषक् ॥ १३० ॥

बन्धाल्लुब्धस्य हरिणश्चौरो राज्ञश्च निर्गतः ।
पुण्यैः स्वस्थश्च वैद्यस्य पुनः पतति गोचरे ॥ १३१ ॥

इति चिन्तयतस्तस्य सततं परिशुष्यतः ।
स वैद्यमिव साकोपं पुनर्व्याधिमवाप्तवान् ॥ १३२ ॥

प्रच्छन्नमन्युस्तस्याथ वैद्यः सद्यो विनाशनम् ।
ददौ विरुद्धसंयोगादन्त्रशातनमौषधम् ॥ १३३ ॥

तस्यान्त्राणि व्यशीर्य्यन्त तद्दत्तापथ्यपायिनः[2] ।
किं न कुर्व्वन्ति लोभान्धाः पातकश्वभ्रपातिनः ॥ १३४ ॥

वैद्योऽहमेव तत्पापं भुक्त्वा जन्मशतायुतैः ।
अद्यापि कर्म्मशेषेण प्रस्कन्दिव्याधिक्लेशवान् ॥ १३५ ॥

पुरा मत्स्यौ महाकायावाकृष्टौ मत्स्यजीविभिः ।
जहर्ष छिद्यमानाङ्गौ दृष्ट्वा कैवर्त्तदारकः ॥ १३६ ॥

---

१ W I आतुरैराराध्यते । २ W I तद्वत्तापथ्यपायिनः ।

དེ་བདག་དེ་ལ་ཡོངས་ཆོས་ཐོབ། ཕྱིག་པ་སྐྱེ་བ་གཞན་སྤྱད་ནས།
ཤཱ་ཀྱ་ཉམས་པ་དེ་ཡིས་ཆོ། སྐད་ཅིག་མགོ་ལ་ནད་ཀྱིས་རིག། 137

སྨོན་ཆེ་སྦྱོངས་ཀྱི་གྲུད་གྲུར་དེ། མཛའ་པོ་སྟོབས་ཞེས་བྱ་བའི་གྲུད།
གཡུལ་གྱི་ཐྲོལ་གྱིས་ག་ཤགས་བྱས་དེ། དེ་ཡི་གྱིབ་ནི་ནོམ་གཉིས་བྱས། 138

དེ་ང་དེ་ཡི་ཕྱིག་ཆེན་ནི། སྐྱེ་བ་མང་པོར་སྤྱད་བྱས་ནས།
ཀླུང་གི་ནད་ཀྱིས་ད་ལྟ་ཡང་། གྱིབ་དུ་སྐད་ཅིག་གནས་པར་བྱས། 139

དེ་ལྟར་བྱང་ཆུབ་རྫོགས་སངས་གྱིས། ངེས་བསྟན་བདག་གི་ལུས་ལ་ཡང་།
ཉོན་མོངས་ཐིགས་པ་ལས་འདས་ཀྱི། ལྷག་མའི་ཆ་ཤས་ངེས་བར་ལྷུང་། 140

སྐྱེ་བར་སྐྱོ་དང་འཆི་བའི་ཚེ་ཡང་སྐྱེས་བུ་ལུས་ནམས་ལ།
བཀྲ་འདི་ལས་ཀྱི་ལམ་ནི་འཕྲེང་བ་བཞིན་དུ་ནམ་བདགས་པ།
རབ་དུ་ཆགས་པ་འདི་ནི་བདེ་དང་སྡུག་བསྔལ་མཚམས་དག་ལ།
སྤྱད་ཅིང་བདང་བར་གྱུར་ཀྱང་ལྷག་མའི་ལྷག་མ་ནམ་པར་འཛིན། 141

དེ་སྐད་བཅོམ་ལྡན་གྱིས་བཤད་པ། དགེ་སློང་ཀུན་གྱིས་ཐོས་གྱུར་ནས།
ལས་ཀྱི་འཆིང་བ་ནམས་དག་ནི། འདའ་བར་བྱ་མིན་ཉིད་དུ་ངེས། 142

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ལས་བཅུ་སྤྱད་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་པའོ།།

सोऽहं तत्परितोषात्तं पापं भुक्त्वान्यजन्मसु ।
तस्मिन्विनाशे शाक्यानां क्षणं स्पृष्टः शिरोरुजा ॥ १३७ ॥

पुरा जानपदो मल्लः प्रीतिमल्लं बलाभिधम् ।
निपात्य युद्धे व्याजेन पृष्ठमस्य द्विधाकरोत् ॥ १३८ ॥

सोऽहं तत्पातकं भुक्त्वा विपुलं बहुजन्मसु ।
अद्यापि वातशूलेन पृष्ठे कृतपदः क्षणम्[१] ॥ १३९ ॥

इति संबुद्धबोधेर्मे निर्दोषस्यापि[२] विग्रहे ।
कर्मपङ्कावशेषाङ्का निपेतुः क्लेशविप्रुषः[३] ॥ १४० ॥

जन्मोत्सवेषु निधनेषु च संनिबद्धा
मालेव कर्मशरणिः शबला शरीरे ।
पुंसामियं प्रणयिनी सुखदुःखसीम्नि
भुक्तोज्झितापि विदधात्यधिवासशेषम्[४] ॥ १४१ ॥

इति श्रुत्वा भगवता कथितं सर्व्वभिक्षवः ।
मेनिरे कर्म्मवृत्तानामनतिक्रमणीयताम् ॥ १४२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां दशकर्म्मप्लुत्यवदानम् नाम पञ्चाशत्तमः पल्लवः ॥

---

१ H. पृष्ठे कृतपदस्ततम् । Orig. पृष्ठकृतपदस्तथाम् ।
२ W_1 अनिन्दितस्यापि । ३ Orig. क्लेशविप्रुषः ।
४ Orig. विधात्यवशानशेषम् ।

CHAPTER LI.

ཡལ་འདབ་ལྔ་བཅུ་རྩ་གཅིག་པ།

གསེར་ལྡན་མའི་རྟོགས་བརྗོད་ནི།

གདུང་སྐྱོབས་ཀློ་ཡི་བརྩེ་བས་མཆེས་ག་ཞིན་ནོམས་ཀྱི་སློག་ནི་འགྲོ་བར་སྤྲོ་བའི་མོ།
སྒྲ་ལོང་གྱོན་གྱིས་རོལ་པ་བསྟེན་ཅིང་ཞིན་དུ་རྣ་བའི་མཆོན་གྱིས་བཙད་པ་ནི།
གང་གི་ལུས་ལ་གཡོ་བའི་མིག་ཅན་ནི་བའི་ཨུད་པལ་གྱིས་བསྐྱུན་མཚུངས་པ་ཐོབ།
དེ་དག་སྤྱོད་པ་གྱི་ཆེ་བརྗོད་བྱར་འོས་པའི་ཚིགས་ནི་གང་གིས་བརྗོད་པར་བྱ། 1

སྟོན་ནི་གསང་བའི་ཀ་བར་དུ། དར་ད་བདུལ་བཙོམ་ལྡན་འདས།
ཡུལ་དེ་ནས་ནི་མི་སྣང་བར། དཀའ་ཐུབ་ནགས་ཚལ་གཞན་དུ་ག་ཞིགས། 2

དེ་ཡི་གཡོག་ལ་འོངས་པའི་ལྷ། བདེ་སོགས་བདག་པོ་དག་གིས་དེར།
བཞིན་ལ་འཛུམ་པའི་ཟླ་བ་དག། ཞར་བ་མཐོང་ནས་གྱུ་མཚན་དྲིས། 3

དེ་ཡིས་མཛའ་དང་དགེ་མཚན་སྨད། འཛུམ་པའི་རྒྱུ་མཚན་ཡང་དག་དྲིས།*
དེ་ལ་བཀའ་སྩལ་ནགས་ཀྱི་མཐའ། འདིར་ནི་བདག་གི་སྔོན་བྱུང་དྲན། 4

---

* Neither the text nor the translation of the first line of the fourth *S'loka* exists in the xylograph. I have made the metrical translation.

एकपञ्चाशत्तमः पल्लवः ।

रुक्मवत्यवदानम् ।

आर्त्तत्राणधियां दयाप्रणयिनां प्राणप्रवाहोत्सवे
शस्त्रैस्तीक्ष्णतरैः क्षतानि पुलकालङ्कारलीलाजुषाम् ।
लोलाक्षीश्रवणोत्पलाहतितुलां येषां लभन्ते तनौ
तेषां कैर्वचनैरुदारचरितं बाल्योचितैरुच्यते ॥ १ ॥

गुह्यकैर्वर्त्तदरदौ[१] विनीय भगवान् पुरा ।
देशादन्तर्हितस्तस्माज्जगामान्यत्तपोवनम् ॥ २ ॥

तत्र सेवासमायातस्तस्य देवः शचीपतिः ।
स्मितचन्द्रोदयं वक्त्रे दृष्ट्वा पप्रच्छ कारणम् ॥ ३ ॥

कौतुकप्रणयात्तेन संपृष्टः स्मितकारणम्[२] ।
तमुवाच वनान्तेऽस्मिन् पूर्ववृत्तं स्मृतं मया ॥ ४ ॥

---

१ W I गुह्यकौ वर्त्तदरदौ ।

२ Orig. omits this line. H यत्पृष्टं स्मितकारणम् ।
W I य पृष्टस्मितकारणम् ।

དྲན་པ་ཉམས་སུ་སྐྱོང་བ་ལས། བདག་འཇུམ་འདི་ནི་ཀྱུ་མེད་མིན།
ཞེས་པ་བརྗོད་ནས་བཅོམ་ལྡན་གྱིས། སྨོན་བྱུང་གསུང་བར་རྗེས་པ་མཛད། 5

གྲོད་ཁྱེར་ཤུ་དྲ་ལ་ལྡན་པར་ནི། གྲོང་ཁྱེར་གཙོ་བོའི་བུད་མེད་དག།
སྦྱིན་དང་ཚུལ་ཁྲིམས་བརྩེ་བ་ཅན། གསེར་ལྡན་མ་ཞེས་གྲགས་པ་བྱུང་། 6

ནམ་ཞིག་དེ་ཡི་དབུལ་པོ་ཡིས། བུད་མེད་བཙས་ཤིང་ལྟོགས་པས་གཟིར།
སྦྱིན་མོ་བཞིན་དུ་བུ་ཚ་དག། ཟ་བར་འདོད་པ་མཐོང་བར་གྱུར། 7

དེ་མཐོང་སྙིང་རྗེ་སྐྱེས་གྱུར་པ། དེ་ཡིས་སྐད་ཅིག་ཡང་དག་བསམསམ།
ཀྱེ་མ་རང་ལུས་ལ་ཆགས་པས། བློ་ནི་སྡིག་ལ་རབ་དུ་འཇུག། 8

འདི་ཡི་ཟས་ནི་ལེན་དུ་བདག། གལ་ཏེ་རང་གིས་ཁྱིམ་སོང་ན།
བཀྲེས་པས་ཡོངས་སུ་ཉེན་པ་འདིས། བུ་ནི་ངེས་པར་ཟ་བར་འགྱུར། 9

ཡང་ན་བདག་གིས་བུ་ཁྱེར་ནས། གལ་ཏེ་ཁྱིམ་དུ་ཕྱིན་པ་ན།
འདི་ནི་བཀྲེས་པ་ཉིད་གྱུར་ཏེ། འཕྲལ་ལ་འཚོ་བ་གཏོང་བར་འགྱུར། 10

དེ་ལྟར་གཉིས་ཀ་ཐེ་ཚོམ་དང་། ལྡན་པ་དེ་ལ་བརྩེ་བས་བསམསམ།
འགྲོ་བ་བསྒྲལ་བའི་སླད་ཉིད་དུ། དེ་ཡིས་སྨོན་ལམ་བཏབ་བྱས་ཏེ། 11

དེ་ཡིས་གཏད་བའི་མཚོན་རྣོན་གྱིས། གཡོ་བ་མེད་པར་བཅད་ནས་ནི།
དེ་ལ་རང་གི་ནུ་མ་ཟུང་། འཚོ་བ་ཡིས་ནི་ཟུང་ལ་བྱིན། 12

स्मरणानुभवादेतत् स्मितं मे नत्वकारणम् ।
इत्युक्त्वा भगवान् पूर्ववृत्तं वक्तुम्प्रचक्रमे ॥ ५ ॥

नगर्य्यामुत्पलावत्यां दानशीलदयान्विता ।
ख्याता रुक्मवती नाम पौरमुख्याङ्गनाभवत् ॥ ६ ॥

सा कदाचित् क्षुधाक्रान्तां प्रसूतां दुर्गताङ्गनाम् ।
यातुधानीमिवापश्यत् बालकं भोक्तुमुत्सुकाम् ॥ ७ ॥

तां दृष्ट्वा करुणाक्रान्ता सा क्षणं समचिन्तयत् ।
अहो स्वदेहस्नेहेन मतिः पापे प्रवर्त्तते ॥ ८ ॥

अस्या भोजनमाहर्त्तुं व्रजामि स्वगृहं यदि ।
तदियं क्षुत्परिक्षामा भक्षयत्येव दारकम् ॥ ९ ॥

अथवा शिशुमादाय यदि गच्छामि मन्दिरम् ।
तदेषा कृशतां याता सद्यस्त्यजति जीवितम् ॥ १० ॥

इति सञ्चिन्त्य दयया तस्मिन्नुभयसंशये ।
जगत्सन्तारणायैव प्रणिधानं विधाय सा ॥ ११ ॥

छित्वा तयोपनीतेन शितशस्त्रेण निस्त्रपा ।
निजं स्तनयुगं तस्यै ददौ जीवितधारणम् ॥ १२ ॥

དེ་ནས་དེ་གྲགས་ངོ་མཚར་ཅན། འཇིག་རྟེན་གསུམ་རིག་གྲགས་པའི་ཚེ།
བརྒྱ་བྱིན་བྲམ་ཟེའི་གཟུགས་ཀྱིས་ནི། མདུན་དུ་ཕྱོགས་ཏེ་དེ་ལ་དྲིས། 13

ཁྱོད་ནི་ནུ་མ་བྱིན་པ་ཡིས། ཡིད་ལ་ནོམ་འགྱུར་མ་བྱུང་ངམ།
ཞེས་དྲིས་དེ་ལ་དག་པ་དང་། བདེན་སྨྲས་ལྡན་པ་དེས་སྨྲས་པ། 14

ནུ་མ་བྱིན་ལ་ནོམ་འགྱུར་ཆ། གལ་ཏེ་བདག་ལ་འགའ་ས་གྱུར།
བདེན་པ་དེ་ཡིས་རེ་ཞིག་འཕྲལ། བུད་མེད་ཉིད་ནི་ལྡོག་གྱུར་ཅིག། 15

དེ་བརྗོད་ཙམ་ལ་བདེ་ལྡན་མ། དེ་ཡི་བུད་མེད་གཟུགས་བཏང་ནས།
མཚན་ཉིད་ཐམས་ཅད་ཕུན་ཚོགས་པའི། སྐྱེས་པ་ཉིད་དུ་ཡང་དག་གྱུར། 16

གྲོང་ཁྱེར་ཨུཏྤལ་ལྡན་པར་ནི། མི་བདག་ཨུཏྤལ་ཞེས་བྱ་བ།
གནས་སྐབས་དེར་ནི་ཚེ་རྫོགས་ཤིང་། ནད་ཀྱི་སྦྱོར་བས་ལྷུང་བར་གྱུར། 17

དེ་ནས་རབ་མཆོག་གོན་དང་ལྡན། མཚན་ཉིད་ཤེས་ནམས་མངོན་ཕྱོགས་ཏེ།
འཕྲལ་ལ་སྐྱེས་བུ་ཉིད་ཐོབ་པ། གསེར་ལྡན་དེ་ནི་མངོན་དབང་བསྐུར། 18

ཆོས་ལྡན་མཛེས་པའི་དཔལ་དེ་ཡིས། རྒྱལ་སྲིད་དག་ནི་ཡུན་རིང་བྱས།
དུས་ཀྱི་ལུས་ནི་བཏང་གྱུར་ཏེ། ལུས་ཅན་དག་ནི་བརྟན་པ་མེད། 19

དེ་ཉིད་དུ་ཚེ་ཚོང་དཔོན་བུ། སྙིང་སྟོབས་མཆོག་ཅེས་བྱ་བར་གྱུར།
ཟོལ་མེད་བསྒྲུབ་པའི་སྙིང་པ་ནི། སྐྱེ་བ་གོམས་ལ་གུས་བཅས་པའོ། 20

त्रैलोक्यस्पृशि साश्चर्य्यं तस्या यशसि विश्रुते।
विप्ररूपेण शक्रेण ततः स्पृष्टा समेत्य सा॥ १३॥

अपि ते स्तनदानेन मनोविकृतिमाययौ।
इति पृष्टा सती सत्यवादिनी तं जगाद सा॥ १४॥

यदि मे नाभवत् कश्चिद्विकारांशः स्तनार्पणे।
तेन सत्येन सहसा स्त्रीत्वं तावन्निवर्त्तताम्॥ १५॥

इत्युक्तमात्रे स्त्रीरूपं सा त्यक्त्वा सत्यशालिनी।
सर्व्वलक्षणसम्पन्नं पुरुषत्वं समाययौ॥ १६॥

नगर्य्यामुत्पलावत्यामस्मिन्नवसरे नृपः।
उत्पलाक्षः समासाद्युर्व्याधियोगाद्यपद्यत॥ १७॥

लक्षणज्ञैरथाभ्येत्य प्रवरैर्वृद्धमन्त्रिभिः।
सद्यःसम्प्राप्तपुंस्त्वोऽसौ रुक्मवानभ्यषिच्यत॥ १८॥

स राज्यं राजमानश्रीः कृत्वा धर्म्मधनश्चिरम्।
तनुं तत्याज कालेन स्थायिनो न हि देहिनः॥ १९॥

तत्रैव श्रेष्ठिनः सूनुः सोऽभूत् सत्त्ववराभिधः[1]।
निर्व्याजोऽर्ज्जितदानेषु जन्माभ्यस्तेषु सादरः॥ २०॥

[1] H सत्यवराभिधः।

འབྱུང་པོ་ཀུན་གཟིར་བསམ་པ་ལ།
རྟག་ཏུ་དེ་ཡིས་ཡིད་བགོད་དེ།
བཟློད་དཀའ་འདབ་ཆགས་ཉམས་ཉིད་ཀྱིས།
བཀྲེས་པའི་སྡུག་བསྔལ་ཡང་དག་བསམས། 21

དེ་ནས་དུར་ཁྲོད་ནགས་སུ་དེ། སོང་ནས་སྤུ་གྲིས་ལུས་བཀས་ཏེ།
གན་ཀྱལ་ཉལ་ནས་ཤ་ཟ་བའི། འདབ་ཆགས་ཉམས་ལ་རབ་ཏུ་བྱིན། 22

ཟི་མ་གྲིས་དེ་ཡིས་མིག་གཡས་ནི། མཐོན་པོར་འགྲོ་བའི་མཁར་བགྲོད་ཀྱིས།
མཆུ་ཡིས་ཕྱུང་ཞིང་རབ་ཕྱུང་ནས། ཡང་དང་ཡང་དུ་རབ་ཏུ་བཏང་། 23

བརྟན་ཞིང་ཡན་ལག་ཀུན་མི་གཡོ། དེ་ཡིས་ཡ་མཚན་བྲ་མཐོང་ནས།
སྨྲས་པ་རྟོགས་མེད་ཉིད་དུ་ཟློ། ང་ཡིས་ཁྱོད་ནི་ཡོངས་མི་འཛིན། 24

རོ་གྲལ་སྙིང་པོ་མེད་པའི་ལུས། གཉེར་བཅས་སྐད་ཅིག་འཇིག་པ་འདི།
གཞན་ལ་ཕན་པའི་ཆ་ཤས་ཀྱིས། འཁོར་བའི་སྙིང་པོ་ཉིད་དུ་གྱུར། 25

མི་ཉམས་ལུས་ནི་མི་གཙང་ཟག་ཅིང་སོ་སོའི་གནས་སུ་སྨད་གྱུར་དྲི་མ་ཅན། གནོད་པའི་གནས་སུ་གྱུར་ཅིང་དབུགས་དུས་གཡོ་ལ་ལོག་པར་ཆགས་པ་འདི་ནི་ཅི་གང་ཞིག་བསོད་ནམས་ཉམས་ཀྱི་འགའ་ཞིག་དག་ཏུ་འགའ་ལ་འགའ་ཚེ་འགའ་མཐོང་ནས།
གདུང་བ་ཞི་བྱེད་སྐྱོབ་ལ་ཞུགས་གྱུར་འདི་ཉིད་གཅིག་བུ་འདི་ཡི་དགའ་བ་ཉིད། 26

सर्व्वभूतार्त्तिचिन्तासु स सदा न्यस्तमानसः ।
दुःसहं पक्षिणामेव क्षुद्दुःखं समचिन्तयत् ॥ २१ ॥

स श्मशानवनं गत्वा क्षुरेणोल्लिख्य विग्रहम् ।
उत्तानशायी प्रददौ तनुं क्रव्यादपक्षिणाम् ॥ २२ ॥

उच्चैर्गति[1]विहङ्गोऽस्य दक्षिणं नयनं शनैः ।
उत्पाट्योत्पाट्य[2] तुण्डेन प्रोत्ससर्ज पुनः पुनः ॥ २३ ॥

धैर्य्यनिश्चलसर्व्वाङ्गः स दृष्ट्वा विस्मितं खगम् ।
उवाच भुंक्ष्व निःशङ्कं नैव त्वां वारयाम्यहम् ॥ २४ ॥

निःसारविरसः कायः सापायोऽयं क्षणक्षयी ।
परोपकारलेशेन याति संसारसारताम् ॥ २५ ॥

क्लेदस्यन्दिनि निन्दिते प्रतिपदं श्वासक्षणस्यन्दिनि
स्नेहः कोऽयमपायधाम्नि मलिने मिथ्याशरीरे नृणाम् ।
एकैव स्पृहणीयतास्य यदिदं पुण्यैः क्वचित् कस्यचित्
किञ्चिद्वीक्ष्य कदाचिदार्त्तिसमये[3] त्राणाय सन्नह्यति ॥ २६ ॥

---

१ Or ऊर्द्धगति॰ । २ W_2 उत्पात्योत्पात्य ।
३ Orig. कदाचिदार्त्तिशमनम् ।

14269

ཅེས་པ་སྨྲ་བ་དེ་ཡི་ལུས། །བཀྲེས་པས་ཉེན་པའི་བྱ་རྣམས་ཀྱིས།
ཟ་ཞིང་འཐུངས་པའི་སྐད་ཅིག་ལ། །ཟུས་བའི་ལྷག་མ་ཉིད་དུ་གྱུར། 27

དུས་ཀྱིས་དེ་ནི་བྲམ་ཟེ་དག །སཱ་ལ་ཆེན་པོའི་བྲུར་སྐྱེས་ཏེ།
བདེན་པའི་བརྟུལ་ཞུགས་ཞེས་བྱ་བ། །སྐྱེ་བོ་དག་གིས་བཀུར་བར་གྱུར། 28

རིག་པ་མ་ལུས་ཐོབ་གྱུར་ཅིང་། །སྙིང་རྗེ་དག་ལ་ཆགས་པའི་སེམས།
ཞི་བར་དགའ་བ་དེ་ཡི་ཡིད། །ཁྲིམས་ཐབས་ལས་ནི་ཕྱིར་ཕྱོགས་གྱུར། 29

རིགས་སུ་སྐྱེས་ཤིང་ཡོན་ཏན་ཐོབ། །བློ་གྲོས་དབེན་པས་རབ་བརྒྱན་ཅིང་།
འབྱུང་པོ་ཀུན་ལ་བརྩེ་ཞིང་བྱམས། །བསོད་ནམས་ལས་ཀྱི་མཚན་ཉིད་ཡིན། 30

གཞོན་ནུ་དེ་ཉིད་ཆགས་བྲལ་གྱིས། །དགའ་ཞིང་དཀའ་ཐུབ་ནགས་སོང་སྟེ།
དྲང་སྲོང་གཉིས་ཀྱིས་བརྟུལ་ཞུགས་བྱིན། །བསྟི་གནས་སུ་ནི་དལ་གསོ་བསྟེན། 31

དེ་ནས་དུས་ཀྱི་ཡི་ཤེས་སྐྱུར། །དྲི་མེད་ཤིན་དུ་རྣོ་བ་ཡིས།
སྡུག་མོ་བཙའ་ལ་ཉེ་བ་དག །མཐོང་ནས་དེ་ཡིས་ཡང་དག་བསམས། 32

བཀྲེས་པ་ཡིས་ནི་གཟིར་བ་འདི། །ཞག་བདུན་དག་ན་བཙའ་བར་འགྱུར།
རང་གི་བུ་ནི་ཟ་བ་ལ། །སྐོམ་པ་དྲག་པོའང་འབྱུང་བར་འགྱུར། 33

ཞེས་བསམས་དེ་ཡིས་སྡུག་བསྔལ་ནི། །ཐུབ་པ་དག་ལ་བཤད་ནས་དེས།
སྙིང་རྗེ་དེ་ནི་ཕྱིར་བཅོས་པའི། །ཡིད་ལ་རི་བ་བྱས་པར་གྱུར། 34

इति तस्य ब्रुवाणस्य क्षुत्क्षामैः पक्षिभिः क्षणात् ।
भक्ष्यमाणस्य विक्षिप्य नीतः कायोऽस्थिशेषताम् ॥ २७ ॥

महाशालकुलस्याथ ब्राह्मणस्य स पुत्रताम् ।
यातः सत्यव्रतो नाम बभूव जनसम्मतः ॥ २८ ॥

अवाप्ताखिलविद्यस्य करुणासक्तचेतसः ।
तस्य शान्तिरतस्याभूद्विवाहविमुखं मनः ॥ २९ ॥

कुले जन्म गुणावाप्तिर्विवेकालङ्कृता मतिः ।
सर्व्वभूतदया मैत्री लक्षणं पुण्यकर्म्मणाम् ॥ ३० ॥

वैराग्याभिरतिर्गत्वा स युवैव तपोवनम् ।
दत्तव्रतो महर्षिभ्यां भेजे विश्रान्तिमाश्रमे ॥ ३१ ॥

ततः कालेन सम्प्राप्तविमलज्ञानलोचनः ।
आसन्नप्रसवां व्याघ्रीं स दृष्ट्वा समचिन्तयत् ॥ ३२ ॥

प्रसवोऽस्याः क्षुधार्त्तायाः सप्ताहेन भविष्यति ।
स्पृहा चोत्पत्स्यते तीव्रा निजपोतकभक्षणे ॥ ३३ ॥

इति सञ्चिन्त्य तद्दुःखं मुनिभ्यां विनिवेद्य सः ।
चकार तत्प्रतीकारे कारुण्येन मनोरथम् ॥ ३४ ॥

དེ་ནས་ཞག་བདུན་འདས་པའི་ཚེ། སྟག་མོ་མངལ་གྱི་ཁུར་གྱིས་དུབ།
ཟས་ཆག་མང་པོས་གདུང་གྱུར་པ། དཀའ་ལས་ཆེན་པོས་བུ་ཚ་བཙས། 35

རང་གི་ཁྲག་གི་དྲི་ཡི་ནི། སྲིད་པ་དྲག་པོ་རབ་སྐྱེས་པ།
དེ་མཐོང་བདེན་པའི་བརྟུལ་ཞུགས་ནི། སྙིང་རྗེས་བརླན་པས་ཡང་དག་བསམས། 36

སྟག་མ་འདི་ནི་བཀྲེས་བ་ཡིས། སྡུག་བསྔལ་དྲག་ལས་བུ་ཟར་བརྩོན།
ཀྱེ་མ་འདི་ནི་རང་དོན་གྱིས། བུ་ལ་ཆགས་པའང་བརྗེད་པར་གྱུར། 37

རང་སྡུག་བསྔལ་བས་ཐམས་ཅད་གདུང་། བཞིན་གྱི་ཡོངས་སུ་གདུང་བས་བསྲེལ།
སྐྱེ་བོ་འགའ་ཞིག་གཞན་གདུང་ལ། ཁྱད་པར་དུ་ནི་གདུང་བ་སྐྱེ། 38

བུ་དང་བཅས་པའི་སྟག་མོ་འདི། ལུས་བྱིན་ནས་ནི་བདག་གིས་བསྐྱངས།
སྲོག་ལ་ཕྲེ་ཆོས་ཡོངས་རྫོགས་པ། འདི་དག་སྡུག་བསྔལ་ཡོངས་ནི་བཟོད། 39

གཞན་སྲོག་སྐྱོབ་ལ་ལུས་ནི་རྩྭ་བཞིན་བརྟགས་པ་གཏོང་བ་ཉམས་དག་གི།
རྒྱ་ཆེ་བསོད་ནམས་གྲུབ་པའི་རང་བཞིན་གྲགས་པའི་ལུས་ནི་བརྟན་པར་འགྱུར།
གནོད་པ་རབ་ཆགས་སྲོག་གི་ཐིགས་པ་འདི་ནི་རབ་གཡོ་རླུང་དག་གིས།
གཡོ་བའི་པད་ལྷན་འདབ་མའི་ཁོང་གནས་གཡོ་བ་རི་ཆུ་ཐིགས་དག་གི་གྲོགས། 40

འདི་བསམས་སྙིང་རྗེའི་གཏེར་དེ་ཡིས། འབྲིད་པའི་ཕུར་མས་མགྲིན་པ་ལ།
ཁྲག་ཟགས་མ་ནི་བཏོང་བྱས་ནས། སྟག་མོའི་མདུན་དུ་འགྱེལ་བར་གྱུར། 41

ततः प्रयाते सप्ताहे व्याघ्री गर्भभरालसा।
बहूपवाससन्तप्ता कृच्छ्रेणासूत पोतकान्॥ ३५॥

निजशोणितगन्धेन जाततीव्रतरस्पृहाम्।
सत्यव्रतस्तामालोक्य दयार्द्रः समचिन्तयत्॥ ३६॥

इयं वराकी क्षुद्दुःखादुद्यता पोतभक्षणे।
अहो बतास्याः स्वार्थेन पुत्रस्नेहोऽपि विस्मृतः॥ ३७॥

सर्व्वः स्वदुःखसन्तप्तः परसन्तापशीतलः।
विशेषार्त्तः परस्यार्त्तौ विरलो जायते जनः॥ ३८॥

दत्त्वा शरीरं रक्षामि व्याघ्रीमेतां सशावकाम्।
न सहे दुःखमेतेषां पर्य्याप्तं प्राणसंशये॥ ३९॥

परप्राणत्राणे तृणकलनया त्यक्तवपुषां
यशःकायः स्थायी भवति पृथुपुण्योदयमयः।
प्रसक्तापायोऽयं प्रसरदनिलालोलनलिनी-
दलोत्सङ्गत्वङ्गज्जललवसुहृज्जीवितकणः॥ ४०॥

ध्यात्वेति न्यपतत् व्याघ्र्याः स पुरः करुणानिधिः।
गलद्रक्तं गले कृत्वा क्षतं वेणुशलाकया॥ ४१॥

ངེས་བར་བདག་ཉིད་ཆེ་ཉམས་ཀྱིས། ཡིད་ནི་སྙིང་རྗེས་མཉན་པ་དག།
ཉེ་བར་བསྐྱབས་ལ་ཚིགས་བཅས་པས། གཞན་གྱི་ཡོངས་གདུང་བཟོད་མ་ཡིན། 42

དེ་ནས་གཡོ་མེད་དེ་ཡིས་སྙིང་ག་རབ་ཏུ་གྱུར་པ་ལ།
སྟག་མོ་ཕྲག་ལ་མངོན་བར་འདོད་པ་སྣོན་པོས་རབ་ཏུ་མཆོངས།
དགའ་དང་འཇུམ་སྐྱེས་སེན་མོའི་འོད་ཟེར་དག་གིས་འགྲོ་བ་ལ།
འཕགས་པའི་སྤྱོད་པའི་ངོ་མཚར་རབ་ཏུ་འཕྲི་བར་བྱེད་བ་བཞིན། 43

བྱམས་པས་འཁྲུལ་བཞིན་བཟོད་པས ཉེས་བྱས་བཞིན་དང་ཤེས་རབ་ཀྱིས་ནི་
བསམ་ཚོགས་བཞིན།
སྡུག་བསྔལ་བཟོད་དཀའི་བསྲུང་པ་བརྟན་པས་བཞིན་དང་ཉོན་མོངས་དཀའ་
ཐུབ་དཔལ་གྱིས་བཞིན།
བརྩེ་བས་དེ་ཡི་ལུས་ནི་སྙིང་སྟོབས་ས་གཞི་གཡོ་བ་མེད་པ་དེ་ཉིད་ཀྱིས།
སྟག་གི་རྒྱུང་མས་བདབ་ཅིང་མི་བཟད་དྲག་པོ་མངོན་འཇོམས་གསལ་བའི་
ཁྲར་དག་བཟོད། 44

སྟག་མོའི་སྟེར་མོ་འཕྲེང་བའི་རོལ་པས་ཉམ་པར་བཅོམ་གྱུར་པ།
དེ་ཡི་སྙིང་གའི་གཞི་ནི་ཉམ་པར་ཉམས་པ་སྐད་ཅིག་མཚོན།
ལུས་ནི་སྐྱུ་ལོང་གིས་བྱུགས་བསིལ་ཟེར་ཅན་ལྷར་དཀར་བ་ཡིས།
སྙིང་སྟོབས་རབ་གསལ་འོད་ཟེར་རྒྱུ་གུས་ཁེངས་པར་གྱུར་པ་བཞིན། 45

आपन्नत्राणसरसं नहि नाम महात्मनाम्।
सहते परसन्तापं करुणाकोमलं मनः ॥ ४२ ॥

रक्ताभिलाषनिशिता निपपात तस्य
व्याघ्री ततः प्रततवक्षसि निश्चलस्य।
आश्चर्य्यमार्य्यचरितस्य जगत्सु जात-
हर्षस्मितैरिव नखांशुभिरुल्लिखन्ती ॥ ४३

मैत्रीव स्खलितं क्षमेव कुशलं प्रज्ञेव चिन्ताचयम्
दुःखं दुःसहविप्लवं धृतिरिव क्लेशं तपश्रीरिव।
तस्य व्याघ्रवधूनिपातविषमक्रूराभिघातोल्वणम्
सेहे मूर्त्तिरचञ्चलैव दयया सा सत्त्वभूमिर्भरम् ॥ ४४ ॥

व्याघ्रीनखावलिविलासविलुप्यमाना
वक्षःस्थली क्षणमलक्षत विक्षतास्य।
रोमाञ्चचर्चिततनोस्तुहिनांशुशुभ्र-
सत्त्वप्रकाशकिरणाङ्कुरपूरितेव ॥ ४५ ॥

ཤ་དག་ཟ་ཞིང་ཁྲག་འཐུང་མྱོས་པར་གྱུར་པའི་སྟག་མོ་ནི།
དགའ་དང་བཅས་པ་མཐོང་ནས་འགྲོ་བ་དེ་ཡི་རང་གི་སྲོག།
འཚོ་བ་དག་ནི་རིང་དུ་འགྲོ་བའི་དུས་སུ་བྲལ་གྱུར་པ།
ཡུད་ཙམ་ཞིག་ན་མགྲིན་པ་ཉིད་ལ་བརྟེན་ཏེ་བརྡེན་པར་བྱས། 46

*སྲིད་པའི་རྗེས་མཐུན་རྩེ་དགའི་འོང་དང་འགྲོ་བ་དག་གིས་ནི།
ངོ་ཚའི་དབང་ལས་བཞིན་ནི་མཆོག་ཏུ་ཉམས་པར་དུད་པ་བཞིན།
ཁྲིམ་ཐབས་ལས་ནི་ཕྱིར་ཕྱོགས་གྱུར་ཀྱང་དེ་ཡི་ལག་པ་དང་།
དེ་ཡིས་བཟུང་ནས་མཛའ་ཞིང་གཙུགས་ལྟར་སྙིང་ནི་དགའ་བར་བྱས། 47

ཁྲམས་པས་དག་ཅིང་ཉམས་འགྱུར་མེད་པ་ཀྱི་ཚེའི་སྙིང་སྟོབས་དང་།
ལུགས་བཟང་བསོད་ནམས་ཆུ་བོ་འཇིག་རྟེན་ཉམས་སུ་གྲགས་པ་དང་།
འབྱུང་པོར་ཕན་པའི་རང་བཞིན་དམན་ལ་སྙིང་རྗེས་བསྐྱེད་པའི་སེམས།
རང་དབང་ཉིད་དུ་གྱུར་བ་ལེགས་ལྡན་བདག་ཉིད་ཉམས་ཀྱི་ཡིན། 48

སྟག་མོའི་སྡེར་མོའི་རྩེ་མོས་བཤིག་པ་དེ་ཡི་སྙིང་སྟོབས་དག།
མཚུངས་པ་མེད་པ་དེ་མཐོང་འཕྲུལ་ལ་ནོར་འཛིན་བུ་མོ་ནི།
རྦ་རླབས་རོལ་བ་དང་ལྡན་ཆུ་གཏེར་བཞི་ཡི་སྐེ་རགས་ཅན།
སྲོག་ནི་ཞིག་པའི་དུས་ན་འཇིགས་པ་བཞིན་དུ་རིང་ཞིག་འདར། 49

* སྲིད་པའི་རྗེ་མཐུན་ (भवाग्र प्रदक्षिण) of the xylograph is evidently an incorrect reading.

तस्यामिषाहरणशोणितपानमत्ताम्
व्याघ्रीं सहर्षमवलोकयतश्चकार ।
दीर्घप्रवाससमयाकुलिता मुहूर्त्तम्
कण्ठावलम्बनधृतिं निजजीववृत्तिः ॥ ४६ ॥

तृप्ता प्रदक्षिणविलासगतागतेन
लज्जावशादिव भृशं विनताननैव ।
तस्याकरोदपि विवाहपराङ्मुखस्य
पाणिग्रहप्रणयिनी हृदयोत्सवं सा ॥ ४७ ॥

मैत्रीपवित्रमविकारमुदारसत्त्वम्
सौजन्यपुण्यतटिनी भुवनेषु कीर्त्तिः ।
भव्यात्मनां भवति भूतहितस्वभावम्
स्वाधीनदीनकरुणाभरणञ्च चेतः ॥ ४८ ॥

तत्तस्य सत्त्वमतुलं चतुरम्बुराशि-
वेलाविलासरसना वसुधापुरन्ध्री ।
व्याघ्रीनखाग्रदलितस्य विलोक्य सद्यः
प्राणक्षयक्षणभियेव चिरञ्चकम्पे ॥ ४९ ॥

བདེན་པའི་བརྟུལ་ཞུགས་སྙིང་རྗེ་རབ་དགའ་དེ་ནི་ང་ཉིད་དེ།
ད་ལྟ་འདིར་ནི་རང་གི་སྤྱོད་ཚུལ་དྲན་ནས་བཞད་གད་སྐྱེས།
རྒྱལ་བས་གསུངས་པའི་སྔོན་གྱི་སྤྱོད་པ་འདི་ནི་ཐོས་གྱུར་ནས།
ཡ་མཚན་ཡིད་ལྡན་བསྒྱུ་བྱིན་དེ་ནི་བཞིན་རས་གཡོ་མེད་གྱུར།

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གསེར་ལྡན་གྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙོ་གཅིག་པའོ།།

सत्यव्रतः स करुणानिरतोऽहमेव
स्मृत्वा स्ववृत्तमिह सम्प्रति जातहासः ।
श्रुत्वेति पूर्व्वचरितं कथितं जिनेन
शक्रः सविस्मयमनास्तिमितानोऽभूत् ॥ ५० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां रुक्मवत्यवदानं नाम एकपञ्चाशत्तमः पल्लवः ॥

CHAPTER LII.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་གཉིས་པ།

བསོད་ནམས་མི་དམན་པའི་རྟོགས་བརྗོད་ནི།

༄༅། །གང་ཞིག་ནགས་སོང་ཤིན་ཤུན་ལྷན་གྱུར་ཀྱང་། *
སྐྱོང་རྣམས་རྒྱུན་དུ་དོན་བྲུས་ཉིད་དུ་བྱེད།
སྤྱོད་ཚུལ་མཛེས་ལྡན་དེ་དང་ཙན་དན་གྱིས།
ངོ་མཚར་དག་ནི་སྲུ་ཡི་བསམ་མི་བྱ། 1

དེ་ནི་དཀའ་ཐུབ་ནགས་གཞན་ན། བཅོམ་ལྡན་བཞུགས་ཤིང་འཛུམ་རྟར་ལ།
བགྲོ་བྲིན་ཡ་མཚན་ལྡན་པ་ཡིས། འཛུམ་པ་ཉིད་ཀྱིས་རྒྱུ་མཚན་དྲིས། 2

དེ་ཡི་གུས་པས་དྲིས་པའི་ཚེ། དེ་ལ་ཀུན་མཁྱེན་གྱིས་གསུངས་པ།
མིག་སྟོང་ལྡན་པ་གནས་འདིར་ནི། སྔོན་བྱུང་བ་དག་བདག་གིས་དྲན། 3

མ་ཐུ་ར་ཀ་ཞེས་པ་ཡི། གྲོང་ཁྱེར་ལྷ་གྲོང་ལྟ་བུར་སྔོན།
བསོད་ནམས་མི་དམན་ཞེས་བྱ་བའི། ས་བདག་ས་ཡི་རྒྱུད་དུ་གྱུར། 4

སྙིང་རྗེ་དགའ་དང་བཏང་སྙོམས་དང་། བྱམས་པ་སེམས་ལ་ཡང་དག་ཆགས།
ཕྲག་དོག་ཅན་བཞིན་གང་གི་དཔལ། སྐྱོང་བའི་སྐྱེ་བོ་ཁང་པར་གནས། 5

---

* ཤིང་ཤུན།

द्विपञ्चाशत्तमः पल्लवः ।

अदीनपुण्यावदानम् ।

अर्थिनां वनगतोऽपि वल्कली[1]
यः करोत्यविरतं कृतार्थताम् ।
कैर्न चारुचरितस्य रुच्यते[2]
तस्य चन्दनतरोश्च सत्कृतिः ॥ १ ॥

विहरन्तमथान्यस्मिन् भगवन्तं तपोवने ।
पप्रच्छ सस्मितं शक्रो विस्मितः स्मितकारणम् ॥ २ ॥

पृष्टः प्रणयिना तेन सर्व्वज्ञस्तमभाषत ।
अस्मिन् देशे सहस्राक्ष पूर्व्ववृत्तं स्मृतं मया ॥ ३ ॥

मधूदकाख्ये नगरे पुरा सुरपुरोपमे ।
अदीनपुण्यनामाभूत् भूपतिर्भूषणं भुवः ॥ ४ ॥

करुणामुदितोपेक्षामैत्रीसंसक्तचेतसः ।
उवासेर्ष्यावतीव श्रीर्यस्यार्थिजनवेश्मसु ॥ ५ ॥

---

१ W/I वल्कायाद्यः । २ Orig. चर्च्यते ।

ཉམ་ཞིག་དེ་ཡི་སྤྱོད་པ་ནི། འགྲོ་ལ་གྲགས་པ་ཐོས་གྱུར་ནས།
ས་ཡི་བདག་པོ་ཚངས་པས་བྱིན། རྒྱལ་བར་འདོད་པ་དེ་ཅན་འོངས། 6

དེ་ནས་གླང་པོའི་ཚོགས་གདམས་པས། ཕྱོགས་མཚམས་དག་ནི་སྤུན་པར་བྱས།
དེ་ནི་རྗེས་སུ་བཅིང་བའི་སྐད། དེ་ཡི་གྲོང་ཁྱེར་བཅིངས་པར་བྱས། 7

སྙིང་སྟོབས་བརྩེ་ལྡན་མི་ཡི་བདག། དགྲ་ནི་བརྟག་པར་མི་བཞེད་དོ།
ཞེས་བསམས་དེ་ཡི་བློན་པོ་ནི། མ་བརྗོད་གཡུལ་ལ་ཕྱི་རོལ་འཐོད། 8

གླང་པོ་རྟ་དང་ཤིང་རྟ་རྣམས། རྐྲག་བྱེད་གསུམ་ནི་རྒྱུས་པ་དེར།
བསོད་ནམས་མི་དམན་སྙིང་རྗེ་ཡིས། སྡུག་བསྔལ་གྱུར་པས་ཡང་དག་བསམས། 9

མི་ཟད་རྒྱལ་རིགས་ཆོས་འདི་ནི། ཆོས་མིན་བསྒྱུ་ཐབ་དག་དང་ལྡན།
མ་རུངས་སྲོག་ཆགས་གསོད་པ་ནི། གང་དུ་ཆོས་ཞེས་མ་ཉོར་བརྗོད། 10

ཁྲག་གིས་བགོས་ཤིང་དྲི་མ་ཅན། རྒྱལ་རིགས་རྣམས་ཀྱི་ཆོས་འདི་སྐད།
གང་གི་ཆེད་དུ་རབ་འབད་པའི། འཚོ་བ་དེ་ཡང་རྟག་པ་མིན། 11

བདེ་ཉུང་བློ་ཡིས་བཟོད་བྱ་འདི་ནི་སྐྱེས་བུ་རྣམས་ཀྱི་ཉོན་མོངས་སྐྱིད།
གནོད་པ་དང་བཅས་གདུང་བའི་ལམ་དུ་རྟག་ཏུ་ཉེས་པ་ཉིད་གྱུར་ཅིང་།
ཕྱི་ནས་དྲན་པས་སྡུག་བསྔལ་ཤུགས་རིངས་དག་གིས་བརྟན་པ་འཇོམས་བྱེད་པ།
ཡོངས་སྤྱོད་དོན་དུ་ཀྱི་ཧུད་ཀྱི་ཧུད་གཞན་སྲོག་འཚོ་ལ་རབ་ཏུ་འབད། 12

कदाचित् चरितं तस्य श्रुत्वा जगति विश्रुतम् ।
तमाययौ ब्रह्मदत्तः क्ष्मापतिर्विजिगीषया ॥ ६ ॥

ततः करिघटाबन्धैरन्धीकृतदिगन्तरः ।
चकार नगराबन्धमनुबन्धाय तस्य सः ॥ ७ ॥

सत्त्वानुकम्पी नृपतिर्न शत्रुक्षयमिच्छति ।
ध्यात्वेति निर्ययुर्योद्धुमनुक्त्वैवास्य मन्त्रिणः ॥ ८ ॥

वर्त्तमाने रणे तस्मिन् गजवाजिरथक्षये ।
अदीनपुण्यःकारुण्यविविग्नः समचिन्तयत् ॥ ९ ॥

विषमः क्षत्रधर्म्मोऽयमधर्म्मशतसम्मितः ।
यस्मिन् प्राणिवधक्रौर्य्यं धर्म्म इत्यभिधीयते ॥ १० ॥

धिग्धर्म्मं रुधिरादिग्धं क्षत्रियाणां मलीमसम् ।
कृते यस्य प्रयत्नोऽयं तज्जीवितमशाश्वतम्[१] ॥ ११ ॥

सापायस्य व्यसनसरणौ शीर्यमाणस्य नित्यम्
दुःखोच्छ्वासैः प्रतिहतधृतेः स्मर्य्यमाणस्य पश्चात् ।
सोऽयं सद्यः सुखलवधिया क्लेशपाकस्य[२] पुंसाम्
भोगस्यार्थे बत बत परप्राणहिंसाप्रयत्नः ॥ १२ ॥

---

१ H and W_1 तज्जीवितुमशाश्वतम् ।
२ ४ H and W_1 क्लेशपाशस्य ।

དེ་སྲིད་འཚོ་དང་སྡིག་པའི་གནས། ཆོས་མིན་མང་བའི་རྒྱལ་སྲིད་འདི*།
ཡོངས་སུ་བཏང་ལ་བདག་ཉིད་ནི། དཀའ་ཐུབ་ནགས་སུ་འགྲོ་བར་བྱ། 13

རྒྱལ་པོ་མི་ཤེས་སྨོངས་རྣམས་ཀྱིས། གསོད་དང་འཆིངས་པ་བཀྲིས་བསྐྱབས་པའི།
སྡིག་པ་མི་བཟད་དཔལ་འབྱོར་ནི། དུས་ཀྱིས་ཁམས་སུ་བྱེད་པ་ཉིད། 14

འཁོར་བར་དུས་མིན་དག་ཏུ་བསམ་ཡས་དུས་ནི་སྟོབས་དང་ལྡན་པ་འདིས།
སྐྱེས་བུ་སོ་སོ་དག་ལ་བསྐལ་པའི་མཐའ་ནི་སོ་སོར་སྟེར་བྱེད་ཅིང་།
ཤིན་ཏུ་ཆེ་བའི་སྨོངས་པས་བློ་བཙོམ་རེ་བའི་འཆིང་བ་བརྟན་པོ་ཡིས།
ཡུལ་གྱི་བདེ་བའི་ཚོགས་ལ་སེམས་བྱེད་སྐྱེས་བུ་རྣམས་ཀྱི་རྩེ་དགའ་འཇོམས། 15

ཞེས་པ་བསམས་ནས་མི་བདག་ནི། འཚོ་བའི་ཉོན་མོང་ལས་ཕྱིར་ཕྱོགས།
དབྱུག་པ་ཤིང་ཤུན་བཟུང་ནས་ནི། མཚན་མོ་དཀའ་ཐུབ་ནགས་སུ་སོང་། 16

དེ་ནས་བློན་པོ་གཡུལ་ཞུགས་པས། དེ་ནི་སོང་བ་ཐོས་གྱུར་ནས།
འཇིག་རྟེན་ལ་བསྐྱབས་དགྲ་བོ་ནི། སྣ་སྐྲོགས་རྒྱུགས་པས་འཆར་ལ་སྐྱེས། 17

ནགས་སུ་གླང་ཆེན་སྨྱོས་པ་དག། དྲག་པོའི་སྒྲ་ནི་མ་སྒྲོགས་ཤིག།
འདིར་ནི་སེང་གེ་སྒྲིན་གྱི་སྒྲ། བཟོད་པ་མིན་པ་ཉམ་པར་གནས། 18

---

* "ཆོས་མེད་མང་བའི་རྒྱལ་སྲིད་" ཞེས་སོགས་ཚིག་རྐང་གཉིས་ཀྱི་སྐད་དོད་ཆད་པ་ འདར་ལོས་བརྩམས་པ་སྣར་རྒྱ་དཔེ་ཆེད་ན་ཡུ་དག་ཕྱེད།

The text of this line was lost. *H* Dar Lochava sought to supply its place by the following :—

अधर्म्मं बज्रराज्येयं तपस्विस्थान गच्छन ।

तस्मादिदं परित्यज्य हिंसापाप[1]निकेतनम्।
अधर्म्मबहुलं राज्यं गच्छाम्येष तपोवनम्॥ १३॥

राज्ञामज्ञानमूढ़ानां वधबन्धशतार्ज्जिताम्।
कालः कवलयत्येव लक्ष्मीमक्षीणकिल्बिषाम्॥ १४॥

अचिन्त्यः संसारे बहुलतरमोहाहतधियाम्
स्थिरैराशाबन्धैर्विषयसुखजालं कलयताम्।
अकाले कल्पान्तं प्रतिपुरुषमेष प्रतिदिशन्
बली कालः पुंसां किल विलसितं सङ्कलयति॥ १५॥

इति सञ्चिन्त्य नृपतिर्हिंसापापपराङ्मुखः।
दण्डवल्कलमादाय ययौ निशि तपोवनम्॥ १६॥

ततस्तद्गमनं श्रुत्वा लोके प्रच्छाद्य मन्त्रिणः।
युध्यमानाः शरोदग्रं रिपुं गर्ज्जन्तमूचिरे॥ १७॥

गहने[2] मत्तमातङ्ग मा कृथा गलगर्ज्जितम्।
घनशब्दक्षताक्षान्तिर्निर्विशत्यत्र केशरी॥ १८॥

---

१ $\overset{W}{I}$ हिंसापात॰ H हिंसापाय॰।
२ H and $\overset{W}{2}$ गहनम्।

ཞེས་སྨྲ་བརྟན་པ་དེ་དག་གིས། རྗེ་ལ་བྲུ་དགའ་སྡུག་པོ་དང་།
གོ་ཆས་ལུས་ནི་རབ་གཡོགས་ཏེ། གཡུལ་དུ་གཡུལ་ནི་རབ་ཏུ་བསྐྲད། 19

སྐབས་དེར་ཀོ་ས་ལ་དག་ཏུ། གྲམ་ཟེ་སེར་སྐྱ་ཞེས་བྱ་བ།
རྒྱལ་པོ་དབྲིག་གི་གོ་ཆ་ཡིས། ནོར་གྱི་ཆད་པས་གཟིར་བར་གྱུར། 20

མ་ལུས་ནོར་བྲིན་དབུལ་བ་ལས། མང་པོ་བྲིན་པར་མི་བཟོད་པ།
བུ་དང་གཉེན་རྣམས་མཐའ་དག་ནི། བཙོན་ཁང་ནང་དུ་རྣམ་པར་བཀོད། 21

གཉེན་ཚན་བཅིངས་པས་སྡུག་བསྔལ་བས། བཙོས་པའི་ཐབས་ནི་རབ་བསམས་ཏེ།
གྲོགས་པོ་རྒྱལ་ཟིན་པ་ཡིས། རི་དགས་བཞིན་དུ་གཡོ་བ་མེད། 22

བདག་གི་ཕ་མ་སྲིང་མོ་དང་། སྤུན་ཟླ་བུ་མོ་བུ་དག་ཀྱང་།
བཙོན་ར་དག་ཏུ་བཅིངས་གྱུར་པ། ནོར་མེད་ན་ནི་གྲོལ་མི་འགྱུར། 23

ས་བདག་ཆོས་ལ་སྡང་བ་ཡིས། གང་ལ་ཆགས་པ་རབ་ཏུ་འཇུག
ཉོན་མོངས་དག་གིས་བརྙན་པ་ཡི། ཡུལ་དེ་རབ་ཏུ་བཏང་བས་འཚོ། 24

ཡང་ན་གཉེན་གྱིས་འཆིང་ཐག་གིས། སྐྱེ་བོ་དམག་ཏུ་བཅིངས་རྣམས་ཀྱིས།
སྡུག་པར་གྱུར་ཀྱང་ཡུལ་དག་ནི། རབ་ཏུ་གཏང་བར་ཇི་ལྟར་ནུས། 25

དེ་སྐད་ཉོན་མོངས་ནད་འདི་ལ། ནོར་ནི་ཉེ་བར་བསྐྱབས་པ་པན།
ནོར་གྱིས་ཐར་མིན་གཏོང་བ་གང་། དེ་ནི་འཇིག་རྟེན་དག་ན་མེད། 26

इति ब्रुवाणाः समरे धीरा युयुधिरे परम्।
ते घनस्वामिसम्मानसन्नाहच्छन्नविग्रहाः ॥ १९ ॥

अत्रान्तरे कोशलेषु ब्राह्मणः कपिलाभिधः।
हिरण्यवर्म्मणा राज्ञा धनदण्डेन पीड़ितः ॥ २० ॥

बन्धनागारविन्यस्तसमस्तसुतबान्धवः।
दत्ताशेषधनो भूरि दारिद्र्याद्दातुमक्षमः ॥ २१ ॥

अचिन्तयत् प्रतीकारं बन्धुबन्धनदुःखितः।
संसक्तपाशसचिवः शारङ्ग इव निश्चलः ॥ २२ ॥

पिता माता स्वसा भ्राता दुहिता तनयश्च मे।
रुद्धाः कारागृहे मुक्तिं नायान्ति द्रविणं विना ॥ २३ ॥

लोभः प्रवर्त्तते यत्र धर्म्मद्वेषेण भूपतेः।
तस्यार्द्रक्लेशदेशस्य परित्यागेन जीव्यते[1] ॥ २४ ॥

अथवा कथमुत्स्रष्टुं देशः कृच्छ्रेऽपि शक्यते[2]।
जन्तुभिः सततावद्धैर्बन्धुबन्धनरज्जुभिः ॥ २५ ॥

द्रविणोपार्ज्जनं तस्मादस्मिन् क्लेशमये हितम्।
नास्ति तद्व्यसनं लोके तीर्यते न धनेन यत् ॥ २६ ॥

---

१ W_1 जीवितम्।   २ H and W_1 त्यज्यते।

ནོར་གྱི་ཕྲན་ཚེགས་ཀྱུ་ཀྲུ་ནི། སྐད་འཚོང་མ་བཞིན་ཉམ་འགྱུར་ཅན།
དོན་དུ་གཉེར་ན་བསྒྲོད་པར་བྱེད། དོན་དུ་མ་གཉེར་རང་ཉིད་འོངས། 27

རི་བྲལ་འཁྲི་ཤིང་རྩིང་པ་བཞིན། རིང་བཀོམ་རྗེས་སུ་འཆིང་ལྡན་པའི།
འགར་ནི་འགའ་ཚེ་ཚོགས་ཅན་གྱིས། གཡོག་ལ་འབྲས་བུ་མེད་པ་ཉིད། 28

སྨྲོང་བ་དམ་པའི་སྐྱེ་བོས་སྤངས། ངོ་ཚའི་དུལ་གྱིས་ཡོངས་སུ་གྱིས།
སྨན་པ་གྱོ་ཡི་ལྷག་མ་ནི། འབྲས་བུར་བཅས་ཀྱང་འབྲས་མེད་ཉིད། 29

དང་པོ་དུས་སུ་ཉེ་བར་འོངས་པའི་རོ་ལས་སྟོན་དུ་བསྟེན་བཀུར་བྱ།
དེ་ནས་ནོར་གྱི་ཆ་བསྐྱངས་ཡོངས་སུ་འདྲིས་ལས་བཀུར་བ་ཉམ་པར་ཉམས།
སྲིད་པས་གློ་གྲོས་གཡོ་ལྡན་སློང་བའི་ཚོགས་ཉམས་ནང་དུ་ཉམ་བསམས་ཤིང་།
སྐད་ཅིག་ལ་ནི་རེ་བའི་འཆིང་བ་ཡངས་པར་བྱེད་ཅི་བདོག་པར་བྱེད། 30

ཆགས་པའི་རང་བཞིན་འཛིག་རྟེན་འདིར། ནོར་གྱི་ཡོན་ཏན་སུ་ཞིག་འཛིན།
དེ་སྐད་ཐབས་ཀུན་དམན་གྱུར་པ། བདག་ནི་འགྲོ་བ་མེད་པ་ཉིད། 31

ཅི་ཞིག་བྱ་ཞིང་གང་དུ་འགྲོ། གྲིབ་མ་དོན་གཉེར་ལས་བཟང་བཞིན།
རྟེན་མེད་ཡིད་ལ་རེ་བ་ཡིས། ངལ་གསོ་ཐོབ་པར་མ་གྱུར་དོ། 32

སྐྱེ་བོའི་ནགས་ཚལ་མཆོག་དུ་ཤིན་དུ་སྡུག་བོར་གྱུར་པ་འདིར།
གང་ཞིག་ཀྱུན་དུ་སྐྱེ་བོ་སློང་ལ་འབྲས་བུ་ཀུན་སྟེར་ཡང་།
ནམ་ཡང་འདར་བར་མི་འགྱུར་དུད་པ་ཉིད་ཀྱང་མི་གཏོང་བ།
གཏད་པ་དམ་པའི་ལྗོན་ཤིང་དེ་ནི་གང་ཡང་རྐྱེད་མ་གྱུར། 33

प्रार्थ्यमानाः पलायन्ते स्वयमायान्त्यनर्थिताः ।
वेश्या इव विकारिण्यः कुटिला धनसम्पदः ॥ २७ ॥

विरसा जीर्णवल्लीव दीर्घशोषानुबन्धिनी ।
क्वचित् कदाचित् कृच्छ्रेण सेवा फलति नैव वा ॥ २८ ॥

लज्जारजःपरिचिता याच्ञा सज्जनवर्ज्जिता ।
अवमानशतोच्छिष्टा सफलाप्यफलायते ॥ २९ ॥

पुरः सत्कारांशः प्रथमसमयोपागमरसात्
ततो मानम्लानिर्द्रविणकणयाच्ञापरिचयात् ।
विमृश्यान्तस्तस्मात्तरलितमतिर्मार्गणगणः
क्षणादाशाबन्धं विपुलयति सङ्कोचयति च ॥ ३० ॥

लोभस्वभावे[१] लोकेऽस्मिन् को गृह्णाति धनैर्गुणान्
सर्व्वोपायविहीनस्य तस्मान्नास्त्येव मे गतिः ॥ ३१ ॥

किं करोमि क्व गच्छामि छायार्थीव मरोः पथि ।
नासादयति विश्रान्तिं निरालम्बो मनोरथः ॥ ३२ ॥

अत्यन्तसङ्कुलतरे जनकाननेऽस्मिन्
न प्राप्यते विपदि कोऽपि स साधुवृक्षः ।
यः सन्ततार्थिजनसर्व्वफलार्पणेऽपि
नो कम्पते न च जहाति नतिं कदाचित् ॥ ३३ ॥

---

१ W/1 लोभस्वभावः ।

བསོད་ནམས་མི་དམན་ས་ཡི་དབང་། སྐྱོང་བ་ཀུན་གྱི་དཔག་བསམ་ཤིང་།
འཕོངས་པའི་གདུང་བ་མཆོག་ཏུ་འཕྲོག། སྙིང་སྟོབས་འོ་མའི་རྒྱ་མཚོ་གྲོས། 34

དེ་ལྟར་ཡང་དག་བསམས་ནས་དེ། རི་བ་བཅས་པ་བསྟན་པ་ཡིས།
ལམ་ནས་དགའ་བས་སྣ་བྲངས་ཏེ། མི་བདག་བལྟ་བར་འདོད་པས་ཆས། 35

དེ་ནས་དེ་ཡིས་དལ་བུ་ཡིས། གྲོང་མཐའ་དཀའ་ཐུབ་ནགས་སུ་ཕྱིན།
མི་བདག་ཤིང་ལོས་ཡོངས་དཀྲིས་པ། ལམ་གྱིས་ཡོངས་སུ་དུབ་པས་མཐོང་། 36

བཀྲིས་བསྒོམ་ངལ་བས་གཟིར་བ་དེ། མི་བདག་གིས་ཀྱང་མཐོང་གྱུར་ནས།
སྙིང་རྗེའི་རྒྱ་མཚོས་རིང་པོ་ནས། འོང་བ་ཡི་ནི་རྒྱུ་མཚན་དྲིས། 37

དེ་ལ་དེ་ཡིས་རང་གི་སྤྱོད། ཤུགས་རིངས་ཚ་བས་གསལ་བྱས་པ།
བཤད་ནས་གཉེན་རྣམས་བཅིངས་པ་ཡི། སྡུག་བསྔལ་གྱིས་གཟིར་སྐད་ཡང་བཤད། 38

གཉེན་ནི་བཅིངས་པ་དགྲོལ་བའི་སྐད། མི་བདག་སྐྱོང་བ་ལྷ་ཡི་ཤིང་།
བསོད་ནམས་མི་དམན་བལྟ་བ་ལ། གསེར་དོན་གཉེར་བ་བདག་འོངས་སོ། 39

ཐུགས་ནི་སྙིང་རྗེ་རྫོགས་གྱུར་པ། དཔལ་ལྡན་འཇིག་རྟེན་མགོན་པོ་དེ།
མཐོང་བ་ཉིད་ཀྱི་འཕྲལ་ལ་ནི། བདག་གི་བཙོག་པ་རྫོགས་པར་གྱུར། 40

ཉོན་མོངས་གདུང་བས་ཉམས་མི་བྱེད། སྨད་པ་ཡིས་ནི་སྲུན་མི་འགྲིན།
དུས་ནི་རྙིང་པ་མ་ཡིན་པར། སྐྱེ་བོ་ཆེན་པོ་འབྲས་དུ་བསྐྱེད། 41

अदीनपुण्यः सर्व्वार्थिकल्पवृक्षः क्षितीश्वरः।
श्रूयते सत्त्वदुग्धाब्धिरापन्नार्त्तिहरः परम्॥ ३४॥

इति सञ्चित्य स नृपं प्रतस्थे द्रष्टुमुत्सुकः।
आशाबन्धोपदिष्टेन पथा हर्षपुरःसरः॥ ३५॥

ततः स शनकैः प्राप्य पुरोपान्ततपोवनम्।
ददर्शाध्वपरिश्रान्तः सम्बीतं वल्कलैर्नृपम्[१]॥ ३६॥

नरनाथोऽपि तं दृष्ट्वा क्षुत्पिपासाश्रमातुरम्।
पप्रच्छ करुणासिन्धुर्दूरागमनकारणम्॥ ३७॥

स तस्मै निजवृत्तान्तमुष्णनिश्वाससूचितम्।
निवेद्य बन्धुसंरोधदुःखार्त्तः पुनरब्रवीत्॥ ३८॥

आयातोऽहं हिरण्यार्थी बन्धुबन्धनमुक्तये।
अदीनपुण्यं नृपतिं द्रष्टुमर्थिसुरद्रुमम्॥ ३९॥

लोकनाथः स मे श्रीमान् करुणापूर्णमानसः।
सद्यः सन्दर्शनेनैव सङ्कल्पं पूरयिष्यति॥ ४०॥

अम्लानं क्लेशसन्तापैरवमानैरदूषितम्।
अपर्युषितकालञ्च फलं लभते महाजनः॥ ४१॥

१ W/I Omits verses 35 and 36.

སྐྱེ་དགུ་རྣམས་ཀྱི་དབུལ་བའི་རབ་རིབ་མི་བཟད་འཁྲིག་བྱེད་ཅིང་།
གྲགས་པ་རབ་ཏུ་གསལ་བའི་འབྱོར་པས་ཕྱོགས་རྣམས་ཡོངས་སུ་འགེངས།
དྲི་མེད་ཡིད་ནི་མངོན་པར་རེངས་བྱེད་དགའ་བ་དག་གི་གཉེན།
ས་ཡི་བདུད་རྩིའི་ཟེར་དེས་བདག་གི་གདུང་བ་འཁྲིག་པར་འགྱུར། 42

ཞེས་པ་དེ་ཡིས་བཤད་གྲོས་ནས། ས་ཡི་བདག་པོ་གཟིར་བར་གྱུར།
བཅོས་ཐབས་མེད་པའི་གདུང་བ་དག། འཕོས་པ་ཡིས་ནི་ཡང་དག་བསམས། 43

ཀྱེ་མ་བདག་གིས་རྒྱལ་སྲིད་བཏང་། དུས་མིན་འདིར་ནི་གཉིས་སྐྱེས་ཀྱིས།
བསམས་དེ་བཀྲིས་པས་ཉེན་པ་ལས། ལས་ཀྱི་ཤིང་ནི་སྐམ་པོ་བཞིན། 44

སྐྱོང་བ་རྣམས་ལ་ལམ་རིང་གིས། ངལ་བ་འབྲས་མེད་གདུང་བ་སྟེར།
རི་དགས་སྲིད་སྐྱེད་ཙ་ལྡ་བུ། མྱོངས་པ་སྐྱེད་བྱེད་བདག་སྐར་རོ། 45

ཁ་ལ་རྗོ་བརྟུན་མཚུངས་པ་ཡིས། བཀྱལ་བར་གྱུར་བཞིན་དོན་གཉེར་རྣམས།
རེ་བ་ཉམས་པས་ལམ་དུ་ནི། ཡོངས་ངལ་ལྡི་བ་ཉིད་དུ་གྱུར། 46

རྒྱལ་པོ་དེ་ནི་བདག་ཡིན་ཏེ། རྒྱལ་སྲིད་བཏང་ནས་ནགས་ཚལ་བསྟེན།
ཞེས་པ་གྲོས་ནས་བྲམ་ཟེ་འདི། འཕྲུལ་ལ་སྒྲོག་ནི་གཏོང་བར་འགྱུར། 47

* * * *

* The 48th S'loka and its Tibetan version do not occur in the

दारिद्र्यतीव्रतिमिरापहरः[1] प्रजानाम्
कीर्त्तिप्रकाशविभवैः परिपूरिताशः।
अभ्युल्लसद्विमलमानसहर्षबन्धु-
स्तापं हरिष्यति स मे वसुधासुधांशुः॥ ४२॥

श्रुत्वेति तेन कथितं व्यथितः पृथिवीपतिः।
संक्रान्तनिष्प्रतीकारसन्तापः समचिन्तयत्॥ ४३॥

अहो नु त्यक्तराज्योऽहमकालेऽस्मिन् द्विजन्मना।
चिन्तितः क्षुत्परीतेन शुष्कवृक्ष इवाध्वनि॥ ४४॥

दूराध्वश्रमवैफल्यसन्तापप्रदमर्थिनाम्।
सम्मोहजननं धिङ्मां मृगतृष्णाजलोपमम्॥ ४५॥

मुखाश्मपाततुल्येन मूर्च्छितानामिवार्थिनाम्।
आशाभङ्गेन गुरुतां प्रयात्यध्वपरिश्रमम्॥ ४६॥

अहं स राजा सन्त्यक्तराज्यः काननमाश्रितः।
इति श्रुत्वैव विप्रोऽयं सद्यस्त्यजति जीवितम्॥ ४७॥

जातैव चिन्तामतुलां प्रसूते
निद्रापहारं तरुणी करोति।
कन्येव वृद्धा विदधाति शोकं
नष्टा दहत्याशु शरीरमाशा[2]॥ ४८॥

---

१ H °दुरितापहरः। २ Orig. omits this verse.

འདི་ནས་རྒྱལ་པོའི་གནས་ཕྱིན་ཏེ། བསམ་པ་བདག་ཉི་མ་ཐོབ་ན།
ཡིད་ལ་རེ་བ་ཉམས་པ་འདི། གདུང་བས་ཅི་ཞིག་བྱེད་པར་འགྱུར། 49

སྨོང་ཉམས་ཕྱིར་ཟློག་བཞིན་ལེགས་ཚ་བའི་ཤུགས་རིངས་དག་གིས་གདུང་བྱེད་
ཅིང་།
ཀུན་དུ་རྟོག་པས་ལུས་དམན་ཆུང་ངུར་བྱས་ཤིང་གང་ལས་མི་འགྲོ་བ།
ཉོན་མོངས་དུས་སུ་མི་ཉམས་སེམས་ལ་འབྲལ་ལ་རབ་དུ་གསལ་བ་གང་།
དགེ་ལྡན་ཡོངས་སུ་སྐྱོབ་གཉེན་བསྔགས་འདི་ནས་གཅིག་བུ་དེ་ཉིད་འཚོ་བ་ཡིན། 50

རང་ཉིད་རབ་བསྐྱངས་གདུང་བའི་ཉམས་སྐྱོང་ཤེས་ཤིང་རི་བྱིའི་ལྟོ་བའི་ཕྱུག་དུ་
ཐུགས་བྱས་ཏེ།
སྨིན་བྱེད་མེ་ཡིས་རབ་དུ་གདུང་བའི་བྱེད་པས་ཁྲུབ་ཅིང་འཚེད་པའི་བྲུ་བ་ཡོངས་
སུ་འདྲིས་གྱུར་ཀྱང་།
སྨོང་བའི་ཚོགས་ཀྱི་སྲིད་པ་དྲག་པོས་བསྐྱེད་པའི་མི་བཟད་གདུང་བ་འཕྲོག་པ་
མིན་པ་གང་།
སྐྱེ་བོ་འགྲོན་པོའི་ཤུགས་རིངས་ཆེ་བ་བསྐྱོལ་ཞིང་གཡེལ་བ་འགྱུར་བྱེད་ཀྱི་
མཚོའི་སྐྱེ་བ་སྐྱད། 51

དེ་ལྟར་སྐད་ཅིག་བསམས་བྱས་ནས། རྒྱུ་དང་འབྲས་བུ་མགྲོན་བྱས་ཏེ།
མི་སྐྱོན་སྐྲ་བས་འཛིགས་འཛིགས་བཞིན། མི་ཡི་བདག་པོས་དེ་ལ་སྨྲས། 52

བསོད་ནམས་ཀི་དམན་རྒྱལ་པོ་དང་། བྲམ་ཟེ་དགྲ་གསོད་སྦྱོར་བའི་ཚེ།
འཚེ་ལས་ཆགས་བྲལ་རྒྱལ་སྲིད་ནི། ཡོངས་སུ་བཏང་ནས་དབེན་པ་བསྟེན། 53

राजधानीमितो गत्वा मामप्राप्य विचिन्तितम् ।
किं करिष्यति सन्तापादयं भग्नमनोरथः ॥ ४९ ॥

जीवत्येकः किल स कुशली क्लेशकाले नराणां
श्लाघ्यश्चित्ते स्फुरति सहसा यः परित्राणबन्धुः ।
प्रत्याख्यानान्मलिनवदनस्तप्तनिश्वासशुष्यत्-
सङ्कल्पाल्पीकृततनततनुर्याति यस्मान्न चार्थी ॥ ५० ॥

धिग्जन्म क्षारसिन्धोः पथिकजनपृथूच्छ्वासनिर्दग्धदेह-
स्तापं योऽर्थिप्रजानां हरति न विषमं तीव्रतृष्णासमुत्थम् ।
जाता[1]स्वादोऽप्यगस्त्योदरकुहरलुठज्जाठराग्निप्रताप-
व्यापारव्याप्यमानक्वथनपरिचितः स्वप्रमाथव्यथानाम् ॥५१॥

इति सञ्चिन्त्य नृपतिः कृतातिथ्यः फलाम्बुना ।
तमुवाचाप्रियाख्यानभीतिभीत इव क्षणम् ॥ ५२ ॥

ब्रह्मन्दीनपुण्योऽहं राजा शत्रुवधोद्यमे ।
हिंसाविरक्तः सन्त्यज्य राज्यं विजनमाश्रितः ॥ ५३ ॥

---

१ $^{W}_{1}$ ज्ञाता ।

ས་སྐྱོང་ལོངས་སྤྱོད་འཚོ་བའི་འབྲས། སྨིན་འཁྲིག་ལྟ་བུར་མི་བརྟན་པ།
གསར་པའི་ཁྲག་གིས་སྤགས་པ་ནི། སྨིན་པོ་བཞིན་དུ་ལོངས་སྤྱོད་བྱེད། 54

གནས་མིན་འདུག་དེས་ཅི་ཞིག་བྱ། ཁྱོད་ནི་དུས་མིན་ཉེ་བར་འོངས།
ཁྱུང་ཁྲད་བདག་གིས་ནུས་པ་གང་། དེ་ནི་བསྟམས་པ་མེད་པར་བརྗོད། 55

ཅེས་བཀྲོལ་བོའི་ཚིག་ཐོས་ནས། རྗེ་རྗེས་ཡང་དག་བཅོམ་པ་བཞིན།
གཅིན་ཐར་རེ་བ་བྲལ་བ་ལས། ད་ནི་ས་ལ་འགྲུལ་བར་གྱུར། 56

བཀྲོལ་ཞིང་ས་ལ་འགྲུལ་བ་དེ། མཐོང་ནས་མིག་ནི་མཆི་མར་བཅས།
སྙན་པའི་ཚིག་གིས་དབུགས་ཕྱུང་ནས། རྒྱལ་པོས་སླར་ཡང་རབ་བསམས་པ། 57

ཀྱེ་མ་བདག་ནི་བསོད་ནམས་དམན། ཀྱུ་ངན་ལམ་དང་མཚུངས་པ་འདིར།
སློང་བའི་རེ་བའི་འཕྲི་ཤིང་གི། ཀྱུ་གུ་འཕྲལ་ལ་བསྐམས་པར་གྱུར། 58

ནོར་དོན་གཉེར་བ་བླུན་པོའི་འདོད་པས་དང་པོ་གནས་མིན་སློང་བ་འབྲས་
བཅས་བསམས།

རེ་བའི་ཀྱུ་གུས་འདོད་པའི་བདེ་བ་མ་ལུས་ཡལ་ག་སྟོང་གི་མངོན་པར་བྲིས།
དེ་ནས་ཨ་སྲ་ཐོབ་པར་མ་གྱུར་སིང་ལྡིང་སྐམ་པོས་བཞིན་དུ་སྐད་ཅིག་ལ།
ཤིན་ཏུ་ཆེ་བའི་རྩོམ་པ་ཉམས་ཤིང་རེ་ཐག་ཆད་བས་འཕྲལ་ལ་བཀྲོལ་བར་གྱུར། 59

བསླངས་ནས་རྙེད་པ་ཆུང་དུ་ཞིག། གལ་ཏེ་འདི་ལ་བདག་གིས་བྱིན།
བསོད་སྙོམས་བསླངས་ཀྱང་ལྟོགས་གྱུར་བ། དེ་ལ་དེས་ཀྱང་ཅི་ཞིག་བྱེད། 60

हिंसाफलं महीपाला भोगं भ्रूभङ्गभङ्गुरम् ।
प्रत्यग्ररुधिरादिग्धं क्रव्याद इव भुञ्जते ॥ ५४ ॥

किं करोम्यपदस्थोऽहमकाले त्वमुपागतः[१] ।
यत्तु शक्यं मया किञ्चित्तदयन्त्रितमुच्यताम् ॥ ५५ ॥

इति राजवचः श्रुत्वा वज्रेणेव समाहतः ।
बन्धुमोक्षणनैराश्यात् स पपात महीतले ॥ ५६ ॥

मूर्छितं पतितं भूमौ तं दृष्ट्वा साश्रुलोचनः ।
प्रियाभिर्वाग्भिराश्वास्य राजा पुनरचिन्तयत् ॥ ५७ ॥

अहो नु मन्दपुण्योऽहं यस्मिन्नाशालताङ्कुरः ।
मरुमार्गोपमे जातः सहसा शोषमर्थिनः ॥ ५८ ॥

अर्थार्थी प्रथमं विचिन्त्य सफलामस्थानयाच्ञां क्षणात्
आशातूलिकयाभिलिख्य निखिलं शाखासहस्रैः सुखम् ।
अप्राप्याम्रमिवाथ शुष्कखदिरान्मूढेच्छया वाञ्छितं
सद्यश्छिन्नमनोरथः पृथुतरारम्भक्षयान्मूर्च्छति ॥ ५९ ॥

अस्मै यदि प्रयच्छामि याचितावाप्तमल्पकम् ।
तत् किं तेन करोत्येष भिक्षित्वापि बुभुक्षितः ॥ ६० ॥

१ H त्वमिहागतः ।

གལ་ཏེ་ཙ་ཆག་སྙིང་པ་དག་གིས་གྲོག་ཕྲུབ་ཁྲིམ་ནི་དེ་ཉིད་དུ་གནས་ཤིང་།
གང་ཡང་བུད་མེད་བྱི་ལའི་ཕྲུག་གུ་ཐབ་དུ་ཉལ་ལ་རྩེ་ལྡན་དེ་དག་གིས།
གལ་ཏེ་གང་བ་ཉིད་ཀྱིས་འགྲོ་ཞིང་སྐྱར་ཡང་དེ་ནི་བསྡེན་བྱ་དེ་ལྟ་ན།
དེ་ནི་ངེས་པར་ས་བདག་སྐད་ཅིག་མཐོང་དང་མགུ་བ་ལ་ཡང་ཡོད་དན་ཅི། 61

བློ་གྲོས་བརྩེ་བའི་ནོར་འཛིན་གྱིས། དེ་ལྟར་བསམས་ནས་ས་འཛིན་དབང་།
དེ་འདོད་བསྒྲུབ་པར་ཆས་གྱུར་པས། རབ་སད་བྱས་ཏེ་དེ་ལ་སྨྲས། 62

ལོངས་ཤིག་གྲམ་ཟེ་ཁྱོད་ཀྱི་ནི། འདོད་པ་བསྒྲུབ་སྐད་མི་ཐོགས་པར།
འབྲས་བུ་ཐོབ་པའི་ཐབས་ཀྱི་མཆོག། བདག་གིས་ཡང་དག་རྙེད་པར་གྱུར། 63

རེ་ཞིག་བདག་གི་མགོ་བཅད་ནས། སོང་སྟེ་ས་བདག་ཚངས་བྱིན་ལ།
བྱིན་ན་དེ་ནི་དགའ་བ་ཡིས། ཁྱོད་ལ་ནོར་དག་སྟེར་བར་འགྱུར། 64

སྤྱོང་བའི་ཅན་དན་ལྗོན་པ་དེའི། ཚིག་དེ་ཐོས་ནས་གཉིས་སྐྱེས་ནི།
ན་བར་རབ་ཞུགས་གདུང་བ་ཡིས། ཁབ་ཀྱི་སྡུག་བཞིན་རབ་སྨྲས་པ། 65

སྲིད་གསུམ་སྙིང་པོ་སྐྱེ་བ་ནི། འགྲོ་བའི་བསོད་ནམས་ཀྱིས་ཐོབ་པ།
ཁྱོད་ཀྱི་མགྲིན་པ་འདི་ལ་མཚོན། བརྟོང་པོ་སྡིག་ཅན་སུ་ཞིག་བརྟུན། 66

ཆགས་པས་བློ་གྲོས་ཉམས་པ་སུ། ཁྱོད་ལ་མི་པན་སེམས་པར་བྱེད།
ས་ཏ་ཀཱ་ར་སོལ་བ་ཡི། རྒྱུ་རྩ་མ་རྩངས་སུ་ཞིག་བྱེད། 67

तस्मिन्नेव गृहे जरत्तृणकटच्छन्ने यदि स्थीयते
चुल्लीसुप्तविड़ालबालसदयास्ता एव यद्यङ्गनाः ।
पादाभ्यामवगम्यते यदि पुनस्तेनैव सेवाधुना
तत् को नाम गुणः क्षणं क्षितिभुजा दृष्टेन मृष्टेन[1] वा॥६१॥

इति ध्यात्वा धराधीशः कृपावसुधया धिया ।
तद्वाञ्छा[2]सिद्धिसन्नद्धः प्रतिबोध्य तमभ्यधात् ॥ ६२ ॥

उत्तिष्ठ वत्स सम्प्राप्तस्त्वत्समीहितसिद्धये ।
अविलम्बिफलावाप्तिरुपायः परमो मया ॥ ६३ ॥

छित्त्वा मम शिरस्तावत् ब्रह्मदत्ताय भूभुजे ।
गत्वा प्रयच्छ तत्प्रीत्या स ते वित्तं प्रदास्यति ॥ ६४ ॥

तस्यार्थिचन्दनतरोः श्रुत्वैतत् वचनं द्विजः ।
उवाच तप्तसूच्येव विद्धः कर्णप्रविष्टया ॥ ६५ ॥

तव त्रैलोक्यसारस्य जगत्पुण्याप्तजन्मनः ।
शस्त्रं कण्ठे शठेनास्मिन् केन पापेन पात्यते ॥ ६६ ॥

लोभलुब्धमतिः को नु चिन्तयेदहितं तव ।
अङ्गारकारणं क्रौर्यं सहकारे करोति कः[3] ॥ ६७ ॥

---

१ W_2 and H तुष्टेन वा । २ H and W_1 तद्वाञ्छा ।
३ W_2 and H सः ।

ཅེས་སྨྲ་བྲམ་ཟེ་དེ་ལ་ནི། མི་ཡི་བདག་པོས་ལན་སྨྲས་པ།
འཚོ་ཡང་བདག་ནི་བཅིངས་པ་ཡིས། དགྲ་བོ་དེ་ཡི་དྲུང་དུ་ཁྲིར། 68

རྒྱལ་པོས་འབད་པས་དོན་གཉེར་བས། ས་བདག་དགྲ་ཡི་དོགས་པ་ཅན།
ཚངས་བྱིན་དག་གི་དྲུང་དུ་ནི། དེ་ཡིས་དེ་ནི་བཅིངས་ནས་ཁྲིད། 69

དེ་ཡིས་ཁྲིད་ནས་འོངས་པ་ཡི། ས་དབང་དེ་གླངས་ཚངས་པས་བྱིན།
ནོར་དབང་མཚུངས་པས་དེ་ལ་ནོར། འདོད་པ་བས་ཀྱང་མངོན་ལྷག་བྱིན། 70

བསོད་ནམས་མི་དམན་མི་བདག་གི་ནི་སྙིང་སྟོབས་ངོ་མཚར་བྲམ་ཟེས་བཤད་
ཐོས་ནས།

ཁོན་གྱི་ནམ་འགྱུར་ཤིན་ཏུ་བཟོད་དཀའ་མ་རུངས་ཉིད་དུ་མངོན་བརྗོད་དུག་བདང་སྦྲེ།
རང་གནས་ཤིན་ཏུ་མཐོ་བར་དེ་ནི་མགོ་བཞིན་བཞག་ནས་ཚངས་བྱིན་རང་ཉིད་ཀྱིས།
དེ་ཡི་ཞབས་ཀྱི་རྒྱ་སྐྱེས་དག་ལ་གཙུག་ཏོར་འཕྲེང་བས་སྐད་ཅིག་མཛེས་བར་བྱས། 71

དེ་ནི་དཔལ་བ་རབ་ཐོབ་རང་གི་གྲོང་ཁྱེར་སོང་བའི་ཚེ།
ཡོངས་བདང་རྒྱལ་སྲིད་ཡང་དག་ཐོབ་ནས་བསོད་ནམས་མི་དམན་པས།
གྲགས་པ་ལྷར་དཀར་དེ་ཟླ་བའི་འཕྲེང་བ་གཡོ་ལྡན་རྒྱ་གདེར་གྱིས།
དུ་གཡུལ་ཡི་ནམ་མཛེས་ས་གཞི་ཆོས་ཀྱིས་བསྐྱངས་པར་གྱུར། 72

ཁྱབ་བདག་བསོད་ནམས་མི་དམན་དུ་གྱུར་གང་དེ་ང་ཉིད་དེ།
གང་དུ་དུས་ཀྱི་དགེ་འདུན་མང་པོའི་ཞབས་ཀྱིས་མངོན་དགའ་འམ།
མི་ནམས་དག་གིས་སྲིད་པ་གྲོལ་བའི་རྒྱུ་ནི་འབྱུང་འགྱུར་བ།
འདིར་དེང་དེ་ཡི་སྤྱོད་ཚུལ་སྲིད་པའི་སྙིང་པོས་བདག་གིས་བྲན། 73

इति ब्रुवाणं नृपतिर्ब्राह्मणं प्रत्युवाच तम् ।
जीवन्तं नय बद्ध्वा वा तस्य मामन्तिकं रिपोः ॥ ६८ ॥

यत्नेनाभ्यर्थितो राज्ञा स तं बद्ध्वा महीपतेः ।
निनाय ब्रह्मदत्तस्य समीपं शत्रुशङ्किनः ॥ ६९ ॥

तेनानीतं तमादाय ब्रह्मदत्तः क्षितीश्वरम्[1] ।
धनं धनेशतुल्योऽस्मै वाञ्छिताभ्यधिकं ददौ ॥ ७० ॥

सत्त्वाश्चर्यमदीनपुण्यनृपतेराकर्ण्य विप्रोदितं
त्यक्त्वा वैरविकारदुःसहतरं क्रौर्याभिधानं विषम् ।
धृत्वा मौलिमिवोन्नते निजपदे तं ब्रह्मदत्तः स्वयं
चक्रे तच्चरणाम्बुजप्रणयिणीमुष्णीषमालां क्षणात् ॥ ७१ ॥

तस्मिन् गते निजपुरं विनयप्रपन्ने
संप्राप्य राज्यमरिहीनमदीनपुण्यः ।
धर्म्मेण कीर्त्तिधवलाम्बुधिफेनमाला-
वेल्लद्दुकूलललितां पृथिवीं शशास ॥ ७२ ॥

योऽभूद्विभुर्भुवनसारमदीनपुण्यः
सोऽहं स्मृतं चरितमत्र मयाद्य तस्य ।
कालेन यत्र बहुसद्मपदाभिरामा
भूमिर्भविष्यति नृणां भवमुक्तिहेतुः ॥ ७३ ॥

---

१ W₁ क्षितीश्वरः ।

སྨོན་གྱི་རྟོགས་པ་བརྗོད་པ་གསུང་མཛད་བཅོམ་ལྡན་འདས་ཀྱི་ནི།
སྐྱོད་རྩལ་སེམས་དཔའ་རབ་འབར་ཐོས་ནས་ཡ་མཚན་གྱུས་པ་ཡིས།
དགའ་བས་རེག་པར་གྱུར་པ་མགྲོ་རིས་བདག་པོའི་ལུས་ལ་ནི།
སྐྱ་ལོང་འདབ་མ་མཛེས་པས་སྤྲིས་པ་ཅི་ཡང་བྱུང་བར་གྱུར། 74

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བསོད་ནམས་མི་དམན་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་རྩ་གཉིས་པའོ།།

सत्त्वोज्ज्वलं भगवतश्चरितं निशम्य
पूर्व्वावदानकथितोदितविस्मयेन ।
हर्षस्पृशः किमपि नाकपतेर्बभूव
रोमाञ्चपञ्चरचनारुचिरं शरीरम् ॥ ७४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां अदीनपुण्यावदानं नाम द्विपञ्चाशत्तमः पल्लवः ॥

CHAPTER LIII.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་གསུམ་པ།

ལེགས་བཤད་འཚོལ་བའི་རྟོགས་བརྗོད་ནི།

ལེགས་བཤད་མགྲིན་པར་རྣམ་གནས་ཟླ་མ་ལ་འདུད་མགོ་དང་རྣ་བར་ཕྱོས་པ་དང་།
ཞལ་ནི་རྟག་ཏུ་སྐྱོན་མེད་བདེན་པ་དང་ལྡན་མཁས་པ་རྣམས་ནི་དགའ་བའི་རྒྱུན།
རིན་ཅེན་ཡིད་འོང་རབ་གསལ་དོ་ཤལ་བཀོད་པ་བཀྲ་བའི་ཁྲུད་པར་དང་བཅས་པ།
ཆས་ལྡན་བུད་མེད་ཆས་ཀྱིས་སྐྱེ་བོ་ལྷག་མ་རྣམས་ནི་མཆོག་ཏུ་ཆེམ་པ་སྐྱེད། 1

གཞན་དུ་བཅོམ་ལྡན་འཛུམ་ལྡན་པ། བརྒྱ་བྱིན་བསམ་པ་ཤེས་པ་ཡིས།
འཛུམ་པའི་རྒྱུ་ནི་དྲིས་པ་ན། ཐམས་ཅད་མཁྱེན་པས་ཡང་གསུངས་པ། 2

བ་ར་ཎ་སཱིར་མི་ཡི་བདག། ལེགས་བཤད་འཚོལ་བ་ཞེས་པ་བྱུང་།
གང་གི་གྲགས་པ་དྲི་མེད་རིགས། དཔལ་གྱི་འཕྲེང་བ་བཞིན་དུ་མཛེས། 3

ཡོན་ཏན་སྣང་ལྡན་ལེགས་སྦྱོར་ཀླུམ། དབེན་ལྡན་རྣམས་ཀྱི་སྙིང་ལ་ཆགས།
སྨྲ་དྲིག་མ་ཡིན་ལེགས་བཤད་ཀྱི། རྒྱུན་ཉིད་གང་ཞིག་དོན་གཉེར་གྱུར། 4

གང་གི་མཛོད་དཔལ་སྙིང་རྣམས་ལ། རྟག་ཏུ་བདང་ཡང་གཡོ་བ་མེད།
གྲགས་པ་ཡོན་ཏན་ལ་བདགས་ཀྱང་། རིང་ལས་ཤིན་ཏུ་རིང་བར་འགྲོ། 5

त्रिपञ्चाशत्तमः पल्लवः ।

सुभाषितगवेष्यवदानम् ।

सूक्तिः कण्ठविवर्त्तिनी गुरुनतिर्मौलौ श्रुतं श्रोत्रयोः
सत्यं नित्यमनामयञ्च वदने विद्वत्प्रियं भूषणम् ।
रत्नोदारसुतारहाररचनाचित्रेण धत्तेतरां
सन्तोषं सविशेषवेषवनितावेशेन शेषो जनः ॥ १ ॥

शक्रेणान्यत्र भगवान् सस्मितः स्मितकारणम् ।
पृष्टस्तदाशयज्ञेन सर्व्वज्ञः पुनरब्रवीत् ॥ २ ॥

सुभाषितगवेषीति वाराणस्यामभून्नृपः ।
यस्य जात्युज्ज्वलाकीर्त्तिर्मालेव विबभौ श्रियः ॥ ३ ॥

सुवृत्ते गुणसंयुक्ते हृदिसक्ते विवेकिनाम् ।
अभूद्भूषण एवार्थी यः सूक्ते न तु मौक्तिके ॥ ४ ॥

नित्यमर्थिषु मुक्तापि कोषश्रीर्यस्य निश्चला ।
कीर्त्तिर्गुणनिबद्धापि दूराद्दूरतरं गता ॥ ५ ॥

རྒྱལ་པོའི་ངང་པའི་སྐད་ངག་མཁན། ཉམས་ལྡན་མཆོག་གི་རྟོག་བསྐོར་དེ།
མཁས་པའི་མདུན་ས་པད་ལྡན་ལ། ལོངས་སྤྱོད་སྐལ་བཟང་ལྡན་པ་གྱུར། 6

ཉེ་བར་བསྟན་ལ་རབ་ཞུགས་པ། དེ་ཡི་ལེགས་བཤད་ཡོན་དན་ཅན།
མང་མེའི་རྩེ་མོ་ལྟ་བུ་ཡིས། སྐྱེ་བོ་སྨོངས་པའི་རབ་རིབ་སྒྲོགས། 7

ནམ་ཞིག་མདུན་སར་བློ་བཟང་དེ། འདུག་བས་ལེགས་བཤད་གཏམ་གྱི་ནི།
མཛུག་ཏུ་བློ་བཟང་ཞེས་པ་ཡི། སྨོན་པོའི་གཙོ་ལ་རབ་སྨྲས་པ། 8

ལེགས་པའི་སྒྲ་དང་ཚིག་ལ་ཞེན། ཡོན་དན་རྒྱན་དང་ཡང་དག་ལྡན།
ཁྱོད་རྣམས་དག་གི་ལེགས་བཤད་ཀྱིས། མདུན་ས་འདི་ནི་ངག་བཞིན་མཛེས། 9

ལེགས་པར་སྦྱིན་ཞིང་རོ་དང་ལྡན། ལེགས་པར་བཤད་པ་གསར་པ་ནི།
མེ་ཏོག་ལྟ་བུ་འགའ་ཞིག་ནི། ཁྱོད་ཀྱིས་རྩེད་པར་གྱུར་དམ་ཅི། 10

ལེགས་བཤད་རྣམས་དང་མཐུན་རྣམས་དང་། དོག་པ་རྣམས་ཀྱང་གྱུར་པ་ནི།
གསར་པ་ཁོ་ན་ཡིད་འཕྲོག་སྟེ། བུད་མེད་རྣམས་ཀྱི་ཡང་ཚོ་བཞིན། 11

རོ་དང་ལྡན་ཡང་ཉམ་པར་ཡངས་པའི་མེ་ཏོག་དོན་མཐུན་ཡོངས་བཏང་ནས།
ཡོངས་འདྲིས་ཡོངས་སུ་འདོར་ཞིང་རིང་ནས་རིང་དུ་རྗེས་སུ་རྒྱུ་བྱེད་པ།
གསར་པ་གསར་པའི་སྦྲང་རྩི་ལ་ཆགས་ཀྱང་རྟག་པ་ནི་ནགས་རྣམས་སུ།
དག་ཏུ་ཉམས་སུ་མྱོང་གྱུར་རིན་ཅན་མཆོད་ལས་འཁྲུམ་པར་བྱེད། 12

स राजहंसः सरसैः स्तुतः कविवरैः सदा ।
विद्वत्सभाकमलिनीभोगसौभाग्यवानभूत् ॥ ६ ॥

उपदेशप्रवृत्तस्य सगुणास्तस्य सूक्तयः ।
जनस्य मोहतिमिरं जहुर्दीपशिखा इव ॥ ७ ॥

स कदाचित् सभासीनः सुभाषितकथान्तरे ।
सुमतिः सुमतिं नाम प्रधानामात्यमब्रवीत् ॥ ८ ॥

साधुशब्दपदारूढैर्गुणालङ्कारशालिभिः ।
सभा भवद्भिर्भात्येषा भारतीव सुभाषितैः ॥९ ॥

अप्यन्विष्टानि सत्याकरसवन्ति नवानि च ।
सुभाषितानि भवतां कुसुमानीव कानिचित् ॥ १० ॥

सूक्तीनां प्रतिभानाञ्च मञ्जरीणाञ्च जृम्भितम् ।
नवमेव मनोहारि नारीणामिव यौवनम् ॥ ११ ॥

सरसमपि विहाय व्यायतं पुष्पसार्थं
परिचितपरिहारी दूरदूरानुसारी ।
भ्रमति सततसक्तास्वादमन्दादरत्वात्[1]
नवनवमधुलुब्धः षट्पदः काननेषु ॥ १२ ॥

१ Orig. मन्दाररत्वात् ।

མདུན་ས་འདིར་ནི་ཅུང་ཟད་གང་། ལེགས་བཤད་རིན་ཆེན་ནོར་དབྱིག་ནི།
ཡོངས་སུ་བརྟགས་པས་ཐར་པ་དེ། ཀུན་དུ་རིན་ཐང་མེད་པར་འགྱུར། 13

མཁས་པ་ཉིད་ནི་མེད་ན་བློ་གྲོས་ནོར་ཉམས་མི་ནོམས་འཚོ་བ་དོན་ཡོད་མིན།
མཚུངས་མེད་གྲུས་པའི་སྙན་ངག་མེད་ན་མཁས་པ་ཉིད་ནི་ནི་ཅིའི་སློག་དང་
མཚུངས།
སྙིང་ལྡན་ཉམས་ཀྱིས་ནང་གི་དེ་ཉིད་དཔྱོད་པ་མེད་ན་རབ་མཛེས་སྙན་ངག་ནི།
སྟོང་པ་ཉིད་དེ་དབེན་སའི་ཁྲོན་པའི་མར་མེ་བཞིན་དུ་བསྟེན་པར་འགྱུར། 14

དེ་ཡི་སླད་དུ་གནས་སྐབས་འདིར། ཁ་བྱུག་སྨྲ་ཡིས་བྱེ་བླ་བཞིན།
ལེགས་བཤད་གོ་སྐབས་གྲོགས་པོ་ཡིས། གསར་པ་ཅུང་ཟད་བརྗོད་པར་མཛོད། 15

གལ་ཏེ་སྐད་ཅིག་དེ་ཉིད་ཞེས་པས་མཆོག་ཏུ་ཡིད་རྟོན་སྐྲུན་བྱེད་ན།
ཚིག་ཉམས་ཀྱིས་ནི་ཛ་ཏིའི་ཏྲི་བཟང་ངོ་མཚར་ཟོ་དག་སྐྱེད་པར་བྱེད།
ཛེ་སྲིད་སྐྱེ་བོ་ལེགས་བཤད་བརྗོད་ལ་གོ་སྐབས་མེད་པ་མ་ཐོབ་མིན།
དེ་ལྟ་ན་ཡང་མཆོག་གི་ཚོགས་ལ་ལྷག་པར་བསྟུར་བྱས་འདི་འབྲས་བྲལ། 16

དེ་སྐད་མི་མགོན་གྱིས་བརྗོད་པ། བློ་ལྡན་སྙིང་ལ་རེག་པའི་ཚིག།
ཐོས་ནས་བློན་པོ་ཆེན་པོ་ཡིས། ས་ཡི་བདག་ལ་ལན་གསོལ་པ། 17

རྒྱལ་པོ་ཁྱོད་ཀྱི་ཚོགས་བཅས་ཉིད། མངོན་པར་གསར་པ་སྲིད་གསུམ་ན།
གྲོགས་ན་མཁས་པའི་དབང་ཕྱུག་དག། ལེགས་བཤད་གྱུས་པ་གཞན་གྱིས་ཅི། 18

अस्मिन् सदसि यत्किञ्चित् सूक्तरत्नं विचार्य्यते।
तत्परीक्षासमुत्तीर्णं सर्व्वथायात्यनर्घ्यताम्॥ १३॥

पाण्डित्येन विना विनाशितधियां व्यर्थं नृणां जीवितं
पाण्डित्यं शुकपाठषण्ढमंसमोल्लासं कवित्वं[1] विना।
काव्यं चारुतरं विना सहृदयैस्तत्त्वान्तरालोचना-
शून्यं निर्जनकूपदीपकलनामन्तःसमालम्बते॥ १४॥

तस्मादस्मिन्नवसरे नूतनं किञ्चिदुच्यताम्।
चैत्रः पिकरुतस्येव सूक्तस्यावसरः सुहृत्॥ १५॥

चमत्कारो वाचां जयति जितजातीपरिमलः
क्षणं चेत् तत्त्वज्ञाः प्रगुणमवधानं विदधति।
उदग्रा सामग्री तदपि विफलैषा स्फुरितवत्
न यावत् पाठेन स्वजन इव लब्धो ह्यवसरः॥ १६॥

इत्युक्तं नरनाथेन हृदयस्पर्शि धीमताम्।
वचः श्रुत्वा महामात्यः प्रत्यभाषत भूपतिम्॥ १७॥

राजन्नभिनवश्लोकस्तवैव भुवनत्रये।
गीयते विबुधाधीश किमन्यैः सूक्तविस्तरैः॥ १८॥

---

१ W2 °संभ्रम°।

གུས་ལྡན་གདོང་འོད་མཆོག་གྱུར་ཁྱོད། རིག་པ་དག་ལ་དགོས་པ་འདིར།
ས་ཡི་མཐིལ་འདི་ཐམས་ཅད་ནི། རིག་པ་འཛིན་པའི་གྲོང་ཁྱེར་གྱུར། 19

ཁྱོད་ནི་ཡོན་ཏན་ལྡན་པའི་གྲོགས། སྐྱུ་ཙོལ་བརྡ་ལྡན་པས་མཛེས།
ཤར་ཚེ་སྐྱེ་བོ་མཐའ་དག་ནི། སྣང་བཅས་ལེགས་པའི་ལམ་ནས་འགྲོ། 20

གང་དང་གང་ལ་རྒྱལ་པོ་ཐེམས་སུ་ཆགས་པར་སྐད་ཅིག་ནི།
གུས་པའི་ཚ་ཤས་བྱས་པའི་སྐྱུ་ཙོལ་དག་ནི་དེ་དེ་དང་།
རྩེ་དགའི་ཆས་ཀྱི་བྱེ་བྲག་དེ་དེ་ཡོན་ཏན་དེ་དེ་དང་།
སྐྱེ་བོ་སྤྱོད་ཚུལ་དེ་དེ་འཇིག་རྟེན་དགའ་བ་ཉིད་དུ་འགྱུར། 21

ས་སྐྱོང་མཁས་ན་རིག་པའི་རྩེ་དགའི་སྤྲོ་ལ་མཆོག་ཏུ་རིག་པར་གྱུར།
དཔའ་ན་གཡུལ་གྱི་རོལ་པ་དང་འགྲོགས་བརྟུལ་ཞུགས་བརྟུལ་ཞུགས་འཛིན་པར་
འགྱུར།
རྒྱུན་ན་སྡོངས་ཤིང་གཡོ་ན་ནོམ་པར་གཡོ་ལ་གདུག་ན་ས་རྒྱངས་སྤྲོད།
གང་གང་ས་བདག་བྱེད་པ་དེ་དེ་མཐའ་དག་སྐྱེ་བོ་བྱེད་པར་འགྱུར། 22

མི་རྟོག་འབྱུང་གནས་ལེགས་པ་ཡི། མི་རྟོག་ཀྱིས་བྱེད་ཉམས་དང་ལྡན།
ས་བདག་རང་ཉིད་མཁས་པ་ནི། སྐྱེ་གུའི་བསོད་ནམས་ཉིད་ཀྱིས་འབྱུང་། 23

སྐྱེ་བོ་ལེགས་བྱེད་བློ་ལྡན་བློན་པོ་དང་།
མི་བདག་མཁས་ཤིང་བདེན་པར་སྨྲ་བྱེད་པ།
འདི་དག་ཉམས་ནི་དགེ་བ་དར་བའི་དུས།
མངོན་སུམ་དུ་མཚོན་མཚན་ཉིད་བཟང་པོ་ཡིན། 24

त्वयि विद्याविनोदेऽस्मिन् वदान्यवर सादरे।
विद्याधरपुरं सर्व्वं जातमेतन्महीतलम्॥ १९॥

कलाकमलिनीकान्ते मित्रे गुणवतां त्वयि।
उदिते याति सालोकः सन्मार्गेणाखिलोजनः॥ २०॥

सा सा कला स स विलासविशेषलेश-
स्ते ते गुणाः स स जनश्चरितञ्च तत्तत्।
लोके प्रियत्वमधिरोहति यत्र यत्र
राजा करोति सरसः क्षणमादरांशम्॥ २१॥

भूपाले विदुषि स्पृशत्यतिशयं विद्याविलासोत्सवं
शूरे सङ्गरङ्गसङ्गमरुचिर्गृह्णाति वीरव्रतम्।
मूढ़े मुह्यति चञ्चले विचलति क्रूरे नृशंसायते
यत् यत् भूमिपतिः करोति कुरुते तत्तत् समस्तो जनः॥२२॥

सरसः साधुपुष्पाणां वसन्तः कुसुमाकरः[१]।
प्रजापुण्यैर्भवत्येव स्वयं विद्वान्महीपतिः॥ २३॥

जनः सुवृत्तिर्मतिमानमात्यः
सत्याभिलाषी नृपतिर्मनीषी।
एतानि कालस्य शुभोदयस्य
प्रत्यक्षलक्ष्याणि सुलक्षणानि॥ २४॥

---

१ W_1 and W_2 विकाशकुसुमाकरः।

གང་གིས་གནས་དང་གནས་སུ་དགོས་དོན་ཉིད་ལ་བློ་ལྡན་བློ་ནི་གར་བྱེད་ཅིང་།
གང་ཞིག་འགྲོར་ཚེ་ལེགས་ལྡན་བདག་ཉིད་རྣམས་ཀྱིས་ལེགས་བཤད་རྣོ་བའི་
རྒྱན་དུ་གྱུར།
གང་འདི་མི་བདག་བདག་ཉིད་ཆེ་རྒྱས་ཀྱི་ཡིས་དབུལ་བའི་དབྱངས་ཅན་དག་གི་
གཏེར།
འདི་ནི་རང་ཉིད་དམ་པའི་ཚོག་དག་ལ་རིག་པའི་ཁྱིམ་ཐབ་སྒྲོ་དགའ་ཡིན། 25

རྒྱལ་པོའི་བཀུར་བ་ཆེན་པོ་ཡིས། དམ་པའི་ཡོན་དན་མཛེས་པ་ནི།
ནགས་སུ་རྫོན་པ་རྣམས་ཀྱང་ནི། ནུས་པ་རྣམ་པར་བཀྲལ་ལ་ཆགས། 26

རྫོན་པ་གདུག་པ་ཅན་ཞེས་པ། ནགས་ཀྱི་མཐའ་འཁོབ་དག་ན་གནས།
དེ་ལས་རྟག་ཏུ་ལེགས་བཤད་ཀྱི། རིན་ཅེན་གསར་པ་གསར་པ་ཐོབ། 27

དྲེགས་ལྡན་གཉིས་འཐུང་དགྲ་གཏོར་ནི། བསྟུན་བྲལ་གླང་པོའི་སུ་དིག་གིས།
སྙན་ངག་མཁན་གྱི་དོན་མཐུན་ལས། རྟག་ཏུ་དེ་ཡིས་ལེགས་བཤད་བླངས། 28

ཞེས་པ་བློན་པོའི་ཚིག་ཐོས་ས་བདག་གིས།
མདུན་ས་པ་བཀྲི་མདུན་ས་རབ་བཏང་ནས།
སྤྲས་པའི་གཟུགས་ཀྱིས་པོ་བྲང་འཁོར་སོང་དེ།
ཐུན་མོང་སྐྱེ་བོའི་རྗེས་སུ་མཐུན་པར་བྱས། 29

यन्नृत्यन्ति पदे पदे मतिमतां काव्यार्थतत्त्वे धियो
यत् कर्णाभरणीभवन्ति विभवे भव्यात्मनां सूक्तयः।
यत् सारस्वत एष कीर्णमहिमा मुद्रादरिद्रोनिधि-
र्विद्यानां नृपतिः स्वयम्बरविधौ सोऽयं विवाहोत्सवः॥२५॥

राजमानेन महता राजमाने गुणे सताम्।
लुब्धकाः सूक्तिवैचित्र्ये लुब्धकाः काननेष्वपि॥ २६॥

लुब्धकः क्रूरको नाम प्रत्यन्तेऽस्ति वनेचरः।
सदा नवनवं[1] तस्मात् सूक्तरत्नमवाप्यते॥ २७॥

दृप्यद्द्विपारिनखराघातभिन्नेभमौक्तिकैः।
सततं कविसार्थेभ्यः स गृह्णाति सुभाषितम्॥ २८॥

श्रुत्वेत्यमात्यस्य वचः क्षितीशः
सभां समुत्सृज्य विसृज्य सभ्यान्।
अन्तःपुरं गुप्तमुपेत्य रूपं
चकार सामान्यजनानुरूपम्॥ २९॥

१ $\frac{W}{1}$ नवरत्नम्।

སྐད་ཚོགས་ཀྱིས་པ་ལྷ་བུར་མངོན་དགའ་ཞིང་།
པན་ཚུན་འོད་ཟེར་རབ་ཏུ་གསལ་བྱེད་པའི།
རྣོ་ཞལ་བཟུང་ནས་ལེགས་བཤད་དོན་གཉེར་དེ།
གྲིབ་མ་གཉིས་པ་དང་བཅས་ནགས་མཐར་སོང་། 30

དེ་ནི་ངེས་པར་དུད་པའི་ཤིང་རྣམས་ཀྱིས།
མི་དོག་ རླུང་གཞོན་གྱིས་བཀྲམ་མགྲོན་བྱས་བཞིན།
དེ་ཡིས་འབད་པས་བཙལ་བས་རྗོན་པ་ནི།
རྗོན་ལ་རབ་ཆགས་རི་ཡི་ངོས་སུ་སྐྱིད། 31

སླང་པོ་རྣམས་ཀྱིས་བདེ་བའི་མི་མཐུན་ཕྱོགས།
རི་དྭགས་རྣམས་ལ་ཕྱུག་སྨས་འདེབས་བྱེད་མཁས།
འཁྲིག་པོའི་རིམ་པ་བཞིན་དུ་མ་རུངས་གཞུ།
རང་སེམས་ལྷ་བུ་ལག་པ་གཡོན་པས་འཛིན། 32

དྲག་དུ་ནགས་ན་གནས་པའི་མི་མཐུན་ཕྱོགས།
གསོད་པ་གཅིག་པུ་ལ་མཁས་ལག་གཡས་ཀྱིས།
ལག་ལྡན་སྐེ་རྣམས་མཐའ་དག་བྱུང་གྲོལ་ལ།
ཆོས་པར་འགྲོད་པའི་མདའ་ནི་རབ་ཏུ་འཛིན། 33

परस्परांशुप्रतिबद्धतारं[१]
विस्फारताराणिकराभिरामम् ।
हारं समादाय सुभाषितार्थी
छायाद्वितीयः स ययौ वनान्तम् ॥ ३० ॥

स तत्र वातानिलकीर्णपुष्पैः
वृक्षैः कृतातिथ्य इवावनम्रैः ।
अन्विष्य यत्नान्मृगयाप्रसक्तं
गिरेस्तटे लुब्धकमाससाद ॥ ३१ ॥

वामेन वामं करिणीसुखानां
वैधव्यदीक्षारसिकं मृगीणाम् ।
चक्रक्रमं[२] क्रूरतरं करेण
चापं स्वचित्तोपममुद्वहन्तम् ॥ ३२ ॥

वधैकदक्षेण च दक्षिणेन
वनौकसां नित्यमदक्षिणेन ।
हस्तेन विन्यस्त-समस्त-हस्ति-
वर्गापवर्गं[३] विशिखं दधानम् ॥ ३३ ॥

१ °H भारम् । २ H वक्त्रक्रमम । W/3 वक्रक्रमम ।

ཙེ་མོ་རླུང་གིས་དལ་གྱིས་བསྐྱོད་པ་ཡི།
རྨ་བྱའི་སྒྲ་ཡི་སྟོད་གཡོགས་བསྒྲུབས་གྱུར་པ།
སྒྲག་པ་གཡོ་བ་རི་དྭགས་ཉམས་ཀྱི་མིག།
བདག་པོ་འཚོ་བ་བསྲུང་བར་གསོལ་འདེབས་བཞིན། 34

དེས་དེ་ཚིག་གིས་མངོན་མཆོད་མཆོད་བྱ་བཞིན།
སྐྱེ་དགུའི་བླ་མས་ཕྱག་འཚལ་བླ་མ་བཞིན།
མཆུ་མཛེས་དམར་བས་ཕྲེ་བ་སོ་ཡི་འོད།
ཡལ་འདབ་ལྟ་བུ་འཛིན་ཅིང་རབ་སྨྲས་པ། 35

ཁྱོད་ནི་ཏིག་ཏུ་ལེགས་པའི་ལེགས་བཤད་ཉམས།
བསྒྲུ་ལ་རབ་ཏུ་འབད་པ་བདག་གིས་གྲོས།
སྐྱོ་བོའི་ལམ་བསྟན་སྐད་དུ་ལེགས་བཤད་ཀྱི།
རིན་ཅེན་སྒྲོན་མེ་གསར་པ་ཅུང་ཟད་སྩོལ། 36

རང་གཟུགས་རོལ་པས་ཟླ་བའི་དྲེགས་འཛོམས་ཤིང་།
དཔལ་གྱི་འཛོ་སྒེག་འཛུམ་པའི་ཙེ་དགའ་བསྐྱེད།
སྨིན་པའི་ཚོགས་ཉམས་འཛོམས་པའི་དོ་ཤལ་འདི།
ཁྱོད་ཀྱི་དེ་ཡི་འདོད་པའི་རང་བཞིན་ཡིན། 37

मायूरपक्षैरनिलावहेला-
तरङ्गिताग्रैर्विहितोत्तरीयम् ।
नेत्रैर्मृगीणां पतिजीवरक्षां
सन्त्राससंलोलैरिव याच्यमानम् ॥ ३४ ॥

स तं गिरा पूज्यमिवाभिपूज्य
गुरुः प्रजानां गुरुवत् प्रणम्य ।
उवाच शोणाधरकान्तिभिन्नां
दन्तद्युतिं पल्लवितां दधानः ॥ ३५ ॥

मया श्रुतः साधु सुभाषितानां
तवानिशं संग्रहणे प्रयत्नः ।
मार्गोपदेशाय जनस्य दीप्तं
प्रयच्छ किञ्चिन्नवरत्नरत्नम्[1] ॥ ३६ ॥

अयञ्च ते तत्प्रतिपण्यरूपो
लावण्यलीलादलितेन्दुदर्पः ।
हारः प्रहारस्तिमिरोत्कराणां
लक्ष्मीविलासे स्मितकेलिकारः ॥ ३७ ॥

---

१ H. नवरत्नम् ।

ཞེས་བརྗོད་དོ་ཤལ་འོད་ཀྱིས་ཕྱོགས་ཁངས་པ།
ས་ཡི་འཁྲིར་འཇིག་དག་གིས་དེ་ལ་བརྟེན།
སྐྱི་ལམ་རི་བ་ཉོམས་ལ་རྟེད་དཀའ་དེ།
རྫོན་པས་མཐོང་ནས་དཔལ་གྱིས་རབ་བསམས་པ། 38

ཀློག་ཅིང་བདག་ལ་སྨིན་གྲུ་ཕྲིན་ནས་ཀྱང་།
ཕྱི་ནས་འདི་ནི་ངེས་པར་གདུང་བར་འགྱུར།
འདི་ནི་འཇིག་རྟེན་པ་རོལ་སར་འདས་ནས།
དོ་ཤལ་ཇི་ལྟར་བདག་རང་ཉིད་དུ་འགྱུར། 39

སྐད་ཅིག་འདི་བསམས་དེ་ལ་དེས་སླས་པ།
དགེ་བ་དམ་ཚིག་གིས་ནི་ལེགས་བཤད་སྨིན།
གལ་ཏེ་རི་འདིའི་རྩེ་ལ་རང་གི་ལུས།
ལེགས་བཤད་ཐོབ་པའི་འཕྲུལ་ལ་མཆོང་ནའོ། 40

གདུག་པའི་སེམས་ལྡན་རྫོན་པའི་ཚིག་དེ་དག།
ཐོས་ནས་ས་ཡི་བདག་པོས་རབ་བསམས་པ།
ཀྱེ་མ་ངེས་པར་འདུ་བྱེད་ལྡན་པ་འདི།
དགག་པའི་བྱ་སྤྱོད་དག་ལ་མངོན་པར་སྦྱོར། 41

उक्तेति हारं करपूरिताग्र-
मदर्शयद्भूमिपुरन्दरोऽस्मै।
तं लुब्धकः स्वप्नमनोरथेषु
दुष्प्रापमालोक्य शनैः प्रदध्यौ ॥ ३८ ॥

दत्त्वाप्यधीमानिममप्रदेयं
पश्चादयं तापमुपैति नूनम्।
अस्मिन्नतीते परलोकभूमिं
हारः कथं मे निजतामुपैति ॥ ३९ ॥

क्षणं विचिन्त्येति स तं बभाषे
ददामि साधो समयेन स्रक्तम्।
भृङ्गाद्रिरेरस्य यदि स्वदेहं
सम्प्राप्तस्रक्तः क्षिपसि प्रसह्य ॥ ४० ॥

क्रौर्य्योचितं लुब्धकवाक्यमेतत्
अचिन्तयद्भूमिपतिर्निशम्य।
अहो नु संस्कारवतोऽस्य कामं
निषिद्ध-कार्य्याचरणाभियोगः ॥ ४१ ॥

ཧིང་དུ་ཡོན་དན་བསྐྱུན་པར་གྲགས་གྱུར་ཅིང་།
མངོན་དུ་ངན་པའི་སྤྱོད་པ་མཆོན་གྱུར་པ།
བསམ་པ་གྲུ་གྲུ་ཚོམས་ཀྱི་གྲགས་པ་གཞན།
དེ་བཞིན་སྤྱོད་ཚུལ་གཞན་དེ་མཚུངས་མ་ཡིན། 42

ངན་པ་འདི་ཅི་ནགས་མཐར་གནས་པ་ཅི།
སེམས་ཅན་འཚེ་ཅི་ཡོན་དན་མངོན་སྦྱོར་ཅི།
ལེགས་བཤད་བརྗོད་ཅི་བརྩེ་བ་མེད་ཉིད་ཅི།
ཀྱེ་མ་འདི་ཡིས་སྤྱོད་ཚུལ་སྤོངས་པས་བཅོམ། 43

རྒྱུན་དུ་མདུན་ནས་སྟོན་པའི་སྒྲ་ལེན་ཅིང་།
ནགས་ཀྱི་བདུལ་ཞུགས་ཚོམས་ཀྱི་ཞི་བཞིན་མཛེས།
སྲིད་ལྡན་ཛོན་པའི་ཡོན་དན་བསྒྲུ་བ་ནི།
སྲོག་ནི་འཕྲོག་བྱེད་ཅི་ཞིག་བརྗོད་པའམ། 44

ཧིག་པའི་ཁྱད་པར་དགའ་ལ་འབད་བྱས་ཀྱང་།
མི་བསྒྲུན་ངེས་པར་བརླང་པོའི་རང་བཞིན་ཉིད།
གདེངས་ཀའི་རིན་ཅེན་མཛེས་འཛིན་སྤྲུལ་ཚོམས་ནི།
གདུག་པའི་སྤུན་པ་ཁྲོ་བའི་རང་བཞིན་འཛིན། 45

दूरे गुणारोपण-विश्रुतानां
प्रत्यक्षसंलक्षितदुष्कृतानाम् ।
भवत्यतुल्यः कुटिलाशयाना-
मन्यः प्रवादश्चरितं तथान्यत् ॥ ४२ ॥

क्व क्षुद्रतैषा क्व वनान्तवासः
क्व सत्त्वहिंसा क्व गुणाभियोगः ।
क्व हृत्कचर्चा क्व च निष्कृपत्व-
महो विमोहाहृतमस्य वृत्तम् ॥ ४३ ॥

गायत्यसक्तं मधुरं पुरस्तात्
वन्यव्रतैः शान्त इवावभाति ।
लुब्धस्य लुब्धस्य किमुच्यते वा
प्राणापहारी गुणसंग्रहैर्यः ॥ ४४ ॥

विद्याविशेषेऽपि कृतप्रयत्नः
खलो भवत्येव खरस्वभावः ।
व्यालाः फणारत्नरुचिं दधानाः
क्रूरं तमः क्रोधमयं वहन्ति ॥ ४५ ॥

བསྟན་བཅོས་མན་ངག་ཉམས་ཀྱིས་དག་བྱས་ཀྱང་།
ངེས་པར་བློ་ངན་རབ་དང་ཉིད་མི་འགྱུར།
ག་བུར་ཚོགས་ཀྱིས་ཡོངས་སུ་བགོས་གྱུར་ཀྱང་།
མི་བཟང་སྒོག་པ་རང་གི་དྲི་མི་གཏོང་། 46

ཡུན་རིང་འདི་སྒྲུད་ཡོན་དན་དོན་གཉེར་ངེས།
གསར་པའི་ཉེར་བསྟན་ཅན་པར་མངོན་འདོད་ལས།
ལེགས་བཤད་སྦྱོལ་ཅིག་ས་འཛིན་ངོས་རྩེ་ལས།
ཕྱི་ནས་ལུས་འདི་དོར་བར་བྱ་ཞེས་སྨྲས། 47

བདེན་པའི་ནོར་ལྡན་དེ་ཡི་ཚིག་ཐོས་ནས།
དོ་ཤལ་འོད་ཀྱིས་གཙུག་ལག་ཁང་བླངས་དེ།
གཟུང་བར་མཛོད་ཅེས་བརྗོད་ནས་ཕྲ་མོར་ནི།
རིགས་པ་མིན་ལ་ཆགས་པས་བརྗོད་པར་བཙམས། 48

རང་བདེ་འམ་ལམ་གྱི་དོག་དུ་གདུང་བྱེད་སྡིག་དང་ཉོན་མོངས་རིག་མི་བྱ།
ཚུལ་ཁྲིམས་ཀྱིས་ཀྱང་དགེ་བའི་གནས་ཀྱི་བསོད་ནམས་ཚོགས་ལ་མཆོག་དུ་བརྩོན།
གཡོ་བའི་ཡུལ་གྱི་ཉམས་སྒྱོང་དགྲ་ལ་ལྷག་པར་ཆགས་པའི་སེམས་འདི་ནི།
ཆགས་དང་བྲལ་ཞིང་མངོན་འདོད་མཐའ་ཡས་ཚོགས་ཤེས་དག་གིས་ཆོས་པར་བྱ། 49

शास्त्रोपदेशैः परिमृज्यमानः
प्रसन्नतां याति न नाम जाल्मः ।
कर्पूरपूरैः परिपूरितोऽपि
नोज्झात्यसह्यं लशुनः स्वगन्धम् ॥ ४६ ॥

चिरं विचार्येति स सद्गुणार्थी
नवोपदेशश्रवणाभिलाषात् ।
प्रयच्छ हारं क्षितिभृत्तटाग्रात्
त्यक्ष्यामि पश्चात्तनुमित्युवाच ॥ ४७ ॥

श्रुत्वा वचः सत्यधनस्य तस्य
हारं समादाय रुचां विहारम् ।
प्रगृह्यतामित्यभिधाय हारं
प्रचक्रमे वक्तुमयुक्तसक्तः ॥ ४८ ॥

पापं शापं[1] स्वसुखशरणो न स्पृशेत्तीव्रतापं
शीलोत्तालं कुशलसदनं पुण्यपद्मं भजेत ।
चित्तं चैतच्चपलविषयास्वादसंवादलुब्धं
कुर्याद्वीतस्पृहमभिमतानन्तसन्तोषतृप्तम् ॥ ४९ ॥

---

[1] W₂ सापम् ।

འདི་ནི་བདེ་གཤེགས་བསྟན་པ་དག་དང་རབ་ཞི་རྒྱལ་སྲིད་སེང་གེའི་ཁྲི།
མི་རྣམས་དག་གི་གདུང་བ་སྐྱོང་བྱེད་དགེ་བའི་ཆོས་ནི་ཐུན་མོང་ཉིད།
ཡིད་བྱུང་རྣམ་པར་སེལ་བར་བྱེད་པའི་རྣམ་འགྱུར་དག་ནི་ཀུན་ཏུ་འཛོམས།
ཡིད་ཀྱི་མེ་ལོང་དག་བྱེད་ལེགས་བྱས་ཚོགས་ནི་ཉེ་བར་སྐྱབས་པ་ཡིན། 50

ལེགས་བཤད་འདི་ནི་མི་བདག་དེ་ཉིད་རྗེས་སུ་འབྲང་བས་རི་དྭགས་དགྲ་ལས་རྒྱེད།
ལེགས་དོན་དྲི་མེད་བདག་ཉིད་དག་བྱེད་དེ་ཡང་སྙིང་ལ་རྣམ་བགོད་ནས།
ཤིན་ཏུ་མཐོ་བའི་རི་ཡི་རྩེ་མོར་འཛེགས་ནས་ལུས་ནི་རབ་ཏུ་བདང་བར་གྱུར།
བསོད་ནམས་ཡིད་ལྡན་རྣམས་ནི་ཤིན་ཏུ་བདེན་པ་འདོད་ཀྱི་གསོ་བའི་ལུས་
འདི་མིན། 51

འགྲོ་རྣམས་ཡང་དག་བསྐྱལ་སྐད་སྨོན་ལམ་དག་ནི་ནང་ཉིད་དུ།
བཟུང་ནས་དེ་ནི་རི་ཡི་རྩེ་ལས་ཇི་སྲིད་ལྷུང་གྱུར་པ།
དེ་སྲིད་རི་ཡི་གནས་བསྟེན་རྣམ་པར་རྒྱལ་བ་ཞེས་བྱ་བའི།
གཞོན་སྨིན་གྱིས་བསྐྱངས་ལུས་ནི་ས་ལ་རབ་དུ་སྨིན་པར་གྱུར། 52

དེ་ཡིས་བརྩོན་འགྲུས་ཡ་མཚན་དབང་གིས་བཞིན་དུ་འཇིག་རྟེན་གསུམ།
འདར་བར་གྱུར་ཅིང་བར་སྣང་ལས་ཀྱང་མེ་ཏོག་ཆར་བབས་ཆེ།
གནས་སྐབས་གསུམ་པའི་ཚོགས་ཀྱིས་སྤྱོད་ཚུལ་ཡང་དག་མཆོད་གྱུར་པའི།
རྒྱལ་པོ་དཔལ་གྱིས་རང་གི་རྒྱལ་པོའི་ཕོ་བྲང་དག་ཏུ་སོང་། 53

इदं सुगतशासनं प्रशमराज्यसिंहासनं
नृणां व्यसनवारणं कुशलधामसाधारणम्।
मनोभवविसर्जनं भवविकारसन्तर्जनं
मनोमुकुरमार्जनं सुकृतसञ्चयोपार्जनम्॥ ५० ॥

संप्राप्येति सुभाषितं मृगरिपोस्तत्त्वानुसारी नृपः
सूक्तार्थं हृदये निधाय विमलं तं चात्मसंशोधनम्।
आरुह्याद्रिशिरः समुन्नततरं देहं समुत्सृष्टवा-
निष्टं सत्यमतीव पुण्यमनसां नेदं वपुश्चञ्चलम्॥ ५१ ॥

सन्तारणाय जगतां प्रणिधानमन्त-
र्धृत्वा स शैलशिखरान्निपपात यावत्।
तावत् गिरिस्थितिजुषा विजयाभिधेन
यक्षेण रक्षिततनुः क्षितिमाससाद॥ ५२ ॥

तद्वीर्यविस्मयवशादिव घूर्णमाने
लोकत्रये कुसुमवर्षिणि चान्तरीक्षे।
संपूज्यमानचरितस्त्रिदशव्रजेन
राजा जगाम शनकैर्निजराजधानीम्॥ ५३ ॥

དེ་ནས་དེ་ནི་པན་པར་རབ་ཞུགས་ས་ཡི་དབང་པོ་ཡིས།
ཉེ་བར་བསྟན་པའི་ཡུལ་ཅན་ལེགས་པར་བཤད་པ་དེ་ཡིས་ནི།
རྟག་ཏུ་སྐྱེ་བ་ན་ལུས་སྲིད་པ་རྩོལ་གྱིས་གཏོང་བྱེད་པ།
ཆོས་ཀྱི་བདེ་བ་རྟག་ཏུ་དམ་པའི་ལམ་ལ་འགོད་པ་བསྐྱབས། 54

གནས་སྐབས་འདིར་ནི་ཚོང་འདུས་དག་གི་ལམ་དུ་ཛོན་པ་འདི།
དོ་ཤལ་བཙོང་བའི་བློ་ཡིས་ཡོངས་སུ་ཀྱུ་བར་བྱེད་པ་ན།
འདི་ནི་ཆོས་ཀུན་པ་ཞེས་མཚུངས་མེད་བབ་ཅོལ་འདར་ཟླ་ན་པ།
ས་བདག་མདུན་སར་གྲོང་ཁྱེར་སྐྱུང་བའི་སྐྱེ་བོས་ཁྱེར་བར་གྱུར། 55

རིང་པོ་ཉིད་ནས་དོ་ཤལ་འདོད་ཟེར་རབ་གསལ་ནོར་འགྲོ་ཆགས་གྱུར་པ།
སྒྲོག་ནི་འཛོམས་པའི་དམ་ཚིག་བསྐྱབས་པ་དེ་ནི་གྱོལ་པོས་ཤེས་གྱུར་ནས།
འདི་ནི་བདག་གི་སློབ་དཔོན་ཞི་བའི་ཡོ་དན་གསལ་བའི་ལེགས་བཤད་སྟོན།
མཆོད་འོས་འདི་ཞེས་བརྡུད་བྲུས་མཆོད་པ་བྱས་ནས་དེ་ནི་བཏང་བར་གྱུར། 56

དེ་ལྟར་མི་བདག་ལེགས་བཤད་ཅེས་བྱ་བདེན་པའི་བརྟུལ་ཞུགས་སྙིང་སྟོབས་
ལྡན་པར་གྱུར།
དེ་ཉིད་དུས་ཀྱི་སླར་ཡང་རྫོགས་པའི་བྱང་ཆུབ་གཏེར་ཐོབ་བདག་ཉིད་ང་ཡིན་ནོ།
རང་གི་སྤྱོད་ཚུལ་བཅོམ་ལྡན་གྱིས་བཤད་དེ་དག་ཐོས་ནས་ལྷ་རྣམས་བདག་པོ་ནི།
དགའ་བས་སྤྲུན་གྱི་ནགས་ཚལ་ནམ་པར་གྱིས་པ་པདྨོའི་འབྱུང་གནས་དཔལ་
བསྟེན་གྱུར། 57

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ལེགས་བཤད་འཚོལ་བའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙ་གསུམ་པའོ།།

तत्रोपदेशविषयेण सुभाषितेन
तेनानिशं जनमशेषमथ क्षितीशः।
चक्रे भवाभिभवशर्म्मणि धर्म्मनित्ये
सत्कर्म्मणि प्रणिहितं हितसम्प्रवृत्तः॥ ५४॥

अत्रान्तरे विपणिवर्त्मनि लुब्धकोऽसौ
हारस्य विक्रयधिया परिवर्त्तमानः।
चौरोऽयमित्यसमसाहसकम्प्यमानः
क्ष्माभृत्सभां नगररक्षिजनेन नीतः॥ ५५॥

दूरादेव स्फुटतरकरासक्तविस्फारहारं
प्राणापातैर्विहितसमयं तं परिज्ञाय राजा।
आचार्य्योऽयं मम शमगुणव्यक्तसूक्तोपदेष्टा
पूजार्होऽसाविति कृतनतिः मानयित्वात्यजत्तम्॥ ५६॥

इत्यासीत्स सुभाषिताख्यनृपतिः सत्यव्रतः सत्यवान्
सम्यग्बोधिनिधानलब्धमहिमा कालेन सोऽहं पुनः।
श्रुत्वैतत्कथितं निजं भगवता वृत्तं सुराणां पति-
र्भेजे हर्षविबुद्धलोचनवनः पद्माकरस्य श्रियम्॥ ५७॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां सुभाषितगवेष्यवदानं नाम त्रिपञ्चाशत्तमः पल्लवः॥

Chapter LIV.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་བཞི་པ།

སེམས་ཅན་སྐད་ཤེས་པའི་རྟོགས་བརྗོད།

༄༅། །ཀྱི་ཆེར་གྲགས་པ་བསྟེན་པའི་བསྔགས་འོས་རི་བོང་ཅན་ལྟར་མཛེས།
གཙུག་གི་ནོར་བུ་གཞན་གྱི་དོན་ལ་སྐྱོ་བ་མེད་པའི་དུང་།
གང་གི་སྒྲོག་ནི་སོང་བར་གྱུར་ཀྱང་ལེགས་པའི་སྒྲ་ཡིས་གནས།
བཀྲ་ཤིས་གཏེར་གྱིས་འཇིག་རྟེན་དག་གི་དགེ་བ་རྒྱས་པར་བྱེད། 1

མི་རྟོག་ཅན་མ་ཞེས་པ་ཡི། མཚན་གྱི་བདུལ་ནས་བཅོམ་ལྡན་འདས།
ཧི་དྭགས་འཁྲོག་བྱེད་བརྟུལ་ཞུགས་ནི*། རྟོགས་མེད་ལྡན་པའི་ཚལ་ན་བཞུགས། 2

དེར་ནི་རྗེས་སོང་བཀྲོ་ཕྲིན་གྱིས། སྐད་ཡང་འཛུམ་ལྡན་དག་ལ་དྲིས།
དེ་ཡི་མངོན་སྤྱོད་ཐུན་གྱུར་ནས། འཛུམ་པའི་རྒྱུ་ནི་རབ་ཏུ་གསུངས། 3

ལོ་ནི་སྟོང་ཕྲག་བདུན་ཅུ་གཉིས། སྐྱེ་བོ་ཚེ་རིང་གྱུར་ཚེ་སྔོན།
གྲོང་ཁྱེར་དབང་ཆེན་ལྡན་ཞེས་པ། མཐོ་རིས་དགའ་བ་ཐུལ་པར་གྱུར། 4

དེར་ནི་ནོར་གྱི་བློ་གྲོས་བདག། དབང་ཆེན་པོ་ཞེས་བྱ་བ་བྱུང་།
གང་གི་གྲགས་པ་ག་བུར་གྱི། སྟོང་ཐུས་ཕྱོགས་ནི་སྐུན་བྲལ་བྱས། 5

---

* Here the translator has evidently mistaken the word ব্রত (བརྟུལ་ཞུགས་) for ব্রাত (ཚོགས་རྣམས་) which means multitude or number.

चतुःपञ्चाशत्तमः पल्लवः ।

सत्त्वौषधावदानम् ।

श्लाघ्यः शशाङ्करुचिरः पृथुकीर्त्तिभाजां
शङ्कः शिखामणिरखिन्नपरोपकारः ।
यः साधुशब्दवसतिर्गतजीवितोऽपि
लोकस्य मङ्गलनिधिः कुशलं तनोति ॥ १ ॥

भगवान् पुष्पिलां नाम विनीय क्षणदाचरीम् ।
विजहार हरिव्रातनिःशङ्कहरिणे वने ॥ २ ॥

तत्रानुयायिना पृष्टः पुनः शक्रेण सस्मितः ।
स पूर्व्वचरितं स्मृत्वा स्मितकारणमभ्यधात् ॥ ३ ॥

द्वासप्ततिसहस्राब्ददीर्घायुषि जने पुरा ।
अभून्महेन्द्रवत्याख्या जितस्वर्गोत्सवा पुरी ॥ ४ ॥

महेन्द्रसेन इत्यासीत्तस्यां वसुमतीपतिः ।
यशश्चक्रे कीर्त्तिकर्पूरवर्त्त्या वितिमिरा दिशः ॥ ५ ॥

གང་ཞིག་སྨན་པ་དམ་པ་བཞིན། །དཀྲ་ཡི་གྲགས་པའི་རིམ་བཅོས་ཤིང་།
སྐབས་ངན་བསྟེན་པའི་ནད་གྲོགས་དེ། །སྐྱེ་གུ་སྲིད་གྲལ་རོལ་གནས་བསྐྱབས། 6

བསོད་ནམས་ཚོགས་ནི་རྣམ་བཅས་ཅིང་། །གྱུར་པ་བཞིན་དུ་དེ་ཡི་བུ།
སེམས་ཅན་ཀུན་ལ་ཕན་བརྩོན་པ། །སེམས་ཅན་སྨན་ཞེས་བྱ་བར་གྱུར། 7

དེ་ནི་བསྐལ་པ་བཟང་པོ་པའི། །བྱང་ཆུབ་སེམས་དཔའ་སེམས་དཔས་བསྒྱུར།
སྙིང་རྗེ་དགའ་དང་བཏང་སྙོམས་དང་། །བྱམས་པ་རྣམས་ཀྱི་གྲོགས་སུ་གྱུར། 8

གྲོང་དང་གྲོང་ཁྱེར་ནགས་མཐའ་དང་། །ཕྱོགས་དང་གླིང་རྣམས་ཐམས་ཅད་ནས།
ནད་པ་འོངས་རྣམས་རྟག་ཏུ་ནི། །དེ་ཡིས་རིག་པས་བསོས་པར་གྱུར། 9

སྐྱེ་བོའི་ནགས་འདིར་དམ་པ་དེ། །ཙན་དན་བཞིན་དུ་ཅི་ཡང་སྤྱོད།
གང་གི་ལུས་ཀྱི་གཞན་ཕན་འདི། །མི་རྒྱང་རབ་དུ་གྲགས་པར་བྱེད། 10

ཆེན་པོའི་ནད་ཀྱིས་གདུངས་པ་རྣམས། །དེ་ཡིས་འཕྲལ་ལ་བདེ་བར་བསྐྱབས།
ངན་པའི་ཉོན་མོངས་གདུང་བ་རྣམས། །དམ་པ་དག་དང་འགྲོགས་པས་བཞིན། 11

རྣོན་གཅེར་རྣམས་ཀྱི་ལུས་ཀྱི་ནད། །རིག་པ་དང་ནི་སེམས་ཀྱི་ཡང་།
ནོར་གྱི་སྒྲོགས་པས་ཕྱོགས་རྣམས་སུ། །ནད་པ་མེད་ཅིང་སྐྱོང་མེད་གྱུར། 12

དེ་ནས་དུས་ཀྱི་རྩེ་དགའ་ནི། །ངོ་མཚར་ཐམས་ཅད་འཕྲོག་བྱེད་པས།
སྐྱེ་བོའི་བསོད་ནམས་ཡོངས་ཟད་ལས། །དཔལ་ལྡན་དེ་ནི་མཐོ་རིས་སོང་། 13

रिपुदर्पज्वरहरः कृच्छ्रहृद्दुर्दशाजुषाम्।
व्यधात्तृष्णापहः स्वस्था यः सद्वैद्य इव प्रजाः॥ ६॥

तस्याभूत् पुण्यसम्भार इव साकारतां गतः।
पुत्रः सर्व्वौषधो नाम सर्व्वसत्त्वहितोद्यतः॥ ७॥

स भाद्रकल्पिको बोधिसत्त्वः सत्त्वविभूषितः।
करुणामुदितोपेक्षामैत्रीणां वल्लभोऽभवत्॥ ८॥

पुरग्रामवनान्तेभ्यो दिग्द्वीपेभ्यश्च सर्व्वशः।
रोगिणोऽभ्येत्य सततं तत्स्पर्शात् स्वास्थ्यमाययुः॥ ९॥

स कोऽप्यस्मिन् जनवने सुजनश्चन्दनायते।
परोपकारमतनुं तनुर्यस्य तनोत्यलम्॥ १०॥

स दीर्घव्याधिदग्धानां विदधे सहसा सुखम्।
दुर्जनायासतप्तानामिव साधुसमागमः॥ ११॥

रोगे स्पर्शेन शारीरे मानसे द्रविणेन च।
हृते तेनार्थिनां दिक्षु नार्त्तोऽभून्न च याचकः॥ १२॥

ततः कालविलासेन सर्व्वाश्चर्य्यापहारिणा।
स ययौ निधनं श्रीमान् जनपुण्यपरिक्षयात्॥ १३॥

བདུད་རྩིའི་ཟེར་ནི་ཉིན་འགའ་མིག་རྣམས་དག་གི་ཀྱང་བྲུའི་བདག་ཉིད་འགྱུར།
ཡོན་དན་དྲི་བཟང་སྤྲོ་བའི་མེ་ཏོག་རྣམས་ནི་སྐད་ཅིག་གནས་པའི་ཚོགས།
དུས་མིན་དུས་ནི་འདོད་པས་མཆོག་ཏུ་དགའ་བ་ཤིན་ཏུ་གཅོད་ལ་མཁས།
ཅི་ཡང་འདི་ནི་སྲུ་ཡི་ཡིད་ལ་ཟུག་རྔུ་ལྟ་བུར་བསྐྲུན་མ་ཡིན། 14

གང་ཞིག་ཡིད་འོང་བསོད་ནམས་ཡངས་པའི་ལྗོང་གིས་སྐྱེད་གྱུར་པ།
གདུང་བ་ཀུན་གྱི་སྨན་དང་འབད་མེད་བདེ་བ་སྐད་ཅིག་གིས།
ངེས་པར་དུས་ཀྱི་ཆ་ཡིས་འཛོམས་པ་དེ་དེ་མཐོང་གྱུར་ནས།
བླུན་པོ་རྣམས་ནི་དབེན་པའི་ཆ་ལ་ནམ་ཡང་མི་རེག་གོ། 15

དེ་ནས་དེ་གྲགས་ལྷག་མའི་ཚེ། དང་པོ་དེ་བྲལ་ལས་སྐྱེས་པའི།
སྡུག་བསྔལ་བདང་ནས་ནད་རང་བཞིན། སྐྱེ་བོ་རང་གི་སྡུག་བསྔལ་བསྟེན། 16

དེ་ནས་གཞོན་ནུ་དག་གི་ལུས། མཚན་ཉིད་ཤེས་པའི་བློན་པོ་ཡིས།
ནགས་ཀྱི་མཐའ་རུ་རབ་བསྐྱངས་ཏེ། སྐྱེ་བོ་རྣམས་ལ་ཕན་སྨད་བཀོད། 17

མེ་ཏོག་འཁྲི་ཤིང་གིས་བརྒྱས་པ། རྫིང་བུ་དགའ་བའི་གནས་དེར་ནི།
བསོད་ནམས་བཞིན་དུ་དེ་ཡི་ལུས། སྙིང་པོ་མེད་པ་ཉིད་དུ་གནས། 18

རི་བས་ཕྱོགས་མཐའ་ལས་འོང་པ། ནད་པའི་ཚོགས་ཀུན་སྐྲར་ཡང་ནི།
དེ་ཡིས་ཡང་དག་རིག་ཙམ་གྱིས། འཕྲལ་ལ་བསོས་པ་ཉིད་དུ་གྱུར། 19

सुधांशुर्नेत्राणां कतिपयदिनास्वाद्यमहिमा
क्षणस्थायी वर्गः सुरभिगुणसर्गः सुमनसाम्।
अकाले कालेच्छा[1] प्रियतरसमुच्छेदचतुरा
विधत्ते कस्यैषा किमपि न मनःशल्यकलनाम्॥ १४॥

यत्पेशलं विपुलपुण्यपरै[2]रवाप्तं
सर्व्वार्त्तिभेषजमयत्नसुखं क्षणेन।
तत्तद्विलोक्य किल कालवलावलीढं
मूढाः स्पृशन्ति न विवेकलवं कदाचित्॥ १५॥

अथ तस्मिन् यशःशेषे त्यक्ता तद्विरहोद्भवम्।
दुःखं स्वदुःखमेवादौ भेजे रोगभयाज्जनः॥ १६॥

लक्षणाढ्यैः कुमारस्य शरीरं मन्त्रिभिस्ततः।
न्यस्तं हिताय लोकानां वनोपान्ते सुरक्षितम्॥ १७॥

तस्मिन् पुष्करिणीरम्ये देशे फुल्ललताकुले।
अपर्युषितमेवासीत्तस्य पुण्योपमं वपुः॥ १८॥

आशागता दिगन्तेभ्यः सर्व्वरोगिगणाः पुनः।
तस्य संस्पर्शमात्रेण सहसा स्वस्थतां[3] ययुः॥ १९॥

१ H कृतान्तेच्छा। २ H ॰पुण्यपरै॰। ३ H स्वस्थताम्।

དེ་ཡིས་རིག་པའི་ཀླུང་གི་ནོར་བསྐྱོད་པདྨའི་ཚོགས་རྣམས་དང་།
ཆུ་ལ་གྲུ་བས་བགྲོན་པས་མཚོ་སྐྱེས་ཅན་གྱི་ཆུ་ལ་ནི།
ཁྲུས་བྱས་མཐའ་དག་ནད་ལས་རྣམ་གྲོལ་སྐྱོན་དང་བྲལ་གྱུར་ཅིང་།
འཕྲལ་ལ་ཉིད་དུ་མི་རྣམས་བདུད་རྩི་འཐུངས་བཞིན་རབ་ཏུ་མཛེས། 20

གང་གི་མིང་ནི་བསྒྲགས་ཉིད་ཀྱིས། ནད་རྣམས་ཟད་པ་ཉིད་འགྱུར་བ།
གང་ཞིག་གཞོན་ནུ་སེམས་ཅན་སྨན། དེར་ནི་ང་ཉིད་དེ་ཚེ་གྱུར། 21

དྲན་པའི་བདུད་རྩི་དག་གི་གནས། འདི་དག་སུ་ཞིག་དྲན་ན་ཡང་།
དེ་ཡི་ནད་གདུང་རང་བཞིན་གྱི། སྡུག་བསྔལ་ཉེ་བར་ཞི་བར་འགྱུར། 22

དུས་ཀྱི་ཕྱུལ་འདིར་མི་ཡི་བདག། གང་ཞིག་འཛིག་རྟེན་ལ་ཕན་སླད།
མཆོད་རྟེན་རབ་གནས་བྱེད་འགྱུར་བའི། མྱ་ངན་མེད་ཅེས་བྱ་བ་འབྱུང་། 23

འཆི་མེད་གྲོལ་པོའི་བློ་གཅིག་གིས།
བདེ་གཤེགས་ཀྱིས་བཤད་འདི་ཐོས་ནས།
དགའ་བའི་རོལ་པ་ནོར་བྱས་པའི།
བཞིན་གྱི་འོད་ཀྱིས་རྣམ་པར་མཛེས། 24

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སེམས་ཅན་སྨན་ཞེས་བྱ་བའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙ་བཞི་པའོ།།

तत्स्पृष्टमारुतविघट्टितपद्मखण्ड-
हिण्डीरमण्डनजलासु सरोजिनीषु ।
स्नाता विमुक्तसकलामयनिर्व्यपायाः
पीतामृता इव बभुः सहसैव मर्त्याः ॥ २० ॥

सत्त्वौषधकुमारो यः सोऽहमेव तदाभवम्[1] ।
यस्य सङ्कीर्त्तनेनैव यास्यन्ति व्याधयः क्षयम् ॥ २१ ॥

स्मरिष्यति स्मृतिसुधां ममैतां यः कथामपि ।
आधिव्याधिमयं दुःखं तस्य शान्तिमुपेष्यति ॥ २२ ॥

अशोको नाम देशेऽस्मिन् कालेनोत्पत्स्यते नृपः ।
चैत्यं हिताय लोकस्य यः प्रतिष्ठापयिष्यति ॥ २३ ॥

इति सुगतोदितमेकधिया
श्रुत्वैवामरराजः ।
हर्षविलासविकाशितया
वदनरुचा विरराज ॥ २४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां सत्त्वौषधावदानं नाम चतुःपञ्चाशत्तमः पल्लवः ॥

---

१ $\frac{W}{1}$ ०भवत् ।

Chapter LV.

ཡལ་འདབ་ལྔ་བཅུ་ཙོ་ལྔ་པ།

ཐམས་ཅད་སྟེར་བའི་རྟོགས་བརྗོད་ནི།

༄༅།ཡིད་བཞིན་ནོར་བུ་ངེས་པར་ཉམས་བསམས་དངོས་པོ་སྟེར་བྱེད་ཅིང་།
དཔག་བསམ་ཤིང་ཡང་ཡོངས་སུ་བཏགས་པ་ཁོ་ན་སྐྱིད་བར་བྱེད།
ལུས་ནི་རབ་སྦྱིན་དམ་ཚིག་དག་ལ་རང་ཉིད་བརྩོན་པ་གང་།
དེ་དག་བསྟོད་ལ་ཡང་དག་འོས་པའི་ཚིག་ནི་གང་ཞིག་ཡིན། 1

ཀྲྀ་ཏ་ཡ་བ་ཀྲྀ་ཏ་ཀ། སྐྱོ་བྲིད་གསང་པ་པ་བདུལ་ནས།
སྒྲ་ཅན་ནགས་ལས་མ་སྣང་བར། སྟོན་པ་ནགས་ཚལ་གཞན་དུ་གཤེགས། 2

དེར་ནི་སྟོན་བྱུང་དྲན་གྱུར་ནས། བཞིན་འཛུམ་མཛེད་ལ་འཛུམ་པའི་སྒྲ།
བརྒྱ་བྱིན་གྱིས་ནི་གུས་པས་དྲིས། དེ་ཡིས་སླར་ཡང་རབ་གསུངས་པ། 3

གྲོང་ཁྱེར་ཐམས་ཅད་ལྡན་པ་ཞེས། ནོར་བུའི་བ་གམ་ནམ་མཁའ་ལ།
རིག་པའི་འོད་ཟེར་རྒོད་པ་ཅན། ཕུན་ཚོགས་ཀུན་གྱི་གནས་སུ་གྱུར། 4

དེར་ནི་རྒྱལ་པོའི་ཟླ་བ་དག། དྲི་མེད་འོད་ལྡན་ཀུན་སྟེར་བྱུང་།
གང་གི་གྲགས་པ་ཟླ་འོད་ཀྱིས། སྲིད་གསུམ་ཉིན་དང་མཚན་མོར་མཛེས། 5

पञ्चपञ्चाशत्तमः पल्लवः ।

सर्व्वन्ददावदानम् ।

चिन्तामणिः किल विचिन्तितवस्तुदाता
कल्पद्रुमश्च परिकल्पितमेव सूते ।
तस्य स्तुतौ समुचितानि पदानि कानि
देहप्रदानसमये स्वयमुद्यतो यः ॥ १ ॥

घाटोपघाटकौ शास्ता विनीयोन्मदगुह्यकौ ।
केशिनीकाननादन्यद्वनमन्तर्हितो ययौ ॥ २ ॥

प्राग्वृत्तस्मरणस्मेरवदनः स्मितकारणम् ।
स तत्र पृष्टः शक्रेण प्रणयात् पुनरब्रवीत् ॥ ३ ॥

अभूत् सर्व्वावती नाम वसतिः सर्व्वसम्पदाम् ।
नगरी गगनालग्नमणिहर्म्म्यांशुहासिनी ॥ ४ ॥

आसीत्सर्व्वन्ददस्तस्यां राजेन्दुरमलद्युतिः ।
यस्य त्रिभुवनज्योत्स्ना बभौ कीर्त्तिर्दिवानिशम् ॥ ५ ॥

མཛེས་ལྡན་ལེགས་བྱས་སྙིང་པོའི་གནས་སྐབས་དག་གི་ཁྱབ་པར་གྱིས།
འདུལ་བའི་ལམ་དུ་གནས་པ་གྲོབ་ཅིང་གཟུགས་བཟང་ལྡན་གྱུར་པ།
གང་གི་ལེགས་སྨྲ་དུལ་བའི་གྱོན་ལྡན་སྒྲོག་པའི་བདེ་ཉིད་དུ།
སྤྲིན་པ་གྱུར་དེ་སླང་པོའི་བདག་པོ་དག་གི་བཞིན་དུ་འོ། 6

ནམ་ཞིག་ས་ཡི་བགྱི་བྱིན་དེ། སྐྱེ་གུའི་བྱ་བ་ལྟ་བྱེད་ཅིང་།
རྗེས་སུ་གཟུང་ལ་མངོན་ཕྱོགས་པས། ཕྱི་རོལ་ཁྱམས་གནས་ས་གཞི་བསྟེན། 7

དེར་ནི་མཐའ་ལས་རྒྱལ་ཕྲན་གྱི། མགོ་བོའི་རིན་ཅན་ལ་སྣང་དེས།
ལུས་ནི་གཟུགས་མེད་དག་གི་བཞིན། ས་ཡི་བྱ་བ་གྲོས་པར་གྱུར། 8

དེ་ཡི་ཀོང་སྟེགས་ཟླ་ཞལ་གྱིས། རང་བཞིན་ལ་ནི་འབོས་གྱུར་ཅིང་།
མདུན་དུ་རབ་བདུད་སློང་བ་ཉམས། སྐར་ཡང་བསམ་པའི་གདུང་བ་བདང་། 9

སྐབས་ཅར་ཕྱུག་རོན་རབ་སྨྲ་ཅིང་། འདབ་གཞོག་ཟད་པ་བཞིན་དུ་ནི།
འགྲོ་བ་མེད་པས་ས་བདག་གི། བྱིན་པའི་ཚ་བ་རབ་དུ་བསྟེན། 10

རབ་སྨྲ་མིག་ནི་འཁྲུལ་བྱེད་ཅིང་། ཡན་ལག་ཀུན་དུ་འཁྲམས་པ་དེ།
མཐོང་ནས་ས་ཡི་བདག་པོ་ནི། འཕྲུལ་ལ་བརྩེ་བའི་དབང་དུ་གྱུར། 11

འདི་ཡི་འཇིགས་པ་གང་ལས་ཞེས། རབ་གྱིས་པད་མའི་འཕྲེང་ལྡན་གྱིས།
པདྨོ་ཅན་ལྟར་འོད་གསལ་བའི། སྤྱན་གྱིས་ཀྱུར་དུ་ཚོགས་ཉམས་བལྟས། 12

शोभाजुषः सुकृतसारदशाविशेषै-
र्लब्धस्थितेर्विनयवर्त्मनि भद्रमूर्त्तेः ।
यस्यायथौ विजयमण्डनडिण्डिमत्वं
दानेन कुञ्जरपतेरिव साधुवादः ॥ ६ ॥

स कदाचित् प्रजाकार्य्यदर्शनानुग्रहोन्मुखः ।
भेजे वाह्याङ्गनस्थानभुवं भूमिशतक्रतुः ॥ ७ ॥

स तत्रानन्तसामन्तमौलिरत्नेषु बिम्बितः ।
शुश्राव पृथिवीकार्य्यमसङ्ख्यैरिव विग्रहैः ॥ ८ ॥

चन्द्रकान्तमये तस्य संक्रान्ताः प्रणताः पुरः ।
पादपीठे पुनश्छिन्नातापं तत्यजुरर्थिनः ॥ ९ ॥

अत्रान्तरे परिभ्रष्टः श्लुष्टपक्ष इवागतिः ।
पारावतः क्षितिपतेरूरुमूलमशिश्रियत् ॥ १० ॥

तं कातरतरोद्भ्रान्तनेत्रं सङ्कोचिताङ्गकम् ।
दृष्ट्वा दयाविधेयोऽभूत् सहसा पृथिवीपतिः ॥ ११ ॥

स समुत्फुल्लकमलालीलाकमलिनीत्विषा ।
कुतोऽस्य भयमित्याशा दृशा क्षिप्रं व्यलोकयत् ॥ १२ ॥

སྐབས་དེར་སྨིན་པ་གསོད་བྱེད་ནི། སྙིང་སྟོབས་བརྟག་པར་འདོད་པ་ཡི།
སྐྱུ་མས་རྗོན་པའི་ནམ་པར་ནི། འོངས་ནས་མི་བདག་ལ་སྨྲས་པ། 13

ལྷ་གཅིག་ཡུན་རིང་ན་སྙེད་པའི། བདག་གི་བཟའ་བ་བྱ་དེ་སྤོང་།
འདི་ནི་མ་བསླངས་མི་སློག་པའི། བདག་ཅག་ལྷན་སྐྱེས་འཚོ་བ་ཡིན། 14

འགྲོ་བའི་བདག་པོ་བདག་གི་ཟས། རང་བཞིན་གྱིས་ནི་གྲུབ་པ་འདི།
མེད་ན་འཚོ་བ་གཏོང་བར་འགྱུར། གང་ཕྱིར་ཟས་ནི་སྲོག་གི་གཟུངས། 15

དུས་འདིར་ཟས་ནི་ཆད་པ་ལས། བདག་གི་འཚོ་བ་བཏང་གྱུར་ན།
བདག་གི་ཁྱིམ་ཐབ་བུ་དང་བཅས། རི་བ་ཆད་པས་ནམ་ཉམས་འགྱུར། 16

ཆོས་ལྡན་གང་གིས་གཅིག་ཉིད་ནི། བསྐྱངས་པས་གང་དུ་མང་པོ་དག།
ཆོས་ལས་ཉམས་པར་འགྱུར་ན་བྲེ། དེ་ལ་ཆོས་ནི་ཅི་ཞིག་འདྲ། 17

ཕྱུག་རོན་ལ་ནི་བྱམས་པ་ཡིས། བདག་ལ་ཞེ་སྡང་བྱ་མི་འོས།
གང་ཕྱིར་ཁྱོད་ཉིད་ལྷ་བུ་ནི། སྐྱུ་ལྡན་ཆགས་པས་འཇུག་པ་མིན། 18

ཇི་ལྟར་འདི་ཉིད་དེ་བཞིན་བདག། ཁྱེད་ལ་དེར་གཉིས་བྱེ་བྲག་ཅི།
དམ་པ་འབྱུང་པོ་ཀུན་ལ་སྙོམས། གཅིག་ལ་བརྩེ་བ་བྱེད་པ་མིན། 19

དེས་འདི་སྐབས་ཚེ་མི་བདག་གི། ལག་པ་གདུབ་བུའི་སྒྲ་ལྡན་པས།
འཇིགས་པར་མི་བྱ་ཞེས་སྒྲ་བཞིན། བྱ་ནི་ཕྲག་གིས་རབ་བསྐྱབས་དེ། 20

तस्मिन्नवसरे सत्त्वं जिज्ञासुः पाकशासनः।
मायया लुब्धकाकारः समभ्येत्याब्रवीन्नृपम् ॥ १३ ॥

देव मुञ्च चिरावाप्तं भक्ष्यं मम विहङ्गमम्।
इयं नः सहजा वृत्तिरनिवृत्तिरयाचिता ॥ १४ ॥

निसर्गसिद्धमेतन्मे भोजनं जगतीपते।
त्यजतो जीवितं नास्ति प्राणा ह्यशनधारणाः ॥ १५ ॥

क्षणेऽस्मिन्नशनच्छेदान्मयि संत्यक्तजीविते।
विनंक्ष्यति विलुप्ताशा सपुत्रा मे कुटुम्बिनी ॥ १६ ॥

एकसंरक्षणेनैव यः करोति बहुक्षयम्।
स धर्म्मो यत्र धर्म्मात्मन्नधर्म्मस्तत्र कीदृशः ॥ १७ ॥

मयि पारावतप्रीत्या न द्वेषं कर्त्तुमर्हसि।
न हि कारणरागेण प्रवर्त्तन्ते भवद्विधाः ॥ १८ ॥

यथैवायं तथैवाहं कोविशेषस्तवावयोः।
सर्व्वभूतसमाः सन्तः कृपां नैकत्र कुर्व्वते ॥ १९ ॥

इत्युक्ते तेन नृपतिर्लीनं कङ्कणराविणा।
न भेतव्यमितीवाह खगं प्रच्छाद्य पाणिना ॥ २० ॥

དེ་ནས་སེམས་ཅན་གཟིར་བ་ཀུན། ཡོངས་བསྐྱབ་དུས་ནི་བྲུས་པ་ཡི།
ཚར་སྤྲིན་འཇམ་པའི་སྒྲ་དབྱངས་ལྟར། ཟབ་པའི་ཚིག་གིས་རབ་སྨྲས་པ། 21

སྐད་ཅིག་ཙམ་པ་དོན་གཉེར་བས། མི་བཟད་སྡིག་ཆགས་གསོད་ར་བྱེད།
ལུས་ཅན་སྡིག་ལ་ཆགས་པ་ཡི། གདུང་བའི་ནོལ་འགྱུར་མཚུངས་པ་ཉིད། 22

གཞན་གྱི་སྡིག་ནི་ཕྲོགས་པ་ཡིས། གང་ཞིག་ཡོངས་སུ་འཚོ་བྱེད་པ།
དེ་ཡི་དགེ་ལེགས་ལྡོག་འགྱུར་དེ། གང་ཕྱིར་སྡིག་པའི་གདུང་བ་སྟེར། 23

དེ་ལྟ་ཉིད་དུ་མ་ཆད་པར། རང་འདོད་ཡང་དག་བཞེད་ཅིང་གུས།
བདག་གི་དོན་དུ་ཟས་གང་གང་། ཉེ་བར་བསྒྲུབས་པ་གླང་བར་མཛོད། 24

ཅེས་པ་རྒྱལ་པོའི་ཚིག་ཐོས་ནས། ཡོངས་སུ་བཞིན་ལོག་ཞུགས་རིངས་ཅན།
ལོངས་སྤྱོད་མཆོག་ལ་ཡིད་བྱུང་བའི། རྗེན་པས་ལན་ནི་རབ་སྨྲས་པ། 25

བདག་ཅག་ནགས་ན་གནས་རྣམས་ཀྱིས། རྒྱལ་པོའི་ལོངས་སྤྱོད་རོ་མི་ཤེས།
འབྲུ་ཟས་ཉམས་སུ་མ་མྱོང་བའི། རི་དགས་ལ་དུས་དཀའ་མ་ཡིན། 26

ཚོར་མའི་འཁྲི་ཤིང་འདབ་མེད་རྒྱ་ངན་དག་ལ་ཡོངས་འཇིགས་མ་ཐོབ་ནས།
ནགས་ཚལ་ལྗང་ཞིང་སྨྱུས་པར་ཛེ་མོ་རྒྱ་ངན་དག་གིས་ཅི་ཡང་སྐམས།
ཙུ་ད་རབ་སྨིན་དུག་བཞིན་བྲུ་རོག་གིས་ནི་ཟ་བར་མི་བྱེད་དེ།
རང་བཞིན་དག་གི་དབྱེ་བས་ངེས་པ་འདིར་ནི་ཀུན་ལ་བདེ་བ་སྟེར། 27

स ततः स्निग्धजीमूतघोषगम्भीरया[1] गिरा।
उवाच सर्व्वसत्त्वार्त्तिपरित्राणकृतक्षणः॥ २१ ॥

मा कृथाः क्षणतृष्णार्थी विषमं प्राणिवैशसम्।
तुल्यव्यथाविकारोऽयं प्राणस्नेहः शरीरिणाम्॥ २२ ॥

परप्राणापहारेण या वृत्तिः परिकल्प्यते।
निवृत्तिः श्रेयसां सा हि पापतापं प्रयच्छति॥ २३ ॥

अधुनैवापरिच्छिन्ननिजेच्छासम्मतादरम्।
गृह्यतामशनं यद्वयस्मदर्थमुपकल्पितम्॥ २४ ॥

श्रुत्वेति राजवचनं परिम्लानाननः श्वसन्।
वरोपभोगविमनाः प्रत्यभाषत लुब्धकः॥ २५ ॥

न वयं राजभोगानां रसज्ञा वनवासिनः।
न हि शष्पाशनाभ्यासा मोदन्ते मोदकैर्मृगाः॥ २६ ॥

अलब्ध्वा निष्पचां मरुपरिचितां कण्टकलतां
वने स्निग्धश्यामे किमपि करभः शुष्यति शुचा।
न काकः सत्पाकं कवलयति चूतं विषमिव
स्वभावानां भेदादुचितमिह सर्व्वस्य सुखदम्॥ २७ ॥

१ W I स्निग्धगम्भीरजीमूतघोषया।

རྒྱལ་པོ་འདོས་ཟམས་རིང་ཟློས་ནས། ནང་པར་སླར་ཡང་ཡང་བདག་ཅིང་།
གང་ཞིག་ཉིན་གཞན་རྙེད་དཀའ་མིན། དེ་དག་ཟློས་ན་བདེ་བ་སྐྱེད། 28

རྒྱ་ཆེ་རོ་ལྡན་ཁ་ཟས་ཡོངས་འདྲིས་རོ་དང་བྲལ་བ་ཟད་མི་བྱེད།
འཁོར་གྱི་ཚོམ་པ་མང་པོར་ལྷུང་རྣམས་གཅིག་བུ་ཉིད་དུ་གནས་མི་བྱེད།
ཤིང་རྟ་ཞོན་པ་ཀུན་ནས་འགྲོ་བའི་དུས་ན་ཤིན་ཏུ་སྔ་ངན་བྱེད།
དོན་ཐོབ་ཉམས་ན་མི་བཟད་ཉོན་མོངས་ཚུབ་མོར་ཤིན་ཏུ་གདུང་བར་བྱེད། 29

ལྷ་གཅིག་རྒྱལ་པོ་ལ་འདོས་ཟམས། ཁྱོད་ཀྱི་སྨན་གྱིས་གཟིགས་རྣམས་ལ།
རྟག་ཏུ་རྙེད་དཀའ་མིན་མོད་ཀྱང་། སྐྱེ་བར་སྐྱོན་མེད་བདག་མི་དགའ། 30

རྗེན་པས་མཐོན་པར་བཤད་པའི་ཤ། བདག་ཅག་རྣམས་ཀྱི་སྲོག་ལྟར་སྐྱོང་།
དེས་ན་རང་ལུས་རབ་ཆོད་ལ། བྱ་ཡི་ཉིས་འགྱུར་སྦྱིན་པར་མཛོད། 31

མི་བདག་བསམ་པ་འཁྲུགས་པ་ཡིས། ཚིག་དེ་ཐོས་ནས་འཕྲལ་ལ་ནི།
དགའ་བས་སྤྱན་གྱི་ཆུ་སྐྱེས་དག། རབ་ཏུ་ཕྱེས་པས་དེ་ལ་སྨྲས། 32

བྱ་དང་ཁྱོད་ཀྱི་སྲོག་དག་ནི། བསྲུང་སླད་མཚུངས་པའི་ཐེ་ཚོམ་ལ།
བློ་བཟང་ཁྱོད་ཀྱི་ཐབས་འདི་ནི། གསལ་བར་བདག་ལ་ཉེ་བར་བསྟན། 33

གཉིས་ཀའི་སྲོག་ལ་ཐེ་ཚོམ་གྱིས། ཁྲིགས་ལ་ཞེན་པས་འཁྲུགས་གྱུར་པ།
བདག་གི་ཡིད་ནི་གྲོགས་ཀྱིས་བཞིན། ཁྱོད་ཉིད་ཀྱིས་ནི་བརྟན་པར་བྱས། 34

राजार्हभोगं भुक्ताद्य प्रातर्भोक्तास्मि किं पुनः ।
तद्भुक्तं सुखमाधत्ते यदन्येषुर्न दुर्लभम् ॥ २८ ॥

रसोदाराहारैर्नं हि परिचितोऽश्नाति विरसं
न तिष्ठत्येकाकी बहुपरिजनारम्भपतितः ।
रथारूढः पद्भ्यां गमनसमये शोचतितरा
मवाप्तार्थभ्रंशः कषति[1] विषमक्लेशपरुषः ॥ २९ ॥

देव त्वद्दृष्टिदृष्टानां सततं नैव दुर्लभम् ।
राजार्हभोजनं किन्तु जन्मापूर्व्वं न मे प्रियम् ॥ ३० ॥

मृगयाभिहतं मांसमस्माकं जीवितायते ।
तत् स्वदेहसमुत्कृत्तं खगद्विगुणमर्प्यताम् ॥ ३१ ॥

चिन्ताविषण्णः श्रुत्वैतत् वचनं सहसा नृपः ।
प्रहर्षोत्फुल्लनयनाम्भोरुहस्तमभाषत ॥ ३२ ॥

खगस्य तव च प्राणरक्षायै तुल्यसंशये ।
ममोपदिष्टः स्पष्टोऽयमुपायः सुधिया त्वया ॥ ३३ ॥

उभयप्राणसन्देहदोलारोहणविह्वलम् ।
त्वयैव धृतिमानीतं वयस्येनेव मे मनः ॥ ३४ ॥

---

१ W1 कषति ।

ཁྲོད་ཀྱི་མིག་ཞགས་ཀྱིས་བཅིངས་པའི། བྱ་འདི་རབ་ཏུ་གཏང་བར་མཛོད།
ད་ལྟ་ཉིད་དུ་བདག་གིས་ཤིས། རི་ཞིག་སྲོག་གི་གཟུངས་ཐག་མཛོད། 35

རྒྱལ་པོ་དམ་བཅས་བདེན་པ་ཡིས། སྙིང་རྗེ་ལས་ནི་འདི་བཟློད་ཅོ།
དུག་ལྡན་མདའ་ཡིས་ཕུག་པ་བཞིན། བློན་པོ་རྣམས་ནི་རྨོངས་པར་གྱུར། 36

སྦྱིན་པའི་སྐབས་སུ་ཕན་མི་ཕན། གྲོགས་ཀྱིས་བདག་ལ་བཟློད་མི་བྱ།
ཞེས་པ་དེ་ཡི་དམ་ཚིག་གིས། ལུས་ནི་གཏོང་བར་ངེས་པར་གྱུར། 37

དེ་ནས་མི་བདག་གིས་སྨྲས་པ། གང་ཞིག་བདག་གི་ལུས་ལ་ཤ།
བཅད་ནས་སྲང་ལ་འདེགས་བྱེད་པ། དེ་ལ་ནོར་ནི་རབ་ཏུ་སྦྱིན། 38

དེ་ནས་རྒྱལ་པོ་གསེར་གྱི་ཆར། འབེབས་པས་བོས་པའི་སྐྱེ་བོ་རྣམས།
ངན་པའི་ལས་ཀྱི་བློ་སྨྱུས་ཕྱིན། ནོ་བ་བསྒྲིབས་ཤིང་སོང་བར་གྱུར། 39

གདུག་པའི་བློ་ཞེས་བྱ་བ་གཅིག། སེར་སྣའི་མིག་ནི་སེར་པོ་ཡིས།
གསེར་དག་བླངས་ནས་གདུག་པ་ཡི། ལས་ལ་ཆས་སུ་ཞུགས་པར་གྱུར། 40

གདུག་པ་ལས་ནི་སོག་ལེ་བཞིན། དྲང་པོ་གཅོད་ལ་མཁས་གྱུར་ཅིང་།
རང་བཞིན་གྱིས་ནི་འཁྲུག་པ་ཡི། གདུག་པའི་བདག་ཉིད་ཅི་མི་བྱེད། 41

त्वद्दृष्टिपाशबद्धोऽयं विहगः प्रविमुच्यताम् ।
मन्मांसैः क्रियतां तावत् सम्प्रति प्राणधारणम् ॥ ३५ ॥

राज्ञा सत्यप्रतिज्ञेन कारुण्यादित्युदीरिते ।
अमात्या मुमुहुर्विद्धा विषदिग्धैः शरैरिव ॥ ३६ ॥

न दानावसरे वाच्यं सचिवैर्मे हिताहितम् ।
इत्यभूत् समयस्तस्य शरीरत्यागनिश्चयः ॥ ३७ ॥

अथाब्रवीन्नरपतिस्तस्मै वित्तं प्रयच्छत ।
तुला[१]मारोपयति मे मांसमुत्कृत्य यस्तनोः ॥ ३८ ॥

हिरण्यवर्षिणा राज्ञा समाहूतास्ततो जनाः[२] ।
कुकर्मसंकुणितधियः पिधाय श्रवणौ ययुः ॥ ३९ ॥

एकस्तु दारुणमतिः नाम्ना कपिलपिङ्गलः ।
अभूत्कणकमादाय सन्नद्धः क्रूरकर्मणि ॥ ४० ॥

सरलच्छेददक्षाणां वक्राणाञ्च[३] निसर्गतः ।
क्रकचानामिव क्रौर्य्यात् किमकृत्यं दुरात्मनाम् ॥ ४१ ॥

---

१ All the MSS. तुल्यम् । २ W1 द्विजाः ।
३ All the MSS. चक्राणाञ्च ।

གང་གི་མཚོན་གྱིས་མི་ནུས་དེ་དག་ཀུལ་ཀའི་ཚིག་གིས་འཇོམས་པར་བྱེད།
གང་ཞིག་བཟློད་པར་མི་ནུས་ཅི་ཡང་དེ་དག་འཕྲུལ་ལ་སྒྲུབ་པར་བྱེད།
གང་ཞིག་བྱ་བར་མི་ནུས་དེ་དག་ཀྱང་ནི་ཡིད་ཀྱིས་སེམས་པར་བྱེད།
མ་བརྙམས་གླང་པོ་དག་གིས་སྤྱོད་པས་ངོ་མཚར་ཐམས་ཅད་གྱིས་པར་བྱེད། 42

དེ་ནས་དེ་ཡིས་ཕྱུག་ནོར་ནི། སྐྱང་ལ་གཞལ་ནས་ས་བདག་གིས།
ཁྲིན་པ་གཡས་པའི་ཤ་དག་ནི། རབ་བཅད་དེ་དང་མཚུངས་པར་བཀོད། 43

དེ་ནས་ས་ཡི་བདག་པོ་ཡི། ཁྲག་ཐིགས་དང་པོ་རིག་པ་ཡི།
འཁྲུགས་པ་བཞིན་དུ་ས་གཞི་ནི། ཡུན་རིང་ནོམ་པར་གཡོས་པར་གྱུར། 44

དེ་ནས་ཕྱུག་ནོར་ལྷི་བ་དང་། ཤ་ནི་ཡང་བ་ཉིད་གྱུར་ཚེ།
ཤ་ནི་གཞན་དག་རབ་ཚོད་ལ། ཁྲིན་ཞེས་ས་ཡི་བདག་པོས་སྨྲས། 45

བརླ་དང་དཔུང་པའི་ཤ་བཅད་ཀྱང་། བྱ་དང་མཚུངས་པ་ཉིད་མ་གྱུར།
འཇིག་རྟེན་གྱི་ནི་ཐེ་ཚོམ་དང་། མཚུངས་པའི་སྐྱང་རེར་མི་བདག་བཞུགས། 46

མི་བདག་རྒྱུ་གྱིས་ལྷག་མའི་ལུས། རང་ཉིད་སྐྱང་ལ་འཛེགས་པའི་ཚེ།
དེ་ཡི་གདོང་བ་བཟུང་དཀའ་བས། ཡིད་བྱུང་གྲགས་པ་ཕྱོགས་མཚམས་སོང་། 47

དེ་ཡི་དུས་ནས་ཡི་བདག་པོ་དག་གི་བརྟན་པ་འདི།
ཉམས་པ་མེད་པས་ཡ་མཚན་གྱུར་པའི་ལྷ་ཡི་བུ་མོ་རྣམས།
གཙུག་ཕུད་འཕྲེང་བར་འོས་པའི་པདྨ་ཡོངས་གང་ལག་པ་ཡིས།
དེ་ཡི་སྤྱོད་ཚུལ་དག་ལ་མཆོད་པའི་གུས་པ་ཅི་ཡང་བྱུང་། 48

न शस्त्रैः शक्यं यद्विदलयति तत् केलिवचसा
न शक्यं यद्वक्तुं किमपि कुरुते तच्च सहसा।
न शक्यं कर्त्तुं यत्तदपि कलयत्येव मनसा
खलः सर्व्वाश्चर्य्यं किरति चरितैरप्रतिहतः॥ ४२॥

स पारावतमारोप्य तुलामथ महीपतेः।
दक्षिणोरुसमुत्कृत्तं मांसं तत्तुल्यमादधे॥ ४३॥

प्रथमैरथ भूभर्त्तुः स्पृष्टा रुधिरविन्दुभिः।
विघूर्णमाना सुचिरं विह्वलेवाभवन्मही॥ ४४॥

पारावतेऽथ गुरुतां मांसे च लघुतां गते।
दीयतामन्यदुत्कृत्य मांसमित्याह भूपतिः॥ ४५॥

कृत्तोरुभुजमांसेऽपि न प्राप्ते खगतुल्यताम्।
त्रैलोक्यसंशयतुलामारुरोह तुलां नृपः॥ ४६॥

नृपतौ स्वयमारूढ़े स्नायुशेषतनौ तुलाम्।
तत्त्यागदुर्ग्रहोद्दिग्ना ययौ कीर्त्तिर्दिगन्तरम्॥ ४७॥

तस्मिन् क्षणे क्षितिपतेरपरिक्षतेन
धैर्य्येण विस्मयमयस्त्रिदशाङ्गनानाम्।
धम्मिल्लमाल्यपरिपूरितपाणिपद्मः
पूजादरः किमपि तच्चरिते बभूव॥ ४८॥

ཉམས་འགྱུར་མེད་པར་སྲ་ཡི་བདག། སྦྱང་ལ་འཇིགས་པ་མགྲོན་གྱུར་ནས།
སྐྱེས་བུ་གདུག་པ་བྱེད་པ་པོ། སྐྱག་བཅས་དེ་ཡིས་དེ་ལ་དྲིས། 49

ལུས་ཀྱི་སྨིན་པ་འདི་ཡིས་ནི། ཁྱོད་ནི་ཅི་བཞིན་ཡོངས་མི་ཤེས།
གང་ཕྱིར་ལུས་ཅན་རྗེད་པ་ཀུན། ཡང་དག་རྫོམ་པ་ལུས་ཀྱི་དོན། 50

གལ་ཏེ་ལུས་ནི་གཏང་ལ་སེམས། ཉམས་པ་མེད་དམ་བདེན་པར་སྨྲོས།
ཞེས་སྨྲས་དེ་ལ་རྒྱལ་པོ་ནི། བཞིན་འཛུམ་ལྡན་པས་རབ་སྨྲས་པ། 51

འཇིག་རྟེན་འདི་ན་ཐོབ་བྱ་ནི། བདག་ལ་ཅི་ཡང་མེད་མོད་ཀྱི།
འགྲོ་བ་ཀུན་ལ་ཕན་པའི་སླད། བླ་མེད་རྫོགས་པའི་བྱང་ཆུབ་འདོད། 52

གལ་ཏེ་བདག་གི་སེམས་འདི་ནི། ཉམས་པ་མེད་ན་བདེན་པ་དེས།
ལུས་ནི་ཡོངས་སུ་མ་ཉམས་ཤིང་། རང་བཞིན་རྫོགས་པ་ཉིད་གྱུར་ཅིག། 53

ཅེས་པ་བརྗོད་པ་ཙམ་ཉིད་ཀྱིས། ས་བདག་བདེན་པའི་ངང་ཚུལ་གྱིས།
ལུས་ཀྱི་མི་ནི་རབ་གསོས་ཏེ། མ་ཉམས་ཟླ་བ་ལྟར་མཛེས་གྱུར། 54

དེ་ནས་ཕྱུག་རོན་ཛོན་པ་དག། སོང་ཞིང་ས་སྐྱོང་འོད་ལྡན་ནི།
ཤར་ཚེ་སྨྲ་བ་ཆེན་པོ་དང་། རབ་གསལ་འབྱོར་པ་ལྡན་པར་གྱུར། 55

निर्विकारं समालोक्य तुलारूढं महीपतिम्।
क्रूरकारी स पप्रच्छ पुरुषस्तं ससाध्वसः ॥ ४९ ॥

अनेन देहदानेन न जाने किं तवेप्सितम्।
सर्व्वलाभसमारम्भाः शरीरार्था हि देहिनाम् ॥ ५० ॥

सत्यं ब्रूहि तनुत्यागे चित्तं यदि न खण्डितम्।
इति ब्रुवाणं तं राजा बभाषे सस्मिताननः ॥ ५१ ॥

न प्राप्यमस्ति मे किञ्चिल्लोकेऽस्मिन् किन्त्वनुत्तराम्।
हिताय सर्व्वजगतां सम्यक्संबोधिमर्थये ॥ ५२ ॥

अखण्डितमिदं चित्तं यदि सत्येन तेन मे।
अस्तु प्रकृतिमापन्नं शरीरमपरिक्षतम् ॥ ५३ ॥

इत्युदीरितमात्रेण सत्यशीलस्य भूपतेः।
अक्षीबचन्द्ररुचिरं रूढव्रणमभूद्वपुः ॥ ५४ ॥

ततः पारावते याते लुब्धके च महोत्सवः।
भूपालो भास्वदुदये प्रकाशविभवोऽभवत् ॥ ५५ ॥

གང་ཞིག་ངེས་པར་ས་ཡི་བདག་པོ་ཐམས་ཅད་སྐྱེར་གྱུར་པ།
དེ་ཉིད་ང་ཡིན་སྐྱེས་བུ་སེར་སྣ་དེ་ཡང་ལྷས་བྱིན་ནོ།
དེ་ཡི་སྔོན་བྱུང་ཡང་དག་དྲན་ནས་བདག་གིས་འཛུམ་པ་སྨྲོས།
ཞེས་པ་སྟོན་པ་ལས་ཐོས་འཆི་མེད་བདག་པོ་དགའ་བར་གྱུར། 56

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཐམས་ཅད་སྐྱེར་བའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙོ་ལྔ་པའོ།།

सर्व्वन्ददः क्षितिपतिः किल यो बभूव
सोऽहं पिशङ्गपुरुषः स च देवदत्तः।
तद्वृत्तसंस्मरणतः प्रसृतस्मितोऽहं
श्रुत्वेति शास्तुरमराधिपतिर्ननन्द ॥ ५६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां सर्व्वन्ददावदानं नाम पञ्चपञ्चाशत्तमः पल्लवः ॥

CHAPTER LVI.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་དྲུག་པ།

ཀླུ་བ་གླང་སྐྱོང་བདུལ་བའི་རྟོགས་བརྗོད་དེ།

གང་དག་མཐོང་བས་ཞེ་སྡང་དུག་གི་ནི། ཚ་བ་རབ་ཏུ་ཞི་བ་ཉིད་གྱུར་ཅིང་།
བདུད་རྩིའི་རོ་བསིལ་སྐྱེ་བོ་དམ་པ་ཡི། ཀླུ་བ་དེ་དག་སུ་ཡི་ཕྱག་འོས་མིན། 1

གནོད་སྦྱིན་ཁ་ཛོན་དག་གི་གནས། དེ་ལས་སྣང་བ་མིན་གྱུར་ཏེ།
གྲོང་ཁྱེར་ཞིང་ག་མར་དུ་ནར། སྐད་ཅིག་གིས་ནི་བཅོམ་ལྡན་བྱོན། 2

དེར་ནི་ས་བདག་ཚངས་བྱིན་གྱིས། དཔལ་བ་ཡི་ནི་མཆོད་པ་བྱས།
དེ་ཡིས་ཡང་དག་རྗེས་མཐུན་པར། སྐལ་ལྡན་རྣམས་ལ་རྗེས་བསྟན་མཛད། 3

དེར་ནི་གྲོང་པ་རྣམས་འོངས་ཏེ། གྱད་པ་ཀུན་དུ་ལུས་ཅན་རྣམས།
ཉམས་པར་ལྷུང་ལ་སྐྱོབ་མཛད་པའི། བཅོམ་ལྡན་འདས་ལ་རབ་གསོལ་པ། 4

གྲོང་ཁྱེར་མཐའ་ན་བཅོམ་ལྡན་འདས། རྗོ་བ་ཡི་ནི་རི་ཞིག་ཡོད།
དེ་ན་ཀླུ་ནི་བ་གླང་སྐྱོང་། དྲག་པོ་བཟོད་པར་དཀའ་བ་གནས། 5

དེ་ནི་ཕྲུགས་དང་སྐྱེ་བོ་དང་། འགྲོ་རྣམས་ཀུན་གྱི་རྡོ་རྗེ་ཆེ།
ཕུན་སུམ་ཚོགས་རྣམས་དངོས་མེད་སྣང་། ཅི་ཡིས་ཉམས་སླུལ་རིག་མ་གྱུར། 6

षट्पञ्चाशत्तमः पल्लवः ।

गोपालनागदमनावदानम् ।

सन्दर्शनेन येषां द्वेषविषोष्मा प्रशान्तिमुपयाति ।
अमृतरसशीतलास्ते कस्य न सुजनेन्दवो वन्द्याः ॥ १ ॥

धारामुखस्य यक्षस्य स्थानादन्तर्हितस्ततः ।
क्षणादवाप भगवान्नगरं हिङ्गुमर्द्दनम् ॥ २ ॥

विनयात् पूजितस्तत्र ब्रह्मदत्तेन भूभुजा ।
तत्संसदि क्षणं चक्रे धन्यानामनुशासनम् ॥ ३ ॥

तत्र पौराः समभ्येत्य भगवन्तं व्यजिज्ञपुः ।
सर्व्वापद्विनिपातेषु त्रातारं सर्व्वदेहिनाम् ॥ ४ ॥

भगवन्नस्ति नगरस्यान्ते पाषाणपर्व्वतः ।
तत्र गोपालको नागः क्रूरो वसति दुःसहः ॥ ५ ॥

स पशूनां जनानाञ्च शस्यानाञ्च महाशनिः ।
सम्पन्नानामभावाय न विघ्नः केन निर्म्मितः ॥ ६ ॥

མ་དུལ་འདུལ་མཛད་མ་ཞི་བ། ཞི་མཛད་ཁྱོད་ཀྱི་བརྩེ་བ་ནི།
ཉེ་བར་འཚོ་བ་འདི་དག་ལ། བདག་ཅག་སྐྱབས་འཚོལ་ནམས་ཀྱི་སྐྱབས། 7

ཞེས་བརྗོད་དེ་དག་སོང་བའི་ཚེ། བཅོམ་ལྡན་སྐྱིང་རྗེའི་གཏེར་དག་ནི།
འདུས་པའི་དབུས་ལས་མི་སྣང་བར། རྫོ་བའི་ས་འཛིན་དག་ཏུ་གཤེགས། 8

དེ་ངོས་ཤིན་དུ་སྟུག་པོ་ན། འཇིགས་རུང་གདེངས་ཅན་ཁང་པ་ནི།
དུག་གི་དབུགས་ནམས་དག་གིས་རྩུ། སྔོན་པོར་གྱུས་བཞིན་དེ་ཡིས་མཐོང་། 9

རལ་གྲི་ཤུབས་མེད་གཡོ་བ་ཡི། མི་བཟང་པོ་རླབས་ཀྱིས་འཁྲུགས་ནགས།
དེ་ཡི་འགྲམ་དུ་བཅོམ་ལྡན་གྱིས། སྐྱིལ་ཀྲུང་བཅས་དེ་ཉེ་བར་བཞུགས། 10

མཉེས་ག་ཤིན་སྐྱུན་ནི་བདུད་རྩིའི་གཉེན། དང་བས་རབ་ཏུ་གཟིགས་པ་ཡིས།
དེ་ཡིས་ཟུར་བར་དུག་བཞིན་དུ། དུག་དང་བཅས་པ་དུག་མེད་ཐོབ། 11

སྐུ་ལུས་གསེར་འོད་མཐིང་ཁ་ཡི། རྩ་ལ་སྣང་བས་དེ་རབ་མཛེས།
མ་ར་ཀ་ཏ་ལྟར་མཛེས་པའི། མཐའ་ལ་ཉི་མ་འགྲོ་བ་བཞིན། 12

དེ་ཡི་སྣང་བས་ནམ་བཅོམ་པས། ཀླུ་ཡི་ཁང་པར་རབ་རིབ་ནམས།
འགྲོས་པར་བྱེད་པ་གཡོ་བ་ཡི། སྤྲུལ་གྱི་ཚོགས་དང་མཚུངས་པར་གྱུར། 13

ཀླུ་ཡི་རྒྱལ་པོས་དེ་མཐོང་ནས། མིག་ནི་ཁྲག་ལྟར་དམར་བ་ཡིས།
འཕྲལ་ལ་ནམ་མཁར་རབ་ཞུགས་དེ། གྲོང་ཁྱེར་སྨིན་གྱི་རང་བཞིན་བྱས། 14

अदान्तदमनस्यास्मिन्नशान्तशमनस्य ते।
उपसर्गे कृपास्माकं शरणं शरणैषिणाम्॥ ७॥

इत्युक्ता तेषु यातेषु भगवान् करुणानिधिः।
अन्तर्हितः सभामध्याद्ययौ पाषाणभूधरम्॥ ८॥

तटे विसङ्कटे तस्य भवनं भीमभोगिनः।
स ददर्श विषश्वासैरिव श्यामीकृतोदकम्॥ ९॥

वलन्निष्कोशनिस्त्रिंशविषमोर्मिवनाकुले।
तत्तीरे भगवान् बुद्धः पर्य्यङ्कं समुपाविशत्॥ १०॥

प्रसन्नालोकनसुधाबन्धुना स्निग्धचक्षुषा।
स निनायाशु सविषं विषं निर्विषतामिव॥ ११॥

नीलाम्बुविम्बिततनुः स बभौ कनकद्युतिः।
रविर्मरकतच्छायं गाहमान इवाम्बरम्॥ १२॥

तिमिरं नागभवने तत्प्रकाशविद्रावितम्।
पलायमानव्यालोलव्यालजालतुलां ययौ॥ १३॥

नागराजस्तमालोक्य रुधिरारुणलोचनः।
सहसाकाशमाविश्य चक्रे मेघमयं जगत्॥ १४॥

དེ་ཡི་ཁྲོ་བའི་མེ་ཡིས་ནི། དུ་བའི་ཚོགས་བཞིན་སྨུག་པོ་ལས།
རབ་འཕྲོས་གློག་གི་ལྕེ་ཚམས་ཀྱིས། ཕྱོགས་ཚམས་སྐྲག་པ་བཞིན་དུ་འདར། 15

སྲུས་པའི་སྤྲིན་ཚམས་དག་གི་སྒྲ། འཇིགས་པ་རྩོམ་པར་སྒྲོགས་བྱེད་པས།
སེ་འཛིན་ཚམས་ཀྱི་སྙིང་བཞིན་དུ། ཕྲུག་དང་ཁང་པ་ཞིག་པར་གྱུར། 16

དེ་ནས་རྡོ་ཆེན་ཚོགས་དཀྲིགས་ཆར། རི་འཕྲེང་མཐའ་དག་ཉེན་སོངས་ཞིང་།
བརྡུན་པ་ལྷུང་བྱེད་ཀློན་ཞིང་ནི། ཕྱེ་མར་བྱེད་པ་བབ་པར་གྱུར། 17

ལག་འགྲོ་གདུག་པས་རབ་སྤྲོས་པའི། ཆར་དེ་སྐྲུན་པས་གཟིགས་ཉིད་ན།
རླུང་བཞིན་གཡོ་བས་བསྐྱེད་པ་ཡིས། མེ་ཏོག་ཆར་པ་ཉིད་དུ་གྱུར། 18

དེར་ནི་རབ་གསལ་དྲི་མེད་ནགས་ཚལ་ཉེ་བར་བསླད་པ་མེད།
ལྡང་བ་སྨྲ་དབྱངས་ལེན་པའི་མེ་ཏོག་དང་ལྡན་མཐོང་གྱུར་ནས།
དགའ་བའི་འཛུམ་དཀྲིགས་དོ་ཤལ་ཁྲར་ལས་ངེས་པར་གྲོལ་གྱུར་པའི།
ནགས་ཀྱི་ལྷ་ཡི་གདུག་པའི་གདེངས་ཅན་དབང་པོ་དེ་ལ་སྨྲས། 19

ཀྱེ་ལགས་དུས་ཀྱི་སྤྲིན་དག་ཉམས་འགྱུར་དག་ནི་ཡོངས་སུ་ཐོབ།
ཁྱོད་ལྟ་བུ་ཉམས་འཇིགས་པའི་རླུང་གིས་བཅོམ་པར་གྱུར་པ་ན།
གང་གི་ཆེད་སྐབས་ཕྲུག་གི་རོལ་པས་སྐྱབས་སུ་འགྲོ་བྱེད་པ་རི།
གསེར་གྱི་རི་བོ་འདི་ལ་ཅི་ཡང་གཡོ་བ་མེད་པ་ཉིད། 20

क्रोधाग्निधूमनिवहैरिव तस्य घनोद्गमैः ।
विद्युज्जिह्वैरकम्पन्त दिशः सन्त्रासिता इव ॥ १५ ॥

गर्ज्जितैर्मत्तमेघानां प्रलयारम्भशंसिभिः ।
गुहागेहान्यभज्यन्त हृदयानीव भूभृताम् ॥ १६ ॥

ततः पिष्टद्रुमा वृष्टिः क्लिष्टाद्रिशकलावली ।
पपात पातितक्षतिः स्थूलोपलकुलाकुला ॥ १७ ॥

सा दुष्टभुजगोत्सृष्टा वृष्टिर्हृष्टैव तायिनः ।
ययौ बालानिलोल्लासलसत्कुसुमवर्षताम् ॥ १८ ॥

दृष्ट्वा प्रकाशविशदान्यनुपल्लवानि
भृङ्गोपगीतकुसुमानि वनानि तत्र ।
हर्षस्मितप्रसरनिर्जिततारहाराः
क्रूरं फणीन्द्रमवदन् वनदेवतास्तम् ॥ १९ ॥

भोः कालमेघ विकृतिं परिमुञ्च किञ्च
निष्कम्प एव कनकाचल एष यस्य ।
युष्मद्विधाः प्रलयमारुतभज्यमाना
लीलानितम्बकुहरं शरणं प्रयान्ति ॥ २० ॥

དེ་ནས་འཕྲལ་ལ་ཕྱོགས་པས་ནི། ཡོངས་སུ་ཟད་ཅིང་ཉམ་འགྱུར་བདང་།
ཐལ་མོ་སྦྱར་ནས་མངོན་ཕྱོགས་དེ། སྐུ་ཡིས་སྟོན་པ་ལ་ཕྱག་འཚལ། 21

བཅོམ་ལྡན་འདས་ནི་སྙིང་རྗེའི་གཏེར། བསྐལ་པའི་གནས་ངག་རབ་ཕྱིན་པས།
སྐྱབས་སུ་སོང་བར་གྱུར་བ་དེ། དགེ་བ་མཆོག་ལ་རྗེས་བཟུང་མཛད། 22

ཞབས་ལ་མགོ་ཡིས་གཏུགས་པ་དེ། གུས་པ་ཡིས་ནི་གསོལ་བཏབ་པ།
བཅོམ་ལྡན་སྐྱོལ་བས་རྟག་ཏུ་ནི། དེ་ལ་ཡང་དག་ཉེ་བར་མཛད། 23

གནས་སྐབས་དེར་ནི་དེ་ཉིད་དུ། གནོད་སྦྱིན་ལག་ན་རྡོ་རྗེ་དག།
ཞར་ལ་འོངས་པ་ཞི་བའི་སྐད། བཅོམ་ལྡན་འདས་ཀྱིས་རྗེས་བཟུང་མཛད། 24

དེ་ནས་འཇིག་རྟེན་གདུང་བ་མི་བཟད་ཉམ་ཐྲོག་སྟོན་པ་ནི།
ཉམ་ཀྱིས་བསྟོད་པའི་ཚིག་གིས་སྐབས་གསུམ་པ་ཡིས་མཆོད་གྱུར་པ།
སྟོན་གྱིས་སངས་རྒྱས་ཉམས་ཀྱི་ཞབས་པད་དག་དང་མཛའ་བ་ལས།
དག་པའི་རྗོ་བའི་གཞི་ལྡན་ནགས་ཚལ་གྱི་ཞིང་བསྙེན་པར་མཛད། 25

དེར་དེ་འཇོམ་དང་ལྡན་པ་ལས། ལྷ་ཡི་རྒྱལ་པོ་ལྷར་འོངས་པས།
འཇོམ་པའི་རྒྱུ་དྲིས་དེ་ལ་ནི། ཐམས་ཅད་མཁྱེན་པས་བཀའ་སྩལ་པ། 26

དག་བྱེད་དྲི་མ་མེད་པའི་རྒྱུ་ཡི་རྒྱུན་དང་ལྡན་གྱུར་ཅིང་།
ཁོན་མེད་སེམས་ཅན་སྐལ་བཟང་འཁོད་པ་དཀའ་ཐུབ་དག་གི་ནགས།
ཚོས་ནི་ལྷག་གནས་སྡོམ་བརྩོན་ཉམས་ཀྱི་ཡིད་ནི་དག་བྱེད་པ།
ཞི་བའི་གནས་འདི་དག་ཏུང་ཉིད་ཁོ་ནས་རོལ་བྱས་མིན། 27

ततः सद्यःपरिक्षीणमदः संत्यक्तविक्रियः ।
नागः शास्तारमभ्येत्य प्रणनाम कृताञ्जलिः ॥ २१ ॥

तस्य यातस्य शरणं भगवान् करुणानिधिः ।
शिक्षापदप्रदश्चक्रे कुशलाग्रमनुग्रहम् ॥ २२ ॥

प्रणयादर्थितस्तेन चरणालीनमौलिना ।
सततं तस्य भवने सन्निधिं विदधे जिनः ॥ २३ ॥

तस्मिन्नवसरे तत्र प्रसङ्गात्तस्य शान्तये ।
यक्षस्य चक्रे भगवान् वज्रपाणेरनुग्रहम् ॥ २४ ॥

लोकोपतापमसमं विनिवार्य्य शास्ता
विस्तारितस्तुतिपदस्त्रिदशार्च्यमानः ।
भेजे वनानि विहरन्नथ पूर्व्वबुद्ध-
पादाम्बुजप्रणयपूतशिलातलानि ॥ २५ ॥

तत्र सन्दर्शनात्तेन सुरराजेन सस्मितः ।
स्मितस्य कारणं पृष्टः सर्व्वज्ञस्तमभाषत ॥ २६ ॥

एतेषु पुण्यसलिलामलनिर्झरेषु
निर्व्वैरसत्त्वसुभगेषु तपोवनेषु ।
धर्म्माधिवासमुनिमानसमार्जनेषु
शान्तेः पदेषु नु[१] मयैव कृतोविहारः ॥ २७ ॥

---

१ All the MSS. न ।

སེང་གེའི་ཤུ་འོག་རི་དགས་ཕྲུག་གུ་ཀྱུ་བ་དབེན་བའི་ནགས་ཚལ་འདིར།
བགྱི་ཁྲིན་དཔལ་ལྡན་འཁོར་བ་འཇིག་དང་བདེ་གཤེགས་གསེར་ཐུབ་དེ་དང་ནི།
ཡང་དག་རྫོགས་པའི་སངས་རྒྱས་ཁྲི་མེད་གློ་ལྡན་ཐུབ་པ་འོད་སྲུངས་དེ།
མཐའ་དག་འཇིག་རྟེན་གདུང་བའི་སྨན་པ་ཉམས་ཀྱིས་འདི་ཉིད་དུ་གནས་མཛད། 28

དེ་ནས་དེ་སྐད་སྨྲས་དེས་གཟིགས་ཉིད་ཀྱི།
བསོད་ནམས་སྨིན་ལ་ཉེ་བར་འོངས་པ་ཡི།
རྗོན་པ་དག་ནི་སྐྱབས་སུ་སོང་བ་ལ།
བསླབ་པའི་གནས་འོས་ཞི་བ་བསྟན་པ་མཛད། 29

སྐལ་ལྡན་དགེ་ལ་ཡིད་ཆགས་རྗོན་པ་ནི།
བཅོམ་ལྡན་འདས་ཀྱིས་རྗེས་སུ་བཟུང་བ་ལས།
རེར་ནི་མཆོད་རྟེན་རི་དགས་བདག་པོ་དག།
དེས་གནས་དབུ་སྐྲ་སེན་མོས་མཚན་པ་བྱས། 30

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཀླུ་བ་ལང་སྐྱོང་བདུལ་བའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙ་དྲུག་པའོ།།

क्रकुच्छन्दः श्रीमान् कनकमुनिरन्यैव सुगतः
स सम्यक्संबुद्धः शमविमलधीः काश्यपमुनिः ।
विविक्तेऽस्मिन् सिंहीस्तनतलवलद्बालहरिणे
वने चक्रुः शक्राः स्थितिमखिललोकार्त्तिभिषजः ॥ २८ ॥

इति ब्रुवाणः समुपागतस्य
स पुण्यपाकादथ लुब्धकस्य ।
सन्दर्शनैरेव शमं दिदेश
शिक्षापदार्हं शरणं गतस्य ॥ २९ ॥

भाग्यवान् भगवतोह्यनुग्रहा-
ल्लुब्धकः कुशललुब्धमानसः ।
तत्प्रदिष्टनखकेशलाञ्छनं
तत्र चैत्यमकरोन्मृगाधिपम् ॥ ३० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां गोपालनागदमनं नाम षट्पञ्चाशत्तमः पल्लवः ॥

Chapter LVII.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་བདུན།

མཆོད་རྟེན་གྱི་རྟོགས་བརྗོད་ནི།

ཕྱོགས་ཀྱི་མཛེས་པའི་ནོ་རྒྱན་དང་། མཚུངས་པར་ཡོན་ཏན་དམ་པ་བཀོད།
གང་ཞིག་གྲགས་པའི་མཆོད་རྟེན་གྱིས། འགྲོ་མཛེས་དེ་དག་རྒྱལ་གྱུར་ཅིག། 1

དེ་ནས་དེར་ནི་བཅོམ་ལྡན་འདས། བརྒྱ་བྱིན་གུས་པས་གསོལ་བཏབ་པས།
སངས་རྒྱས་སྐུ་མའི་མཆོད་རྟེན་མཛད། རང་གི་མཆོད་རྟེན་བྱེད་དུ་བཅུག། 2

ལྷ་རྣམས་ཀྱིས་དེར་རིན་ཅན་གྱིས། རང་བཞིན་ཉི་འོད་བརྒྱ་ལྡན་བྱས།
འགྲོ་བའི་སྣང་བ་ཆེན་པོ་དང་། མཚུངས་པའི་སྐུད་པ་ག་ཤེར་སོང་། 3

དེར་ནི་དྲི་ཟ་མི་འམ་ཅི། མི་དང་ཀླུ་དང་ལྷ་རྣམས་ལ།
འདུལ་བའི་ཆོས་ཀྱི་མན་ངག་ནི། ཡང་དག་བསྟན་ནས་རྒྱལ་བ་གཤེགས། 4

རྫོ་བའི་རི་ལ་ལྷ་རྣམས་ཀྱིས། མཆོད་རྟེན་བཞི་ནི་བཀོད་པ་ལ།
བཅོམ་ལྡན་འདས་ཀྱི་ལྷུ་པ་ཡི། མཆོད་རྟེན་མཆོད་རྟེན་ལྷུ་དག་བཀོད། 5

དེ་ནས་བླ་ལོ་ཀཱ་ཞེས་པའི། ཡུལ་དུ་དེ་བཞིན་གཤེགས་པ་བྱོན།
ལུས་ངན་གྱིས་བཞིན་ཚོང་དཔོན་ནི། ལེགས་པར་རབ་སད་ཅེས་པས་མཆོད། 6

सप्तपञ्चाशत्तमः पल्लवः।

स्तूपावदानम्।

दिक्कान्ताश्रवणोत्तंसतुलारोपितसद्गुणाः।
ते जयन्ति जगद्येषां यशःस्तूपैर्विराजते[1] ॥ १ ॥

भगवानथ शक्रेण तत्र प्राणावनार्थितः।
पूर्व्वबुद्धकृतस्तूपे निजस्तूपमकारयत् ॥ २ ॥

कृते रत्नमये तस्मिन् देवैः सूर्य्यशतत्विषि।
जगाम जगतां क्वापि महामोहोपमं तमः ॥ ३ ॥

तत्र किन्नरगन्धर्व्वनरनागदिवौकसाम्।
धर्म्मोपदेशविनयं समादिश्य ययौ जिनः ॥ ४ ॥

पाषाणपर्व्वते देवैन्र्यस्ते स्तूपचतुष्टये।
भगवान् पञ्चमं स्तूपं पञ्चस्तूपैन्र्यवेशयत् ॥ ५ ॥

अथ वाखोष्ठनामानं देशं प्राप्तस्तथागतः।
श्रेष्ठिना सुप्रबुद्धेन कुवेरेणेव पूजितः ॥ ६ ॥

---

१ W_1 जगन्त्येषां यशःस्तूपो विराजते ॥ H and W_2 जगत्येषाम्।

གང་ཞིག་དེ་ནི་རྗེས་འབྲང་བཅས། །འདུལ་བའི་ཆོས་ནི་དེ་ལ་བསྟན། །
སྨོངས་པའི་གཉིད་སད་ལེགས་པར་ནི། །རབ་སད་རབ་སད་ཉིད་ཐོབ་གྱུར། ། 7

བཅོམ་ལྡན་འདས་ཀྱི་བཀའ་ལས་དེས། །རང་གི་བསོད་ནམས་བཞིན་མགྲོ་བ། །
བྲ་ལོ་ཀྐྲི་ཡ་ཞེས་པ་ཡིས། །མཆོད་རྟེན་རིན་ཅན་འབར་བ་བྱས། ། 8

དེ་ནས་དལ་གྱི་དེ་བཞིན་གཤེགས། །ཏམ་བ་ར་ཡི་གྲོང་དུ་བྱོན། །
གནོད་སྦྱིན་ཏམ་བ་ར་ཞེས་པ། །བསླབ་གནས་རབ་དུ་ཕྱིན་པས་བཏུལ། ། 9

གདུམ་པོའི་གྲོང་དུ་མངོན་ཕྱོགས་ཏེ། །གདུམ་མ་མ་ལི་ཀ་ཞེས་པ། །
སྦ་བདུན་དག་དང་ལྷན་ཅིག་ཉིད། །འདུལ་བ་ཡི་ནི་མགྲོ་བར་མཛད། ། 10

ལས་ཀྱི་ལྷག་མས་གདུམ་པོའི་རིགས། །ཐུབ་པས་སྲུན་བྱུང་དེ་དག་རྣམས། །
རྒྱལ་བ་མཐོང་ལས་པདྨ་ཡི། །འབྱུང་གནས་བཞིན་དུ་དྲི་མེད་གྱུར། ། 11

ཐ་ཤལ་སྐྱོན་གྱིས་སྲུན་བྱུང་སྐྱར་བ་དག་ཏུ་འོས་གྱུར་ཅིང་། །
སྡིག་པའི་ཉེ་བར་གདུང་བ་ཆེན་པོས་གདུངས་ཤིང་ཉིད་རྣམས་ལ། །
ཉམས་རྟོག་ངན་པ་དང་བྲལ་སྙིང་རྗེས་རབ་ཞུགས་དམ་པ་རྣམས། །
དམན་ལ་དམིགས་པའི་རྗེས་སུ་ཆགས་པས་ལྷག་པར་གྱུར་པ་ཡིན། ། 12

དེ་ནས་བདེ་གཤེགས་རྗེས་འབྲང་བཅས། །ཤྲཱ་ཊ་ལ་ཡི་གྲོང་ཁྱེར་བྱོན། །
དཔལ་ལྡན་ཁྲིམ་བདག་གྲུ་འཛིན་ཞེས། །གྲུ་ལ་ལེགས་པའི་གདམས་ངག་མཛད། ། 13

दिदेश धर्म्मविनयं तस्मै येन स सानुगः।
मोहनिद्राक्षये प्राप सुप्रबुद्धः प्रबुद्धताम् ॥ ७ ॥

स शासनाद्भगवतः पुण्यं निजमिवोन्नतम्।
वालोक्षीयाभिधं स्तूपं रत्नदीप्तं न्यवेशयत् ॥ ८ ॥

डम्बरग्राममासाद्य शनैरथ तथागतः।
विनीय डम्बरं नाम यक्षं शिक्षापदप्रदः[1] ॥ ९ ॥

चण्डालग्राममभ्येत्य चण्डालीं मल्लिकाभिधाम्।
सहितां सप्तभिः पुत्रैर्विनयोपनतां व्यधात् ॥ १० ॥

ते कर्म्मशेषसम्प्राप्तमातङ्गकुलदूषिताः।
पद्माकर इव प्रापुर्वैमल्यं जिनदर्शनात्[2] ॥ ११ ॥

अन्येषु दूषिततरेषु जुगुप्सितेषु
पापोपतापविपुलव्यसनातुरेषु।
सन्तः प्रवृत्तकरुणाः कुविकल्पहीना
दीनावलम्बनवशादधिकं[3] भवन्ति ॥ १२ ॥

अवाप्य पाटलग्रामं सानुगः सुगतस्ततः।
धर्म्यां गृहपतेश्चक्रे पोतलाख्यस्य सत्कथाम् ॥ १३ ॥

---

१ All the MSS. यक्षशिक्षापदप्रदः।
२ All the MSS. वैमल्यजिनदर्शनात्।
३ W 1 दीनावलम्बनवशात्।

བདེ་བར་གཤེགས་པས་རྗེས་བཟུང་བས། བསྐལ་པ་བཞི་གནས་ཐོབ་དྲི་མེད་དེས།
དེ་ཡི་དབུ་སྐྲ་སེན་ཆ་ཡིས། མཚན་པའི་རིན་ཆེན་མཆོད་རྟེན་བྱས། 14

དེ་ནི་བལྟར་འོངས་དབང་པོ་ལ། བཅོམ་ལྡན་འདས་ཀྱིས་རབ་གསུངས་པ།
རྒྱལ་པོ་མི་ལིན་དྲ་ཞེས་པས། ཡུལ་འདི་མཆོད་རྟེན་བྱེད་པར་འགྱུར། 15

དེ་ལྟར་གནས་དང་གནས་སུ་བཅོམ་ལྡན་བརྩེ་བས་བརྟན་པས་གཟིགས་པ་ཡིས།
མཐའ་དག་འཇིག་རྟེན་རྣམས་ཀྱི་མྱ་ངན་སྐྱོངས་དང་འཇིགས་པ་བཏང་བར་གྱུར།
མཆོད་རྟེན་མཐོན་པར་གསར་བྱས་སྐྱེབས་ན་གོར་བུའི་དྲི་ལ་ཆུང་སྒྲ་སྒྲོགས།
དང་དེར་ཚོགས་ཀྱི་རྩེད་འཛོ་དག་གིས་ས་གཞི་རབ་སྤྱོད་ལྡན་པར་གྱུར། 16

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མཆོད་རྟེན་གྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙ་བདུན་པའོ།།

शिक्षापदाप्तवैमल्यः सुगतानुग्रहेण सः ।
तत्केशनखलेशाङ्कं रत्नस्तूपमकारयत् ॥ १४ ॥

तत्र सन्दर्शनायातं भगवानिन्द्रमब्रवीत् ।
मिलिन्द्रो नाम राजास्मिन् देशे स्तूपं करिष्यति ॥ १५ ॥

इति भगवतः स्थाने स्थाने दयार्द्रविलोकना-
दभवदखिलो लोकः शोकप्रमोहभयोज्झितः ।
अभिनवकृतस्तूपोत्सङ्गक्वणन्मणिकिङ्किणी-
कुलकलकलक्रीडालोला बभूव च मेदिनी ॥ १६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां स्तूपावदानं नाम सप्तपञ्चाशत्तमः पल्लवः ॥

CHAPTER LVIII.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་བརྒྱད་པ།

བསོད་ནམས་སྟོབས་ཀྱི་རྟོགས་བརྗོད་དོ།

ཀློད་པའི་གདུང་བ་ཞི་བྱེད་གཟིགས་པ་རབ་ཏུ་དང་བའི་རོ་དག་གིས།
སྐྱེས་བུ་ནམས་ནི་ནད་དང་བྲལ་མཛད་སྤྱོད་པས་ཟིལ་མནན་འཕྲུགས་པའི་སྨན་པ་
གང་།
ངེས་པར་དགེ་བ་མཐའ་དག་བསྐྱེད་པའི་ནོར་འཛིན་གྱུར་པའི་བདུད་རྩི་དེ།
རྫོགས་པའི་སྙིང་རྗེ་ནང་དུ་འཛིན་པ་དེ་དག་མི་སྨད་ཕྱག་བྱར་འོས། 1

གྲོང་ཁྱེར་པདྨོ་ལྡན་པ་ན། བཙོམ་ལྡན་འདས་དང་བཅས་པ་ལ།
ལྷ་ཡི་རྒྱལ་པོས་འཛུམ་པའི་རྒྱུ། དྲིས་ནས་སླར་ཡང་རབ་གསུངས་པ། 2

དཔལ་ལྡན་བསོད་ནམས་སྟོབས་ཞེས་པའི། ས་ཡི་བདག་པོ་སྔོན་བྱུང་སྟེ།
གང་ཞིག་གྲོང་ཁྱེར་སྟོང་ཕྲག་ནི། བརྒྱད་ཅུ་ཡོངས་སུ་འཛིན་པར་གྱུར། 3

དེ་ཡི་རྒྱལ་པོའི་པོ་བྲང་ནི། བསོད་ནམས་ལྡན་ཞེས་བྱ་བ་སྟེ།
ཤེལ་གྱི་ནམ་པར་ཡིད་འོང་ཞིང་། མཚན་མོའི་བདག་པོའི་འོད་བཞིན་མཛེས། 4

སྐྱིད་ཚལ་གསར་པར་འགྲོ་བའི་སྐད། ནམ་ཞིག་ཤིང་རྟ་ནོར་པ་དེས།
ལམ་དུ་ཕན་པའི་ཟས་བྲལ་བས། ནད་ཀྱིས་གཟིར་ཞིང་འདུག་པ་མཐོང་། 5

अष्टपञ्चाशत्तमः पल्लवः ।

पुण्यबलावदानम् ।

अनिन्द्या वन्द्यास्ते सकलकुशलोत्पत्तिवसुधां
सुधां सिद्धामन्तर्दधति किल ये पूर्णकरुणाः ।
प्रसन्नैरापन्नव्यसनशमनालोकनरसैः
कृतारोग्याः पुंसां भवपरिभवक्षोभभिषजः ॥ १ ॥

नगर्यां पुष्कलावत्यां सस्मितः स्मितकारणम् ।
सुरराजेन भगवान् पृष्टः पुनरभाषत ॥ २ ॥

श्रीमान् पुण्यबलो नाम पुराभूत् पृथिवीपतिः ।
यस्याशीतिसहस्राणि नगरीणां परिग्रहाः ॥ ३ ॥

तस्य पुण्यवती नाम राजधानी व्यराजत ।
स्फटिकागाररुचिरा ज्योत्स्नेव रजनीपतेः ॥ ४ ॥

स कदाचिन्नवोद्यानयात्रायां रथमास्थितः ।
ददर्श पथ्यविरहात् पथि सीदन्तमातुरम् ॥ ५ ॥

རིང་པོའི་ནད་ཀྱིས་མནར་བ་ཡིས། ཡོངས་སུ་ཉམས་པ་དེ་མཐོང་ནས།
ཕྱོགས་མཚམས་མ་ལུས་གཉེན་པ་དེ། སྙིང་རྗེས་ཟིལ་མནན་གདུང་བར་གྱུར། 6

གཞན་གྱི་ཡོངས་གདུངས་མཐོང་གྱུར་ན། འགྲོ་ལ་འབོས་དེ་དམ་པ་ཡི།
མི་ཡོང་ཉམས་ནི་གདུང་འགྱུར་དེ། ཉི་མ་མེ་ཤེལ་རང་བཞིན་བཞིན། 7

དེ་ཡིས་གྲོང་ཁྱེར་ཐམས་ཅད་དང་། སྒོ་དང་སྲང་ཉམས་མཐའ་དག་ཏུ།
ནད་པ་ཉམས་ལ་ཟས་དང་སྨན། གནས་དང་མལ་སྟན་ལ་སོགས་བྱས། 8

དེ་ནས་དེ་དག་ཉམས་ཀྱི་སྨད། རིམ་གྲོ་པ་ནི་མཁས་པ་བསྐོས།
གང་ཕྱིར་དམ་པའི་རིམ་གྲོ་པ། ནད་གསོའི་ཡན་ལག་དང་པོ་ཡིན། 9

བཟོད་ལྡན་སྙིང་རྗེས་བརྟན་ཞིང་བཟོད། གསོ་བྱེད་འདོད་པ་དག་ལ་གནས།
མཛའ་ལས་བྲེ་ཚོམ་མི་བྱེད་པའི། རིམ་གྲོ་པ་ནི་རྙེད་པ་དཀའ། 10

དེ་ནས་རྒྱལ་པོས་རིམ་གྲོ་པ། དུལ་བ་ཉམས་ནི་ལེགས་བོས་ནས།
སྨྲས་པ་ཉིན་དང་མཚན་མོར་ནི། ནད་པ་ཉམས་ཀྱི་རིམ་གྲོ་མཛོད། 11

རྒྱལ་པོ་ལ་འོས་གནས་ཉམས་སུ། མལ་སྟན་མཆོག་སོགས་ཕུན་ཚོགས་བྱས།
རིན་ཅན་སྣམ་ལྷན་པ་སྟོ་ཅན། དྲི་མེད་རྩ་ལྷན་ནར་པའི་ཕྱིར། 12

སྨན་པ་དང་ནི་སྨན་དག་ཀྱང་། ཕུན་ཚོགས་ཤིན་ཏུ་ཆེ་བ་བསྒྲུབས།
ད་ནི་དེ་དག་བསོས་གྱུར་པ། ཁྱེད་ཀྱི་གཉེར་ཞེས་བདག་གི་བློ། 18

स तं दृष्ट्वा परिम्लानं दीर्घरोगेण दुर्गतम् ।
विव्यथे करुणाक्रान्तः क्रान्ताखिलदिगन्तरः ॥ ६ ॥

सन्तप्तं परमालोक्य सद्यःसंक्रान्तिदर्पणाः[1] ।
सन्तः सन्तापमायान्ति सूर्य्यकान्तमया इव ॥ ७ ॥

समस्तद्वाररथ्यासु सर्व्वेषु नगरेषु सः ।
रोगिणां भक्तभैषज्यशालाशय्याद्यकारयत् ॥ ८ ॥

आदिदेश ततस्तेभ्यः कुशलान् परिचारकान् ।
प्रथमं हि चिकित्साङ्गं व्याधेः सत्परिचारकः ॥ ९ ॥

करुणार्द्रः क्षमः क्षान्तश्चिकित्सकमते स्थितः ।
स्नेहादविचिकित्सश्च[2] दुर्लभः परिचारकः ॥ १० ॥

राजा ततः समाहूय नियतान् परिचारकान् ।
अवदत् क्रियतां रोगिपरिचर्य्या दिवानिशम् ॥ ११ ॥

राजार्हशालासु कृता वरशय्यादिकल्पना ।
रोगिणां रत्नसोपानाः पद्मिन्यश्चामलोदकाः ॥ १२ ॥

भिषग्भैषज्यसम्पत्तिर्विहिता च महीयसी ।
अधुना युष्मदायत्तं तत्स्वास्थ्यमिति मे मतिः ॥ १३ ॥

---

१ II सन्तप्तदर्पताः ।   २ H स्नेहादमलमूलेषु ।

འཇིག་རྟེན་འདིར་ནི་རིམ་གྲོ་པ་དང་བརྟེན་པའི་སྟོན་པ་ཆོས་ཀྱི་གཞན་དུ་མི་
ཉམས་ཀྱི།
ཡོངས་སུ་གདུང་བ་ཤིན་དུ་བསིལ་བ་ཡིས་ཀྱང་གང་བ་དག་ནི་བདེ་བའི་རྡོ་བ་ཡིས།
སྤྱོད་པ་བསིལ་བའི་རྒྱ་ཡིས་དང་ནི་ངལ་བ་ཡང་ཡང་རྒྱང་དུ་ཕན་ཟས་ཉེར་
བསྟབས་པས།
ཁྱོད་གསོས་འགྱུར་ཞེས་བསྟན་པའི་ཚིག་སྙན་ཀུ་རེའི་རིམ་པས་མི་དགའ་བ་
དག་ཞི་བར་བྱེད། 14

དེ་ཡི་སྐད་དུ་ཁྲིད་ཉམས་ཀྱིས། ནད་ཀྱིས་གདུངས་ཤིང་འགྲེལ་ཉམས་ལ།
ཡང་དང་ཡང་དུ་ཚིག་དག་གིས། དབུགས་དབྱུང་འདི་ནི་དྲན་པར་བྱས། 15

སྨན་པ་སྐྱོན་མེད་བདེ་གཤེགས་བཀའ་དྲིན་དང་།
ཆོས་ཀྱི་མན་ངག་དམ་པའི་སྨན་དག་ཀྱང་།
འཁོར་བ་རིང་པོའི་རིམས་ཀྱིས་བཀླམས་ཉམས་ཀྱི།
དབྱུང་གཉེན་ཞི་བའི་བཅུད་ལེན་དེ་དག་ཡིན། 16

མི་བདག་ནོར་གྱི་ཆར་འབེབས་དེས། དེ་དག་ཉམས་ལ་དེ་སྐད་བསྒྱུར།
ནད་པ་མ་ལུས་གསོས་བྱའི་སྐད། སོང་ནས་ཇི་སྐད་བརྗོད་བཞིན་བྱས། 17

དེ་ནས་ནང་གྲོལ་དེ་དག་ཉམས། དགེ་བ་འདོད་པས་དེ་ལ་ཡིད།
སོང་བ་ཉམས་ལ་བསྒྱུ་བའི་སྐད། མི་བདག་རང་ཉིད་ཀྱི་རོལ་བྱུང་། 18

सन्तापं शमयत्यतीव शिशिरैः शीतं सुखेनोष्मणा
तृष्णां शीतजलैर्मुहुर्मितहिताहारोपचारैः क्रमम्।
स्वस्थोऽसीत्यधृतिं प्रियेण वचसा केलिक्रमेणारतिं
लोकेऽस्मिन् परिचारकः स्थिरभिषग्धर्म्मः परस्मिन्नृणाम्॥१४॥

तस्मात् भवद्भिस्तत्तानां रोगयोगेन सीदताम्।
कार्य्या मुहुर्मुहुर्वाक्यैरियमाश्वासनस्मृतिः ॥ १५ ॥

वैद्योऽनवद्यः सुगतः प्रसादी
धर्म्मोपदेशः परमौषधञ्च।
संसारदीर्घज्वरशोषितानां
परायणं शान्तिरसायनं तत् ॥ १६ ॥

इत्यादिष्टा नृपतिना ते तेन वसुवर्षिणा।
गत्वा यथोचितं चक्रुः स्वास्थ्याय किल रोगिणाम् ॥ १७ ॥

ततः कुशलवादेन तेन तद्गतमानसान्।
व्याधिमुक्तान्नरपतिः स्वयं द्रष्टुं विनिर्ययौ ॥ १८ ॥

བརྒྱ་བྱིན་གྱིས་ཀྱང་དེ་ལ་ནི། གཉིས་འཐུང་དཀར་པོ་མཆེ་བ་ནི།
དྲག་ལྡན་གྱིས་བྲངས་ཤིང་དེ་དག། བསོད་ནམས་རབ་འབར་རྣམ་པར་སྤྲུལ། 19

རིན་ཅེན་གསེར་གྱི་མཚོ་སྐྱེས་རྣམས། རེག་ན་བདེ་བའི་རླུང་གིས་གཡོས།
ཐུང་བའི་ན་ཆུང་གླུ་ལེན་པའི། ལས་དུ་མཆོག་གི་པད་ལྡན་ཡང་། 20

རིན་ཅེན་མཚོ་སྐྱེས་དེ་དག་ལ། གནས་སོགས་བདུད་རྩིའི་ཚ་རྫོགས་པའི།
ལྷ་མོ་རྣམས་ཀྱི་རིང་པོ་ནས། མི་བདག་བྱོན་པ་བསྟན་པར་གྱུར། 21

སྙིང་ཕྱོགས་བདུད་རྩིའི་རྒྱ་མཚོ་དེའི། སྙིང་ཕྱོགས་ཞེས་འདོད་ལྷ་ཡི་བདག།
བདག་ཉིད་ལོང་བའི་གཟུགས་བྱས་ནས། དེ་ལ་མངོན་དུ་ཕྱོགས་དེ་གནས། 22

རྒྱལ་པོ་མིག་གིས་དམན་པ་བདག། སྐྱེ་བར་སྣང་བ་རྣམ་པར་སྤྲངས།
སེམས་ཅན་ཐམས་ཅད་ཡོངས་སྐྱོབ་པར། ཞུགས་པ་ཁྱོད་ཅན་ཉེ་བར་འོངས། 23

ཁྱོད་ཀྱི་མཐུ་ཡིས་ནད་པ་ནི། འདི་དག་ལེགས་པར་གསོས་གྱུར་ནས།
འོད་ལྡན་མཛེས་པས་ཁྱོད་ཀྱི་ནི། གྲགས་པ་སྟུ་ཙོར་སྒྲོག་ཅིང་རྒྱུ། 24

སྡུག་བསྔལ་བཀྲེན་དང་ལོང་བའི་གཉེན། ལྷ་ཡི་བདག་ནི་བསྐྱབ་པར་འོས།
བདག་ལ་མིག་ནི་གཡས་པ་དག། གལ་དེ་ཐོད་ན་གནང་བར་མཛོད། 25

དེས་འདི་བརྗོད་ཚེ་མི་བདག་ནི། རབ་དང་བཞིན་རས་མཛེས་པ་ཡི།
འགྲོ་རྣམས་ཡང་དག་བསྐྱལ་བའི་སྐད། རྫོགས་པའི་བྱང་ཆུབ་བསྒྲུབ་པའི་ཕྱིར། 26

शक्रस्त्वपरशक्रस्य तस्य पुण्यसमुज्ज्वलम् ।
रथं विनिर्म्ममे युक्तं षड्दन्तैः पाण्डुरैर्द्विपैः ॥ १९ ॥

सुखस्पर्शानिलालोलहेमरत्नसरोरुहाः ।
भृङ्गाङ्गनोपगीताश्च दिव्याः कमलिनीः पथि ॥ २० ॥

तेषु रत्नसरोजेषु स्थिता नृत्यकलाकुलाः ।
दूरान्नृपतिमायान्तं सुरनार्य्यः सिषेविरे ॥ २१ ॥

तस्य सत्त्वसुधासिन्धोः सत्त्वं ज्ञातुं मरुत्पतिः ।
कृत्वान्धरूपमात्मानमभ्येत्य तमभाषत ॥ २२ ॥

राजन्नयनहीनोऽहं जन्मालोकविवर्जितः ।
सर्व्वसत्त्वपरित्राणसन्नद्धं त्वामुपागतः ॥ २३ ॥

एते तव प्रभावेण रोगिणः स्वास्थ्यमागताः ।
त्वत्कीर्त्तिवादमुखराश्चरन्ति रुचिरत्विषः ॥ २४ ॥

त्रातुमर्हसि मां देव दुःखदीनान्धबान्धव ।
दक्षिणं नयनं मह्यं दीयतां यदि शक्यते ॥ २५ ॥

इत्युक्तस्तेन नृपतिः प्रसन्नवदनद्युतिः ।
सन्तारणाय जगतां सम्यक्सम्बोधिसिद्धये ॥ २६ ॥

སྨོན་ལམ་རབ་ཏུ་བཏབ་བྱས་ཏེ། མིག་ནི་མཆོག་གྱིས་རབ་ཕྱུངས་ནས།
བརྟན་པའི་གཏེར་གྱིས་དེ་ལ་བྱིན། ལྷ་ཚོམས་ཀུན་ཀྱིས་ནི་མེ་ཏོག་གཏོར། 27

དེ་ཡི་མེད་བྱུང་སྨིན་པ་ཡིས། ཡ་མཚན་ནས་བཞིན་ས་གཞི་ནི།
ཆུ་གཏེར་གཡོ་བའི་སྐྱེ་རིགས་ཅན། རི་དང་བཅས་པ་ས་ལུས་འདར། 28

མིག་གཅིག་གིས་ནི་སྣང་བ་དག། སྐྱེས་པ་དེ་མཐོང་ས་ཡི་བདག།
སྨིན་པའི་རོ་ལ་རབ་དགྱེས་པས། གཉིས་པ་སྨིན་པར་བརྩོན་པར་གྱུར། 29

དེ་ནས་ལྷ་ཡི་བདག་པོ་ནི། རང་གི་ལུས་སུ་ཡང་དག་གནས།
དེ་ཡི་མིག་ནི་བསོས་བྱས་ཏེ། སྙིང་སྟོབས་མཆོག་ཉིད་རབ་ཏུ་བསྔགས། 30

གང་ཞིག་སྦྱིན་ཚེ་རང་གི་ཡན་ལག་ལ་འང་།
ནམ་ཡང་ཆགས་པ་ཆུང་ངུ་སྐྱེ་མིན་པ།
ངེས་པར་སྙིང་སྟོབས་ཀྱི་མཚོ་ཀྱིས་དེ་ལ།
ནོར་ཞེས་བརྗོད་པའི་རྡུལ་ལ་རང་བློ་ཅི། 31

དེ་ཚེ་མི་བདག་བསོད་ནམས་སྟོབས་གྱུར་ཏེ།
དེ་ཉིད་སྦྱིན་པའི་རོ་ཡིས་བྱང་ཆུབ་ཐོབ།
དེ་ཡི་ངོ་མཚར་སྤྱོད་ཚུལ་དྲན་པས་ན།
དེ་ཡི་རང་བཞིན་ཉིད་ཐོབ་འཛུམ་པ་མཛད། 32

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བསོད་ནམས་སྟོབས་ཀྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་རྩ་བརྒྱད་པའོ།།

प्रणिधानं समाधाय शस्त्रेणोत्पाट्य लोचनम् ।
ददौ धैर्यनिधिस्तस्मै पुष्पैरापूरितः सुरैः ॥ २७ ॥

तस्यात्यद्भुतदानेन विस्मयादिव साचला ।
विचचालाखिला पृथ्वी विलोलार्णवमेखला ॥ २८ ॥

जातालोकं तमालोक्य नेत्रेणैकेन भूपतिः ।
अतिदानरसप्रीत्या द्वितीयं दातुमुद्ययौ ॥ २९ ॥

ततः सुरपतिस्तस्य समास्थाय निजं वपुः ।
स्वस्थं विधाय नयनं प्रशशंसातिसत्त्वताम् ॥ ३० ॥

दानक्षणे स्वावयवेऽपि यस्य
न जायते स्नेहलवः कदाचित् ।
का नाम तस्योर्जितसत्त्वसिन्धो-
र्धनाभिधाने रजसि स्वबुद्धिः ॥ ३१ ॥

स भूपतिः पुण्यबलोऽहमेव
तदाभवन्दानरसात्सबोधिः ।
आश्चर्यवृत्तस्मरणेन तस्य
जातस्मितस्तन्मयतामवाप्तः ॥ ३२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां पुण्यबलावदानं नामाष्टपञ्चाशत्तमः पल्लवः ॥

Chapter LIX.

ཡལ་འདབ་ལྔ་བཅུ་ཙ་དགུ་པ།

ཀུ་ཊ་ལའི་རྟོགས་བརྗོད་ནི།

ཤིན་ཏུ་རབ་གསལ་གྲགས་པའི་ཚོན་རིས་ཡོན་དན་རིན་ཅན་རྒྱན།
མ་ཉམས་སྤྲིན་པའི་མི་དོག་དང་ལྡན་བདེན་པའི་ཕྲུག་པ་ཕྲས།
གང་གི་དཔལ་ནི་ཚུལ་ཁྲིམས་གཙང་མའི་དུ་ཀུ་ལས་མཛེས་པ།
དེ་ཉིད་གཅིག་པུ་ལེགས་བྱས་ལ་འོས་འཁོར་ལོ་སྒྱུར་བ་ཡིན། 1

གྲོང་མཆོག་སྣ་ཊ་ལི་ཨི་བྲུ་ཞེས་པ།
ན་ཆུང་ས་གཞི་ཐིག་ལེ་ལྟར་གྱུར་པར།
ཉི་མའི་རིགས་ཀྱི་རྒྱན་གྱུར་གྲགས་པའི་གཏེར།
དཔལ་ལྡན་ས་བདག་མྱ་ངན་མེད་པ་བྱུང་། 2

དང་པོར་འདོད་ལྡན་དེ་འདོད་ཉེ་ཚིག་དང་།
དེ་ནས་རྗེན་པོ་གཏུམ་པོའི་ཉེར་སྤྱད་དང་།
ཕྱི་ནས་ཆོས་ནི་ཉེ་བར་འཛིན་པ་ཡིས།
དབེན་པ་སྨིན་པའི་ན་ཚོད་རབ་གྲགས་གྱུར། 3

ऊनषष्टितमः पल्लवः ।

कुणालावदानम् ।

एकः स एव सुकृतोचितचक्रवर्त्ती
सुव्यक्तकीर्त्तितिलका गुणरत्नभूषा ।
अम्लानदानकुसुमा कृतसत्यचर्च्चा
यस्यावभाति शुचिशीलदुकूलिनी श्रीः ॥ १ ॥

पुरोत्तमे पाटलिपुत्रनाम्नि
मह्हीयुवत्यास्तिलकायमाने ।
यशोनिधिः मौर्य्यकुलावतंशः
श्रीमानशोकः क्षितिपो बभूव ॥ २ ॥

पूर्व्वं स कामोपपदेन कामी
चण्डोपचारेण ततश्च तीक्ष्णः ।
धर्म्मप्रदानेन[१] जगाम पश्चा-
द्विवेकपाके वयसि प्रसिद्धिम् ॥ ३ ॥

---

१ H has an additional verse after the first S'loka :—
अशोकपुत्रो हिमराजनेत्रः कुणालनामालभदक्षिपातम् ।
चैत्यस्य नेत्रोत्पतनस्य कर्म्मात् भूयोऽलभन्नेत्रप्रढौकनेन ॥

སྒྱུ་ངན་མེད་དེ་རབ་དང་བསོད་ནམས་ཀྱིས།
ཉེ་བའི་ནགས་ཚལ་ས་གཞི་མཛེས་པས་བརྒྱན།
གྲོས་པར་གྱུར་ཚེ་དགེ་བའི་ཀྱུ་ཀུ་ཡིས།
འཇིག་རྟེན་སྒྱུ་ངན་མེད་ཉིད་ངེས་པར་འཛིན། 4

དེ་ཡི་བདེ་སྐྱིད་ལྷ་མོ་པདྨ་ལྡན།
ཕོ་བྲང་འཁོར་གྱི་མཛེས་མའི་གཙུག་གནས་པས།
ཀུན་སྒྲོ་བུ་ནི་བསོད་ནམས་དག་གིས་བསྐྱེད།
གདོང་བ་ཛེས་འབྲང་དཔལ་གྱི་ལེགས་བརྗོད་བཞིན། 5

གསེར་ལྟར་དག་པ་མི་ཡི་དབང་པོའི་བུ།
པད་རྫིང་དཔལ་གྱི་པདྨའི་འདབ་འདྲའི་སྐྱུར།
གསེར་རིའི་ངང་པ་ཀུ་ཎ་ལ་ཞེས་པའི།
མིག་མཚུངས་དེ་ནི་ཀུ་ཎ་ལ་ཞེས་གྱུར། 6

རིག་པ་བུ་མོའི་བདག་མཐོང་ཟླ་མ་མེད།
སྐྱུ་ཙོལ་འཁྲི་ཤིང་ཉམས་ཀྱི་དགའ་བའི་དཔྱིད།
གྲགས་པ་ཀུ་སུད་ལྡན་པའི་ལྷ་གྱིས་པ།
དེ་ནི་འཇིག་རྟེན་ཀུན་གྱི་མངོན་འདོད་གྱུར། 7

प्रसन्नपुण्योपवनस्थलीना-
मुच्छिन्नशोभाभरणायमाने ।
तस्मिन्नशोके कुशलप्ररोहै-
रशोकतामेव बभार लोकः ॥ ४ ॥

मूर्ध्नि स्थितान्तःपुरसुन्दरीणां
पद्मावती तस्य सुखाय देवी ।
सत्त्वोत्सवं पुत्रमसूत पुण्यै-
स्त्यागानुगा श्रीरिव साधुवादम् ॥ ५ ॥

नरेन्द्रसूनुः कनकावदातः
श्रीपद्मिनीपद्मपलाशनेत्रः ।
हिमाद्रिहंसस्य कुणालनाम्न-
स्तुल्येक्षणोऽभूत्स कुणालनामा ॥ ६ ॥

विद्यावधूनां विमलात्मदर्शः
शैलोत्सवः सर्वकलालतानाम् ।
स सर्वलोकाभिमतो बभूव
चन्द्रोदयः कीर्त्तिकुमुद्वतीनाम ॥ ७ ॥

ཀྱེ་སྐར་བདག་པོའི་ནང་གི་རི་དྭགས་བཞིན།
དེ་ཡི་མིག་ཡངས་མཚོ་སྐྱེས་ཟུང་དག་ནི།
གཡོ་ལྡན་སྨིན་མའི་ཁྲུང་བས་མདོག་དཀར་བ།
བལྟ་བས་མི་དབང་རབ་ཏུ་ངོམས་མ་གྱུར། 8

སྣ་ཚོགས་ཡོན་ཏན་རྒྱན་ལྡན་དེ་ལ་ནི།
མཐའ་དག་ཕྱོགས་དང་གླིང་གི་ས་ཡི་བདག
སྐལ་བཟང་ཁྱེངས་པས་རང་གི་བུ་མོ་དག
འདོད་པའི་སྒྲུ་དྲིག་འཁྲི་ཤིང་ལྟ་བུ་བྱིན། 9

སྐྱེ་བོ་རྫིས་ཆགས་སྐྱེད་པ་མཆོག་གི་གཟུགས།
དེ་ཡི་དགའ་མར་མིག་ཡངས་ཟླ་ཞལ་མ།
འདོད་པའི་དགའ་མ་སྐྱེ་བ་གཞན་ཐོབ་བཞིན།
གསེར་གྱི་འཕྲེང་ལྡན་མ་ཞེས་བྱ་བར་གྱུར། 10

དེ་ནས་ནམ་ཞིག་པ་ཡི་དབྱུང་གནས་པའི།
གཞོན་ནུ་དེ་མཐོང་དགེ་འདུན་གནས་བརྟན་གྱིས།
རྒྱལ་པོའི་འདོད་པས་རང་གི་གྲགས་པ་ཡི།
དབེན་གནས་གཙུག་ལག་ཁང་དུ་དལ་གྱིས་ཁྲིད། 11

ताराधिपोत्सङ्गमृगोपमस्य
तस्यायतं नेत्रसरोजयुग्मम् ।
सविभ्रमं भ्रूभ्रमराभिरामं
पश्यन्नरेन्द्रः प्रययौ न तृप्तिम् ॥ ८ ॥

नानागुणालङ्करणाय तस्मै
कन्दर्पमुक्तालतिकायमानाः ।
समस्तदिग्द्वीपधराधिनाथा
धन्याभिमानेन ददुः स्वकन्याः ॥ ९ ॥

तस्यायताक्षी दयिता बभूव
चन्द्रानना काञ्चनमालिकाख्या ।
जनानुरागोद्भवभव्यमूर्त्तें
र्जन्मान्तरस्थेव रतिः स्मरस्य ॥ १० ॥

ततः कदाचित् पितुरन्तिकस्थं
तं वीक्ष्य संघस्थविरः कुमारम् ।
स तेन राज्ञः सुयशोविहारे
विविक्तदेशं शनकैर्निनाय ॥ ११ ॥

གཞན་པོ་མཁན་པོ་མངོན་ཤེས་དྲུག་ལྡན་མཆོག།
སྙིང་རྗེའི་འབྱོར་ལྡན་ནོར་འབྱོར་ལྡན་པ་དེས།
དུས་ཀྱི་དེ་ཡི་མིག་དག་ཉམས་ཞིས་ནས།
མ་འོངས་སྡུག་བསྔལ་གདོན་སྐད་དེ་ལ་སྨྲས། 12

ཁྱོད་ཀྱི་སེམས་ནི་འབྱོར་པས་ཟིལ་མནན་ནས།
ལང་ཚོ་མི་རྟོག་མཆོད་དང་ལྡན་པའི་ཚོགས།
རོལ་པས་ཟླ་བའི་རིགས་འཛོམས་ལུས་ལ་ནི།
མཚན་མ་བྱུང་བར་གྱུར་འདི་བདག་གིས་མཐོང་། 13

མིག་ནི་རང་བཞིན་གྱིས་གཡོ་གཞན་པ་ཅི།
འདི་ལ་བདེ་བ་ཉེར་བསྐྱེད་གནས་པ་མེད།
འདི་ཡིས་དྲངས་པས་རང་གནས་རབ་ཉམས་དེ།
འདོད་པ་ཞེས་བརྗོད་ཁྲང་བུར་ལྷུང་བ་ཉིད། 14

ངེས་པར་མི་ཉམས་མིག་བཟང་ཡངས་པ་ནི།
ཨུད་པལ་སྔོན་པོའི་འདབ་མ་ལྟ་བུ་འདི།
ཆགས་པ་ལྡོས་འགྲོའི་སྦུག་པའི་མཚོ་ཉིད་དེ།
གང་གིས་མྱུར་དུ་དབང་པོ་ཡོངས་ངལ་བྱེད། 15

स तस्य कालेन विनाशमक्ष्णो-
र्ज्ञात्वा मनीषी षड्भिज्ञचर्य्यः ।
आगामिदुःखोद्धरणाय योगी
कारुण्ययोगी तमुवाच वृद्धः ॥ १२ ॥

इदं तवापातनिमित्तभूतं
पश्यामि चित्तं विभवाभिभूतम् ।
वयःसहायं कुसुमायुधस्य
वपुश्च लीलादलितेन्दुदर्पम् ॥ १३ ॥

जात्यैव चक्षुश्चपलं किमन्य-
दस्मिन्ननास्थैव सुखोपपत्तिः ।
एतेन दृष्टा स्वपथप्रनष्टाः
स्पृहाभिधाने कुहरे पतन्ति ॥ १४ ॥

इदं हि नीलोत्पलपल्लवाभं
विलोचनं नाम नृणां विशालम् ।
रागोरगच्छिद्रसमुद्गमेव
येनेन्द्रियाख्यासु परिस्रवन्ति ॥ १५ ॥

ཚུལ་ཁྲིམས་མཐུ་ལས་གང་དག་རྣམས་ཀྱི་སིག།
མཛེས་པའི་བདང་བས་ཁྱད་པར་དུ་ངོམས་ཤིང་།
ནམ་པར་གཡོ་བ་མིན་པ་དེ་དག་ཉིད།
སྙིང་སྟོབས་བརྟན་པ་དང་ལྡན་སྐལ་བ་བཟང་། 16

ཞེས་སོགས་དེ་ཡི་ཚིག་ནི་རབ་ཞི་བ།
ཉེ་བར་རྫོགས་པ་མི་བདག་བྲུས་གྲོས་ནས།
དེ་བཞིན་ཞེས་དེ་རབ་དང་ཡིད་ལ་བྲུས།
ཕྱག་འཚལ་ནས་ནི་རང་གི་གནས་སུ་སོང་། 17

དེ་ནས་བྱུང་བའི་ཚོགས་ནི་སླུ་ལེན་ཅིང་།
ཀིཾ་ཤུ་ཀ་དཔལ་ལི་ཁྲིས་གྱིས་པ་འདྲ།
ཁེངས་ལྡན་མ་ཡི་ཁེངས་བ་འཇོམས་ཆས་པས།
*སྟོན་གྱི་ཟླིས་སྐྱེས་གླང་པོ་ཅིག་འོངས་གྱུར། 18

སྐྱེད་ཚལ་འཁྲི་ཤིང་གསར་པའི་ཡལ་འདབ་དང་།
འཕྲལ་པའི་གདུང་བ་སྐྱོད་པའི་ཆ་ཤས་དག།
གསར་དུ་ཆགས་པས་རབ་བསྐྱེད་བཟོད་དཀའ་ཉིད།
འཕྲལ་ལ་ལྷན་ཅིག་ཉིད་དུ་གོས་པར་གྱུར། 19

* The translator has wrongly rendered the meaning of the word शरत् which siginfies सप्तपर्ण flower.

धन्यास्त एवासमसत्त्वधीराः
शीलप्रभावान्न भवन्ति येषाम्।
लावण्यपानेन विशेषतृष्णा-
विघूर्णमानानि विलोचनानि ॥ १६ ॥

इत्यादि तस्य प्रशमोपपन्न-
माकर्ण्य वाक्यं नरनाथसूनुः।
तथेति कृत्वा मनसि प्रपन्ने
कृतप्रणामः स्वपदं जगाम ॥ १७ ॥

अथाययौ भृङ्गगणोपगीतः
सिन्दूरपूरायितकिंशुकश्रीः।
मनस्विनीमानवधानुबन्धी
मधुः शरत्सौरभमत्तनागः ॥ १८ ॥

उद्यानवल्लीनवपल्लवानां
वियोगिनीतापविपल्लवानाम्।
बभूव वृद्धिः सहसा सहैव
प्रत्यग्ररागोद्गमदुःसहैव ॥ १९ ॥

ཙམ་པ་ཀ་འདབ་རླུང་གིས་བསྐྱོད་པ་ཡིས།
སྤྲིང་ཡིག་གིས་ནི་བྱམས་པ་སྐྱེད་བྱེད་ཅིང་།
འདོད་དང་ལྡན་ཅིག་དཔྱིད་ཀྱི་དང་མོ་ཡི།
མངོན་འགྱུར་གྱུལ་བྱེད་བདག་འཛོམས་ཕྱོགས་སུ་གྲགས། 20

མི་དགོག་རབ་གྲུས་དེ་དང་དེ་དག་ལས།
དཔྱིད་ཀྱི་གཅིན་ལ་མཆོག་ཏུ་ཕན་པ་ནི།
གྲགས་པའི་ཉམས་པ་བྱུང་བའི་སྨྲ་སྒྲོགས་པའི།
ས་ཧ་ཀཱ་ར་ཉིད་ཀྱིས་བྱས་པར་གྱུར། 21

དཔྱིད་ཀྱི་སྒྲོ་བའི་ཉམས་འཕྲུལ་དེ་ལ་ཡང་།
མི་ཡི་དབང་པོའི་བུ་དེ་དབེན་པར་ནི།
གནས་བརྟེན་གྱིས་ནི་མན་ངག་སེམས་པ་དག།
ས་སྐྱོང་བཙུན་མོ་སྐར་གྱུལ་བསྲུང་བས་མཐོང་། 22

མ་ཉམས་ཟླ་བའི་འོད་ལྡན་ཡངས་པའི་མིག།
ཕྲག་མཐོ་བྲུས་མོར་ལག་པས་སྦྲིབ་དེ་ལ།
མཛད་བས་བརྙན་པའི་ཟློ་ཡི་མངོན་ཕྱོགས་དེ།
མ་ཡི་རྩུད་མ་དེ་ཡིས་རབ་སྤྲས་པ། 23

वातेरितैश्चम्पकपत्त्रलेखैः
मैत्रीं समाह्वयतः स्मरेण।
स प्रपथे दिक्षु द्युतिप्रमाथी
चैत्रस्य जैत्रः प्रथमाभियोगः ॥ २० ॥

लसत्सु पुष्पेष्वपि तेषु तेषु
बभूव भूम्ना मधुबान्धवस्य।
भृङ्गध्वनैर्गीतयशःप्रकारः
कृतोपकारः सहकार एव ॥ २१ ॥

तस्मिन् वसन्तोत्सवविभ्रमेऽपि
विचिन्तयन्तं स्थविरोपदेशम्।
नरेन्द्रसूनुः विजने ददर्श
तं तिष्यरक्षा क्षितिपालपत्नी ॥ २२ ॥

अक्लीवचन्द्रद्युतिमायताक्षं
पीनांशमाजानुविलम्बबाहुम्।
अभ्येत्य तं स्नेहरसार्द्रचित्ता-
यवीयसी सा जननी जगाद ॥ २३ ॥

གཞོན་ནུ་མི་རྟོག་མདའ་ཅན་གསར་འཇུག་པ།
འཁོར་བའི་སྙིང་པོ་ཁྲོད་ཀྱི་སིག་གི་དཔལ།
ཁྲད་པར་མཛེས་པའི་ཚས་དང་ལྡན་པ་འདི།
འཇིག་རྟེན་དུ་ནི་སུ་ཡི་བརྟན་མི་འགྲོག། 24

ཅེས་བརྗོད་དེ་ཡིས་འཕྲུལ་ལ་ལག་གཉིས་ཀྱིས།
ངོ་ཚ་བདང་ནས་བརྟན་པ་དེ་ལ་འཁྱུད།
རང་གྱི་གྱོན་གྱི་ཁྲལ་ཁྲོལ་སྒྲ་ཅོར་གྱིས།
འདར་ཞིང་རྒྱུན་དུ་གློག་པར་བྱེད་པ་བཞིན། 25

གཞན་འདི་འང་རང་གི་མ་བཞིན་བདག་ལ་ནི།
དོག་དུ་མཉེས་ག་ཤིན་ཉིད་དག་སྐྱེད་པར་བྱེད།
ཅེས་བསམས་དོགས་མེད་བློ་ལྡན་དེ་ཡིས་དེའི།
ཀྱིང་པར་ཕྱག་བཙལ་རྒྱུར་སྤྲད་དུད་པར་གྱུར། 26

སྨུག་པོར་སྨོངས་དུས་གྱིགས་པས་འཕྲུར་གྱུར་ཅིང་།
ཆུ་སྲིན་མཚན་མ་ལྷུང་བས་རབ་བསྐྱོད་པའི།
བ་རླབས་ཅན་བཞིན་བྲུད་མེད་ཉམས་ལ་ནི།
རང་བཞིན་འགྲོས་ལ་འགོག་པ་ཙུང་ཟད་མེད། 27

कुमार पुष्पेषु नवावतारा
संसारसारः तव लोचनश्रीः।
धृतिं हरत्येव न कस्य लोके
विशेषतः पेशल एष वेशः ॥ २४ ॥

उक्तेति तं सा सहसा भुजाभ्या-
मुत्सृज्य लज्जां दृढमालिलिङ्ग।
प्रकम्पसिञ्जामुखरै[१] रसक्तं
निवार्यमाणाभरणैरिव स्वैः ॥ २५ ॥

पराप्यसौ मे जननी निजेव
वात्सल्यमाविष्कुरुते सदैव।
ध्यात्वेति निःशङ्कमतिः स तस्याः
पादप्रणामानतशेखरोऽभूत् ॥ २६ ॥

मदोद्धतानां घनमोहकाले
प्रक्षोभितानां मकराङ्कपातैः।
तरङ्गिणीनामिव नाङ्गनानां
श्वभ्रावपातेऽस्ति[२] मनाङ्निरोधः ॥ २७ ॥

१ H and W_2 सिञ्जा। २ W_2 स्वभ्रावपाते।

བབ་ཅོལ་ཅོལ་བ་ཉམས་པར་མ་བརླམས་པས།
སྨིག་པར་ལྷུང་ཆེ་དྲི་མས་འཛིགས་པ་བཞིན།
རྒྱལ་ཁྲིམས་གཙང་མས་ཉམས་པར་བདང་ཀྲུར་ཅིང་།
འདོད་པས་ཟིལ་མནན་དེ་ཡིས་དེ་ལ་སྨྲས། 28

བདག་གི་མཛོའི་གཞོན་ནུ་ཡང་ཆེ་མཚུངས།
ཁྱོད་ཀྱི་མ་ཡི་རྒྱན་མ་བདག་མ་ཡིན།
ཁྱོད་ཀྱི་འཁྲུད་པས་འགྲོགས་འོས་བདག་གི་ལུས།
སྐལ་བཟང་ཡོངས་སྤྱོད་འོས་འདི་སྦྱིན་བར་མཛོད། 29

དོན་དུ་གཉེར་བྲ་བྲུད་མེད་རང་ཉིད་ཀྱིས།
དོན་གཉེར་གང་དེ་ངོ་ཚ་མེད་ཉིད་དེ།
ཅི་བགྱིད་བཀའ་དྲིན་མཛོད་ཅིག་ཁྱོད་ལུས་དང་།
འགྲོགས་པ་ཡུན་རིང་བདག་གི་སྙིང་ལ་གཅགས། 30

ནུ་ངོས་དོ་ཤལ་འཁྲི་ཤིང་མངོན་དགའ་ཞིང་།
ཀེད་སྐབས་དཀྱིལ་འཁོར་ཁྲིལ་ཆུང་ལྡན་པ་སི།
བྲུད་མེད་སེན་མོ་འདེབས་པས་དབྱུལ་བ་ནི།
རབ་མཛེས་སྐལ་བཟང་མ་ནོར་ཁྱིངས་མི་འགྱུར། 31

सा तं बभाषे मदनाभिभूता
प्रगल्भसंरम्भविश‍ृङ्खलेन ।
पापावपाते शुचिना कलङ्क-
भीत्येव शीलेन विमुच्यमाना ॥ २८ ॥

प्रियोऽसि मे तुल्यवयाः कुमार
मातुः सपत्नी तव नास्मि माता ।
इयं त्वदालिङ्गनसङ्गयोग्या
सौभाग्यभोग्यं भजतां तनुर्मे ॥ २९ ॥

निर्लज्जतैषा परमर्थनीया
यदर्थयन्ते स्वयमेव नार्यः ।
प्रसीद किं वा क्रियते त्वदङ्ग-
सङ्गश्चिरं मे हृदयेऽवसन्नः ॥ ३० ॥

स्तनस्थलं हारलताभिरामं
नितम्बबिम्बं रसनासनाथम् ।
स्त्रीणां नखोल्लेखदरिद्रमेति
नोन्निद्रशोभासुभगाभिमानम् ॥ ३१ ॥

འཇིག་རྟེན་དག་ན་བྱུད་མེད་རང་བཞིན་གྱིས།
སེམས་ནི་ནམ་གཡེངས་དགེ་མཚན་ལྡན་པ་དང་།
གསང་བ་འདོད་ལ་ཤིན་ཏུ་མདོན་སྤྲོགས་ཤིང་།
མིག་ཀྱང་མཛེས་པ་དག་ལ་སྲིད་ལྡན་མིན། 32

ཞེས་སྨྲས་རླུང་ལྷར་འདར་བའི་ལུས་ཅན་དེས།
མཆུ་འདབ་དཔལ་ནི་དབྱུགས་ཀྱིས་རྫིལ་མནན་ཅིང་།
རྩོལ་རྒྱུའི་མཆོན་རིས་ཉམས་བྱས་ནམ་འགྱུར་ནི།
འདོད་པས་ཉེར་བསྟན་རབ་ཚིགས་ལ་བར་བཟུང་། 33

ནོ་བ་ཉམས་བྱེད་གཏུང་བའི་ཁབ་བཞིན་དེས།
དེ་ཡི་ཚིག་ནི་འགལ་བ་དེ་དག་ཕྲོས།
སྤྱིག་དེ་མིག་ལ་ཆགས་པ་འཁོར་བ་བཞིན།
ས་ལ་བལྟ་ཞིང་གདོང་ནི་དུད་པར་གྱུར། 34

རི་དགས་རྟགས་ཅན་ལྟ་བུ་དེ་ཡི་བཞིན།
སྨིག་བའི་ཀྲི་མ་རབ་གྱིས་དེ་ནི་བསྐུར།
གཞོན་ནུམ་མ་བཟོད་འཕྲུལ་ལ་ཡིད་འབྱུང་དང་།
ངོ་ཚས་བཞིན་གྱི་པདྨ་ཟུམ་པར་གྱུར། 35

नवाभिलाषातिशयोन्मुखानि
चित्तानि वातूलकुतूहलानि।
स्त्रीणां स्वभावेन भवन्ति लोके
लावण्यलुब्धानि च लोचनानि ॥ ३२ ॥

उक्तेति सा कम्पतरङ्गिताङ्गी
श्वासाभिभूताधरपल्लवश्रीः।
स्वेदाम्बुनश्यत्तिलकाधिकारं
स्मरोपदिष्टं प्रकटं बभार ॥ ३३ ॥

वाणीं विरुद्धां स निशम्य तस्या
स्तां तप्तसूचीमिव दीर्णकर्णाम्।
निरीक्षमाणः क्षितिमक्षिलग्नं
मुमोच तत् पापमिवावनम्रः ॥ ३४ ॥

तस्याः शशाङ्कोपममाननं तत्
समुन्मिषत्पापमलं कुमारः।
द्रष्टुं न सेहे सहसा विषाद-
लज्जानिमीलद्वदनारविन्दः ॥ ३५ ॥

དག་པར་བགྱི་སླད་དེ་ཡི་ནོ་བ་ཟུང་།
མི་ཆུང་སྡིག་གྲོས་འདར་བས་བསྐྱོད་བ་ལས།
རིན་ཅེན་རབ་འབར་ནོ་གྱིན་ལས་འཁྲུངས་པའི།
མཐུ་ལྡན་མེ་ནི་སྐད་ཅིག་ཞུགས་པ་བཞིན། 36

དེ་ཡི་ལག་པས་ནོ་བ་ཟུང་བསྒྲིབས་ནས།
སྐད་ཅིག་འཕྲུད་པའི་སྐྱོན་ནི་ཞི་བའི་སླད།
ཡན་ལག་ཡན་ལག་འཁྲུད་པའི་གང་གཱ་བཞིན།
སོ་ཡི་འོད་ཟེར་དཀར་ལྡན་ཚིག་སྨྲོས་པ། 37

མ་མ་ཁྲོད་ཀྱིས་འདི་དག་སྨྲ་མི་འོས།
དམ་པའི་ལམ་ནས་སོང་ལ་ཚིག་དག་སྨོམས།
འཕྲུལ་ལ་ཡོངས་བདང་སྐབས་ཀྱི་ཚུལ་ཁྲིམས་ནི།
ཉམས་ཤིང་ནོམ་པར་གཡོ་བ་དབུགས་དབྱུང་མཛོད། 38

དྲིགས་དང་དག་མེད་གཞན་ནོར་འདོད་པ་དང་།
སྡིག་པ་རྗེས་འབྲེལ་ཡུལ་ལམ་མངོན་སྤྱོད་པ།
འདི་དག་སྤྲོག་ཆགས་ནོམ་པར་ལྷུང་དུས་སུ།
བསྐྱམས་པ་མེད་པའི་གཏོད་པའི་སྒོ་དག་ཡིན། 39

अनल्पपापश्रवणप्रकम्पा-
द्विलोलरत्नोज्ज्वलकुण्डलोत्थम्।
तस्य क्षणं कर्णयुगं विशुद्धौ
प्रभावनं वह्निमिवाविवेश॥ ३६॥

स पाणिना श्रोत्रयुगं पिधाय
ससर्ज्ज वाचं दशनांशुशुभ्राम्।
प्रक्षालयंस्तां क्षणमङ्गसङ्गां
गङ्गामिवालिङ्गनदोषशान्त्यै॥ ३७॥

मातर्न युक्तं तव वक्तुमेतत्
सद्धर्मना गच्छ नियच्छ वाचम्।
सद्यः परित्यागदशाविलोलं
शीलं समाश्वासय शीर्य्यमाणम्॥ ३८॥

दर्पः प्रमादः परवित्तवाञ्छा
पापानुबन्धी विषयाभिलाषः।
एतानि जन्तोर्विनिपातकाले
द्वाराण्यपायस्य निरर्गलानि॥ ३९॥

སྦྱིན་ལས་ཕྱིར་ཕྱོགས་ཉམས་ལ་ནོར་གྱིས་ཅི།
སྤོང་བས་དབང་ཕྱུས་ཉམས་ལ་གོས་པས་ཅི།
ཡོན་ཏན་མཆོག་ལྡངས་ཉམས་ལ་གཟུགས་ཀྱིས་ཅི།
ཚུལ་ཁྲིམས་བདང་བ་ཉམས་ལ་རིགས་ཀྱིས་ཅི། 40

མ་མ་གཡོ་བ་ཉིད་དག་ཐོང་ལ་མ་ཉམས་གྲགས་པའི་ཟླ་བ་མཛེས་པར་སྣངས།
ཚུལ་ཁྲིམས་དྲི་མེད་རིགས་ཀྱི་རྒྱུ་དག་སྐྱོངས་ཤིག་སྡིག་ལ་བློ་གྲོས་ཡོངས་ས་བྱེད།
རབ་འབར་དཀྱིལ་བའི་མེ་ཡིས་འཚེད་ཅིང་འཁྲུགས་དེ་ཡི་དགས་རབ་ཏུ་གདུ
བས་ཉེན།
སྡིག་ཅན་འཇིག་རྟེན་ཕ་རོལ་ལམ་ཉེ་ངེས་པར་ཉོན་མོངས་དག་གིས་འཁྲུགས
པའི་ས། 41

ཞེས་པ་ས་བདག་སྨྲས་པོའི་ཚིག་ཐོས་ནས།
མི་བཟད་ཆགས་པའི་གདོན་ནི་དེས་མ་བཏང་།
སྨོངས་པའི་སྨུན་ཅན་ཁྲོན་པའི་རྒྱ་ནང་དུ།
ཆོས་ཀྱི་ཉེར་བསྟན་ཉི་མའི་འོད་མི་འཇུག། 42

རབ་ཏུ་འཇོམས་བྱེད་ཡིད་སྨྲབས་ས་བདག་གིས།
ཆོམ་ཀུན་མ་བཞིན་འཕྲུལ་ལ་གཟིར་གྱུར་དེ།
ཞུགས་རིངས་དལ་ཞིང་འཁྲུལ་པར་རྫོད་བྱེད་པས།
འབྲེལ་མེད་དོན་གྱི་ཆོ་ང་དེ་དེ་སྨྲས། 43

धनेन किं दानपराङ्मुखाणां
श्रुतेन किं द्वेषवशीकृतानाम्।
रूपेण किं सद्गुणवर्जितानां
कुलेन किं शीलविनाशकानाम् ॥ ४० ॥

मातश्चञ्चलतां विमुञ्च रुचिरं रक्षाक्षयेन्दुं यशः
शीलं पालय पश्य वंशममलं पापे मतिं मा कृथाः।
स्फूर्ज्जन्नारकवह्निपाकविकलप्रेतप्रलापोत्कटाः
पापानां परलोकवर्त्मनि किल क्लेशाकुला भूमयः ॥ ४१ ॥

श्रुत्वेति वाक्यं क्षितिपात्मजस्य
रागग्रहं सा न मुमोच तीव्रम्।
मोहान्धकूपस्य जनस्य नान्त-
र्धर्म्मोपदेशार्ककरा विशन्ति ॥ ४२ ॥

चोरीव सा मन्मथपार्थिवेन
प्रमाथिना प्रव्यथिता प्रसह्य।
श्वासप्रयासस्खलिताभिधान-
मसङ्गतार्थं प्रललाप तत्तत् ॥ ४३ ॥

རྣལ་གནས་ཉེར་བསྟན་ཁྱོད་ཀྱིས་བྱེད་པ་འདི།
འདོད་པས་གཟིར་བ་བདག་གིས་འགའ་མི་ཕྱོས།
ལྷག་པར་རབ་འབར་འདོད་པའི་མེ་ཡི་ཚོགས།
སྐྱེས་པ་ཚིག་གིས་རབ་ཏུ་ཞི་མི་འགྱུར། 44

ཡུལ་ན་བསིལ་བའི་ཆུ་སྤྲིན་འགྲུབ་མོད་ཀྱང་།
སྐྱ་ངམ་ཐང་རྣམས་དག་ནི་གདུང་བར་འགྱུར།
ཉི་མ་ཤར་ཡང་ཆགས་པས་གཟིར་རྣམས་ལ།
ཕྱོགས་མཚམས་རྣམས་ནི་འཇིགས་རུང་སྟུན་པ་ཡིན། 45

གདུང་བའི་སྡུད་མེད་བསྐྱུངས་ལ་ཆོས་ཅི་ཡང་།
གལ་དེ་བརྩེ་ལྡན་ཁྱོད་ལ་མེད་ན་ནི།
དམ་པ་རྣམས་ཀྱིས་གུས་བར་བསྟན་པ་དེ།
མེད་པ་ལ་ཡང་ཆོས་མིན་ཇི་ལྟར་ཡོད། 46

གང་བློ་རྣལ་གནས་བསིལ་བ་དེ་དག་ལ།
བདེ་སྐྱིད་བརྟེན་པ་ཆོས་འདི་ཚད་མ་སྟེ།
ཞེན་པས་གཟིར་ཅིང་ཡང་དག་གདུངས་རྣམས་ལ།
བཀག་པའི་བྱ་བ་ལ་ཡང་སྤྱོད་པ་ཅི། 47

स्वस्थोपदेशः क्रियते त्वयायं
स्मरार्दिताहं न शृणोमि किञ्चित्।
नायाति वाग्भिः प्रशमं विशाल-
ज्वालाकलापः प्रबलः स्मराग्निः॥ ४४॥

देशे स्खलन्निर्झरशीतलेऽपि
भवन्ति तप्तानि मरुस्थलानि।
रागातुराणामुदयेऽपि भानो-
र्घोरान्धकाराणि दिगन्तराणि॥ ४५॥

नास्त्येव तप्तामबलां दयालोः
संरक्षतस्ते यदि कोऽपि धर्मः।
तत्साधुभिर्दर्शितगौरवस्य
तस्याप्यभावे कथमस्त्यधर्मः॥ ४६॥

ये शीतलाः स्वस्थधियः सुखाय
तेषां प्रमाणं स्थिर एष धर्मः।
सन्तापितानां व्यसनातुराणां
निषिद्धकार्य्येष्वपि को विचारः॥ ४७॥

དེ་ཉིད་ཀྱིས་ནི་སྡིག་པ་དང་བོར་ཀླངས།
བདག་ཡོངས་བསྒྲུངས་པས་ཁྱོད་ལ་ཆོས་སྒྲུ་འགྱུར།
རིག་པ་རི་བོང་ཅན་ལྟར་བསིལ་པ་ཡིས།
རྒྱུན་དུ་གདུང་བས་ཉེན་བདག་བདེ་བར་མཛོད། 48

གདུང་བ་འཕྲོག་བྱེད་ཟླ་བ་དང་ནི་མི་བཟད་སྨྲུན་པ་ཉམས་བྱེད་ཉི་མ་དང་།
ཉིན་དང་མཚན་མོར་གྲང་བའི་ཉོན་མོངས་ཞི་བྱེད་མེ་ལ་སྡིག་པའི་འབྲས་བུ་ཅི།
གདུང་བས་གཟིར་བ་བསྐྱང་བ་དང་མཉམ་ལས་བཟང་ཆོས་ནི་གང་དུ་ཅི་ཞིག་མཐོང་།
བསྟན་བཅོས་མཐའ་དག་ཤེས་པ་ཁྱོད་ཀྱིས་གང་འདི་བདེན་པར་གསལ་བ་ཉིད་དུ་
སྨྲོས། 49

ཡུལ་འདི་སྐྱེ་བོས་སྤངས་ཤིང་ལེགས་པར་བསྒྲིབས།
དབེན་པ་འབྱེད་པ་སྒྲུ་ཡང་མེད་པ་འདིར།
རང་འདོད་དུ་འཇུག་མཛའ་བས་དུད་པ་ཡི།
བྱུད་མེད་དར་མ་སྐལ་ལྡན་ཉིད་ལ་འགྱུར། 50

བུད་མེད་དགའ་མགུས་ཡོངས་སྒྲུ་ཚིམས་ནམས་ཀྱིས།
བཞིན་གྱི་པདྨ་འགྲམ་པའི་འདབ་དམན་བཞིན།
མཆུ་ཉམས་ལན་བུ་འཁྲུགས་ཤིང་ཅུལ་གྱི་ནི།
ཕྱོགས་བས་བརླན་ཆགས་སྐལ་ལྡན་ནམས་ཀྱིས་མཐོང་། 51

मयैव पापं प्रथमं गृहीतं
धर्मोऽस्ति ते मत्परिरक्षणेन।
स्पर्शेन निर्वापय सन्ततां मे
सन्तापजार्त्तिं शशिशीतलेन॥ ४८॥

सन्तापं हरतो विधोः क्षपयतस्तीव्रं तमो भास्वतः
शीतक्लेशमहर्निशं शमयतः पापं किमग्नेः फलम्।
ब्रूहि ज्ञातसमस्तशास्त्र यदि वा सत्यं त्वमेव स्फुटं
दृष्टः किं व्यसनार्त्तरक्षणसमः सत्कर्मधर्मः क्वचित्॥ ४९॥

रहस्यभेदोऽत्र न कश्चिदस्ति
जनोज्झितः संवृत एष देशः।
स्वेच्छाप्रवृत्तप्रणयोपनम्राः
प्रौढाङ्गना भाग्यवतां भवन्ति॥ ५०॥

क्लिष्टाधरं क्लान्तकपोलपत्रं
स्रस्तालकं स्वेदलवार्द्ररागम्।
नितम्बिनीनां रतितोषितानां
पश्यन्ति धन्या वदनारविन्दम्॥ ५१॥

སྲད་མེད་ཆེད་དུ་རྒྱ་སྐྱིན་ཁྲིམས་པའི་ཚོགས།
འཛིགས་རུང་རྒྱ་སྐྱིན་འབྱུང་གནས་འཛིངས་སྲུ་འགའ།
རལ་གྲིའི་འཁྲི་ཤིང་གསོ་བའི་ལྗོ་ལྡན་པ།
གཡུལ་ངོ་དུས་ཀྱི་འཁོར་ནི་གཞན་དག་འཇུག། 52

ཡུན་རིང་ཉོན་མོངས་ཁྲུད་པར་ཆེ་གདུང་བས།
ཉོར་ཉམས་ལ་ནི་སྐྲེས་བུ་མཆོག་ཏུ་འབད།
ཉོར་ནི་ཡོངས་འཛིན་ཆོས་ཀྱི་དོན་ཉིད་དེ།
ཆོས་ཀྱི་འབྲས་བུ་མཆོག་ནི་འདོད་པར་བརྗོད། 53

ཉམ་པ་མང་པོས་དེ་སྐད་སྨྲ་བྱེད་ཅིང་།
འཁྲུགས་པ་དེ་ལ་གཞོན་ནུས་རབ་སྨྲས་པ།
མ་མ་ཚོགས་གསུམ་གཙོ་བོའི་འབྲས་བུ་ནི།
དགེ་བའི་ལྷེ་བ་ཙ་བ་དང་བཅས་ཆོས། 54

སྐྱེ་བོ་མེད་པར་ཕྱིག་པ་སྨྲས་མི་འགྱུར།
འདིར་ནི་དཔང་པོ་སྣང་མིན་མགོ་རིས་ཚོགས།
གྲོགས་ཀྱི་དངོས་པོར་གྱུར་པའི་གྲིབ་མས་ཀྱང་།
རྒྱང་མས་བཞིན་དུ་སྐྱེ་བོའི་ཐམས་ཅད་རིག། 55

विशन्ति केचित् करवालवल्ली-
विलोलजिह्वं रणकालवक्त्रम्।
योऽपित्कृते क्रोधननक्रचक्र-
करालमन्ये मकराकरौघम्[1] ॥ ५२ ॥

तीव्रैश्चिरक्लेशविशेषशोषै-
रर्थेषु पुंसां परमः प्रयत्नः।
धर्म्मार्थ एवार्थपरिग्रहोऽयं
धर्म्मस्य कामं फलमग्रमाहुः ॥ ५३ ॥

इति ब्रुवाणां बहुभिः प्रकारै
स्तामब्रवीदाकुलितां कुमारः।
मातस्त्रिवर्गस्य फलं समूलं
धर्म्मः प्रधानं कुशलस्य नाभिः ॥ ५४ ॥

न निर्जने पापमुपैति गुप्ति-
मन्तर्हितः स्वर्गिगणोऽत्र साक्षी।
छाया प्रयाता हि सहायभावं
जायेव जानाति जनस्य सर्व्वम् ॥ ५५ ॥

१ $^{W}_{1}$ मकरालयोऽयम्।

དབེན་པར་བྲུས་པའི་ལམ་འབྲས་ངེས་པར་སྨིན།
ལས་ཉམས་འབྲས་བུ་རབ་ཉམས་ཡོད་མ་ཡིན།
སྨུན་ནག་དབེན་པར་དུག་ཉི་འཕྲུངས་བ་ན།
སྒྲོག་ཉམས་མི་བཟད་འཕྲོག་པ་མིན་ནམ་ཅི། 56

རིགས་ཀྱི་བྲུད་མེད་སྡིག་པའི་མཚན་མར་གྱུར།
དེ་ལའང་འཛིགས་རུང་གཞན་གྱི་བྲུད་མེད་འགྲོགས།
འཕྲབ་མོ་ལ་རྨོངས་མ་ཞེས་མངོན་སྒྲུར་བའི།
རང་གི་ཆུང་མར་སྐྱེ་གཞན་ཡང་མི་རིག། 57

དེ་ལྟར་དོན་གཉེར་ཉམས་པས་ཕྱིར་ཕྱོགས་ཤིང་།
དེ་ཡི་སྐད་པས་ཤིན་དུ་གདུངས་གྱུར་ཏེ།
ཁྲོད་ཀྱི་མིག་དྲིགས་ངེས་པར་བདག་གིས་འཕྲོག།
ཅེས་སྨྲས་སྡིག་ཅན་མ་དེ་རང་གནས་སོང་། 58

དེ་ནས་གྲོང་ཁྱེར་རྡོ་འཛོག་ཅེས་པར་ནི།
ས་བདག་གླང་པོའི་ནོ་བ་ཞེས་བྱ་བ།
འདུལ་དུ་གཞོན་ནུ་དཔུང་གི་རྡུལ་ཚུབ་ཚོགས།
ཉི་མ་འཕམ་བྱེད་ལྡན་པར་སྐྱོལ་པོས་བཏང་། 59

रहःकृतं कर्म्म फलत्यवश्यं
न कर्म्मणामस्ति फलप्रणाशः ।
विषं निपीतं विजनान्धकारे
प्राणेषु किं न प्रहरत्यसह्यम् ॥ ५६ ॥

जात्या स्त्रियः पापनिमित्तभूता-
स्तत्रापि घोरः परदारसङ्गः ।
मातेति मोहात्कलहेऽभियुक्तां
नान्तेऽपि जन्तुः स्पृशति स्वकान्ताम् ॥ ५७ ॥

इत्यर्थनाभङ्गपराङ्मुखी सा
तिरस्कृता तेन नितान्ततप्ता ।
हराम्यवश्यं तव नेत्रदर्प-
मुक्तेति पापा स्वपदं जगाम ॥ ५८ ॥

ततः पुरं तक्षशिलाभिधानां
महीपतेः कुञ्जरकर्णनाम्नः ।
सेनारजःपुञ्जविनिर्जितार्कं
जेतुं कुमारं विससर्ज्ज राजा ॥ ५९ ॥

གྲོང་དེར་དེས་ཕྱིན་གླང་པོའི་སྲུན་པ་ཡིས།
མ་ལུས་ཕྱོགས་བརྒྱུང་ཡོངས་སུ་བསྐོར་ཏེ་གནས།
གླང་པོ་དཔའ་སྐྲ་ཆུ་གཏེར་བསྐྱོད་པ་ལྟར།
ཟབ་པས་སྲིད་པ་རྣམ་གཉིས་བྱེད་པ་བཞིན། 60

དེ་ནས་རྗེ་འཛོག་རྒྱལ་པོས་རྒྱལ་སྲས་ལ།
སྐྱེ་བོས་ཕྱག་འཚལ་རབ་ཏུ་དང་བར་གྱུས།
གླང་པོ་རྟ་དང་རིན་ཆེན་དག་གིས་མཆོད།
གློ་ལྡན་རང་གིས་རང་གི་རྒྱལ་སར་བཀོས། 61

དེར་ནི་དེ་ཡིས་དགའ་བའི་རིམ་གྲོ་ཡིས།
གུས་པས་ཉེ་བར་བསྟེན་ཅིང་རྒྱལ་སྲས་དེ།
སྤྲིན་ཚོགས་གཞོན་ནུ་གསལ་བ་རབ་རྒྱས་བས།
ཉི་མར་བཅས་པའི་ཉིན་རྣམས་རབ་ཏུ་གནས། 62

སྐབས་དེར་བུ་ཡི་བཞིན་རས་པད་མོ་དག།
བལྟ་བར་ཡིད་ལ་རབ་ཏུ་འདོད་པ་ཡི།
ས་བདག་ལྷོ་བར་ཙ་བ་བཅིངས་པའི་ནང་།
ཁྲུང་བར་སྒྲུར་ཏེ་བསམས་པས་བཅིངས་པས་བཞིན། 63

स तां पुरीं प्राप्य गजान्धकार-
ग्रस्ताखिलाशः परिवार्य्य तस्थौ ।
क्षुब्धाब्धिधीरैर्भटकुञ्जराणां
द्विधेव कुर्व्वन् भुवनं निनादैः ॥ ६० ॥

ततः प्रसाद्य प्रणिपत्य मूर्द्ध्ना
नृपात्मजं तक्षशिलाधिनाथः ।
गजाश्वरत्नैरभिपूज्य धीमान्
स्वराजधानीं स्वयमानिनाय ॥ ६१ ॥

प्रियोपचारैरभिपूज्यमान[१]-
स्तेनादरात्तत्र स राजपुत्रः ।
दिनेषु तस्थौ घनयौवनार्द्र-
समुल्लसन्मेघमलीमसेषु ॥ ६२ ॥

अत्रान्तरे पुत्रमुखारविन्द-
सन्दर्शनोत्कण्ठितमानसस्य ।
चिन्तानुबन्धादिव भूमिभर्त्तु-
र्व्याधिर्बभूवोदरबद्धमूत्रः ॥ ६३ ॥

---

१ W_1 and W_2 ०रुपसेव्यमानः ।

སྣ་ཚོགས་སྨན་བསམ་བསམ་གདན་སྐྱུབ་བྱེད་ཅིང་།
ནད་གསོས་མིན་པར་རྟོགས་པའི་རྣལ་འཁྲོར་དང་།
ཐེ་ཚོམ་གྱིས་ནི་བཞིན་ལོག་མཐོང་གྱུར་པའི།
སྨན་པས་པོ་བྲང་ཁང་པར་རབ་ཏུ་བསྐོར། 64

གྲུ་ངན་འཛིགས་པས་བཞིན་དུ་དྲིལ་རྒྱང་སྤྱི།
སྒྲ་བཅད་དུ་གནས་བཙུན་མོའི་ཚོགས་རྣམས་ནི།
རི་མོ་བྲིས་པའི་རྣམ་པ་དང་མཚུངས་ལ།
བརྟེན་པའི་གཡོ་མེད་མིག་གིས་ལྟ་བར་བྱེད། 65

དཔལ་གྲུ་དཔལ་གྲུར་ཇོ་ཡབ་འདབ་མ་ནི།
ཉེར་འཁོར་མཛེས་པའི་ལག་པས་རྣམ་བསྒྲོད་པ།
གྲུ་ངན་གྱིས་འཁྲུགས་ཤུགས་རིངས་བསྟེན་པ་ཡིས།
ཡོངས་སུ་དཀར་བ་ལྟ་བུས་གཡོབ་པ་དེ། 66

རྒྱ་གྲང་ལྷན་པའི་སྦུམ་པར་མིག་གཏད་ཅིང་།
བསླ་བའི་བདུང་བ་དག་ལ་ཞེན་ལོག་བསྐྱེད།
གཅིད་ནི་དགག་པའི་ཁྲོ་བ་རབ་རྗོགས་ཤིང་།
ཕན་པའི་ཉེར་བསྟན་དག་ལ་ཆགས་བྲལ་ཞུགས། 67

वैद्यैस्ततोऽन्तःपुरधाम्नि नाना-
भैषज्यचिन्ताविहितावधानैः।
असाध्यरोगावगमाभियोग-
सन्देहसन्दर्शितखेदवक्त्रैः॥ ६४॥

उद्वेगभीत्येव निषद्यमान-
काञ्चीकलापेन वधूगणेन।
चित्रार्पिताकारतुलाश्रितेन
निष्पन्दनेत्रेण विलोक्यमानः॥ ६५॥

आसन्नकान्ताकरमन्दमन्द-
विस्पन्दिना चामरपल्लवेन।
उच्छ्वासभाजा परिपाण्डुरेण
शोकाकुलेनेव स वीज्यमानः॥ ६६॥

शीताम्बुभृङ्गारनिविष्टदृष्टिः
कषायपाने विहितावमानः।
निद्रानिषेध-प्रतिपन्नकोपः
पथ्योपदेश-प्रविशद्विषादः॥ ६७॥

ཞི་སྡང་བཅས་པའི་སྐབས་ཐོབ་ལུས་ལ་ཡང་།
སྨད་འོས་རང་བཞིན་ཆགས་གྲལ་གྱིས་སྨོད་ཅིང་།
བཙུན་མོའི་ནུ་མའི་བར་དུ་མགོ་བཞག་པའི།
སྐད་གདངས་ཞན་པ་ས་བདག་གིས་སྨྲས་པ། 68

རིག་བྲ་རྫོགས་པའི་སྨན་པས་དེང་ཡང་ཅི།
གདུང་བ་སྐྱེད་བྱེད་བདེན་མེད་དཔྱད་ཀྱིས་ཅི།
བདེ་མེད་ལས་ཀྱིས་ཡོངས་སུ་གཟིར་བ་ཉོམས།
གསོ་བྱེད་ཆོས་ཀྱི་ཉེར་བསྟན་ལ་ཆགས་ཡིན། 69

ལུས་འདི་གནོད་པའི་སར་སོང་དཔྱད་མི་འོས།
ལོངས་སྤྱོད་ཚོགས་ཀྱང་རླུག་རྫུ་ལྟ་བུར་སྤྱོད།
ལོང་བའི་ཆུང་མ་མཛེས་སྡུག་ལྡན་པ་བཞིན།
སྤྱོད་སྤངས་དཔལ་ནི་སྨོད་པ་སྡུག་པོ་ཉིད། 70

མི་དག་ཤིན་ཏུ་དམན་ཡང་གྱུར་དུ་ནི།
རབ་འབར་ཤུ་ངན་མེ་ཡིས་སྲེག་བྱེད་ཅིང་།
གདུང་བ་གྱིས་ཀྱང་རངས་དང་མི་འབྲལ་བའི།
རིང་པོའི་ནད་ལྡན་མ་ཡིན་སྲོག་སོང་བདེ། 71

निन्द्यामयोद्वेगजुगुप्समानः
कायेऽपि स द्वेषदशामवाप्तः।
पत्नीस्तनोत्सङ्ग निषण्णमूर्द्धा
क्षामस्वरः क्ष्मापतिराचचक्षे ॥ ६८ ॥

वैद्यैः किमद्यापि निवृत्तविद्यै-
र्व्यथानिमित्तैः किमतथ्यपथ्यैः।
अशर्मकर्म्मोपनिपीड़ितानां
धर्म्मोपदेशः प्रणयश्चिकित्सा ॥ ६९ ॥

कायः प्रयातोऽयमपायभूमिं
शल्यायते भोगगणोऽप्यभोग्यः।
अन्धस्य लावण्यवतीव कान्ता
भोगोज्झिता श्रीर्घन एव शापः ॥ ७० ॥

अत्यन्तमन्दाग्निरपि प्रसक्त-
प्रदीप्तशोकानलदह्यमानः[१]।
प्रवृद्धतृष्णोऽप्यनपेत-जाड्यः
सुखी गतासुर्नतु दीर्घरोगी ॥ ७१ ॥

१ $^{W}_{1}$ शोकाग्निप्रदह्यमानः।

སྡིག་པ་རབ་བསྒྲིབས་ནང་དུ་ཡོངས་གནས་དང་།
དམན་པ་བརྟས་ཤིང་རྩོད་པ་རྫིས་འབྲལ་དང་།
ནད་ཀྱི་བརྡེན་པར་ཟིལ་མནན་སྨད་པ་དང་།
རབ་འབར་མེ་ཡི་གདུང་བ་ཞི་བར་འགྱུར། 72

ལས་ངན་རྩེ་དགའ་ཅན་མོངས་རང་བཞིན་འདི།
ནོམ་པར་བཀྲ་བའི་གཟུགས་ནི་ཟློག་པ་སྦྱི།
ནད་མེད་བསྟེན་གང་དབྱུལ་བས་སྤྱུག་བསྒྱམ་ཞིང་།
ཕུན་ཚོགས་ལྡན་གང་དོག་ཏུ་ནད་ཅན་ནོ། 73

ཆོས་དབྱིངས་གྲོས་པའི་ཀློང་དང་བྲལ་བའི་ལུས་ཅན་ནོམས་ཀྱི་སྐྱེ་བ་འབྲས་མེད་དེ།
གང་གིས་ཀློ་གློས་ཐོས་པས་ཀྱུན་ཀྱི་སྐྱུབ་བྱེད་རབ་འབར་ཐུས་པ་མིན་བ་སྨད།
གང་གི་དཔལ་གྱིས་དབུལ་བ་ཉིད་མིན་ཨ་ཀྱུར་ཐོས་པ་ཀྱི་ཆེ་དེ་ཡིས་ཏེ།
ཤིན་ཏུ་ནད་མེད་ཉིད་ཀྱིས་གང་ཞིག་སྤྱོད་མེད་དཔལ་གྱི་ནོམ་འཕྲུལ་གྱིས་པས་ཏེ། 74

བདག་གི་གཞོན་ནུ་སྐྱེ་གུ་དགའ་བ་ནི།
རྗོ་འཛོག་ཏུ་བསྐོས་ཀྱུར་དུ་དགུས་པར་བགྱི།
མི་ལོང་ལ་བཞིན་ཟི་མེད་ལེགས་སྤྱོད་ཀླུམ།
དེ་ལ་རང་གི་ཀྱིལ་སྲིད་འཕོས་པ་ལྟའི། 75

प्रच्छन्नमन्तःपरिवर्त्तिपापं
नीचावमानः कलहानुबन्धी।
व्याधिः स्थिरारम्भजुगुप्सितश्च
दीप्ताग्नितापेन शमं प्रयाति ॥ ७२ ॥

कुकर्म्मणामेष विचित्ररूप-
विपर्य्ययायासमयो विलासः।
दारिद्र्यकष्टं यदरोगभाजां
लक्ष्मीवतां यच्च सदैव रोगः ॥ ७३ ॥

बन्ध्यं जन्म शरीरिणां विरहितं बुद्ध्या विचारेच्छया
धिग्बुद्धिर्न[१] कृतः प्रसाधनविधिर्यस्याः श्रुतेनोज्ज्वलः।
किं तेन श्रुतविस्तरेण न गतो निर्दैन्यतां यः श्रिया
किं श्रीविभ्रमजृम्भितेन नितरामारोग्यभोग्यं न यत् ॥७४॥

आनीयतां मे त्वरया कुमारः
प्रजाप्रियस्तक्षशिलानियुक्तः।
पश्यामि तस्मिन् विमले सुवृत्ते
संक्रान्तमद्यैव कृतं स्वराज्यं ॥ ७५ ॥

१ धिग्बुद्धिं appears to be in W_2.

དེ་ཉིད་གུས་པས་དབྲུ་གྲུན་བཅིངས་བྱས་ཤིང་།
གདུགས་དཀར་མཆོག་ནི་ཡང་དག་གདང་པ་དེ།
གྲོང་པས་ང་ཉིད་བསོད་ནམས་བཅུད་ལེན་གྱིས།
གཞོན་ནུ་ཉིད་ཐོབ་བཞིན་དུ་ལྷ་གྱུར་ཅིག། 76

ཅེས་པ་མི་ཡི་དབང་པོས་སྨྲས་པ་དེ།
མཚུངས་པར་རབ་ཞུགས་འཛིགས་དང་སྨྱ་ངན་དང་།
དམན་དང་ཕྲག་དོག་སྨོངས་པས་ཡོངས་ཁེངས་པའི།
བཙུན་མོ་སྐར་གྱིལ་སྦྱུང་བས་ཕྲོས་ནམ་སྨྲས། 77

ས་སྐྱོང་ཁྱོད་ནི་ནད་མེད་བདག་གིས་བཀྲི།
བདག་གི་རིག་པའི་ཁྲུད་པར་བལྟ་བར་མཛོད།
རང་གི་བསླབ་དོན་ནོར་ཉམས་སྐྱི་བོ་ཉམས།
བརྒྱག་སྨད་ཚེ་བསྟེན་སྨན་པ་ངན་པ་སོང་། 78

རྟག་ཏུ་བརྒྱག་བརྩོན་སྨན་པ་རིག་བྱེད་བྲལ།
ཕན་ཚུན་ཆགས་བྲལ་ཕྲོས་དྲིགས་བསྐྱེམས་པ་དང་།
དེ་ཉིད་ཤེས་སློད་མི་མཁས་རྫེས་སྨྲ་བས།
ཉིན་ཞག་དང་ནི་ནད་པ་འཕེན་པར་བྱེད། 79

समर्पितोदग्रसितातपत्त्रं
निबद्धमौलिं प्रणयान्मयैव ।
पश्यन्तु तं पुण्यरसायनेन
मामेव पौरास्तरुणत्वमाप्तम् ॥ ७६ ॥

इत्युक्तमाकर्ण्य नरेश्वरेण
तं तिष्यरक्षा निजगाद जाया ।
तुल्यप्रवृत्तैर्भयशोकदैन्य-
मात्सर्य्यमोहैः परिपूर्य्यमाणा ॥ ७७ ॥

अहं महीपाल निरामयं त्वां
करोमि ते पश्य विशेषयुक्तिम् ।
यान्तु स्वशिक्षार्थकदर्थितार्था
जनक्षयावद्यजुषः कुवैद्याः ॥ ७८ ॥

मिथोविवादैः श्रुतगर्व्ववादै-
स्तज्ज्ञापवादैरबुधानुवादैः ।
निर्विद्यवैद्याः क्षपयन्ति नित्यं
क्षयोद्यता वासरमातुरञ्च ॥ ७९ ॥

རང་གི་བུ་ལའང་རྒྱལ་སྲིད་མི་གཏང་སྟེ།
རྒྱལ་པོ་གཞན་ལ་ཡོད་ཀུན་དགའ་སྐྱིད་བྱེད།
སྨུན་སྨུམ་ཚོགས་པ་བདང་ན་སྐད་ཅིག་གིས།
གོད་པ་སྟོང་ཕྲག་མེ་ཡིས་གཏུང་བར་བྱེད། 80

འཕྲུལ་ལ་བུ་ལ་ཟུར་ཕུད་བཀོད་གྱུར་ཅིང་།
དེ་དུས་རྗེ་བོའི་གུས་པ་ཉམས་གྱུར་པའི།
རྒྱལ་པོའི་བཀའ་ནི་དུད་པ་མིན་ནོམས་ཀྱིས།
ཆ་ཡི་གཅོད་ཅིང་ཙོ་དང་མཚུང་པར་འགྱུར། 81

ཞེས་པས་ས་དབང་བཙན་པ་བསྐྱབས་ནས་ནི།
ཁང་ནང་དེ་ལས་དེ་ནི་ཕྱི་རོལ་སོང་།
བ་རྡི་དེ་མཚུངས་ནད་ཀྱིས་གཟིར་བ་ཅིག།
བཙལ་ནས་དབེན་པའི་གནས་སུ་བོས་བྲས་དེ། 82

གདུག་པའི་བསམ་པས་འབང་མོ་གདུག་པའི་རློས།
དེ་བསད་ལྟེ་བའི་མཛོད་ནི་རབ་བྱེ་སྟེ།
བརྩེ་བས་སྐྱན་རིས་དེ་ཡི་རྒྱུ་མར་ནི།
ནོམ་འགྱུར་ཟུབ་མོའི་སྲིན་བུ་ཆགས་པ་མཐོང་། 83

त्याज्यं न राज्यं स्वसुतेऽपि राजन्
स्पृहां परस्थं विदधाति सर्व्वम् ।
त्यक्ता च लक्ष्मीः कुरुते क्षणेन
विपत्सहस्रज्वलनानुतापम् ॥ ८० ॥

सद्यः सुतारोपितशेखराणां
तत्कालमौलप्रभुगौरवाणाम् ।
राज्ञामनर्घैरवधीरितानि
तृणीभवन्त्येव हि शासनानि ॥ ८१ ॥

इति क्षितीशस्य धृतिं विधाय
निर्गत्य तस्माद्भवनान्तरात् सा ।
अन्विष्य तत्तुल्यगदाभिभूत-
माभीरमेकान्तमथानिनाय ॥ ८२ ॥

क्रूराशया क्रूरधियैव दास्या
हत्वा तमुत्पाटितनाभिकोषम् ।
तस्यान्त्रलग्नं परुषं ददर्श
घृणाविहीना विक्षतं कृमिं सा ॥ ८३ ॥

གྱེན་དུ་རབ་ཀྱུ་མགྱོགས་པར་ཕུར་དུ་ཡང་།
གཅིབ་སྤྱོ་བྱེད་དེ་མཐོང་གསད་ཕྱིར་དེས།
བྲེ་དང་གསྒྲར་ཤིང་ཀུན་ཡི་ཡི་ལིང་།
ཚོ་བ་རིལ་སོགས་སྐྱེ་ཚན་དེ་ལ་རླུགས། 84

མི་བཟད་འགྱུར་བྱེད་དྲུག་ལྷན་གང་དག་སྟེ།
དེ་རིས་སྨིན་བུ་དེ་ནི་སྨོག་མ་གཏང་།
སྨོག་སྐྱུའི་ཙ་བ་དག་ནི་གདུབས་པ་ཡིས།
རིག་པ་ཙམ་ལས་རབ་དུ་ཞིག་པར་གྱུར། 85

ཐབས་མཆོག་ཉིད་ནས་རབ་དུ་དགའ་བ་དེ།
དེ་ནས་མི་ཡི་བདག་པོའི་དྲུང་སོང་སྟེ།
སྨོག་སྐྱ་ལེགས་པར་བཅད་པ་བྱིན་པ་ཡིས།
སྐད་ཅིག་གིས་ནི་དེ་ལུས་བསོས་པར་བྱས། 86

གང་ལ་དུག་གི་ནུས་པས་ཅང་ཡོད་མིན།
གང་ལ་མཚོན་གྱིས་ཀྱང་ནི་སྐྱུར་མི་ཐུགས།
གང་ལ་མེ་ནི་སྤྱོ་ཉམས་ལེ་ལོ་ཅན།
དེ་ལ་ཡང་ནི་བྱུད་མེད་བརྟེན་ཉམས་མིན། 87

ऊर्द्धं प्रचारेण जवादधश्च
सक्तत् सृजन्तं तमवेक्ष्य हन्त।
सा पिप्पलीहिङ्गुविडङ्गयुक्तं
चिक्षेप तस्मै परिवादिवर्गम् ॥ ८४ ॥

तैस्तैः स कीटः सविषैश्च कैश्चित्
क्षारैरसह्यैर्न मुमोच जीवम्।
पलाण्डुना खण्डितकण्डलेन[1]
संस्पृष्टमात्रः प्रलयं जगाम ॥ ८५ ॥

उपायमासाद्य परप्रहृष्टा
गता ततः सा नृपतेः समीपम्।
पलाण्डुना क्षुन्नतरार्पितेन
क्षणेन तं स्वस्थतनुं चकार ॥ ८६ ॥

विषस्य यत्रास्ति न जातु शक्ति-
र्यैश्चाशु[2] शस्त्राण्यपि कुण्ठितानि।
यत्रालसोत्साहहतो हुताश-
स्तत्राप्यभग्नप्रणया युवत्यः ॥ ८७ ॥

---

१ W. बाढ। २ W. शुः।

དེ་ནས་ས་བདག་བྲུས་ཤེས་མཛོད་བ་ཡིས།
འཆིང་བས་ཀློ་གྲོས་བཅིངས་པས་དེ་ལ་ནི།
འཚོ་བ་ཐོབ་པའི་དགའ་བས་མཆོག་དག་བྱིན།
དེ་ཡིས་ཉིན་ཞག་བདུན་དུ་རྒྱལ་སྲིད་བསྐྱང་། 88

རྒྱལ་སྲིད་ཐོབ་ནས་ས་སྐྱོང་བྲུ་བ་ནི།
ཐམས་ཅད་རང་དབང་ཉིད་ཀྱིས་བྱེད་པར་ཞུགས།
རྡོ་འཛོག་དབང་པོ་ལ་ནི་སྒྲིང་ཡིག་དག།
རྒྱ་ལྡན་རིན་ཅེན་མཛེས་པ་དང་བཅས་སྒྲིངས། 89

ད་ནས་མི་བདག་བཀས་མཚན་སྒྲིང་ཡིག་དེ།
དུལ་ཞིང་རབ་དུ་དུད་པས་མཆོད་དེ་བླངས།
རྡོ་འཛོག་བདག་པོ་རང་གིས་གསལ་བ་ཡིས།
ཡི་གེས་མཚོན་པའི་དོན་ནི་རབ་དུ་གནས། 90

སུཥྲི་གྲོང་ཁྱེར་ཕྲཱ་ཏ་ལ་ཡི་བྲུ་དྲ་ལས་མཚུངས་པ་མེད་པའི་གཡུལ་ལ་དཔའ་བས་ཡང་དག་པར་ཐོབ་པ། རྒྱ་མཚོ་མཐའ་དག་གི་མཚམས་སུ་རབ་དུ་འགྲོ་ཞིང་མི་ཞན་ལ་དྲི་མ་དང་བྲལ་བའི་གྲགས་པའི་ཚོགས་ལས་བསྐྲུབས་པའི་དུ་ཀུ་ལའི་རས་དཀར་པོས་ནོར་འཛིན་གྱི་བུ་མོ་ལ་ལོངས་སྤྱོད་པར་བྱ་བ་སྐལ་བ་བཟང་པོ་ཉིད་ཀྱིས་བསྐྱེམས་པ་བྱིན་པ། དགྲ་བོའི་གཟི་བྱིན་ཉམས་པར་བྱེད་ཅིང་མི་དགའ་བ་

ततः कृतज्ञः क्षितिवल्लभोऽस्मै
प्रेमानुबन्धप्रतिबद्धबुद्धिः ।
वरं ददौ जीवितलाभहर्षात्
तयार्थितं सप्तदिनानि राज्यम् ॥ ८८ ॥

सम्प्राप्तराज्या स्ववशैव सर्व्वं
कर्त्तुं प्रवृत्ता क्षितिपालकार्य्यम् ।
सा प्राहिणोत्तक्षशिलेश्वराय
लेखं समुद्रं सह चारुरत्नैः ॥ ८९ ॥

लेखं ततस्तं नृपशासनाङ्क-
मादाय मान्यं विनयावनम्रः ।
स्वयं विभक्ताक्षरलक्षितार्थ-
मवाचयत्तक्षशिलाधिनाथः ॥ ९० ॥

स्वस्ति श्रीपाटलिपुत्रात् समसमरसाहससमासादितसमस्तसिन्धुसीमासमुच्छलदविरलविमलयशःकलापकलितधवलदुकूलवसुधावधूदत्तभोगसौभाग्यगर्व्वखर्व्वीकृतविपुलरिपुप्रतापः शापद्ववारातिरमणीविलासानां प्रणतिप्रतिबिम्बितानन्तसामन्तवक्त्रशतपत्रैकपात्रीकृतविमलमणिपाद-

ཉམས་ཀྱི་དགའ་མའི་རྩེ་དགའི་དམོད་པ་བཞིན་དུ་གྱུར་པ། དྲི་མ་མེད་པའི་ནོར་བུའི་ཀོང་སྟེགས། མཐའ་ཡས་པའི་རྒྱལ་སྲན་གྱིས་རབ་དུ་བཏུང་བའི་བཞིན་གྱི་པདྨའི་གཟུགས་ཅན་སྣང་གཅིག་དུ་བྲུས་པ། ལེགས་བྲུས་དགེ་བའི་པདྨོ་ཉམས་པར་གྱུས་པར་བྱེད་པའི་ཉིན་མོའི་དབང་ཕྱུག་རྩལ་ཡོད་དང་བཙོན་འགྲུས་དང་སྒྲོ་བ་ཆེན་པོ་རབ་དུ་གྱུས་པའི་ནགས་ཚལ་གྱི་གདོང་ལྔ་པ་དཔལ་ལྷ་སྐྱ་ངན་མེད་པ་ཡིས། རྗེ་འཛོག་གི་དབང་པོ་དཔལ་གླང་པོའི་ཉ་བ་ལ་ཡང་དག་པར་རྫོགས་པར་བྱེད་པ་འདི་ལྟ་སྟེ། བདག་གི་བུའི་བཞིན་དང་ལྡན་པའི་དགྲ། ཁྲེལ་མེད་ཅིང་ངན་པའི་སྤྱོད་པ་ལ་བྱམས་ལ་ཡོངས་སུ་སྐྱག་པའི་སྤྱོད་པ་ཅན། མི་གཙང་ཞིང་བསྣུན་བཅོས་ལ་སྣང་བ་མིག་གི་འདབ་བསྒྱུ་བའི་རྐང་མ་ལ་མངོན་པར་སྤྲེད་པའི་དུག་གི་སྣོད་དུ་བྱེད་པ་སྡིག་པའི་རྗེས་སུ་མཐུན་པའི་གཟུགས་དང་ལང་ཚོ་དང་སྒྲོ་བ་དང་རྩལ་ཡོད་དང་ལྡན་པ། སྐྱེ་བོ་མིའི་ལག་འགྲོ་འདི་མིག་གི་ནོར་བུ་རབ་དུ་སྦྲུང་སྦྲེ་གོས་དང་བྲལ་བར་བསྐྲད་པར་མཛོད་ཅིག།

ཅེས་པ་བདག་གི་འབད་པས་དོན་དུ་གཉེར་བའོ།
སྙིང་ཡིག་དོན་ནི་རབ་བརྟགས་ཉམ་དཔྱད་ནས།
བརྩེ་ལྡན་བརྩེ་བས་ཉམ་པར་འགེམས་བྱེད་ཅིང་།
གཞོན་ནུ་ལ་མཛའ་མི་བདག་ལ་འཛིགས་པས། 91

མི་བདག་ཡིད་ནི་ཁྲོགས་ལ་བདེག་པར་གྱུར།
མཆི་མས་འཁྲུགས་ཤིང་ས་ལ་བལྟ་བ་དེ།
གཞོན་ནུ་དེ་ན་གནས་པས་མཐོང་གྱུར་ནས།
འདི་དག་ཅི་ཞེས་ཐེ་ཚོམ་གྱིས་གཟིར་གྱུར། 92

पीठः सुहृत्कुलकमलविकाशवासरेश्वरः स्फीतसौर्य्यमौर्य्य-महावंशवनपञ्चाननः श्रीमदशोकदेवस्तक्षशिलाधिपं श्रीकुञ्जरकर्णं सम्बोधयति। यथा—

एष मे निरपत्रपः कुचरितमैत्री परित्यक्तचारित्रः पुत्रमुखशत्रुरपवित्रः शास्त्रविद्वेषी पितृकलत्राभिलाषविषपात्रीकृतनेत्रशतपत्रः पापानुरूपरूपयौवनोत्साहसाहसः समुत्पाटितलोचनमणिर्निर्वसनो निर्वास्यतां जननीजनभुजङ्ग इत्यस्मदभ्यर्थनाप्रणयः॥

लेखार्थमित्युग्रतरं विचार्य्य
निवार्य्यमाणः कृपया कृपालुः।
प्रीत्या कुमारस्य नृपस्य भीत्या
दोलायमानो नृपतिर्बभूव॥ ९१॥

तत्र स्थितस्तं क्षितिमीक्षमाणं
निरीक्ष्य वाष्पाकुलितं कुमारः।
किमेतदित्यागतसंशयार्त्तिः
स्वयं समादाय ददर्श लेखम्॥ ९२॥

བརྟན་པའི་སྤྱོད་ཚུལ་གཡོ་མེད་དེ་ཡིས་བསམས།
རི་ཞིག་ཕ་ཡི་བཞེད་འདི་འགོང་མི་བྱ།
དེ་ཁྲིམས་འཇིགས་ལས་མི་བདག་འདི་ཡང་བསྲུངས།
རྒྱལ་པོ་རྗོན་གྱི་གནོད་པས་ཁྲིམས་མེད་ཀྱང་། 93

དག་པ་བརྗོད་པས་རབ་ཏུ་དང་མི་འགྱུར།
མིག་ནི་ཡོངས་བཏང་བདེ་སླད་ཡབ་ཀྱི་ནི།
ཁྲོ་བའི་མེ་གདུང་རབ་ཞི་བདག་གིས་བྱ།
ས་བདག་འདི་ཡང་དེ་ཡི་བཀའ་བཅག་ལས། 94

སྐྱེས་བའི་གདུང་བ་གྱུས་པར་མི་འགྱུར་རོ།
མི་བདེན་མི་གཙང་རང་བཞིན་ལུས་དག་ལ།
མིག་ནི་ཆུ་ཡི་ཐིགས་པའི་ནོམ་འགྱུར་གཟུགས།
ཙ་སྒྲོན་གཟུགས་བརྟན་སྐད་ཅིག་རབ་གསལ་བ། 95

དེ་ལ་ངེས་པར་ཡོན་དན་ཅི་ཞིག་གནས།
གང་ཞིག་བལྟ་ཐོབ་ལ་ཆགས་འཇིག་རྟེན་ར།
ཤིན་ཏུ་རབ་འབད་མིག་ནི་ཡང་དག་བསྲུངས།
དེ་དག་གཟུགས་དེ་རབ་གཡོ་མིག་འཕྲུལ་དང་། 96

आज्ञां गुरोर्दुःसहदुर्ग्रहां तां
निश्चित्य मिथ्योत्थिततीव्रमन्योः ।
तस्मिन्नसह्यव्यसनोदयेऽपि
सोऽचिन्तयन्निश्चलधैर्य्यवृत्तिः ॥ ९३ ॥

इच्छा पितुस्तावदियं न लङ्घ्या
रक्ष्यश्च तत्कोपभयान्नृपोऽयम् ।
मिथ्यापराधात् कुपितोऽपि राजा
प्रसादमायाति न शुद्धवादैः ॥ ९४ ॥

नेत्रे परित्यज्य पितुः करोमि
कोपाग्नितापप्रशमं सुखाय ।
अस्यापि तच्छासनभङ्गजन्मा
महीपतेर्मा व्यसनोदयोऽभूत्[1] ॥ ९५ ॥

विनश्वरे क्लेदमये शरीरे
चक्षुर्जलस्तोकविकाररूपम् ।
का नाम तस्मिन् क्षणिकप्रकाशे
तृणप्रदीपप्रतिमे गुणास्था ॥ ९६ ॥

---

१ $\frac{W}{2}$ ०दयोऽस्तु ।

རྨི་ལམ་འཕྲེང་གྲོགས་རྟེན་མེད་རི་མོའི།
ཡུན་རིང་འདི་སྤྱད་མི་དབང་སྨྲས་བོ་ཡིས།
རྒྱལ་པོ་དེ་ནི་བཞེད་མིན་ཕྱིན་ཕྱོགས་ཤིང་།
སྐྱེ་བོ་མཆི་མར་བཅས་པས་བཟློག་གྱུར་ཀྱང་། 97

དེར་ནི་མིག་དག་ཉམས་པར་བྱེད་དུ་བཅུག།
གདུག་པའི་སྐྱེས་བུ་ནོར་ལ་བཀོམ་པ་ཡིས།
གསེར་སྲིན་མིག་ནི་རབ་ཏུ་ཕྱུང་བ་དེས།
མི་བཟློག་གླང་པོས་ཆུ་སྐྱེས་ཚོགས་བཅོམ་པའི། 98

པདྨའི་འབྱུང་གནས་ཉམ་པར་མཚུངས་པ་ཐོབ།
དེ་ཡིས་མཛའ་བོས་གསེར་གྱི་འཕྲེང་ལྷན་མ།
རྒྱལ་བར་སྦྱོར་ཚེ་ལྷན་ཅིག་དེར་འོངས་པས།
གནས་དེར་མངོན་ཕྱོགས་མིག་ནི་ཉམས་ཉམས་དེ། 99

མཐོང་བ་ཉིད་ན་སྨོངས་པས་བཅོམ་ནས་འགྱེལ།
འདུ་ཤེས་ཐོབ་ཅིང་གྱི་ཆེར་རབ་གདུང་བ།
མིག་མཛེས་རྩེ་དགའ་ལ་ཆགས་དེ་ལ་ནི།
མི་དྲག་ཉིད་བསམས་བདེན་པ་མཐོང་གྱུར་ཅིང་། 100

लोके यदालोकन-लाभ-लोभात्

संरक्ष्यते चक्षुरिति प्रयत्नात् ।

रूपं तदेतन्नरलेन्द्रजाल-

स्वप्नावलीमित्रमभित्तिचित्रम् ॥ ९७ ॥

चिरं विचार्य्येति नरेन्द्रसूनु-

स्तस्मिन्ननिच्छाविमुखेऽपि राज्ञि ।

निवार्य्यमाणोऽपि जनैः सवाष्पै-

रकारयत्तत्र विघातमक्ष्णोः ॥ ९८ ॥

हेमप्रदः क्रूरतरेण पुंसा

स वित्तलुब्धेन समुद्धृताक्षः ।

दुर्वारमातङ्गहृताब्जपुञ्ज-

पद्माकराकारतुलामवाप ॥ ९९ ॥

जयोद्यमे तत्र सहोपयाता

प्रेमोचिता काञ्चनमालिकास्य ।

तं देशमभ्येत्य विनष्टनेत्रं

दृष्ट्वैव तं मोहहता पपात ॥ १०० ॥

རྒྱུན་ཞུགས་འབྲས་ཐོབ་བདེན་པ་དེས་སྨྲས་པ།
མཛེས་མ་འཁྲུགས་པ་ཉིད་ལས་བདེན་པ་བསྟེན།
རྨོངས་དང་དམན་གྱིས་སྐྲག་པར་མ་བྱེད་ཅིག།
སྡིག་ཆགས་ཉོམ་ཀྱིས་རང་ལས་འབྲས་བུ་ནི། 101

འཛིགས་པ་ངེས་པར་སྐྱུད་པར་བྱ་བ་ཡིན།
ད་ནི་དབེན་པར་ཡོང་བ་ང་ཉིད་འགྲོ།
ཁྱོད་ཀྱི་ཉོན་མོངས་མི་བཟོད་གཉེན་ཁབ་སྟེན།
སྐལ་བཟང་ཡོངས་སྐྱོད་འབྲལ་བའི་སྙིང་པོ་ནི། 102

འཁོར་བའི་རང་བཞིན་སྒྱུ་ངན་ཡོངས་མི་བྱ།
ཞེས་སྨྲ་དེ་ལ་འབྲལ་བའི་འཛིགས་པ་ཡིས།
ཡོངས་འདར་ལུས་ཅན་བརྩུན་མོས་རབ་སྨྲས་པ།
རང་སེམས་སྡུག་བསྔལ་ལ་བཙོངས་ནུ་མ་ལ། 103

མིག་སྨན་གྱིས་སྤོ་མཆི་མས་འབྲི་བ་བཞིན།
བདག་ནི་རྗེ་ཡི་སྲས་ཁྱོད་ཡོངས་མི་གཏོང་།
གང་ཞིག་གོད་ཚོ་རང་བདག་གཟུགས་གཞན་གྱུར།
རྒྱུན་དང་ཚུལ་ཁྲིམས་བཞིན་དུ་གཏོང་བ་འདི། 104

अवाप्तसञ्ज्ञां विपुलप्रलापां
तां नेत्रलावण्यविलासलुब्धां ।
अनित्यताचिन्तनदृष्टसत्यः
स्रोतःफलाप्त्या स जगाद धीरः ॥ १०१ ॥

मुग्धे धृतिं संश्रय विक्लवत्वा-
न्मामोहदैन्योदयकातरा भूः ।
अवश्यभोग्यानि भवन्ति भीरु
स्वकर्म्मणामेव फलानि जन्तोः ॥ १०२ ॥

अन्धोऽधुनाहं विजनं व्रजामि
क्लेशासहा त्वं श्रय बन्धुगेहम् ।
कार्यो न शोकः सुभगोपभोग-
वियोगसारो हि भवस्वभावः ॥ १०३ ॥

इति ब्रुवाणं तमुवाच जाया
वियोगभीता परिकम्पिताङ्गी ।
लीनाञ्जनास्रैः कुचयोर्लिखन्ती-
दुःखस्य विक्रीतमिव स्वचित्तम् ॥ १०४ ॥

བུད་མེད་ཚོམས་ཀྱི་རིགས་འོས་བརྟུལ་ཞུགས་མིན།
དགེ་བའི་བརྟུལ་ཞུགས་མཛའ་སྐྱད་ཉོར་ལྡན་ལ།
སྐྱད་འཚོང་ཚོམས་ཀྱང་འབད་ནས་སྤྱིན་པར་བྱེད།
བདག་པོ་སྐྱོད་སྒྱུར་དག་ཚོམས་ལྷག་པར་མཛའ། 105

སྐྱེ་བོ་ཆེ་ཚོམས་སྐྱོང་བ་དག་ལ་བཞིན།
མིག་ནི་ལོང་བའི་རབ་མཆོག་འབར་བ་སྟེ།
སྐྱོད་པའི་གདུང་བས་ངལ་ལ་གྲིབ་བསིལ་བཞིན།
གནས་ཉམས་སྐྱེས་བུ་ཚོམས་ཀྱི་མི་བཟད་ལ། 106

གྲོགས་ནི་ཆུང་མ་དང་མཚུངས་ཡོད་མ་ཡིན།
དེ་ལྟར་འབད་པས་དོན་གཉེར་རྒྱལ་པོའི་བུ།
སྤྱོད་གཡོགས་རྒྱལ་པོ་ཙམ་ལྷག་བརྟེན་པ་དང་།
ཞབས་ཟུང་ལ་གདུགས་ཆུང་མ་དེ་དང་ཡང་། 107

ལྷན་ཅིག་ཉིད་དུ་དལ་གྱིས་སོང་བར་གྱུར།
རྒྱུད་མང་སྐྱོང་མཁས་གླུ་སྙན་ལེན་མཁས་དེས།
དང་པོར་དེ་ཚེ་ལམ་དུ་འཚོ་བ་ཐོབ།
སྐྱོད་ན་བསོད་ནམས་འབྱོར་ན་རྩེ་འཛེ་ཡིས། 108

त्यजामि न त्वामहमार्य्यपुत्र
नैतत् कुलार्हं व्रतमङ्गनानाम्।
यदापदि स्वं पतिमन्यरूपं
विभूषणं शीलमिव त्यजन्ति॥ १०५॥

सतीव्रतं वित्तवतां प्रियाय
यत्नेन वेश्या अपि दर्शयन्ति।
पतिः सतीनामधिकं प्रियस्तु
विपन्नतोऽर्थीव महाजनानाम्॥ १०६॥

यष्टिः प्रनष्टा नयनान्धकारे
छाया विपत्तापपरिश्रमेषु।
पदच्युतानां विषमेषु पुंसां
नास्त्येव जायासदृशः सहायः॥ १०७॥

इत्यर्थितः पादयुगे निपत्य
पत्न्या प्रयत्नादथ राजपुत्रः।
सहैव जीर्णांशुकमात्रशेष-
स्तया च धृत्या च शनैर्जगाम॥ १०८॥

སྒྲུ་ཙོལ་མཚུངས་པའི་ནོར་ནི་མི་ལ་མེད།
བྱུང་བའི་འཕྲེང་བ་མོས་པའི་སྒྲ་ལྷ་བུ།
གྲོད་མང་སྒྲ་བརྟན་ནོ་བའི་བདུད་རྩི་ཡིས།
བྲན་བཞིན་བསོད་སྙོམས་སྤྱོང་དེ་ཆུང་མ་དང་། 109

* * * *

* * * *

* * * *

ལྷན་ཅིག་ཁྲིམ་ནམས་སུ་ཞུགས་བླུ་བླངས་པ། 110

སྐྱེ་བོ་ཟླ་མ་ཁྲོས་པས་རབ་བསྐྱུན་སྒྲ་གཅན་གྱི་ནི་མཐུ་ཡིས་ཉི་མ་ནམ་པར་ཉམས་བྱས་ཞིང་། བདེན་མེད་ཡོངས་སུ་སྨྲ་བའི་ནམ་པར་བསླད་པ་ནག་ཕྱོགས་ཉིན་གྱིས་སྤྱོད་བས་ཟླ་བ་ཟད་པར་བྱས། ཡོན་དན་ལྡན་པའི་ཚོགས་ལ་སྨྲུན་འབྲིན་ལྷུང་བས་ཡོན་དན་མཆོག་གི་རིན་ཅན་འོད་ཀྱིས་དབྱུལ་བར་འགྱུར། རབ་མང་ཉིས་བྱུས་ཡོངས་སུ་སྨིན་པའི་ཆླུང་གིས་བསྐྱུན་པས་མིག་གི་སྒྲོན་མ་དག་དང་བྲལ་གྱུར་པ། སྲིད་པའི་རྒྱ་འཛིན་ཆེ་ལ་གློག་བཞིན་ཤིན་དུ་གཡོ་བའི་དཔལ་གྱི་ནམ་པ་དག་དང་བྲལ་ནམས་ལ། བསོད་ནམས་དག་གིས་སླར་ཡང་དམ་ཆོས་ངན་པར་གྱུར་པའི་སྣང་བ་གསར་པ་རབ་ཏུ་སྤྲོ་བར་བྱེད། 113

वीणाप्रवीणः स सुगीतगीतः
पूर्व्वं तदा वर्त्मसु वृत्तिमाप।
विपत्सु पथ्यं विभवे विलासः
कलासमं नास्ति धनं नराणाम्॥ १०९ ॥

मत्तालिमालाकणितोपमेन
वीणास्वनेन श्रवणामृतेन।
सिक्तः स भिक्षाप्रणयी प्रविश्य
गेहेष्वगायद्दयितासहायः॥ ११० ॥

गुरुजनकोपसमुद्गमराहुनिगीर्णप्रभावहर्म्याणाम्।
वितथपरिवादविक्लवकृष्णदिनक्षपितचरितचन्द्राणाम्॥ १११ ॥
गुणिगणदूषणनिपतितगुणवररत्नप्रभादरिद्राणाम्।
बहुतरदुष्कृतपरिणतिपवनाहतिविगलितनेत्रदीपानाम्॥ ११२ ॥
भवविपुलजलदविद्युत्तरलतरश्रीप्रकाशरहितानाम्।
पुण्यैः प्रसरति पुनरपि धर्म्मस्मरणनवालोकः॥ ११३ ॥

སྒྲ་ཙོལ་དང་ལྷན་མིག་གིས་དབེན་པ་དེ།
གླུ་ལེན་སློང་ཞིང་འཚོ་བས་དུས་འདས་ནས།
ཡབ་ཀྱི་གྲོང་ཁྱེར་པཱ་ཊ་ལི་པུ་ཏ་ར།
འཁར་བ་ལ་བཞིན་ཆུང་མར་བརྟེན་དེ་སོང་། 114

རིང་པོའི་སྡུག་བསྔལ་ལམ་གྱིས་ལུས་དམན་ཞིང་།
བཞིན་པད་དག་གིས་ཀྱང་དང་ཚ་བ་འཐུངས།
གཞོན་ནུ་མཛེས་མ་དང་འགྲོགས་དེ་མཐོང་ནས།
སྐྱེ་བོས་ཡིད་བསྒྲུབས་དམོད་པས་ཉམས་པར་ཤེས། 115

དཔལ་གྱིས་རྒྱལ་པོའི་ནགས་ཚལ་འཁྲིང་ཉེ་བར།
ཁྲིན་ཅིང་སྐད་ཅིག་ངལ་གསོ་དོན་གཉེར་དེ།
ཚུབ་མོར་སྨྲ་བྱེད་སྐྱེད་ཚལ་སྐྱོང་ཉམས་ཀྱིས།
བཀྲ་མི་ཤིས་ཕྱིར་རབ་ཏུ་བཀག་གྱུར་པ། 116

གནས་མེད་གནས་ནི་འཚོལ་བར་བྱེད་པ་དེས།
མི་ཡི་བདག་གི་གླང་པོའི་གནས་སུ་ཞུགས།
རྒྱུད་མང་རྩེད་མོ་ལ་གུས་དགེ་མཚན་གྱིས།
གླང་པོ་སྐྱོང་བ་དག་གི་གོ་སྐབས་ཕྱིན། 117

कालं कलावाननतिवाह्य गायन्
पौण्ड्रान्यवृत्तिः स विवेकचक्षुः ।
ययौ प्रियां यष्टिमिवावलम्ब्य
पितुः पुरं पाटलिपुत्रमेव ॥ ११४ ॥

तं दीर्घदुःखाध्वदरिद्रदेहं
शीतातपापीतमुखाब्जवर्णम् ।
कान्तासखं वीक्ष्य जनः कुमारं
शापक्षतं मन्मथमेव मेने ॥ ११५ ॥

शनैः स राजोपवनावलीनां
समीपमाप्तः क्षणविश्रमार्थी ।
उद्यानपालैः परुषप्रलापै-
रमङ्गलत्वात् प्रतिषिध्यमानः ॥ ११६ ॥

निःसंश्रयः संश्रयमीहमानः
स हस्तिशालां नृपतेर्विवेश ।
वीणाविनोदादरकौतुकेन
दत्तावकाशः परिपालकेन ॥ ११७ ॥

དེར་ནི་འོང་བ་དེ་མཐོང་ཞེས་གྱུར་པའི།
གླང་པོའི་དབང་པོས་གདོང་ནི་ཡོངས་བསྐོར་ཅིང་།
དེ་ལ་ལེགས་འོངས་འདྲི་བཞིན་སྒྲ་ཆེན་བསྒྲགས།
གཙུག་ལྷན་རྩེ་བའི་ཚོགས་ཀྱི་གར་དག་སྤྲུལ། 118

དེ་ནི་གླང་པོའི་སྒྲ་ཡི་མི་གཡོ་ཞིང་།
འཁྲུལ་པ་མེད་མཐོང་ལག་ལྷན་བདག་པོ་ཡིས།
གྱི་མ་སྙིང་སྟོབས་གྱི་མཚོ་རབ་མི་འདར།
གྱུལ་རིགས་བཟང་པོ་འདི་ནི་སུམ་ཞེས་སྨྲས། 119

གླང་པོར་མངོན་ཕྱོགས་གསེར་གྱི་ཕྲེང་ལྷན་མ།
དཔལ་འབྱོར་མངོན་པར་ཁེངས་པ་དྲན་གྱུར་ཏེ།
འཕྲལ་ལ་མཆི་མ་འཛག་ཅིང་ཤུགས་རིངས་འབྲིན།
ཁྲོ་ཡི་ཞབས་དག་ཉེད་ཅིང་རབ་སྨྲས་པ། 120

གླང་པོའི་སྒྲ་ཡིས་ལག་ལྷན་བདག་པོ་ཁྱོད་ཀྱི་མདུན་ན་གང་།
སྨིན་གྱི་བསམ་པས་གཡོ་ལྷན་གཙུག་ཕུད་ཅན་ནི་གར་རབ་བྱེད།
མ་བུ་འདི་དག་གཞོན་ནུའི་མ་བུའི་རིགས་ལས་འཁྲུངས་པ་སྟེ།
ཚོགས་ཀྱི་བདག་པོས་སྒྲ་བསྒྲགས་ཚེ་ཡང་ནམ་པར་འགྱུར་བ་མེད། 121

तत्रान्धमालोक्य निबद्धसंज्ञ-
स्तं कुञ्जरेन्द्रः परिवृत्तवक्त्रः ।
तत् स्वागतायेव घनं जगर्ज्ज
क्रीडाशिखण्डिव्रजदत्तनृत्यः ॥ ११८ ॥

तं निश्चलं कुञ्जरगर्जितेन
निःसम्भ्रमं हस्तिपका विलोक्य ।
अहोनु सत्त्वोदधिरप्रकम्प्यः
सुलक्षणियः कोऽप्ययमित्यवोचन् ॥ ११९ ॥

गजोन्मुखी काञ्चनमालिकापि
निश्वस्य दीर्घं सहसोदिताश्रा ।
ऊचे स्मृतश्रीविभवाभिमाना
संवाहयन्ती चरणौ प्रियस्य ॥ १२० ॥

नृत्यन्ति ये तव पुरः शिखिनो घनाशा-
लोलाः परं करिपतिव्रजगर्जितेन ।
कौमारवर्हिकुलसम्भव एष वर्ही
गर्जत्सु णो गणपतेरपि निर्विकारः ॥ १२१ ॥

དེ་ནས་ཆགས་ལྡན་གཡོ་བའི་སྤྲིན་མཚམས་ནི།
སྐྱོན་ལ་མངོན་ཕྱོགས་ཞེ་སྡང་ལྡན་བཞིན་འོངས།
མིག་ལྡན་འཚོ་བར་གྱུར་པའི་ཉི་མ་བཅོམ།
སྐྱེ་བོ་མུན་པ་ནམ་པར་གྱིས་པར་བསྒྲུབས། 122

པདྨོའི་འབྱུང་གནས་ཆུ་སྐྱེས་བཞིན་ཟུམ་པ།
ཕུན་ཚོགས་བྲལ་ཞིང་དམན་པ་མཐོང་གྱུར་ནས།
བུང་བའི་འཕྲེང་བ་མྱ་ངན་གྱིས་ཟིལ་མནན།
ངེས་པར་སྨྱོང་བྱའི་རང་བཞིན་བླ་ལེན་བཞིན། 123

ཀུན་གསལ་ནོར་བུའི་སྒྲོན་མ་གཅིག་བུ་ཉིད།
ཉི་མ་འདས་ཚེ་མར་མེ་སྡོང་འབུམ་གྱིས།
ཉིན་མོའི་སྣང་བ་ཆ་ལ་མཚུངས་མ་གྱུར།
གང་ཕྱིར་ཆེན་པོའི་གཟི་བྱིན་ཀུན་ལས་ལྷག། 124

རྒྱལ་ཁང་ནོར་བུ་གསེར་གྱི་བ་གམ་ཅན།
རབ་གསལ་དེ་ནི་མུན་ལ་རབ་མཛེས་དེ།
བདག་པོ་རྒྱུད་ཚེ་གུས་བས་ཕན་པ་ཉིད།
སྒྲུབ་བྱེད་ཚུལ་ཁྲིམས་རྒྱན་ལྡན་དགའ་པ་བཞིན། 125

ततः सरागा चपलाभिपत्य
दोषोन्मुखी द्वेषवतीव सन्ध्या ।
हत्वा रविं लोचनजीवभूतं
विबद्धमान्ध्यं विदधे जनस्य ॥ १२२ ॥

लक्ष्मीवियोगग्लपितं विलोक्य
पद्माकरं सङ्कुचिताननाब्जम् ।
शोकाभिभूता भवितव्यताया
जगौ स्वभावं भ्रमरावलीव ॥ १२३ ॥

विश्वप्रकाशैकमणिप्रदीपे
याते रवौ दीपसहस्रलक्षैः ।
नाभूद्दिनालोकलवानुकारः
सर्व्वातिरिक्तं महतां हि तेजः ॥ १२४ ॥

सा राजधानी मणिहेमहर्म्यैः
प्रकाशमाना तिमिरे रराज ।
भक्त्येव भर्त्तुर्विहितोपकारा
कष्टे च शीलाभरणा सतीव ॥ १२५ ॥

རབ་རིབ་རབ་ཀྱིས་གཙོ་བོ་ཉིད་ཐོབ་དེས།
མ་ལུས་འཇིག་རྟེན་སྣང་བ་མེད་གྱུར་ནས།
ཟླ་བ་འཆར་རྩོམ་འཇིགས་པས་ཟིལ་མནན་ཏེ།
དལ་བུ་ཡིས་ནི་ཡིབ་པ་བཞིན་དུ་གྱུར། 126

དེ་ནས་ནག་པོའི་མཚན་མའི་རི་མོ་ནི།
འཕྲིན་གྱི་དང་རྩོལ་ཡིག་འཕྲེང་རིབ་བཀོད་པ།
ཀུ་མུད་ཅན་དགའི་ལེགས་ཁྲུས་བསིལ་ཟེར་ཅན།
པདྨོའི་འབྱུང་གནས་དཔལ་འཕྲོག་སྤྲིང་ཡིག་བྱུང་། 127

བདུད་རྩིའི་ཟེར་དཀར་ཡིད་འོང་པད་ཙ་ཡི།
འཁྲི་ཤིང་ཀྲུ་གུ་གསར་དབྱིབས་འོད་རིས་ཀྱི།
འོ་མའི་འོད་ལྡན་མཛེས་པའི་གོས་དཀར་གྱིས།
གྲགས་པས་བཞིན་དུ་ཐམས་ཅད་ཁྱབ་པར་བྱེད། 128

དེ་ནས་མཚན་མོའི་ལང་ཚོ་ཉམས་གྱུར་ཅིང་།
ཟླ་བ་མཁའ་ལ་དལ་གྱིས་བབས་པའི་ཚེ།
སྐྱེ་དངས་ཉམས་པས་ནམ་པར་གཉིད་སད་པའི།
གཞོན་ནུ་ལ་ནི་སྤྲང་པོ་འཛིན་པས་སྨྲས། 129

लब्धाधिकारा तिमिरोन्नतिः सा
कृत्वा निरालोकमशेषलोकम् ।
इन्दूदयारम्भभयाभिभूता
निलीयमानेव शनैर्बभूव[1] ॥ १२६ ॥

अथाययौ श्यामललक्ष्मलेखा-
सन्देश[2]लीलालिपिसन्निवेशः ।
कुमुद्वतीहर्षसुहृत्सितांशुः
पद्माकरश्रीपरिहारलेखः ॥ १२७ ॥

अपूरयत्कान्तिसितांशुकेन
शुचिः सुधांशुर्यशसेव विश्वम् ।
दुग्धत्विषा मुग्धमृणालवल्ली-
नवाङ्कुराकारमयूखलेखः ॥ १२८ ॥

ततः क्षपायां श्लथयौवनायां
शनैः शशाङ्के दिवि लम्बमाने ।
क्लैव्यक्षयान्नागमस्ततो विनिद्रा
निद्रायमानं जगदुः कुमारम् ॥ १२९ ॥

१ W_1 omits this verse. २ H has सन्देह० ।

དྲི་ཟ་ཅན་ཡོངས་མི་འམ་ཅི་ཉམས་ཀྱི།
མཛེས་མ་བཞིན་ནི་ཕང་དུ་རབ་བཀོད་ནས།
སེན་མོ་བདབ་བསྐྱོད་ཡིད་འོང་སྙན་སྒྲོག་ཤིང༌།
གླུ་དང་རྒྱུད་མང་འགའ་ཞིག་མི་ལེན་ནམ། 130

ཞེས་སྨྲ་གྲོགས་ཤིང་འཕྲུར་བ་དེ་དག་གིས།
རྗེས་བསྐུལ་དལ་ཞིང་གཉིད་ཀྱིས་གཟིར་གྱུར་པ།
དམན་པའི་ཚིག་གིས་རབ་གདུངས་ཡིད་བྱུང་བས།
རྒྱུད་མང་བླངས་ནས་ཡུད་ཙམ་རབ་བསམས་པ། 131

ཀྱི་མ་སྡུག་གི་ཚོགས་ནི་བརྩེ་མེད་དག།
ཁྲག་ལ་སྨོམ་ཞིང་ཉེ་བར་ལྷགས་པ་དང༌།
རྒྱལ་པོའི་འབང་ནི་སྲོས་པའི་ཚོགས་བཅས་དེ།
སྨོད་ཙུབ་བརྗོད་པས་བཟུང་བ་འཚོམ་ཡིན། 132

ང་རྒྱལ་ཉམས་སྤྱོང་ངོ་ཚ་སླུབ་པར་བྱེད།
བདེ་བ་འཇོམས་བྱེད་གདུང་བ་སྐྱེས་པར་བྱེད།
མི་བཟོད་སྡུག་བསྔལ་གདུད་པ་སྐྱེད་བྱེད་པ།
དམན་པའི་བསྟན་པ་དང་མཚུངས་སྒྲ་ངན་མེད། 133

उत्तिष्ठ गान्धर्व्विक किन्न वीणा-
मङ्कं समारोप्य कलं क्वणन्तीम्।
कान्तामिवैतां नखघातलोलां
गीतिं नवीनां वितनोषि काञ्चित्॥ १३०॥

इति प्रलापैः श्रमनिद्रयार्त्तः
स तैर्म्मदोद्धैरनुबध्यमानः।
आदाय वीणां विमलां मुहूर्त्त-
मचिन्तयन्नीचवचःप्रतप्तः॥ १३१॥

जीवत्यहो व्याघ्रगणैर्न्निषक्तै-
राघ्रातरक्तैरघृणैर्गृहीतः।
क्लीवैरधिक्षेपकटुप्रलापै-[१]
राबद्धपेटैर्न तु राजचेटैः॥ १३२॥

निहन्ति मानं विदधाति लज्जां
छिनत्ति शर्म्माणि तनोति तापम्।
असह्यनिर्व्वेदविपद्विधायी
न नीचसेवासदृशोऽस्ति शोकः॥ १३३॥

१ H and W_2 ०क्षेपकटुःप्रलापैः।

དམན་པའི་ཚིག་དེ་ཡང་ཡང་དེས་བསམས་ནས།
སྨད་པའི་གདུང་བ་ཚ་བའི་མེས་རེག་པས།
ཤུགས་ཕྲུང་དུས་ནི་འཕང་བར་མཐོང་འདོད་པས།
དལ་གྱི་རྒྱུད་མང་དག་ནི་སྦྲིད་ཞིང་བླངས། 134

ཁེངས་པ་རབ་འཛོམས་དྲེགས་དང་ནོར་ཉམས་བདེ་ཕྲག་དུ་ནི་ཉེ་བར་སོང་།
ཚུལ་ལུགས་མིན་དང་ངུ་བའི་སྤྱོད་དང་འབྲིད་པར་བྱེད་དང་སྐྱོན་ཅན་དང་།
གནད་དུ་རེག་པའི་གདུང་བ་མི་བཟོད་ཉོན་མོངས་ཟུག་རྔུ་ལྟར་སྤྱོད་པས།
ཀྱེ་མ་འཁོར་བ་དག་ནི་མི་བསྲུན་ཚུལ་གྱིས་སྤྲུར་བའི་རྩེ་དགའ་བྱེད། 135

སྙིང་གིས་རབ་བསྐྱོད་འཁྲི་ཤིང་རབ་ཏུ་གཡོ་བའི་འདབ་རྩེ་ལྟར་མི་བརྟན།
སྲིད་པ་འཁོར་བས་ཀྱེ་མ་སྐྱེས་བུ་རྣམས་ལ་རྨོངས་པ་རབ་བརྟེན་བྱེད།
ཆུས་གང་སྐྱེ་བའི་སྤྲིན་ཚོགས་ཡང་དག་འདུས་པས་རབ་བཅོམས་གློག་གི་ནི།
རྩེ་དགའི་ཉམས་ལྡན་དཔལ་འབྱོར་འདི་དག་དེ་ལ་ཡང་ནི་ལྷག་པར་གཡོ། 136

སྐྱེས་བུ་རྣམས་ཀྱི་རྒྱུད་པ་མཐའ་དག་བསྲུང་བའི་རིན་ཅན་ཚུལ་ཁྲིམས་ནི།
རབ་གསལ་བདུད་རྩིའི་རང་བཞིན་དྲི་མེད་གལ་དེ་ཆ་ཡང་མ་ཉམས་ན།
འབྱོར་པ་དང་བྲལ་ཉན་མོངས་ཀྱིས་ཉེན་འདྲེན་བྱེད་མ་ཚངས་འབྲུ་བོ་དང་།
སྐྱུག་པར་བདེ་བའི་མཇུག་ཏུ་ཡང་ས་ཆེན་པོར་ལྷུང་ཡང་ཉམས་པར་མཛེས། 137

मुहुर्विचिन्त्येति स नीचवाक्यं
लीनावमानव्यसनाग्नितप्तः।
निश्वस्य कालक्षपणाभिकाङ्क्षी
शनैरगायत् कलयन् विपञ्चीम्॥ १३४॥

मानोन्माथैः प्रथितविभवभ्रंशहेलोपहासै-
र्निर्मर्य्यादैरुचितचरितोत्पाटनैः सापवादैः।
मर्म्मस्पर्शव्यसनविषयक्लेशशल्यायमानै-
र्हा संसारः खलकलनया नर्मलीलाः करोति॥ १३५॥

विचलदनिलोद्वेल्लद्वल्लीदलाञ्चलचञ्चलः
स्थिरतरमहामोहं पुंसां करोति भवभ्रमः।
अधिकतरलास्तत्राप्येता जलाविलसम्मिल-
ज्जनघनवनप्रोद्यद्विद्युद्विलासरसाः श्रियः॥ १३६॥

विभवविरहक्लेशक्रान्तः सुखान्तमहावटे
नयनविकलः पङ्गुर्मूकश्च्युतोऽपि विराजते।
सकलविपदां रक्षारत्नं प्रकाशसुधामयं
यदि न विमलं शीलं पुंसां मनागपि खण्डितम्॥ १३७॥

རྩྭ་དང་ཐང་ཡང་དབྱུག་པས་རིག་ཅིང་མཐའ་དག་རིག་པའམ་རྡི་དག་གིས་རྡོགས་ལ།
སྨྲོ་གྲོགས་ཀྱིས་ནི་བགྲོད་དགའི་ལམ་ཀུན་རིག་ཅིང་ཐོས་ནས་གཞན་དུ་བདག་འགྲོ་སྟེ།
སྐྱོངས་པས་ལོང་ཞིང་ཚོག་པའི་སྐྱེ་བོ་འདི་དག་ཡིད་བརྟན་དབུས་སུ་ཆགས་གྱུར་པའི།
འཇིགས་རུང་དགྱལ་བའི་ཉོན་མོངས་མི་ཤེས་སོ་ཞེས་ལོང་བས་རབ་མང་ཅོ་འདྲི་བཞིན།
138

དེ་ལྟར་བདག་ཉིད་སྤྱོད་པའི་རྗེས་མཐུན་འཇུག།
ཡིད་འོང་ཉམས་ལྡན་དེ་ཡི་གླུ་བླངས་ཚེ།
མཚན་མོའི་མ་རྟོག་ཏུ་ས་བདག་ཁང་བཟང་ན།
གཟིམས་པ་འཕྲད་ལངས་ནས་རབ་ཏུ་བསམས། 139

རྟག་ཏུ་རྨི་ལམ་ངན་པ་མཐོང་ཉིད་ཀྱིས།
རྟོགས་པའི་རྒྱུ་བོས་བདག་ནི་རབ་ཏུ་འཁྲུགས།
གཞོན་ནུ་རྗེ་འཇོག་མ་གནས་ད་ལྟ་ཡང་།
བདག་ལ་སྙིང་ཡིག་ཅི་ཕྱིར་ཡོངས་མི་སྙིང་། 140

རྟག་ཏུ་མི་བརྗེད་ཉེ་བའི་བཞིན་རས་ལ།
མངོན་ཕྱོགས་དེ་ཉི་ང་ཉིད་བརྗེད་དམ་ཅི།
ངས་པར་ཡུན་རིང་བྲལ་བས་སྐྱེ་བོ་ནི།
མཛའ་བའི་རྗེས་སུ་འཆི་རབ་སྨོད་པར་འགྱུར། 141

यष्ट्या वेद्मि जलं स्थलं सशकलं स्पर्शेन गन्धेन वा
वुद्ध्या सर्व्वमवैमि दुर्गमपथं श्रुत्वा व्रजाम्यन्यतः।
निश्वासान्तरसक्तघोरनरकक्लेशं न जानात्यसा-
वन्धेनेति विडम्ब्यते वहुतरं मोहान्धमुग्धो जनः॥ १३८॥

इत्यात्मवृत्तानुकृतिप्रवृत्तं
गायत्युदारं सरसेन तस्मिन्।
हर्म्म्याग्रसुप्तः सहसा प्रवुद्धः
क्षपावसाने क्षितिपः प्रदध्यौ॥ १३९॥

सदैव दुःस्वप्ननिरीक्षणेन
शङ्काकलङ्कैर्भृशमाकुलोऽहम्।
अद्यापि मे तक्षशिलानिवासी
न किं कुमारः प्रहिणोति लेखम्॥ १४०॥

किं विस्मृतो नित्यमविस्मृतस्य
तस्याहमासन्नसुखोन्मुखस्य।
चिरप्रवासेन जनस्य नूनं
स्नेहानुवन्धाः शिथिलीभवन्ति॥ १४१॥

གྲམ་པས་བཅིངས་གླུ་ཡི་སྒྲ་འདི་ཡང་།
རྒྱུད་མང་དབྱངས་སྙན་གྱིས་མཚན་རབ་གསལ་བ།
དེ་ཡི་ཉིད་མཚུངས་སྙན་པའི་རྗེས་མཐུན་པ།
དྲི་ཟའི་འཇིག་རྟེན་ལས་བཞིན་བདག་གིས་པས། 142

རེ་ཞིག་གླུ་སྙད་འདི་ནི་དེ་ཉིད་ཀྱི།
ཅི་སླད་དེ་ཡིན་འདི་ཅི་ཡོངས་མི་ཤེས།
སྐད་ཅིག་ཉིད་ལྷར་ནོམ་བསམས་རྒྱལ་པོ་ཡི།
ཀུག་རུམ་བ་བདང་བུ་ནི་དེ་ནས་བོས། 143

རིང་ནས་མིག་བྲལ་དེ་ནི་འོང་བ་དག།
མཚོ་སྐྱེས་དཔལ་དང་བྲལ་བ་བཞིན་མཐོང་ནས།
རྒྱང་མར་བཙས་པའི་བུ་ནི་ཡོངས་ཤེས་དེ།
ས་ཡི་བདག་པོ་སྨོངས་པས་བཙོམ་ནས་འཁྱིལ། 144

ཁ་བའི་ཟེར་མའི་ཐིགས་འདྲ་རྒྱུས་རེག་པས།
དལ་གྱི་འདུ་ཤེས་ཐོབ་པའི་མི་བདག་དེ།
གཞོན་ནུ་ཉ་བར་འོངས་བ་ཕད་པར་ནི།
ཡང་དག་བཀོད་ནས་ཡུན་རིང་སྤྱུ་ངན་བྲུས། 145

शृणोमि चेमं गमकानुबन्धं
मूर्च्छाद्विपञ्चया मधुरस्वराङ्कम् ।
तत्तुल्यमेव श्रवणानुकूलं
गन्धर्वलोकादिव गीतशब्दम् ॥ १४२ ॥

तस्यैव तावन्मृदुगीतमेत-
न्नूढः स कस्मात् किमिदं न जाने ।
क्षणं विचिन्त्येति विसृज्य राजा
महत्तरं पुत्रमथानिनाय ॥ १४३ ॥

दूरात्तमायान्तमुदस्तनेत्र-
सरोरुहं श्रीरहितं विलोक्य ।
पुत्रं परिज्ञाय वधूसहायं
महीपतिर्मोहहतः पपात ॥ १४४ ॥

स लब्धसंज्ञः शनकैर्जलेन
हिमच्छटाशीकरदन्तुरेण ।
समीपमाप्तं नृपतिः कुमार-
मुत्सङ्गमारोप्य चिरं शुशोच ॥ १४५ ॥

འཚོ་བའི་འཇིག་རྟེན་མིག་སྒྲོ་ཀྱི་ཏྲད་བུ།
སྡུག་བསྔལ་སྐབས་འདི་ཁྱོད་ཀྱིས་ཅི་སྣང་བསྙེན།
ལྷ་ཡི་མཛེས་མ་སྨོངས་བྱེད་ཁྱོད་ཀྱི་ནི།
མིག་གི་ཆུ་སྐྱེས་ཟུང་དེ་གང་དུ་སོང་། 146

ཟབ་མོའི་ས་གཞི་ཡོན་དན་རིན་ཆེན་མཛོད།
སྙིང་སྟོབས་ཕྲུང་པོ་དབྱངས་ཅན་གྲོགས་ཁྱོད་ལས།
ཁ་བས་བཅོམ་པའི་ཆུ་སྐྱེས་ཚལ་ལས་བཞིན།
ཉམ་འཕྲུལ་ས་གཞི་དཔལ་དེ་གང་དུ་སོང་། 147

གང་དུ་གཟུགས་དེ་མི་བཟོད་ཡོང་འདི་གར།
འགྱུར་དེ་གང་དུ་གང་དུ་སྐབས་ངན་འདི།
བདག་སྙིང་མི་འགས་འདི་ལ་སུ་ཞིག་གིས།
རྡོ་རྗེའི་མན་ངག་བྱིན་པ་ཡོངས་མི་ཤེས། 148

ཁྱོད་འགྱུར་རྗེས་འབྲང་སྐྱེ་བོ་དེ་གང་དུ།
ཁྱོད་ཀྱི་ཆུང་མ་གཡོ་མེད་གཅིག་བུ་འདི།
སྡུག་ཀྱང་དམ་པའི་བརྟན་པའི་སྤྱོད་ཚུལ་བཞིན།
རིགས་ཀྱི་རྗེས་མཐུན་འཁོར་གྱི་ལྷག་མར་གྱུར། 149

हा पुत्र नेत्रोत्सव जीवलोके
कस्मादिमां दुःखदशां श्रितोऽसि।
विलोभनं तत् सुरसुन्दरीणां
क्व लोचनाम्भोजयुगं गतं ते॥ १४६॥

गाम्भीर्य्यभूमे गुणरत्नकोष
सरस्वतीवल्लभ सत्वराशे।
त्वत्तः क्व सा विभ्रमभूः प्रयाता
हिमाहताम्भोजवनादिव श्रीः॥ १४७॥

रूपं क्व तत् क्वेदमसह्यमान्ध्यं
क्व सा विभूतिः क्व च दुर्दशेयम्।
न दीर्य्यते मे हृदयं न जाने
केनास्य दत्तः कुलिशोपदेशः॥ १४८॥

क्वासौ जनस्त्वद्विभवानुसारी
कुलानुरूपा तव निश्चलेयम्।
एकैव पत्नी परिवारशेषः
कष्टेऽपि साधोरिव धैर्य्यवृत्तिः॥ १४९॥

ཞེས་པ་མཆི་མའི་རྒྱུན་གྱི་ཡི་གེ་རྣམས།
ཚ་ངེ་སླ་བ་དེ་ཡི་ཚིག་ཐོས་ནས།
དེ་ཡི་ཕང་ལས་མྱུར་དུ་སར་བབས་དེ།
གཞོན་ནུ་བརྟན་པས་དེ་ལ་བདུད་ནས་སྨྲས། 150

ས་ཡི་བགྲོ་གླིན་མྱ་ངན་ནོམ་པར་ཐོང་།
མྱ་ངན་དག་གིས་ཟིལ་མནན་བརྟན་པ་མིན།
མགོ་དང་དམའ་ནོམས་བརླག་སླད་ངེས་པར་ནི།
སྐྱོང་བྱའི་རང་བཞིན་འདི་ནི་མེལ་ཚེ་བྱེད། 151

མི་ནོམས་དབང་ཕྱུག་ངོ་མཚར་བདེ་བ་ཡི།
ནོ་གྱིན་ཅན་དང་དཔལ་མཛེས་ཐིག་ལེ་ཅན།
ལུས་ཀྱང་མཐར་བྱེད་རྩེ་བའི་ལས་རླབས་ཀྱིས།
སྐྱིལ་པས་ཐོགས་པ་སྐད་ཅིག་ཉིད་ཀྱིས་འགྲོ། 152

གལ་ཏེ་དངོས་མེད་ཉམས་སྐྱོང་སྲིད་པ་འདིར།
དངོས་ཚོགས་རང་བཞིན་བདེན་པར་གྱུར་པ་ན།
ཐུབ་པ་འདི་དག་ལོངས་སྤྱོད་ཡོངས་བཏང་ནས།
ངེས་པར་དབེན་པ་དག་ཏུ་གནས་མི་བྱེད། 153

इत्यश्रुसंवेगविशीर्णवर्णं
प्रलापिनस्तस्य वचो निशम्य ।
नत्वा कुमारस्तमुवाच धीर-
स्तूर्णं तदङ्कादवतीर्य्य भूमिम् ॥ १५० ॥

विमुञ्च पृथ्वीपुरुहूत शोकं
शुचाभिभूता न भवन्ति धीराः ।
क्षयाय जागर्त्ति नतोन्नताना-
मेष स्वभावो भवितव्यतायाः ॥ १५१ ॥

ऐश्वर्य्यमाश्चर्य्यसुखावतंसं
लावण्यलक्ष्मीतिलकं वपुश्च ।
क्षणेन यात्येव कृतान्तनर्म
कर्म्मोर्म्मिनिर्म्माणहृतं नराणाम् ॥ १५२ ॥

भवेदभावानुभवे भवेऽस्मिन्
सत्यस्वभावो यदि भाववर्गः ।
ध्रुवं न कुर्य्युर्मुनयस्तदैते
संत्यक्तभोगा विजने निवासम् ॥ १५३ ॥

ཅེས་སྨྲས་དེ་ལ་རྒྱུད་པའི་རྒྱུ་མཚན་ནི།
རྒྱལ་པོ་སྤྲ་ངན་ལྷན་བཅས་ཡང་ཡང་དྲིས།
དེ་ལ་དཔལ་གྱིས་སྐྱོང་ཡིག་དང་འབྲེལ་བའི།
རང་གི་མིག་ནི་ནོམ་པར་ཉམས་རྩོལ་བཤད། 154

སྤྱོད་ངན་སྤྱོད་པ་ཉོམས་ལ་འདང་མ་སྤྱད་པའི།
གདམ་པའི་སྤྱོད་ཚུལ་མི་བཟང་དེ་ཐོས་ནས།
སྤྲ་རེ་རྟོན་པོས་ཙ་བ་ཡོངས་བཅད་པའི།
ཡལ་འདབ་ཅན་བཞིན་འཛིན་བྱེད་ཕྱུ་བ་འགྲེལ། 155

འདུ་ཤེས་ཐོབ་ངེས་སྐར་རྒྱལ་སྐྱོང་བ་ཡིས།
བགོད་པའི་སྦྱོར་བ་གྱུ་གྱུ་དེ་བསམས་ནས།
དེ་ཡི་ཆད་པ་བྲུད་མེད་གསོད་པ་ཡི།
སྡིག་ལའང་ཆོས་ལ་གུས་པ་བཞིན་བརྟོན་གྱུར། 156

གདུག་པའི་ཉམ་པ་གནོད་པ་རྒྱ་ཆེ་བ།
དེ་ལ་ལེན་སྦྱོར་རབ་ཏུ་བརྟོན་པ་དེ།
རང་ལས་སྨིན་པས་བཟོད་དཀའི་སྡུག་བསྔལ་དང་།
ལྷན་པར་སྨྲ་བའི་གཞོན་ནུས་རབ་ཏུ་བརླག། 157

इति ब्रुवाणः स विपन्निमित्तं
पृष्टः पुनः शोकमयेन राज्ञा।
न्यवेदयल्लेखनिबद्धमस्मै
निजं शनैर्नैचविनाशवृत्तम्॥ १५४॥

श्रुत्वैव तत्तीव्रनृशंसवृत्तं
निवृत्तवृत्तेष्वपि न प्रवृत्तम्।
कुठारधारापरिभूतमूलः
पपात शाखीव धरावमूलः॥ १५५॥

स लब्धसंज्ञः कुटिलं विचिन्त्य
तं तिष्यरक्षाचरितप्रयोगम्।
समुद्ययौ स्त्रीवधपातकेऽपि
धर्मादरेणैव विनिग्रहेऽस्याः॥ १५६॥

क्रौर्य्यप्रकारे विपुलापकारे
तस्मिन् प्रतीकारसमुद्यतं तम्।
अवारयद्दुःसहदुःखयोगं
स्वकर्म्मपाकेन वदन् कुमारः॥ १५७॥

ས་བདག་གདུང་བས་གཟིར་ཅིང་སྐྱ་ངན་དང་།
ཁྲོ་བས་ཚིག་པས་དེ་ལ་རབ་སླུས་པ།
གདུག་པ་ལ་ཆགས་འཕགས་མིན་གདུམ་མོ་འདི།
ཁྱོད་ནི་སྨོངས་པས་ཡོངས་སུ་སྐྱུང་ངམ་ཅི། 158

སྐྱང་བར་སྤྱོར་དང་མཛོད་བས་བཅིངས་པ་ལ།
མཚུངས་པའི་ཡིད་ཅན་གང་དེ་མི་འཚམ་ཅི།
གང་ལ་གནོད་ལ་ཁྲོ་བའི་ཚ་མེད་པ།
དེ་ལ་ཕན་ལ་དྲིན་ཡང་ཇི་ལྟར་ཡོད། 159

ཅེས་པ་རབ་སྨྲ་ཤུགས་འཁྲིན་གཟིར་བ་ཡི།
ཡབ་ལ་གཞོན་ནུ་བདེན་པས་རབ་སྨྲས་པ།
རྒྱལ་པོ་བདག་ལ་སྡུག་བསྔལ་ཆ་འགའ་མེད།
མི་བཟད་གནོད་ལའང་ཁྲོ་བའི་གདུང་བ་མིན། 160

མི་བདག་རང་གི་ལག་གིས་ཕྱུང་བ་བཞིན།
གལ་ཏེ་མ་ལ་བདག་ཡིད་རབ་དང་ན།
བདེན་བ་དེ་ཡིས་རེ་ཞིག་མིག་གཉིས་ནི།
སྔོན་བཞིན་འཕྲུལ་ལ་ཡང་དག་འབྱུང་བར་ཤོག། 161

तमब्रवीद्भूमिपतिर्व्यथार्त्तः
शोकेन कोपेन च दह्यमानः ।
मोहात् किमेतां निशितामनार्यां
क्रौर्य्यप्रसक्तां परिरक्षसि त्वम् ॥ १५८ ॥

द्वेषोद्यते स्नेहनिबन्धने वा
तुल्यं मनो यस्य स किंमनुष्यः ।
यस्यापकारेऽस्ति न रोषलेशः
तस्योपकारेऽपि कथं प्रसादः ॥ १५९ ॥

इति श्वसन्तं प्रलपन्तमार्त्तं
धीरः कुमारः पितरं जगाद ।
राजन् न मे दुःखलवोऽस्ति कश्चित्
तीव्रापकारेऽपि न मन्युतापः ॥ १६० ॥

मनः प्रसन्नं यदि मे जनन्यां
येनोद्धृते च स्वकरेण नेत्रे ।
तत्तेन सत्येन ममास्तु ताव-
न्नेत्रद्वयं प्राक्तनमेव सद्यः ॥ १६१ ॥

ཅེས་བརྗོད་ཙམ་ལ་དེ་ཡི་དུས་ཉིད་ན།
མི་བདག་བུ་ཡི་སྤྱན་གྱི་མཚོ་སྐྱེས་ཟུང་།
འཇིག་རྟེན་བདན་པའི་བརྟུལ་ཞུགས་ཡིད་ཆེས་བྱེད།
དཔལ་མོ་ཉམ་པར་ཆགས་བྱེད་རབ་དུ་བྱུང་། 162

འདྲེན་བྱེད་ཟུང་གིས་ཉམ་པར་མཛེས་གྱུར་ཅིང་།
སྐྱེ་གུ་ཉམས་ནི་བདེ་དང་སྤྲོ་བྱེད་པའི།
བུ་དེ་གྱིལ་ཚབ་ལས་ཕྱིར་ཕྱོགས་ཞིས་ནས།
མི་བདག་དེ་ཡིས་ཕྱུན་ཚོགས་ཉམས་ལ་བསྒོས། 163

དེ་ནས་ས་བདག་གིས་ནི་བཙུན་མོ་ལ།
དྲག་པོའི་གནོད་ལ་མཚུངས་པའི་ལན་བསྒྲུབས་བཞིན།
རྗེ་འཇོག་དབང་པོ་ལ་ཡང་ཁྲོ་བའི་མི།
བཟོད་དཀའ་དེ་ཡིས་བཟོད་པས་རབ་དུ་བཏང་། 164

དགེ་མཚན་དེ་ལས་དགེ་སློང་ཚོགས་གྱིས་དྲིས།
དགེ་འདུན་གནས་བརྟན་མཁས་པ་དེས་སྨྲས་པ།
ས་སྐྱོང་བུ་འདི་སྐྱེ་བ་གཞན་ལ་ནི།
ཀ་ཤིའི་གྲོང་ཁྱེར་དག་ཏུ་ཛོན་པར་གྱུར། 165

इत्युक्तमात्रे नृपनन्दनस्य
प्रादुर्बभूवाक्षिसरोजयुग्मम् ।
सत्यव्रतप्रत्ययकारि लोके
विलोभनं तत्क्षणमेव लक्ष्मणः ॥ १६२ ॥

नृपः सुखोत्साहकरं प्रजानां
विराजमानं नयनद्वयेन ।
तं यौवराज्ये विमुखं विदित्वा
तमात्मजं तत्प्रतिमं न्ययुङ्क्त ॥ १६३ ॥

घोरापचारे सदृशं विधाय
पत्न्याः प्रतीकारमथ क्षितीशः ।
क्रोधानलं तक्षशिलाधिपेऽपि
तन्मर्षणाद्दुःसहमुत्ससर्ज ॥ १६४ ॥

तत् कौतुकाकाङ्क्षिगणेन पृष्टः
प्रोवाच सङ्घस्थविरः स विद्वान् ।
जन्मान्तरे लुब्धक एष काशी-
पुरे बभूव क्षितिपालपुत्रः ॥ १६५ ॥

དེ་ཡིས་གངས་ལྗོན་ངོས་ཀྱི་ཕྲུག་ཞུགས་པའི།
རི་དགས་ལྔ་བརྒྱ་དག་ནི་ཐོབ་གྱུར་ནས།
མིག་དག་ཕྱུང་ནས་ལོང་བར་རབ་བསྒྲུབས་ཏེ།
ཛཱི་ཕུར་ཉེ་བར་འཁོར་བ་རིམ་གྱིས་བསད། 166

དེ་ནས་སྐྱེ་གཞན་ལ་ཡང་ཚོང་དཔོན་བུ།
སུག་རྡ་ཞེས་ནི་གྲིས་པ་རབ་སྒྲོངས་ལས།
མཆོད་རྟེན་གྱིས་ནི་རྒྱལ་བའི་སྐུ་གཟུགས་ཀྱི།
བཞིན་རས་པདྨ་མཆོན་གྱིས་མིག་མེད་བྱས། 167

འདུ་ཤེས་བསྒྱུར་དེས་དེ་ཡི་སྤྱན་ཟུང་དག།
ཨིནྡྲ་ནཱི་ལའི་རང་བཞིན་གསར་དུ་བསྒྲུབས།
དེ་ནས་སྐྱེ་གཞན་ལ་ཡང་མཆོད་རྟེན་ནི།
ཞིག་པ་གསོ་དང་མཆོད་པ་དག་ཀྱང་བྱས། 168

ཉགས་སུ་རི་དགས་ཚམས་ཀྱི་མིག་ཕྲོགས་ཤིང་།
གྲིས་པས་མཆོད་རྟེན་སྐུ་གཟུགས་སྤྱན་ཕྱིས་པས།
རྒྱལ་པོའི་བུ་འདས་སྐྱེ་བ་གཞན་ཚམས་དང་།
ད་ལྟ་མིག་དག་ཚམ་པར་ཉམས་པ་ཐོབ། 169

गुहाप्रविष्टं हिमवत्तटान्ते
लब्ध्वा मृगाणां शतपञ्चकं सः ।
अन्धं विधायाक्षिविपाटनेन
यथोपयुक्तं न्यवधीत् क्रमेण ॥ १६६ ॥

अथान्यजन्मन्यपि बालकोऽसौ
मुग्धाभिधः श्रेष्ठिसुतः प्रमोहात् ।
चकार चैत्यप्रतिमा-जिनस्य
शस्त्रेण निर्लोचनमाननाब्जम् ॥ १६७ ॥

संजातसंज्ञश्च नवेन्द्रनील-
मयं व्यधादक्षियुगं स तस्य ।
ततोऽन्यजन्मन्यपि शीर्णचैत्य-
संस्कारपूजां स पुनश्चकार ॥ १६८ ॥

नेत्रापहारेण वने मृगाणां
बाल्ये च चैत्यप्रतिमाक्षिलोपात्
अवाप्तवानेष विनाशमक्ष्णो-
र्जन्मान्तरेष्वद्य च राजपुत्रः ॥ १६९ ॥

རིན་ཅེན་མིག་ལྡན་སྐྱ་གཟུགས་བྱས་པ་ཡིས།
ནོར་པར་ཉམས་པའི་མིག་ནི་སླར་ཡང་ཐོབ།
མཆོད་རྟེན་ཞིག་པ་རབ་དུ་གསོས་བྱས་པས།
རབ་དུ་དད་ལྡན་མཛེས་པའི་རང་བཞིན་གྱུར། 170

སྐྱོན་ཞུགས་འབྲས་བུར་རབ་འཇུག་དྲི་མ་དང་བྲལ་སྣང་བའི་རིམ་བ་འདི་ཡིས་ནི།
ཆགས་བྲལ་རབ་འབར་བདེན་པ་མཐོང་བའི་སྐྱབ་བྱེད་དག་ལ་གནས་པའི་
དབང་གྱུར་ཐོབ།
དུས་ཀྱི་ཡང་དག་བསོད་ནམས་དབང་ལས་དལ་གྱི་རྫོགས་པའི་སངས་
རྒྱས་ཉིད་དུ་འགྱུར།
ཞེས་པ་གནས་བརྟན་གྲིས་གསུང་དགེ་སློང་ཚོགས་ཀྱིས་ཐོས་ནས་ཡ་མཚན་
ལྡན་པར་གྱུར། 171

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཀུ་ཎ་ལའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་ལྔ་བཅུ་ཙ་དགུ་པའོ།།

स रत्ननेत्रां प्रतिमाञ्च कृत्वा
दृष्टिं विनष्टां पुनराससाद ।
विशीर्णचैत्यप्रतिपूरणेन
प्रासादिकः कान्तिमयश्च जातः ॥ १७० ॥

स्रोतःप्राप्तिफलप्रवृत्तविमलालोकक्रमेणामुना
वैराग्योज्ज्वलसत्यदर्शनविधौ लब्धाधिकारस्थितिः ।
सम्यक् पुण्यवशादुपैष्यति शनैः कालेन संबुद्धता-
मित्युक्तः स्थविरेण भिक्षुनिवहः श्रुत्वाभवद्विस्मितः ॥ १७१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां कुणालावदानं नाम एकोनषष्टितमः पल्लवः ॥

Chapter LX.

ཀླུ་གཞོན་ནུ་འི་རྟོག་བརྗོད་ནི།

ཡལ་འདབ་དྲུག་ཅུ་པའོ།

འདི་ནི་མི་རྣམས་ལུས་དག་ཉོན་མོངས་ཕུང་པོས་རབ་ཏུ་གདུངས།
འཇིག་རྟེན་པ་རོལ་ཏུ་ཡང་མི་བཟད་དམྱལ་བའི་མེ་ཡིས་བསྲེགས།
སྐྱབས་འགྲོའི་བསོད་ནམས་དང་ནི་བསླབ་པའི་གནས་དག་ཐོབ་རྣམས་ཀྱི།
ལུས་ལ་ནམ་ཡང་སྡུག་བསྔལ་དག་གིས་སྡིག་པའི་མཐུ་ཡོད་མིན། 1

ཕྱི་མཚོའི་མཐར་ནི་ནོར་ཞེས་པའི། ཀླུ་ནི་གཅེན་མང་ལྡན་པ་བྱུང་།
གདེངས་ཀའི་རིན་ཆེན་རབ་འབར་གྱིས། སྣང་བས་སྒྲོན་མེད་ཉིན་མོར་བྱས། 2

དེ་ཡི་ཁང་པར་ཉིན་མཚན་དུ། བྱེ་ཚན་དག་ནི་བབས་གྱུར་དེ།
གང་གིས་ལག་འགྲོ་རྣམས་ཀྱི་ལུས། གདུང་བ་དྲག་པོས་ཉེན་པར་གྱུར། 3

ནོར་བཟང་ཞེས་བྱ་གཅེས་པའི་བུ། རང་བཞིན་ཉིད་ཀྱིས་རབ་གཞོན་པ།
བྱེ་མས་ཡོངས་སུ་གཟིར་གྱུར་པས། ནམ་ཞིག་དེ་ལ་རབ་ཏུ་དྲིས། 4

ལྷ་ཅིག་བྱེ་མ་ཚ་བ་འདིས། བདག་ཅག་ཅི་སླད་གདུང་བར་བྱེད།
སྡིགས་དང་ཙ་བའི་སྦྱོར་བ་དག ཅི་ཡི་ཉེ་བར་ཞི་བར་འགྱུར། 5

षष्टितमः पल्लवः ।

नागकुमारावदानम् ।

इह कर्षति शरीरं क्लेशराशिर्नराणां
दहति च परलोके नारकः क्रूरवह्निः ।
शरणगमनपुण्यप्राप्तशिक्षापदानां
प्रभवति नतु देहे दुःखदाहः कदाचित् ॥ १ ॥

धननामा समुद्रान्ते नागोऽभूद्बहुबान्धवः ।
फणारत्नोज्ज्वलालोककलितापूर्व्ववासरः ॥ २ ॥

पपाताहर्निशं तस्य भवने तप्तवालुका ।
ययाङ्गेषु भुजङ्गानां तीव्रतापव्यथाभवत् ॥ ३ ॥

कदाचित् सुधनो नाम पुत्रः पप्रच्छ तं प्रियः ।
सुकुमारः प्रकृत्यैव वालुकापरिपीड़ितः ॥ ४ ॥

कस्मादस्मानियं तात बाधते तप्तवालुका ।
मन्त्रमूलप्रयोगेन केनेयमुपशाम्यति ॥ ५ ॥

འགའ་ཞིག་བདག་ལས་ལྷག་པ་དང་། གཞན་ནི་བདག་ལས་དམན་པ་ཡི།
ཀླུ་ནི་རྒྱ་མཚོ་འདི་ན་གནས། ཡུ་ཉིད་སྡུག་བསྔལ་གྱིས་གཟིར་ཏེ། 6

ཞེས་པ་བུ་ཡིས་དྲིས་དེ་ལ། ཀླུ་གྲོས་ཆེན་པོ་དེས་སྨྲས་བུ།
ཇི་ལྟར་གདེངས་ཅན་གཞན་གྱི་ཆོས། ཤེས་པ་དེ་ལྟར་ཡུ་ཅག་མིན། 7

ཆོས་ཀྱི་ཉེར་བསྟན་གྱིས་དག་པ། ཞི་ཞིང་བདེན་པར་སྨྲ་རྣམས་ལ།
དེས་པར་ཉེ་བར་གདུང་གྱུར་པ། ལུས་ལ་མ་ཡིན་ཡིད་ལའང་མིན། 8

སངས་རྒྱས་ཆོས་དང་ཚོགས་ཞེས་པ། སྐྱབས་འོས་བསོད་ནམས་དཀོན་ཅིག་ནི།
གསུམ་ལ་སྐྱབས་སོང་མཁས་པ་གང་། དེ་ལ་ཡོངས་གདུང་རེག་མི་བྱེད། 9

གང་གིས་ཉོན་མོངས་རབ་ཞི་བའི། བསླབ་པའི་གནས་རྣམས་ཐོབ་གྱུར་ཅིང་།
བདུད་རྩིས་བྲན་པ་དེ་དག་ལ། སྡིག་དང་འཇིགས་པ་གང་ལ་སྐྱོད། 10

ཤཱ་ཀྱ་ཐུབ་པ་འཇིག་རྟེན་གྱི། ཉོན་མོངས་ཐམས་ཅད་རབ་ཞིའི་གཉེན།
རྒྱལ་བ་རྒྱལ་བྱེད་ཚལ་གནས་པ། མཉན་ཡོད་ན་ནི་བཅོམ་ལྡན་ཡོད། 11

སྙིང་རྗེ་ཟླ་བའི་འོད་བསྐྱེད་དེ། སེམས་དཔའ་ལྟར་དཀར་མན་ངག་གིས།
འོད་ཟེར་ཚོགས་ཀྱི་འགྲོ་གསུམ་དུ། བདུད་རྩིའི་ཆར་པ་མངོན་པར་འབེབས། 12

གང་ཞིག་རྣམ་པར་མ་ཐུལ་བས། བསླབ་པའི་གནས་ཐོབ་མི་སྲུང་བ།
དེ་དག་དམྱལ་བ་མི་བཟད་པས། གདུང་བ་དྲག་པོས་བརླག་པར་འགྱུར། 13

असमदभ्यधिकाः केचिदस्मत्प्रत्यवराः परे ।
नागाः सन्ति समुद्रेऽस्मिन् दुःखार्त्ता वयमेव किम् ॥ ६ ॥

इति पृष्टः स पुत्रेण तमुवाच महामतिः ।
यथान्ये फणिनः पुत्र धर्म्मज्ञा न तथा वयम् ॥ ७ ॥

धर्म्मोपदेशमुद्धानां शान्तानां सत्यवादिनाम् ।
उपतापो भवत्येव न शारीरो न मानसः ॥ ८ ॥

न तान् स्पृशति सन्तापः पुण्यं रत्नत्रयं बुधाः ।
ये बुद्धधर्म्मसंघाख्यं शरण्यं शरणं गताः ॥ ९ ॥

शिक्षापदान्यवाप्तानि क्लेशप्रशमनानि यैः ।
तेषाममृतसिक्तानां पापतापभयं कुतः ॥ १० ॥

श्रावस्त्यामस्ति भगवान् जिनो जेतवनाश्रयः ।
लोके शाक्यमुनिः सर्व्वक्लेशप्रशमबान्धवः ॥ ११ ॥

उपदेशांशुनिवहैः सत्वशुभ्रैर्जगत्त्रये ।
करुणाकौमुदीसृतिरमृतं सोऽभिवर्षति ॥ १२ ॥

दुर्विनीता न रक्षन्ति प्राप्य शिक्षापदानि ये ।
तीव्रतापमयस्तेषां नरकेष्वक्षयः क्षयः ॥ १३ ॥

ཞེས་པ་ཕ་དང་མ་ཡི་ཡང་། ཚིག་དག་ཐོས་ནས་ལག་འགྲོ་ནི།
མི་རྟོག་མཆོག་དག་ཡོངས་བཟུང་ནས། དག་པའི་རྒྱལ་བྱེད་ཚལ་དུ་སོང་། 14

ཚིག་ཤེས་སློར་ནི་མངོན་ཕྱོགས་རེས། བདེ་བར་གཤེགས་པའི་གནས་ཕྱིན་ཏེ།
དེར་ནི་ཆོས་དག་ཉན་པ་ལ། ཚོགས་པའི་འཁོར་དག་མཐོང་བར་གྱུར། 15

བཞིན་རས་མཛེས་ཤིང་སྤྱན་ཡངས་པ། ཟླ་པ་ཉ་དང་པད་ཚལ་དག།
འགྲོགས་པ་བཞིན་དུ་བདེ་སྟེར་བའི། རྒྱལ་བ་དེར་ནི་མཐོང་བར་གྱུར། 16

ཉི་བར་སྟོན་བྱེད་མཚུ་ཡིས་ནི། ཆགས་ལྡན་རྣམས་ཀྱི་དམར་བ་ཉིད།
རབ་རྒྱས་དམན་པ་ཉིད་བྱས་ཤིང་། གསལ་བར་ཟིལ་གྱིས་གནོན་པ་བཞིན། 17

རྒྱན་དང་བྲལ་བའི་མཛེས་སྡུག་གིས། ཉི་བའི་ཞགས་པ་རབ་བརྒྱན་ཅིང་།
སྒྲིབ་པ་དང་བྲལ་སྟོང་པ་ཉིད། རབ་ཏུ་རྒྱས་པ་སྟོན་པ་བཞིན། 18

དཔྱང་པ་ཆོས་ཀྱི་གཉིས་འཐུང་ལག། ཕྱིན་པས་མཛེས་པ་རྣམ་པར་འཛིན།
ནུས་མཐུའི་ཁང་པ་དག་གི་ནི། ཀ་བ་གསེར་གྱི་རང་བཞིན་བཞིན། 19

ཆོས་གོས་རྒྱན་གང་ལྡན་པ་ཡིས། ཞབས་ཀྱི་གྲིབ་མ་སྒྲོ་བྱེད་པ།
ས་གཞི་རྟོགས་པ་ཐོབ་པ་ལ། པདྨའི་གྲོགས་རྣམས་ཀྱིས་བསྒྲུབས་བཞིན། 20

ལུས་ཀྱི་མཛེས་པ་རྒྱས་པ་ནི། སྤྱན་གྱི་བདུད་རྩིའི་ཆར་འབེབས་པས།
དམ་པ་རྣམས་ཀྱི་འཁོར་བ་ཡིས། མྱ་ངན་ཡོངས་གདུང་བཟློག་པ་བཞིན། 21

इति श्रुत्वा पितुर्वाक्यं जनन्याश्च भुजङ्गमः।
आदाय दिव्यपुष्पाणि पुण्यं जेतवनं ययौ॥ १४॥

सुगताश्रममासाद्य धर्म्मश्रवणसङ्गताम्।
ददर्श पर्षदं तत्र स सन्तोषसुखोन्मुखीम्॥ १५॥

तत्रापश्यज्जिनं कान्तवदनं दीर्घलोचनम्।
पूर्णेन्दुपद्मवनयोरिव मैत्रीसुखप्रदम्॥ १६॥

उपदेशकृता व्यक्तमधरेणाधरीकृताम्।
तर्ज्जयन्तमिवोत्सिक्तां रागिवर्गस्य रक्तताम्॥ १७॥

निराभरणलावण्यकर्णपाशविभूषितम्।
दर्शयन्तमिवासक्तां[1] निरावरणशून्यताम्[2]॥ १८॥

धर्म्मद्विपकरौ बाहू बिभ्राणं दानशोभितौ।
प्रभावभवनस्तम्भौ शातकुम्भमयाविव॥ १९॥

दिशन्तं चरणच्छायां चीरैरावरणं भुवः।
लब्धप्रबोधैर्विहितामिव राजीवजीवितैः॥ २०॥

देहकान्तिवितानेन नयनामृतवर्षिणा।
संसारमरुसन्तापं वारयन्तं सतामिव॥ २१॥

---

१ H °मिवोत्सिक्तां।   २ means निष्कलङ्कवैराग्यम्।

དེ་མཐོང་ཉིད་ན་ཀླུ་ཡི་བུ། ཡོངས་སུ་གདུང་བ་བཏང་བར་གྱུར།
བདག་ཉིད་ཆེ་ནོམས་མཐོང་བ་ཉིད། གདུང་བའི་སྐྱོན་ཀུན་ཞི་བར་བྱེད། 22

སྙིམ་པ་མེ་ཏོག་གིས་གང་བ། དེ་ལ་གཏོར་ནས་དེས་ཕྱག་གསལ།
དེ་ཡི་ཞབས་པད་རིག་པ་ཡིས། འཕྲུལ་ལ་བསིལ་བ་ཉིད་དུ་གྱུར། 23

དེ་ནས་བཅོམ་ལྡན་འདས་ཀྱི་ནི། བསླབ་པའི་གནས་ཐོབ་མཁས་པ་དེས།
ཐལ་མོ་སྦྱར་ནས་དེ་ལ་ནི། ཇི་སྲིད་འཚོ་བར་ལྷག་གནས་ཞུས། 24

དེ་ལ་བཅོམ་ལྡན་གྱིས་གསུངས་པ། ཐམས་ཅད་རྗེས་སུ་གཟུང་བྱ་ལ།
གཅིག་ཉིད་ཁོ་ནའི་ལྷག་གནས་ནི། ཇི་སྲིད་འཚོ་བ་ཇི་ལྟར་འོས། 25

གུས་ལ་དགེས་པས་དེ་བརྗོད་ནས། དེ་ལ་བསྟོན་པས་བཅོམ་ལྡན་དེ།
གདེངས་ཅན་ནོམ་པར་བཏྲོག་པ་ནི། ཡོངས་རྫོགས་མཛོད་ཅིང་དལ་གྱིས་ཆས། 26

དགེ་སློང་ཚོགས་ཀྱིས་སྣ་དྲངས་ནས། རིམ་གྱིས་བྱོན་པ་དེ་ལ་ནི།
ཀླུ་ཡི་མཐུ་ལས་གནས་དང་གནས། མཐོ་རིས་ལྟ་བུར་མཛེས་པ་བསྐྲུནས། 27

རིན་ཆེན་གསེར་འོད་བཀྲ་བ་ཡི། མཆོག་གི་སྐྱེད་ཚལ་མཛེས་པ་དང་།
ལོངས་སྤྱོད་འཛིན་པས་བྲེལ་བ་ཡིས། འབང་དང་འབང་མོའི་ཚོགས་ཀྱིས་དང་། 28

ག་བུར་ཙན་དན་ཀྱི་ཆེ་ཡི། དོ་ཤལ་འཕྱང་བས་བརྒྱན་པ་ཡིས།
གནས་དང་གནས་སུ་གཙུག་ལག་ཁང་། བཅོམ་ལྡན་འདས་ལ་དེ་ཡིས་བྱས། 29

तं विलोक्यैव तत्याज सन्तापं नागनन्दनः ।
सर्व्वार्त्तिदोषशमनं दर्शनं हि महात्मनाम् ॥ २२ ॥

प्रणनाम स तं कीर्णसम्पूर्णकुसुमाञ्जलिः ।
तत्पादपद्मस्पर्शेन सद्यः शीतलतां गतः ॥ २३ ॥

कृती भगवतः प्राप्य ततः शिक्षापदानि सः ।
चक्रे कृताञ्जलिस्तस्य यावज्जीवाधिवासनाम् ॥ २४ ॥

तमाबभाषे भगवानेकस्यैवाधिवासना ।
अनुग्राह्येषु सर्व्वेषु यावज्जीवं न युज्यते ॥ २५ ॥

इत्युक्त्वा प्रणयिप्रीत्यै भगवान् सततोद्यतः ।
शनैः प्रतस्थे सङ्कल्पं भोगिनः परिपूरयन् ॥ २६ ॥

क्रमेणागच्छतस्तस्य भिक्षुसंघाग्रयायिनः ।
प्रभावाद्विदधे नागः स्वर्गशोभां पदे पदे ॥ २७ ॥

हेमरत्नांशुशबलान् दिव्योद्यानमनोहरान् ।
भोगोपसंग्रहव्यग्रदासदासीगणांस्तान् ॥ २८ ॥

कर्पूरचन्दनोदारहारप्रालम्बभूषितान् ।
स्थाने स्थाने भगवतः स विहारानकारयत् ॥ २९ ॥

དེ་ནས་ཀ་ལན་ད་ཀའི་གནས། ཞེས་པ་འོད་མའི་ཚལ་དུ་ཕྱིན།
དེ་ཡི་ལོངས་སྤྱོད་ཚོགས་ཀུན་གྱིས། བཅོམ་ལྡན་འདས་ལ་མཆོད་པ་བྱས། 30

དེར་ནི་དེ་ཡིས་ཟླ་གསུམ་དུ། དགེ་འདུན་དང་བཅས་བདེ་གཤེགས་མཆོད།
དོ་ཤལ་རིན་ཆེན་འོད་ཀྱིས་བསྐོར། ཡ་མཚན་ཀུན་དགའ་ལྡན་ལ་གསུངས། 31

གདེངས་ཅན་འདི་ནི་བསྐལ་པ་བགྲུར་མི་གཡོ།
བདེ་བའི་ལོངས་སྤྱོད་ཀུན་གྱི་སྣོད་དུ་གྱུར།
འོད་ཀྱང་སྐྱེ་བ་གཞན་ལ་བྱང་ཆུབ་ཀྱང་།
རབ་ཏུ་འབད་པས་གསལ་བར་བྱེད་པར་འགྱུར། 32

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་འཁྲི་ཤིང་ལས་ཀླུ་གཞོན་ནུའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་པའོ།།

करन्दकनिवासाख्यं प्राप्य वेणुवनं ततः ।
स सर्व्वभोगसम्भारैर्भगवन्तमपूजयत् ॥ ३० ॥

तेन मासत्रयीं तत्र ससंघः सुगतोऽर्च्चितः ।
ऊचे विस्मितमानन्दं हाररत्नांशुकैर्वृतः ॥ ३१ ॥

एष कल्पशतमच्युतः फणी
सर्व्वभोगसुखभाग्भविष्यति ।
बोधिमप्यपरजन्मनि स्फुटां
किञ्च सुप्रणिहितः करिष्यति ॥ ३२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां नागकुमारावदानं नाम षष्टितमः पल्लवः ॥

Chapter LXI.

ཞིང་པའི་རྟོགས་བརྗོད་ནི།

སྨྲན་པོའི་རབ་ཏུ་གཉེར་དག་ལྷུང་ཡང་རབ་ཏུ་འགྲོ་བར་འགྱུར།
ཉམ་དག་བློ་ལྡན་ཁྲིམ་དུ་དཔལ་ནི་རང་ཉིད་འོད་བར་འགྱུར།
སྐྱེས་བུ་དམ་པ་ཉམས་ཀྱིས་ཡིད་ནི་རབ་ཏུ་དང་བ་དག།
དབུལ་བའི་རབ་རིབ་མི་བཟད་འཕྲོག་པའི་རྒྱུན་གྱི་ནོར་བུ་ཡིན། 1

མཉན་ཡོད་དུ་སྔོན་བྲམ་ཟེ་ནི། ནོར་མེད་བཀྲ་ཤིས་ཞེས་བྱ་བ།
འཚོ་བ་བྲལ་བས་འཚོ་བའི་ཐབས། འབྲས་བུ་ཆུང་བའི་ཞིང་ལས་བརྟེན། 2

ཞིང་ལས་ལ་ཆགས་གྱུར་བ་དང་། རླུང་དང་ཚ་བས་ཉེན་པ་དེས།
སྡོང་པ་དང་ནི་ཏོག་རྩེའི་ཁར། ཁྱེར་ཞིང་འོང་དང་འགྲོ་བ་བྱས། 3

ནམ་ཞིག་ཆུང་མ་དང་བཅས་དེའི། ལམ་དུ་གྲུལ་བ་ཉན་ཐོས་དང་།
ལྷན་ཅིག་ཁྲོན་པ་མཐོང་གྱུར་ནས། འཕྲལ་ལ་རབ་ཏུ་དང་བར་གྱུར། 4

སྦྱིན་བའི་བསོད་ནམས་ཡོངས་ཟད་ལས། དབུལ་བའི་སྡུག་བསྔལ་མི་བཟད་པ།
སེམས་ཤིང་དེ་ཡིས་ཆུང་མ་ནི། རབ་དང་བཞིན་ལྡན་ལ་སྨྲས་པ། 5

एकषष्टितमः पल्लवः ।

कर्षकावदानम् ।

मूढस्य हस्तपतितोऽपि निधिः प्रयाति
लक्ष्मीः स्वयं भवनमेति विशुद्धबुद्धेः ।
दारिद्र्यतीव्रतिमिरापहरः प्रकामं
पुंसां विभूषणमणिर्मनसः प्रसादः ॥ १ ॥

श्रावस्त्यां स्वस्तिको नाम ब्राह्मणो निर्धनः पुरा ।
अशिश्रियत् कृशफलामगत्या कृषिजीविकाम् ॥ २ ॥

स क्षेत्रकर्मनिरतः शीतवातातपक्षतः ।
चकार हलकुद्दालभारवाहो गतागतम् ॥ ३ ॥

स कदाचित् समायान्तं श्रावकैः सहितं पथि ।
जिनं जायासखो दृष्ट्वा प्रसादं सहसा ययौ ॥ ४ ॥

प्रसन्नवदनां पत्नीं स जगाद विचिन्तयन् ।
दारिद्र्यदुःखमसमं दानपुण्यपरिक्षयात् ॥ ५ ॥

བཅོམ་ལྡན་འདས་ནི་ཡུ་ཙག་གིས། རྟོག་གཅིག་གིས་ཀྱང་མ་མཆོད་ལས།
བསོད་ནམས་ཟློང་གིས་ཐོབ་པའི་ནོར། ཕུན་ཚོགས་ཡུ་ལ་ག་ལ་འོང་། 6

ཤི་བ་གསོན་ཉིད་འཇིག་རྟེན་ན། གྲགས་པ་ཉམས་པ་ཤི་བ་ཉིད།
ནོར་མེད་སྐྱེ་བོ་མཛེས་པ་ནི། གསོན་ལ་མ་ཡིན་གཤིན་ལ་མིན། 7

ནོར་རིགས་ནོར་ནི་རིག་པ་སྟེ། ནོར་ཚོས་ནོར་ནི་གྲགས་པ་ཡིན།
ནོར་གྱིས་དམན་ཞིང་བསྐྱངས་པ་ཡིས། འཚོ་བའི་ཡོན་ཏན་ཉམས་ཀྱིས་ཅི། 8

གཞན་གྱི་ཉེ་འཁོར་གྱུར་པ་ཡིས། དབུལ་པོའི་ཡོན་ཏན་དམ་པས་ཅི།
ཁར་དུབ་པ་ལ་ནོར་བུ་ཡིས། གསེར་གྱིན་ངལ་དུབ་དོན་གྱིས་བཞིན། 9

དབུལ་པོ་སྦྱིན་པ་དག་དང་བྲལ་བས་སླར་ཡང་དབུལ་པོར་རབ་ཏུ་འཛུད།
དབུལ་པོ་ནོར་ལ་ཆགས་པས་གཞན་དབང་སྡིག་པའི་བདག་ཉིད་དག་ཏུ་འགྱུར།
དབུལ་པོ་དབུགས་དང་བཅས་ཀྱང་ཤི་ཞེས་འདི་ལ་ཁྱད་པར་བློ་གྲོས་མེད།
དབུལ་པོ་ཕྱོགས་བཅུ་འདི་དག་རང་གི་སྐྱེ་བོ་དག་གིས་དམན་པ་བཞིན། 10

དེ་སྐད་དམན་ལ་མཉེས་གཤིན་པའི། བདེ་བར་གཤེགས་པ་མཆོད་པར་བྱ།
སངས་རྒྱས་མཉེས་པར་མ་བྲུས་པའི། སྨོངས་ལ་དགེ་བ་ག་ལ་ཡོད། 11

པདྨ་འི་འདབ་མ་ལྟ་བུའི་སྤྱན། ལོངས་པའི་གཉེན་འདྲིས་གང་གང་དུ།
སྤྱན་ནི་འཕངས་པ་དེ་དང་དེར། དཔལ་ནི་གནས་པ་དག་གིས་ཤེས། 12

आवाभ्यामेष भगवान् पिण्डकेनापि नार्च्चितः।
कुतः पुण्यपणप्राप्या धनसम्पत्तिरावयोः॥ ६॥

जीवत्यवमतो लोके नष्टकीर्त्तिर्विपद्यते।
न स जीवो न निर्जीवः शोभते निर्धनो जनः॥ ७॥

धनं जातिर्धनं विद्या धनं धर्म्मो धनं यशः।
किं धनेन विहीनानां याच्ञानिर्जीवितैर्गुणैः॥ ८॥

परोपकरणीभूतैः किं दरिद्रस्य सद्गुणैः।
क्लेशार्थैर्भारिकस्येव मणिकाञ्चनभूषणैः॥ ९॥

दरिद्रो दारिद्र्यं प्रविशति पुनर्दानविरहा-
द्दरिद्रः पापात्मा भवति धनलिप्सापरवशः।
दरिद्रः सोच्छ्वासो मृत इति न चावास्ति विमति-
र्दरिद्रस्यैवैता निजजनविहीना दश दिशः॥ १०॥

अभ्यर्च्चयावः सुगतं तस्मात् कृपणवत्सलम्।
अनाराधितबुद्धानां मुग्धानां कुशलं कुतः॥ ११॥

एष पद्मपलाशाक्षः क्षिपत्यापन्नबान्धवः।
यत्र यत्र दृशं जाने तत्र तत्राश्रयः श्रियः॥ १२॥

དེ་སྐད་བདག་པོའི་ཚིག་ཐོས་ནས། ཁྱིམ་དུ་གུས་བྱས་བྲམ་ཟེ་མོས།
ཟས་ནི་གཙང་མར་སྦྱར་བ་དག། བཅོམ་ལྡན་འདས་ཀྱི་སླད་དུ་བསྒྲུབས། 13

བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་པས་ཀྱང་། དེ་དག་བསམ་པ་ཡོངས་མཁྱེན་ནས།
གུས་པས་གསོལ་བ་འདེབས་པ་དེའི། མཆོད་པ་དག་ནི་བླང་བར་མཛད། 14

དབུལ་བའི་སྡུག་བསྔལ་རབ་བསལ་བ། བདག་ལ་འབྱོར་པ་འབྱུང་གྱུར་ཅིག།
ཅེས་པའི་སྨོན་ལམ་གཉིས་སྐྱེས་ཀྱིས། རྒྱལ་བ་མཆོད་པའི་མཇུག་དུ་བྱས། 15

དེ་ནས་བྲམ་ཟེ་རང་ཞིང་དུ། སོང་བས་འབྲུ་ནས་སྨྱུ་གུ་ནི།
ཐམས་ཅད་གསེར་དུ་མཐོང་གྱུར་ནས། འཕྲལ་ལ་ཉིད་དུ་དབུལ་བ་གཏང་། 16

ས་ཡི་བདག་པོ་གསལ་རྒྱལ་གྱིས། དེ་ཡི་བསོད་ནམས་ལས་འཁྲུངས་པའི།
གསེར་དག་མཐོང་ནས་ཡ་མཚན་ཏེ། དགའ་བས་རྒྱལ་པོའི་ཆ་ཤས་བཏང་། 17

ཤིན་ཏུ་མང་པོའི་གསེར་དེ་ཡིས། དབང་ཕྱུག་གཏེར་ཐོབ་གཉིས་སྐྱེས་ཀྱིས།
རྫོགས་སངས་རྒྱས་སོགས་དགེ་འདུན་ནི། ཡོངས་སྤྱོད་ཀུན་གྱིས་རབ་ཏུ་མཆོད། 18

སྟོན་པས་ཆོས་ནི་བསྟན་པ་ཡིས། རྒྱུན་དུ་ཞུགས་པའི་འབྲས་ཐོབ་ནས།
བདེན་མཐོང་དེ་ཡིས་དུས་ཀྱིས་ནི། རབ་ཏུ་བྱུང་བ་ཡང་དག་བླངས། 19

ཉོན་མོངས་ཐམས་ཅད་རབ་བཅོམ་སྟེ། དེ་ཡིས་དགྲ་བཅོམ་ཉིད་ཐོབ་ཀོ།
ལས་དེ་དགེ་སློང་རྣམས་ཀྱིས་དྲིས། བཅོམ་ལྡན་འདས་ཀྱིས་མངོན་པར་གསུངས། 20

इति पत्युर्वचः श्रुत्वा ब्राह्मणी सादरा गृहे।
शुचिप्रणीतं विदधे भोज्यं भगवतः कृते॥ १३॥

भगवानपि सर्व्वज्ञस्तयोर्ज्ञात्वा समीहितम्।
प्रणयार्थनया चक्रे तस्य पूजाप्रतिग्रहम्॥ १४॥

व्यक्तदारिद्र्यदुःखस्य भूयान्मे विभवोद्भवः।
चकार जिनपूजान्ते प्रणिधानमिति द्विजः॥ १५॥

अथ गत्वा निजं क्षेत्रं विप्रः शस्ययवाङ्कुरान्।
सर्व्वानपश्यत् सौवर्णान् सहसा त्यक्तदुर्गतिः॥ १६॥

तस्य पुण्यसमुद्भूतं दृष्ट्वा हेम महीपतिः।
तत्याज विस्मितः प्रीत्या राजभागं प्रसेनजित्॥ १७॥

तेन हेम्ना सुमहता लब्धैश्वर्य्यनिधिर्द्विजः।
स बुद्धप्रमुखं सङ्घं सर्व्वभोगैरपूजयत्॥ १८॥

धर्म्मदेशनया शास्तुः स्रोतःप्राप्तिफलोदयात्।
दृष्टसत्यः स कालेन प्रव्रज्यां समुपाददे॥ १९॥

सर्व्वक्लेशप्रहाणेन तस्मिन्नर्हत्त्वमागते।
तत्कर्म्म भिक्षुभिः पृष्टो भगवानभ्यभाषत॥ २०॥

སྐྱེ་བ་གཞན་ལ་བྲམ་ཟེ་འདིས། བདག་ཉིད་ཆེན་པོ་བཅོམ་ལྡན་འདས།
འོད་སྲུངས་ཀྱིས་ནི་བསྟན་པ་ལ། ཚངས་པར་སྤྱོད་པ་སྟོན་ཆེ་སྤྱད། 21

ཉེ་དབང་དབང་བཅས་ལྷས་མཆོད་པ། ཤིན་ཏུ་ཆེ་བའི་གྲུབ་པ་འདི།
བདག་གི་སྟོན་དུ་སྐྱེ་བ་འདིར། འདི་ལ་དེ་ཡིས་ཡང་དག་བསྟན། 22

དེ་སྐད་དེ་ཡི་ལེགས་བྱས་ཀྱིལ་བས་གསུངས་པ་ཐོས་གྱུར་ནས།
དེ་ཡི་ཡོན་ཏན་རང་བཞིན་ནང་དུ་འབོས་བཞིན་དགེ་སློང་ནི།
དེ་དག་ཐམས་ཅད་ཡ་མཚན་ཐྲོ་ལྡན་དགའ་བས་འཁྲུགས་གྱུར་ཅིང་།
དགེ་ལ་གུས་པས་བཟང་པོའི་སྤྱོད་པ་རབ་ཏུ་བསྔགས་པ་མཛད། 23

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཞིང་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་ཙ་གཅིག་པའོ།།

अन्यजन्मनि विप्रोऽयं काश्यपस्य महात्मनः।
ब्रह्मचर्य्यं भगवतः शासनेन पुराचरत्॥ २१ ॥

समादिष्टास्य तेनैव जन्मन्यस्मिन्महीयसी।
मत्सकाशादियं सिद्धिः सेन्द्रोपेन्द्रसुरार्च्चिता॥ २२ ॥

श्रुत्वेति तस्य सुकृतं कथितं जिनेन
सर्व्वे सविस्मयधियः कुशलादरेण।
हर्षाकुलाः सुचरितं प्रशशंसुरन्तः-
संक्रान्ततद्गुणमया इव भिक्षवस्ते॥ २३ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां कर्षकावदानं नाम एकषष्टितमः पल्लवः॥

Chapter LXII.

ཡལ་འདབ་དྲུག་ཅུ་རྩ་གཉིས་པ།

གླགས་ཕྱིན་གྱི་རྟོགས་བརྗོད་ནི།

ལྷག་གིས་གང་བར་གྱུར་པའི་སྐྱེ་བོའི་ནགས་ཚལ་གནས་དག་ཏུ།
ལང་ཚོས་ལོང་ཞིང་བདེ་བ་ལ་འདོས་མཛེས་པའི་ཚས་ལྡན་ཚོ།
དབེན་པས་ཆགས་བྲལ་ཞི་ཞིང་དག་པ་གང་ལ་རབ་ཕྱིན་པ།
སྐྱེས་བུ་དེ་ཉིད་གཅིག་པུ་ཡ་མཚན་རང་བཞིན་རབ་ཏུ་སྐྱེས། 1

རྒྱལ་བ་སྟོན་ཅེ་ནུ་གྲོ་དྷའི། ཀུན་དགའ་ར་བ་མཛེས་བར་བཞུགས།
བ་དྲ་ཀ་སེར་ཁྱིམ་བདག་ནི། ལེགས་པར་རབ་སད་ཅེས་པ་བྱུང་། 2

ནོར་ནི་གྲུས་པ་གཏོང་བ་དང་། ལོངས་སྤྱོད་ཚོགས་ཀྱིས་ནམ་པར་བསྒྱུར།
གང་གི་དབང་ཕྱུག་ལུས་ངན་བུ། མཛོད་ན་གནས་པའང་འབུམ་པར་ཕྱེད། 3

བདེ་བ་ཐམས་ཅད་ཕུན་ཚོགས་དེ། བུ་མེད་བུ་ཡི་བསམས་པ་ཡིས།
མཆོག་ཏུ་ཡང་དག་གདུང་བ་ཐོབ། ཕུན་ཚོགས་སྲུ་ཡི་ཟླུག་ཙྭ་མེད། 4

དེ་ཡི་བསམས་པ་འཇོམས་པ་ཡིས། ཕྱུན་རིང་ཡིད་འཁྲུགས་གཉེར་ནོམས་ཀྱིས།
གཉེན་ལ་གཉེན་ནི་སྒྲུ་ངན་གྱི། མེ་ཡིས་རབ་གདུངས་དེ་ལ་སྨྲས། 5

द्विषष्टितमः पल्लवः ।

यशोदावदानम् ।

ऊर्णायुपूर्णजनकाननसन्निवेशे
जातश्चमत्कृतिमयः पुरुषः स एकः ।
यस्यार्थयौवनसुखोचितचारुवेशे
वैराग्यमादिशति शान्तिसितं विवेकः ॥ १ ॥

न्यग्रोधरुचिरारामविहारिणि जिने पुरा ।
वाराणस्यां गृहपतिः सुप्रबुद्धाभिधोऽभवत् ॥ २ ॥

त्यागोपभोगसम्भारविभूषितधनोदयः ।
ऐश्वर्य्यं यः कुवेरस्य कोशलीनं न्यवेदयत् ॥ ३ ॥

स सर्व्वसुखसम्पत्तौ निष्पुत्रः पुत्रचिन्तया ।
परं सन्तापमापेदे निःशल्याः कस्य सम्पदः ॥ ४ ॥

तं शोकशिखिसन्तप्तं बान्धवा बन्धुवत्सलम् ।
ऊचिरे चिरसंक्रान्ततच्चिन्ताक्रान्तमानसाः ॥ ५ ॥

ཁྱིམ་བདག་མ་ཉིང་ལ་འོས་པའི། བསམ་པ་བྱ་བར་མི་རིགས་སོ།
བདེན་ལྡན་སྙིང་སྟོབས་ཆེ་ཉམས་ལ། འཛིག་རྟེན་ན་ནི་རྙེད་དཀའ་མེད། 6

གང་འདི་ཕྱོགས་སུ་གྲགས་གྱུར་ཅིང་། ཡུལ་འདིར་གྲོང་ཁྱེར་པས་མཆོད་པ།
ནྱ་གྲོ་དྷ་ཡི་ཤིང་དེ་ལ། མཆོད་པས་ཐམས་ཅད་ཐོབ་པར་འགྱུར། 7

དེ་ལ་ཞུས་པས་འགའ་ཞིག་ནི། བུ་མེད་བུ་དང་ལྡན་པ་དང་།
གཞན་ནི་ནོར་མེད་ནོར་དང་ལྡན། གཞན་ཡང་ནད་ཅན་ནད་མེད་མཐོང་། 8

ནྱ་གྲོ་དྷ་ཡི་ཀིང་འཕུང་ནི། མཆོད་རྟེན་སྙིང་བ་བདེན་ཞེས་བྱ།
འོས་པར་མཆོད་ན་ཁྱོད་ལ་ནི། བུ་ཞེས་བརྗོད་པའི་འབྲས་སྟེར་འགྱུར། 9

ཞེས་པ་དེ་དག་ཚིག་ཐོས་ནས། འཛུམ་བཅས་དེ་དག་ལ་སྨྲས་པ།
ཀྱེ་མ་རྨོངས་པའི་མཛའ་བ་ལས། ཁྱེད་ཉམས་རྨོངས་པ་ཉིད་དུ་གྱུར། 10

རང་ལས་གཞན་དབང་འཇིག་རྟེན་འདི། ངེས་པར་གཡོ་བ་མེད་པ་ལ།
སུ་ཡིང་སུ་ཡི་བརྟེན་པ་དང་། ཀྱིས་དང་འཕྲོག་དང་འཇོམས་པར་བྱེད། 11

རང་ལས་ཉེ་བ་ཉིད་ཐོབ་ནས། ཀློ་གྲོས་བླུན་པོ་གཞན་ལ་ཆིས།
རང་གི་ཁ་རྒྱུའི་ཆ་རྒྱུང་ནས། ཁྱི་ནི་པགས་པ་སྐམ་ལ་བཞིན། 12

ཤིང་གི་བུ་ནོར་སྐྱེས་བུ་ལ། སྟེར་ཞེས་འདི་ནི་རྨོངས་པའི་གནས།
འདབ་མ་ཙམ་ཡང་དུས་མིན་དུ། དེ་ཉིད་རང་ལ་སྦྱིན་ནུས་མེད། 13

क्लीवोचितां गृहपते न चिन्तां कर्त्तुमर्हसि ।
धीराणां पृथुसत्वानां नास्ति लोकेषु दुर्लभम् ॥ ६ ॥

य एष विश्रुतो दिक्षु देशेऽस्मिन् पौरपूजितः ।
न्यग्रोधपादपस्तस्य पूजया सर्व्वमाप्यते ॥ ७ ॥

अपुत्राः पुत्रिणः केचित् निर्द्धना धनिनः परे ।
रोगिणोऽप्यरुजश्चान्ये दृष्टास्तदुपयाचितैः ॥ ८ ॥

सत्ययाचनचैत्याख्यः सोऽयं न्यग्रोधपादपः ।
फलं पुत्राभिधं तुभ्यं दास्यत्युचितमर्थितः ॥ ९ ॥

इति तेषां वचः श्रुत्वा तानुवाच स सस्मितः ।
अहोनु मोहात् स्नेहाद्वा यूयं मूर्खत्वमागताः ॥ १० ॥

स्वकर्म्मपरतन्त्रेऽस्मिन् लोके नियतिनिश्चले ।
स्थितिं करोति पुष्णाति हरते हन्ति कस्य कः ॥ ११ ॥

स्वकर्म्मोपनतं प्राप्य तुष्यत्यन्यस्य मुग्धधीः ।
स्वलालालवमास्वाद्य श्वेव शुष्कस्य चर्म्मणः ॥ १२ ॥

वृक्षः पुत्रार्थदः पुंसामित्येतन्मूर्खभाषितम् ।
दातुं शक्तः स नाकाले पत्रमात्रमपि स्वयम् ॥ १३ ॥

གལ་ཏེ་དེ་ནི་ཕྱིན་རློབ་ལྷས། མཆོད་པ་ལ་ཆགས་བྱེད་པ་ན།
བདག་ཉིད་རང་གིས་མཆོད་པ་ནི། ཡོ་བྱད་རྫོགས་པ་ཅིས་མི་སྦྱོ། 14

སྲིན་བུའི་རྗེས་ནི་ཡི་གེ་བཞིན། གང་ཡང་ཐོབ་བྱ་ཐོབ་པ་ན།
བྱ་རོག་ཏ་ལ་ལྟར་བརྗོད་པས། སྐྱེ་བོ་དེ་ཡིས་བྱིན་པར་སེམས། 15

གང་ཞིག་ཐོབ་བྱ་དེ་ནི་ལས་རྣམས་འབྲས་བུ་ཡོངས་སུ་གྱུར་ཚེ་ཐོབ།
སྣ་ཚོགས་འབད་ཅིང་གུས་པས་བསྒྲུབས་ཀྱང་ཐོབ་བྱ་མིན་པ་འཐོབ་མ་ཡིན།
གང་ཞིག་གང་གིས་རང་ཉིད་ཀྱིས་བསགས་ལོངས་སྤྱོད་སྐལ་ལྡན་དེ་ལ་ནི།
འདི་དག་འདི་ཡིས་བྱས་ཞེས་སྨོངས་པའི་བློ་ཅན་འབྲས་མེད་དེ་དག་སེམས། 16

ཞེས་པ་སྨྲ་དེ་མཛའ་གཙུགས་དང་། ལྡན་པའི་གཉེན་གྱིས་རབ་འབད་དེ།
བསྐུལ་ནས་གཅིག་པུ་གསང་བ་ཡིས། ཀཱང་འབྲུང་གི་ནི་དྲུང་དུ་སོང་། 17

ཕྱི་རེ་བཟུང་ནས་དེ་ཡིས་ནི། ཀུ་གྲོ་དྷ་ཡི་ཤིང་ལ་སླས།
མཆོད་པའམ་ཚ་བ་གཙོད་པ་ལ། ངས་ནི་ཆས་ནས་ཁྱོད་ཅན་འོངས། 18

བྱ་དག་སྲིན་ན་ཁྱོད་ལ་བདག། གཞན་གྱིས་མ་བྱས་མཆོད་པ་བྱེད།
རྣམ་པ་གཞན་དུ་ཁྱོད་བདག་གིས། བཅད་བསྲེགས་བདགས་ལ་རྒྱ་བོར་འཕངས། 19

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། ལྷ་ནི་ཤིང་ལ་གནས་པ་དག།
འཕྲལ་ལ་འཇིགས་པས་འཁྲུགས་གྱུར་ཏེ། འདར་བར་བྱེད་ཅིང་རབ་བསམས་ཏེ། 20

तदधिष्ठातृदेवश्चेत् पूजालुब्धः करोति तत् ।
पूर्णोपहारपूजां किं स्वयं सृजति नात्मनः ॥ १४ ॥

प्राप्तव्यं प्राप्य यदि वा घुणाक्षरपदोपमम् ।
काकतालीयसंवादात्तद्दत्तं मन्यते जनः ॥ १५ ॥

प्राप्तव्यं यत् फलपरिणतौ कर्म्मणां प्राप्यते तत्
नानायतनप्रणयपतनैर्लभ्यते न त्वलभ्यम् ।
यद्येनैव स्वयमुपचितं भोगभागी स तस्मिन्
एतेनैतत् कृतमिति मुधा मन्यते मुग्धबुद्धिः ॥ १६ ॥

इति ब्रुवाणः सस्नेहैरनुबन्धेन बान्धवैः ।
प्रेरितः स ययौ मूढ़ एकाकी पादपान्तिकम् ॥ १७ ॥

स कुठारं समादाय न्यग्रोधतरुमभ्यधात् ।
पूजायां मूलघाते वा सज्जोऽहं त्वामुपागतः ॥ १८ ॥

पुत्रप्रदातुः पूजां ते करिष्याम्यकृतां परैः ।
नद्यां त्वामन्यथा च्छित्वा दग्ध्वा पिष्ट्वा क्षिपाम्यहम् ॥ १९ ॥

इति तद्वचनं श्रुत्वा देवता वृक्षवासिनी ।
सहसैव भयोद्विग्ना कम्पमाना व्यचिन्तयत् ॥ २० ॥

འདོད་པའི་བུ་འམ་ནོར་དག་ནི། བདག་གིས་སུ་ལའང་སྦྱིན་པ་མེད།
རང་གི་ལས་ཀྱིས་ཐོབ་པ་ལ། སྐྱེ་བོ་བདག་གིས་སྦྱིན་པར་སེམས། 21

གང་འདི་སྟོབས་ཀྱིས་བུ་སློང་ཞིང་། ལས་ཀྱི་སྒྲོར་བསམ་མ་ཐོབ་ན།
ལྷ་ཉིད་གཙོད་དུ་འོངས་གྱུར་པ། འདི་ནི་སྔོན་ཆད་མེད་པ་འོངས། 22

འབྲས་དོན་གཉེར་བས་མཆོད་བྱ་ནི། མཆོད་པ་གང་འདི་ལུགས་ཙམ་སྟེ།
ལས་ཀྱི་བཅིངས་པའི་འབྲས་ཐོབ་པ། སུ་ཡིས་ཕྱིན་ཅིང་གང་དུ་ལྷ། 23

སྐྱེས་བུ་རང་གི་ལས་ཀྱིས་ནད། བསོས་བ་གྲུབ་པ་མིན་པ་ལ།
རྩིས་མཁན་འཛིན་པ་ཉིད་མ་ཡིན། སྨན་པ་མ་ཡིན་སྔགས་པའང་མིན། 24

བྱ་མིན་བྱེད་པ་འདི་ལ་ནི། ཤིང་ནི་བཅད་པར་ནུམ་བདོགས་ཡོད།
ཚུལ་མིན་དག་ལ་མངོན་ཞེན་པའི། བག་མེད་ཉམས་པ་བྱ་མིན་ཏེ། 25

ཤིང་ནི་བཅད་ན་གཞན་དུ་བདག། གནས་པར་མི་ནུས་བདེ་བ་མེད།
འགྲོགས་པས་གོམས་ཙན་དགའ་བ་ནི། ཐུབ་པ་ཉམས་ལའང་སྡུག་བསྔལ་སྐྱེད། 26

དེ་དག་བསམས་ནས་བགྱི་ཕྱིན་གྱི། ཁང་པར་གྱུར་བར་དེ་སོང་ནས།
དོན་ནི་དེ་ལ་བརྗོད་ནས་ནི། ཡོངས་སུ་སྨག་བས་སྨྲ་སྨྲས་པ། 27

རྟག་ཏུ་བདག་ནི་ལྡོན་པ་དེར། སྐྱེ་བོ་རྣམས་ཀྱི་མཆོད་གྱུར་ཀྱང་།
སྣ་ཚོགས་དོན་གཉེར་ཉེར་གནས་པས། བདག་ནི་ཤིན་དུ་གཟིར་བར་གྱུར། 28

न मया कस्यचित् सूनुर्वित्तं वा दत्तमिच्छया।
जनः स्वकर्म्मसम्प्राप्तं मद्दत्तमिति मन्यते ॥ २१ ॥

इदन्त्वपूर्व्वमायातं पुत्रार्थी यदयं बलात्।
कर्म्मयोगादसम्प्राप्तौ दैवतं छेत्तुमागतः ॥ २२ ॥

स्थितिमात्रमिदं पूज्यः पूज्यते यत् फलार्थिभिः।
कर्म्मबद्धफलालाभे क्व देवः केन दापितः ॥ २३ ॥

चिकित्सायामसिद्धायां व्याधौ पुंसः स्वकर्म्मणा।
गृह्यन्ते नैव गणका न वैद्या न च मन्त्रिणः ॥ २४ ॥

वृक्षच्छेदविकल्पोऽस्ति नचास्याकार्य्यकारिणः।
अन्यायाभिनिविष्टानां किमकार्य्यं प्रमादिनाम् ॥ २५ ॥

वृक्षच्छेदे न शक्नोमि स्थातुमन्यत्र निःसुखा।
सङ्गादाभ्यासिकी प्रीतिर्मुनीनामपि दुस्त्यजा ॥ २६ ॥

इति सञ्चिन्त्य तूर्णं सा गत्वा शक्रस्य मन्दिरम्।
तमर्थं विनिवेद्यास्मै परित्रस्तावदत् पुरः ॥ २७ ॥

जनेन पूज्यमानापि वृक्षे तस्मिन्नहं सदा।
नानार्थार्थिभिरत्यर्थं सोपवासैः कदर्थिता ॥ २८ ॥

འགའ་ཡིས་ལེགས་བྱས་བདག་ལ་ཐོབ། འགའ་ཞིག་ཁ་ནི་འོག་ཕྱོགས་གྱུར།
གཡོ་སྒྲོངས་མི་བསྲུན་བདུལ་ཞུགས་ཀྱིས། གཞན་ནི་དེ་ཉིད་ན་རབ་ཆགས། 29

སོང་བའི་རྗེས་སུ་འགྲོ་ཉིད་ཀྱིས། སྐྱེ་བོ་གྲགས་པ་ལ་སྨོན་ཉོམས།
གདུང་བ་ཐམས་ཅད་གཞོམ་པའི་སླད། སྒྲོངས་པ་བདག་ཅག་ཉིད་དུ་གྱུག། 30

སྐྱེ་བོ་བློ་གྲོས་མི་གཟོ་བས། མི་བཟད་གཅེས་པར་གྱུར་ཀྱང་བདག།
བསམ་བ་དེ་ཡི་ཡོན་དན་ལ། ཆགས་པས་ཤིང་ནི་གཏོང་མི་ནུས། 31

དྲི་ལ་ཆགས་པའི་བུང་བ་འདམ་གྱིས་འཆིང་བའི་ཉེན་མོངས་ལྡན་པར་འཇུག།
བད་ཙའི་རོ་སྦྱང་ངང་པ་ཉིད་ནི་འདམ་གྱི་འཇིགས་པ་རྩེ་མི་བྱེད།
གྲང་བས་གཟིར་བའི་སྐྱེ་བོ་དུ་བས་འཁྲུགས་པའི་མེ་ནི་ཡོངས་མི་འདོད།
གང་ལ་གང་ཞིག་ཉེར་མཁོ་དེ་ལ་དེ་ཡི་སྐྱོན་ནི་ངེས་པར་བཟོད། 32

དེ་སྐད་ཤིང་བྲལ་གདུང་བ་ལས། ཁྲབ་བདག་བདག་ནི་བསྐྱབ་པར་འོས།
གང་ཕྱིར་ལུས་ཅན་ཚོམས་ཀྱི་གནས། གཏོང་བ་ལུས་ནི་གཏོང་དང་མཚུངས། 33

ཞེས་པ་དེ་ཡི་འབད་པ་ཡིས། གསོལ་གདབ་པོ་ལོ་སྣ་དགའ་བས།
ཁྲིམ་བདག་གིས་ནི་བུ་ཐོབ་བའི། ལས་ཀྱི་དབང་ནི་ཡང་དག་བསམསམ། 34

སྐབས་དེར་ལྷ་མིན་དགྲ་བོ་ཡིས། སྐབས་གསུམ་པ་ཡི་ལྷ་ཡི་བུ།
བློ་བཟང་ཞེས་པ་ལྷུང་བ་ཡི། དུས་ལ་བབ་པ་མཐོང་གྱུར་ཏེ། 35

लभन्ते सुकृतात् केचित् केचित् गच्छन्त्यधोमुखाः ।
तत्रैवान्ये प्रलीयन्ते हठमूर्खाः खलव्रतैः ॥ २९ ॥

गतानुगतिकत्वेन प्रसिद्धिशरणो जनः ।
सर्व्वार्त्तिपरिहाराय मौर्ख्यान्मामेव धावति ॥ ३० ॥

उद्वेजिताप्यहं तीव्रं जनेनाकृतबुद्धिना ।
तदं त्यक्तुं न शक्नोमि तद्गुणावर्ज्जिताशया ॥ ३१ ॥

वन्धक्लेशं विशति[1] मधुपः पङ्कजं गन्धलुब्धः
पङ्कातङ्कं गणयति विशास्वादने नैव हंसः ।
शीतार्त्तश्च त्यजति न जनः पावकं धूमधूम्र
तस्मिन् दोषं स किल सहते यस्य येनोपयोगः ॥ ३२ ॥

तस्माद्दृक्षवियोगार्त्तां त्रातुमर्हसि मां विभो ।
शरीरत्यागसदृशः स्थानत्यागो हि देहिनाम् ॥ ३३ ॥

अर्थितः प्रणयेनेति पौलोमीरमणस्तया ।
पुत्रलाभं गृहपतेः कर्म्मायत्तमचिन्तयत् ॥ ३४ ॥

अत्रान्तरे वृत्रशत्रुर्देवपुत्रं त्रिपिष्टपे ।
सुमतिं नाम सम्प्राप्तच्युतिकालं व्यलोकयत्[2] ॥ ३५ ॥

---

१ H व्रजति । २ H व्यचिन्तयत् ।

མི་བསྐུན་ལ་བདུད་གྲགས་པ་ཉམས་པ་བཞིན་དུ་འཕྲེང་བ་དྲིམ་ཅན་གྱུར་ཅིང།
དམན་གྱུར་སློང་བ་བཞིན་དུ་མཛེས་པ་སྨུན་པ་དག་དང་ཡོངས་འདྲིས་བྱུང་བར་གྱུར།
བསོད་ནམས་ཡོངས་སུ་ཟད་ལས་གནོད་པས་བཞིན་དུ་དུལ་གྱིས་ཀྱང་ནི་གནས་དག་བྱས།
ཉི་སྣང་སྐྱོན་བཅས་ཟླ་བཞིན་དེ་ནི་ལྷུང་བ་གསལ་བྱེད་དགའ་བ་མིན་པར་གྱུར། 36

ལེགས་པ་རབ་སད་ཡོན་ཏན་ཅན། ས་ལ་དཔལ་ལྡན་གྲགས་པ་ཡིས།
བློ་བཟང་བུ་ཉིད་དུ་སོང་ཞེས། དེ་ལ་ལྷ་ཡི་བདག་པོས་སྨྲས། 37

དེས་སྨྲས་སྟོན་པ་ཤཱཀྱ་ཐུབ། ཟླ་མེད་གྱི་ཆེ་ཆོས་ཀྱི་ནི།
འཁོར་ལོ་རབ་ཏུ་བསྐོར་མཛད་པའི། མདུན་དུ་དུས་རིང་གལ་ཏེ་བདག། 38

རབ་ཏུ་བྱུང་བ་འདོད་པ་ལ། ཁྱོད་ཀྱིས་ཡང་དག་རྗོགས་བྱེད་ན།
ས་ལ་ལེགས་པར་རབ་སད་ཀྱི། བུ་ཉིད་དུ་ནི་བདག་གིས་འགྲོ། 39

ལྷ་ཡི་བུ་ཡིས་འདི་བརྗོད་པས། བརྒྱ་བྱིན་དེ་བཞིན་ཞེས་སྨྲས་ཏེ།
རྗེས་གནང་དེ་ནི་དེ་ནས་འགྲོས། དེ་ཡི་ཆུང་མའི་དཀྲུ་རུ་ཞུགས། 40

ལྷ་ནི་རང་གི་གནས་སོང་སྟེ། ལེགས་པར་རབ་སད་དེ་ལ་སྨྲས།
རབ་ཏུ་འབྱུང་ལ་མངོན་དགའི་བུ། དགེ་བ་ཁྱོད་ལ་འབྱུང་བར་འགྱུར། 41

ཞེས་པ་ཐོས་ནས་ཁྱིམ་བདག་ནི། རབ་ཏུ་མགུ་ནས་ཁྱིམ་སོང་སྟེ།
བུ་ནི་རབ་ཏུ་འབྱུང་བ་དག། བདག་གིས་བཟློག་པར་བྱ་ཞེས་བསམས། 42

माला म्लानिमुपाययौ स्खलनतिक्लिष्टेव कीर्त्तिस्तदा
छाया प्रादुरभूत्तमःपरिचिता याच्ञेव दैन्योदये।
स्वेदः पुण्यपरिक्षये नव इवापायश्चकारास्पदं
तस्याभूदरतिर्निपातपिशुना सद्वेषदोषेव धीः ॥ ३६ ॥

गुणिनः सुप्रबुद्धस्य पृथिव्यां प्रथितश्रियः।
सुमते पुत्रतामेहि तमित्याह सुरेश्वरः ॥ ३७ ॥

सोऽब्रवीत्तत्र मां काले शास्तुः शाक्यमुनेः पुरः।
शक्रस्यानुत्तरोदार[1]धर्म्मचक्रप्रवर्त्तने ॥ ३८ ॥

प्रव्रज्यासादनाय त्वं यदि संबोधयिष्यसि।
तदहं सुप्रबुद्धस्य व्रजामि भुवि पुत्रताम् ॥ ३९ ॥

इत्युक्ते देवपुत्रेण शक्रेणोक्ते तथेति च।
च्युतः स तस्मादास्नतस्तत्पत्न्याः कुक्षिमाविशत् ॥ ४० ॥

देवता स्वपदं गत्वा सुप्रबुद्धमभाषत।
प्रव्रज्याभिरतः साधो भविष्यति सुतस्तव ॥ ४१ ॥

इति श्रुत्वा गृहपतिः प्रहृष्टः प्रययौ गृहम्।
प्रव्रज्यां वारयिष्यामि पुत्रस्येति विचिन्तयन्[2] ॥ ४२ ॥

---

१ H and $\frac{W}{2}$ read ०दान०। २ All the MSS. read विचिन्तयत्।

དེ་ནས་དུས་ཀྱི་དེ་ཡིས་ནི། ཆུང་མ་རོལ་བ་མ་ཞེས་ལ།
ཡན་ལག་ཐམས་ཅད་མཚན་ཉིད་ལྡན། ཕྲིས་པ་གསེར་འོད་ཅན་དེ་བཙས། 43

དེ་སྐྱེས་ཉིད་ན་རིན་ཆེན་ནི། ཀུན་གྱི་རང་བཞིན་གདུགས་འཁྲུངས་ཏེ།
ལེགས་བྱས་དཔལ་ནི་ཟླ་མེད་དང་། ངོ་མཚར་གཟུགས་དང་ལྡན་པ་བཞིན། 44

མཆོག་ཏུ་ཕ་ཡིས་གྲགས་འཕེལ་པས། རིག་པ་སྒྲུ་ཙོལ་འབྱོར་པ་ཉམས།
ཚོགས་པའི་ཁང་པ་ལྟ་བུ་སྟེ། གྲགས་སྦྱིན་ཞེས་ནི་བྱ་བར་གྱུར། 45

ལྷ་ཡི་ཚིག་ནི་དྲན་གྱུར་ནས། དེ་ནི་རབ་ཏུ་བྱུང་དགོས་ཏེ།
གྲོང་དང་ཁང་པ་གྲོང་ཁྱེར་གྱི། སྐྱོ་ཉམས་ཕ་ཡིས་བསྲུང་པར་བྱས། 46

དེ་ནས་བརྒྱ་བྱིན་མངོན་ཕྱོགས་ཏེ། སྔོན་གྱི་བགྲོ་བ་བརྟེན་པར་བྱས།
ཞི་བས་དྲན་པ་རབ་བྱུང་ལ། མངོན་པར་ཕྱོགས་ཤིང་གུས་པར་གྱུར། 47

ནམ་ཞིག་རང་གི་སྐྱིད་ཚལ་དུ། དལ་གྱིས་ཤིང་རྟ་ཞོན་འགྲོ་དེས།
བཅོམ་ལྡན་རྒྱལ་བ་ཛེ་ཞིག་ལྟར། བྱོན་པ་དག་ནི་མཐོང་བར་གྱུར། 48

སྙིང་ལ་བདེ་བས་ཡང་དག་རིག། རབ་ཞི་བདུད་རྩིའི་ཆར་འབབས་པ།
དེ་མཐོང་ཉིད་ནི་ན་འཕྲུལ་ནི། ཤིང་རྟ་དག་ལས་དེ་ཡིས་བ་བས། 49

དེ་ལ་བསྐོར་བ་གསུམ་བྱས་ཏེ། དེ་ཡིས་ཞབས་པད་ཟུང་དག་ལ།
དང་བས་བརྟན་པ་དེ་ཡིས་ནི། སྤྱན་གྱིས་གཟིགས་པ་དེས་ཕྱག་བཙལ། 50

ततः कालेन तत्पत्नी ललिता नाम बालकम्।
सर्व्वाङ्गलक्षणोपेतमसूत कनकद्युतिम्॥ ४३॥

सर्व्वं रत्नमयं तस्य जातस्यैव व्यजायत।
छत्रं मूर्त्तमिवाश्चर्य्यमुत्तंसं सुकृतश्रियः॥ ४४॥

स यशोदाभिधानोऽभूत् यशोवृद्ध्या पितुः परम्।
विद्याकलाविभूतीनां समागमगृहोपमः॥ ४५॥

देवतावचनं स्मृत्वा प्रव्रज्याशङ्कितः पिता।
तस्य चक्रे गृहपुरद्वारगोपुररक्षणम्॥ ४६॥

अथाभ्येत्य स शक्रेण स्मारितः पूर्व्वसंविदा।
बभूव शमसंसिक्तः प्रव्रज्याभिमुखादरः॥ ४७॥

स कदाचिन्निजोद्याने रथारूढः शनैर्व्रजन्।
ददर्श जिनमायान्तं भगवन्तं यदृच्छया॥ ४८॥

हृदये सुखसंस्पर्शं वर्षन्तं प्रशमामृतम्।
तं विलोक्यैव सहसा रथादवततार सः॥ ४९॥

तं त्रिः प्रदक्षिणीकृत्य तत्पादनलिनद्वयम्।
स ववन्दे प्रसादार्द्रदृशा तेनावलोकितः॥ ५०॥

དེ་ནས་རབ་དང་བཅོམ་ལྡན་ལ། རབ་བདུད་དེ་ཡི་རྗེས་གནང་གིས།
དེ་ཉིད་ནོམ་པར་སེམས་ཤིང་དེ། རང་གི་སྐྱིད་སོས་ཚལ་དུ་སོང་། 51

དེ་ནས་བཅོམ་ལྡན་འཛུམ་ལྡན་པས། དགེ་སློང་དེ་ཁྲུལ་ལ་གསུངས་པ།
བདག་གི་དྲུང་དུ་གཞོན་ནུ་འདི། མཚན་མོ་རབ་ཏུ་འབྱུང་བར་འགྱུར། 52

ཞེས་གསུངས་བདེ་གཤེགས་རང་གནས་སུ། དགེ་སློང་ནམས་དང་ལྷན་ཅིག་གཤེགས།
བརྒྱ་བྱིན་གྱིས་སྤྲུལ་བུད་མེད་ལུས། གཞོན་ནུ་ཡིས་ནི་མཐོང་གྱུར་ཏེ། 53

བརྙོགས་ཤིང་རུལ་ལ་མི་གཙང་བ། སྲིན་བུའི་ཚོགས་ཀྱིས་འཁྲུགས་ཤིང་གནས།
སྐྱིད་སོས་ཚལ་གྱི་རོ་མཐོང་ནས། ཆགས་བྲལ་ལྡན་བ་དེས་བསམ་པ། 54

དར་བབ་གཟུགས་ནི་མཛེས་པ་དང་། སྡུག་པ་ནོམ་པར་འགྱུར་བ་ཉིད།
བགས་པ་ཤ་ཚོགས་མི་ནམས་ཀྱིས། རང་བཞིན་དེ་ནི་འདི་ཉིད་དོ། 55

མིག་དག་གཡོ་ཞིང་ནུ་མ་ཟླུང་ནི་རབ་གྱིས་རི་བོང་ཅན་གྱི་འོད་ཀྱི་མཛོད།
ལུས་ན་ཡང་ཚོགསར་པ་དར་བབ་མཛེས་སྡུག་འཕྲོ་བར་བསྒྲང་བ་འདི་དག་ནི།
རྩུལ་བའི་བརྙན་གྱིས་ངེས་བྲན་འཁྲུགས་ཤིང་དམན་པའི་སྲིན་བུ་ནམས་ཀྱིས་དཀྲིགས།
ངན་ཞིང་རབ་མང་བ་ཤང་བས་བསྐོས་ཤིང་མཐའ་དག་གྱི་མཆིན་འཁྲུལ་འཁོར་མེད་ཉིད་གྱུར། 56

ཡན་ལག་ཐམས་ཅད་འགྲོགས་པར་སྒྲོ་བ་འདི་ལ་ཆགས་ཤིང་རྨོངས་པས་མིག་བྲོགས་ཤིང་།
ནུ་མའི་དཀྱིལ་འཁོར་ལ་ཆགས་བློ་གྲོས་ཉམས་པས་མཆོག་ཏུ་བདེ་བ་ཐོབ་གྱུར་པ།
གང་ལས་ལྤ་སྐྱེས་འདི་ནི་ཆགས་བྲལ་བཟའ་བ་དག་ལས་ཕྱིར་ཕྱོགས་བཞིན་འཁྲིག་ཅིང་།
མི་གཙང་དྲི་ང་དག་གིས་ཡིད་བྱུང་བློ་གྲོས་སྨྱུས་ཕྱིན་རིང་དུ་འགྲོ་བར་འགྱུར། 57

भगवन्तं प्रणम्याथ प्रसन्नं तदनुज्ञया ।
जगाम निजमुद्यानं स तमेव विचिन्तयन् ॥ ५१ ॥

भिक्षुमश्वजिनं प्राह भगवानथ सस्मितः ।
एषोऽन्तिकेऽद्य मे रात्रौ कुमारः प्रव्रजिष्यति ॥ ५२ ॥

इत्युक्त्वा स्वपदं याते सुगते सह भिक्षुभिः ।
शक्रनिर्म्मितमद्राक्षीत् कुमारः स्त्रीकलेवरम् ॥ ५३ ॥

पूयपर्य्युषितक्लेदसीदत्क्रिमिकुलाकुलम् ।
स दृष्ट्वा शवमुद्याने सोद्वेगः समचिन्तयत् ॥ ५४ ॥

विकारा एव तारुण्यरूपलावण्यकान्तयः ।
चर्म्ममांससमूहानामियं सा प्रकृतिर्नृणाम् ॥ ५५ ॥

लोलल्लोचनमुन्मिषत्कुचयुगं क्वाषं शशाङ्कत्विषा
मेतत्तन्नवयौवनोदयलसल्लावण्यगण्यं वपुः ।
यातं पूतिवसावसेकविकलं ताम्यत्क्रिमिव्याकुलं
क्लिन्नक्लोमयकृत्विकीर्णसकलप्लीहान्त्रनिर्यन्त्रताम् ॥ ५६ ॥

अस्मिन् रागविमोहहारितदृशः सर्व्वाङ्गसङ्गोत्सवे
संलीनाः स्तनमण्डले हतधियः प्रापुः परां निर्वृतिम् ।
यस्मादेष गतस्पृहः कवलने वैमुख्यवक्रानन:
क्लेदोत्सादविषादकूणितमतिदूरङ्गतो जम्बुकः ॥ ५७ ॥

ཞེས་བསམས་ཆགས་བྲལ་བག་ཆགས་ནི། ཟླས་པ་ཡང་དག་གྱིས་གྱུར་ཏེ།
དེ་ནི་སྐྱེད་ཚལ་ལས་ཕྱིར་ཕྱོགས། རང་གི་ཁང་པར་དཔལ་གྱིས་སོང་། 58

སྐབས་དེར་ཉིན་བྱེད་འཛིག་རྟེན་གྱི། སྤྱོད་ཚུལ་རི་བྲལ་མཐོང་བས་བཞིན།
སྐྱོ་ཞིང་རབ་ཞིར་མངོན་ཕྱོགས་ཏེ། ཉིན་བར་དག་ནི་ཉམས་པར་གྱུར། 59

ངལ་དུབ་མ་ལུས་ཡོངས་གཏོང་བར། འོས་པ་རབ་ཞིར་འགྲོ་འདོད་ཅིང་།
ཐུན་མཚམས་མཁའ་ཡི་གོས་དམར་བསྟེན། ཉིན་མོ་རབ་ཏུ་བྱུང་བཞིན་གྱུར། 60

ཉི་མ་སྲིད་པའི་མིག་དག་ནི། འཛིག་རྟེན་ཕ་རོལ་གནས་སོང་ཚོ།
འཛིག་རྟེན་ཡོངས་བདང་ཉིན་མོ་ཡང་། དེ་ཡི་རྗེས་འབྲང་ཉིད་དུ་གྱུར། 61

དེ་ནས་འགྲོ་བསྟེན་གསར་བ་ཡི། རབ་རིབ་མུ་ཅན་སྦྱོར་བ་དག།
སྔོན་མའི་དཀྱིལ་འཁོར་སྣང་བ་ཡིས། བརྩེ་བས་བཞིན་དུ་རབ་ཏུ་བཟློག། 62

སྐབས་དེར་སྟོན་པ་རང་ཉིད་ནི། གྲགས་སྦྱིན་དག་ལ་བརྩེ་བ་ཡིས།
གྲོང་ཁྱེར་སྐྱང་འགྲམས་ཕ་རོལ་དུ། དེ་འཕྲབ་སྐད་དུ་ཡང་དག་གཤེགས། 63

གྲགས་སྦྱིན་གྱིས་ཀྱང་ཉིན་པར་གྱིས། ཉོན་མོངས་མཚུངས་པ་ཡང་ཡང་དུ།
འཁོར་བ་སྙིང་པོ་མེད་པ་ཉིད། སེམས་ཤིང་ཉལ་བའི་ཁང་པར་ཞུགས། 64

གླིང་བུ་རྒྱུད་མང་རྫ་རྔ་སོགས། རྩེ་དགའ་ལ་ཞིང་གཅིད་ལོག་པ།
མིག་ཟུམ་རྒྱུགས་པས་འཁྲུགས་པ་ཡི། བུ་མེད་རྣམས་དེར་དེ་ཡིས་མཐོང་། 65

इति सञ्चिन्त्य सञ्जातगाढ़वैराग्यवासनः।
जगामोद्यानविमुखः स शनैर्निजमन्दिरम्॥ ५८॥

अत्रान्तरे दिनग्लानिखिन्नोऽभूत् प्रशमोन्मुखः।
विरसं लोकवृत्तान्तं विलोक्येव दिवाकरः॥ ५९॥

अशेषाशापरित्यागयोग्यं प्रशममीयुषः।
सन्ध्यारक्ताम्बरजुषः प्रव्रज्येव रवेरभूत्॥ ६०॥

लोकोत्तरपदं याते भानौ भुवनचक्षुषि।
वासरोऽपि परित्यज्य लोकं तदनुगोऽभवत्॥ ६१॥

ततः प्रत्यग्रतिमिरोद्वेगयोगं जगज्जुषाम्।
प्रदीपमण्डलालोकः कृपयेव न्यवारयत्॥ ६२॥

अस्मिन्नवसरे शास्ता यशोददयया स्वयम्।
पुरनद्याः परं पारं तत्प्राप्त्यै समुपाययौ॥ ६३॥

यशोदोऽपि दिनापायतुलया कलयन्मुहुः।
संसारासारतामेव शय्याभवनमाविशत्॥ ६४॥

वेणुवीणामृदङ्गादिविनोदैर्मदनिर्भराः।
तत्रापश्यत् स्खललनाः श्रमनिद्रानिमीलिताः॥ ६५॥

ཁ་ཉི་གྲུད་མང་ལ་བཀོད་ཅིང་། ལག་པའི་འཁྲི་ཤིང་ཛོ་ཊིར་གདང་།
བདེ་བ་སྐད་ཅིག་པ་ཉིད་ཀྱིས། སྡུག་བསྔལ་བསམ་གཏན་ལ་ཞུགས་བཞིན། 66

གོས་རལ་ཤི་བ་བཞིན་དུ་ནི། གཡོ་མེད་དེ་དག་མཐོང་གྱུར་ནས།
ལྷག་པར་ཆགས་བྲལ་ཡང་དག་སྐྱེས། ཡུན་རིང་དེ་ཡིས་ཡང་དག་བསམསས། 67

ཀྱི་མ་ཡུལ་ནི་འདི་དག་ནམས། མཛུག་དུ་མཆོག་དུ་རོ་དང་བྲལ།
བྱུད་མེད་ཅེས་པ་འདི་ལྟ་ལ། རྨོངས་པ་ནམས་ནི་མཆོག་དུ་གུས། 68

མཆོག་མིན་བདེ་བའི་སྨིན་གྱུས་ལ། བློག་གི་རྩེ་དགའ་འདི་དག་ནམས།
གཅིད་ལོག་ཤི་བ་དག་ལ་ཡང་། ནམ་འཕྲུལ་གང་ན་འཛུམ་གང་ན། 69

འགའ་ཞིག་འོག་དུ་ཁ་བལྟས་ཉལ་ཞིང་དེ་ཡི་གྱུབ་ནི་གཞན་དུ་བསློག་སྟེ་ལྟུང་།
གཞན་ཡང་གན་ཀྱལ་ཡན་ལག་ཀུན་བཀྱངས་ཁ་ཡི་བྲུ་ག་ནམ་པར་བྱེ་བར་གྱུར།
གཞན་དག་སྐྲ་ནི་གྲོལ་ཞིང་དྲ་བས་ཐྲག་པ་ལ་ཆགས་བྱ་རོག་བབས་པ་བཞིན།
བདག་གི་ཁྱིམ་ནི་མིག་ཟུམ་བུད་མེད་ཚོགས་ནམས་ནམ་འཛིན་དུར་ཁྲོད་ལྟ་བུར་སྣང་། 70

རིང་ཉིད་རབ་བྱུང་དོན་གཉེར་བདག། གྲོང་ཁྱེར་ནང་ལས་ཕྱིར་འཐོན་དེ།
རྨོངས་པ་བཟློག་སྐད་བཅོམ་ལྡན་འདས། ངེས་པར་བལྟ་རུ་འགྲོ་བར་བྱ། 71

ཞེས་བསམསས་རིན་ཐང་ཆེ་བ་ཡི། རིན་ཅན་མཆིལ་ལྷམ་བླང་ནས་དེ།
གྲོང་སྲུང་ནམས་ཀྱིས་མ་ཤེས་པར། བརྒྱ་བྱིན་གྱི་ནི་མཐུ་ཡིས་སོང་། 72

वीणाविन्यस्तवदना मृदङ्गार्पितदोर्लताः।
क्षणिकत्वात् सुखस्येव दुःखध्यानमुपागताः॥ ६६॥

विलोक्य स्रस्तवसनास्ता मृता इव निश्चलाः।
सञ्जाताधिकवैराग्यः स चिरं समचिन्तयत्॥ ६७॥

अहो बतास्मिन् विषये पर्य्यन्तविरसे परम्।
एवम्विधे वधूनाम्नि मुग्धानां भृशमादरः॥ ६८॥

विद्युद्विलसितान्यासामसत्सुखघनोदये।
सुप्तानाञ्च मृतानाञ्च क्व स्मितं क्व च विभ्रमाः॥ ६९॥

शेते काचिदधोमुखी विवलिता पृष्ठे च्युतास्यापरा
यातान्यापि विकाशितास्यविवरा सर्व्वाङ्गमुत्तानताम्।
अंशासक्तविभक्तमुक्तकवरीकाकैर्वृतेवापरा
चित्रं मे भवनं विलीननयनस्त्रैणं श्मशानायते॥ ७०॥

अहमद्यैव निष्क्रम्य प्रव्रज्यार्थी पुरान्तरात्।
भगवन्तं व्रजाम्येव द्रष्टुं मोहनिवृत्तये॥ ७१॥

विचिन्त्येति समादाय महार्हे रत्नपादुके।
शक्रप्रभावात् स ययावज्ञातः पुररक्षिभिः॥ ७२॥

གྲོང་ཁྱེར་སྐྱོ་ལས་མངོན་པར་ནི། སྲུང་སྟེ་ཆུ་སྐྱུང་མཆོག་ཐོབ་ནས།
འཁོར་བའི་རྒྱུ་དག་འཛོམས་པ་ཡིས། གདུང་བ་གཏོང་བར་བརྩོན་པ་བཞིན། 73

བཅོམ་ལྡན་འབྱུང་པོ་དགོངས་པ་ཡིས། དེ་ནི་འོང་བ་གཟིགས་གྱུར་ནས།
དགྱེས་པས་དེ་ནི་བསྐལ་བ་ལ། བཞིན་དང་ལྡན་པ་བཞིན་དུ་གྱུར། 74

དེ་ཡིས་རྗེས་མཐུན་གསེར་གྱི་མདོག། ཕྱག་ནི་གཡས་པ་བཀྱིངས་མཛད་ནས།
སྐུ་ཡི་གཟི་བརྗིད་སྣང་བ་ཡས། ཕྱོགས་ཀྱི་མུན་པ་ཡོངས་སྤྲོགས་ཤིང་། 75

ཚུར་ཤོག་ཚུར་ཤོག་གནོད་མེད་ལ། ནད་མེད་གནས་ནི་ཁྱོད་ཀྱིས་ཐོབ།
ཅེས་པ་འབྲུག་དབྱངས་ལྟར་སྒྲུག་སྐྱས། རིང་པོ་ནས་ནི་དེ་ལ་གསུངས། 76

བཅོམ་ལྡན་འདས་ཀྱི་གསུང་ཐོས་ནས། བདུད་རྩི་ཡིས་ནི་གང་བ་བཞིན།
ཡོངས་གདུང་བདང་ནས་གྲགས་སྦྱིན་ནི། འཕྲུལ་ལ་བསིལ་བ་ཉིད་དུ་གྱུར། 77

རིན་ཅེན་རིན་ཅེན་མཆིལ་ལྷམ་ནི། སྐྱུང་གི་ངོགས་སུ་དེ་ཡིས་དོར།
བགོལ་ཕྱིན་དེ་ཡིས་པ་རོལ་གྱི། བགྲུས་དུ་ཐར་པ་ཉིད་ཐོབ་གྱུར། 78

བཅོམ་ལྡན་དྲུང་དུ་ངེས་ཕྱིན་ཏེ། གདུང་བ་ཅན་གྱི་ཙན་དན་ཤིང་།
དང་བས་བརྟན་ལ་ཟུར་ཕུད་ནི། ཞབས་ལ་གཏུགས་པས་རབ་ཏུ་བཏུད། 79

དེ་ནས་དེ་ལ་སྟོན་པ་ཡིས། གང་གིས་འདི་ནི་ཆགས་བྲལ་ཉིད།
འཐོབ་བ་མཚུངས་མེད་མཆོག་གྱུར་པ། ལེགས་པའི་ཆོས་ནི་བསྟན་པར་མཛད། 80

अभिनिष्क्रम्य नगरात् वारां प्राप्य सरिद्वराम्।
संसारमरुसंक्रान्तं तापं त्यक्तुमिवोद्यतः ॥ ७३ ॥

तमायान्तं विलोक्यैव भगवान् भूतभावनः।
प्रीत्या सन्तरणे तस्य ययौ सोत्कण्ठतामिव ॥ ७४ ॥

स हेमवर्णमुद्यम्य दक्षिणं दक्षिणं भुजम्।
देहप्रभाप्रकाशेन तमः परिहरन् दिशाम् ॥ ७५ ॥

एह्येहि प्राप्नुहि पदं निरपायमनामयम्।
अभ्यधादिति तं दूरान्मेघघोषघनस्वनः ॥ ७६ ॥

श्रुत्वा भगवतः शब्दममृतेनेव पूरितः।
यशोदस्त्यक्तसन्तापः सद्यः शीतलतां ययौ ॥ ७७ ॥

त्यक्त्वा स सरितस्तीरे महार्हे रत्नपादुके।
दत्त्वावगाहमुत्तीर्य्य तां परं पारमाप्तवान् ॥ ७८ ॥

भगवन्तं स सम्प्राप्य तापचन्दनपादपम्।
प्रणनाम प्रसादार्हं चरणालीनशेखरः ॥ ७९ ॥

ततस्तस्यासमोत्कर्षशालिनीं धर्म्मदेशनाम्।
चकार शास्ता लेभेऽसौ यया विगतरागताम् ॥ ८० ॥

བརྡུལ་ཞུགས་བཟང་དེ་བཅོམ་ལྡན་དྲུང་། ལེགས་པར་གསུངས་པའི་ཆོས་འདུལ་ལ།
ཚངས་པར་སྤྱོད་སྤྱོད་རབ་ཏུ་བཀོད། འདོད་པ་རྫོགས་པ་ཉིད་དུ་གྱུར། 81

དེ་ནས་བུ་ནི་སོང་བ་དག། ལེགས་པར་རབ་སད་སང་པས་ཕྲོས།
དེ་བྲལ་མེ་ཡིས་གདུངས་པ་ཡིས། དེ་ནི་འཚོལ་དུ་ཕྱི་རོལ་སོང་། 82

མཛའ་དང་སྨོངས་པ་ཆེན་པོ་ཡིས། གཟིར་ཅིང་སྐྱ་ངན་ལྡན་པ་དེས།
རྒྱ་བོའི་ངོགས་ཀྱི་འགྲམ་དུ་ཕྱིན། རིན་ཅེན་མཆིལ་ལྷམ་དག་ཀྱང་མཐོང་། 83

དེ་ཡིས་རྒྱ་བོ་ཡང་དག་བགོལ། བཅོམ་ལྡན་འདས་ནི་མཐོང་གྱུར་ཏེ།
དེ་ཡི་མཐུ་ཡིས་རབ་བསྐྱབས་པས། མདུན་ན་གནས་པའི་བུ་མ་མཐོང་། 84

དེ་ནས་སླར་ཡང་བཅོམ་ལྡན་གྱིས། རབ་ཏུ་བདུད་བྲུས་དེ་ཡིས་ཡང་།
སྨོངས་པ་ཆོས་གདམ་རིགས་པ་ཡིས། འོད་ཀྱི་མུན་པ་བཞིན་དུ་སྤྲོགས། 85

དེ་ནས་སྨོངས་བྲལ་དེ་ཡིས་བུ། དྲི་མེད་འོད་ལྡན་མཐོང་གྱུར་ནས།
རྗེས་སུ་འདོད་ཅིང་གུས་པ་ཡིས། སྟོན་པ་ལྷག་པར་གཉས་པ་བྱས། 86

དེ་ཡི་ཁྲིམ་དུ་བཅོམ་ལྡན་གྱིས། མཆོད་པ་རབ་ཏུ་བླངས་མཛད་ནས།
དེ་ནི་ཆུང་མར་བཅས་བ་ལ། དག་པའི་བསླབ་གནས་རབ་འབར་མཛད། 87

དེ་ནས་གྲགས་སྤྲིན་གྲོགས་པོ་ནི། དཔལ་དང་ལྡན་པ་ཉམས་ཀྱི་མཆོག།
དྲི་མེད་གང་པོ་ལག་བཟང་དང་། བ་གླང་བདག་ཅེས་བྱ་བ་བཞིས། 88

स्वाख्याते धर्म्मविनये ब्रह्मचर्य्याय सुव्रतः ।
स नियुक्तो भगवता प्रययौ पूर्णकामताम् ॥ ८१ ॥

सुप्रबुद्धः प्रबुद्धोऽथ श्रुत्वा निष्क्रान्तमात्मजम् ।
तद्वियोगाग्निसन्तप्तस्तमन्वेष्टुं विनिर्ययौ ॥ ८२ ॥

स शोकसहितस्नेहमोहेन महतार्दितः ।
व्रजन् ददर्श वारायास्तटान्ते रत्नपादुके ॥ ८३ ॥

स समुत्तीर्य्य सरितं भगवन्तं व्यलोकयत् ।
तत्प्रभावप्रतिच्छन्नं न तु पुत्रं पुरःस्थितम् ॥ ८४ ॥

ततः कृतप्रणामस्य तस्यापि भगवान् पुरः ।
धर्म्यया कथया मोहं त्विषा तमइवाहरत् ॥ ८५ ॥

वीतमोहस्ततः पुत्रं स दृष्ट्वा विमलद्युतिम् ।
शास्तुश्चकारानुमतः प्रणयादधिवासनाम् ॥ ८६ ॥

भगवानथ तद्गेहे कृत्वा पूजाप्रतिग्रहम् ।
तं पत्नीसहितं चक्रे शुद्धशिक्षापदोज्ज्वलम् ॥ ८७ ॥

ततो यशोदसचिवाश्चत्वारः श्रीमतां वराः ।
विमलाख्यः सुबाहुश्च पूर्णकोऽथ गवां पतिः ॥ ८८ ॥

བཅོམ་ལྡན་མདུན་ན་གྲགས་སྦྱིན་ནི། ཚངས་སྤྱོད་བརྟུལ་ཞུགས་ལ་ཆགས་པའི།
གྲགས་པ་ཕྱོགས་སུ་རབ་གསལ་བ། ཐོས་ནས་གནས་དེར་འོངས་པར་གྱུར། 89

དགེ་བ་སྨིན་པས་ཐོབ་གྱུར་པ། དེ་དག་ཉམས་ལ་བཅོམ་ལྡན་འདས།
དག་པའི་བཀའ་ཡི་སྐད་ཡང་ནི། འདུལ་བའི་ཆོས་ལ་བསྟན་པ་བསྒྲུབས། 90

བཞི་པོ་དེ་དག་གྲགས་སྦྱིན་དང་། དགེ་སློང་གཞན་པ་ལྔ་དག་སྟེ།
བཅུ་ཡིས་བཅོམ་ལྡན་དྲུང་དུ་ན། དགྲ་བཅོམ་གནས་དག་ཐོབ་པར་གྱུར། 91

གྲགས་སྦྱིན་སྤྱོད་ཚུལ་ཐོས་གྱུར་ནས། དེ་ཡི་གྲོགས་པོ་སྐལ་ལྡན་གཞན།
ལྔ་བཅུས་སྔོན་པའི་དྲུང་དུ་ནི། ཕྱིན་ནས་དེ་མཚུངས་ཉིད་དག་ཐོབ། 92

ཚུལ་དེས་གུས་པ་སྐྱེས་གྱུར་པ། གཞན་ནི་བརྒྱ་ཕྲག་ལྔ་ཡིས་ཀྱང་།
དེ་དང་མཚུངས་པར་འདུལ་བའི་ཆོས། བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་དུ་ཐོབ། 93

དེ་ནས་ནམ་ཞིག་དགེ་མཚན་ལས། དགེ་སློང་ཀུན་གྱིས་བཅོམ་ལྡན་ལ།
གྲགས་སྦྱིན་གྱིས་ནི་བསོད་ནམས་དྲིས། དེ་ལ་ཐམས་ཅད་མཁྱེན་པས་གསུངས། 94

སྔོན་ཆེ་ཡང་དག་རྫོགས་པ་ཡི། སངས་རྒྱས་བཅོམ་ལྡན་གཙུག་ཏོར་ཅན།
གྲོང་ཁྱེར་ལས་ནི་བསོད་སྙོམས་ཐོབ། པ་རོལ་ངོགས་འགྲམ་སྐད་ཅིག་བཞུགས། 95

ས་ཡི་བདག་པོ་ཚངས་པས་བྱིན། ལམ་དེ་ནས་ནི་འགྲོ་བ་ཡི།
རྫས་འབྲང་འོད་བཟང་ཞེས་པ་ཡིས། དེ་ནི་བཞུགས་པ་མཐོང་བར་གྱུར། 96

यशःप्रकाशितदिशं यशोदं भगवत्पुरः ।
ब्रह्मचर्य्यव्रतासक्तं श्रुत्वा तं देशमाययुः ॥ ८९ ॥

तेषां कुशलपाकेन प्राप्तानां भगवान् पुनः ।
विदधे धर्म्मविनये शासनं शुद्धशासनः ॥ ९० ॥

यशोदस्ते च चत्वारो भिक्षवः पञ्च चापरे ।
अर्हत्पदन्दश प्रापुस्तदा भगवतोऽन्तिके ॥ ९१ ॥

श्रुत्वा यशोदवृत्तान्तं धन्यास्तत्सचिवाः परे ।
पञ्चाशदन्तिकं शास्तुर्गत्वा तत्तुल्यतां ययुः ॥ ९२ ॥

शतपञ्चकमन्यच्च तद्वृत्तान्तोदितादरम् ।
तत्तुल्यं धर्म्मविनयं लेभे भगवतोऽन्तिके ॥ ९३ ॥

ततः कदाचिद्भगवान् कौतुकात् सर्व्वभिक्षुभिः ।
पृष्टः पुण्यं यशोदस्य सर्व्वज्ञस्तानभाषत ॥ ९४ ॥

पुरा प्रत्येकसम्बुद्धः पुरात् सम्प्राप्तपिण्डकः ।
वारातटान्ते भगवान् शिखी क्षणमुपाविशत् ॥ ९५ ॥

वर्त्मना व्रजतस्तेन ब्रह्मदत्तस्य भूपतेः ।
अनुगः सुप्रभो नाम विश्रान्तं तं व्यलोकयत् ॥ ९६ ॥

ཉི་མའི་འོད་ཟེར་དྲག་པོ་ཡི། གདུང་བས་རྟོལ་དང་བཅས་གྱུར་པ།
དེ་མཐོང་ནས་ནི་དེ་ལ་དེས། གདུགས་དག་བཟུང་ནས་གྲིབ་བསིལ་བྱས། 97

དེ་ཡི་དྲུང་དུ་ཚངས་སྤྱོད་ལ། དེ་ཡིས་བསྟན་པ་བཟུང་ནས་ནི།
སེམས་ནི་དྲི་མ་མེད་ཉིད་ལས། དག་པ་མཆོག་ལྡན་ཐོབ་པར་གྱུར། 98

དེ་ནས་རབ་དང་བློ་ལྡན་པ། རྫོགས་སངས་རྒྱས་ཀྱིས་དེ་ལ་གསུངས།
འབྱུང་འགྱུར་ཤཱ་ཀྱ་ཐུབ་པའི། དྲུང་དུ་ཁྱོད་ནི་བྱང་ཆུབ་འགྱུར། 99

དེ་ཡིས་ངེས་པར་དེ་གཟུངས་ཏེ། དུས་ཀྱིས་ལུས་ནི་བཏང་བྱས་ནས།
བློ་བཟང་ཞེས་པ་ལྷ་ཡི་བུར། མཐོ་རིས་སུ་ནི་ཡུན་རིང་འགྱུར། 100

བསོད་ནམས་ལྡན་པ་དེ་ཉིད་དང་། གླགས་སྦྱིན་དགེ་ལེགས་གཏེར་འདི་སྟེ།
གླགས་པ་ཡིས་ནི་གྲོགས་རྣམས་ཀྱང་། དགེ་བའི་ཟམ་སྟེགས་ཉིད་དག་ཐོབ། 101

ས་བདག་ཀྲི་ཀི་ཞེས་བྱ་བ། རྒྱ་ཆེན་བློ་ཡིས་སྟོན་པ་ནི།
འོད་སྲུངས་སྐུ་དག་བྱུང་འདས་ལ། རིན་ཆེན་མཆོད་རྟེན་སྟོན་ཆེ་བྱས། 102

ས་ཡི་བདག་པོ་དེ་ཡི་བུ། གསུམ་པ་གླགས་ལྡན་དགའ་བ་ཡིས།
ནོར་བུའི་མཆོད་རྟེན་དེ་ལ་ནི། གུས་པས་རིན་ཆེན་གདུགས་དག་བཀོད། 103

དེ་དང་བསོད་ནམས་སྔ་མ་ཡིས། སྐྱེ་བ་འདི་ལ་གླགས་སྦྱིན་ནི།
གླགས་ཆེན་རིན་ཆེན་འབར་བ་ཡིས། གདུགས་ཀྱིས་བརྒྱན་པ་དག་ཏུ་སྐྱེས། 104

सस्वेदं तीव्रतापेन प्रचण्डकिरणे रवौ।
तं दृष्ट्वा च्छत्रमादाय च्छायां तस्य चकार सः॥ ९७॥

तस्यान्तिके ब्रह्मचर्य्यं समादाय सशासनम्।
बभूव चित्तवैमल्यात् कुशलप्रणिधानवान्॥ ९८॥

ततः प्रत्येकसम्बुद्धस्तमुवाच प्रसन्नधीः।
भविष्यतः शाक्यमुनेरन्तिके बोधिमाप्स्यसि॥ ९९॥

इत्युक्तस्तेन नियतं कालेन त्यक्तविग्रहः।
सोऽभवत् सुमतिर्नाम देवपुत्रश्चिरं दिवि॥ १००॥

स एष पुण्यवानद्य यशोदः श्रेयसां निधिः।
सुहृदामपि सम्प्राप्तः कीर्त्या कुशलसेतुताम्॥ १०१॥

कृकिर्नाम क्षितिपतिः काश्यपस्याकरोत् पुरा।
शास्तुः शरीरे निर्व्वाणे रत्नस्तूपमुदारधीः॥ १०२॥

यशस्वी नाम तनयस्तृतीयस्तस्य भूपतेः।
भक्त्या तस्मिन्मणिस्तूपे रत्नछत्रं न्यवेशयत्॥ १०३॥

तेनापि पूर्व्वपुण्येन जन्मन्यस्मिन्महायशाः।
जातो यशोदश्छत्रेण रत्नदीप्तेन भूषितः॥ १०४॥

དེ་ལྟར་སྐྱེ་བ་གཞན་ལ་ལེགས་བྱས་གྱིས་པས་ཙ་བ་བཅིངས།
ཟླ་བ་ལྟར་དཀར་གླགས་པའི་འོད་ཟེར་གྱིས་པའི་མེ་ཏོག་ཅན།
དགེ་བ་དེ་ཡིས་ཆོས་ཀྱི་ལྗོན་པ་རབ་གྱིས་འབྲས་སྨིན་འདི།
དེ་སྐད་ཐོས་ནས་དགེ་སློང་ཚོགས་དེས་ཡ་མཚན་ཐོབ་པར་གྱུར། 105

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གླགས་སྤྲིན་གྱི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་ཙ་གཉིས་པའོ།།

इत्यन्यजन्मसुकृतोदयबद्धमूलः
सोऽन्मेष एष शशिशुभ्रयशोऽंशुपुष्पः ।
धर्मद्रुमः पृथुतरः फलितोऽस्य साधोः
श्रुत्वेति विस्मयमवाप स भिक्षुसङ्घः ॥ १०५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां यशोदावदानं नाम द्विषष्टितमः पल्लवः ॥

CHAPTER LXIII

འོད་སྲུང་ཆེན་པོའི་རྟོགས་བརྗོད་ནི།

བརྒྱ་བྱིན་རླུང་དང་ཆུ་སོགས་ལྷ་རྣམས་དང་།
ཐུབ་མཆོག་རྣམས་ཀྱང་གང་སྐད་ནམ་འགྱུར་དུ།
འགྱུར་བའི་དྲན་བདེ་ཙོ་ལྟར་གཅོད་པའི་གནས།
ཡ་མཚན་ཅན་དེ་གང་སུ་རུང་བའི་མིན། 1

མ་ག་དྷ་གྲོང་ཐང་ཆེན་དུ། སྣ་ལ་ཆེན་པོའི་རིགས་མཁྲུངས་པ།
ནྱ་གྲོ་དྷ་ཡི་ཏོག་ཅེས་པ། གཉིས་སྐྱེས་གྲགས་པའི་དཔལ་ལྡན་བྱུང་། 2

དེ་ཡི་ཆུང་མ་གཟུགས་བཟང་མ། ཞེས་བ་ཁང་པའི་སྐྱིད་ཚལ་ན།
རོལ་པས་ལྗོན་ཤིང་གི་སྟ་ལའི། འོག་དུ་བུ་ནི་ཉི་འོད་བསྐྲུན། 3

གསེར་གྱི་འོད་ཟེར་རབ་འབར་བའི། བུ་དེ་སྐྱེས་པ་ཙམ་ཉིད་ལ།
གྲགས་པ་ལྟར་དཀར་ལྷ་ཡི་གོས། ཤིང་དེ་ལས་ནི་རབ་ཏུ་བྱུང་། 4

པི་ཕྱལ་སྐྱེས་ཞེས་བྱ་བ། བྲིས་པ་པདྨའི་མིག་ཅན་དེ།
རིག་དང་སྒྱུ་ཙོལ་བློ་སྦྱངས་ཤིང་། དཔལ་དང་ལྡན་ཅིག་རྣམ་པར་རྒྱས། 5

त्रिषष्टितमः पल्लवः ।

महाकाश्यपावदानम् ।

शक्रवायुवरुणादयः सुरा
विक्रियां मुनिवराश्च यत्कृते ।
यान्ति तत् स्मरसुखं तृणायते
यस्य कस्य न स विस्मयास्पदम् ॥ १ ॥

द्विजन्मा मागधग्रामे विश्रुतश्रीर्महास्थले ।
न्यग्रोधकल्पनामाभून्महाशालकुलोद्भवः ॥ २ ॥

तस्य भार्य्या सुरूपाख्या गृहोद्यानविहारिणी ।
असूत सुतमर्काभं पिप्पलस्य तरोरधः ॥ ३ ॥

जातमात्रे सुते तस्मिन् दीप्तजाम्बूनदद्युतौ ।
दिव्यांशुकं यशःशुभ्रं तस्मात् प्रादुरभूत्तरोः ॥ ४ ॥

स पिप्पलायनो नाम बालः कमललोचनः ।
विद्याकलाकलितधीर्व्यवर्द्धत सह श्रिया ॥ ५ ॥

དེ་ནི་ཕ་ཡིས་གསོལ་བཏབ་ཀྱང་། རྟག་ཏུ་ཁྱིམ་ཐབ་ལས་ཕྱིར་ཕྱོགས།
ཡུལ་ལ་སྣང་ལྡན་དབེན་པ་ནི། དྲི་མེད་བསམ་པ་ལྡན་བར་གྱུར། 6

ཕ་ནི་རིགས་བརྒྱུད་ཆད་པ་ཡིས། འཇིགས་ནས་ཡང་ཡང་གསོལ་བཏབ་སྟེ།
དེ་ལ་སྨྲས་པ་ཁྱིམ་ཐབ་ཀྱི། འཆིང་བ་ལ་ནི་བདག་མི་སྤྱོད། 7

ཡབ་གཅིག་འདོད་པ་བདག་མི་འདོད། བདག་གི་བློ་གྲོས་ཚངས་སྤྱོད་ལའོ།
རང་འདོད་ཞེ་བ་དོར་ནས་ནི། སྲིད་པའི་འཆིང་བ་སྲུ་ཞིག་འདོད། 8

དང་པོར་སྨྲིན་པ་སྲིག་ཏུ་བས་མཆི་མ་རྟག་ཏུ་འབབ་ལ་རབ་ཏུ་འཇུག།
མཚུངས་པར་ལག་པ་གདང་བས་གདུང་བའི་ལམ་ལ་བདེན་པར་མདུད་པ་མཛད།
འཕྲེང་བའི་ཐག་པས་འཁོར་བའི་བཀའ་ཡི་དམ་ཚིག་དག་ལ་གཡོ་བ་འཆིང་།
ཁྱིམ་ཐབ་ཡིད་ནི་སྨོངས་པ་གནས་པས་ཉེར་བཅོམ་ནམས་ཀྱི་དགའ་བའི་རྒྱུ། 9

ན་ཚུང་གཞོན་ནུའི་འཕྲི་ཤིང་གར་གྱི་རླུང་གིས་བསྐྱོད་པའི་རྩེ་དགའི་རྗེས་འབྲང་བའི།
རྒྱུད་མང་གླིང་བུའི་སྒྲ་ནི་ཁྱིམ་ཐབ་དུས་སུ་སྙོ་ལྡན་གང་གི་མ་མཉན་པ།
དེ་དག་ལ་བརྟེན་ཀྱི་ཏུད་བྲུ་ཞེས་ཚུང་མས་ཚོ་ངེ་སྒྲ་ཞིང་དམན་གྱུར་པ།
མཆི་མ་ལྷི་བར་ཐིགས་ཐིགས་འབབ་པས་མཛོན་པར་སྤྲུར་བའི་སྒྲ་གྲགས་ཐོས་མི་འགྱུར། 10

ཞེས་པ་འབད་པ་དྲག་པོ་ཡིས། ཕ་དང་མ་ལ་དེས་སྨྲས་ནས།
མཛེས་པས་དྲན་པ་དགེ་མཚན་གྱིས། རྒྱུ་གུ་ཡང་དག་སྐྱེས་པ་བཞིན། 11

स पित्रा प्रार्थ्यमानोऽपि विवाहविमुखः सदा ।
बभूव विषयद्वेषी विवेकविशदाशयः ॥ ६ ॥

वंशच्छेदभयात् पित्रा स पुनःपुनरर्थितः ।
तमूचे रोचते मह्यं न पाणिग्रहबन्धनम् ॥ ७ ॥

न तात कामकामोऽहं ब्रह्मचर्य्यं मतिर्मम ।
शमस्वाच्छन्द्यमुत्सृज्य कस्येष्टं भवबन्धनम् ॥ ८ ॥

वाष्पस्याद्या सततपतने होमधूमैः प्रवृत्तिः
सत्यग्रन्थिर्ध्वंसनसरणी तुल्यहस्तार्पणेन ।
संसाराज्ञासमयचलने बन्धनं माल्यदाम्ना
मोहारोहोपहतमनसां हर्षहेतुर्विवाहः ॥ ९ ॥

यैर्नृत्यानिललोलवालललनावल्लीविलासानुगा
वीणावंशरवा विवाहसमये प्रोत्साहितैर्न श्रुताः ।
हा पुत्रेति वधूप्रलापकलनक्षीवा न तेषां श्रिताः
श्रूयन्ते गुरुवाष्पगद्गदगलद्गाढाभियोगा गिरः ॥ १० ॥

इत्युक्त्वा तीव्रनिर्बन्धं पितरं जननीञ्च सः ।
हेमकन्यां समादाय कुशलैः शिल्पिभिः कृताम् ॥ ११ ॥

བཟོ་བོ་མཁས་པས་བྱས་པ་ཡི། གསེར་གྱི་བུ་མོ་བཟུང་ནས་ནི།
རིགས་ཚང་བསམས་པས་གཟིར་དེ་ལ། བདེན་པས་སྨྲར་ཡང་རབ་སྨྲས་པ། 12

ཁ་དོག་མཛེས་སྡུག་འདི་མཚུངས་པའི། བུ་མོ་གལ་ཏེ་རྙེད་གྱུར་ན།
ཡབ་གཅིག་ཁྱོད་ཀྱི་ཚིག་གིས་ནི། བདག་གི་བུད་མེད་བཟུང་བར་བགྱི། 13

ཞེས་པ་བུ་ཡི་ཚིག་ཐོས་ནས། དེ་མཚུངས་བུ་མོ་མཐོ་རིས་སུ།
རྙེད་དཀར་ཤེས་ནས་བྲམ་ཟེ་ནི། རེ་ཐག་ཆད་ཅིང་བཞིན་དུ་འགྱུར། 14

ཙ་ཙྩ་ཀར་ཞེས་པའི་གྲོགས། བྲམ་ཟེས་གཏམ་དེ་ཐོས་བ་ཡིས།
ཀུན་དགའ་དང་བྲལ་གཡོ་མེད་པ། ཤྲུ་ངན་གྱིས་ཉེན་དེ་ལ་སྨྲས། 15

རབ་འབད་ཙམ་གྱིས་བཟོད་དོན་པ། ཁྱོད་ནི་ཤྲུ་ངན་བྱེད་མི་འོས།
བུ་མོ་གསེར་འོད་ལྡན་པ་ནི། བལྟ་རུ་ང་ཉིད་འགྲོ་བར་བྱ། 16

ཞེས་དེ་མཛའ་བའི་གྲོགས་པ་ནི། དང་པོར་སྐྱེས་པས་བསྟན་བྱས་ནས།
གསེར་གྱི་གཟུགས་བརྙན་བཟུང་ནས་ནི། གྲོ་ལྡན་ཕྱོགས་རྣམས་དག་ཏུ་ཡོང་། 17

འཕྲེང་བ་གོས་དང་བཅས་པས་བསྒྱུ་ན། ལྷ་ཡི་མཆོད་མའི་ཟོལ་གྱིས་ནི།
བཟུང་ནས་ཕྱོགས་སུ་འཁྱམ་བྱེད་ཅིང་། བུ་མོས་མཆོད་པར་བྱ་ཞེས་སྨྲས། 18

གྲོང་ཁྱེར་གྲོང་དང་ལམ་རྣམས་སུ། དེ་མཆོད་དུ་འོང་བུ་མོ་རྣམས།
རྟག་ཏུ་རྣམ་པར་བལྟ་བ་དེས། དེ་དང་མཚུངས་པ་རྙེད་མ་གྱུར། 19

सञ्जातां कान्तिसिक्तस्य कौतुकस्येव कन्दलीम् ।
कुलविच्छेदचिन्तार्त्तं धीरः पुनरुवाच तम् ॥ १२ ॥

तुल्यलावण्यवर्णास्या लभ्यते यदि कन्यका ।
करोमि त्वद्गिरा तात तदहं दारसंग्रहम् ॥ १३ ॥

इति पुत्रवचः श्रुत्वा तत्तुल्यां दिवि दुर्लभाम् ।
ब्राह्मणकन्यकां मत्वा निराशोऽभूदधोमुखः ॥ १४ ॥

विगतानन्दनिस्पन्दं सुहृच्चतुरकाभिधः ।
तं विप्रः श्रुतावृत्तान्तः शोकक्रान्तमभाषत ॥ १५ ॥

प्रयत्नमात्रसाध्येऽर्थे न शोकं कर्त्तुमर्हसि ।
एष व्रजाम्यहं द्रष्टुं कन्यकां कनकप्रभाम् ॥ १६ ॥

इति स्निग्धस्य सुहृदः स कृत्वा धैर्य्यमग्रजः ।
आदाय हेमप्रतिमां ययौ धीमान् दिगन्तरम् ॥ १७ ॥

देवतालाञ्छनच्छन्नं समाल्यांशुकभूषणाम ।
गृहीत्वा दिक्षु बभ्राम कन्यापूज्यमुदाहरन् ॥ १८ ॥

तत्पूजोपगताः कन्या नगरग्रामवर्त्मसु ।
विलोकयन् स सततं न तत्तुल्यामवाप्तवान् ॥ १९ ॥

དེ་ནས་བྲམ་ཟེ་སེར་སྐྱ་ཡིས། བུ་མོ་གསེར་གྱི་བུ་མོ་ནས།
འོད་ལྡན་བཟང་མོ་ཞེས་པ་ཡི། ལངས་པ་ཅན་དུ་ནམ་ཞིག་མཐོང་། 20

མཛེས་མ་ཁྲིམ་ཐབ་ལས་ཕྱིར་ཕྱོགས། ཆགས་བྲལ་དབེན་པ་དང་ལྡན་ཞིང་།
གསེར་རིན་མ་དད་སེར་སྐྱ་ལ། རྗེས་འགྲོ་བ་ཤད་པ་དེ་ཡིས་བསླངས། 21

བུ་མོའི་ཕ་ཡིས་དེར་སྨྲས་པ། འོད་སྲུངས་རིགས་སྐྱེས་འཛིག་རྟེན་ན།
ནྱ་གྲོ་དྷ་ཡི་རྟོག་པ་ཡིན། རིགས་མཆོག་རིགས་ནི་ཉམ་པར་གྲགས། 22

འོན་ཀྱང་མཛེས་མ་འབད་པ་ཡིས། ནོར་ནི་བཏགས་ནས་སྦྱིན་པར་བྱ།
དབུལ་བའི་ཤུགས་རིངས་ལྡན་མ་དེས། ཕ་ཡི་ཡིད་ནི་གདུང་བར་བྱེད། 23

ཆུང་མ་འཕབ་མོ་ལ་ཆགས་དང་། བུ་མོ་ནོར་མེད་ལ་སྦྱིན་དང་།
བུ་ནི་གདུང་བས་ཉེར་བཙོམ་ཉམས། སེམས་ལ་ཁབ་བསྒྲིགས་ལྟ་བུ་ཡིན། 24

ཆུ་གཏེར་གྱི་ནི་སྐྱེས་བུ་མཆོག་ལ་དཔལ་མོ་བྱིན་བྱས་ཏེ།
ཅི་སྟེ་དེ་ནི་སྟོབས་ལྡན་ལ་སྦྱོང་མིའུ་ཐུང་ཤེས་ནས།
ད་ལྟའང་སྒྱུ་ངན་ལ་ཆགས་རྟོ་གདོང་མི་ཡི་རང་བཞིན་གྱིས།
གདུང་བ་དྲག་པོ་ཤུགས་རིངས་དང་བཅས་ངེས་པར་གཏོང་མི་བྱེད། 25

དེ་སྐད་ནོར་ནི་བཙལ་བྱས་ཏེ། དེ་འགྱུར་མངོན་མཐོ་ཤེས་གྱུར་ནས།
དམ་པའི་རིགས་ལ་བུ་མོ་སྦྱིན། དམ་པའི་ཡོན་ཏན་ནོར་གྱི་དབང་། 26

ततः कदाचिद् वैशाल्यां कपिलस्याग्रजन्मनः ।
कन्यामपश्यद्भद्राख्यां हेमकन्याधिकप्रभाम् ॥ २० ॥

विवाहविमुखीं कान्तां तां वैराग्यविवेकिनीम् ।
स हेमशुल्कां कपिलं ययाचे कथितान्वयः ॥ २१ ॥

तं कन्याजनकः प्राह सत्कुलं कुलविश्रुतम् ।
लोके न्यग्रोधकल्पस्य गोत्रे जातस्य काश्यपे ॥ २२ ॥

किन्तु कन्या प्रयत्नेन धनमन्विष्य दीयते ।
दरिद्रोच्छ्वासिनी सा हि पितुर्दहति मानसम् ॥ २३ ॥

पत्नी कलहसंसक्ता कन्यका निर्धनार्पिता ।
व्यसनोपहतः सूनुस्तप्ताश्चेतसि सूचयः ॥ २४ ॥

दत्वा श्रियं जलनिधिः पुरुषोत्तमाय
ज्ञात्वाथ वामनतरं बलियाच्ञया तम् ।
अद्यापि सक्तवड़वानलरूपशोक-
सोच्छ्वास एव न विमुञ्चति तीव्रतापम् ॥ २५ ॥

तस्माद्वित्तं समन्विष्य ज्ञात्वा तद्विभवोन्नतिम् ।
दास्यामः सत्कुले कन्यां धनाधीना हि सद्गुणाः ॥ २६ ॥

ཞེས་པ་བྲ་མོའི་ཕ་དང་དེའི། བྲ་ཉམས་ཀྱིས་ཀྱང་བརྗོད་ཐོས་ནས།
དེ་བཞིན་ཞེས་སྨྲས་གཉིས་སྐྱེས་ནི། གཞོན་ནུའི་ཕ་ཡི་གནས་དུ་སོང་། 27

གསེར་གྱི་མཛེས་མ་ལས་ལྷག་པའི། བྲ་མོ་ཐོབ་ཅེས་དེ་ཡི་ཚིག
ཉུ་གྲོ་དྷ་ཡི་རྟོག་པ་ཡིས། ཐོས་ནས་ཀུན་དགའ་རྒྱས་པར་གྱུར། 28

བྲ་མོ་ཚངས་སྤྱོད་དོན་གཉེར་མ། ཐོས་ནས་ཕི་སྨ་ལ་སྐྱེས་ནི།
སྨྲོང་མོ་བ་ཡི་ཚས་ཀྱིས་དེའི། ཁྱིམ་དུ་རང་ཉིད་དལ་གྱིས་སོང་། 29

མགྲོན་དང་བཀུར་སྟི་ཐོབ་གྱུར་པ། མཁས་པ་དེས་དེར་དེ་ལ་དྲིས།
ཚངས་སྤྱོད་དོན་དུ་གཉེར་ཞེས་ནས། ར་བ་རྫོགས་པས་རབ་སྨྲས་པ། 30

དགེ་བ་ཚངས་སྤྱོད་དོན་གཉེར་བའི། པི་པྤ་ལ་སྐྱེས་བྲམ་ཟེ་བདག
གང་གི་ཆེད་དུ་བྲམ་ཟེ་དེས། ཁྱོད་ནི་འབད་པས་བསླངས་པའོ། 31

ཁྱིམ་ཐབ་ལས་ནི་ཕྱིར་ཕྱོགས་བདག ཕ་ཡིས་ཞེན་དུ་དོན་དུ་གཉེར།
བཟང་མོ་ཁྱོད་ཀྱང་འདི་ལྟ་བུར། མཚུངས་པར་དགའ་བས་ཡང་དག་འགྲོགས། 32

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། རབ་དགའ་དེ་ཡིས་དེ་ལ་སྨྲས།
ཞི་ཞིང་དུལ་བས་ཁྱིམ་ཐབས་འདི། ཕྱུ་ཅག་ལ་ནི་འགལ་བ་མེད། 33

དེ་ནས་ཡང་དག་འོས་པ་ཐོབ། རབ་དགའ་སྤྲོ་བ་རྒྱས་པ་དེ།
རང་གི་ཁྱིམ་དུ་སོང་ནས་ནི། ཕ་ཡི་ཚིག་དག་ལ་ཡིས་བླང་། 34

इति कन्यापितुः श्रुत्वा तत्पुत्रीणाञ्च भाषितम्।
तथेत्युक्ता द्विजः प्रायात् कुमारजनकान्तिकम्॥ २७॥

सुवर्णवर्णलावण्या प्राप्ता कन्येति तद्वचः।
न्यग्रोधकल्पः श्रुत्वैव बभूवानन्दनिर्भरः॥ २८॥

ब्रह्मचर्य्यैषिणीं श्रुत्वा कन्यकां पिप्पलायनः।
स्वयमेवार्थिवेशेन प्रययौ तद्गृहं शनैः॥ २९॥

सम्प्राप्तातिथिसत्कारः स दृष्ट्वा तत्र तां कृती।
ब्रह्मचर्य्यार्थिनीं ज्ञात्वा प्राह पूर्णमनोरथः॥ ३०॥

कल्याणि ब्रह्मचर्य्यार्थी विप्रोऽहं पिप्पलायनः।
यत्कृते तेन विप्रेण त्वं प्रयत्नेन याचिता॥ ३१॥

अहं विवाहविमुखः पित्रा चात्यर्थमर्थितः।
त्वमप्येवम्विधा भद्रे दिष्ट्या तुल्यः समागमः॥ ३२॥

इति तस्य वचः श्रुत्वा प्रहृष्टा तमुवाच सा।
आवयोरविरुद्धोऽयं विवाहः शमसंयमात्॥ ३३॥

ततः समुचितावाप्तप्रहर्षोत्साहपूरितः।
निजं गत्वा स भवनं पितुर्वाक्यममन्यत॥ ३४॥

མཐའ་ཡས་ནོར་ནི་གྲུས་པ་དེ། ནམ་པར་བརྟགས་ནས་སེར་སྣས་ཀྱང་།
རིན་ཆེན་མཆོག་གིས་བཀྲུན་པ་ཡི། བུ་མོ་དེ་ལ་རབ་ཏུ་ཕྲིན། 35

འཁོར་པ་རིན་ཐང་ཆེ་བ་ཡིས། དེ་དག་ཁྲིམ་ཐབ་སྤྲོ་བར་ཞུགས།
ཚངས་པར་སྤྱོད་པ་མ་ཉམས་ཤིང་། ནམ་འགྱུར་མེད་པར་འགྲོགས་པར་གྱུར། 36

དུལ་བའི་ངང་ཚུལ་དེ་དག་གི། གཟུགས་དང་ལང་ཚོ་གྲུས་པའི་ཚེ།
ཡིད་ལ་བྱུང་བའི་བཀའ་བཙག་པས། འཁོར་པ་དམན་པ་ཉིད་དུ་གྱུར། 37

དེ་གཉིས་རིག་པ་བསྒྱུར་བའི་སྐད། རེས་ཀྱི་གཅིག་ནི་གཉིད་ལོག་ཅིང་།
གཅིག་ནི་ལངས་ནས་སེལ་ཚོ་བྱེད། ཅེས་པ་ཉལ་བའི་ནམ་གཞག་བྱས། 38

དེ་ནས་ནམ་ཞིག་མལ་སྟན་མཐར། དེ་ཡི་མིག་ནི་གཉིད་ཀྱིས་གྲུས།
ཐེབས་ཚེ་པི་སྦྲ་ལ་སྐྲེས་ཀྱིས། སྦྲུལ་ནི་ནག་པོ་མཐོང་བར་གྱུར། 39

དེ་ནས་དེ་ལག་འཁྲི་ཤིང་ནི། ལོགས་སུ་འབྱུང་བ་བརྩེ་ལྡན་དེས།
རྣ་ཡབ་མཐའ་དང་གོས་དག་གིས། བསྒུས་ནས་འཇིགས་པ་དེ་ལས་བསྒྲུངས། 40

འཁྲུལ་ལ་ལག་པ་བསྐྱོད་པ་ཡིས། སྐྲག་པའི་རི་དགས་མིག་ཅན་མ།
ཉམ་འདར་ཞིང་དོ་ཤལ་ནི། གཡོ་ལྡན་མ་དེས་ཁྲོ་ལ་སྨྲས། 41

རྗེ་ཡི་སྲས་པོ་ཇི་ལྟར་ན། ངེས་པར་དམ་ཚིག་བརྗེད་གྱུར་ཅིང་།
བདེན་པར་སྨྲ་པ་ཁྱོད་ཀྱི་ཐུགས། གང་འདི་ནམ་པར་བསྣད་པ་སྐྱེས། 42

कपिलोऽपि समन्विष्य तमनन्तधनोदयम्।
प्रददौ तनयां तस्मै वररत्नैरलङ्कृताम्॥ ३५॥

तयोर्महार्हविभवैर्वृत्ते परिणयोत्सवे।
अलुप्तब्रह्मचर्य्योरुर्निर्विकारः समागमः॥ ३६॥

रूपयौवनसम्भारे तयोः संयमशीलयोः।
बभूव विभवम्लानिराज्ञाभङ्गान्मनोभुवः॥ ३७॥

पर्य्यायेणैकनिद्रायां जागर्त्येकः समुत्थितः।
इति तौ स्पर्शरक्षार्थं चक्रतुः शयनस्थितिम्॥ ३८॥

कदाचिदथ शय्यान्ते कालव्यालं व्यलोकयत्।
निद्रामुद्रितनेत्रायां भद्रायां पिप्पलायनः॥ ३९॥

ततः स तद्भयात्तस्या दोर्लतां पार्श्वलम्बिनीम्।
सदयश्चामरान्तेन ररक्षोत्क्षिप्य वाससा॥ ४०॥

सहसा बाहुचलनचकिता हरिणलोचना।
सा सकम्पकुचालोलहारा पतिमभाषत॥ ४१॥

आर्य्यपुत्र कथं नाम समयः सत्यवादिनः।
विस्मृतस्तव संजातो यदयं चित्तविप्लवः॥ ४२॥

ཁྱོད་ཀྱི་ཉམ་འགྱུར་ངོ་མཚར་རྒྱུན། ཤིན་ཏུ་ཆེ་ལྡན་འདི་ནི་ཅི།
ས་འཛིན་དག་ཀྱང་བརྟེན་པའི་ཡུགས། གཏོང་གི་དམ་པ་ཡོངས་མ་ཡིན། 43

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། འཛུམ་ལྡན་དེ་ཡིས་དེ་ལ་སྨྲས།
མི་ལམ་ན་ཡང་བདག་གི་ཡིད། བཟང་མོ་ངེས་པར་བསླད་པ་མེད། 44

འོན་ཀྱང་འདིར་ནི་སྤྲུལ་ནག་འདི། འཇིགས་སུ་རུངས་པ་ཡོངས་སུ་རྒྱུ།
ཁྱོད་ཀྱི་ལག་པ་མལ་སྟན་ལས། འཕྱང་བ་འཇིགས་ནས་བདག་གིས་བསྐྱུངས། 45

ཁྱོ་ཡི་ཚིག་འདི་ཐོས་གྱུར་ནས། དོགས་བདང་དགའ་བ་དེས་སྨྲས་པ།
བདེན་པའི་ངང་ཚུལ་ཁྱོད་ཀྱི་བློ། འདོད་པས་དྲི་མར་གྱུར་པ་མེད། 46

གདུག་པའི་སྤྲུལ་ནི་ཁྱིགས་པ་སྟེ། ཆགས་པའི་ལྷོ་འཕྲེས་མཆོག་ཏུ་འཇིགས།
སྤྲུལ་གྱིས་ལུས་གཅིག་འཛོམས་པ་སྟེ། འདོད་པས་ལུས་ནི་བརྒྱ་མཐར་བྱེད། 47

དེ་སྐད་ཉམ་འགྱུར་འདི་དག་བསྒྲུངས། ཞེས་སྨྲས་དེ་ནི་ཆགས་དང་བྲལ།
དེ་ཡི་ཤིན་ཏུ་དུལ་བ་ཡང་། པི་སྨ་ལ་སྐྱེས་དག་གིས་བསྔགས། 48

དུས་ཀྱི་ནྱ་གྲོ་དྷ་ཡི་ཏོག ཆུང་མར་བཙས་པ་མགྲོ་རིས་སོང་།
རབ་མང་ཁྱིམ་གྱི་ཚོགས་དག་གིས། བསམ་པའི་ཁུར་ནི་དེ་ཡིས་བླངས། 49

ནམ་ཞིག་རིལ་མར་བདུང་བའི་སྐད། ཁྱུ་མཆོག་ཉམས་ཀྱི་རིལ་འཆོར་ལ།
བཟང་མོས་ཡོངས་སུ་བསྟན་པ་ཡིས། འཁོར་ཉམས་དག་ནི་ཡོངས་སུ་བསྐྲོས། 50

लज्जावहा विकारस्य केयमापतिता तव ।
त्यजन्ति धृतिमर्य्यादां भूधरा न तु साधवः ॥ ४३ ॥

इति तस्या वचः श्रुत्वा तामुवाच स सस्मितः ।
भद्रे नास्त्येव मनसः स्वप्नेऽपि मम विप्लवः ॥ ४४ ॥

किन्त्वेष कृष्णसर्पोऽत्र भीषणः परिवर्त्तते ।
बाहुस्ते शयनालम्बी भीत्या संरक्षितो मया ॥ ४५ ॥

एतत् पत्युर्वचः श्रुत्वा त्यक्तशङ्का जगाद सा ।
दिष्ट्या ते सत्यशीलस्य न काममलिना मतिः ॥ ४६ ॥

सर्पः साधुर्वराकोऽयं भयं रागोरगात्परम् ।
एकां हन्ति तनुं सर्पः कामः कायशतान्तकृत् ॥ ४७ ॥

रक्ष्यस्तस्माद्विकारोऽयमित्युक्त्वा विरराम सा ।
तीव्रञ्च प्रशशंसास्याः संयमं पिप्पलायनः ॥ ४८ ॥

न्यग्रोधकल्पे कालेन सभार्य्ये त्रिदिवं गते ।
प्रभूतगृहसंभारचिन्ताभारमुवाह सः ॥ ४९ ॥

कदाचित्तैलपानाय वृषाणान्तिलपीड़ने ।
तेन भद्रा समादिष्टा न्ययुंक्त परिचारिकाः ॥ ५० ॥

དྲིལ་ནི་འཆོར་བ་དེ་དག་གིས། དྲིལ་མར་བྲུམ་པར་སྲོག་ཆགས་ཚོགས།
ལྷུང་ཞིང་ཉམས་པ་མཐོང་གྱུར་ནས། སྙིང་རྗེ་བཅས་པས་ཕན་ཚུན་སྨྲས། 51

སྲོག་ཆགས་མང་པོ་ཡོངས་བསྣུག་པས། ཀྱེ་མ་བདག་ཀྱང་སྡིག་པ་ཅན།
ཡང་ན་གང་གི་ཚིག་གིས་བྱས། སྡིག་པ་འདི་ཀུན་བཟང་མོ་ལའོ། 52

བཟང་མོ་ཁྲིམ་ནང་འཁོད་པ་ཡིས། དེ་ཐོས་ཆགས་བྲལ་ཉིད་དུ་གྱུར།
དེ་དུས་ཉིད་ན་བདག་པོ་ནི། ནང་ཞུགས་དབེན་པར་དེ་ལ་སྨྲས། 53

ཞིང་ལས་ཉོན་མོངས་ཀྱིས་གཟིར་བར། ཁྲུ་མཆོག་སྲོག་ཆགས་འཚོ་བ་སྨོན།
བཟང་མོ་བདག་གི་ཁྲིམ་གྱི་ཁྱེར། རྟག་ཏུ་ངོ་ཡོས་འཛིན་ཡོངས་མི་བཟོད། 54

བདེ་བའི་ཕུན་ཚོགས་འདི་དག་ཉམས། མཐུག་ཏུ་རོ་བྲལ་སྙིང་པོ་མེད།
ཤྲུང་ན་འདམ་བུའི་འདབ་མ་བཞིན། གདུང་བ་དག་ནི་སྐྱེད་པར་བྱེད། 55

ཁྲིམ་པ་ཉམས་ནི་སྡིག་པའི་འདམ། ཉོང་མོངས་ཉ་ལྷིབས་དྲ་བ་ཅན།
ཁྲིམ་ཉིད་དུ་ནི་ཉམས་འགྱུར་དེ། རླུངས་སུ་གླང་ནི་གཏན་པོ་བཞིན། 56

དེ་སྐད་ཁྲིམ་གྱི་རྩོལ་བ་འདི། ཕྱུ་ཅག་གིས་ནི་གཏང་བར་འོས།
ཞེས་སྨྲས་ཆུང་མས་ཁས་བླངས་པས། ཞི་བ་ལ་ནི་དེས་པར་བྱས། 57

ཁྲིམ་དང་ཡོ་བྱད་བཅས་པ་ཡི། ནོར་ནམས་སྐྱོང་ལ་དེས་བྱིན་ནས།
རེ་བའི་ཞགས་པས་འཆིང་བ་ཀུན། ནམ་པར་གྲོལ་ཏེ་ངེས་པར་བྱུང་། 58

ताः पीड़िततिलास्तैलकुम्भेषु कृमिसञ्चयम्।
च्युतं विलोक्य सीदन्तमूचुः सकरुणा मिथः॥ ५१॥

अहो नु पापमस्माकं बहुप्राणिपरिक्षयात्।
भद्रायाः सर्व्वमेतद्वा पातकं यद्गिरा कृतम्॥ ५२॥

तच्छ्रुत्वान्तर्गृहगता भद्रा वैराग्यमाययौ।
तस्मिन्नेव क्षणे भर्त्ता प्रविश्योवाच तां रहः॥ ५३॥

भद्रे गृहमहाभारश्रान्तोऽहं न सहे सदा।
कृषिक्लेशार्दितवृषप्राणहिंसानुशासनम्॥ ५४॥

इमाः पर्य्यन्तविरसा निःसाराः सुखसम्पदः।
आस्वाद्यमानाः कुर्व्वन्ति नड़शाखा इव व्यथाम्॥ ५५॥

क्लेशशैवालजालेषु पापपङ्केषु वेश्मिनः।
अवसन्ना गृहेष्वेव पङ्केष्विव जरद्गवाः॥ ५६॥

तस्माद्गृहसमारम्भस्त्यागयोग्योऽयमावयोः।
इत्युक्तानुमतः पत्न्या शान्त्यै निश्चयमादधे॥ ५७॥

स दत्त्वा धनमर्थिभ्यो गृहञ्च सपरिच्छदम्।
निश्चक्राम समुन्मुक्तसर्व्वाशापाशबन्धनः॥ ५८॥

དེ་ནས་འོད་སྲུངས་རིགས་ཉིད་ཕྱིར། འོད་སྲུངས་ཆེན་པོ་ཉིད་ཀྱང་དེ།
དེ་དུས་ཡང་དག་རྫོགས་སངས་ཀྱིས། འོད་སྲུངས་དྲུང་དུ་དེ་སོང་ཀྱུར། 59

མཆོད་རྟེན་བུ་མང་ཞེས་པ་ཡི། ཙྃ་བར་གནས་པ་དེ་ཙན་ཕྱིན།
འདུལ་བའི་ཆོས་ནི་དེས་ཕྱིན་པས། དགེ་པའི་བྱང་ཆུབ་ཐོབ་པར་གྱུར། 60

བཟང་མོ་ཡིས་ཀྱང་ཆགས་བྲལ་གྱི། བསྟན་པའི་ལམ་གྱི་འདུལ་བ་ཐོབ།
སྔོན་གྱི་བསོད་ནམས་ཡོངས་སྨིན་པས། དགེ་བ་དྲི་མ་མེད་པ་བསྟེན། 61

འོད་སྲུངས་ཆེན་པོ་ལྷ་རྣམས་ཀྱིས། ཕྱག་འོས་ཉིད་ཐོབ་མཐོང་ནས་དེའི།
བསོད་ནམས་དགེ་སློང་རྣམས་ཀྱིས་དྲིས། དེ་བཞིན་གཤེགས་པས་དེར་བཀའ་སྩལ། 62

ཟས་དང་འབྲུ་རྣམས་མ་ལུས་རབ་དུ་བའི་དུས།
བསོད་སྙོམས་ཉམ་པར་ལོག་ཅིང་ཤིན་དུ་མི་བཟད་ཚེ།
ནོར་རྒྱུང་སྐྱེས་བུ་ཡིས་ནི་ཀུ་ཤི་གྲོང་ཁྱེར་དུ།
དགར་ཤི་ཁྲི་རང་གི་ཟས་ཀྱིས་ལེགས་པར་མཆོད། 63

མི་ཡི་བདག་པོ་ཀྲི་ཀིས་བྱས་པའི་མཆོད་རྟེན་ནི།
རིན་ཅེན་གྱིས་སྤྲས་མཆོག་དུ་མཛེས་ལ་དེ་ཡི་བུ།
བསོད་ནམས་ངང་ཚུལ་གྱིས་ཀྱང་དགེ་བ་ཆེན་པོའི་སླད།
ནོར་བུ་གསེར་གྱི་རྣམ་པར་བཀྲ་བའི་གདུགས་དག་བཀོད། 64

सोऽथ काश्यपगोत्रत्वान्महाकाश्यपताङ्गतः ।
तत्कालसम्यक्संबुद्धं काश्यपं समुपाययौ ॥ ५९ ॥

बहुपुत्राख्यचैत्यस्य मूले स्थितमुपेत्य तम् ।
तद्दत्तधर्म्मविनयः शुद्धां बोधिमवाप्तवान् ॥ ६० ॥

भद्रापि लब्धविनया वैराग्याविष्टवर्त्मना ।
प्राक्पुण्यपरिणामेन लेभे कुशलमुज्ज्वलम् ॥ ६१ ॥

महाकाश्यपमालोक्य सम्प्राप्तं सुरवन्द्यताम् ।
तत्पुण्यं भिक्षुभिः पृष्टस्तानुवाच तथागतः ॥ ६२ ॥

प्रविरतनिखिलान्नशस्यकाले
विषमतरे विनिवृत्तपिण्डपात्रे ।
कृशधनपुरुषेण काशिपूर्य्यां
तगरशिखी महितः स्वभोजनेन ॥ ६३ ॥

कृकिनरपतिना कृतेऽपि चैत्ये
वररुचिरत्नचिते तदात्मजश्च ।
मणिकनकविचित्रमातपात्रं
व्यधित महत्कुशलाय पुण्यशीलः ॥ ६४ ॥

སྐྱེ་བ་གཉིས་སུ་ཉི་བར་བསགས་པའི་བསོད་ནམས་ཆེར་གྱུར་པས།
ཉི་བའི་གནས་ཀྱི་འོད་སྣངས་ཆེན་པོ་ཉིད་ནི་འདི་ཡིས་ཐོབ།
གསེར་གྱི་ཏ་ལ་བཞིན་དུ་མཐོ་བའི་མཐུ་ནི་ཐོབ་གྱུར་ནས།
དགེ་བའི་ཚ་བའི་འབྲས་བུ་དགྲ་བཅོམ་གནས་ནི་ཉམས་པར་འཛིན། 65

ཞེས་པ་དགེ་བའི་དབང་པོས་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་འོད་སྣངས་ཆེན་པོའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་ཙ་གསུམ་པའོ།

जन्मद्वयोपचितपुण्यमहोदयेन
सोऽयं महोपपदकाश्यपतामवाप ।
लब्धोन्नतिः कनकताल[1] इव प्रभाव
महत्पदं कुशलमूलफलं बिभर्त्ति ॥ ६५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां महाकाश्यपावदानं नाम त्रिषष्टितमः पल्लवः ॥

---

१ All the MSS. तान ।

CHAPTER LXIV.

ནོར་བཟང་གི་རྟོགས་བརྗོད་ནི།

ཡལ་འདབ་མངོན་པར་གསར་པ་ལྷ་སྒུར་མཉེན་གྱུར་ཀྱང་།
སྲ་ཞིང་བརྟན་པ་དག་ནི་རྡོ་རྗེ་ལྟར་གྱུར་པ།
ཆེན་པོ་རྣམས་ཀྱི་ཡིད་ཀྱི་ནོར་བུ་དྲི་མ་དག།
མེད་པ་ལ་ཡང་ཆག་པ་དག་ནི་འཕོ་བ་མེད། 1

ཀུན་ལ་རྗེས་སུ་བརྩེ་ལྡན་ཡབ་ཀྱིས་ཤཱ་ཀྱ་ཡི།
གནས་རྣམས་ལྷ་བ་ཉིད་ལ་མཆོག་ཏུ་གསོལ་བདབ་པ།
ཀུན་དགའ་བདུད་རྩི་བཅུད་ཀྱི་ཟླ་བ་སྟོན་པ་ནི།
གང་དག་ཚེ་ན་རང་གི་སྐྱིལ་ཁར་ཞུགས་གྱུར་པ། 2

དེ་དེའི་ཚེ་ན་བ་གམ་དུ་སོང་རི་དགས་མིག།
ནོ་བའི་སྐྱོན་གྱིས་མིག་ནི་རབ་ཏུ་མཛེས་བྱེད་པ།
གྲགས་འཛིན་མས་ནི་མཛེས་པ་དག་གི་ཕྱོགས་རྣམས་སུ།
ཡ་མཚན་རབ་ཏུ་འཕྲི་བའི་བདག་པོ་དེ་མཐོང་ནས། 3

चतुःषष्टितमः पल्लवः ।

सुधनकिन्नर्य्यवदानम् ।

अभिनवकिशलयकोमल-
मनसामपि कुलिशकठिनधैर्य्याणाम् ।
महतां मणिविमलाना-
मपि भवति न रागसङ्क्रान्तिः ॥ १ ॥

शाक्यालये दर्शनमेव पित्रा
सर्व्वानुकम्पी भृशमर्थ्यमानः ।
यदा यदानन्दसुधारसेन्दु-
र्विवेश शास्ता निजराजधानीम् ॥ २ ॥

तदा तदा हर्म्यगता मृगाक्षी
कर्णावतंसीकृतनेत्रकान्तिः ।
कान्त्या दिशां विस्मयमुल्लिखन्तं
यशोधरा तं दयितं विलोक्य ॥ ३ ॥

ཉེ་དང་འགྲོགས་དང་འཁྲུད་པ་དག་གི་རེ་བྲལ་བའི།
དུག་གི་བསྒྲུལ་བ་བཞིན་དུ་མ་ལུས་ཕྱོགས་འཁོར་ཞིང་།
གྲོགས་པོ་བཞིན་དུ་ཟློག་པར་བྱེད་པའི་བརྟེན་པ་ནི།
དོར་ནས་ཁང་བཟང་དག་ལས་ལུས་ནི་རབ་ཏུ་འཕངས། 4

དག་པ་ཡལ་འདབ་ལྟར་མཉེན་ལུས་དང་ལྡན་པ་དེས།
གང་གང་ཚེ་ན་ལུས་ནི་རབ་ཏུ་འཕངས་གྱུར་པ།
དེ་དེ་ཚེ་ན་ཡིད་སྐྱབས་ཀྱིས་ནི་སྐྱོངས་པ་དེ།
བརྩེ་བས་བརྒྱན་པའི་སྤྱན་ལྡན་བཅོམ་ལྡན་འདས་ཀྱིས་བསྐྱངས། 5

དེ་ནས་ནམ་ཞིག་ནགས་ཀྱི་མཐར་ནི་བཅོམ་ལྡན་ལ།
དེ་ཡི་དགེ་མཚན་དག་ལས་དགེ་སློང་ཚོགས་ཀྱིས་དྲིས།
ཚེམས་ཀྱི་འོད་ཟེར་ཟླ་བའི་འོད་རྣམས་དག་གིས་ནི།
མཆུ་ཡི་དམར་པ་འགེབས་པར་མཛད་པ་བཞིན་དུ་གསུངས། 6

བདག་དང་བྲལ་བས་རྟག་ཏུ་གཟིར་བར་གྱུར་པ་ཡི།
གྲགས་འཛིན་མ་ནི་གང་ཞིག་གཟུ་ལུམས་འདི་དག་བྱེད།
བརྟེན་པ་འཕྲོག་ཅིང་སྨོངས་པ་རྣམ་པར་སྐྱེར་བ་འདི།
ཆགས་པའི་རྣམ་འཕྲུལ་ལྡན་པ་རྣམས་ཀྱི་རང་བཞིན་ཉིད། 7

तत्सङ्गमालिङ्गनयोर्निराशा
भ्रान्ताखिलाशा विषमूर्च्छितेव ।
धृतिं वयस्यामिव वारयन्तीं
निरस्य सौधात्तनुमुत्ससर्ज ॥ ४ ॥

यदा यदा पल्लवपेशलाङ्गी
देहं समुत्स्रष्टवती सती सा ।
तदा तदा मन्मथमोहितां तां
दयार्द्रचक्षुर्भगवान् ररक्ष ॥ ५ ॥

ततः कदाचिद्भगवान् वनान्ते
तत्कौतुकाङ्क्षिक्षुगणेन पृष्टः ।
जगाद दन्तद्युतिचन्द्रिकाभि-
र्निवारयन् रागमिवाधरस्य ॥ ६ ॥

यशोधरा मद्विरहेण नित्यं
करोति यत् साहसमेतदार्त्ता ।
हरन्ति धैर्यं वितरन्ति मोह-
मेष स्वभावः स्मरविभ्रमाणाम् ॥ ७ ॥

སྔོན་གྱི་སྐྱེ་བ་གཞན་ལ་དེ་དང་བྲལ་བ་ཡིས།
འདོད་པས་ཉམ་པར་སྨོངས་པར་གྱུར་ཏེ་བདག་གིས་ཀྱང་།
ཀུན་ཏུ་ཡོངས་སུ་གདུང་བདག་གི་སྒྱུར་གྱུར་པ།
རབ་མང་གདུང་བའི་ཉོན་མོངས་དག་ནི་ཉམས་སུ་སྤྱོང་། 8

གྲོང་མཆོག་ཏ་ཀྵི་ཤ་ཡི་གྲོང་། འཆི་མེད་ཡོན་ཏན་ཐུལ་བར་སྤོན།
ཡོན་ཏན་ཕུན་སུམ་ཚོགས་པའི་གཏེར། རྒྱལ་པོ་ནོར་ཞེས་བྱ་བ་བྱུང་། 9

ལག་བ་ཡིས་ནི་ས་ལ་འཁྱུད། དབྱངས་ཅན་དག་ནི་མགྲིན་པར་གྱུས།
ངག་གི་དཔལ་ནི་རབ་ཏུ་བསྟུར། གྲགས་པ་ཁོ་ན་རབ་ཏུ་བསྒྲད། 10

དེ་ཡི་བཙུན་མོ་མཛེས་མ་ལ། བུ་ནི་ནོར་བཟང་ཞེས་བྱ་བ།
གཏེར་བརྒྱ་དང་ནི་གྲགས་པ་དང་། ལྷན་ཅིག་སྐྱེས་པ་བྱུང་བར་གྱུར། 11

རིག་གནས་ཀུན་གྱི་ཀུ་སུད་ཅན། རྟག་ཏུ་ཉམས་གྱུས་བྱེད་པ་ཆགས།
དྲི་མེད་མཛེས་པ་སྐྱུ་ཅོལ་ཅན། གང་བའི་ཟླ་བ་ལྟ་བུར་མཛེས། 12

ས་བདག་དེ་དང་ས་གཞི་ན། བར་མེད་ས་བདག་བྱུང་གྱུར་པ།
ཁྲིངས་ལྡན་དབང་ཆེན་སྡེ་ཞེས་པ། ཀྱི་ཆེ་ཉམས་པར་གནོན་པར་གྲགས། 13

དུས་མིན་དུས་སུ་བརྟག་བྱ་ཞིང་། ཀུན་གྱི་བདོག་ཀུན་འཕྲོག་བྱེད་པ།
བཟོད་དཀའི་དཔུ་དང་ལྡན་པ་དེས། གཟིར་བའི་སྐྱེ་གུས་མྱ་ངན་བྱས། 14

मयापि तस्या विरहेण पूर्व्वं
जन्मान्तरे मारविमोहितेन।
संसक्तसन्तापनिमित्तभूतः
खेदः प्रभूतव्यसनोऽनुभूतः[१] ॥ ८ ॥

पुरा जितामरपुरे सत्पुरे हस्तिनापुरे।
राजा धनाभिधानोऽभूत् निधानं गुणसम्पदाम् ॥ ९ ॥

भुजेनालिङ्गिता भूमिः कृता कण्ठे सरस्वती।
लक्ष्मीः प्रसाधिता येन कीर्त्तिरेव प्रवासिता ॥ १० ॥

रामायां तस्य जायायां तनयः सुधनाभिधः।
अभवत् सहसञ्जातनिधानशतविश्रुतः ॥ ११ ॥

सर्व्वविद्याकुमुदिनीविकाशरसिकः सदा।
कलावान्निर्म्मलरुचिर्यः पूर्णेन्दुरिवाबभौ ॥ १२ ॥

बभूव तस्य भूभर्त्तुर्भूपतिर्भूम्यनन्तरः।
मानी महेन्द्रसेनाख्यः प्रख्यातपृथुविक्रमः ॥ १३ ॥

तेन दुःसहदण्डेन सर्व्वसर्व्वस्वहारिणा।
अकालकालकल्पेन पीड़िताः मुमुचुः प्रजाः ॥ १४ ॥

---

१ W_1 has the following additional S'loka :—
स्वयम्भ्वर्च्चनमाहात्म्यमथ वक्ष्यामि हे जिनाः।
यदर्च्चनात सुधनोऽसौ स्त्रीरत्नादिकमाप्तवान् ॥

ཆོས་མིན་ལ་ནི་ཞུགས་པ་དེའི། གྲོང་ནི་ལེགས་བྱས་སྤྲོ་བ་དག།
ལོག་ཅིང་གདུང་བ་དྲག་པོ་ཡིས། གདུང་བར་སྤྲིན་གྱི་ཆར་མ་ཕབ། 15

ས་སྐྱོང་རྗེས་སུ་མི་མཐུན་པ། དེར་ནི་ཀླུ་གཞི་ཉེན་འཚེ་བྱུང་།
སྡུག་བསྔལ་ཅན་ནམས་ཁོ་ན་ལ། སྡུག་བསྔལ་གྱིས་པར་གྱུར་པ་ཡིན། 16

དེ་ནས་ཉོན་མོངས་ཀྱིས་ཁྱད་གཟིར། བདག་ངན་གྱིས་གདུངས་ཡིད་བྱུང་ཞིང་།
གྲོང་ནང་གནས་པ་ཐམས་ཅད་ནི། གཅིག་ཏུ་འཚོགས་ནས་རྣམ་པར་བསམས། 17

རྒྱལ་བློན་མཚན་མོར་བྱེད་པ་ནི། གསར་པའི་དཔྱ་ཟེར་འབེབས་པ་ཡིས།
མཆོག་ཏུ་སྐྱེ་བོའི་ཚོགས་པ་ནི། པདྨ་ཅན་བཞིན་ཟུམ་པར་གྱུར། 18

དོག་ཏུ་ངན་པར་ཞེན་པ་འདྲིས། བདེན་མེད་བློན་པོའི་གྲོས་དག་གིས།
བདག་ཅག་བཅིར་ནས་གཡོ་ཅན་དང་། བྲན་དང་གླུ་མཁན་རྣམས་དག་བསོས། 19

དེ་ལའང་ས་བདག་སྡིག་པ་ཡི། དམོད་པས་ཆར་མེད་སྡུག་བསྔལ་བ།
སྐྱེ་བོ་ཡང་དག་བརླག་པའི་དབང་། ཀླུ་གི་སྐྱེད་པར་བྱེད་པ་སྐྱེས། 20

ས་སྐྱོང་ཤིན་ཏུ་རྣ་ཞིང་འཁོར་གྱི་སྐྱེ་བོ་ཉུབ་ཅིང་ཀླུ་ཚེར་སྨོངས།
བློན་པོ་རྣམས་ཀྱང་གདུག་ཅིང་དྲག་པ་གཡོ་ལྡན་གྲུ་གྲུ་དག་ལ་མཁས།
ཞབས་དྲུང་གནས་དང་ཡིག་མཁན་མི་བཟད་ཁ་སྐྱོན་རབ་ཏུ་ཁྲིམས་གྱུར་པ།
དམན་པ་འཇོམས་བྱེད་མ་རུང་ཚོགས་པ་འདི་དག་རྣམས་ནི་ཇི་ལྟར་བཟོད། 21

तस्याधर्म्मप्रवृत्तस्य निवृत्तसुकृतोत्सवे।
तीव्रोपतापसन्तप्ते पुरे न ववृषुर्घनाः ॥ १५ ॥

प्रतिकूले महीपाले तत्र दुर्भिक्षविप्लवः।
बभूव व्यसनेष्वेव भवन्ति व्यसनोदयाः ॥ १६ ॥

ततः क्लेशविशेषार्त्ताः सर्व्वे पुरनिवासिनः।
कुपतिव्यसनोद्वेगादेकीभूता व्यचिन्तयन् ॥ १७ ॥

राज्ञा दोषाकरेणेयं जड़ेन जनता परम्।
प्रत्यग्रकरपातेन नलिनीव निमीलिता ॥ १८ ॥

एष दुर्व्यसनी नित्यमसत्यामात्यसम्मतः।
अस्मान्निपीड्य पुष्णाति विटचेटकगायनान् ॥ १९ ॥

कष्टा तत्राप्यनावृष्टिः पापशापेन भूपतेः।
दुर्भिक्षजननी जाता जनसंक्षयसाक्षिणी ॥ २० ॥

सुतीक्ष्णः क्ष्मापालः खरमुखरमूर्खः परिजनः
कदर्थाश्चामात्याः कटुकपटकौटिल्यपटवः।
पदस्थाः कायस्थाः विषममुखरोगाः प्रकुपिताः
कथं सोऽयं सह्यः क्षपणदलनो दारुणगणः ॥ २१ ॥

དཔལ་ལྡན་ས་ཡི་བདག་པོ་ནི། ནོར་གྱིས་ཡུལ་འཁོར་སྐྱོང་བ་ཐོས།
བདག་ཅག་དེ་གྲོང་སོང་བ་ན། མཉེས་ག་ཤིན་དེ་ཡིས་སྐྱོང་བར་འགྱུར། 22

ས་བདག་གང་གི་ཡུལ་འཁོར་ལ། བུ་བཞིན་རྟག་ཏུ་ལྟ་བྱེད་པ།
དེ་ཡི་ཡུལ་དུ་ཕ་ཡིས་ནི། ཁྱིམ་དུ་བཞིན་དུ་འཚོ་བར་བྱ། 23

དེ་ལྟར་ངེས་བསྒྲུབས་དེ་དག་ཉམས། ཏ་ཀྵི་ན་ཡི་གྲོང་ཁྱེར་སོང་།
ལུས་ཀྱང་གནོད་བཅས་གདང་བྲ་ན། ཡུལ་དང་གནས་ནི་སྨོས་ཅི་དགོས། 24

མི་བདག་དབང་ཆེན་སྡེ་ཡིས་ཀྱང་། རང་གྲོང་སྐྱེ་བོ་མེད་ཤེས་ནས།
འཁྲིད་པ་དྲག་པོས་ཁྲི་ལྡན་པར། བློན་པོ་ཆེན་པོ་ལ་སྨྲས་པ། 25

རྒྱལ་པོ་ནོར་གྱི་གྲོང་ཁྱེར་དུ། བདག་གི་གྲོང་གནས་སྐྱེ་བོ་ཉམས།
རབ་ཏུ་སོང་ཞེས་ཉན་སྣ་ནི། གསང་ནས་རྒྱུ་བ་དག་གིས་སྨྲས། 26

གལ་ཏེ་བདག་གི་དགྲ་གྲོང་དུ། དེ་དག་སྡུ་གས་ཉེན་འགྲོ་ན།
གནམ་གྱི་ཉེར་འཚོ་ཐམས་ཅད་དུ། རེ་མོས་ཀྱིས་ནི་འབྱུང་བ་ཉིད། 27

ཡང་ན་རྒྱལ་པོའི་སྐྱོན་གྱིས་ནི། བདེ་བ་འདོད་པས་དེ་དག་སོང་།
རྒྱལ་པོ་སུ་ཡིས་གྲོང་ཁྱེར་གྱིས། སྐྱེ་བོ་ལས་དང་དཔྱ་ལས་གྲོལ། 28

ཕལ་ཆེར་ཡོངས་སུ་འདྲིས་ལ་སྣང་། རྟག་ཏུ་གསར་པ་གསར་པ་འཚོལ།
རིང་ནས་གནས་པ་ཐམས་ཅད་ནི། ཀུན་གྱི་ཡིད་དུ་འོང་བ་ཡིན། 29

धनः श्रीमान् क्षितिपतिः श्रूयते राष्ट्रवर्द्धनः।
गच्छामस्तत्पुरं सोऽस्मान् वत्सलः पालयिष्यति ॥ २२ ॥

अपत्यमिव राष्ट्रं यः सदा पश्यति भूपतिः।
विषये जीव्यते तस्य जनकस्येव वेश्मनि ॥ २३ ॥

इति निश्चयमाधाय ययुस्ते हस्तिनापुरम्।
त्याज्यः कायोऽपि सापायः किं पुनर्देशसंश्रयः ॥ २४ ॥

ज्ञात्वा महेन्द्रसेनोऽपि स्वपुरं निर्जनं नृपः।
तीव्रानुतापः सामर्षं महामात्यानभाषत ॥ २५ ॥

धनस्य धनिनो राज्ञः पुरं मत्पुरवासिनः।
प्रयाता इति नश्चारैः कथितं गूढ़चारिभिः ॥ २६ ॥

दुर्भिक्षखिन्ना यदि ते याता मम रिपोः पुरम्।
तत् सर्व्वं च भवन्त्येव पर्य्यायैर्दैवविप्लवाः ॥ २७ ॥

अथवा राजदोषेण गतास्ते सुखवाञ्छया।
विष्टिदण्डकरोन्मुक्तः कस्य राज्ञः पुरे जनः ॥ २८ ॥

प्रायः परिचितद्वेषात् सदा नवनवैषिणः।
दूरस्थ एव सर्व्वस्य सर्व्वो भवति वल्लभः ॥ २९ ॥

१ विष्टि means labour without remuneration for the service of the king.

གང་གིས་གཞན་གྱི་སྐྱེ་དགུ་ནི། སྐྱོངས་པ་ཆུང་མ་བཞིན་དུ་འཕྲོག།
ས་བདག་དེ་ལ་ཡོན་ཏན་ནི། བདག་ལས་ལྷག་པ་ཅི་ཞིག་ཡོད། 30

རེ་ཞིག་དེ་ཡི་གྲགས་པ་ནི། རབ་གཞིལ་ཐབས་དག་བསམས་པར་མཛོད།
གང་ཡང་ཕུན་སུམ་ཚོགས་པའི་རྒྱུ། དེ་དག་གཞོམས་པ་བསྒྲུབ་པར་མཛོད། 31

ཅེས་པ་རྒྱལ་པོའི་ཚིག་ཐོས་ནས། བློན་པོ་ཆེན་པོས་རབ་སྨྲས་པ།
ལྷ་གཅིག་གང་གི་རྒྱལ་པོ་ནི། ནོར་དང་སྐྱེ་བོ་དར་བ་ཉིན། 32

ས་བདག་དེ་ཡི་དར་བ་ནི། གཟུགས་ཅན་བསོད་ནམས་ཀྱིས་བདགས་བཞིན།
ཡུལ་ན་ཀླུ་ཡི་རྒྱལ་པོ་ནི། ཆུ་མ་ཙི་ཏྲ་ཞེས་པ་ཡོད། 33

དེ་ཡི་མཐུ་ཡིས་དུས་མིན་དུ། འབྲུ་ནི་ཕུན་སུམ་ཚོགས་པར་འགྱུར།
ས་བདག་ཕུན་སུམ་ཚོགས་ཀུན་གྱིས། ཙཾ་པ་ཞིང་ནི་ཕུན་སུམ་ཚོགས། 34

དེ་སྐད་རིག་པའི་སྤོབས་དག་གིས། ཀླུ་དེ་གལ་ཏེ་འཕྲོག་ནུས་ན།
དེ་ཚེ་དེ་ཡི་སྐྱེ་དགུ་རྣམས། རང་ཉིད་ཁྱོད་ལ་བརྟེན་པར་འགྱུར། 35

དེ་སྐད་སྔགས་སྤོབས་འབར་བ་ཡིས། སྒྲུབ་པ་པོ་འགའ་བཙལ་ནས་ནི།
ཀླུ་ཡི་རྒྱལ་པོ་འཕྲོག་པ་ལ། བརྩོན་པ་དག་ནི་མྱུར་དུ་མཛོད། 36

ཅེས་པ་བློན་པོའི་ཚིག་ཐོས་ནས། ས་བདག་གིས་ནི་བདེན་ཞེས་སྨྲས།
རང་ཉིད་ཡོན་ཏན་ནོར་ཉམས་པའི། མི་བསྲུན་ཕ་རོལ་སྐྱོན་ལ་སྦྱོར། 37

अस्मदभ्यधिकः कोऽसौ तस्य भूमिपतेर्गुणः ।
परेषां हरते येन मुग्धा जाया इव प्रजाः ॥ ३० ॥

उपायश्चिन्त्यतां तावत् तस्य दर्पप्रशान्तये ।
समृद्धिकारणं यच्च तद्विघातो विधीयताम् ॥ ३१ ॥

इति राजवचः श्रुत्वा महामात्या बभाषिरे ।
श्रूयतां देव येनासौ राजा धनजनोर्ज्जितः ॥ ३२ ॥

विषये नागराजोऽस्ति चित्रो नाम बहूदकः ।
तस्य क्षितिपतेर्मूर्त्तः पुण्यबन्ध इवोदयः ॥ ३३ ॥

अकाले शस्यनिष्पत्तिस्तत्प्रभावेण जायते ।
कृषिसम्पत्तिमूलाश्च भूभुजां सर्व्वसम्पदः ॥ ३४ ॥

तस्माद्विद्याबलान्नागः संहर्त्तुं यदि शक्यते ।
तदा यान्ति स्वयं तस्य प्रजास्त्वामेव संश्रयम् ॥ ३५ ॥

दीप्तमन्त्रबलं कञ्चित्तस्मादन्विष्य साधकम् ।
नागराजस्य हरणे क्रियतां तूर्णमुद्यमः ॥ ३६ ॥

इत्यमात्यवचः श्रुत्वा तथेत्याह महीपतिः ।
स्वगुणाधानविकलाः परदोषोद्यताः खलाः ॥ ३७ ॥

དེར་ནི་གསེར་ནི་མང་པོ་དག། ཛིན་པ་རབ་ཏུ་སྦྱོར་བའི་སྒྲ།
བསྒྲགས་ནས་གྲོས་པ་རྣམས་ཀྱིས་ནི། ཀླུ་དག་འཆིང་བའི་སྔགས་པ་ཐོབ། 38

གསེར་སྦྱིན་དམ་བཅས་དེ་དག་གྱིས། གསོལ་གདབ་རིག་འཛིན་ཞེས་བྱ་བ།
དེ་ནི་ཙི་ཏ་ཧྲ་བའི་སྐད། ཏཥྚི་ན་ཡི་གྲོང་ཁྱེར་སོང་། 39

དེར་ནི་ནགས་ཚལ་དག་གི་མཐའ། སྐྱུས་ལྷུང་ཀིང་འཕྲུང་ལྡན་པ་ན།
གདེངས་ཅན་བདག་པོའི་ཁང་པ་ནི། ནམ་མཁའི་འོད་ཅན་དེ་ཡིས་མཐོང་། 40

བ་ཀུ་ལ་ཡི་འཕྲེང་གཡོ་ཞིང་། ཏི་ཀ་ལ་ཡི་དཔལ་གྱིས་པ།
ནགས་ཀྱི་དཔལ་མོའི་རྒྱན་དག་གི། ནོར་བུའི་མེ་ལོང་ཉི་བ་བཞིན། 41

དྲི་མེད་ཆུ་དེ་མཐོང་གྱུར་ནས། ཆགས་པས་ཉམས་པའི་ཡིད་ཅན་གྱིས།
སྔགས་ཀྱི་བསམ་གཏན་ཆས་ཞུགས་ཏེ། བསྒྲུབ་སྐད་ཕྱོགས་ནི་བཅིང་བ་བྱས། 42

བརྟུལ་ཞུགས་རབ་དྲག་གཟི་ལྡན་དེས། ཕྱོགས་ནི་བཅིངས་པ་བསྒྲུབ་པ་ནི།
ཀླུ་བདག་གདེངས་ཀའི་ནོར་བུ་ནི། གདུང་ཞིང་མགོ་བོ་གཟིར་བར་གྱུར། 43

དེ་ནས་མ་མཐོང་ཡང་དག་ལངས། སྔགས་ནི་བསྒྲུབ་པ་དེ་མཐོང་ནས།
འདར་ཞིང་གདེངས་ཅན་བདག་པོ་ནི། བཅིངས་པས་སྐྲག་པས་རབ་བསམས་བ། 44

ཁྲོ་བ་སྨྲ་ར་སྨིན་མ་སེར། ལྷ་བྱིན་སེར་སྐྱ་སྨྱིག་ལྟ་བུ།
དུས་མིན་དུས་དང་མཚུངས་པ་ཡི། གདུག་པ་འདི་ནི་ག་ལས་འོངས། 45

ततः प्रभूतकनकप्रदानपणघोषणाम्।
श्रुत्वा ते मन्त्रिणः प्रापुर्नागबन्धनमन्त्रिणम्॥ ३८॥

स तैर्विद्याधरो नाम सुवर्णार्पणसंविदा।
प्रार्थितश्चिरमानेतुं प्रययौ हस्तिनापुरम्॥ ३९॥

तत्र काननपर्य्यन्ते स्निग्धश्यामलपादपे।
भवनं भोगिनां भर्त्तुः स ददर्श नभःप्रभम्॥ ४०॥

वलद्वकुलमालाया विलसत्तिलकश्रियः।
वनलक्ष्या इवासन्नमण्डनामणिदर्पणम्॥ ४१॥

तद्विलोक्यामलजलं स्पृहामलिनमानसः।
मन्त्रानुध्यानसन्नद्धः सिद्धौ दिग्बन्धमादधे॥ ४२॥

दिग्बन्धे विहिते तेन व्रतेनात्युग्रतेजसा।
शिरोव्यथा नागपतेरभूत्तप्तफणामणेः॥ ४३॥

अथाहश्यः समुत्थाय तं दृष्ट्वा मन्त्रसाधकम्।
कम्पमानः फणिपतिर्बन्धत्रासादचिन्तयत्॥ ४४॥

बभ्रुभ्रूभ्रमभ्रुग्नवलस्तड़ित्कपिललोचनः।
अकालकालसङ्काशः कुलं हन्तुं समागतः॥ ४५॥

ད་ནི་གདུག་པའི་བདག་ཉིད་འདིས། ནགས་ཀྱི་ཕྱོགས་ནི་བཅིངས་པ་བྱས།
ཇི་སྲིད་འདིས་བདག་མ་བཅིངས་པ། དེ་སྲིད་རིགས་པའི་རིམ་པ་བཟོད། 46

དྲང་སྲོང་ཆེན་པོ་ཞིན་ཤུན་ཅན། འཇུག་ངོགས་ཉེ་བའི་མཐའ་འདིར་གནས།
བདག་ཡངས་བསྐྱབ་པ་དམ་པ་ནི། དེས་ཀྱང་ནུས་པ་མིན་པར་ཤེས། 47

གང་འདི་དེ་ཡི་བསྟི་གནས་ན། རྟག་ཏུ་རིམ་གྲོ་ཡོངས་བསྐྱབ་པ།
ཇོན་པ་པདྨ་ཅན་ཞེས་པས། དེ་ཡིས་བདག་ནི་བསྲུང་བར་བཟོད། 48

ཅེས་པ་ཡིད་ཀྱིས་ངེས་བྱས་ནས། ཇོན་པ་ག་ལ་བ་དེར་སོང་།
རང་གི་སྤྱོད་ཚུལ་བཤད་ནས་ནི། དེ་ལ་འཆི་བ་བསྲུང་བར་ཞུས། 49

ཀླུ་ཡི་རྒྱལ་པོས་སྐྱབ་པ་པོ། གསད་པའི་སྐད་དུ་གསོལ་བཏབ་སྟེ།
གཞུ་དང་ལྡན་པས་གནས་དེར་ཕྱིན། སྔགས་པ་དཔའ་བོ་མཐོང་བར་གྱུར། 50

གནས་སྐབས་དེར་ནི་སྐྱབ་པ་པོ། སྔགས་པ་ཡིས་ཀྱང་སྦྱིན་སྲིག་མེས།
བཅིང་བར་འདོད་པས་ཀླུ་ཡི་ནི། རྒྱལ་པོ་རབ་ཏུ་དགུག་པར་བྱས། 51

གདེངས་ཅན་བདག་པོ་སྔགས་ཀྱིས་ནི། དྲངས་ཚེ་དེ་ཡི་གནས་ཀྱི་ཆུ།
ཆུ་ཡི་ཆུ་བུར་རབ་དཀྲིགས་པས། སྦྲུ་ངན་བྱེད་པར་བརྩོན་པ་བཞིན། 52

ལག་འགྲོའི་ཆུང་མ་ཀུན་དུ་སྐྲག་པས་འཁྲུགས་པའི་སྦྲུ་ངན་གྱིས།
ཤུགས་རིངས་ཤུགས་ཀྱིས་རབ་བསྐྱབས་རབ་འབར་དབྱུ་བའི་ཕྲེང་བ་ཅན།
རབ་ཏུ་འདར་ཞིང་གཡོ་བའི་ཆུ་ནི་སོ་ཀླབས་ལག་པ་ཡིས།
ཐལ་མོ་སྦྱར་བྱས་བསྲུང་བ་དོན་དུ་གཉེར་བར་བྱེད་པ་བཞིན། 53

वने सम्प्रति दिग्बन्धः कृतोऽनेन दुरात्मना ।
बध्नात्येष न यावन्मां तावद्युक्तिक्रमः क्षमः ॥ ४६ ॥

तीरोपान्ते वसत्यस्मिन् महर्षिर्वल्कलायनः ।
जाने सोऽपि न मे साधुः परित्राणे प्रगल्भते ॥ ४७ ॥

तस्याश्रमपदे योऽसौ परिचर्य्यापरः सदा ।
लुब्धकः पद्मको नाम स मे संरक्षणक्षमः ॥ ४८ ॥

इति निश्चित्य मनसा गत्वा स लुब्धकान्तिकम् ।
स्ववृत्तान्तं निवेद्यास्मै बन्धरक्षामयाचत ॥ ४९ ॥

साधकस्य बधायैव नागराजेन सोऽर्थितः ।
धन्वी तं देशमभ्येत्य मन्त्रधीरं व्यलोकयत् ॥ ५० ॥

अस्मिन्नवसरे मन्त्री स प्रकोपी हुतानलः ।
आकृष्टिं नागराजस्य विदधे बन्धनोत्सुकः ॥ ५१ ॥

मन्त्राकृष्टे फणिपतौ क्षणं तद्भवनोदकम् ।
सविषादं रुरोदेव प्रोद्यद्बुद्बुदशब्दितम् ॥ ५२ ॥

सन्त्रासविह्वलभुजङ्गवधूविषाद-
निश्वासवेगविहितोज्ज्वलफेनमालम् ।
रक्षार्थनामिव चकार तरङ्गहस्त-
सक्ताञ्जलिप्रबलकम्पविलोलमम्भः ॥ ५३ ॥

མཁའ་ལྡིང་གཟི་བྱིན་ལྡན་པ་དེས། རིག་པའི་སྟོབས་ཀྱིས་ཀླུ་བཟུང་སྟེ།
འཁྲམས་ཤིང་གྲུ་གྲུ་ལྡན་པའི་ལུས། ཆུ་ཡི་ཀློང་དུ་བཅལ་བ་ན། 54

རྔོན་པ་ཡིས་ནི་གཞུ་བཀང་སྟེ། དུག་གིས་བྱུགས་པའི་མདའ་དག་གིས།
སྣག་པས་མིག་ནི་ཉམས་གྱུར་ཅིང་། གསེར་ལ་ཆགས་པ་དེ་ལ་བསྟུན། 55

འཇིགས་པས་ལག་འགྲོ་བདང་གྱུར་ཅིང་། མེད་འཇུག་དེ་ལ་མངོན་ཕྱོགས་ཏེ།
དེ་ཡི་འཇིགས་སྟང་རལ་གྲི་ཡིས། མགོ་བོ་དག་དང་བྲལ་བ། 56

རྫོངས་པ་དེ་ཡིར་གི་པ་ནི། གཡེམ་མ་ཆགས་ལས་གཞན་དག་དང་།
ཉེ་བར་སྦྱོར་བ་གྲུབ་མདོ་ཀྱང་། རང་ཉིད་བརླག་དོན་འབབ་ཞིག་གྱུར། 57

བླུན་པོའི་རིག་པ་འཁྱོར་བ་སྟོབས། ཕྱི་རོལ་ཉེ་བར་གདུང་བའི་སྐད།
སྦྱོར་བ་ཉམས་ནི་འཕྲལ་ལ་ཉིད། སྲོག་དང་ལྷན་ཅིག་ཉམས་པར་གྱུར། 58

དེ་ནས་རབ་དགའ་ཡོངས་རྫོགས་པ། བྱས་ཤེས་གདེངས་ཅན་འདྲེན་པ་ཡིས།
རང་གི་ཁང་པར་ཇོན་པ་དེ། མཛའ་གཅུགས་བློ་དང་ལྡན་པས་བོས། 59

ནོར་བུའི་ཁང་པ་གཞལ་ཡས་ཁང་། རིན་ཆེན་འཁྲི་ཤིང་སྐྱེད་ཚལ་དེར།
ཅོ་དྲུ་ཡིས་ནི་མཆོད་བྱེད་ཅིང་། དེ་ཡི་དུས་ནི་འགའ་ཞིག་གནས། 60

དེ་ནས་ཡ་མཚན་ལྡན་པ་དེས། ནམ་ཞིག་གློག་འཕྲེང་ལྟ་བུ་ཡིས།
ཞགས་པ་དོན་ཡོད་ཅེས་བྱ་བ། ཀླུ་ཡིས་མཆོད་པར་བྱེད་པ་མཐོང་། 61

आत्ते विद्याबलात्तेन नागे गरुडतेजसा।
सङ्कोचितविलाभोगे क्षिप्ते च जलभाजने ॥ ५४ ॥

तं हेमलुब्धं बाणेन त्राससन्दिग्धलोचनम्।
विव्याध धनुराकृष्य विषदिग्धेन लुब्धकः ॥ ५५ ॥

मग्नबाणं तमभ्येत्य भूयस्त्यक्तभुजङ्गमम्।
करालकरवालेन त्विङ्गिलक्ष्यं चकार सः ॥ ५६ ॥

सा विद्या बन्धकी तस्य लोभादन्योपयोगिनी।
अभूत् सिद्धापि मुग्धस्य स्वविनाशाय केवलम् ॥ ५७ ॥

मुक्ताः परोपतापाय विद्याविभवशक्तयः।
सहसैव विमूढानां विनश्यन्ति सहासुभिः ॥ ५८ ॥

ततः प्रहर्षसम्पूर्णः कृतज्ञः फणिनायकः।
तं निनाय स्वभवनं लुब्धकं स्नेहलुब्धकः ॥ ५९ ॥

तत्र रत्नतलोद्यानविमानमणिवेश्मसु।
अभ्यर्च्यमानश्चिरेण कञ्चित्कालमुवास सः ॥ ६० ॥

कदाचिदथ नागेन पूज्यमानः सविस्मयः।
विद्युद्दामोपमं पाशममोघाख्यं ददर्श सः ॥ ६१ ॥

དེ་མཐོང་དེ་ཡི་ནུས་མཐུ་དག། ཀླུ་ཡིས་བཤད་པ་འོས་གྱུར་ནས།
རྔོན་པ་ཆགས་པའི་ཡིད་ལྡན་པས། དེ་ནི་འབད་ནས་རབ་ཏུ་བསླངས། 62

གཡུལ་གྱི་སྦྱོར་བ་མི་ཕམ་ཞིང་། ཀླུ་རྣམས་ཀྱང་ནི་འཆིང་བྱེད་པ།
སྒྲོག་ལས་ལྷག་པ་དེ་དེ་ལ། གདེངས་ཅན་དབང་པོ་དགའ་བས་བྱིན། 63

དེ་ནས་ཞགས་པ་དེ་ཐོགས་ནས། ཅི་དྲ་ལ་ཞེས་རྔོན་པ་ནི།
ཀླུ་ཡི་ཁང་པ་ལས་འཐོན་ཏེ། དོན་ཐོབ་རང་གི་གནས་སུ་སོང་། 64

ཀླུ་ཡི་མཐུ་ཡིས་ཐོབ་པ་ཡི། ཕུན་ཚོགས་ཡུན་རིང་དེ་སྤྱད་ནས།
ཨུ་དཔལ་ཅན་ཞེས་བྱ་བ་ཡི། བུ་ལ་ཞགས་པ་བྱིན་ནས་འདས། 65

རྔོན་པ་གཞོན་ནུ་དེ་ཡིས་ཀྱང་། ཕ་ཡི་སྤྱོད་པ་སྐྱོང་བྱེད་ཅིང་།
རིགས་ཀྱི་ལུགས་ཀྱིས་ཐུབ་ལ་དེའི། རིམ་གྲོ་བྱེད་པ་ཉིད་དུ་གྱུར། 66

དེ་ནས་ནམ་ཞིག་ཐུབ་པ་ནི། བཞུགས་པའི་མདུན་ན་གནས་པ་དེས།
ཤིན་ཏུ་ཕྲ་ཞིང་སྙན་པའི་གླུ། ནོ་བའི་བརྒྱུད་ལེན་གྱིས་པ་ཐོས། 67

ཐུབ་པ་རི་མོ་བཀོད་པ་བཞིན། མཐོང་ནས་ཡ་མཚན་དེས་དྲིས་པ།
པདྨོ་ཁོངས་སུ་བྱུང་བ་ནི། ཡང་དག་བསྒྲུམས་པའི་སྒྲ་མཚུངས་ཤིང་། 68

ཁ་བྱུག་དབྱངས་ལྟར་སྙན་པ་ཡི། སྒྲ་འདི་དག་ནི་གང་ལས་ཐོས།
ཞེས་པ་རྔོན་པའི་བུ་ཡིས་དྲིས། དེ་ལ་ཐུབ་པས་རབ་སྨྲས་པ། 69

तं दृष्ट्वा तत्प्रभावञ्च श्रुत्वा नागनिवेदितम् ।
यत्नात्तदर्थनाञ्चक्रे लुब्धको लुब्धमानसः ॥ ६२ ॥

अजय्यं समरोद्योगे सुराणामपि बन्धनम् ।
तं जीविताधिकं तस्मै ददौ प्रीत्या फणीश्वरः ॥ ६३ ॥

ततस्तं पाशमादाय चित्रमामन्त्र्य लुब्धकः ।
उत्तीर्य्य नागभवनाल्लब्धार्थः स्वपदं[1] ययौ ॥ ६४ ॥

नागप्रभावसम्प्राप्तां चिरं भुक्त्वा स सम्पदम् ।
पुत्रायोत्पलकाख्याय पाशं दत्त्वा व्यपद्यत ॥ ६५ ॥

पालयन् पितुराचारं सोऽपि लुब्धकुमारकः ।
मुनेस्तस्य कुलस्थित्या परिचर्य्यापरोऽभवत् ॥ ६६ ॥

ततः कदाचित् स मुनेर्विश्रान्तस्य स्थितः पुरः ।
शुश्राव काकलीगीतं कीर्णं कर्णरसायनम् ॥ ६७ ॥

गीतश्रवणनिस्पन्दनिलीनहरिणं वनम् ।
चित्रन्यस्तमिवालोक्य सोऽपृच्छद्विस्मितो मुनिम् ॥ ६८ ॥

कमलाबन्धसंरुद्धमधुपध्वनिसोदरः ।
कुतोऽयं कोकिलालापललितः श्रूयते स्वनः ॥ ६९ ॥

[1] W 1 स्वपुरं ।

མི་འམ་ཅི་ཡི་བུ་མོ་རྣམས། སྔོན་པར་བརྗོད་པ་འདི་དག་ལིན།
མི་འམ་ཅི་བདག་ལྗོན་པ་ཡི། བུ་མོ་ཡིད་འཕྲོག་མ་འདི་ནི། 70

བུ་མོ་ལྷ་བཀྲིས་ཡོངས་བསྐོར་ནས། ཀླུ་ཡི་ཁང་པ་དག་ན་རྩེ།
དེ་ཐོས་དགེ་མཚན་གྱིས་ནོན་ནས། དེ་ཡིས་སླར་ཡང་ཐུབ་ལ་སྨྲས། 71

མི་འམ་ཅི་ཡི་བུ་མོ་དག། སྐྱེས་བུས་ཐོབ་པར་ནུས་སམ་ཅི།
ཐུབ་པས་དེར་སླུས་གང་གི་ནི། ལག་རྩེར་དོན་ཡོད་ཅེས་བྱ་བའི། 72

ཞགས་པས་སོང་སྡེ་འདོད་ལྡན་མ། མི་འམ་ཅི་མོ་བླང་བར་ནུས།
དེ་ནས་དེ་ཐོས་སྤྱོ་ལྡན་པའི། ཇོན་པས་དེ་ལ་ཕྱག་བཙལ་ནས། 73

ཞགས་པ་བཟུང་སྟེ་གདེངས་ཅན་གྱི། དབང་པོའི་ཁང་པ་དག་ཏུ་སོང་།
དེར་རེས་མི་འམ་ཅི་མོའི་ཚོགས། ཚེ་དགའ་རོལ་བརྙེད་ [illegible] 74

གསེར་གྱི་འཁྲི་ཤིང་ནགས་ཀྱི་དཔལ་ལ། ཀླུང་གིས་བསྐྱོད་ [illegible] གྲོང་།
དེ་དག་དབུས་སུ་ཡིད་འཕྲོག་མས། ཁྲུས་བྱས་ལངས་པ་མཐོང་གྱུར་ཏོ། 75

དྲན་པའི་མིག་གསུམ་མ་དག་གི། ཞི་བྱེད་རྒྱ་ཡི་ལྷ་མོ་བཞིན།
ལུས་མེད་རྣམ་འཕྲུལ་རྩོམ་པ་ཡི། བ་རླབས་ཚོགས་ལྡན་ལང་ཚོར་ནི། 76

གཞོན་ནུ་མ་ཉིད་བྲིང་བ་ཡི། རྟེན་པ་དག་ནི་བྲེད་པ་བཞིན།
ཡིད་འོང་ལྷ་ཡི་གོས་བགོས་ཤིང་། སྐྲ་རྒྱས་དག་ནི་ལེགས་པར་བཅིངས། 77

इति लुब्धकपुत्रेण पृष्टस्तं मुनिरब्रवीत् ।
गायन्ति मधुरालापमेताः किन्नरकन्यकाः ॥ ७० ॥

द्रुमस्य किन्नरपतेः कन्या कन्याशतैर्वृता ।
पञ्चभिर्नागभवने क्रीड़त्येषा मनोहरा ॥ ७१ ॥

श्रुत्वैतत् कौतुकाक्रान्तः स पुनर्मुनिमभ्यधात् ।
अपि शक्नोति पुरुषः प्राप्तुं किन्नरकन्यकाम् ॥ ७२ ॥

तमुवाच मुनिर्यस्य भवेत् पाशः कराग्रगः ।
अमोघाख्यः स शक्नोति हर्त्तुं किन्नरकामिनीम् ॥ ७३ ॥

स तदाकर्ण्य[1] सोत्साहस्तं प्रणम्याथ लुब्धकः ।
प्रययौ पाशमादाय भोगीन्द्रभवनान्तिकम् ॥ ७४ ॥

तत्र केलिविलासाङ्कं सोऽपश्यत् किन्नरीगणम् ।
बिभ्राणमनिलालोलहेमवल्लीवनश्रियम् ॥ ७५ ॥

मध्ये स्नानोत्थितां तासां स ददर्श मनोहराम् ।
स्मरस्येव त्रिनेत्राग्निनिर्व्वाणजलदेवताम् ॥ ७६ ॥

अनङ्गविभ्रमारम्भनिर्भरोर्म्मिणि यौवने ।
मज्जतः शैशवस्येव कुर्व्वाणामवलम्बनम् ॥ ७७ ॥

---

१ W 2 एतदाकर्ण्य ।

ཆུ་རྗེད་རོལ་པས་དབྲུ་བ་ཡི། འཕྲེང་བ་རབ་གསལ་ཆགས་པ་བཞིན།
མཛེས་སྡུག་རབ་ཏུ་དཀྲིགས་གྱུར་པ། དོ་ཤལ་གསར་པའི་རྒྱན་དག་ནི། 78

ཤིན་ཏུ་ཆེ་བས་མཚན་མོའི་དཔལ། ཟླ་བ་དཀར་བ་སྒྲོགས་པ་བཞིན།
རྣ་རྒྱན་རིན་ཆེན་འོད་ཟེར་གྱིས། ཚོགས་ཀྱི་འགྲམ་པ་དག་ལ་ནི། 79

རོལ་བའི་པ་ཏྲ་འབྲི་ཤིང་སླར། ཆུ་ཡི་དག་པ་བྲི་བ་བཞིན།
དཔྲལ་བའི་རྒྱན་དུ་གྲོགས་མོ་ཡི། གླ་རྩིའི་རི་མོ་འབྲི་བྱེད་པ། 80

བསིལ་ཟེར་ཟླ་མ་ལྡན་པ་ཡིས། སྐྱེངས་པ་ཞི་བར་བྱེད་པ་བཞིན།
དེ་མཐོང་ཡ་མཚན་འབེབས་བ་ཡི། ཞགས་པས་ཡིད་ནི་དྲངས་གྱུར་པ། 81

རྔོན་པས་འཕྲུལ་ལ་ཞགས་པ་ནི། དོན་ཡོད་ཅེས་པ་ལེགས་པར་བསྟུར།
དེ་ནས་ལག་ན་ཞགས་པ་དེས། མཐོང་ནས་འཕྲུལ་ལ་རབ་སྐྲག་ཅིང་། 82

གཡོ་བ་རི་དྭགས་མིག་ཅན་མ། མི་འམ་ཅི་ནོམས་མགྲོ་རིས་སོང་།
དེ་ཡི་ནུར་བར་ལག་པ་ཡིས། ཞགས་པ་འཕངས་པས་ཡིད་འཕྲོག་མ། 83

སྐྲག་པའི་མིག་དང་ལྡན་པ་བཟུང་། རི་དྭགས་མོ་ནི་རྔོན་པས་བཞིན།
དེ་ཡིས་དབང་མེད་ཞགས་པས་དྲངས། སྐད་ཅིག་བསྒྲུལ་བས་མིག་ཟུམ་ཞིང་། 84

སྡུག་བསྔལ་གནས་སྐབས་བསྟེན་པ་དེར། འདི་ཅི་ཞེས་པ་ཤེས་མ་གྱུར།
ཁྱུ་ཉམས་རི་དྭགས་མོ་བཞིན་དུ། རང་གི་སྐྱེ་བོ་ལྷ་བསམ་པས། 85

मेखलाबन्धसन्नद्धदिव्याम्बरमनोरमाम् ।
जलकेलिकलासिक्तस्फुरत्फेनावलीमिव ॥ ७८ ॥

लावण्यप्रसृतेनेव प्रवाहेन महीयसा ।
हरन्तीं तारहारेण शशिशुभ्रनिशाश्रियम् ॥ ७९ ॥

कलयन्तीं जलोल्लीढ़ां लीलापचलतां पुनः ।
कर्णाभरणरत्नांशुकर्णोत्पलकपोलयोः ॥ ८० ॥

कस्तूरीलेखया सख्या लिख्यमानललाटिकाम् ।
कलङ्ककलनाक्लैव्यं शमयन्तीं हिमत्विषः ॥ ८१ ॥

तां दृष्ट्वा विस्मयावेशपाशेनाकृष्टमानसः ।
चक्रे पाशममोघाख्यं सज्जं सपदि लुब्धकः ॥ ८२ ॥

ततः सन्त्रासतरलाः सहसा हरिणेक्षणाः ।
किन्नर्यो दिवमुत्पेतुः पाशहस्तं विलोक्य तम् ॥ ८३ ॥

लघुहस्ततया क्षिप्ता पाशञ्चकितलोचनाम् ।
मनोहरां स जग्राह हरिणीमिव लुब्धकः ॥ ८४ ॥

सा पाशविवशा तेन कृष्टा कष्टदशां श्रिता ।
किमेतदिति नाज्ञासीत् क्षणं मूर्च्छानिमीलिता ॥ ८५ ॥

ཕྱོགས་སུ་ནམ་པར་ལྟ་བྱེད་ཅིང་། ཀུན་སྨོངས་མ་དེས་དེ་ལ་སྨྲས།
ཐོང་ཞིག་ཐོང་ཞིག་བདེན་པར་བཅིངས། བདག་ལ་མ་རིག་ཡོངས་སུ་སྤྱངས། 86

ངེས་པར་སྤྱ་ངན་གྲིས་གཟིར་ལ། གདུག་པ་ནམས་ཀྱང་བརྩེ་ལྡན་ཡིན།
ཆགས་ལས་ལྷ་ཡི་བུ་མོ་ནི། མཆོག་མིན་གནས་ལ་སྤྱར་བ་ན། 87

འཕྲུལ་ལ་སྐྱབ་པ་པོ་ཉིད་སྤོག། རབ་ཏུ་འབར་བའི་རིག་པ་བཞིན།
བློ་ལྡན་བློ་ཡིས་ནམ་དཔྱད་ནས། འོས་པ་དག་ལ་བདག་སྐུལ་ན། 88

ཁྱོད་ལ་ངེས་པར་ཚོས་དང་ནི། ནོར་གྱི་ཆགས་ཆེན་འབྱུང་བར་འགྱུར།
ཞགས་པས་བསྡམས་པར་གདུང་བ་ནི། བདག་གིས་མི་བཟོད་བཅིངས་པ་ཐོང་། 89

གང་དུ་ཁྱོད་འགྲོ་མངོན་འདོད་པ། དེར་ནི་བདག་རང་ཉིད་ཀྱིས་འགྲོ།
བཅིངས་བ་བཏང་བར་གྱུར་ཀྱང་བདག། མཁའ་ལ་འཕུར་ནས་ཡོངས་མི་འགྲོ། 90

གང་གི་དབང་གིས་མཁའ་ལ་བདག། འགྲོ་བའི་གཙུག་གི་རིན་ཅན་བརྒྱང་།
ཞེས་དེས་མཆི་མ་དང་བཅས་སྨྲས། སྙིང་རྗེས་བརླན་བ་ཉིད་གྱུར་ངེས། 91

གཙུག་གི་ནོར་བུ་ཡང་དག་བླངས། ཞགས་པ་བཀྲོལ་ནས་དེ་ལ་སྨྲས།
དགེ་མ་དབུགས་ནི་དབྱུང་བར་མཛོད། སྐྱ་ངན་བྱ་བར་ཡོངས་མི་འོས། 92

ངེས་པར་འོས་པ་མིན་ལ་ཁྱོད། རང་གི་འདོད་པས་སྐུལ་མི་བགྱིད།
གང་གི་གྲགས་པ་བདུད་རྩི་ཡི། ཟེ་རླབས་ཀྱིས་ནི་ཕྱོགས་ཀུན་ཁེངས། 93

यूथभ्रष्टेव करिणी स्वजनालोकनाशया ।
निरीक्षमाणा ककुभः सा सम्भ्रान्ता तमभ्यधात् ॥ ८६ ॥

मुञ्च मुञ्च दृढ़ाक्षिप्तां मा स्प्राक्षीः परिरक्ष माम् ।
क्रूरा अपि भवन्त्येव शोकार्त्तेषु कृपालवः ॥ ८७ ॥

लोभादनुत्तमपदप्रयुक्ता दिव्यकन्यका ।
सद्यः प्रदीप्ता विद्येव निर्दहत्येव साधकम् ॥ ८८ ॥

मां विचार्य्य धिया धीमन्नुचिताय प्रयच्छतः ।
भविष्यति तवावश्यं महान् धर्म्मधनागमः ॥ ८९ ॥

पीड़ां पाशकृतामेतां न सहे मुञ्च बन्धनम् ।
स्वयं व्रजाम्यहं तत्र यत्र तेऽभिमता गतिः ॥ ९० ॥

दिवमुत्पत्य गच्छामि नत्वहं मुक्तबन्धना ।
यद्वशान्मे गतिर्व्योम्नि चूड़ारत्नं गृहाण तत् ॥ ९१ ॥

इत्युक्तः स तया सास्रं प्रयातः करुणार्द्रताम् ।
चूड़ामणिं समादाय पाशं मुक्ता जगाद ताम् ॥ ९२ ॥

समाश्वसिहि कल्याणि न शोकं कर्त्तुमर्हसि ।
न नामानुचिताय त्वां प्रयच्छामि निजेच्छया ॥ ९३ ॥

ཡོན་ཏན་རིན་ཅེན་རྒྱ་གཏེར་ཆེ། དཔལ་ལྡན་རྒྱལ་པོའི་སྲས་པོ་ཡོད།
དེ་ནི་རིག་པ་ཞལ་ལ་ཆགས། སྒྱུ་རྩལ་རྩེད་འཛོས་ཉམས་པར་བགྲིན། 94

རང་གི་རིགས་ཀྱི་ཁྱད་པར་ཅན། ལེགས་སྤྱོད་ནོར་བཟང་ཞེས་པའོ།
བདེ་དགའ་དག་གི་དཔལ་བཞིན་དུ། གཏོང་དང་ལོངས་སྤྱོད་སྐལ་བ་བཟང་། 95

ཉམས་འཕྲུལ་ས་ཡི་རྒྱན་གྱུར་དེ། སྨིན་ལེགས་ཁྱོད་ལ་ཡང་དག་འོས།
གང་གི་ས་ཡི་མཚན་མོའི་བདག། ལྷ་དང་དྲི་ཟ་མི་འམ་ཅི། 96

རིག་འཛིན་ཉམས་པར་རྩེན་ཉམས་ཀྱི། ཁེངས་པ་དག་ནི་ཐུང་དུར་བྱེད།
ཅེས་པ་དེ་ལ་དབུགས་ཕྱུང་ཞིང་། གཅིན་ཚོགས་བྲལ་བའི་ཡིད་འཕྲོག་མ། 97

ཀུ་ར་རི་བཞིན་ཤིན་དུ་ནི། སྙིང་རྗེ་རྗེ་སྐད་ཆེ་ངེ་བདོན།
སྐབས་དེར་འབིགས་བྱེད་ངོས་ལ་ནི། ཛོན་གྱི་རྩེད་མོའི་དགེ་མཚན་ལ། 98

འཕོངས་མཁས་ནོར་བཟང་སོང་གྱུར་པ། རིམ་གྱིས་གནས་དེར་འོངས་པར་གྱུར།
དེ་ཡི་ཤིང་རྟའི་སྒྲ་ཁྱད་སླུས། མི་བུའི་ཚོགས་ཀྱིས་གར་བྱས་ནས། 99

དུ་ཀུ་ལ་ཉིད་གཡོ་ཞིང་སྒོ། ནགས་ཀྱི་དཔལ་མོས་སྐད་ཅིག་ཐོབ།
དེ་ནི་རྟུལ་གྱི་རྒྱ་ཐིགས་དག། འགྲམ་པར་ཆགས་པས་རབ་མཛེས་པས། 100

ན་གྲུན་མཐའ་ན་རབ་མཛེས་པས། སྨུ་དིག་འབྲས་བུ་འཕོས་པ་བཞིན།
མདུན་དུ་སོ་ཡི་འོད་ཟེར་གྱིས། ཤིང་རྟའི་རྟ་རྨིག་གིས་བསྣུངས་པའི། 101

अस्ति राजसुतः श्रीमान् गुणरत्नमहोदधिः ।
पूरिताः ककुभः सर्व्वा येन कीर्त्यमृतोर्म्मिभिः ॥ ९४ ॥

स विद्याबन्धनादर्शः कलाकेलिविभूषणः ।
सुवृत्तः सुधनो नाम निजवंशविशेषकः ॥ ९५ ॥

स ते समुचितः सुभ्रु विभ्रमाभरणं भुवः ।
त्यागोपभोगसुभगः सुखोत्सव इव श्रियः ॥ ९६ ॥

सुरकिन्नरगन्धर्व्वविद्याधरविलासिनाम् ।
यः खर्व्वीकुरुते गर्व्वमुर्व्वराशर्व्वरीपतिः ॥ ९७ ॥

इति तेन कृताश्वासा बन्धुवर्गवियोगिनी ।
कुररीवातिकरुणं विललाप मनोहरा ॥ ९८ ॥

अत्रान्तरे विन्ध्यतटीं मृगयाकेलिकौतुकी ।
प्रस्थितः सुधनो धन्वी शनैस्तं देशमाययौ ॥ ९९ ॥

रथनेमिस्वनैस्तस्य प्रनृत्यच्छिखिमण्डली ।
वनलक्ष्म्याः क्षणं लेभे लोलनीलदुकूलताम् ॥ १०० ॥

स कपोलप्रणयिभिर्बभौ स्वेदोदबिन्दुभिः ।
सङ्क्रान्तैः कुण्डलप्रान्तकान्तमुक्ताफलैरिव ॥ १०१ ॥

རྡོལ་གྱི་ཚོགས་ཉམས་འཕྲོག་པ་བཞིན། ཁ་ལོ་པ་ལ་དེས་སྨྲས་པ།
ཀྱི་མ་ཡིད་ཀྱི་ཤིང་རྟས་བཞིན། ཤིང་རྟ་རླུང་ལྟར་མགྱོགས་པ་ཡིས། 102

རང་སྐྱེ་རིང་དུ་བཏང་ནས་ནི། ཇི་སྙིད་ས་གཞི་འདས་པར་གྱུར།
བྱང་ཆུབ་ཤིང་གི་ཡལ་འདབ་ནི། རླུང་གཞོན་གྱིས་བསྐྱོད་གཡོ་ལྡན་པ། 103

ས་འདིས་གྱོན་ནི་ལྗང་ཀུ་ཡིས། ལྗང་པའི་མཛེས་པ་ཉིད་དག་འཕྲོག།
འབྲི་ཤིང་གསར་པ་བྱི་རུའི་མཆུ། མི་རྟོག་ཕུན་བུའི་ཉུ་མ་གྱིས། 104

སྐྱེ་མ་རླུང་གིས་དཀྲུགས་འདི་དག། སྤྱིད་ལྡན་བཞིན་དུ་གླལ་བར་བྱེད།
མ་ར་ཀ་ཏ་ལྟར་ལྗང་བའི། ཙ་སྔོན་ཚོགས་ཀྱི་སྟོད་ཀོར་ཅན། 105

མི་རྟོག་རྡོལ་གྱིས་སྨྲས་པ་ཡི། ནགས་འཕྲེང་འདི་དག་རབ་ཏུ་མཛེས།
སྐྲག་ནས་བྲོས་པའི་རི་དྭགས་མོ། འདི་དག་མགྲིན་པ་འཁྱོག་པོ་ཡིས། 106
གཡོ་ཞིང་བལྟ་བས་ཨུཏྤལ་ནི། སྔོན་པོའི་ནགས་ཚལ་སྤྲོ་བ་བཞིན། 107

སོ་ནི་མཚན་མོར་བྱེད་པའི་ཆ་ཡི་ཀླུ་གུ་ལྟར་མཛེས་ཤིང་།
ལུམ་པ་རི་ཁྲོད་མ་བདག་མཛའ་མོའི་ཉམ་དག་དང་མཚུངས།
རྒྱ་ནས་ཀྱི་སྨྲས་བཅོས་ནམ་པར་གཡོ་བའི་ན་ལྕགས་སོ་ལྡན་གྱི།
ལྷག་ག་འདི་དག་ཀུན་ནས་བདག་གི་ཤིང་རྟ་དག་ལ་བལྟ། 108

स्यन्दनाश्वखुरोद्भूतं दन्तदीधितिभिः पुरः।
हरन्निव रजःपुञ्जं व्याजहार स सारथिम्॥ १०२॥

अहो मनोरथेनेव रथेनानिलरंहसा।
दूरोज्झिता स्वसैन्येन कियती लङ्घिता क्षितिः॥ १०३॥

एता वालानिलोल्लासलोलपिप्पलपल्लवाः।
हरन्ति हरितच्छायां हरिणाभरणा भुवः॥ १०४॥

एता वालप्रवालोष्ठाः स्तवकस्तनवन्धुराः।
सोत्कण्ठा इव जृम्भन्ते मञ्जर्य्यः श्वसनाकुलाः॥ १०५॥

इमा मरकतश्यामशष्पसञ्चयकञ्चुकाः।
राजन्ते कौसुमरजोरञ्जिता वनराजयः॥ १०६॥

एता विवलितग्रीवा हरिण्यस्त्रासविद्रुताः।
नीलोत्पलवनानीव सृजन्ति तरलेक्षितैः॥ १०७॥

एते निशाकरकराङ्कुरकान्तदन्ताः
पल्लीपति[1]प्रणयिणीस्तनतुल्यकुम्भाः।
पश्यन्ति दन्तिशिशवः परितो रथं मे
नेमिस्वनापहृतचापललीनकर्णाः॥ १०८॥

---

१ W₂ पत्नीपति०।

ཤ་བ་རི་ཡི་ཁྱིད་སྐབས་ལས་འབྲི་མོ་བྱའི་འདབ་འཕྲེང་རོལ་པས་བསྐྱོད་པ་ཡི།
རྩེད་འཇོའི་རྣམ་འཕྲུལ་ཆ་ཡི་འཆིང་བ་རྣམས་ལ་ཆས་པར་གྱུར་པ་འབིགས་བྱེད་རླུང་།
དྲི་མེད་རྒྱ་ཀླུང་ནར་མ་དཱ་ངོགས་འཁྲི་ཤིང་གཡོ་ཞིང་རྣམ་པར་གྱིས་པ་ཡི།
མེ་ཏོག་སྦྲང་རྩིའི་དགའ་སྟོན་གྱིས་པས་རབ་བསྙོས་འདི་དག་སྨྱོས་པ་བཞིན་དུ་འཁྲུས། 109

ཞེས་པ་སྨྲ་བའི་མི་བདག་བུ། ནགས་ཀྱི་དཔལ་ལ་སྤྱོད་པ་ཡིས།
སྐྱེ་བོ་མེད་བར་མི་འཁམ་ཅིའི། སྐྱིང་རྫའི་སྒྲ་ཡིས་གང་བ་ཐོས། 110

ཐོས་ནས་དགེ་མཚན་གྱིས་དྲངས་ཏེ། རི་དང་ཉེ་བ་བརྩེ་བའི་གཏེར།
ཡོན་ཏན་དང་པའི་མེ་ལོང་དེ། སོང་བས་རི་དྭགས་མིག་དེ་མཐོང་། 111

མིག་རྒྱུར་བཅས་པས་རྟོན་པ་ལ། ཡོངས་སུ་བསྐྱབ་པ་ཞུ་བྱེད་ཅིང་།
ནགས་ཀྱི་ཟད་པའི་སྡུག་བསྔལ་དང་། ལྡན་པའི་ནགས་ཚལ་ལྷ་མོ་བཞིན། 112

རི་དྭགས་མཚན་པའི་དཔལ་མོ་ནི། རབ་བརྟགས་རི་དྭགས་རྟོན་པ་ཡིས།
དྲངས་པ་འཚོལ་དུ་འོངས་གྱུར་པ། ནགས་སུ་འཁྲུམས་ཞིང་སྐྱོ་བ་བཞིན། 113

དེ་མཐོང་ཞུལ་དུ་བྱུང་བའི་གཟུགས། ངོ་མཚར་བཅས་པས་ཡ་མཚན་ཏེ།
མངོན་པར་འདོད་པའི་རས་ལ་ནི། སྒྱུར་དུ་རི་མོ་བཀོད་བཞིན་གྱུར། 114

དེ་བསམས་ཀྱི་མ་འདི་ཡི་བཞིན། ལེགས་པར་འབྲི་ལ་མཛེས་པ་ནི།
རྣམ་པར་སྤྲུལ་བྱེད་གོམས་བྱས་བའི། བྱེད་པོ་རི་མོ་ཡོངས་སུ་སྨིན། 115

एते निर्म्मलनर्म्मदापरिसरव्याजृम्भिवल्लीवलत्-
पुष्पोद्दाममधूत्सवप्रणयिनः क्षीवा इवाघूर्णिताः।
सन्नद्धाः शवरीनितम्बविलसन्मायूरपत्त्रावली-
लीलान्दोलननर्म्मविभ्रमकलावन्ध्येषु विन्ध्यानिलाः॥ १०९॥

इति ब्रुवाणः कलयन् वनलक्ष्मीं नृपात्मजः।
शुश्राव निर्जनाकीर्णं किन्नर्य्याः करुणस्वनम्॥ ११०॥

श्रुत्वैव कौतुकाकृष्टस्तत्समीपं कृपानिधिः।
सोऽभ्येत्य सद्गुणादर्शस्तां ददर्श मृगीदृशम्॥ १११॥

याचमानां परित्राणं लुब्धकं साश्रुलोचनाम्।
वनेचरभयोद्विग्नामिव काननदेवताम्॥ ११२॥

अन्वेष्टुं लुब्धकाकृष्टं स्वमङ्कमृगमागताम्।
खिन्नामिव वनभ्रान्त्या लक्ष्मीं हरिणलक्ष्मणः॥ ११३॥

तां विलोक्य स साश्चर्य्यरूपातिशयविस्मितः।
अभिलाषपटे क्षिप्रं चित्रन्यस्त इवाभवत्॥ ११४॥

सोऽचिन्तयदहो रम्यनिर्म्माणाभ्यासकारिणः।
अस्मिन्मुखसमुल्लेखे रेखापरिणतिर्विधेः॥ ११५॥

གདེངས་ཅན་གནས་ན་རྙེད་པར་དཀའ། མི་ཡི་ཡུལ་ན་གདམ་ཉིད་ཅི།
མཛེས་སྡུག་ཀྱི་འདི་མཐོ་རིས་སྤུའང་། གསར་དུ་མགྲོན་པར་འབྲུངས་སམ་སྙམ། 116

གཞོན་ནུ་མ་ཉིད་དར་ལ་བབ་པས་འཕྲུངས་པས་ལུས་མེད་དང་བཅས་སྒེག་ལྡན་ཞིང་།
ལུས་ཕྲ་མཆིན་ལྟུག་གསར་དུ་བསྐྱེད་བྱས་ཡན་ལག་ཀུན་འགྲོགས་གྲོགས་ཅན་གང་གིས་ནི།
འབད་མེད་པ་རོལ་གཞོན་ལ་ཤིན་ཏུ་ཀྱི་ཆེར་རྩོམ་པའི་མདོན་སྦྱོར་དང་བྲལ་བར།
འགྲོ་བའི་རྒྱལ་སྲིད་ཆོ་ལ་རྩེ་དགའི་མཚོན་དང་ལྡན་པའི་ལྷ་ནི་ཉམས་པར་གྱུར། 117

དེ་ལྟར་ཡ་མཚན་སྙིང་པོ་ཅན། མངོན་པར་འདོད་ལྡན་མིག་གི་ནི།
དེ་འཕྲུངས་མཚུངས་ལ་མངོན་ཕྱོགས་དེ། ཕྱག་འཚལ་ཇོན་བས་རབ་སྨྲས་པ། 118

མི་འམ་ཅི་རྒྱལ་རིགས་ཀྱི་ན། དཔག་བསམ་ལྗོན་པ་ལྗོན་པ་ཡི།
བུ་མོ་ཡིད་དུ་འོང་མ་འདི། ལྷ་གཅིག་བདག་གི་ཞགས་བས་བྲངས། 119

ཁྱོད་སྐད་སྙངས་པའི་གཞོན་ནུ་མ། མཆོག་འདི་རབ་ཏུ་གཟུང་བར་མཛོད།
ཡོན་ཏན་ཀྱི་ཆེ་ཁྱོད་ཉིད་ནི། ས་གཞི་འདི་ཡི་བདག་ཏུ་འོས། 120

འདི་ཡི་གཙུག་གི་ནོར་བུ་འདི། རང་འདོད་འགྲོ་སྟེར་བདག་གིས་ནི།
བཟུང་སྟེ་དེ་དང་བྲལ་བས་ནི། ནམ་མཁའ་དག་ལ་འགྲོ་བ་མེད། 121

ནོར་བུ་འདི་ནི་བསྲུང་བྱ་སྟེ། འདི་བྱིན་འདི་དང་བྲད་པ་མེད།
བུ་མོ་རིན་ཆེན་རིན་ཆེན་ཡང་། དེ་བཞེད་དེ་ལ་ཇོན་པས་བྱིན། 122

दुर्लभा भोगिभवने मर्त्यलोके कथैव का ।
मन्ये लावण्यमुद्रेयं स्वर्गेऽप्यभिनवोदिता ॥ ११६ ॥

तारुण्येन निपीतशैशवतया सानङ्गशृङ्गारिणी
तन्वङ्ग्याः सकलाङ्गसङ्गमसखी भङ्गिर्नवाङ्गीकृता ।
निःसंरम्भपराक्रमः पृथुतरारम्भाभियोगं विना
साम्राज्ये जगतां यया विजयते देवो विलासायुधः ॥११७॥

इति विस्मयगर्भेण साभिलाषेण चक्षुषा ।
तां पिबन्तमिवाभ्येत्य प्रणम्य प्राह लुब्धकः ॥ ११८ ॥

कुलकल्पद्रुमस्येयं द्रुमस्य दयिता सुता ।
देव किन्नरराजस्य पाशेनापहृता मया ॥ ११९ ॥

आनीता त्वत्कृते दिव्यकन्यैषा प्रतिगृह्यताम् ।
त्वमेवास्या गुणोदार भर्ता भुव इवोचितः ॥ १२० ॥

अस्याश्चूडामणिरयं मया स्वेच्छागतिप्रदः ।
गृहीतस्तद्विरहिता नेयं याति विहायसा ॥ १२१ ॥

रक्ष्यो मणिरयं नास्ति दत्तोऽस्मिन् सङ्गमोऽनया ।
इत्युक्त्वास्मै ददौ कन्यारत्नं रत्नञ्च लुब्धकः ॥ १२२ ॥

ས་ཡི་རི་དྭགས་མཚན་མ་དེ། རྒྱལ་པོའི་བུ་ཡིས་བླངས་པ་ན།
བདུད་རྩིས་བྲན་བཞིན་རང་ཡུལ་དང་། བྲལ་བའི་མེ་ནི་བཏང་བར་གྱུར། 123

འདོད་ལྡན་མིག་གིས་གཡོ་བ་ཡི། རི་དྭགས་གཞོན་ནུ་མ་འདྲ་དེ།
རྔོན་པས་བཏང་ནས་ཡིད་ཀྱིས་ནི། ཆགས་པའི་རྒྱི་ཡིས་བཅིངས་པར་གྱུར། 124

མི་འམ་ཅི་མོ་ཤིང་རྟར་བཀོད། རྔོན་པ་རིན་ཆེན་རྣམས་ཀྱིས་བཀང་།
དགའ་བ་སྐྱེས་པའི་ས་བདག་སྲས། རང་གི་གྲོང་ཁྱེར་དག་ཏུ་སོང་། 125

ཧ་སྟི་ན་ཡི་གྲོང་ཁྱེར་དེ། རང་གི་གནས་ནི་ཕ་ལ་བ་ཤད།
དགའ་བས་ཡ་མཚན་གྱུར་པ་དེས། བག་མ་ཡི་ནི་དགའ་སྟོན་བསྒྲུབས། 126

གཟུགས་ཅན་རི་བོང་ཅན་གྱི་དཔལ། དགེ་བས་སྤྲུད་བྲུར་གྱུར་པ་བཞིན།
མི་འམ་ཅི་ཡི་བུ་མོ་ནི། ཕོ་བྲང་འཁོར་དུ་གནས་པར་བྱས། 127

མཚོ་ཡི་སྦྲང་རྩིར་ཆགས་ལྡན་པ། སྦྲང་རྩི་འཐུངས་པས་བཞིན་དུ་རེས།
རིག་པས་བཞིན་གྱི་ཆུ་སྐྱེས་ནི། དུད་ཅིང་པདྨོ་ཅན་དེ་འདར། 128

སྨྲ་བ་བཅད་ཀྱང་སྤྲིད་པ་འཆང་། གཡོ་བ་མེད་ཀྱང་ཡང་ཡང་འདར།
སྐྱེངས་པར་གྱུར་ཀྱང་དཔལ་མདངས་གསལ། དེ་ཡི་དགའ་བ་དེ་ཡིས་བསྒྲུབས།
129

དལ་གྱིས་མཚོ་ཡི་རོ་མྱངས་ཞིང་། སོ་ཡི་འཛེགས་པ་བྱིན་ནས་ནི།
ཆུ་སྐྱེས་རྒྱས་པའི་མིག་ཅན་དེའི། སྨྲ་བ་བཅད་རྒྱུན་དེ་ཡིས་བྲལ། 130

गृहीता राजपुत्रेण सा महीमृगलक्षणा ।
सुधासिक्तेव तत्याज स्वदेशविरहानलम् ॥ १२३ ॥

उत्कण्ठालोकनालोलां तां बालहरिणीमिव ।
ववन्ध लुब्धकत्यक्तां रागवागुरया स्मरः ॥ १२४ ॥

किन्नरीं रथमारोप्य रत्नैरापूर्य्य लुब्धकम् ।
हर्षपूर्णः स्वनगरं प्रतस्थे पार्थिवात्मजः ॥ १२५ ॥

स हस्तिनापुरं प्राप्य निवेद्य स्वकथां पितुः ।
हर्षाद्विस्मयिना तेन विवाहे विहितोत्सवः ॥ १२६ ॥

सुकृतैर्भोग्यतां यातां मूर्त्तामिव शशिश्रियम् ।
अन्तःपुरप्रणयिनीं चक्रे किन्नरकन्यकाम् ॥ १२७ ॥

दधता मधुपेनेव तेनाधरमधुस्पृहाम् ।
स्पृष्टा नतमुखाम्भोजा चकम्पे नलिनीव सा ॥ १२८ ॥

मौनेऽपि कथितोत्कण्ठा मुहुः कम्पेऽपि निश्चला ।
वैलक्ष्येऽपि स्फुटल्लक्ष्मीस्तस्य प्रीतिं ततान सा ॥ १२९ ॥

स शनैरधरास्वादे दत्वा दन्तविभीषिकाम् ।
निमीलितदृशस्तस्या मौनमुद्रामवारयत् ॥ १३० ॥

གོས་མདུད་འགྲོལ་དང་དགག་པ་ལ། ཁྲོ་ཤུག་ལག་པའི་པདྨ་དག།
རབ་ཏུ་འདར་ལྡན་གདུབ་བུའི་སྒྲ། སྟོད་པ་བྱེད་པར་གྱུར་པ་བཞིན། 131

རྩེ་དགའ་འཛུམ་གྱི་མི་རྟོག་གྱིས། མཛེས་མའི་ནུ་མའི་འབྲས་བུ་མཚན།
ཆགས་བཅས་ཡལ་འདབ་ལྡན་པ་དེའི། ཡོངས་སྐྱོད་ཀང་འཕུང་སྤྱད་བྱར་གྱུར། 132

གནས་སྐབས་དེར་ནི་ལྷོ་ཕྱོགས་པ། བྲམ་ཟེ་སེར་སྐྱ་ཕུཥྐ་ར་གཉིས།
རྒྱལ་པོ་ནོར་གྱི་མདུན་སར་ནི། འཚོ་བ་འདོད་པས་འོངས་པར་གྱུར། 133

རིག་པ་ཕུལ་བྱུང་བ་སྔགས་འོས་པ། དེ་དག་མདུན་ན་འདོན་གཉིས་ཐོབ།
སེར་སྐྱ་དག་ནི་ས་སྐྱོང་གི། རྒྱལ་པོའི་བུ་ཡིས་གཞན་པའོ། 134

དེ་དག་རིག་པས་བཅིངས་པ་ཡིས། རྟག་ཏུ་ཉམ་པར་སྟོད་བྱེད་ཅིང་།
རྗེས་གཅིག་མངོན་པར་འདོད་པ་ཡིས། ཉམ་པར་སྣང་བ་ཡང་དག་སྐྱེས། 135

སླང་པོ་ལ་འོས་སྨན་བྱེད་པ། དེ་དག་གདོང་གི་རིག་པ་ནི།
ཚང་གི་རི་མོ་ལྟ་བུ་དག། ཞེ་སྡང་སྐྱོན་གྱིས་ཉམས་པར་བསྒྲུབས། 136

གང་གིས་རིག་པ་མར་མེའི་རྩེ་མོ་དངོས་པོ་ཉམ་འབྱེད་ཡོན་ཏན་དག་གི་གྲོགས།
འཇིག་རྟེན་རབ་ཏུ་གསལ་ལ་མངོན་ཕྱོགས་མདུན་དུ་ཞེ་སྡང་སྨུན་པ་མི་བཟད་བྱེད།
སྨོངས་པས་ཉེར་བཅོམ་རྟོག་སྤྱོད་དང་བྲལ་གཞུང་བཟང་རྩུང་མའི་དགྲ་པོ་དེ་དག་ཉམས།
ཅན་དན་ཟླ་བ་རྒྱ་ཤེལ་བརྙ་ཁ་བ་ལས་འབྱུངས་མེ་ཡིས་སྲེག་པར་བྱེད། 137

नीवीमोक्षे निषेधे च दम्पत्योः पाणिपद्मयोः ।
विवाद इव सोत्कम्पं कङ्कणस्वनयोरभूत् ॥ १३१ ॥

स रागपल्लवस्तस्य विलासस्मितपुष्पितः ।
कान्ताकुचफलाङ्कोऽभूत् भोग्यः सम्भोगपादपः ॥ १३२ ॥

अत्रान्तरे दाक्षिणात्यौ विप्रौ कपिलपुष्करौ ।
आजग्मतुर्वृत्तिकामौ धनस्य नृपतेः सभाम् ॥ १३३ ॥

तौ विद्यातिशयश्लाघ्यौ पौरोहित्यमवापतुः ।
कपिलः क्षितिपालस्य राजपुत्रस्य चापरः ॥ १३४ ॥

तयोः स्पर्द्धानुबन्धेन सदा विवदमानयोः ।
एकद्रव्याभिलाषेण विद्वेषः समजायत ॥ १३५ ॥

द्वेषदोषेण मातङ्गयोरुग्रनिर्घातयोस्तयोः ।
विदधे मदलेखेव विद्या मलिनतां मुखे ॥ १३६ ॥

येषां वस्तुविवेकिनां गुणसखी लोकप्रकाशोन्मुखी
विद्यादीपशिखा करोति विषमं द्वेषान्धकारं पुरः ।
ते मोहोपहता विचाररहिताः सौजन्यजन्याहिताः
दग्धाश्चन्दनचन्द्रकान्तकमलस्यन्दोद्गतेनाग्निना ॥ १३७ ॥

ཐོས་དང་དྲན་དང་རྩོད་ཉམས་ལ། གནས་དང་གནས་སུ་སུཀྲྀ་ར་གྱིས།
ངེས་པར་ཚར་བཅད་སེར་སྐྱ་ཡིས། ཁྲོ་བའི་གདུང་བས་ཡོངས་སུ་བསམས། 138

རྣོ་ཞིང་བརྟན་པར་གོམས་གྱུར་པ། མི་བཟད་གྱོགས་ཤིང་འཆར་བ་འདེབས།
རྟག་ཏུ་གོམས་བས་ཞན་པ་བདག། མདུན་ས་དག་ཏུ་སྐྱེངས་པར་བྱེད། 139

ཤེས་རབ་སྐྱ་བྱེད་ཚུལ་དང་ནི། ཐོས་པ་དྲེགས་པའི་རིམ་དག་དང་།
ནོར་ནི་ཆོས་དག་འགོག་པའི་སྐད། མ་རབས་སེམས་ལྡན་ཉམས་ལ་འགྱུར། 140

དྲེགས་ལྡན་འདི་ཡི་རྒྱལ་སྲས་ལ། བརྟེན་ནས་བདག་ནི་ཡོངས་སུ་འཇོམས།
དེ་སྐད་འདི་ཡིས་རྟེན་ཉིད་ལ། དཔལ་གྱི་ཙ་བ་བདག་གིས་གཞོམ། 141

རིགས་པའི་ཐབས་ནི་འབའ་ཞིག་གིས། རྒྱལ་པོའི་སྲས་ནི་དགུམ་པ་ལ།
བདག་ནི་འབད་པ་བྱ་བར་འོས། ཁེངས་པ་ཉམས་པ་ཇི་ལྟར་བཟོད། 142

དེ་ལྟར་དྲག་པོའི་སྡིག་བརྟགས་པ། དེ་ལ་སྣང་བས་ཡང་དག་སྦྱར།
ཐག་རོག་གིས་གང་མི་བྱེད་པའི། སྡིག་དེ་འཇིག་རྟེན་ན་ཡོད་མིན། 143

གང་གིས་མི་བཟད་ཁྲོ་བ་ཡི། དགུ་གི་མིག་སྔན་མིག་ཏུ་བཏབ།
རྟག་ཏུ་བསམས་པ་འཁྲུགས་པ་དེས། ལེགས་པའི་ལམ་ནི་ཇི་ལྟར་མཐོང་། 144

འདོད་ཆགས་མཆོག་ཏུ་སྡིག་ཅིང་དེ་ལས་ཀྱང་ནི་ལྷག་པར་དྲེགས་པ་སྡིག།
ཁྲོ་ལས་སྡིག་གཞན་འགྲོ་བ་ན་མེད་བཟོད་དཀའི་སྡིག་པ་ཆགས་པའོ།
གདུང་བ་དང་ལྡན་འགྲོ་ན་སྡིག་པའི་ཚོགས་ནི་ཇི་སྙེད་བགྲངས་གྱུར་བ།
དེས་ཀྱང་ནམ་པར་སྣང་བས་བསྐྱུན་པའི་སྡིག་པའི་ཆ་ལ་མཚུངས་རིག་མིན། 145

श्रुतिस्मृतिविवादेषु पुष्करेण पदे पदे ।
निगृह्यमाणः कपिलः कोपतापादचिन्तयत् ॥ १३८ ॥

मन्दाभ्यासं दृढाभ्यासस्तीक्ष्णस्तीव्रमदोद्धतः ।
सदा संसदि मामेव नयत्येष विलक्षताम् ॥ १३९ ॥

प्रज्ञा वञ्चकवृत्ताय श्रुतं दर्पज्वराय च ।
धनं धर्म्मनिषेधाय भवत्यधमचेतसाम् ॥ १४० ॥

दृप्तः परिभवत्येष राजपुत्राश्रयेण माम् ।
तस्मादाश्रयमेवास्य श्रीमूलं प्रहराम्यहम् ॥ १४१ ॥

निधने राजपुत्रस्य युक्त्युपायेन केनचित् ।
युक्तः कर्त्तुं प्रयत्नो मे मानम्लानिं कथं सहे ॥ १४२ ॥

इत्युग्रपापसङ्कल्पस्तस्य द्वेषात् समुद्ययौ ।
नास्ति तत्पातकं लोके यन्न कुर्व्वन्ति मत्सराः ॥ १४३ ॥

कथं पश्यति सद्धर्म्मं समदो व्यथिताश्रयः ।
दत्तं नयनयोर्येन तीव्रामर्षविषाञ्जनम् ॥ १४४ ॥

रागः पापं परममधिकं दर्पपापं ततोऽपि
क्रोधात् पापं जगति न परं दुःसहं लोभपापम् ।
यावानेष व्यसनिनि जने गण्यते पापवर्गः
पापांशस्य स्पृशति न तुलां सोऽपि विद्वेषहृतेः ॥ १४५ ॥

དེ་ནས་ནམ་ཞིག་སྨིན་ཞེས་པའི། གདུག་ཅིང་ཀར་པ་ཊར་གནས་པ།
གནོད་པ་བྱེད་པའི་རྒྱལ་ཕྲན་གྱིས། དཔུང་རྣམས་སྤྲིངས་པས་གསོད་པ་དག། 146

ཐོས་ནས་མི་བདག་ཁྲོས་པ་ཡིས། ཐབས་ནི་བཞི་པར་ངེས་བྱས་དེ།
བློན་པོ་རྣམས་ཀྱི་འདོད་པ་ཡིས། གཞོན་ནུ་ལ་ནི་འདི་དག་སྨྲས། 147

གཞོན་ནུ་སྟོབས་ཀྱིས་དགྲ་དག་ནི། མྱུར་དུ་གཅོད་དུ་འགྲོ་བར་གྱིས།
ཁྱོད་ཀྱིས་རིམ་འོངས་རྒྱལ་སྲིད་ཆེའི། འདི་ནི་ཟུག་རྔུ་མེད་པར་འགྱུར། 148

གཡུལ་གྱི་རྩོམ་པར་ཁྱོད་ཀྱི་ནི། དཔུང་བ་མཐུ་ཡིས་བརྒྱན་པ་འདི།
འགྲོ་བར་རྒྱལ་བའི་གླང་པོ་དག། འདོགས་པའི་ཀ་བ་ཉིད་དུ་འགྱུར། 149

ས་འཛིན་རིགས་ནི་ནོན་པའི་སྲིན། ཕྱུག་ཅིང་ལྷག་པར་རྒྱས་པ་དག།
བཅོམ་ན་ཁྱོད་ཀྱི་གཟི་བྱིན་གྱི། ཕྱོགས་སུ་སྒྲིབ་པའི་བགེགས་མེད་འགྱུར། 150

སྟོབས་མེད་མཐའ་ན་གནས་པ་ཡི། རྒྱལ་ཕྲན་གཞན་ནི་བསད་པས་ཅི།
དྲེགས་ལྡན་དེ་ཉིད་གཞོམ་པར་བྱ། དེ་བསད་ན་ནི་ཐམས་ཅད་འགྲུབ། 151

གང་ཞིག་ཆ་ཡི་རང་བྲམ་ཉིད་དུ་ནོམ་པར་བསྐྱབས་པ་ཡི།
གླང་ཆེན་ཚོགས་ནི་འཕྲོག་བྱེད་ཀྱིས་བཅོམ་དགེ་མཚན་ཅི་ཞིག་ཡོད།
གལ་ཏེ་སྡེར་མོའི་གད་སྒྲོངས་ལྡན་པའི་གདོང་ལྔ་མདོན་བཅོམ་ན།
དེ་ནི་དེ་ཡི་སྐྱེས་བུ་རྟུལ་ཕོད་གཏམ་གྱི་ལམ་དུ་འགྱུར། 152

ततः कदाचिन्मेघाख्यं क्रूरं कर्व्वटवासिनम्।
विसृष्टसैन्यहन्तारं सामन्तमपकारिणम्॥ १४६॥

श्रुत्वा नरपतिः कोपाच्चतुर्थोपायनिश्चये।
अमात्यानामनुमते कुमारमिदमब्रवीत्॥ १४७॥

कुमार गम्यतां तूर्णमुच्छेत्तुं तरसा रिपुम्।
क्रमोपपन्नं साम्राज्यं निःशल्यमिदमस्तु ते॥ १४८॥

अयं ते समरारम्भे प्रभावाभरणो भुजः।
आलानस्तम्भतां यातु जगद्विजयदन्तिनः॥ १४९॥

मेघे भूभृत्कुलाक्रान्तसंरम्भाभ्यधिकोदये।
हते तव प्रतापस्य निर्व्विघ्नावरणा दिशः॥ १५०॥

दुर्व्वलैः किं हतैरन्यैः सामन्तैरन्तवासिभिः।
हतः स एव हन्तव्यस्तद्वधे सर्व्वसिद्धयः॥ १५१॥

किं कौतुकं यदि हरिः करिचक्रवाल
माहन्ति दैवविहितं निजमेव भोज्यम्।
पञ्चाननं यदि भिनत्ति नखाट्टहासं
तत्तस्य पौरुषकथापथमेति शौर्य्यम्॥ १५२॥

ཞེས་པ་ཕ་ཡིས་བསྟན་པ་ན། གཡུལ་གྱི་དཀའ་སྤྱོད་འདོད་པ་དང་།
མི་འམ་ཅི་འབར་གཡོ་བས་དེ། སྐད་ཅིག་ཁྲོགས་ལ་འཕྱུང་བཞིན་གྱུར། 153

ཡུན་རིང་འགྲོ་བ་མིན་བརྗོད་པས། འབད་པས་རྒྱང་མ་དབྱུགས་ཕྱུང་ནས།
དེ་ཡི་མ་ལ་མངོན་ཕྱོགས་ཏེ། ཕྱག་གྲུས་དལ་གྱིས་རབ་སྨྲས་པ། 154

མི་འམ་ཅི་དབང་བརྒྱ་བྱིན་དུ། བདེག་བུའི་བུ་མོ་ཁྱིངས་ལྡན་མ།
ཁྱོད་ཀྱི་བདག་ལ་བྱམས་པའི་བློས། འབྲལ་བའི་མྱ་ངན་གྱིས་གཟིར་སྐྱོངས། 155

འདི་ཡི་གཙུག་གི་ནོར་བུ་ནི། རང་འདོད་འགྲོ་བ་སྟེར་འདི་དག།
སྒྲིག་ལ་ཐེ་ཚོམ་མ་གཏོགས་པ། མ་མ་ཀུན་དུ་སྦྱིན་ནི་བྱ། 156

ཞེས་བརྗོད་མ་ཡི་ལག་ཏུ་ནི། མཛེས་མ་མཛེས་མའི་གཙུག་གི་ནོར།
གཏང་ནས་དབྱུང་གི་ཕྱོགས་ཀྱི་སྒོ། སྒྲིབ་ཅིང་དེ་ནི་མྱུར་དུ་སོང་། 157

དེ་ཡི་དྲི་ཚོགས་ཀྱིས་བསླང་བ། རྩོལ་ཚུབ་སྤྲིན་ལྟར་གྱུར་པ་ཡིས།
དང་བའི་རྒྱལ་པོ་སྐག་པ་དང་། ཉོན་མོངས་རྒྱུ་ཉིད་དག་ཏུ་གྱུར། 158

ཁྲོ་ནི་རིང་དུ་སོང་བ་ན། འབྲལ་བ་ཡིས་ནི་ཡིད་འཁྲོག་མ།
པདྨ་གཞོན་ནུའི་འདབ་མ་ཡིས། མལ་སྟན་ལ་ནི་བཏིང་བར་གྱུར། 159

སྲིད་ལྡན་ཉིན་བར་བཀྲང་བའི་རྩོམ་པ་དག་ལ་རྟག་ཏུ་མངོན་སྤྱོར་ཞིང་།
གྲངས་ཀྱི་རི་མོའི་ལམ་ནི་ས་ལ་འདར་ཞིང་གཡོ་བས་འབྲི་བྱེད་པ།
དེ་ཡི་ལག་པ་ཕྲ་བ་ཉིད་ཀྱིས་སྐྲ་ལྡན་གདུབ་བུ་ལྷུང་བ་ལ།
མའི་མའི་རྒྱན་གྱི་སྨུ་ཏིག་གདུབ་ཀོར་དག་ནི་མྱུར་དུ་གནས་པར་བྱས། 160

इति पित्रा समादिष्टः समीहितरणोत्सवः।
किन्नरीविरहालोलः सोऽभूद्दोलाकुलः क्षणम् ॥ १५३ ॥

अचिरागमनाख्यानैर्यत्नेनाश्वास्य वल्लभाम्।
जननीं स्वैरमभ्येत्य प्रणिपत्य जगाद सः ॥ १५४ ॥

दुहिता शक्रकल्पस्य किन्नरेन्द्रस्य मानिनी।
पाल्या विरहशोकार्त्ता मद्वात्सल्यधिया त्वया ॥ १५५ ॥

अस्याश्चूडामणिरयं रक्ष्यः स्वेच्छागतिप्रदः।
दातव्यः सर्व्वथा मातर्नान्यत्र प्राणसंशयात् ॥ १५६ ॥

इत्युक्त्वा जननीहस्ते कान्तं कान्ताशिखामणिम्।
निक्षिप्य स ययौ तूर्णं सैन्याच्छादितदिङ्मुखः ॥ १५७ ॥

तस्य वाजिव्रजोद्भूतरजःपुञ्जघनोदयः।
प्रययौ राजहंसानां सन्त्रासायासहेतुताम् ॥ १५८ ॥

दूरं प्रयाते दयिते विरहेण मनोहरा।
बभूव वालनलिनीपलाशशयनाश्रया ॥ १५९ ॥

सोत्कण्ठाया दिवसगणनारम्भनित्याभियोगे
संख्यालेखासरणिमवनौ कम्पलोलं लिखन्त्याः।
तस्याः पाणौ निपतितरणत्कङ्कणे तानवेन
क्षिप्रं मुक्तावलयकलनामश्रुधारा चकार ॥ १६० ॥

མི་རྟོག་མདའ་ཅན་ལ་སྣང་བདེ་ལ་ཕྱིར་ཕྱོགས་ལུས་ལའང་ཆགས་པ་ཉིད་མ་ཡིན།
བདག་པོའི་བསམ་གཏན་སྐྱོང་ཞིང་ཉིན་མཚན་དུ་ནི་དེ་ཡི་མིང་གི་གསང་སྔགས་བཟླས།
མ་ལ་སྟོན་ས་གཞིར་བྱས་དེ་དེ་ལྟ་ན་ཡང་གཟུགས་བཟང་གདུང་བ་ཉམས་མ་གྱུར།
འདོད་ཆགས་གཡོ་མེད་ཆགས་པའི་ཡིད་ཉོམས་བརྟུལ་ཞུགས་དྲག་པོས་གྲོལ་བ་མིན་ནམ་ཅི། 161

ཞལ་གྱི་ཁྲི་སྟོན་ལ་འདུག་ཅིང་། ཧ་རི་ཙན་དན་གྱིས་སྐྱ་བ།
གཟུགས་ཅན་མ་དེ་ཟླ་འོད་ཀྱི། དབུས་སོང་ཟླ་རིས་བཞིན་དུ་མཛེས། 162

དེ་ནས་ནམ་ཞིག་ས་སྐྱོང་ནི། མི་ལམ་མཐོང་ནས་དོགས་གྱུར་པས།
མདུན་ན་འདོན་ནི་སེར་སྐྱ་དག། ཡང་དག་བོས་ནས་དབེན་པར་དྲིས། 163

གྲོང་ཁྱེར་དགྲ་ཉོམས་ཀྱིས་བཀག་ཅིང་། བདག་གི་ལྟོ་བརྫོལ་རྒྱུ་མ་ནི།
དྲངས་ན་ཡོངས་སུ་དཀྲིས་པ་ཡིས། མི་ལམ་དེ་རིང་བདག་གིས་མཐོང་། 264

བློ་གྲོས་ཆེན་པོ་མི་ལམ་འདིའི། རྣམ་སྨིན་འབྲས་བུར་འོས་པ་གསུང་།
དགེ་བར་ཡོངས་སྒྱུར་འོས་པ་ཡིས། ཕྱིར་བཅོས་དག་ཀྱང་བསམས་པར་མཛོད། 165

ཅེས་བ་ས་ཡི་དབང་པོས་དྲིས། མདུན་ན་འདོན་གྱིས་སྐད་ཅིག་ནི།
གུས་བའི་ཚུལ་ཆོས་བསམ་གཏན་བཟུང་། ནང་དུ་མངོན་པར་འདོད་པ་བསམས། 166

ཀུཎྜར་ཡི་རྗེན་གཅད་སྐད། རྒྱལ་པོའི་བུ་ནི་ཉམས་པ་ལ།
ཤིན་ཏུ་ཡུན་རིང་བསམས་པའི་ཐབས། འདི་ནི་བདག་གིས་དཀའ་བས་ཐོབ། 167

द्वेषः पुष्पशरे सुखे विमुखता देहेऽपि निःस्नेहता
पत्यौ ध्यानपरायणत्वमनिशं तन्नाममन्त्रे जपः।
शय्या भूमितले तथापि सुतनोस्तापक्षतिर्नाभवत्
नूनं निश्चललीनरागमनसां मुक्तिर्न तीव्रव्रतैः॥ १६१॥

लीना स्फटिकपर्य्यङ्के हरिचन्दनपाण्डुरा।
चन्द्रलेखेव सा तन्वी ज्योत्स्नामध्यगता बभौ॥ १६२॥

कदाचिदथ भूपालः स्वप्नदर्शनशङ्कितः।
पुरोहितं समाहूय पप्रच्छ कपिलं रहः॥ १६३॥

दृष्टमद्य मया स्वप्ने निरुद्धं शत्रुभिः पुरम्।
पाटितोदरक्तैश्च ममान्त्रैः परिवेष्टितम्॥ १६४॥

स्वप्नस्यास्य विपाकार्हं फलं ब्रूहि महामते।
विचिन्तय शुभोदर्कामुचिताञ्च प्रतिक्रियाम्॥ १६५॥

इति पृष्टः क्षितीशेन क्षणमन्तः पुरोहितः।
भक्तिदम्भधृतध्यानः समीहितमचिन्तयत्॥ १६६॥

उपायोऽयं मया दिष्ट्या प्राप्तः सुचिरचिन्तितः।
पुष्करस्याश्रयोच्छित्त्यै राजपुत्रविनाशने॥ १६७॥

དེ་ཡི་ཆུང་མ་མི་འམ་ཅི། ཡིད་འཕྲོག་མ་མཆོག་འཚོ་བ་ཉིད།
དེ་དངོས་མེད་ན་ངེས་པར་ནི། སྡུག་ཅིང་བསྡུལ་བས་དེ་མི་འཚོ། 168

ཞེས་པ་བསམས་ནས་དཔལ་བུ་ཡིས། བརྩོན་གྱིས་སྐྱོར་དང་ཆགས་བྲལ་ཅན།
མདུན་ན་འདོན་ནི་མི་ཕན་པ། འཚོལ་བས་ནོར་འཛིན་དབང་ལ་སྨྲས། 169

ལྷ་གཅིག་ཁྱོད་ཀྱི་རྨི་ལམ་ན། མཆོག་ཏུ་སྙིང་ནི་འདར་བྱེད་འདི།
མཐོང་སྟེ་དེ་ཡི་འབྲས་བུ་ནི། བརྗོད་དཀའ་གསལ་བར་ཇི་ལྟར་བརྗོད། 170

རྗེ་ལ་གུས་པའི་བདུལ་ཞུགས་ཀྱིས། གནས་ཤིང་སྐྱོན་སྐྱུབ་བདག་ཉིད་མིན།
ཕན་པ་འཚོལ་རྣམས་རྣ་བར་ནི། མི་སྙན་བརྗོད་པ་དགག་པ་མེད། 171

རྨི་ལམ་འདི་འབྲས་གསལ་བར་ནི། རྒྱལ་སྲིད་དམ་ནི་ལུས་ལས་ཉམས།
འདི་ལ་དོགས་དང་བྲལ་བ་ཡིས། འགྱུར་པའི་སླད་དུ་ཕྱིར་བཅོས་བྱ། 172

མཆོད་སྦྱིན་ཞིང་དུ་རྫིང་བུ་ནི། ཕྱུགས་ཀྱི་ཁྲག་གིས་ཡོངས་གང་བར།
ཁྱོད་བཀྲུས་བྲམ་ཟེས་དག་བྱས་ཤིང་། གསེར་དང་རིན་ཅན་རབ་མང་སྦྱིན། 173

མི་འམ་ཅི་མོའི་ཚིལ་གྱིས་མེར། སྦྱིན་སྲེག་བྱས་པས་ཁྱོད་དགེ་འཐོབ།
ཁྱོད་ཀྱི་མཐའ་མ་ཡོ་བྲང་ན། ཡོད་པས་མི་འམ་ཅི་མི་དཀོན། 174

ཞེས་པ་དེ་ཚིག་མ་རུངས་པ། ཐོས་ནས་ཐིག་པས་རྨུས་བྱིན་ཅིང་།
གཏུམ་པོའི་སྤྱོད་པ་སྐྲག་གྱུར་པ། ས་ཡི་བདག་པོས་དེ་ལ་སྨྲས། 175

प्रिया मनोहरा ज्येष्ठं जीवितं तस्य किन्नरी।
अभावे नियतं तस्या न स जीवति दुःखितः॥ १६८॥

इति सञ्चिन्त्य शनकैर्मिथ्याखेदविषादवान्।
अभ्यधाद्वसुधाधीशमहितैषी पुरोहितः॥ १६९॥

दुःस्वप्नोऽयं त्वया देव हृदयाकम्पनः परम्।
दृष्टः स्पष्टफलं तस्य दुःसहं कथमुच्यते॥ १७०॥

प्रभुभक्तिव्रतस्थानां दोषेष्वविहितात्मनाम्।
न कर्णकटुकं वक्तुं निषेधोऽस्ति हितैषिणाम्॥ १७१॥

राज्यात् भ्रंशः शरीराद्वा स्वप्नस्यास्य फलं स्फुटम्।
शङ्काविरहितैः कार्य्यः प्रतीकारोऽत्र भूतये॥ १७२॥

पुष्करिण्यां क्रतुक्षेत्रे पूर्णायां पशुशोणितैः।
स्नातस्त्वं मार्ज्जितो विप्रैर्भूरिरत्नसुवर्णदः॥ १७३॥

किन्नरीमेदसा वह्निं हुत्वा कुशलमाप्स्यसि।
अन्तःपुरे स्नुषा तेऽस्ति किन्नरी न तु दुर्लभा॥ १७४॥

इति तस्य वचः श्रुत्वा क्रूरपातककृत्खितः।
नृशंसवृत्तसन्त्रस्त स्तमभाषत भूपतिः॥ १७५॥

རང་གི་སྲོག་ནི་བསྲུང་སླད་དུ། བུད་མེད་གསོད་པར་ཇི་ལྟར་སྤྲོ།
མི་འམ་ཅི་མོ་དང་བྲལ་ན། ངེས་པར་བདག་གི་བུ་མི་འཚོ། 176

ཞེས་དེ་ས་ལ་སྤྲོད་པས་དེའི། འདོད་པ་ཕྱིར་ལ་བཟློག་པ་ན།
མདུན་ན་འདོན་ནི་སྡིག་པ་ལ། མངོན་པར་ཞེན་པས་ཡང་དེར་སྨྲས། 177

ཀྱི་མ་རྒྱལ་པོ་བློ་གྲོས་དང་། ལྡན་ཡང་སྐྱེ་བའི་ལུགས་མི་ཤེས།
སྡེ་གསུམ་སྒྲུབ་བྱེད་རྒྱལ་སྲིད་དང་། སྲོག་ཀྱང་གཏང་བར་བྱ་བ་མིན། 178

ནོར་བཞིན་ནང་མི་གྲོགས་པ་ཆུང་མ་བུ་དག་ནི།
ཉམས་པ་སྐྱེས་བུ་གནས་ན་སླར་ཡང་འབྱུང་བར་འགྱུར།
དབུགས་ཙམ་བྲལ་ཞིང་སྲོག་ནི་སོང་བར་གྱུར་པ་ལས།
དེ་དུས་ཉེ་བར་གནས་ཀྱང་ཐམས་ཅད་མེད་པ་ཉིད། 179

འཚོ་བའི་དོན་དུ་རང་ཡུལ་དང་། གཅེས་པའི་བུ་ཡང་གཏོང་བར་བྱེད།
རྒྱལ་པོ་འཚོ་བའི་འཇིག་རྟེན་ན། སྲོག་ལས་གཞན་ནི་གཅེས་པ་མེད། 180

དེ་ལྟར་དེ་ཡིས་སྣ་ཚོགས་ཀྱི། དཔེ་ཡིས་དཔལ་གྱིས་བྲིད་པ་ན།
རྒྱལ་པོ་སྲོག་ལ་ཆགས་པ་ཡི། སྡིག་ལ་རིགས་པར་ཁ་ཡིས་གླངས། 181

དེ་ནས་ཕུན་ཚོགས་དམ་པ་ཡིས། མཆོད་སྦྱིན་ལས་ལ་འཇུག་བྱེད་ཅིང་།
ཕྱུགས་ཀྱི་ཁྲག་གིས་གང་བ་ཡི། རྫིང་བུ་ཡང་ནི་བྲུས་པའི་ཚེ། 182

निजजीवितरक्षायै कथं स्त्रीवधमुत्सहे।
किन्नरीविरहेऽवश्यं न च जीवति मे सुतः॥ १७६॥

इति भूमिभुजा तस्य प्रत्याख्याते समीहिते।
तं पापाभिनिवेशेन पुनः प्राह पुरोहितः॥ १७७॥

अहो राजन्न जानीषे धीमानपि जनस्थितिम्।
त्रिवर्गसाधनं त्याज्यं न राज्यं न च जीवितम्॥ १७८॥

अर्था इव स्वजनमित्रकलत्रपुत्रा
नष्टाः स्थितस्य पुरुषस्य पुनर्भवन्ति।
उच्छ्वासमात्रविरहे गतजीवितस्य
तत्कालसन्निहितमप्यसदेव सर्व्वम्॥ १७९॥

त्यज्यन्ते जीवितस्यार्थे निजदेशप्रियात्मजाः।
जीवितादपरं राजन् जीवलोकेऽस्ति न प्रियम्॥ १८०॥

इति जीवितलोभाय तेन नानानिदर्शनैः।
शनैः प्रतारितः पापे राजा युक्तममन्यत॥ १८१॥

ततः सुसम्भृतारम्भे प्रवृत्ते यज्ञकर्म्मणि।
ह तायां पुष्करिण्याञ्च पूर्णायां पशुशोणितैः॥ १८२॥

དབེན་པར་རང་གི་བཙུན་མོ་ལ། རྒྱལ་པོས་རང་གི་སྤྱོད་ཚུལ་བཤད།
བུ་ནི་བྱིས་བགྲོད་ཟླ་ངན་གྱིས། གཟིར་ཅིང་སྡིག་པས་སྐྲག་པས་བསམས། 183

ཀྱེ་མ་མཐའ་མ་གསོད་པ་ཡི། སྐྱབ་བྱེད་སྡིག་པ་ཀྱི་ཆེ་འདིར།
མདུན་ན་འདོན་ནི་གཏི་མུག་གིས། ཡོང་བས་རྒྱལ་པོ་རབ་སྨོངས་བསྐྱལ། 184

འཆི་བའི་མཚམས་ནི་ངེས་བཅད་པ། འབད་པས་ཡོངས་འཕྲོག་མི་ནུས་ཀྱང་།
གཞན་གྱི་སྲོག་ནི་ཕྲོགས་པ་ཡིས། བླུན་པོ་ཉམས་ནི་འཚོ་བར་འདོད། 185

གལ་ཏེ་སྲོག་ལ་ཆགས་པ་ཡིས། བུ་མོ་བཞིན་བཟང་བདུད་རྩི་འདྲ།
མཐའ་མ་ཡིན་ཡང་རྒྱལ་པོ་ཡིས། གསད་ན་བདག་གིས་ཅི་ཞིག་སྨྲ། 186

མ་གཅིག་ཁྱོད་ཀྱིས་མཉེས་གཤིན་ལས། བདག་གི་ཡིད་འཕྲོག་མ་འདི་སྐྱོངས།
ཞེས་བརྗོད་བུ་ནི་ནོར་བཟང་དག། བདག་ལ་རྒྱང་མ་གཏད་ནས་སོང་། 187

དེ་སྐད་བདག་ལས་གཙུག་གི་ནོར། ཐོབ་ནས་དེ་ནི་མཁའ་ལ་འགྲོ།
དེ་ནི་འཚོ་ན་བདག་པོ་དང་། སླར་ཡང་ཕྲད་པ་ཉིད་དུ་འགྱུར། 188

ཞེས་བསམས་མཐའ་མ་ག་ལ་བར། མིག་ཆུར་བཅས་པ་དེ་སོང་ནས།
རྒྱལ་པོའི་ཚུལ་ནི་དེ་ལ་བཤད། རབ་འདར་ལྡན་པས་སྐྲར་སྐྲས་པ། 189

མཉེས་གཤིན་གཙུག་གི་ནོར་བུ་ཆིངས། ནམ་མཁའ་དག་ལ་མགྱོགས་པར་སོང་།
མི་བདག་འདི་ནི་སྡིག་དང་ལྡན། དམ་པའི་སྤྱོད་ལ་མི་ལྡནོ། 190

राज्ञा कथितवृत्तान्ता निजपत्नी स्वयं रहः ।
पुत्रप्रवासशोकार्त्ता पापचस्ता व्यचिन्तयत् ॥ १८३ ॥

अहो मूर्खतरो राजा मोहान्धेन पुरोधसा ।
स्नुषावधविधानेऽस्मिन् प्रेरितः पृथुपातके ॥ १८४ ॥

यत्नैरपरिहार्य्येऽपि निबद्धे निधनावधौ ।
परप्राणापहारेण मूढा वाञ्छन्ति जीवितम् ॥ १८५ ॥

यदि जीवितलुब्धेन मुग्धा मृगवधूरिव ।
स्नुषापि हन्यते राज्ञा तत् किं वक्ष्याम्यहं सुतम् ॥ १८६ ॥

मातस्त्वयेयं वात्सल्यात् पाल्या मम मनोहरा ।
इत्युक्त्वा सुधनः सूनुर्गतो निक्षिप्य मे वधूम् ॥ १८७ ॥

तस्माच्चूड़ामणिं मत्तः प्राप्य व्योम्ना प्रयातु सा ।
भविष्यति तया पत्युर्जीवन्त्या सङ्गमः पुनः ॥ १८८ ॥

इति सञ्चिन्त्य सा गत्वा साश्रुनेत्रा स्नुषान्तिकम् ।
राजवृत्तं निवेद्यास्यै सोत्कम्पा पुनरब्रवीत् ॥ १८९ ॥

वत्से चूड़ामणिं बद्धा गच्छ तूर्णं विहायसा ।
नृपः पापप्रवृत्तोऽयं न सदाचारमीक्षते ॥ १९० ॥

ཁྱོད་ནི་མཆོད་སྦྱིན་སར་སོང་ནས། ནམ་མཁའི་ལམ་ནས་འགྲོ་བར་བྱ།
གཞན་ནི་ཁྱོད་ནི་འགའ་ཞིག་ཏུ། བདག་གིས་སྐྲས་བཀོང་འདི་ཡིས་རིག། 191

ཅེས་པའི་ཚིག་ཐོས་ཡིད་འཁྲོག་མ། ཁྱོ་དང་བྲལ་བས་གདུངས་གྱུར་པས།
འབད་པས་དེ་དང་ཕྲད་པའི་སྐད། རབ་ཏུ་གཅེས་པས་ལུས་བསྒྲུངས་ཤིང་། 192

གཙུག་གི་ནོར་བུ་སྐྱུག་མོ་ཡིས། སྤྲད་པ་བླངས་ནས་སྤྱི་བོར་བཅིངས།
མནའ་མ་བོས་པ་མཆོད་སྦྱིན་གྱི། ཞིང་དུ་སོང་ནས་མཁའ་ལ་འགྲོ། 193

རྒྱལ་པོ་བུ་ནི་གཅེས་ཀྱང་མནའ་མ་གསོད་པར་བྱ་བ་གང་འདི་ནི།
ཁྱོད་ཀྱིས་འོས་པ་མ་ཡིན་ཁྱོད་ནི་ཤིས་གྱུར་བདག་ནི་རང་གནས་སོང་།
བདག་བྲལ་བརྟན་པ་རབ་ཏུ་ཉམས་པའི་གཞོན་ནུ་འདི་ཡང་བསྐྱང་བར་གྱིས།
དེར་དེ་བརྗོད་ནས་རབ་ཐ་གླིག་གི་ཉམ་འཕྲུལ་དག་གིས་དེ་སོང་གྱུར། 194

དེ་སོང་ཚེ་ན་མི་བདག་གི། མཆོད་སྦྱིན་བགེགས་ཀྱིས་དོགས་བར་གྱུར།
མདུན་ན་འདོན་གྱིས་དེ་ལ་སྨྲས། ས་བདག་ཐེ་ཚོམ་ཡོངས་མ་བྱེད། 195

གདུག་པ་ཞེས་བྱ་ཚངས་པ་ཡི། སྲིན་པོ་བདག་གིས་སྔགས་ཀྱིས་དྲངས།
མི་འམ་ཅི་མོ་དེ་དེས་གསད། ཁྱོད་ཀྱི་མཆོད་སྦྱིན་བགེགས་མེད་གྲུབ། 196

ཅེས་པ་དེ་ཡི་བརྫུན་གྱི་ཚིག། རྒྱལ་པོ་ཡིས་ནི་བདེན་པར་བསམས།
འཁྲུལ་འཁོར་གཟུགས་བརྙན་རྩེ་དགའ་ཡིས། རྫོངས་ཉམས་ཀྱ་གྱུས་གར་བྱེད་དོ། 197

यज्ञभूमिं त्वया गत्वा गन्तव्यं व्योमवर्त्मना।
अन्यथा त्वामसौ वेत्ति गूढन्यस्तां मया क्वचित् ॥ १९१ ॥

इति भर्तृप्रवासार्त्ता वचः श्रुत्वा मनोहरा।
तत्सङ्गमाय रक्षन्ती यत्नात् प्रियतरं वपुः ॥ १९२ ॥

श्वश्र्वा दत्तं समादाय बद्ध्वा मूर्ध्नि शिखामणिम्।
नृपाहूता क्रतुक्षेत्रं गत्वा व्योम व्यगाहत ॥ १९३ ॥

राजन्नेतत् तव समुचितं यत् प्रियस्यापि सूनो-
र्बध्या पत्नी निजपदमियं स्वस्ति तुभ्यं गताहम्।
रक्ष्यश्चासौ प्रतिहतधृतिर्मद्वियोगे कुमारः
तत्रेत्युक्त्वा तनुतरतडिद्विभ्रमैः सा जगाम ॥ १९४ ॥

तस्यां गतायां नृपतिर्यज्ञविघ्नेन शङ्कितः।
पुरोहितस्तमवदद्देव मा संशयं कृथाः ॥ १९५ ॥

मन्त्रैर्मया समाकृष्टः क्रूराख्यो ब्रह्मराक्षसः।
निर्विघ्नस्ते क्रतुः सिद्धः सा हृता तेन किन्नरी ॥ १९६ ॥

इति मिथ्यावचस्तस्य राजा सत्यममन्यत।
नर्त्यन्ते कुटिलैर्मुग्धा यन्त्रपुत्रकलीलया ॥ १९७ ॥

ཕ་ཡི་ཁང་པར་མངོན་ཕྱོགས་ཏེ། དགའ་བ་ཕྱིར་བྱེད་ཡིད་འཕྲོག་མས།
སྐྱིང་ལ་ཁྲི་ནི་བཟུང་བྱས་ཏེ། རང་གི་སྤྱོད་པའི་མཐའ་ཚོམས་བཤད། 198

ཡབ་ཀྱི་བཀའ་ཡིས་མི་དང་ནི། འགྲོགས་པའི་དྲི་མ་ཞི་བའི་སླད།
གསེར་གྱི་བུམ་པ་ལྔ་བརྒྱ་ཡིས། ཉི་མ་སོ་སོར་ཁྲུས་དག་བྱས། 199

བཀྲུས་པས་མི་ཡི་དྲི་མ་ནི། རབ་ཏུ་ཆུང་བ་ཉིད་དུ་གྱུར།
ནོར་བཟང་ལ་ནི་མཛའ་གཙུགས་ལྡན། རི་དགས་མིག་གི་ཆགས་པ་མེད། 200

ལྷ་ཡི་སྐྱིད་ཚལ་ལོངས་སྤྱོད་ལ། དེ་ནི་དགའ་བར་ཡོངས་མ་གྱུར།
གཞན་ལ་ཆགས་པར་གྱུར་པ་ཡི། ལུས་ཅན་གཞན་ན་དགའ་བ་མེད། 201

ནམ་ཞིག་མཁའ་ལ་འགྲོ་མ་དེ། སྡུག་པ་དང་བྲལ་ཉོན་མོངས་ཤིང་།
ཀླུ་ཡི་ཁང་པའི་ཉེ་འཁོར་དེ། ནགས་མཐའི་ནོར་འཛིན་དག་ཏུ་སོང་། 202

དྲང་སྲོང་ཆེན་པོ་བསྟི་གནས་དེར། གནས་པ་ཤིང་ཤུན་ཅན་དེ་ལ།
རབ་ཏུ་བཏུད་ཅིང་ཞབས་ལ་ཏེ། དུད་ཅིང་མངོན་དུ་ཕྱོགས་པས་སྨྲས། 203

བདག་ནི་འཆིང་བ་ཐོན་པ་ལ། ཉེ་བར་བསྟན་པ་ཁྱོད་ཀྱིས་ནི།
གལ་ཏེ་རིགས་པས་འདི་བྱས་ན། བཅོམ་ལྡན་ཁྱོད་ཉིད་དག་གིས་གསུངས། 204

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། ཅུང་ཟད་ངོ་ཚས་བཞིན་བདུད་དེ།
ཐུབ་པས་དེར་སྨྲས་བཞིན་བཟང་མ། འདི་ནི་ཁྱོད་ཀྱིས་སྤོང་བྱ་ཉིད། 205

पितुर्भवनमभ्येत्य कीर्णहर्षा मनोहरा ।
न्यवेदयत् स्ववृत्तान्तं वहन्ती वल्लभं हृदि ॥ १९८ ॥

सा पितुः शासनान्मर्त्यसङ्गसौरभशान्तये ।
हेमकुम्भशतैः स्नानं पञ्चभिः प्रत्यहं व्यधात् ॥ १९९ ॥

मर्त्यामोदः प्रतनुतां क्षालितायाः शनैर्ययौ ।
सुघनस्नेहसंयोगी न तु रागो मृगीदृशः ॥ २०० ॥

दिव्योद्यानोपभोगेषु न सा निर्वृतिमाययौ ।
अन्यत्र बद्धरागाणां रतिर्नान्यत्र देहिनाम् ॥ २०१ ॥

सा कान्तविरहक्लान्ता कदाचिद्व्योमगामिनी ।
तां नागभवनोपान्तवनान्तवसुधां ययौ ॥ २०२ ॥

तत्राश्रमस्थलीसक्तं महर्षिं वल्कलायनम् ।
अवदत् सा समभ्येत्य प्रणामविनमन्मुखी ॥ २०३ ॥

लुब्धकस्योपदिशता भवता मम बन्धनम् ।
त्वमेव ब्रूहि भगवन् यदि युक्तमिदं कृतम् ॥ २०४ ॥

इति तस्या वचः श्रुत्वा किञ्चिल्लज्जानताननः ।
तामुवाच मुनिर्मुग्धे तवैषा भवितव्यता ॥ २०५ ॥

དེ་ལ་ཞུགས་པ་དོན་ཡོད་ནི། ཡོད་ཅེས་བདག་གིས་མ་ཤེས་བཤད།
གཡོན་ཅན་རྟོན་པས་དེ་ཡི་གདམས། ཤེས་ནས་ཁྱོད་ནི་བཅིངས་པར་གྱུར། 206

བདེན་པར་སྨྲ་བའི་སྒྲ་ཅོར་ཅན། རང་བཞིན་དྲང་བ་བདག་ཅག་གིས།
མ་རུངས་བདག་ཉིད་གདུག་པ་ཡི། སེམས་ཀྱི་གྱ་གྱུ་ཡོངས་མི་ཤེས། 207

ཞེས་བ་ཐུབ་པས་བརྗོད་དེ་ལ། གཟུགས་ཅན་མ་ཡིས་གུས་པས་སྨྲས།
བྱ་མོའི་ཚིག་ནི་གཡོ་བ་འདི། བཅོམ་ལྡན་གྱིས་ནི་བཟོད་པར་མཛོད། 208

ཁྱེད་ཀྱི་མདུན་དུ་བདག་གིས་ནི། གང་འདི་ཅུང་ཟད་བརྗོད་གྱུར་པ།
དམ་པའི་སྤྱོད་ལས་བགལ་བ་འདི། བུད་མེད་རྣམས་ཀྱི་སྐལ་པ་བཟང་། 209

སྡུག་བསྔལ་འདོན་ལ་ཆས་གྱུར་ཅིང་། ཡོངས་སུ་གདུང་ལ་བརྩེ་ལྡན་རྣམས།
འོས་པ་མིན་པ་རྣམས་ཀྱི་ཡང་། ཕལ་ཆེར་བྲུ་བ་སྐྱུབ་མཛད་ཡིན། 210

ཚོ་ངེ་དང་ནི་ལྡན་པ་བདག། རྟོན་པའི་ཞགས་པས་བཅིངས་ལས་གྲོལ།
འཕྲོག་བྱེད་མཛའ་བའི་ཞགས་པ་ཡིས། རྒྱལ་པོའི་བུ་ཡིས་ངེས་པར་བཅིངས། 211

ནོར་བཟང་ཞེས་པ་སྐལ་པ་བཟང་། བདག་བྲལ་མེ་ཡི་གདུང་བ་འདི།
གལ་ཏེ་ལམ་ནི་འདི་ཉིད་ནས། ཁྱོད་ཅན་ཉེ་བར་འོངས་གྱུར་ན། 212

སྙིང་རྗེ་ལས་ནི་ཁྱོད་ཉིད་ཀྱིས། བདག་གི་འཕྲིན་འདི་སྨྲ་བར་གྱིས།
ཁྱོད་བྲལ་གདུང་བས་བདེ་མེད་ཅིང་། བདག་ནི་ཡབ་ཀྱི་ཁྱིམ་ན་འཁོད། 213

अमोघपाशस्तस्यास्तीत्यज्ञात्वा कथितं मया ।
उपलभ्य कथां धूर्त्तस्त्वां बबन्ध स लुब्धकः ॥ २०६ ॥

दुष्टात्मनां न जानीमः कौटिल्यं क्रूरचेतसाम् ।
सत्यप्रवादमुखराः सद्भावसरला वयम् ॥ २०७ ॥

इत्युक्ता मुनिना तन्वी प्रणयात्तमभाषत ।
भगवन् क्षम्यतामेतद्वालावचनचापलम् ॥ २०८ ॥

इदन्तु भवतामग्रे यन्मया किञ्चिदुच्यते ।
ललनासुभगः सोऽयं सदाचारव्यतिक्रमः ॥ २०९ ॥

कथातिथित्वमायान्ति चापल्ये गुरवोऽपि यत् ।
सा वियोगाग्नितापस्य ज्वालायोगासहिष्णुता ॥ २१० ॥

दुःखोद्धरणसन्नद्धाः सन्तप्तानां दयालवः ।
कार्य्यान्तरज्ञाः प्रायेण भवन्त्यनुचितेष्वपि ॥ २११ ॥

पाशबन्धाद्वियुक्ताहं लुब्धकेन प्रलापिनी ।
निबद्धा राजपुत्रेण स्नेहपाशेन हारिणा ॥ २१२ ॥

सुभगः सुधनाख्योऽसौ मद्वियोगानलाकुलः ।
अमुना यदि मार्गेण समेष्यति तवान्तिकम् ॥ २१३ ॥

འདུན་དང་རྗེས་སྲུ་བརྩེ་བ་འམ། ཁྲུས་ཤེས་ལྷན་ཅིག་སྐྱེས་པ་ཡི།
རྗེས་མདུན་མདུན་དུ་བདར་ཁྲུས་ཏེ། འདི་ནས་མྱུར་དུ་འགྲོན་པར་མཛོད། 214

མི་འམ་ཅི་ཡི་གྲོང་ཁྱེར་ལམ། བགྲོད་དཀའ་ཉོན་མོངས་བརྒྱ་ཡི་རྟེན།
བརྩོན་འགྲུས་སྟོབས་གཟི་ཆུང་བ་ཡི། མི་ཉམས་ཀྱིས་ནི་ས་མིན་ཉིད། 215

དཀའ་ཐུབ་ནགས་མཐའ་འདིར་འབར་བ། བདུད་རྩི་ཞེས་པའི་སྨན་ཆེན་ནི།
མཐོང་སྟེ་ཞུན་མར་ལ་བཙོས་པ། ཁྱོད་རང་ཉིད་ཀྱིས་བཏུང་བར་བྱ། 216

དེ་མཐུས་སྙིང་སྟོབས་གྲོགས་ལྡན་ཁྱོད། ཉོན་མོངས་རབ་ཏུ་སྒྲོལ་འགྱུར་ཏེ།
ལམ་ནི་ཀེ་ལ་ས་ཆོད་ལྟར། དཀར་བས་བདག་གྲོང་ཕྱིན་པར་གྱུར། 217

བདག་གི་རྟགས་མཚན་སོར་གདུབ་ནི། འདི་ཡང་དེ་ལ་སྦྱིན་པར་བྱ།
ཞེས་བརྗོད་དེ་ཡིས་མི་བཟད་པའི། ལམ་ནི་རིམ་པས་བཤད་བྱས་ཏེ། 218

ངོ་མཚར་རིགས་པ་བདག་གིས་ནི། བགེགས་ཉམས་ཕྱིར་བཅོས་ཐབས་བསྟན་ནས།
རེ་བའི་འཆིང་བས་སྒྲོག་གཟུང་བ། སོར་གདུབ་བྱིན་ནས་སོང་བར་གྱུར། 219

ལམ་རིང་སྐྱོལ་བྱེད་མིད་བྱུང་དག། དེ་ཡིས་བཤད་པ་ཐོས་གྱུར་ཏེ།
སོར་གདུབ་དག་ནི་བླངས་བྱས་ནས། ཐུབ་པ་དེ་དག་ཉིད་ལ་སེམས། 220

སྐབས་དེར་ས་ཡི་བདག་པོ་སྦྱིན། ཡམ་བར་བྱས་ཤིང་མཛོད་བླངས་ནས།
ཆུང་མ་བལྟ་བར་འདོད་བ་ཡི། རྒྱལ་པོའི་བུ་ནི་འདོས་པར་གྱུར། 221

तदिदं भवता वाच्यं कारुण्याद्वचसा मम।
स्थिता त्वद्विरहायासनिःसुखाहं गृहे पितुः॥ २१४॥

उत्कण्ठामनुकम्पां वा सहजां वा कृतज्ञताम्।
दाक्षिण्यं वा पुरस्कृत्य तूर्णमागम्यतामिति॥ २१५॥

दुर्गमः किन्नरपुरे मार्गः क्लेशशताश्रयः।
अभूमिरेव मर्त्यानामल्पवीर्य्यबलौजसाम्॥ २१६॥

दीप्ता तपोवनान्तेऽस्मिन् सुधा नाम महौषधिः।
दृश्यते हविषा पक्वा पातव्या सा स्वयं त्वया॥ २१७॥

तत्प्रभावात् समुत्तीर्य्य क्लेशं सत्त्वसहायवान्।
कैलासहासशुभ्रेण पथा मत्पुरमेष्यसि॥ २१८॥

इदञ्च तस्मै दातव्यं मदभिज्ञाङ्गुलीयकम्।
इत्युक्त्वा विषमं मार्गं[१] कथयित्वा क्रमेण सा॥ २१९॥

विघ्नप्रतिक्रियोपायान् सन्दिश्याश्चर्य्ययुक्तिभिः।
आशाबन्धधृतप्राणा ययौ दत्त्वाङ्गुलीयकम्॥ २२०॥

तया कथितमाकर्ण्य दूराध्वतरणाद्भुतम्।
अङ्गुलीयकमादाय तदेवाचिन्तयन्मुनिः॥ २२१॥

१ W_1 and W_2 वर्त्म।

རྒྱལ་ཕྲན་གདུགས་ཀྱི་དཀྱིལ་འཁོར་གྱིས། མཁའ་ནི་རྒྱ་གདེར་སྤྲུ་བའི་འཛུམ།
གྲུས་པ་དག་དང་མཚུངས་བྱེད་ཅིང་། དེ་ནི་རང་གི་གྲོང་ཁྱེར་ཞུགས། 222

དེ་ནས་མཐའ་མའི་ཉིས་གྲོད་ཀྱི། ལོ་རྒྱུས་འཆད་ལ་ཉོན་མོངས་ཞིང་།
འདར་བའི་ཕོ་བྲང་འཁོར་སོང་སྟེ། དེ་ཡི་ཡབ་ལ་རབ་ཏུ་བཏུད། 223

འོག་ཏུ་བཞིན་ཕྱོགས་སྐྱེ་བོ་ཀུན། སྒྲ་དན་ཟླུག་ཙུས་དགའ་སྟོན་བཅོམ།
ཡབ་ཀྱི་ཕོ་བྲང་འཁོར་མཐོང་ནས། དེ་ནི་དགའ་དང་བྲལ་བར་དོགས། 224

འབྲལ་བས་གཟིར་བའི་ཡིད་འཕྲོག་མ། གཟུགས་བཟང་མ་དེ་འཚོའམ་ཅི།
ཞེས་སྨྲ་དེ་ལ་སུ་ཡིས་ཀྱང་། གང་ཚེ་མི་སྨན་མ་བརྗོད་པ། 225

དེ་ཚེ་མ་ཡིས་རབ་སྨྲས་པ། བུ་གཅིག་ཁྱོད་ཀྱི་དགའ་མ་འཚོ།
འོན་ཀྱང་སྡིག་ལ་ཐ་ཚོམ་ཚེ། གཙུག་གི་ནོར་བུ་ཐོབ་ནས་སོང་། 226

ཞེས་བ་ཐོས་པ་ཉིད་ན་དེ། འཕྲུལ་ལ་ས་ཡི་གཞི་ལ་འགྱེལ།
རོ་ཞལ་འཁྲི་ཞིང་བསྐུམ་པ་ཡིས། མཆི་མའི་རྒྱུན་ལྡན་བྱེད་པ་བཞིན། 227

ཁ་བའི་ཐིགས་པ་ལྷར་དཀར་བའི། ཧ་རི་ཙན་དན་རྒྱ་དག་གིས།
དེ་ལ་བྲིས་འདུ་ཞེས་སྟེད་པ་དེས། མཆི་མས་འགར་འགར་རྣམ་པར་སྨྲས། 228

མཁའ་མིན་རི་བོང་ཅན་གྱི་དཔལ། བསྐྱབས་མིན་བདུད་རྩིའི་རྒྱུན་དང་ལྡན།
འབད་མེད་མེ་ཏོག་གཞུ་ཅན་གྱིས། རིན་ཆེན་གནས་དེ་གང་ན་ཡོད། 229

अत्रान्तरे राजहंसजित्वा मेघं महीपतिम्।
आययौ कोशमादाय दयितादर्शनोत्सुकः॥ २२२॥

स विवेश स्वनगरीं सामन्तच्छत्रमण्डलैः।
फुल्लफेनस्मितस्याब्धेः कुर्व्वाणः सन्निभं नभः॥ २२३॥

स्नुषा-वैशसवृत्तान्त-कथनक्लेशकम्पितम्।
अथान्तःपुरमभ्येत्य जनकं प्रणनाम सः॥ २२४॥

अधोमुखाखिलजनं शोकशल्यहतोत्सवम्।
पितुरन्तःपुरं दृष्ट्वा स विप्रियमशङ्कत॥ २२५॥

अपि जीवति सा तन्वी विरहार्त्ता मनोहरा।
इति ब्रुवाणं न यदा तमूचे कश्चिदप्रियम्॥ २२६॥

तदा जगाद जननी पुत्र जीवति ते प्रिया।
गता चूड़ामणिं प्राप्य किन्तु जीवितसंशये॥ २२७॥

इति श्रुत्वैव सहसा स पपात महीतले।
कीर्णहारलतां कुर्व्वन् साश्रुधारामिव क्षितिम्॥ २२८॥

तुषारशीकरस्मेरहरिचन्दनवारिभिः।
स लब्धसंज्ञः शनकैर्विललापाश्रुगद्गदः॥ २२९॥

ལྷ་མའི་བཀས་བཅིངས་རིང་དུ་འགྲོ་བྱེད་པ། བདག་གི་རི་དྭགས་མིག་ཅན་མཆི་མ་ཡིས།
མིག་ནི་འགགས་པའི་དགའ་བ་མ་བསྐྱབས་པ། དེས་ན་དྲན་པའི་དམོད་འདི་བདག་ལ་ལྷུང་། 230

ཡིད་འཕྲོག་མ་ནི་གང་དུ་སོང་།
སྨིན་ལེགས་ཚིག་གི་ལན་དག་སྨྲིན།
བག་མེད་ལྷུན་པོ་བདག་གིས་ནི།
རི་དྭགས་མིག་ཅན་ཁྱོད་མ་བསྲུངས། 231

ཁྱོད་དང་འགྲོགས་པའི་སྐལ་བཟང་ལྡན། ལྷ་ཡི་མདུན་ས་བསྡུགས་པར་འོས།
ཁྱོད་དང་བྲལ་བས་མི་ཡིས་ནི། འཇིག་རྟེན་བདག་བཞིན་ཅི་ཞིག་མཛེས། 232

ཞེས་པ་སྨྲ་ཞིང་དལ་བུ་ཡིས། མཛེས་མའི་ཡོངས་སྤྱོད་དབང་གྱུར་པ།
སྐྱེད་མོས་ཚལ་དུ་དགའ་མ་མཆོག། འཚོལ་དུ་རང་ཉིད་སོང་བར་གྱུར། 233

འཁོར་གྱི་སྐྱེ་བོ་ཁྲིད་བྱས་ཏེ། མཚན་མོ་དག་ནི་མ་ཚོར་བར།
ནགས་མཐར་སོང་ནས་མཉམ་པ་དང་། མི་མཉམ་ཉམས་སུ་ཉམས་པར་འཁྱམས། 234

འདོད་ཆགས་དྲག་པོའི་ཤ་ཟ་ནི། ཆེན་པོས་ཉམས་པར་སྨྱོངས་པ་དེས།
སྨྱོན་པ་བཞིན་དུ་སེམས་ལྡན་དང་། སེམས་མེད་ལ་ཡང་ཉམས་པར་དྲིས། 235

གྲོགས་པོ་ནི་ཅིའི་ཕྲུག་གུ་གྲོགས་ཀྱི་གྲོགས་མོ་ནི།
སྒྲོག་མཚུངས་ཟླ་རྫོགས་བཞིན་ལྡན་དེ་ནི་སྨྲ་བར་བྱོས།
དེ་ཡི་སོ་ཡི་སྒྲིབ་བྱེད་དམར་བ་དག་གི་ཆར།
ཟིམ་པའི་འབྲས་བུ་རྟག་ཏུ་ཁྱོད་ཀྱི་ལོངས་སྤྱོད་ཡིན། 236

अनाकाशशशाङ्कश्रीरमन्यामृतवाहिनी ।
अयत्नरत्नवड़भी क्व सा कुसुमधन्वनः ॥ २३० ॥

गुरुशासनयन्त्रितेन दूरं
व्रजता बाष्पनिरुद्धलोचनायाः ।
विहिता न धृतिर्मया मृगाक्ष्या-
स्तदयं मे पतितः स्मराभिशापः ॥ २३१ ॥

देहि प्रतिवचः सुभ्रु क्व गतासि मनोहरे ।
मया प्रमादमूढ़ेन हरिणाक्षी न रक्षिता ॥ २३२ ॥

तत्समागमसौभाग्यश्लाघ्यस्य सुरसंसदि ।
ममैव मर्त्यलोकस्य त्वद्वियुक्तस्य का द्युतिः[1] ॥ २३३ ॥

इति ब्रुवाणः शनकैः कान्तासम्भोगसाक्षिषु ।
उद्यानेषु प्रियतमां विचेतुं[2] स्वयमाययौ ॥ २३४ ॥

वञ्चयित्वा परिजनं स रजन्यामलक्षितः ।
गत्वा वनान्तं बभ्राम समेषु विषमेषु च ॥ २३५ ॥

तीव्ररागपिशाचेन महता स विमोहितः ।
उन्मत्त इव पप्रच्छ चेतनाचेतनानपि ॥ २३६ ॥

---

१ W/1 गतिः। २ W/1 अन्वेष्टुं।

ཀྱེ་ལགས་ངང་པ་ལུས་དཀར་དང་འགྲོགས་པདྨོ་ཅན་རོལ་ནི་གྱིན་ལྟར་མཛེས་པ།
མུ་དིག་ཚོགས་ནི་ནོམ་པར་གཡོ་བ་གང་གི་ངོ་མ་འཛིན་པ་གྲུས་པའི་རྩེར།
བ་སྤྲུའི་འཁྲི་ཤིང་ངང་པ་ལ་ནི་ཀ་ལྤིབས་འཁྲི་ཤིང་ལྗུང་བཞིན་ནོམ་མཛེས་པ།
ཧྲི་བཟང་ཁང་པ་པདྨའི་བཞིན་ལྡན་མཛེས་པའི་བོ་རླབས་ཅན་དེ་མཐོང་ངམ་ཅི། 237

དེ་ལྟར་སྡུག་བསྔལ་དྲག་པོས་བཅིངས་པ་ལས།
རབ་སྐྱེ་མཉམ་པ་ལ་ཡང་འགྲེད་དེ་ལ།
བརྩེ་བས་ལམ་ནི་རབ་གསལ་སྟེར་བ་བཞིན།
དལ་གྱིས་བསིལ་ཟེར་ཅན་ནི་ནམ་མཁར་འཛེགས། 238

མཚན་མོའི་བདག་པོ་ཡིད་སྤྲུབས་གཉེན་གྱི་ནི།
གཟུགས་མཛེས་མཁའ་ལ་སྤྲུར་བ་དེ་མཐོང་ནས།
འཛུམ་ལྡན་ཟླ་ཞལ་མ་ཡིས་ནམ་མཁའ་ཡི།
གཞལ་ཡས་ཁང་པའི་སྟེང་ནས་བཞིན་བསྟན་བསམས། 239

མི་སྨྲ་དྲི་མས་མཚན་ཞིང་སྐྱོན་དག་ཐོབ།
ནམ་འཕྲུལ་མེད་ཅིང་དགོད་དང་རྩེད་འཛེས་དམན།
ཟླ་བ་བཞིན་དུ་རིང་ཞིག་ལོན་ནས་ངེས།
མི་ཡི་མགོན་པོའི་བུས་ནི་འགྲོ་ཞིང་དྲིས། 240

ब्रूहि सखे शुकशावक सख्युः
प्राणसखीं निखिलेन्दुमुखीं ताम्।
तद्दशनच्छदरागविभागे
बिम्बफलोऽस्तु सदा तव भोगः॥ २३७॥

हंहो हंस सितांस शंस नलिनी-लीलावतंसद्युते
दृष्टा सौरभसद्मपद्मवदना किं कान्तिकल्लोलिनी।
यस्याः पीनपयोधराग्रविलुठन्मुक्ताकलापस्य सा
हंसस्येव विभाति रोमलतिका शैवालवल्ली च्युता॥ २३८॥

तस्येति तीव्रव्यसनानुबन्धात्
प्रलापिनः प्रस्खलतः समेऽपि।
दिशन् प्रकाशं दययैव मार्गे
शनैर्जगाहे गगनं सितांशुः॥ २३९॥

श्यामापतेर्मन्मथबान्धवस्य
कान्तं स दृष्ट्वाम्बरचुम्बि बिम्बम्।
सन्दर्शितं सस्मितमिन्दुमुख्या
मेने मुखं व्योमविमानश‍ृङ्गात्॥ २४०॥

གྲོགས་པོ་ཁྱོད་ཀྱིས་མཁའ་ལ་མཛོས་སྡུག་གྲོགས།
གང་གི་བཞིན་གྱི་ཉེར་འཛུམ་འཕྲོལ་ཐོབ་པའི།
འགྲོ་ལ་ཁྱོད་ཀྱི་གྲགས་པ་རབ་གྲུས་པ།
མཚན་མ་རི་དྭགས་མིག་མཚུངས་མཐོང་ངམ་ཏི། 241

མཛེས་མའི་གདམ་ནི་དོན་གཉེར་དངོས་གྱུར་པ།
བདག་ལ་ཅུང་ཟད་ཇི་ལྟར་འདི་མི་སྨྲ།
གཞན་དོན་བསྒྲུབ་པ་ལ་ནི་བསིལ་གྱུར་པ།
སྐྱུ་རྩོལ་ཆ་ལྡན་སྒྲུ་ཡི་དོ་དག་བྱེད།

གང་གི་སྐྲ་སོགས་འཕྲེང་བས་ཉམས་བཀྲ་སྟེ། 242
ཁྱོད་ཀྱི་མཛུག་མའི་ཚོགས་ཀྱི་གྲགས་གྱུར་པ།
ཡིད་འོང་གློག་གི་རབ་གསལ་སྤྲིན་ལྡན་གཞི།
འགར་ཡང་མི་བྲ་ཁྱོད་ཀྱིས་མཐོང་ངམ་ཏི། 243

གཙུག་ན་རིན་ཅེན་མཆོག་ལྡན་ལག་འགྲོ་མ།
གལ་ཏེ་ལག་འགྲོ་ཁྱོད་ཀྱིས་འགར་མཐོང་ངམ།
ལྟོས་ཞིག་གང་གི་དུག་གིས་ཟེར་སྨྲོས་པས།
བཟོད་དཀའི་འབྲལ་བས་འདིར་ནི་བདག་སྡིག་གོ། 244

अपि त्वया कान्तिसखौ सखे खे
तुल्येक्षणा लक्ष्ममृगस्य दृष्टा ।
तवोदिता यद्वदनोपमान-
सम्बन्धलब्धा जगति प्रसिद्धिः ॥ २४१ ॥

कथं न किञ्चित् कथयत्ययं मे
गतस्य कान्ताकथनार्थिभावम् ।
परार्थसम्पादनशीतलेन
कलावता कस्य कृतोऽनुरोधः ॥ २४२ ॥

अपि त्वया स्निग्धतड़ित्प्रकाशा
घनस्तनी क्वापि मयूर दृष्टा ।
त्वद्बर्हभारस्य सुहृत् स यस्या
विचित्रमाल्यः कवरीकलापः ॥ २४३ ॥

भुजङ्ग काचिद्भवता भुजङ्गी
दृष्टा क्वचित् सा वररत्नचूड़ा ।
विषच्छटाः पश्य यया विसृष्टा
मां दुःसहेऽस्मिन् विरहे दहन्ति ॥ २४४ ॥

---

49 A "मूकं कलङ्काङ्कमवाप्तदोषमविभ्रमं हासविलासहीनम् ।
चिरेण निश्चित्य शशाङ्कमेव पप्रच्छ गच्छन्नरनाथसूनुः ॥"

This Sanskrit S'loka should have been placed in Juxta-position with Tibetan Verse No. 240, Sanskrit S'loka No. 210 has no corresponding Tibetan Verse. But owing to an oversight it was not placed at the

རི་དྭགས་ཁྱོད་ཀྱི་ཡིད་སྤྲུབས་ས་དག་གི།
ཧོ་རའི་རྩེད་འཛོམ་དེ་མཐོང་ངམ་ཅི།
གང་གིས་ཟུར་མིག་ཨུ་ཏྤལ་ཆ་དག་གིས།
རི་དྭགས་རྣམས་ནི་ནགས་ན་མཛེས་སམ་སྙམ། 245

ཉམ་འཕྲུལ་སྒྲེ་ས་ཡལ་འདབ་མཛེས་པའི་མཆུ།
རོལ་པས་ཉམ་པར་གཡོ་བའི་བུད་མེད་དག།
ལྷུད་བུ་ཅན་དེ་འཁྲི་ཤིང་བཞིན་དུ་ནི།
ནགས་མཐར་ནགས་བདག་ཁྱོད་ཀྱིས་མཐོང་ངམ་ཅི། 246

དེ་ནི་སྤྲིན་དང་མཚུངས་པ་ནགས་ཚལ་གྱི།
གླང་པོ་འདི་ཡིས་ལྷ་བའི་ཆ་བཞིན་དུ།
གསེར་གྱི་རྒྱ་ཤིང་ཡོངས་འཁྱུད་ལ་ཆགས་ནས།
གླངས་ནས་ཁྲིར་རམ་བསྒྲིབས་པ་མ་ཡིན་ནམ། 247

དེ་ལྟར་ནགས་ཚལ་སྐྱིབས་རྣམས་སུ། ལྷ་བཅོལ་རབ་བརྗོད་དེ་ཡིས་ནི།
ས་ངན་གྱིས་བཞིན་མཚན་མོ་ནི། ལྷ་བའི་བཞིན་རས་མདོག་བྲལ་སོང་། 248

དེ་ཡིས་ཀླུ་ཡི་གནས་དང་ནི། ངོགས་འགྲམ་དགའ་ཐུབ་ནགས་ཚལ་དུ།
དལ་གྱིས་ཞུགས་ཏེ་དྲང་སྲོང་ཆེ། ཤིང་ཤུན་ཅན་ལ་རབ་ཏུ་དྲིས། 249

सारङ्ग सारङ्गविलासिनी किं
दृष्टा त्वया मन्मथपार्थिवस्य।
यस्याः कटाक्षोत्पलसंविभागै-
र्विभान्ति मन्ये गहने हरिण्यः॥ २४५॥

अपि त्वया विभ्रमजन्मभूमि-
र्वनस्पते पल्लवपेशलोष्ठी।
लीलाविलोला ललना वनान्ते
लतेव दृष्टा स्तवकावनम्रा॥ २४६॥

अनेन नूनं वनकुञ्जरेण
सा राजरम्भा परिरम्भलौल्यात्।
आकृष्य नीता घनसन्निभेन
संच्छादिता वा शशिनः कलेव॥ २४७॥

इति काननकुञ्जेषु तस्योन्मादप्रलापिनः।
शोकादिव विवर्णेन्दुवदना रजनी ययौ॥ २४८॥

स नागभवनासन्नतीरोपान्तं तपोवनम्।
शनैः प्रविश्य पप्रच्छ महर्षिं वल्कलायनम्॥ २४९॥

འདིར་ནི་འཁྲུལ་བས་སེམས་དམན་སྒྱུ་ངན་ཤུགས་རངས་ཀྱིས་སྐྱར་བའི།
འདོད་པའི་མི་ཡི་དུ་བས་སྤྲོ་ཆགས་ལྷས་མ་གཅིག་པ་ཅན།
རི་བོང་ཅན་གྱི་མཛེས་སྡུག་དྲེགས་ཀྱིས་ཞི་བྱེད་རི་དྭགས་མིག།
མི་འདམ་ཅི་མོ་སྲུ་ཞིག་ཐུབ་པ་མཆོག་གིས་གཟིགས་སམ་ཅི། 250

ཞེས་བ་མཛེས་མ་དང་བྲལ་ཞིང་། སྨྲོན་པའི་སྐབས་ནི་ཐོབ་གྱུར་པ།
དེ་ཡི་ཚིག་ཐོས་ཐུབ་པ་ཡིས། ཡོངས་སྲུ་ཤེས་ནས་དེ་ལ་སྨྲས། 251

ཁྱོད་ནི་ངལ་གསོ་དབུགས་ཕྱུང་ལ། ཡོངས་སྲུ་གདུང་བ་འདི་གཏང་མཛོད།
ཁྱོད་ཀྱི་དགེ་མ་ཡིད་ཀྱི་ནི། ཟླ་བའི་འོད་དེ་བདག་གིས་མཐོང་། 252

ཁྲུ་ཉམས་རི་དྭགས་མོ་བཞིན་དུ། འཚོ་བ་ལ་ཡང་ལྟོས་པ་མེད།
སྦྲང་མོ་ཞགས་པས་དྲངས་པ་བཞིན། དེ་ནི་ཁྱོད་ཀྱི་བསམ་པས་འཚོ། 233

ལག་པ་དག་ལ་བཞིན་གྱི་པདྨ་ཉལ་ཞིང་ཡལ་འདབ་མལ་སྟན་ལ།
གདུང་བས་ཉེན་ཅིང་གཡོ་བའི་ཚིག་ལྷན་རི་མོ་ཀུན་དུ་ཉམས་པའི་ལུས།
རེ་བ་བཅས་ལ་བརྟེན་པ་བཞིན་དུ་ཟློ་གྲོས་ཁྱོད་བྲལ་འཁྲུགས་གྱུར་པ།
དེ་ཡི་ཡིད་ནི་འགར་ཡང་ཅི་ཡང་ངལ་གསོས་ཉིད་དུ་འགྱུར་མ་ཡིན། 254

ལྡོན་པ་མི་འདམ་ཅི་ཡི་བདག། ཡབ་ཀྱི་ཁྱིམ་ན་བདག་གནས་སོ།
ཁྱོད་ནི་མྱུར་དུ་ཤོག་ཅིག་ཅེས། དེ་ཡིས་ཁྱོད་ལ་ཡང་དག་བསྟན། 255

इह विरहविचिन्ताशोकनिश्वासमूर्च्छे-
न्मदनदहनधूमश्यामसक्तैकवेणी।
अपि शमितशशाङ्कोद्दामसौन्दर्य्यदर्पा
मुनिवर हरिणाक्षी किन्नरी कापि दृष्टा॥ २५०॥

इति कान्तावियुक्तस्य प्राप्तस्योन्मादिनीं दशाम्।
मुनिः श्रुत्वा वचस्तस्य परिज्ञाय तमब्रवीत्॥ २५१॥

समाश्वसिहि विश्राम्य सन्तापस्तज्यतामयम्।
दृष्टा सा तव कल्याणी मया मानसचन्द्रिका॥ २५२॥

यूथभ्रष्टेव करिणी निरपेक्षापि जीविते।
पाशाकृष्टेव हरिणी धार्य्यते सा त्वदाशया॥ २५३॥

पाणौ शेते वदनकमलं प्रस्तरे पल्लवानां
तापक्लान्ता तरलवचनस्रंशिनीगात्रलेखा।
आशाबन्धे धृतिरिव मतिस्त्वद्वियोगाकुलाया
स्तस्या नैव क्वचिदपि मनः किन्तु विश्रान्तिमेति॥ २५४॥

द्रुमस्य किन्नरपतेः स्थिताहं भवने पितुः।
आगन्तव्यं त्वया तूर्णमिति त्वां सन्दिदेश सा॥ २५५॥

བརྩོན་འགྲུས་སྙིང་སྟོབས་སྟོབས་དང་ཐབས། བདེན་དང་སྨྲོ་ལྡན་རྣམས་ཀྱིས་ཀྱང་།
བགྲོད་མིན་མི་འམ་ཅི་ཡི་ནི། གྲོང་ཁྱེར་ལམ་ཡང་རིམ་པས་བཤད། 256

གང་གི་འོད་འཛམ་རིག་པ་ཡིས། ཕྱོགས་རྣམས་སེར་པོ་ཉིད་འགྱུར་བ།
རིན་ཆེན་སེར་གདུབ་འདི་ཡང་ནི། དེ་ཡིས་ཁྱོད་ཀྱི་ཆེད་དུ་བྱིན། 257

ཞེས་བརྗོད་ཀུན་དགའི་བདུད་རྩི་ཡིས། དྲན་བཞིན་བདེན་པ་དག་གི་རྟེན།
སོར་གདུབ་དག་ནི་དེ་ལ་བྱིན། ལམ་ཡང་ཐུབ་པས་རབ་དུ་བཤད། 258

དེ་ཡིས་བསྟན་པའི་ལམ་དག་ནི། ཐབས་དང་བཅས་པས་མི་བདག་བླུ།
བདེན་པས་ནོར་འཛིན་གནས་པ་ཡི། ཕྱོགས་སུ་འགྲོ་བར་རབ་དུ་བརྩམས། 269

སྨན་ཆེན་བདུད་རྩི་ལེགས་གྲུབ་པ། མར་གྱིས་སྨིན་པ་འཐུངས་ནས་ནི།
རྫུ་འཕྲུལ་སྟོབས་ཀྱི་བདག་ཉིད་ཐོབ། མཚོན་ཆ་དང་བཅས་དལ་གྱིས་སོང་། 260

རྫུ་འཕྲུལ་གྱིས་ནི་ལམ་དུ་དེའི། ཉེར་མཁོ་ཐམས་ཅད་ཉེར་གནས་གྱུར།
སྙིང་སྟོབས་གྲོགས་དང་ལྡན་རྣམས་ཀྱི། གྲུབ་པ་ཕུན་ཚོགས་རང་དབང་ཉིད། 261

དེ་ནས་རིག་འཛིན་བུ་མོ་ནི། རྩ་དགའ་རྐོད་པ་ལྟར་མཛེས་པ།
གངས་ཅན་བགོལ་ནས་དེ་ཡིས་ནི། ཀུ་ཀྲུ་ལྦ་ཡི་རི་ལ་སླེབ། 262

འབྲས་བུའི་སྐྱེས་གྱིས་ཁས་བླངས་བྱས། དེར་ནི་སྤྲེ་འུའི་ཁྱུ་ཡི་བདག།
ལྷུང་ཤུགས་ཞེས་པ་ལ་ནོན་ནས། རི་བོ་དེ་ནི་དེ་ཡིས་འགོངས། 263

वीर्य्यसत्वबलोपायधैर्य्योत्साहवतामपि।
अगम्ये किन्नरपुरे क्रमाद्वर्त्म शशंस च॥ २५६॥

इदञ्च त्वत्कृते दत्तं तया रत्नाङ्गुलीयकम्।
यस्य स्निग्धप्रभाभ्यङ्गैर्दिशो यान्ति पिशङ्गताम्॥ २५७॥

इत्यानन्दसुधासिक्तमुक्ता धैर्य्यावलम्बनम्।
अङ्गुलीयं ददौ तस्मै मार्गञ्चाकथयन्मुनिः॥ २५८॥

यथा तदुपदिष्टेन सोपायेन नृपात्मजः।
धीरः प्रचक्रमे गन्तुं धनदाध्युषितां दिशम्॥ २५९॥

स सिद्धां घृतपाकेन सुधां पीत्वा महौषधिम्।
लब्धर्द्धिबलमाहात्म्यः सायुधः प्रययौ शनैः॥ २६०॥

ऋद्ध्या सन्निहितं तस्य सर्व्वोपकरणं पथि।
अभूत् सत्वसहायानां स्वाधीनाः सर्व्वसम्पदः॥ २६१॥

अथ विद्याधरबधूविलासहसितद्युतिम्।
हिमवन्तमतिक्रम्य कुक्कुलाद्रिमवाप सः॥ २६२॥

फलोपहारैः स्वीकृत्य तत्र वानरयूथपम्।
वायुवेगाख्यमारुह्य स तं शैलमलङ्घयत्॥ २६३॥

དེ་ནས་ལུག་གི་ལམ་ཞེས་པའི། ས་འཛིན་དག་ནི་རབ་ཏུ་གཏོལ།
འཇིགས་སུ་རུང་བའི་སྤྲུལ་ཆེན་ནི། བགེགས་ཀྱི་ཚོགས་བཞིན་མདའ་ཡིས་བསྣུན། 264

འདོད་པའི་གཟུགས་ཅན་སྲིན་མོ་ནི། རྒྱུད་མང་སྒྲ་ཡིས་དབང་བྱས་ནས།
འདོད་པའི་གཟུགས་ཀྱི་རི་བོ་འདས། མི་འམ་ཅི་མོའི་བདག་པོ་སོང་། 265

དེ་ནས་རྒྱུན་གཅིག་རི་བོ་ལ། ཡང་ཡང་མཚོན་གྱི་རྩེ་མོ་ཡིས།
བསྣུན་ཅིང་བཀོས་པ་དག་གིས་ནི། སྟོབས་ལྡན་ཤིན་ཏུ་རྟུལ་བས་འཛེགས། 266

དེ་ནས་རྡོ་རྗེ་ཅན་ཞེས་པའི་ རི་བོ་རབ་དྲག་དེ་ཡིས་འཛེགས།
སྲིན་མོ་ཤ་ནི་འཚོལ་བྱེད་པ། བྱ་རྒོད་གཟུགས་ཅན་ཡང་དག་མཐོང་། 267

ཤ་ལྡན་རི་དྭགས་ལྡགས་པ་ནི། ཡོངས་སུ་བསྒྱུར་བས་ཀུན་དུ་གཡོགས།
རི་བོ་དེ་ཡི་གནས་ཀྱི་རྩེར། དེ་ཡི་ལུས་ནི་གཡོ་མེད་འཁོད། 268

མཚན་གྱི་བྱ་རྒོད་གཟུགས་ཅན་ནི། ཤ་ལ་ཆགས་བས་དེ་ཁྲངས་ནས།
འཇིགས་རུང་གཟུགས་ཀྱིས་བཟའ་བའི་ཕྱིར། རི་རྩེའི་སྟེང་དུ་ཐོམ་པར་བཀོད། 269

བརྩོན་འགྲུས་ཅན་གྱིས་རི་དྭགས་ཀྱི། པགས་པ་བཏང་ནས་དེ་བསད་དེ།
སེང་ལྡེང་ཕྲུག་པོས་ཁེངས་པ་ཡི། སེང་ལྡེངས་འཛིན་དག་ཏུ་ཕྱིན། 270

དེ་ཡི་ཕྲུག་ཞུགས་རྗེ་བསལ་བས། གྲང་དང་ཚ་དང་སྲུན་པ་སྤྲུལ།
སྲིན་པོ་ལ་སོགས་འཇིགས་པ་དག། འཕྲོག་པའི་སྨན་ནི་ཆེན་པོ་ཐོབ། 271

अथाजपथनामानमतिचक्राम भूधरम्।
निहत्याजगरं घोरं विघ्नसंघमिवेषुणा ॥ २६४ ॥

वीणास्वनैर्वशीकृत्य राक्षसीं कामरूपिणीम्।
कामरूपाद्रिमुल्लङ्घ्य प्रययौ किन्नरीप्रियः ॥ २६५ ॥

बलवान्मुद्गराघातनिखातैः शस्त्रशङ्कुभिः।
एकधारं ततः शैलमारुरोहातिसाहसः ॥ २६६ ॥

अथोग्रतरमारुह्य वज्रकाख्यं स पर्व्वतम्।
गृध्ररूपां समालोक्य राक्षसीं पिशितैषिणीम् ॥ २६७ ॥

परिवृत्तेन संच्छन्नः समांसमृगचर्म्मणा।
स पादमूले तस्याद्रेस्तस्थौ निश्चलविग्रहः ॥ २६८ ॥

मांसलुब्धा तमुत्क्षिप्य गृध्ररूपा निशाचरी।
निदधे शिखरस्याग्रे भोक्तुं भीषणविग्रहा ॥ २६९ ॥

मृगचर्म्म समुत्सृज्य तां निहत्य स वीर्य्यवान्।
नीरन्ध्रखदिराकीर्णं प्राप खादिरभूधरम् ॥ २७० ॥

प्रविश्य तद्गुहां लेभे शिलां व्यस्य महौषधिम्।
शीता तपतमःसर्पराक्षसादिभयापहाम् ॥ २७१ ॥

འཁྲུལ་འཁོར་རི་གཉིས་རབ་བརྡིབས་པས། སྒྲོག་ནི་འགྲོག་པར་དེ་ཡིས་སྤྲིན།
འཁྲུལ་འཁོར་ཕྱུར་པ་མདའ་རྩེ་ཡིས། བཅད་ནས་གཡོ་བ་མེད་པར་བྱས། 272

འཁྲུལ་འཁོར་ཕྱུར་པ་བཅད་རྣམས་ཀྱིས། འཁྲུལ་འཁོར་སྒྲ་ནི་དེས་བཅོམ་ཞིང་།
འཁྲུལ་འཁོར་འཁོར་ལོ་བཅད་དེ་བཞིན། ལྕགས་ཀྱི་འཁྲུལ་འཁོར་སྦྲུར་བའོ། 273

དྲག་དུ་སྟོན་བྱེད་སྐྱེས་བུ་གཉིས། བཟོད་དཀའ་ཞུག་གི་འཁྲུལ་འཁོར་གཉིས།
དེ་བཞིན་རྒྱ་སྦྲིན་སྦྲིན་པོའི་སོའི། འཁྲུལ་འཁོར་དྲག་པོས་འཇོམས་པ་གཉིས། 274

འཇིགས་རུང་སྲུན་པ་ཟབ་བའི་ཕྱུག། ཁྲོན་པ་གཉིས་ཀྱང་རྣམ་པར་འགོངས།
རྒྱ་བོ་ཆེན་པོ་ཡང་དག་བཀོལ། དེ་ངོགས་སྲིན་པོ་རྣམས་བསད་ནས། 275

མཆེ་བའི་དུག་ལྡན་གནས་པའི་རྩོ། བ་དྷཾ་ག་ཞིས་ཁྲུར་འགྲོད་དང་།
གང་འགྲམ་མི་འམ་ཅི་དག་གི། འབངས་རྣམས་ཆུ་བའི་སྒྲ་དག་གི། 276

དེ་འགྲོའི་སེམས་ལ་བགེགས་བྱེད་པ། ཀླུང་ནི་དུ་བ་ཅན་དག་དང་།
དེ་བཞིན་གོད་བ་ཅན་ཞེས་པ། གོད་པས་སེམས་ལ་གནོད་བྱེད་དང་། 277

མི་འམ་ཅི་མོ་རྣམས་དག་གིས། གང་གི་འགྲམ་དུ་གདུང་སྟེར་བ།
ཁྲུར་བགྲོད་གཞན་ཡང་བརླས་བྱས་ཏེ། དེ་འོག་སྒྲ་ལྡན་ཀླུང་ཅན་སྤྱིན། 278

དེ་ནས་དེ་ལ་ཐར་འདོད་པས། འགྲམ་གྱི་སྒྲ་ཡི་འཁྲི་ཤིང་བཟུང་།
ཀླུང་གིས་བསྐྱལ་བས་པ་རོལ་ཕྱིན། སྒྲ་ཡི་འཁྲི་ཤིང་དེ་ཡིས་ཐོབ། 279

स यन्त्रपर्व्वतौ प्राप्य संघट्टैः प्राणहारिणम्।
यन्त्रकीलं शराग्रेण छित्वा चक्रे विनिश्चलौ ॥ २७२ ॥

यन्त्रकीलसमुच्छेदैर्यन्त्रद्वारं विदार्य्य सः।
छेदनं यन्त्रचक्रस्य यन्त्रयुक्तौ तथायसौ ॥ २७३ ॥

तीव्रप्रहारौ पुरुषौ यन्त्रमेषौ च दुःसहौ।
यन्त्रोग्रदन्तनिर्घोषौ तथा मकरराक्षसौ ॥ २७४ ॥

घोरान्धकारगम्भीरं गुहाकूपं विलङ्घ्य च।
तुङ्गां सरितमुत्तीर्य्य हत्वा तत्कूलराक्षसान् ॥ २७५ ॥

आशीविषावृतजलां पतङ्गाख्याञ्च निम्नगाम्।
रोदिनीञ्च नदीं तीरे यस्याः किन्नरचेटिकाः ॥ २७६ ॥

कुर्व्वन्ति रोदनरवैर्विघ्नं तज्ज्ञतचेतसाम्।
तद्विधां हासिनीं नाम हासापहृतचेतसाम् ॥ २७७ ॥

दिशन्ति पुलिने यस्या व्यसनं किन्नराङ्गनाः[१]।
लङ्घयित्वापगाश्चान्या वेत्रां प्राप्य नदीं ततः ॥ २७८ ॥

कूलवेत्रलतालम्बी तस्यामथ तितीर्षया।
पवनप्रेरितां पारवेत्रवल्लीमवाप सः ॥ २७९ ॥

---

१ H reads किन्नरीगणाः।

རེ་བ་བཞིན་དུ་རབ་རིང་བ། དེ་ཡི་ཕ་རོལ་འགྲམ་དུ་ཕྱིན།
མི་འམ་ཅི་ཡི་གྲོང་ཁྱེར་ནི། རབ་གསལ་ཤེལ་གྱི་ཁང་པ་མཐོང་། 280

དེ་ཡི་དཔལ་བྲུས་ནང་དུ་ཞུགས། གསེར་གྱི་བད་ལྡན་མཛེས་པར་ཕྱིན།
དེ་ཡི་ངོགས་ཀྱི་ཤིང་ལ་འཛེགས། རིན་ཆེན་འཁྲི་ཤིང་གིས་འཁྲིབས་ནས། 281

དེར་དེས་ཆུ་སྐྱེས་དངུལ་ཚོགས་ཀྱི། དྲི་བཟང་སེར་པོར་གྱུར་བའི་ཆུ།
མི་འམ་ཅི་མོ་ནམ་དག་གིས། གསེར་གྱི་བུམ་པར་ལེན་པ་མཐོང་། 282

དེར་ནི་བུམ་འདེགས་ངལ་བ་ཡིས། གཟིར་བ་ཅིག་ཅན་དེས་མདོང་ཕྱོགས།
ལག་པས་རྟེན་ནས་གྲོགས་བྱས་དེ། དལ་བུ་ཡིས་ནི་དེ་ལ་དྲིས། 283

མ་མ་སུ་ཡི་ཆེད་དུ་ནི། ཆུ་འདི་འབད་ནས་ལེན་པར་བྱེད།
གང་ལ་གུས་པས་བྱེད་ནམས་ནི། ཡོངས་སུ་ངལ་འདི་ཅི་མི་བྱེད། 284

དེ་ལྟར་ཚིག་སྙན་གྱིས་དེས་དྲིས། མཛེས་སྡུག་སྙན་སྒྲ་ལྡན་པ་ཡིས།
ཕྱོགས་སུ་སྐད་ཅིག་གིས་ལྷུང་མ། དེ་ཡིས་དེ་ལ་རབ་སྨྲས་པ། 285

མི་ཡི་དྲི་སྣང་དག་བྱའི་སྐྱུར། རྟག་ཏུ་དྲི་བཟང་ཆུ་ནམས་ཀྱིས།
མི་འམ་ཅི་རྒྱལ་ཡབ་ཀྱི་བཀས། ཡིད་འཕྲོག་མ་ནི་ཁྲུས་བྱེད་དོ། 286

ཞེས་པ་དེ་ཡིས་བརྗོད་ཐོས་ནས། སྐད་ཅིག་བདུད་རྩིས་གྲན་པ་བཞིན།
དེ་ཡི་རྟགས་མཚན་སོར་གདུབ་ནི། གསེར་གྱི་བུམ་པར་དེ་ཡིས་འཕངས། 287

तया प्राप परं पारमाश्वयेवातिदीर्घया।
ददर्श किन्नरपुरं स्फार[1]स्फटिकमन्दिरम्॥ २८०॥

प्रविश्य स शनैः प्राप्य कान्तां कनकपद्मिनीम्।
तत्तीरतरुमारुह्य तस्थौ रत्नलताट्टतः॥ २८१॥

स ददर्शाम्बुजरजःपुञ्जैः सुरभिपिञ्जरम्।
हेमकुम्भैर्जलं तत्र नयन्तीः किन्नराङ्गनाः॥ २८२॥

कुम्भोत्क्षेपे श्रमार्त्तायास्तत्रैकस्याः समेत्य सः।
हस्तालम्बेन साहाय्यं कृत्वा पप्रच्छ तां शनैः॥ २८३॥

मातः कस्य कृते तोयमिदं यत्नेन नीयते।
यद्भक्त्या गण्यते नायं भवतीभिः परिश्रमः॥ २८४॥

इति तेन प्रियगिरा सा पृष्टा तमभाषत।
माधुर्य्यधुर्य्यसौन्दर्य्ये पक्षपातवती क्षणात्॥ २८५॥

मर्त्यामोदापनोदाय सदा सुरभिवारिभिः।
पितुः किन्नरराजस्य गिरा स्नाति मनोहरा॥ २८६॥

तथेति कथितं श्रुत्वा सुधासिक्त इव क्षणात्।
स हेमकुम्भे चिक्षेप तदभिज्ञाङ्गुलीयकम्॥ २८७॥

---

१ W I स्फुरत्स्फटिकमन्दिरम्।

དེ་ནས་སྒོར་གདུབ་མངོན་པར་འཕྲོག་བྱེད་དེ་ནི་བུམ་པ་ལས།
ཁྲས་བྱེད་ཡིད་འཕྲོག་མ་ཡི་ནུ་མའི་བུམ་པ་བཟུང་ལ་ལྷུང་།
གང་གི་གཟུགས་བརྙན་ཟེར་ལྡན་རིན་ཅན་འོད་ཟེར་རི་མོ་ཡིས།
སྒྱུར་དུ་སེན་མོ་འདེབས་པའི་རྩེ་དགའ་དག་དང་མཚུངས་པ་ཐོབ། 288

ད་རྗེས་རིན་ཅན་སྒོར་གདུབ་ལུས་མེད་གདམ་དག་ནང་སོང་བ།
རང་གི་རྗེས་སུ་ཆགས་པ་གཟུགས་ཅན་བཞིན་དུ་བརྡེགས་བྱས་ནས།
བདག་པོ་འོངས་པར་ཤེས་ཏེ་འདི་ནི་ཁྱོད་ཀྱིས་གང་ལས་ཐོབ།
ཅེས་བ་དེ་ཡིས་འབངས་མོ་ལ་ནི་རངས་པ་བཞིན་དུ་སྨྲས། 289

དེ་ནས་འབངས་མོས་དེ་ལ་སྨྲས། ལྷ་མོ་རྫིང་བུའི་ངོགས་དག་ན།
ཡིད་སྨྲུབས་མངོན་དུ་གྱུར་པ་བཞིན། དར་བབ་མཛེས་བ་འགའ་ཞིག་མཆིས། 290

གང་མཐུ་སྙིང་པོ་ཅན་གྱི་རྒྱུ། གུར་གུམ་མཛེས་པ་ཉིད་བསྟེན་པ།
སོར་གདུབ་འདི་ནི་དེ་ཉིད་ཀྱིས། གསེར་གྱི་བུམ་པ་འདི་རུ་འཕངས། 291

ཞེས་པ་དེ་ཡི་ཚིག་སྐན་ཐོས། གཟུགས་བཟང་ལྡན་པ་ཡིད་འཕྲོག་མས།
ཁྱོ་ནི་འོངས་པར་ངེས་བྱས་ནས། དེ་ཉིད་དེ་ནི་འགུགས་སུ་བཏང་། 292

དེ་ཡིས་རབ་སྤྲས་སྐྱིད་ཚལ་གྱི། ཁང་བར་བཀོད་པའི་མཛེས་པ་ནི།
ཀུ་མུད་ཅན་གྱི་ཟླ་བ་བཞིན། ཡིད་འཕྲོག་མ་ནི་སོང་བས་མཐོང་། 293

स्नान्त्यास्ततस्तदभिहारि मनोहरायाः
कुम्भात्पपात कुचकुम्भयुगेऽङ्गुलीयम् ।
यस्यांशुमत्प्रतिमरत्नमयूखलेखाः
क्षिप्रं नखक्षतविलासतुलामवापुः ॥ २८८ ॥

मूर्तं ततः स्वमनुरागमिवाकलय्य-
रत्नाङ्गुलीयकमनङ्गकथान्तरङ्गम् ।
सा कान्तमागतमवेत्य कुतस्त्वयेदं
सम्प्राप्तमित्यवददुच्छ्वसितेव दासीम् ॥ २८९ ॥

ततस्तामवदद्दासी देवि पुष्करिणीतटे ।
स्थितः कोऽपि युवा कान्तः प्रत्यक्ष इव मन्मथः ॥ २९० ॥

निक्षिप्तं हेमकुम्भेऽस्मिन्निदं तेनाङ्गुलीयकम् ।
भजते यत्प्रभागर्भं पयः कुङ्कुमकान्तताम् ॥ २९१ ॥

इति तद्वचनं तन्वी प्रियं श्रुत्वा मनोहरा ।
निश्चित्य दयितं प्राप्तमानिनाय तयैव तम् ॥ २९२ ॥

तया गुप्ततरे न्यस्तं कान्तमुद्यानमन्दिरे ।
कुमुद्वतीव शशिनं गत्वापश्यन्मनोहरा ॥ २९३ ॥

ཕན་ཚུན་ལྷ་བར་བྱེད་པའི་ནོམ་འཕྲུལ་དང་།
འབྲལ་བའི་ཡོངས་གདུང་ནོམ་པར་ཆད་པ་དང་།
དེ་དག་རབ་དགའ་ཉམས་སུ་མྱོང་གྱུར་པ།
ལུས་མེད་ཡན་ལག་ཀུན་ལྡན་མཛེས་པ་ཐོབ། 294

བྲལ་བའི་དུས་སུ་གང་གང་ཚུང་ཟད་བསམས་པས་ནང་དུ་གོམས་བྱས་དང་།
གང་གང་རབ་དགའ་རབ་གྱིས་ཡིད་སྐྱུང་འགྲོགས་ཀྱི་འདེབ་དང་སྨན་བ་དང་།
གང་གང་མཛད་བར་མཚུངས་དགའ་བར་སྤྲིད་ལྡན་བུང་བོར་འོས་གྱུར་བ།
དེ་དེ་ཐམས་ཅད་མཛའ་གཙུགས་སྐལ་བཟང་ཁྱོ་ཤུག་དེ་གཉིས་དག་གིས་བྱས།
295

དེ་རྗེས་སྤྱོད་ཚུལ་བསྒྲིབས་པ་ནི། ངོ་ཚ་ལྡན་པའི་ཡིད་འཕྲོག་མས།
བཤད་ནས་ཕ་མ་དག་ལ་ནི། བདག་ཉེས་ཡི་ཡིད་འབྱུང་བསྟན། 296

དེ་ནས་མི་འམ་ཅི་ཡི་རྒྱལ། དེ་ལ་ཁྲོས་པས་མཆུ་བསྐྱོད་ཅིང་།
བུ་མོའི་བདག་ནི་མཐོང་བའི་ལམ། ཡོངས་སུ་བཏང་ནས་རབ་སྨྲས་པ། 297

ཀྱེ་མ་མི་འོས་སྐྱེ་བོ་ལ། ཆ་ཡིས་བག་མེད་ལྷུང་གྱུར་པ།
སྤྱོད་ཚུལ་ངན་པ་བཀུས་ཀྱང་ནི། ཆགས་པ་ཉིད་ནི་ཁྱོད་མི་གཏོང་། 298

ཁྱོད་ཀྱི་མཛེས་སྡུག་ལང་ཚོལ། ལྷ་ནམས་ཀྱིས་ནི་རིག་བྱ་འདི།
ཀྱེ་མ་མི་དང་མཛའ་བ་ཡིས། མྱ་ངན་བྱ་འོས་ཉིད་དུ་གྱུར། 299

परस्परालोकनविभ्रमेण
वियोगसन्तापनिवेदनेन।
तयोः प्रहर्षानुभवेन लेभे
शोभामशेषाङ्गवतीमनङ्गः॥ २९४॥

यद्यत् किञ्चिद्विरहसमये चिन्तयाभ्यस्तमन्त-
र्यद्यत् प्रौढ़प्रमदसुहृदा मन्मथेनोपदिष्टम्।
यद्यत् प्रेम्णः सदृशमुचितं यद्यदौत्सुक्यराशे
स्तत्तत्सर्व्वं प्रणयसुभगं दम्पती चक्रतुस्तौ॥ २९५॥

ततः प्रच्छन्नवृत्तान्तं लज्जमाना मनोहरा।
निवेद्यादर्शयत् पित्रोः पतिं भूमिमनोभवम्॥ २९६॥

ततः किन्नरराजस्तां कोपप्रस्फुरिताधरः।
उवाच दर्शनपथं परिहृत्यात्मजापतेः॥ २९७॥

अहो प्रमादपतिता दैवादनुचिते जने।
न विमुञ्चसि दुर्वृत्ते क्षाल्यमानापि रक्तताम्॥ २९८॥

यौवनोत्पत्तिलावण्यं स्पृहणीयं दिवौकसाम्।
वत प्रयातमेतत्ते मर्त्यस्नेहेन शोच्यताम्॥ २९९॥

མཐོན་པོའི་རིགས་ལས་སྐྱེས་གྱུར་ཅིང་། ཕྱུག་པོའི་ཡང་ཆོ་རབ་གྱིས་པ།
ཐར་འགྲོ་འཁྲུགས་པས་ཉམ་ཉམས་པ། ཁྱོད་ནི་ཤིན་དུ་འོག་དུ་འགྲོ། 300

མཁས་པ་ཆགས་བྲལ་སྐྱེད་བྱེད་ཅིང་། རིགས་ནི་སྐྱེངས་པར་བྱེད་པ་མོ།
མི་བསྲུན་རིགས་བཞིན་དྲི་མ་ཅན། ཁྱོད་ནི་སུ་ཡང་མི་འདོད་དོ། 301

གཟུགས་ཙམ་གྱིས་ནི་ཁྱོད་ཆེམ་ནས། གལ་དེ་མི་ཡི་དབང་གྱུར་ན།
གསེར་ལས་སྤྲུལ་པ་སྐྱེས་བུ་ཡི། གཟུགས་དང་རྟེ་དགའ་ཅིས་མི་བྱེད། 302

མཐུ་དང་ཡོན་ཏན་གྱིས་དམན་པ། སྐྱེས་བུ་རབ་མཛེས་དབྱིབས་ཅན་གྱི།
མཛེས་སྡུག་རི་མོར་བྲིས་པ་ཡི། སྐྱེས་བུ་ཡི་བཞིན་རྩིག་པ་མཛེས། 303

འབྲིལ་དམན་ངོ་ཚས་སྡིག་ཅན་མ། ཁྱོད་ཁྱོ་བདག་གིས་གསད་བར་བྱ།
ཁྱོད་སློང་ལ་འོངས་ལྷ་ཉམས་ཀྱི། བཞིན་ནི་བདག་གིས་ལྷ་མི་བོད། 304

བདེན་བར་སྨྲ་བ་དང་ལྡན་ཞིང་། མཐོན་པོར་གྱུར་པའི་རིགས་དག་ནི།
བུ་མོས་འཁྲམས་པར་བྱེད་པ་སྟེ། དུས་ནི་དེ་བར་དགའ་བས་བཞིན། 305

དེ་སྐད་ཕ་ཡིས་སྨད་གྱུར་དེས། མཆི་མའི་ཐིགས་པ་ནུ་མ་ལ།
དོ་ཤལ་སྐུད་མེད་སྒྲིག་བྱེད་ཅིང་། བཞིན་བདུད་དེ་ལ་རབ་སྨྲས་པ། 306

ཡབ་ལགས་ཁྲོ་བར་མི་འོས་པ། དེ་དག་བདག་ལ་གསུང་འོས་མིན།
མཐུ་ཡིས་མི་འནམ་ཅི་དག་ལས། ལྷག་པའི་མི་མ་ཐོས་སམ་ཅི། 307

उदग्रगोत्रप्रभवा घनयौवननिर्भरा।
निम्नगे क्षोभविभ्रष्टा यातासि सुतरामधः॥ ३०० ॥

विद्वदुद्वेगजननी कुलवैलक्ष्यकारिणी।
मलिना खलविद्येव सम्मतासि न कस्यचित्॥ ३०१ ॥

रूपमात्रेण दृष्टा त्वं यदि मर्त्यवशं गता।
तत् किं न रमसे हेमनिर्म्माणपुरुषत्विषा॥ ३०२ ॥

प्रभावगुणहीनस्य पुंसश्चारुतराकृतेः।
आलेख्यपुरुषस्येव सौन्दर्य्यं भित्तिरञ्जनम्॥ ३०३ ॥

बध्यो मे त्वत्पतिः पापे हीनसम्बन्धलज्जया।
मुखं द्रष्टुं न शक्नोमि त्वद्याच्ञ्चाप्तदिवौकसाम्॥ ३०४ ॥

सत्यमुत्साहयुक्तस्य कुलस्योन्नतिशालिनः।
जरेव किल कायस्य कन्या सङ्कोचकारिणी॥ ३०५ ॥

इति सा भर्त्सिता पित्रा तमुवाच नतानना।
अस्तहारं कुर्व्वाणा कुचयोर्बाष्पबिन्दुभिः॥ ३०६ ॥

कोपादनुचितं तात नैतन्मां वक्तुमर्हसि।
न श्रूयन्ते प्रभावेण किं नराः किन्नराधिकाः॥ ३०७ ॥

མཁའ་ལྡིང་གིས་ཀྱང་བགྲོད་དཀའ་བ། ས་འདི་གང་གིས་བགྲོད་གྱུར་ནས།
འོངས་པ་མཐུ་ཡི་ས་གཞི་དེ། མི་ཉིད་ཡིན་པར་ཅི་ལྟར་འགྱུར། 308

ལུས་ཅན་རྣམས་ཀྱི་ལུས་དག་ནི། ཡོན་ཏན་ཡང་དག་རྫོགས་བྱེད་ཉིད།
བསིལ་ཟེར་ཅན་གྱི་འོད་ཟེར་ནི། ཀུན་དགའ་སྐྱེད་པར་བྱེད་པ་ཡིན། 309

ཡབ་གཅིག་རིགས་ཀྱིས་ཅི་ཞིག་བྱ། ཡོན་ཏན་རང་བཞིན་རྗེས་སུ་འབྲང་།
ཟླ་ཀྱིས་བདུད་རྩི་ཟག་པ་ནི། ནག་པོ་བརྩེགས་པའི་སྤྲིན་ཟླ་ཉིད། 310

ཁ་ཅིག་ནང་ན་ཡོན་ཏན་ལྡན། དེ་བཞིན་གཞན་ནི་སྐྱོན་བསྒྲིབས་པས།
ནོར་བུ་རྣམས་ཀྱི་རིན་དག་ནི། མ་བརྟགས་འགོངས་པར་ཡོངས་མི་བྱ། 311

དེ་ཕྱོགས་མི་འམ་ཅི་ཡི་བདག དེ་དེ་བཞིན་ཞེས་སེམས་བྱེད་ཅིང་།
མག་པ་མང་དག་ཐོས་ནས་ནི། ཡོན་ཏན་ཤེས་པར་འདོད་པས་སྨྲས། 312

མི་འམ་ཅི་ཡི་བྱ་འདི་དག རི་ཞིག་ཁྱོད་ཀྱི་མཛེས་པས་བདུལ།
མཐུ་ནི་མང་དག་བསྟན་པ་ནི། མཆོག་གི་འབྲེལ་པ་དག་དུ་འོས། 313

ཤིན་ཏུ་ཡངས་པ་ཤརིའི་ནགས། ཤ་ར་ཕྱུང་བྱུས་སྐད་ཅིག་གིས།
དྲི་ལ་བྲི་གང་བདབ་མི་ཉུད་བར། རབ་ཏུ་བསྐུས་ལ་སླར་ཡང་བྱིན། 314

ཙནྡན་དང་འབེན་ལ་སོགས་པ་ཡི། གཞུ་ཡི་རིག་བྱེད་མཁས་པ་སྟོན།
དེ་ནས་གྲགས་པའི་བ་དན་ནི། ཡིད་འཕྲོག་མ་འདི་ཁྱོད་དབང་གྱུར། 315

गरुड़स्यापि दुर्लङ्घ्यामिमामुल्लङ्घ्य यः क्षितिम् ।
प्रभावभूमिरायाति मनुष्यः स कथं भवेत् ॥ ३०८ ।

गुणसंवादिनी मूर्त्तिर्भवत्येव शरीरिणाम् ।
करोत्यानन्दसंवादं द्युतिरेव हिमत्विषः ॥ ३०९ ॥

जात्या किं क्रियते तात स्वभावानुगुणा गुणाः ।
पूर्णेन्दुरमृतस्यन्दी कालकूटस्य सोदरः ॥ ३१० ॥

भवत्यन्तर्गुणाः केचिच्छन्नदोषास्तथा परे ।
अपरीक्ष्य न कर्त्तव्या मणीनां मूल्यलङ्घना ॥ ३११ ॥

श्रुत्वैतत् किन्नरपतिस्तत्तथेति विचिन्त्य च ।
जामातरं समाहूय गुणजिज्ञासयाब्रवीत् ॥ ३१२ ॥

त्वया कान्त्या जितास्तावदेते किन्नरदारकाः ।
सन्दर्शितप्रभावस्तु दिव्यसम्बन्धमर्हसि ॥ ३१३ ॥

अत्यायतं शरवणं छत्वोद्धृतशरं क्षणात् ।
व्युप्तमन्यूनमुच्चित्य पुनर्देहि तिलाढ़कम् ॥ ३१४ ॥

सन्दर्शय धनुर्वेदे दृढ़लक्ष्यादिकौशलम् ।
ततः कीर्त्तिपताकेयं तवायत्ता मनोहरा ॥ ३१५ ॥

ཞེས་དེ་དེ་ཡིས་གྲུ་གྲུ་ལས། འོས་པ་མིན་པའི་ལས་ལ་བསྐུལ།
གཞོན་ནུ་མཛེས་མ་ལ་ཆགས་པས། ཐམས་ཅད་བྲོ་བར་རབ་ཏུ་བཙེམས། 316

དོན་མེད་ངལ་ཞིང་ཚོར་མོངས་འབྲས། ཤ་ར་འབྱིན་ལ་རབ་ཞུགས་པ།
དེ་ཤེས་མིག་སྟོང་ལྡན་པ་ནི། ཕྱོགས་སུ་ལྷུང་བས་ཡང་དག་བསམས། 317

ཅི་སྐད་བསྐལ་པ་བཟང་པོ་པའི། བྱང་ཆུབ་སེམས་དཔའ་རྒྱལ་སྲས་འདི།
འབྲས་མེད་ཉོན་མོངས་ལས་ལ་ནི། མི་འམ་ཅི་ཡི་དབང་གིས་བསྐོས། 318

འདི་ཡི་ངལ་དུབ་དུས་འདི་ལ། བདག་གིས་སྟོང་གྲོགས་རབ་ཏུ་བྱ།
དེ་ལྟར་བསམས་ནས་བརྒྱ་བྱིན་གྱིས། དེ་ཡི་ལས་ནི་རྫོགས་བྱས་ཏེ། 319

མཆོད་སྦྱིན་བརྒྱ་པས་བསྟན་པ་ཡི། གནོད་སྦྱིན་ལག་གི་གཟུགས་ཅན་གྱིས།
ཤ་རའི་ནགས་ནི་རབ་ཕྱུང་བ། མཉམ་པར་ཏིལ་ནི་བྲེ་གང་བཏབ། 320

བརྒྱ་བྱིན་གྱིས་སྦྲོས་གྲོག་སྦུར་གྱིས། ཡང་དག་བསྡུས་ནས་གཅིག་ཏུ་བྱས།
མི་འམ་ཅི་ཡི་དབང་པོ་ལ། ཡ་མཚན་སྐད་དུ་གཞོན་ནུས་ཕུལ། 321

སྟོབས་ཀྱིས་དེ་ཡི་གསེར་གྱི་ནི། ར་བ་བདུན་དང་ད་ལ་བདུན།
ཕག་གི་འཁོར་ལོ་ཡང་དག་ལྡན། སྒྲོ་ལྡན་ཤིན་ཏུ་རྣོ་བས་ཕུག། 322

གང་གིས་དེ་ཡི་ཅོད་པན་ལ། ལྷ་ཡི་མེ་ཏོག་ཆར་འབབ་པ།
བསྟན་བཅོས་མཆོད་དང་ཅོལ་དང་ནི། རྒྱུ་ཅོལ་བཟོ་དང་སྟོབས་ནམས་བསྟན། 323

इत्यशक्तोऽपि कौटिल्यात् प्रेरितस्तेन कर्म्मणि।
सर्व्वं कान्तानुरागेण कुमारः कर्त्तुमुद्ययौ ॥ ३१६ ॥

मिथ्याश्रमक्लेशफले प्रवृत्तं शरपाटने।
तं विज्ञाय सहस्राक्षः पक्षपातादचिन्तयत् ॥ ३१७ ॥

किं भाद्रकल्पिको बोधिसत्त्वोऽयं पार्थिवात्मजः।
नियुक्तः किन्नरेन्द्रेण निष्फले क्लेशकर्म्मणि ॥ ३१८ ॥

अस्यास्मिन् समयायासे कार्य्यं साहायकं मया।
इति सञ्चिन्त्य शक्रोऽस्य कर्म्मनिष्पत्तिमादधे ॥ ३१९ ॥

शतक्रतुसमादिष्टैर्यक्षैः शूकररूपिभिः।
उत्पाटिते शरवने समे व्युप्तन्तिलाढकम् ॥ ३२० ॥

एकीकृतं समुच्चित्य शक्रसृष्टैः पिपीलकैः।
कुमारः किन्नरेन्द्राय विस्मिताय न्यवेदयत् ॥ ३२१ ॥

स सप्तकनकस्तम्भान् सप्ततालान् बलोर्ज्जितः।
शूकरीचक्रसंयुक्तान् विद्धा निशितपत्त्रिणा ॥ ३२२ ॥

शास्त्रास्त्रविक्रमकलाशिल्पशक्तिमदर्शयत्।
ययास्य पेतुर्मुकुटे दिव्याः कुसुमवृष्टयः ॥ ३२३ ॥

མི་འམ་ཅི་ཡི་རྒྱལ་པོ་ནི། དེ་མཐུས་ཡ་མཚན་གྱུར་མོད་ཀྱང་།
དེ་ཉིད་བསླུ་བའི་སླད་དུ་སླར། རིགས་པ་དེ་དེ་སེམས་པར་བྱེད། 324

མངོན་པར་ཞེན་པ་ཤིན་ཏུ་བརྟན་ལྡན་གཞན་གྱི་གནོད་པས་ཆུ་བཞིན་འཁྲུག།
ཡོན་ཏན་བརྒྱ་ཕྲག་གིས་ཀྱང་མི་མགུ་ཤིན་ཏུ་འགལ་བའི་བློ་ཅན་རྣམས།
ཀྱི་ཆེ་མཚར་ལ་སྨྲ་བཅད་འཛིན་ཅིང་དམ་པ་བསྟོད་ལ་དགོད་པར་བྱེད།
གྲགས་པ་མཆོག་ལ་བཞིན་ངག་ལོག་ཅིང་འགལ་བ་བརྗོད་པ་ཉིད་དུ་གྱུར། 325

དེ་ལ་དེས་སྨྲས་ཁྱོད་ཀྱིས་ནི། ལྷ་ཡི་མཐུ་འདི་གསལ་བར་བྱས།
དེ་ནི་ཤེས་རབ་ཁྱད་འཕགས་དག། ཁྱོད་ཀྱི་ཡང་དག་བསྟན་པར་འོས། 326

གཟུགས་དང་ཁ་དོག་དབྱེར་མེད་ཅིང་། རྒྱན་དང་ན་ཚོད་མཚུངས་གྱུར་པ།
མི་འམ་ཅི་མོ་འཁོར་པ་ཡི། དབུས་ནས་རང་གི་དགའ་མ་ཟུངས། 327

ཞེས་པ་བརྗོད་ནས་དེ་ཡིས་སྨྲར། མི་འམ་ཅི་མོ་ལྔ་བརྒྱ་དག།
རྫོགས་པ་ཁ་དོག་ལང་ཚོ་དང་། ཆས་མཚུངས་མདུན་དུ་དེ་ཡིས་མཐོང་། 328

དེ་དག་དབུས་ནས་ཡིད་འཕྲོག་མ། དེ་ཡིས་ཡོངས་སུ་ཤེས་ནས་བཟུང་།
འཁྲི་ཤིང་ནགས་ཀྱིས་བསྐྱིབས་པ་ཡི། ཙཱུ་ཏའི་འཁྲི་ཤིང་གང་བས་བཞིན། 329

དེ་ནས་མི་འམ་ཅི་དབང་གིས། འདི་ནི་ལྷ་ཞེས་ངེས་བྱས་ནས།
ཆོས་པས་དེ་ལ་ཡིད་འཕྲོག་མ། ལྷ་ཡི་རིན་ཆེན་དང་བཅས་བྱིན། 330

विस्मितोऽपि प्रभावेण तस्य किन्नरभूपतिः ।
पुनस्तद्वञ्चनायैव तां तां युक्तिमचिन्तयत् ॥ ३२४ ॥

दधति विपुलाश्चर्य्ये मौनं हसन्ति सतां स्तुतौ
मलिनवदनाः कीर्त्त्युत्कर्षे व्रजन्ति विवादिताम् ।
अपि गुणशतैर्नाराध्यन्ते विरुद्धधियः परं
परपरिभवक्षोभारम्भस्थिराभिनिवेशिनः ॥ ३२५ ॥

स तमूचे प्रभावोऽयं दिव्यः प्रकटितस्त्वया ।
प्रज्ञाप्रकर्षमधुना सन्दर्शयितुमर्हसि ॥ ३२६ ॥

अभिन्नवर्णरूपाणां तुल्याभरणवाससाम् ।
किन्नरीणां स्थितां मध्ये गृहाण निजवल्लभाम् ॥ ३२७ ॥

इत्युक्तः स पुनस्तेन किन्नरीशतपञ्चकम् ।
तुल्यवर्णवयोवेशं ददर्श व्यग्रमग्रतः ॥ ३२८ ॥

तासां मध्ये परिज्ञाय स जग्राह मनोहराम् ।
वल्लरीवनसंच्छन्नां भृङ्गश्चूतलतामिव ॥ ३२९ ॥

देवोऽयमिति निश्चित्य ततस्तां किन्नरेश्वरः ।
तुष्टस्तस्मै ददौ दिव्यरत्नैः सह मनोहराम् ॥ ३३० ॥

མཆོག་གི་ལོངས་སྤྱོད་འབྱོར་པ་ཡིས། གུས་དང་བཅས་པས་དེ་ཡིས་མཆོད།
དེ་ལ་ཞུས་ནས་ཆུང་མར་བཅས། གཞོན་ནུ་རང་གི་གྲོང་ཁྱེར་སོང༌། 331

ཡིད་འཕྲོག་མ་སྨོན་འགྲོ་བའི་བུ། འོང་བ་མཐོང་ནས་ས་ཡི་བདག
བདུད་རྩིའི་རྒྱ་མཚོས་གླང་པོའི་དབང༌། མཐོང་ནས་འཕྱུར་བཞིན་རྣམ་པར་མཛེས། 332

དེ་ནས་རྒྱལ་བྱིན་སྤྱོད་ཚུལ་ལྷ་བའི་གདུགས་དཀར་ལྡན་པ་ལ།
སྐྱེ་བོའི་གདུང་བ་འཕྲོག་པའི་དེ་ནི་མངོན་པར་དབང་བསྐུར་ནས།
ཚིག་ཞེས་བསིལ་ལྡན་དབེན་པའི་བདུད་རྩིས་མངོན་པར་དགའ་བ་ཡིས།
རབ་ཏུ་ཞི་བ་ལྡན་པའི་གྲིབ་བསིལ་མི་ཡི་བདག་པོས་བསྟེན། 333

ནོར་བཟང་དབང་བསྐུར་ཐོབ་པའི་སྤྱི་དོན་ཉིད།
གཟི་བྱིན་གྱི་ཆེ་དེ་ལ་རིན་ཅན་བདུན།
གཙོ་བོ་ཉིད་གྱུར་གསར་པའི་མཐུས་འཇིགས་ནས།
གཡོག་ལ་གནས་པའི་དོན་བཞིན་ཉེ་བར་འོངས། 334

ནོར་བཟང་བྱང་ཆུབ་སེམས་དང་དེ་ཉིད་དེ།
ཡིད་འཕྲོག་མར་གྱུར་དེ་ཡང་གྲགས་འཛིན་མ།
དེ་དང་བྲལ་བའི་སྡུག་བསྔལ་སེམས་གདུངས་པ།
འདི་སྐྱིང་འདོད་པས་བཅིངས་ལས་བདག་གིས་ཐོབ། 335

श्लाघ्योपभोगविभवैः पूजितस्तेन सादरम् ।
जायासखस्तमामन्त्र्य कुमारः स्वपुरं ययौ ॥ ३३१ ॥

मनोहराग्रगं पुत्रं प्राप्तमालोक्य भूपतिः ।
राकेन्दुदर्शनोद्भूतः सुधाम्बुधिरिवाबभौ ॥ ३३२ ॥

पुत्रं ततश्चरितचन्द्रसितातपत्रे
राज्येऽभिषिच्य परितापहरं प्रजानाम् ।
सन्तोषशीतलविवेकसुखाभिरामां
छायामसेवत नृपः प्रशमद्रुमस्य ॥ ३३३ ॥

प्राप्ताभिषेकं सुधनं प्रभाते
तं सप्तरत्नानि पृथुप्रतापम् ।
नवप्रभावप्रभुभावभीत्या
सेवानिवासार्थमिवोपजग्मुः ॥ ३३४ ॥

स बोधिसत्त्वः सुधनोऽहमेव
यशोधरा सापि मनोहराभूत् ।
तद्विप्रयोगव्यसनानलार्त्तिः
कामानुबन्धादियती मयाप्ता ॥ ३३५ ॥

དེ་སྐད་འདོད་པ་པདྨོའི་བཞིན་གྱི་མིག་གི་མཐའ་ལ་གནས་གྱུར་ཅིང་།
རབ་གྱིས་མི་དོག་ལས་སྐྱེས་རྟོལ་ཚོགས་ཏཱ་ལ་ཏཱ་ལའི་རྩེ་མོ་ཅན།
སྔོངས་བྱེད་སྲུ་ངན་གདུང་བའི་མདའ་ཡིས་གང་གི་འཇིག་རྟེན་འབིགས་བྱེད་པ།
རྫོན་པའི་རྩེ་དགས་ཞི་བའི་རི་དྭགས་འཆིང་བྱེད་དམ་པ་ཉམས་ཀྱིས་སྤྲངས། 336

དེ་ནས་གྱུལ་བ་རང་གིས་རང་གི་གདམས།
བཤད་པ་དེ་ནི་དགེ་སློང་ཚོགས་ཀྱིས་ཐོས།
འདོད་པ་རོ་ལྡན་ཁོ་ན་སྤྱིད་པ་ནི།
འདབ་བརྒྱའི་ཚ་བ་སྤྲོས་པོ་ཉིད་དུ་ངེས། 337

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ནོར་བཟང་གི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་ཙ་བཞི་པའོ།།

तस्मात् कामः कमलवदनानेत्रपर्य्यन्तवासी
वर्ज्यः सद्भिः शममृगवधूबन्धकेलीकिरातः ।
स्फूर्जत्पुष्पप्रसरजरजःपुञ्जहालाहलोग्रै-
र्लोकः शोकव्यसनविशिखैर्मोहनैर्येन विद्धः ॥ ३३६ ॥

इति भिक्षुगणाः स्वयं जिनेन
स्वकथान्तां विनिवेदितां निशम्य ।
सरसं पृथुमूलमेव मेने
शतशाखस्य मनोभवं भवस्य ॥ ३३७ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां सुधनकिन्नर्य्यवदानं नाम चतुःषष्टितमः पल्लवः ॥

Chapter LXV.

རྭ་གཅིག་པའི་རྟོགས་བརྗོད།

ལོངས་སྤྱོད་རྩེ་དགའ་དག་གི་དྲི་ཡི་ཚོགས་ཀྱིས་དབང་པོ་ཐམས་ཅད་ཡོངས་སུ་དྲངས་གྱུར་
ཆགས་ལྡན་སྤྲང་རྩི་འཐུངས་ཉམས་ཤིན་ཏུ་དམ་པར་འདི་ཉིད་དུ་ནི་གང་གང་འཆིང་བྱེད་པ།
སྐྱེ་བ་སྔར་གོམས་ཞེན་ཅིང་ཤིན་ཏུ་ཆགས་བཅས་ལས་བྱུང་བག་ཆགས་ཙ་བའི་ལྷག་མ་ལས།
དོགས་པ་མེད་ཀྱང་སྐྱེ་བོའི་ཡིད་འདིར་པདྨའི་རྗེས་སུ་མཐུན་པའི་འདོད་ཆགས་འབྱུང་བར་
འགྱུར།

ཤཱཀྱའི་གྲོང་ཁྱེར་དག་ཏུ་སྔོན། ཉ་གྲོ་དྷ་ཡི་ཀུན་རར་གནས།
རྒྱལ་བ་བཅོམ་ལྡན་འདས་ལ་སྙར། དགེ་སློང་ཡང་དག་ཚོགས་པས་ཞུས། 2

ཉི་བར་ཞུགས་ཤིང་ཆས་ནི་ཡོངས་སུ་བསྐྱུར།
འཁོར་བའི་ཉམ་འགྱུར་སྤྱོད་ལས་ཟློག་པ་ཁྱོད།
མི་ཡི་བདག་པོའི་ཕོ་བྲང་འཁོར་འདུག་པ།
གྲགས་འཛིན་མས་མཐོང་ཉམ་པར་སྨོངས་པ་བཞིན། 3

ཁྱོད་མཐོང་ཉིད་ན་ཀུན་དུ་བསྒྲིན་བྲས་ཤིང་།
འདར་ཞིང་གཡོ་བའི་ལུས་ལྡན་ཉམ་པར་གནས།
ལག་ན་ལ་དུའི་སྣོད་བཟུང་ཁྱོད་ཀྱིས་ནི།
ཟས་ཀྱི་ལྷག་གནས་དག་ལ་ཆགས་པར་བྱེད། 4

पञ्चषष्टितमः पल्लवः ।

एकशृङ्गावदानम् ।

प्राग्जन्माभ्यासलीनादतिसरसलसद्वासनामूलशेषात्
निःशङ्कस्यापि जन्तोः कमलकलनया जायते मानसेऽस्मिन् ।
रागः सम्भोगलीलापरिमलपटलाकृष्टसर्व्वेन्द्रियाणा-
मेकश्चैवातिमात्रं सरसमधुलिहां बन्धनं यः करोति ॥ १ ॥

न्यग्रोधारामनिरतं पुरा शाक्यपुरे जिनम् ।
भगवन्तं समापन्नाः पप्रच्छुर्भिक्षवः पुनः ॥ २ ॥

प्रवृत्तशान्तिं परिवृत्तवेशं
निवृत्तसंसारविकारवृत्तम् ।
अन्तःपुरं त्वां नृपतेर्विशन्तं
यशोधरा वीक्ष्य विमुह्यतीव ॥ ३ ॥

त्वद्दर्शने तिष्ठति सर्व्वथैव
विभूषिता कम्पतरङ्गिताङ्गी ।
भोज्याधिवासे भवतः करोति
विलोभनं मोदकपात्रहस्ता ॥ ४ ॥

དེ་ཡི་ཡིད་ཀྱི་ནོམ་འགྱུར་ནོས་པར་ལྡན།
ད་ལྟ་ཡང་ནི་ཉེ་བར་ཞི་མི་འགྱུར།
ཁྱོད་ཞལ་ཟླ་འོད་བྲལ་ན་ཤིན་ཏུ་དེ།
ཉམས་དེ་ཉིན་བར་ཀུ་མུད་ལྡན་པ་བཞིན། 5

དེ་སྐད་མཚར་ལས་དགེ་སློང་ཚོགས་ཀྱིས་དྲིས།
ཐུང་ཟད་འཇོམ་པ་མཆུ་ཡི་ཨལ་འདབ་ལ།
ཀྱུ་དིག་འབྲས་བུ་རབ་སྨྲས་བྱུ་རུའི་འོད།
མཛེས་མ་འགོད་ཅིང་བཅོམ་ལྡན་གྱིས་གསུངས་པ། 6

མངོན་འདོད་རྩེ་དགའ་ཉམས་འགྱུར་ལྡན་པ་འདི།
གྲགས་འཛིན་མ་ནི་དེང་ཉིད་འཛིན་པ་མིན།
སྐྱེ་གཞན་ལ་ཡང་འདོད་པའི་ཉམས་འཕྲུལ་གྱིས།
དེ་ཡི་ལ་དུས་བདག་ལ་ཆགས་པར་གྱུར། 7

ཀ་ཤིའི་གྲོང་དུ་མི་དབང་ཀ་ཤུ་སྦྱིན།
ཟླ་བའི་འོད་ལྟར་དཀར་བའི་གྲགས་པ་ཅན།
དགྲ་སྟོབས་གཉིས་འཐུང་ལྕགས་ཀྱུ་ཡིན་མོད་ཀྱང་།
སྒྲོད་ཚུལ་མི་རྣོ་རང་བཞིན་དྲང་བོར་གྱུར། 8

नाद्यापि शान्तिं समुपैति तस्याः
मनोविकारः स बहुप्रकारः ।
त्वदाननेन्दुद्युतिविप्रयुक्ता
सीदत्यलं सा हि कुमुद्वतीव ॥ ५ ॥

इति स्मयाद्भिक्षुगणेन पृष्टः
किञ्चित् स्मितेनाधरपल्लवस्य ।
प्रत्युप्तमुक्ताफलविद्रुमाभां
निवेश्य शोभां भगवान् बभाषे ॥ ६ ॥

यशोधराद्यैव विकारयुक्तां
बिभर्त्ति नैतामभिलाषलीलाम् ।
जन्मान्तरेऽपि स्मरविभ्रमैर्मे
सा मोदकैर्लोभनमेव चक्रे ॥ ७ ॥

काश्यः पुरा काशिपुरे नरेन्द्र-
श्चन्द्रावदातद्युतिकीर्त्तिरासीत् ।
अप्यङ्कुशः शत्रुमदद्विपाना-
मतीक्ष्णवृत्तः सरलस्वभावः ॥ ८ ॥

དཀའ་ཐུབ་འབད་པས་བུ་དོན་གཉེར་དེ་ལ།
བུ་མོ་པདྨ་ལྡན་ཉིད་གཅིག་པུ་བྱུང་།
སྐྱེ་གོ་སྐྱོང་ལ་གཡེལ་བ་དང་བཅས་པའི།
ས་བདག་ཕལ་ཆེར་རིགས་བརྒྱུད་ཉུང་བར་འགྱུར། 9

ཕོ་བྲང་འཁོར་དུ་དེ་ནི་ཡོངས་བསྐྱེད་ཅིང་།
སེམས་ལྷའང་བསམས་པའོ་མི་བདག་གིས་སྐྱོང་ནས།
མཁས་པ་ལ་སོགས་བློན་པོ་བོས་ནས་ནི།
གཉེར་བྲལ་དགའ་བ་ཉམས་པས་རབ་སྨྲས་པ། 10

ལོ་འདབ་གྱིས་ཞིང་ཚ་བ་བརྟན་པར་ལྷག།
སྐྱེ་བོ་ཀུན་གྱི་ཉེར་འཚོ་ཞིན་དུ་མཐོ།
མཚུངས་པར་སྐྱེ་བས་དམན་པའི་རྒྱལ་སྲིད་ནི།
སྨིན་བུས་བྲོས་པའི་ཞིང་བཞིན་བདག་གིས་རིག། 11

ཡང་ཚོ་རབ་ཏུ་སྨིན་འདོས་བསྙེན་པ་ཡིས།
བུ་མོ་པད་ལྡན་གཅིག་བུ་བདག་ལ་ཡོད།
དེ་ནི་འབད་པས་མག་པ་ལ་བྱིན་ཅོ།
བུ་ཚ་ཉིད་དང་དེ་ལ་བྲམས་པའང་རིང་། 12

पुत्रार्थिनस्तस्य तपःप्रयत्नै-
रेकैव कन्या नलिनी बभूव।
प्रायः प्रजापालनसावलेपाः
स्वल्पान्वया एव भवन्ति भूपाः ॥ ९ ॥

अन्तःपुरे तां परिवर्द्धमानां
चित्ते च चिन्तां नृपतिर्विचिन्त्य।
आहूय विद्वत्प्रमुखानमात्यान्
प्रजागरग्रस्तरतिर्जगाद ॥ १० ॥

विस्तीर्णशाखं स्थिरबद्धमूल-
मभ्युन्नतं सर्व्वजनोपजीव्यम्।
अवैमि तुल्यप्रसवावहीनं
घुणक्षतं वृक्षमिवाधिपत्यम् ॥ ११ ॥

एकैव कन्या नलिनी ममास्ति
वयः प्रदानोचितमाश्रयन्ती।
तस्यां प्रयत्नेन वरार्पितायां-
मपत्यता तत्प्रणयोऽपि दूरे ॥ १२ ॥

ལག་པར་སྒྲོན་མེའི་སྡོང་བུ་རབ་འབར་བཞིན།
སྐྱེ་བོས་རང་གི་བུ་མོ་བཟུང་མི་ནུས།
གདམས་པའི་ནོར་བཞིན་གཞན་ལ་གཏང་བྱ་བ།
རིགས་ཀྱི་བུ་མོ་བསམ་པའི་འབྲས་བུ་ཉིད། 13

གཡོག་ལ་སྦྱིན་མིན་གྲོང་པ་ལ་འོས་མིན།
མི་དབང་བུ་མོ་རིང་པོ་ཉིད་ལ་འོས།
དེ་ལྟར་ཀུན་སྐྱུད་རིང་པོ་མི་ཤེས་པས།
ཤི་དང་སོང་བ་དག་ལ་བྱེ་བྲག་ཅི། 14

དེ་སྐད་གང་ཞིག་བུ་དངོས་བདག་ཉིད་ཅན།
རང་ཡུལ་རབ་སྤངས་བདག་གི་ཡུལ་འཛིན་པ།
བདག་གི་མག་པའི་དངོས་གྱུར་འགའ་ཞིག་དེ།
ཡོན་ཏན་ལྡན་པ་འབད་པས་བཙལ་བར་བྱ། 15

བདག་གིས་ཐོས་པ་གཎྜ་དག་གི་ཀྱུན།
བསོད་ནམས་དག་པའི་ངོགས་དང་ཉེ་བ་ན།
སྐྱེས་པར་བཙས་ན་དཀའ་ཐུབ་ནགས་མཐར་ནི།
རྒྱལ་པོའི་དྲང་སྲོང་ཀུ་ཤུ་པ་གནས་ལོ། 16

पाणौ प्रदीप्तामिव दीपवर्त्तिं
धर्त्तुं न शक्नोति जनः स्वकन्याम् ।
न्यासार्थतुल्या हि परार्पणीया-
श्चिन्ताफला एव कुलस्य कन्याः ॥ १३ ॥

न भृत्यदेया न च पौरयोग्या
दूरोचिता एव नरेन्द्रकन्याः ।
अज्ञातनित्याचरितस्य दूरं
मृतस्य जातस्य च को विशेषः ॥ १४ ॥

तस्मात् प्रयत्नेन मया स कश्चि-
ज्जामातृभावे गुणवान् नियोज्यः ।
स्वदेशमुत्सृज्य ममैव देशे
बिभर्त्ति यः पुत्र इवाधिपत्यम् ॥ १५ ॥

श्रुतं मया जह्नुसुताप्रवाह-
पुण्यावदाते पुलिनोपकण्ठे ।
साहञ्जनीनाम्नि तपोवनान्ते
राजर्षिरास्ते किल काश्यपाख्यः ॥ १६ ॥

དེ་ཡི་ས་བོན་ལྕི་བས་ལྷུང་གྱུར་པ།
ལྷ་ཡི་བསྐྱེད་ལས་རྗོ་སྟེང་དམའ་བར་ཆགས།
ཆུ་འདོད་ཀྱིས་གཟིར་རི་དྭགས་མོ་ཡིས་འཐུངས།
གསེར་གྱི་མདོག་ཅན་གཞོན་ནུ་བཙས་པར་གྱུར། 17

དེ་ཡི་ཕས་བཟུང་ནགས་སུ་རི་དྭགས་དེ།
ཉམ་པར་བསྐྱེད་ཅིང་བརྟུལ་ཞུགས་དག་ཀྱང་བསྒྲུབས།
སོར་ཚད་རྭ་ཡི་ཡང་དག་མཚན་གྱུར་པས།
ཁྲིས་པ་རྭ་གཅིག་པ་ཞེས་མིང་དུ་གྲགས། 18

དར་བབ་བསམ་གཏན་བཞི་པོ་སྐྱོང་བྱེད་ཅིང་།
ཚངས་སྤྱོད་དང་བཅས་དྲི་མེད་རང་བཞིན་ཅན།
ཡུལ་ནི་མཐོན་པར་མི་ཤེས་གྲོགས་མེད་གནས།
དེར་ནི་དྲག་པོའི་ཉི་འོད་ལྟ་བུར་མཛེས། 19

དེ་ནི་གལ་ཏེ་པད་ལྷན་ཁྱོད་ཉིད་དུ།
གྱུར་ནས་རྒྱུད་ནི་རབ་ཏུ་ཞི་མིང་གྱུར།
གཟི་བརྗིད་གཏེར་དེ་རབ་ཏུ་འགུགས་པ་ཡིས།
གནོད་མེད་རིགས་པ་ཅི་ཡང་བསམ་པར་མཛོད། 20

तस्य स्रुतं प्रस्रवणेन वीर्य्यं
दैवोदयादश्मनि सन्नताग्रे ।
तोयस्पृहार्त्ता हरिणी निपीय
सुवर्णवर्णं सुषुवे कुमारम् ॥ १७ ॥

वने मृगीस्तन्यविवर्द्धितोऽसौ
पित्रा गृहीतो विहितव्रतश्च ।
नाम्ना प्रसिद्धः शिशुरेकशृङ्गः
स लक्ष्यमाणाङ्कुलमानशृङ्गः ॥ १८ ॥

युवा चतुर्ध्यानपरायणश्च
स ब्रह्मचारी विमलस्वभावः ।
निःसङ्गवासाद्विषयानभिज्ञ-
स्त्वचाकठोरार्करुचिश्चकास्ति ॥ १९ ॥

स चेन्नलिन्याः पतितामुपैति
तदेष वंशः प्रशमं न याति ।
तेजोनिधेरानयने तु तस्य
विचिन्त्यतां काप्यनपाययुक्तिः ॥ २० ॥

ཅེས་པ་མི་བདག་ཚིག་ཐོས་ཡུན་རིང་དུ།
དཔྱད་ནས་བློན་པོ་ཀུན་གྱིས་དེ་ལ་སྨྲས།
དེ་ནི་དེ་ཡི་བསྡིག་ནས་ཉེ་བའི་སར།
ནགས་སུ་རྒྱལ་པོའི་བུ་མོ་རྩེ་རུ་ཐོང་། 21

དེ་ཚིག་རྗེས་སུ་འདོད་བྲས་རྒྱལ་པོ་ཡིས།
འདོད་པའི་དོན་ཀུན་ཉམས་པར་བཤད་ནས་ནི།
པདྨོ་ཅན་བསམངས་རབ་ཏུ་སྤྲོབས་པ་བཞིན།
ཐུབ་པའི་གཞོན་ནུ་དགྲོག་ཕྱིར་རྩེ་རུ་སོང་། 22

མཛེས་མས་ནགས་ཀྱི་མཐར་ནི་དཔལ་གྱིས་ཕྱིན།
གཟུགས་བཟང་རྩེད་འཛེས་མངོན་པར་དགའ་བས་རོལ།
མཛེས་པའི་མིག་ཅན་དེ་ནི་ལྷུང་གཞོན་གྱིས།
བསྐྱོད་པའི་འཁྲི་ཤིང་བཞིན་དུ་ཡང་དག་རྒྱུ། 23

དེ་ནི་རོལ་ཅིང་མི་རྟོག་འཕྲུ་བ་ཡིས།
རི་དྭགས་རྭ་རབ་གཡོ་ཞིང་ཉམས་བསྐྱོད་པའི།
ནགས་མཐོང་རང་གི་དགའ་ཐུབ་ནགས་ཚལ་ནས།
དགེ་མཚན་ལྡན་པའི་གཞོན་ནུས་ཡང་དག་འོངས། 24

श्रुत्वेति वाक्यं नृपतेरमात्या
विचार्य्य सर्व्वं सुचिरात्तमूचुः ।
तदाश्रमोपान्तवने विहर्त्तुं
विसृज्यतां सम्प्रति राजपुत्री ॥ २१ ॥

तद्वाक्यलुब्धानुमतेन राज्ञा
समीहितार्थं विनिवेद्य सर्व्वम् ।
ययौ विसृष्टा नलिनी विहर्त्तुं
हर्त्तुं प्रगल्भेव मुनेः कुमारम् ॥ २२ ॥

कान्ता वनान्तं शनकैरवाप्य
लीलाभिरामा विजहार तन्वी ।
वालानिलेनाकलिता लतेव
सञ्चारिणी चारुविलोचना सा ॥ २३ ॥

विलासपुष्पावचयेन तस्य
भृङ्गोत्तरङ्गं विचलत्कुरङ्गम् ।
वनं विलोक्य स्वतपोवनान्तात्
समाययौ कौतुकवान् कुमारः ॥ २४ ॥

མི་ཡི་གྲོགས་མེད་པདྨ་ལྟར་ཡང་མིག།
ཡ་མཚན་མིག་ནི་འཛུམ་དང་བྲལ་བ་དེས།
ལང་ཚོའི་ཉམ་འཕྲུལ་གྱིས་གཡོ་ལུས་བདུད་ཅིང་།
ཨུ་དྤལ་གྱིས་པའི་མིག་ཅན་དེ་མཐོང་གྱུར། 25

མཛེས་མ་རི་དྭགས་མིག་ཅན་དེ་མཐོང་ནས།
དགའ་མ་མངོན་ཤེས་མེད་ཀྱི་ཐུབ་པ་དགའ།
བག་ཆགས་སེམས་པས་ནང་དུ་ཞེན་པ་ཡི།
ཡུལ་ལ་མངོན་འདོད་སྐྱེ་བོས་གཏོང་མ་ཡིན། 26

རི་དྭགས་བུ་ཡི་རབ་མཛེས་ཡིད་འོངས་མིག།
དེ་ཡི་བཞིན་གྱི་པདྨར་ཉམས་བཀོད་ནས།
རིག་འཛིན་ཉམས་ནི་ཐུབ་པའི་བུ་དག་ཏུ།
ཤེས་ནས་མཛའ་བའི་དབང་གིས་དེར་ཕྱག་འཚལ། 27

སྡོམ་བརྩོན་གྱིས་བདུད་བཞིན་རས་དུད་གྱུར་པ།
དེ་མི་མཆུ་ནི་བྲུ་རྩའི་འོད་ལྡན་གྱིས།
འོད་ཟེར་ཚོགས་ཀྱིས་ཀུན་བསྒྲིབས་དོ་ཤལ་དག།
དྲི་མེད་རང་བཞིན་གྱིས་ཀྱང་ཆགས་པ་བཟུང་། 28

स सन्नताङ्गीममनुष्यसङ्ग-
स्तरङ्गितां यौवनविभ्रमेण।
ददर्श तां विस्मयनिर्निमेषः
फुल्लोत्पलाक्षीं कमलायताक्षः ॥ २५ ॥

विलोक्य कान्तां मृगलोचनान्तां
रामानभिज्ञोऽपि मुनिर्जहर्ष।
न वासनाभ्यासविलीनमन्त-
र्जहाति जन्तुर्विषयाभिलाषम् ॥ २६ ॥

सुस्निग्धमुग्धां विनिवेश्य दृष्टिं
मृगीसुतस्तद्वदनारविन्दे।
विद्याधरं वा मुनिपुत्रकं वा
विज्ञाय तां प्रीतिरसाद्ववन्दे ॥ २७ ॥

प्रतिप्रणामावनताननाया-
स्तस्याः प्रवालद्युतिनाधरेण।
आच्छाद्यमानोंऽशुवनेन रागं
जग्राह हारोऽप्यमलस्वभावः ॥ २८ ॥

དྲིལ་ཆུང་སྒྲ་སྙན་དག་གིས་གྲོགས་ཀྱི་བཞིན།
འདོད་པའི་ཉེ་བར་སྤྱོད་པ་གདམས་བྱས་པ།
རྩོལ་ཟགས་ཐིག་ལེ་དག་གི་མཐར་མཛེས་ཤིང་།
རབ་འདར་ལུས་ཅན་དེ་ལ་གཞོན་ནུས་སྨྲས། 29

ཀྭ་ཡེ་ཐུབ་པའི་སྲས་ཁྱོད་ལེགས་འོངས་སམ།
དཀའ་ཐུབ་ནགས་མཐར་རི་དྭགས་དགེ་འམ་ཅི།
རྟག་ཏུ་ཁྱོད་ལ་ལྷ་ཞིང་གཡོ་མེད་པ།
གང་དག་ཉམས་ནི་ཐང་ལ་དམན་པར་གྱུར། 30

བརྟུལ་ཞུགས་མཆོག་ལྡན་ཁྱོད་གཟུགས་བདུད་རྩིའི་ཚར།
ཁ་ནམ་ཐོ་མེད་པ་འདི་མཐོང་བའི།
རལ་པ་ཤིང་ཤུན་ལྡན་པ་ཐུབ་ཉམས་ཀྱི།
ལུས་ནི་ཤིང་རྐམ་བཞིན་དུ་བདག་རྟོག་གོ། 31

འཁྲི་ཤིང་མེ་ཏོག་ཉམས་ཀྱིས་སྨྲས་བྱས་པ།
ཁྱོད་ཀྱི་རལ་པའི་ཚོགས་ནི་མཛེས་པ་འདི།
སྤྲིན་གསེར་ཚོགས་ལ་ཉམ་པར་གདིངས་པ་ཡི།
རྨ་བྱའི་འཇུག་མའི་མཛེས་སྡུག་ཉམ་པར་འཛིན། 32

तां स्वेदसीदत्तिलकालकान्ता-
मुत्कम्पिताङ्गीमवदत् कुमारः।
सख्येव काञ्च्या मधुरस्वरेण
स्मरोपचारेषु कृतोपदेशाम्॥ २९ ॥

भोः स्वागतं ते मुनिपुत्र कच्चित्
तपोवनान्ते कुशलं मृगाणाम्।
सदा तदालोकननिश्चलानां
स्थलीषु येषां विरलः प्रचारः॥ ३० ॥

इदं विलोक्याद्य तवानवद्यं
दिव्यव्रतस्यामृतवर्षि रूपम्।
वपुर्जटावल्कलिनां मुनीनां
शुष्कद्रुमाणामिव तर्कयामि॥ ३१ ॥

अयं तव स्निग्धजटाकलापः
कृतोपचारः कुसुमैर्लताभिः।
नवाभ्रसम्भारविजृम्भमाण-
मयूरबर्हप्रतिमां बिभर्ति॥ ३२ ॥

ཁྱོད་ཀྱི་བྲང་འདི་དཔལ་འབྲས་ཟླུང་གིས་སྤྲས།
བཀྲང་འཕྲེང་དཀར་པོ་དག་གིས་ཉམས་པར་བཅིངས།
རི་དྭགས་གཞོན་ནུའི་མིག་ལྟར་བཀྲ་བ་ཡིས།
ཡིད་ལ་དགའ་བ་སྐྱེད་བྱེད་ཉམས་པར་མཛེས། 33

སྤྲིན་སྤྲིག་མེ་ཡི་མེ་སྟག་གསལ་ཆགས་པའི།
སྐྲ་རགས་འཛིན་ཅིང་ལུས་སྦྲ་འཁྲི་ཤིང་གཞོན།
ཡལ་འདབ་གསར་པས་མཚན་འདྲ་ཁྱོད་ཀྱི་ལུས།
འདི་ནི་སུ་ཡི་དགེ་མཚན་གྲུབ་མི་བྱེད། 34

ཐང་ག་གང་དུ་གཡོ་ལྷན་འདབ་སྐྱེས་ནི།
ཁྱོད་ཞབས་བཀོད་པས་ཉམས་པར་གསལ་བྱས་པ།
འོད་ཀྱི་ཏོག་ཏུ་ཉམས་པར་མཛེས་པ་ཡིས།
དཀའ་ཐུབ་ནགས་མཐའ་གང་ཡིན་དང་བས་སྤྲོས། 35

རི་དྭགས་རང་བཞིན་ཐུབ་པའི་གཞོན་ནུ་ནི།
བྲུད་མེད་མི་ཤེས་དེ་རིག་སྲུ་མོ་དེས།
ངོ་ཚར་བ་བདང་ཉམས་པར་དོགས་མེད་པ།
མ་བརླ་མས་སྟེ་དགའ་དག་ནི་སྤྲིན་བཞིན་སྒྲུར། 36

इदं तव श्रीफलयुग्मशोभि-
वक्षोविनिक्षिप्तसिताक्षसूत्रम्।
आसूत्रयद्वालकुरङ्गनेत्र-
वैचित्र्यमैत्रीं मनसश्चकास्ति॥ ३३॥

होमाग्निलग्नस्फुटविस्फुलिङ्गां
मौञ्जीं दधाना नवपल्लवाङ्काम्।
कुतूहलं वाललतेव तन्वी
तनुस्तवेयं न तनोति कस्य॥ ३४॥

ब्रूहि प्रसन्नं क्व तपोवनं ते
त्वत्पादविन्यासविकाशिनीभिः।
यत्र प्रभाभिः सततं विभाति
सञ्चारिणी पङ्कजिनी स्थलेषु॥ ३५॥

इति ब्रुवाणं ललनानभिज्ञं
मृगस्वभावं तमवेत्य वाला।
उत्सृज्य लज्जामविशङ्कमाना
निर्यन्त्रलीलाभरणा बभूव॥ ३६॥

དེ་ནས་ཀུན་དགའི་རོས་བརྙན་སེམས་ལྡན་དེར།
འཇམ་པར་སྨྲ་བྱེད་དེ་ཡིས་དལ་གྱི་སྨྲས།
བདག་གི་བསྟི་གནས་འབྲས་ཞིམ་མི་དོག་ཅན།
དགའ་ཐུབ་ནགས་ཚལ་འདི་དང་ཉེ་བར་གནས། 37

ཞེས་བརྗོད་ཀ་རའི་འཛུམ་དང་ག་བུར་གྱིས།
ཉང་ཚངས་ལྡན་ཞིང་ཡིད་འོང་ཡ་མཚན་འོས།
ལ་དུ་མཁས་པའི་ལེགས་བཤད་མཚུངས་པ་ཡི།
དེ་ཡིས་དེ་ནི་ཉམས་པར་ཆགས་པར་བྱས། 38

དེ་ཡི་སྲོས་བྱེད་རོ་འཛིན་རྗེས་མཐུན་པ།
སེམས་དགའ་མཛའ་བའི་རང་བཞིན་རྩེ་དགའ་དང་།
བསྡུགས་པ་བདུད་རྩི་ཀུས་མཆོད་འཆིང་བ་ཡིས།
འཕགས་པའི་རི་དྭགས་དེ་ནི་སྲུས་བཞིན་བཅིངས། 39

ཆེར་འོས་དགའ་ཐུབ་ནགས་ཚལ་བདག་ལ་སྟོན།
ཞེས་བརྗོད་མིག་ཟུམ་དེ་ལ་ཀྱོལ་པོ་ཡི།
བུ་མོས་ལག་པའི་འཁྲི་ཤིང་དག་གིས་ནི།
དམ་དུ་ཡོངས་འཁྱུད་ཚུར་ཤོག་ཅེས་པ་སྨྲས། 40

ततस्तमानन्दरसार्द्रचित्तं
शनैर्बभाषे मृदुभाषिणी सा ।
तपोवनस्यास्य समीपवर्त्ती
ममाश्रमः स्वादुफलप्रसूनः ॥ ३७ ॥

उक्तेति खण्डस्मितमोदकैः सा
तस्याथ कर्पूरपरागगर्भैः ।
चकार माधुर्य्यचमत्क्रियार्है-
र्विलोभनं सत्कविसूक्तितुल्यैः ॥ ३८ ॥

तैर्मोदकैः सा रसनानुकूलै-
श्चित्तोत्सवैः प्रेममयैर्विलासैः ।
कर्णामृतैश्च प्रणयोक्तिबन्धै-
स्तं वागुरेवार्य्यमृगं जहार ॥ ३९ ॥

तपोवनं दर्शय मे महार्ह-
मित्युल्लपन्तं भुजवल्लरीभ्याम् ।
गाढं परिष्वज्य निमीलिताक्ष-
मेहीति तं राजसुता जगाद ॥ ४० ॥

ཆས་ཤིང་ཕྱུང་ཟད་ཀྱང་གིས་སོང་དེ་ལ།
སླར་ཡང་དེར་བགྲོད་སྐད་དུ་བསྒྱུར་བྲུས་པའི།
ཤིང་རྟ་ལ་ཞོན་ལག་པ་བཀྱངས་ནས་དེས།
བཞོན་པ་ཉིད་ནི་ཚིག་གིས་རབ་དུ་བསྐྱོས། 41

ཤིང་རྟ་འདྲེན་པའི་རྟ་དག་དེས་མཐོང་ནས།
བྱེ་བྲག་མ་རྟོགས་རི་དྭགས་ཡིན་པར་ཤེས།
རི་དྭགས་བུ་བདག་རི་དྭགས་སྟེང་དུ་ནི།
ཀྱང་པས་མི་རིག་ཅེས་པ་དེ་ལ་སྨྲས། 42

དེ་ནས་ཡིད་ཀྱིས་ཐུབ་དབང་བུ་འཛིན་ཅིང་།
ཤིང་རྟ་ཡིད་ལྷུར་མགྱོགས་པས་སོང་ནས་ནི།
མི་བདག་བུ་མོ་རང་གི་གྲོང་ཁྱེར་ཕྱིན།
དེ་ཡི་སྤྱོད་པ་མི་ཡིས་བདག་ལ་བཤད། 43

སྟོབས་ཀྱིས་རབ་སྒྱུར་དཀུག་པའི་མངོན་སྤྱོར་ལ།
མི་མཚུངས་དྲང་སྲོང་ཆེན་པོས་འཇིགས་གྱུར་པ།
རྒྱལ་པོ་བློན་དང་བཅས་པས་དེ་འོང་ལ།
རབ་དུ་འབད་པས་ཐབས་ནི་མངོན་པར་བསམས། 44

तं प्रस्थितं सा कतिचित् पदानि
गत्वा पुरस्तद्गमनाय सज्जम् ।
रथं समारुह्य विसार्य्य पाणि-
मारोहणायैव गिरा न्ययुंक्त ॥ ४१ ॥

रथे तुरङ्गान् स विलोक्य युक्तान्
मत्वा कुरङ्गान् विगलद्विशेषः ।
मृगीसुतोऽहं न मृगाग्रमेतं
स्पृशामि पद्भ्यामिति तामुवाच ॥ ४२ ॥

रथेन गत्वाथ मनोजवेन
मुनीन्द्रसूनुं मनसा वहन्ती ।
नरेन्द्रकन्या स्वपुरीमवाप्य
न्यवेदयत्तच्चरितं नृपाय ॥ ४३ ॥

राजापि तस्यागमने प्रयत्ना-
दचिन्तयन्मन्त्रिभिरभ्युपायम् ।
हठप्रयुक्त्या हरणाभियोगे
भीतः कृशानुप्रतिमान्महर्षेः ॥ ४४ ॥

དེ་ནས་སླར་ཡང་གཞོན་ནུ་འགུགས་པ་ལ།
གྱུ་ཡི་ཚོགས་བལྷམས་བཅིངས་ཤིང་ངལ་བྲུས་པས།
གང་གཱའི་ངོགས་ཀྱི་དཀའ་ཐུབ་ནགས་ཀྱི་མཐར།
ཛྷེ་དགའི་འཁྲི་ཤིང་དེ་ནི་གྱུལ་པོས་གདང་། 45

སྐབས་དེར་བུ་ནི་བྲུ་བ་མཐའ་དག་བདང་།
མི་བདག་བུ་མོའི་བསམ་གདན་སྤྲ་བཅད་བཅིངས།
མངོན་འདོད་གསར་པའི་བརྡུལ་ཞུགས་ལྷན་རྟོགས་ནས།
ཐུབ་པ་དག་ནི་ཡ་མཚན་གཡོ་མེད་གྱུར། 46

དེ་ནས་ཕས་ཕྱིས་དེ་ལ་ཐུབ་སྲུས་ཀྱིས།
ཤུགས་རིངས་བརྒྱུད་མ་དག་གི་བསྡི་གནས་དང་།
ཉེར་གནས་སྒོ་མའི་ཡལ་འདབ་ཡང་ཡང་དུ།
སྒྲིག་ཅིང་རོལ་པ་བསྐྱེད་ཅིང་རབ་སྤྲས་པ། 47

ཡབ་གཅིག་དཀར་ཐུབ་ནགས་སྲུ་དིང་བདག་གིས།
ཟླ་བའི་གཟུགས་བརྙན་རབ་དུ་ཕྲིས་པའི་ཞལ།
དྲང་སྲོང་ཆེ་སྲུས་འདྲེན་བྱེད་འདོད་དག་གིས།
རི་དྭགས་བུ་མོའི་རིགས་པ་འཁྲོག་པ་མཐོང་། 48

ततः कुमाराहरणे पुनस्तां
विलासवल्लीं विससर्ज राजा।
नौभिर्घंटाबन्धकृताश्रमाभि-
र्मन्दाकिनीकूलतपोवनान्तम् ॥ ४५ ॥

अत्रान्तरे त्यक्तसमस्तकृत्यं
नृपात्मजाध्याननिबद्धमौनम्।
नवाभिलाषव्रतमाकलय्य-
पुत्रं मुनिर्विस्मयनिश्चलोऽभूत् ॥ ४६ ॥

पृष्टोऽथ पित्रा मुनिपुत्रकस्तं
प्रोवाच निश्वासपरम्पराभिः।
समीपसक्ताश्रममञ्जरीणां
दिशन्मुहुः पल्लवलास्यलीलाम् ॥ ४७ ॥

तपोवने तात मयाद्य दृष्टः
प्रहृष्टचन्द्रप्रतिबिम्बवक्त्रः।
महर्षिसूनुर्नयनप्रभाभि-
र्दर्पापहारी हरिणाङ्गनानाम् ॥ ४८ ॥

དེ་ཡི་སྙིང་ག་ཀང་ལག་མགྲིན་པ་ལ།
བདགས་པའི་སྐྲུད་པ་ཉམ་པར་བཀྲ་གྲུར་པ།
དབང་པོའི་མཚོན་ཡངས་དག་དང་མཚུངས་པ་ཡོད།
ཡབ་གཅིག་བདག་ཀྱང་ཅི་སྐད་དེ་ལྟ་མིན། 49

གང་གི་ཚོགས་གི་གྲོ་ཆེ་མཚུངས་པ་ཡང་།
ཅི་ཡང་ཡོད་མིན་ཕྱུལ་དུ་བྱུང་བའི་སྐྲ།
ནམ་ཡང་ཙྭ་དའི་གནས་སུ་བདག་གིས་ནི།
གྲོས་པ་ཁྲ་བྲུག་གི་མིན་བྱུང་བའི་མིན། 50

དེ་ནི་ད་ལྟའང་བདག་ནང་སྐྲོགས་པ་བཞིན།
དལ་བབ་ལག་བཀུས་དབྱུ་བ་ཆགས་པ་ཡི།
འོད་དང་མཚུངས་པ་ཤིང་ཤུན་གསར་པ་ཡིས།
ཤིན་དུ་སྲ་བ་དེ་ཡི་ལུས་དག་མཛེས། 51

བདག་གི་ལུས་ནི་ལག་པས་ཕྱུན་རིང་བསླམས།
གདོང་གི་པདྨར་བཞིན་རས་ཉམ་པར་བཀོད།
བསླབས་པས་མཆུ་བསྐྱོད་འདི་ཡི་དགའ་བ་ཡིས།
བདུད་རྩི་རེག་པའི་ཁྱད་པར་བསླབ་པར་བྱས། 52

वक्षःकटीपाणिगलावसक्त-
विचित्रहृत्त्राणि विभान्ति तस्य ।
इन्द्रायुधापत्यनिभानि सन्ति
ममापि किन्तात न तद्विधानि ॥ ४९ ॥

अद्यापि मेऽन्तर्दधतीव तस्य
वाणी शतांशप्रतिमापि यस्याः ।
श्रुता मया चूतवने कदाचित्
न कोकिलानां न च षट्पदानाम् ॥ ५० ॥

मन्दाकिनीमज्जनलीनफेण-
समानभासा नववल्कलेन ।
तनीयसी तस्य तनुर्विभाति
नेदं प्रियं वल्कलकं ममाद्य ॥ ५१ ॥

निवेश्य वक्त्रं वदनारविन्दे
निपीड्य दोर्भ्यां सुचिरं वपुर्मे ।
चक्रे जपप्रस्फुरिताधरोऽसौ
हर्षान्वितस्पर्शविशेषदीक्षाम् ॥ ५२ ॥

མཛེས་པས་ནོམ་པར་མཚན་པ་དེ་མེད་ན།
བདག་གི་བཟོད་པ་ནགས་འདིར་སྐད་ཅིག་མིན།
གང་གིས་བདུལ་ཞུགས་བསྟུན་པས་བདག་ཉིད་ལ།
སྨོངས་པའི་གྲོགས་པོ་གཉིད་ནི་གནས་མི་བྱེད། 53

བདག་གི་མིག་ནི་དེ་ལ་ལྟ་བར་འདོད།
དེ་ཚིག་མེད་ན་ཐོས་པ་ཡོངས་མི་གནས།
ལུས་ལ་གནོད་བྱེད་གློ་ནི་ཉང་དག་དུ།
མི་གསལ་དེ་ཡི་བསམ་པས་མཆོག་དུ་གཟིར། 54

ཞེས་པ་མཛེས་མས་ཡིད་སྤྲོགས་བྲུ་ཡིས་ནི།
གདུང་བའི་བསམ་པ་གོ་བྱེད་ཚིག་ཐོས་ནས།
དགའ་ཐུབ་བར་ཆད་གྱུར་པས་འཇིགས་པ་ཡིས།
དྲང་སྲོང་ཆེན་པོ་ཤིན་དུ་ལྷུན་རིང་བསམ། 55

ཀྲི་མ་དྲན་པའི་ཇོན་པ་མི་བཟད་པས།
དགའ་ཐུབ་ཅན་སྨོངས་རི་དྭགས་བྲུ་འདི་ནི།
བྲུད་མེད་མཆོག་དུ་གྱུར་པའི་གྲོ་དག་གིས།
རྒྱུར་མིག་གཡལ་དུ་ལྟུང་བས་འཕྲལ་ལ་བཅིངས། 56

न मे क्षमा कान्तविलक्षणेन
नैव क्षणं तेन विना वनेऽस्मिन् ।
करोति मे यद्व्रतशासनेन
दृशोः पदं मोहसखी न निद्रा ॥ ५३ ॥

दृष्टिस्तदालोकनमीहते मे
श्रुतिर्विना तद्वचनं न चास्ते ।
तच्चिन्तया ताम्यति धीर्नितान्तं
मन्तं न जानाति तनुव्यथायाः ॥ ५४ ॥

श्रुत्वेति कान्ताहृतमानसस्य
सन्तापचिन्तापिशुनं महर्षिः ।
पुत्रस्य वाक्यं तपसोऽन्तरायं
निपातभीतः सुचिरं प्रदध्यौ ॥ ५५ ॥

कष्टं तपस्वी मृगशावकोऽयं
तीव्रेण मुग्धः स्मरलुब्धकेन ।
वराङ्गनावागुरया कटाक्ष-
कूटावपाती सहसा निबद्धः ॥ ५६ ॥

སྐད་ཅིག་དེ་བསམས་ཐུབ་པ་མཁས་པ་ཡིས།
བྲུ་ཡི་ཡིད་ཀྱི་ཉམས་འགྱུར་དགྲོག་པའི་སྐད།
འདོད་པའི་ལག་འགྲོས་དུག་བདང་ཡུལ་ལ་ནི།
མངོན་འདོད་འཛིན་པ་དེ་ལ་ཕས་སྨྲས་པ། 57

བྲུ་དེ་དྲང་སྲོང་ཆེ་སྲས་ལེགས་པ་མིན།
དེ་ནི་བྲུད་མེད་ཡིད་སྐྱེས་ལག་འགྲོའི་ས།
དར་ཀླུང་སྨོངས་པ་ཤིན་དུ་མི་བཟད་པའི།
རྫེས་ཆགས་དུག་གི་གདུང་བ་ཉམས་པར་འཛིན། 58

མིག་སྨན་ནག་པོ་བརྩིགས་ཆགས་ན་ཚུང་གི།
ཟུར་མིག་རྣོན་པོས་ཕྲུག་པའི་སྐྱེ་བོ་དག།
སྐྱོན་བཅས་བྲུད་མེད་ལག་པའི་ཞགས་པས་བསྒྲམས།
འཁོར་བའི་བཙོན་ར་དག་དུ་སྡུ་ངན་བྱེད། 59

ཀུན་སྨོངས་དྲི་མར་ལྡན་པའི་སྲིད་པ་དག།
སྐྱིན་གྱི་དབུས་སུ་གྱུ་གྱུར་གསལ་བྱེད་པ།
སྐད་ཅིག་མཐའ་ཅན་མཛེས་མའི་གློག་དག་གིས།
བྲལ་ཆེ་སྐྱེས་བུ་མཆོག་དུ་སྨུན་པར་བྱེད། 60

क्षणं विचिन्त्येति मुनिर्मनीषी
मनोविकारं तनयस्य हर्तुम्।
तमब्रवीत् कामभुजङ्गमुक्तं
विषं वहन्तं विषयाभिलाषम्॥ ५७॥

न पुत्र साधुः स महर्षिसूनुः
सा स्त्री मनोजन्मभुजङ्गभूमिः।
तत्र क्षतस्तीव्रतरानुराग-
विषव्यथामेव बिभर्ति मूढः॥ ५८॥

जनाः प्रसक्ताञ्जनकालकूटै-
र्विद्धाः सुतीक्ष्णैस्तरुणीकटाक्षैः।
शोचन्ति योषिद्भुजपाशबद्धाः
संसारकारासदने सदोषाः॥ ५९॥

घनस्य संमोहमलीमसस्य
भवस्य मध्ये कुटिलाः स्फुरन्त्यः।
कुर्वन्ति कान्तातडितः क्षणान्ताः
पुंसां वियोगे भृशमन्धकारम्॥ ६०॥

བྱད་མེད་ནོམས་ནི་སྒྱུ་ངན་གྱོས་པའི་གཉེན།
སྐྱོ་ཞིང་བསྒྱུལ་བྱེད་དུག་གི་འཁྲི་ཤིང་སྟེ།
རྨོངས་པའི་ཤ་ཟ་ཆེན་མོ་འདི་དག་གིས།
ཀུན་དུ་རེག་པའི་འཇིག་རྟེན་དགེ་ལྡན་མིན། 61

བྱད་མེད་མིག་ཟུར་གདུང་བྱེད་ཟུག་རྔུ་ནི།
རྣོན་པོ་གང་གིས་སེམས་ལ་མ་ཟུག་པ།
ཚོག་ཤེས་ཀྱིས་མཛེས་དཀའ་ཐུབ་ནགས་ཚལ་དུ།
གནས་པའི་དམ་པ་འདི་དེ་ནོལ་དུ་གནས། 62

ཞེས་པ་དབེན་པའི་ཚིག་ནི་དེ་དང་དེས།
ཕ་ཡི་འབད་པས་རབ་དུ་རྟོགས་པར་བྱས།
འདོད་པ་དང་ལྡན་མཛེས་སྡུག་བདུང་བ་ཡིས།
ནམ་པར་འཕྲུལ་པ་དེ་ནི་རྟོགས་མ་གྱུར། 63

དེ་ནས་ཉིན་གཞན་སྣ་ཚོགས་བྱ་བ་བྱས།
ཐུབ་པ་འབྲས་བུ་ཡམ་ཤིང་ལེན་དུ་སོང་།
མི་དབང་བུ་མོ་འཛེ་སྐྱིག་ལྡན་པ་ནི།
གཞོན་ནུ་ཆགས་པ་བྱེད་དུ་སླར་ཡང་འོངས། 64

एताभिरुत्सेककुटुम्बिनीभि-
रुन्मादमूर्च्छाविषवल्लरीभिः ।
स्त्रीभिर्महामोहपिशाचिकाभिः
संस्पृश्यमानः कुशली न लोकः ॥ ६१ ॥

स्वस्थास्त एते निवसन्ति सन्तः
सन्तोषकान्तेषु तपोवनेषु ।
सन्तापनं स्त्रीनयनान्तशल्यं
येषां स्थितं चेतसि नावसन्नम् ॥ ६२ ॥

इति प्रयत्नाज्जनकेन तैस्तै-
र्विवेकवाक्यैः प्रतिबोध्यमानः ।
नाबुध्यतासौ मदनान्वितेन
लावण्यपानेन विघूर्णमानः ॥ ६३ ॥

अथापरेद्युर्विहितस्वकृत्ये
मुनौ फलेध्माहरणे प्रयाते ।
लीलावती लोभयितुं कुमारं
नरेन्द्रकन्या पुनराजगाम ॥ ६४ ॥

འབངས་མོའི་ཚོགས་རྣམས་རྗེས་འབྲང་འཁྲི་ཤིང་ནི།
མེ་ཏོག་འཛུམ་ལྡན་དག་གིས་དཔལ་བསྟེན་ཅིང་།
ལུས་ཅན་ལུས་མེད་གསར་མཚུངས་རྭ་གཅིག་ཅན།
འབྱོར་པས་མགྲོ་བའི་ལུས་ལྡན་བརྟེན་པས་ཕྱིན། 65

བདག་གི་བསྟི་གནས་དཔག་བསམ་ཤིང་རྩེ་ལས།
འཕྱང་བའི་འཁྲི་ཤིང་གིས་དགའ་ལྷ་ལ་འོས།
ལྷུ་བར་ཁྱོད་ཀྱིས་སྨྲས་ཞེས་བརྗོད་ནས་དེས།
དེ་ནི་གང་གཱ་དག་གི་ངོགས་སུ་ཁྲིད། 66

དེས་དེར་རིན་ཆེན་རབ་འབར་འདབ་མ་བཀྲ།
གསེར་གྱི་འཁྲི་ཤིང་མེ་ཏོག་འབྲས་བུ་དགའ།
གཱ་ཡི་བཟུང་བའི་བཅོས་མ་རྣམས་བརྟགས་ནས།
དགའ་བ་ལ་བཞིན་བདེ་བའི་གནས་ལ་འཇོགས། 67

འཁོར་བ་དང་མཚུངས་གྲོལ་གྱི་བསྟི་གནས་དེར།
ཆུ་བོའི་རྒྱུན་ལ་དེ་ནི་རབ་ཏུ་ཁྱེར།
དེ་ཉིད་ཤེས་པ་མིན་ཡང་ཆགས་ཚུལ་གྱིས།
འཛའ་བོ་ཅན་བཞིན་བ་ར་ཎཱ་སིར་ཕྱིན། 68

दासीगणेनानुगता लतानां
पुष्पस्मितानां श्रियमाश्रयन्ती ।
साङ्गं नवानङ्गमिवैकशृङ्ग-
मासाद्य हृष्टा विबभौ नताङ्गी ॥ ६५ ॥

दिव्योचितं कल्पलताग्रलम्बि-
फलाभिरामं रुचिराश्रमं मे ।
द्रष्टुं त्वमेहीत्यभिधाय सा तं
निनाय तीरं त्रिदशापगायाः ॥ ६६ ॥

स तत्र रत्नोज्ज्वलचित्रपत्र-
सुवर्णवल्लीफलपुष्परम्यम् ।
नौभिर्धृतं कृत्रिममाकलय्य
सुखाश्रमं हर्षमिवारुरोह ॥ ६७ ॥

संसारतुल्येन हृतः स तेन
सरित्प्रवाहे कपटाश्रमेण ।
अज्ञाततत्त्वोऽप्यनुरक्तवृत्ति-
र्वाराणसीं प्रीतिमिवाससाद ॥ ६८ ॥

དེ་ཡི་ས་གཞི་དབང་ཆེན་ཀཱ་ཤུ་ཡིས།
རིན་ཅེན་རིན་ཐང་ཆེ་ལྡན་རྒྱལ་སར་ཁྱིན།
ཐུབ་དབང་རྣམས་ཀྱི་གདམས་ལ་བཤད་པ་ཡིས།
མཐོ་རིས་གནས་ནི་མིག་ལམ་གྱུར་པར་སེམས། 69

དེ་ནས་རབ་དགའ་གྱུར་པ་ས་ཡི་དབང་།
སྐྱུབ་ཞེས་ཚོགས་དེ་ལ་རི་དྭགས་མིག།
གཡས་སྐོར་བསྐོར་བ་དེ་ཞལ་གཡོ་ལྡན་མ།
བུ་མོ་རི་བ་རྫོགས་པའི་དཔལ་གྱིས་ཁྱིན། 70

མི་དབང་སྲུ་མོ་ལག་པར་ལག་བཀོད་ཅིང་།
བག་མའི་བསྒྲིག་རྫས་མེ་ལ་རྣམ་པར་བཀོད།
དེར་ནི་གཞོན་ནུ་བློ་གྲོས་གཞན་པ་མེད།
སྨིན་སྒྲིག་རྣམ་པ་གཞན་དག་ཡིན་པར་སེམས། 71

དགའ་སྟོན་ཆེ་དང་སྤྲོ་བའི་ཉམས་ཀྱིས་པ།
རྒྱལ་པོས་གུས་པས་རབ་ཏུ་མཆོད་པ་དེས།
བརྟུལ་ཞུགས་དུལ་ལྡན་ཉིད་དུ་དེར་འདུག་ནས།
ཆུང་མ་དང་འགྲོགས་རང་གི་ནགས་མཐར་སོང་། 72

अवाप्य काश्यस्य स राजधानीं
महीमहेन्द्रस्य महार्हरत्नाम् ।
मेने मुनीन्द्रैः कथितं कथासु
स्वर्गाङ्गणं दृष्टिपथं प्रयातम् ॥ ६९ ॥

ततः प्रमोदाकुलितः क्षितीश-
स्तस्मै मृगाक्षीं विधिना विधिज्ञः ।
प्रदक्षिणावर्त्तविलोलहारां
ददौ सुतां पूर्णमनोरथश्रीः ॥ ७० ॥

नरेन्द्रकन्याकरसक्तपाणि-
र्विवाहहव्यावहितं हुताशम् ।
अमन्यतानन्यमतिः कुमार-
स्त्वाग्निहोत्रस्य परं प्रकारम् ॥ ७१ ॥

महोत्सवोत्साहरसाकुलेन
सम्पूज्यमानः प्रणयेन राज्ञा ।
स्थित्वा तपःसंयत एव तत्र
जायासखः स्वं प्रययौ वनान्तम् ॥ ७२ ॥

རྐྱང་མའི་གྲོགས་བཅས་དབེན་པར་བགྲོད་པ་དེ།
མ་མ་རི་དྭགས་མོས་མཐོང་རབ་དགའ་སྟེ།
ཐུབ་པའི་དྲིན་ལས་མི་ཡི་ཚིག་ཐོས་པས།
གང་ནས་ཁྱོད་ཀྱི་བྱུད་མེད་འདི་ཞེས་སྨྲས། 73

དེ་ལ་རབ་བདུད་དེ་ཡིས་གུས་སྨྲས་པ།
མ་མ་བདག་གི་མཛེས་ལྡན་གྲོགས་མོ་འདི།
རབ་འབར་མེ་ཡི་དཔང་ཅན་གྲོགས་མེད་ཀྱིས།
འདོད་པར་བྱ་བའི་གཟུགས་ཅན་འབད་པས་ཐོབ། 74

ཅེས་སྨྲས་བག་མ་ལ་སོགས་གདམ་མི་ཤེས།
སྔོངས་པ་དེ་རིག་རི་དྭགས་མོ་དེ་ཡིས།
ཁྲོ་ཡི་བརྡུལ་ཞུགས་དཀའ་ཐུབ་ཅན་རྣམས་ཀྱིས།
དཀའ་ཐུབ་ནགས་ཚལ་དག་ཏུ་དལ་གྱིས་ཁྲིད། 75

ཆོས་རྗེས་འགྲོ་འདི་ཁྱོད་ཀྱི་ལྷན་ཅིག་སྤྱོད།
འདི་ཡི་བདག་པོ་ཁྱོད་ཅེས་མ་ལུས་པ།
བག་མའི་སྤྱོད་ཚུལ་དག་གི་བཤད་པ་དེ།
ཐོས་ནས་རྐྱང་མ་དགའ་མ་ཉིད་དུ་རིག། 76

जायाद्वितीयं विजने भ्रमन्तं
दृष्ट्वा मृगी तं जननी प्रहृष्टा ।
मुनिप्रसादाप्तमनुष्यवाचा
कुतस्तवेयं ललनेत्युवाच ॥ ७३ ॥

स तां प्रणम्य प्रणयादभाषे
मातर्ममायं द्युतिमान् वयस्यः ।
प्राप्तः प्रयत्नात् स्पृहणीयरूपः
सख्येन दीप्तानलसाक्षिकेण ॥ ७४ ॥

इति ब्रुवाणं तमवेत्य मुग्धं
मृगी विवाहादिकथानभिज्ञम् ।
पतिव्रतानामथ तापसीनां
तपोवनं सा शनकैर्निनाय ॥ ७५ ॥

धर्म्मानुगा ते सहचारिणीयं
पत्नी त्वमस्याः पतिरित्यशेषम् ।
विवाहवृत्तं कथितं स ताभिः
श्रुत्वा प्रियामेव विवेद जायाम् ॥ ७६ ॥

ཡབ་ནི་འོད་སྲུངས་ཀྱིས་ཀྱང་དགའ་བ་ཡིས།
ཐག་མའི་ཆོས་ནི་ཉི་བར་བསྟན་པ་བསྒྲུབས།
དེར་བདུད་དེ་ཡི་ཚིག་གིས་ཆུང་མར་བཅས།
གྲོས་པོ་རྒྱལ་པོའི་གྲོང་ཁྱེར་དག་ཏུ་སོང་། 77

སྙིང་སྟོབས་རབ་འབར་ཞི་བའི་ལུས་བསྟེན་པ།
གོན་པོ་དེ་ཡི་རང་གནས་ལ་དབང་བསྒྱུར།
རྒྱལ་ཕྲན་ཅོད་པན་ངལ་གསོའི་གནས་དེ་ཡིས།
མ་ལུས་སྲུ་གཞི་དག་ནི་རབ་ཏུ་བསྐྱངས། 78

དབང་ཕྱུག་སྦྱོངས་པས་བློ་གྲོས་ཁྲིལ་མ་མཐུན།
དབེན་པའི་ཆོས་ཀྱི་རང་བཞིན་ལས་འཁྲུངས་ཤིང་།
གོན་པོ་བྲུ་དང་ཚ་བོ་མང་ལྡན་དེ།
རབ་ཏུ་བྱུང་ནས་ཞི་བ་འདོད་པར་གྱུར། 79

ཐུབ་གཞོན་རྭ་གཅིག་ལྡན་པར་གང་གྱུར་དེ།
ང་ཉིད་པད་ལྡན་དེ་ཡང་གྲགས་འཛིན་མ།
དེར་ཡང་སྐྱེ་བ་གཞན་གྱི་བག་ཆགས་ལས།
བདག་ལ་ཆགས་པའི་སྐད་དུ་མངོན་པར་སྦྱོར། 80

पित्रा प्रहर्षादपि काश्यपेन
विवाहधर्म्मे विहितोपदेशः।
प्रणम्य तं तद्वचसा जगाम
पुरीं सभार्य्यः श्वशुरस्य राज्ञः॥ ७७॥

वृद्धेन तेन स्वपदेऽभिषिक्तः
सत्त्वोज्ज्वलं शान्तिपदं श्रितेन।
शशास सामन्तकिरीटकोटि-
विश्रान्तपादः स महीमशेषाम्॥ ७८॥

ऐश्वर्य्यमोहानभिभूतबुद्धि-
र्धर्म्मस्वभावात् स लसद्विवेकः।
जरान्वितोऽभूद्बहुपुत्रपौत्रः
प्रव्रज्यया शान्तिपथाभिकामः॥ ७९॥

योऽभूत् कुमारो मुनिरेकशृङ्गः
सोऽहं नलिन्येव यशोधरा सा।
अद्यापि जन्मान्तरवासनास्था
विलोलनायैव ममाभियुक्ता॥ ८०॥

རང་གི་སྐྱེ་བ་གཞན་གྱི་གཏམ། །རྒྱལ་བས་ཉེ་བར་བསྒྲགས་པ་འདི།
ཐོས་ནས་དགེ་སློང་དེ་དག་ཉམས། །ཐམས་ཅད་ཡ་མཚན་ལྡན་པར་གྱུར། 41

ཞེས་པ་དག་པའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཟླ་གཅིག་པའི་རྟོགས་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་ཙ་ལྔ་པའོ།།

निजजन्मान्तरकथां जिनेनेत्युपवर्णिताम्।
आकर्ण्य भिक्षवः सर्व्वे बभूवुस्ते सविस्मयाः॥ ८१॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां एकशृङ्गावदानं नाम पञ्चषष्टितमः पल्लवः॥

Chapter LXVI.

གཞོན་ནུ་སྟོན་དང་གས་མཁན་གྱི་རྟོགས་བརྗོད།

འཇིག་རྟེན་དུ་ནི་སྐྱེས་བུའི་ལས་ལམ་གྲིབ་མ་བཞིན།
ལུས་ལ་ལྷན་ཅིག་སྤྱོད་འདི་ངེས་པར་མི་མཆོན་ཏེ།
ལུས་འདི་ཡོངས་བསྐྱུར་བགྲོ་ཡི་མཐའ་མར་མི་ཕྱིན་ཅིང་།
མགྱོགས་པར་ཐོས་པ་དག་ལ་རྣམ་པར་འཆད་མི་འགྱུར། 1

ལྷས་བྱིན་གྱིས་ནི་རྫོ་འཕངས་ཏེ། ཞབས་མཐིབ་སྣད་ནས་ཁྲག་བྱུང་བའི།
གྱོ་མཚན་དགེ་སློང་རྣམས་ཀྱིས་དྲིས། བཅོམ་ལྡན་འདས་ཀྱིས་དེར་བཀའ་སྩལ། 2

མི་བློག་ཁོན་ནི་དྲན་པ་ལས། སྐྱེས་པའི་ལས་ཀྱི་རྣམ་སྨིན་དག།
གང་གི་བདག་གི་ཀང་པ་ཡི། མཐེ་བོ་ཡོངས་སྣད་པ་ཉོན། 3

ལྷ་ལེན་དག་ཏུ་གྲོང་ཁྱེར་ནི། ཀ་པི་ལུར་སྔོན་ས་གཞི་སྐྱོང་།
བདེན་དང་ཆོས་ལ་ཡང་དག་བརྟེན། བདེན་པར་དགའ་ཞེས་བྱ་བ་བྱུང་། 4

སྐྱེ་གུ་ཡང་དག་བསྐྱུང་འོས་པ། དེ་ཡི་བཙུན་མོ་མཚན་ཉིད་བཟང་།
མཚན་ཉིད་ཅན་ཞེས་བྱ་བ་ནི། མཆོད་སྦྱིན་དག་གི་ཡོན་བཞིན་གྱུར། 5

षट्षष्टितमः पल्लवः ।

कविकुमारावदानम् ।

नायाति कायपरिवृत्तिशतैर्विरामं
विच्छेदमेति न जवेन पलायितस्य ।
लङ्घ्या न नाम वपुषः सहचारिणीयं
छायेव कर्म्मसरणिः पुरुषस्य लोके ॥ १ ॥

देवदत्तशिलापातपादाङ्गुष्ठक्षतासृजः ।
कारणं भगवान् पृष्टो भिक्षुभिस्तानभाषत ॥ २ ॥

श्रूयतां येन दुर्वारवैरस्मरणजन्मना ।
मम कर्म्मविपाकेन पादाङ्गुष्ठः परिक्षतः ॥ ३ ॥

पञ्चालेषु महीपालः काम्पिल्ये नगरे पुरा ।
अभूत् सत्यरतो नाम संश्रयो धर्म्मकर्म्मयोः ॥ ४ ॥

बभूव लक्षणा नाम पत्नी तस्य सुलक्षणा ।
प्रजासंरक्षणार्हस्य यजनस्येव दक्षिणा ॥ ५ ॥

ཕྱི་ལམ་དེ་ལ་བུ་མེད་ཚོ། དེ་ཡིས་གསོལ་བདབ་ས་ཡི་བདག།
བུ་དོན་གཉེར་བས་ལུས་འཕགས་མ། ཆོས་བཟང་ཞེས་པ་ཁབ་ཏུ་བླངས། 6

ཁྱོ་ཡིས་བག་མ་བླངས་པའི་ཚེ། མཚན་ཉིད་ཅན་ལ་བུ་བཙས་དེ།
དོན་མེད་ཆུན་མ་ཐོབ་པ་ཡིས། རྗེས་སུ་འགྱོད་པ་དག་ཀྱང་བཟུང་། 7

དེ་ནི་མ་དྲུད་པ་ཞེས་བྱ། གཞོན་ནུ་ཕ་ནི་རབ་ཏུ་དགེས།
རིག་གནས་དུལ་བ་ཕུན་ཚོགས་ཤིང་། སྒྲུ་ཙོལ་བསྟན་བཅོས་མཆོན་མཐར་ཕྱིན། 8

དེ་ནས་ཆོས་བཟང་མངལ་དག་དང་། ལྡན་པའི་ཚེ་ན་རྒྱལ་པོ་འདས།
རྩོམ་པ་ཀུན་ལ་ལུས་ཅན་གྱིས། བསམ་པ་བདེན་གྱི་ལུས་མི་བདེན། 9

དེ་ནས་དེ་མཐར་བློན་རྣམས་ཀྱིས། རྒྱལ་ཕྲན་གླང་པོའི་ལྕགས་ཀྱུ་ནི།
གསར་པ་བཞིན་དུ་གང་གྱུར་པ། མཚན་ཉིད་ཅན་གྱི་བུ་དབང་བསྐུར། 10

གང་ལུགས་བ་ལང་རྣྭ་ཙོ་ལྟར། གྱ་གྱུ་གཞན་གྱི་མི་ཤེས་པ།
བློན་པོ་ཆེན་པོ་བ་གླང་རྣྭ། ཞེས་པ་དེ་ཡི་མཛའ་བོར་གྱུར། 11

དུས་ཀྱི་ཆོས་བཟང་བཙའ་བ་ཡི། མཚམས་དང་ཉེ་བར་གྱུར་པ་ན།
མཚན་མཁན་མདུན་ན་འདོན་དག་གིས། མངལ་གྱི་མི་བདག་མཐར་བྱེད་སྨྲས། 12

དེ་ནས་བློན་པོའི་ཚིག་གིས་ནི། བྱིས་པ་སྐྱེས་ཚེ་གསོད་པ་ལ།
དེ་ཡི་ཡོ་བྲང་སྲུང་འོས་པ། མཆོད་ཀྱི་སྦྱོར་ལྡན་རྒྱལ་པོས་བསྐོས། 13

दैवात्तस्यामपुत्रायां पुत्रार्थी पृथिवीपतिः।
सुधर्म्मां नाम वैदेहीमुपयेमे तयार्थितः॥ ६ ॥

पत्यौ कृतविवाहेऽथ लक्ष्मणासूत दारकम्।
मिथ्या सपत्नीलाभेन पश्चात्तापमुवाह च॥ ७ ॥

सोऽभूदखोलमन्त्राख्यः कुमारः पितुरीप्सितः।
विद्याविनयसम्पन्नः कलाशास्त्रार्थपारगः॥ ८ ॥

सुधर्म्मायां सगर्भायामथ राजा व्यपद्यत।
सर्व्वारम्भस्थिराशानां देहिनां नो स्थिरा तनुः॥ ९ ॥

अमात्यैरभिषिक्तोऽथ तस्यान्ते लक्ष्मणासुतः।
नवाङ्कुश इवाभूद् यस्तीक्ष्णः सामन्तदन्तिनाम्॥ १० ॥

गोविषाणाभिधस्तस्य महामात्यः प्रियोऽभवत्।
गोशृङ्गकुटिला यस्य नीतिर्न ज्ञायते परैः॥ ११ ॥

प्रत्यासन्ने सुधर्म्मायाः कालेन प्रसवावधौ।
गर्भं नृपान्तकं प्राह निमित्तज्ञः पुरोहितः॥ १२ ॥

अथ मन्त्रिगिरा राजा जन्मक्षणवधे शिशोः।
तदन्तःपुररक्षार्हानादिदेशोद्यतायुधान्॥ १३ ॥

དེ་དག་ཤེས་ནས་ཆོས་བཟང་ཡང་། བློན་པོ་ཆེན་པོ་བ་གླང་རྫ།
རང་འདོད་བཞིན་དུ་བྱེད་པ་ལས། ཤིན་དུ་སྐྲག་ནས་སྐྱབས་སུ་སོང་། 14

དེ་ཡི་རྗེ་བོའི་ཚུང་མ་ཞེས། བསྟན་དེས་བུ་ཡི་འཇིགས་པ་ལ།
བུ་ནི་ཡང་དག་སྐྱེས་པ་དག ཉ་པ་ཉམས་ཀྱི་ཁང་པར་བཞག 15

དེ་ཉིད་ནས་ནི་བུ་མོ་དག དེ་ཡིས་གླངས་ནས་རབ་བསྟན་པ།
ཤེས་ནས་ས་ཡི་བདག་པོ་ཡིས། མཚན་མཁན་ཚིག་ནི་བདེན་མིན་བཟུང་། 16

ཉ་པའི་ཁྱིམ་དུ་བྱིས་པ་དེས། རིག་པ་བཟོ་གནས་སྒྱུ་ཙལ་དག
དེ་དེ་ཐོས་པ་གང་ངེས་ན། བློ་ལྡན་གཞོན་ནུ་སྟོན་དངགས་མཁན། 17

བྱིས་པ་ཉམས་དང་ལྡན་ཅིག་དེར། ལམ་དུ་རྟེད་མོའི་གྲོང་ཁྱེར་བྱས།
རྒྱལ་པོའི་རྟེད་འཛེ་ཡོངས་འདྲིས་ལ། དཔུང་ཆེན་དེ་ནི་ཉམ་པར་རྟེ། 18

དེར་ནི་མཚན་མཁན་མདུན་ན་འདོན། འདོད་དགའ་དག་དུ་འོངས་པ་ཡིས།
དེ་མཐོང་མི་བདག་ལ་གྲོགས་དེ། གུས་པར་མངོན་པར་འདོད་པས་སྨྲས། 19

ལྷ་གཅིག་ཉ་པའི་ཁང་པར་ནི། གང་གིས་ཁྱོད་ཀྱི་རྒྱལ་སྲིད་དང་།
སྲོག་དག་འཕྲོག་པར་སྤྱར་བརྗོད་པའི། གཞོན་ནུ་བདག་གིས་མཐོང་བར་གྱུར། 20

འདི་ཐོས་མི་བདག་ཁྲོས་པ་ཡིས། གཞན་པའི་མ་ལ་རབ་སྨད་དེ།
བློན་པོ་ཆེན་པོ་བ་གླང་རྫ། ཡང་དག་བོས་ནས་རབ་སྨྲས་པ། 21

तद्विज्ञाय सुधर्म्मापि सन्त्रस्ता शरणं ययौ।
महामात्यं विधातारमिव स्वच्छन्दकारिणम्॥ १४॥

प्रभुभार्य्येति सा तेन निर्दिष्टतनयाभिधा।
सञ्जातं सुतमत्याक्षीत् कैवर्त्तानां निकेतने॥ १५॥

तत एव समानीतां तया कन्यां प्रदर्शिताम्।
ज्ञात्वा निमित्तिकवचः सत्यं मेने न भूपतिः॥ १६॥

धीमान् कविकुमाराख्यः स कैवर्त्तगृहे शिशुः।
लेभे यतस्ततस्तास्ता[1] विद्याशिल्पान्विताः कलाः॥ १७॥

स तत्र बालकैः सार्द्धं क्रीड़ानगरकृत्यथि।
राजकेलीपरिचर्य्यैर्विजहार महाभुजः॥ १८॥

यदृच्छयागतस्तत्र नैमित्तिकपुरोहितः।
तं दृष्ट्वा नृपमभ्येत्य बभाषे भक्तिसम्मतः॥ १९॥

देव कैवर्त्तसदने मयादृष्टः कुमारकः।
य एव कथितः पूर्व्वं राज्यप्राणापहस्तव॥ २०॥

श्रुत्वेति नृपतिः कोपात् निर्भर्त्स्यापरमातरम्।
गोविषाणं समाहूय महामात्यमभाषत॥ २१॥

---

१ W1 कान्ताः।

ཀྱི་མ་བདག་གི་ཐེ་ཚོམ་ལ། ནོ་བ་འཛིན་པ་རབ་གསལ་བ།
ཁྱོད་ཀྱི་རྒྱལ་སྲིད་རྒྱ་གཏེར་ལ། གླུ་བཞིན་དཔལ་བདང་སྐོམས་བྱས། 22

ཁྱོད་ཀྱི་བློ་ལ་སེམས་བཀོད་པ། བདག་ནི་བདེ་བར་གཉིད་གྱུར་ཏེ།
དེ་རིང་སྒྲོག་ལ་ཐེ་ཚོམ་གྱི། རིམ་གྱི་གཞང་གི་གནས་དག་བསྟེན། 23

བདག་གི་མཐར་བྱེད་སྤྲས་པའི་མངལ། ཉ་པ་དག་ལ་ཡོངས་གཏད་ནས།
རབ་ཏུ་དགའ་བས་གཞན་པའི་མ། ངེས་པར་ཉི་མ་བགྲང་བར་བྱེད། 24

ད་དུང་དེ་ནི་གསད་པའི་ཐབས། རིགས་པ་ཁྱོད་ཀྱིས་སྒྲུབ་པར་མཛོད།
སེན་མོས་ཆོད་པའི་དུས་ཀྱི་ནི། སྦྱ་རེ་ཡིས་ཀྱང་ནུས་མི་འགྱུར། 25

རྗེ་བོ་ཡུལ་འཁོར་ནོར་དང་རྫོང་། གྲོགས་དང་དཔུང་གྲོས་སྐྱོང་བྱེད་པ།
དེ་ཡི་སྐད་དུ་རང་བཞིན་ལས། བློན་པོའི་རང་བཞིན་ཤིན་ཏུ་བཀྱེང་། 26

བློན་པོ་གཏུང་བ་ཞེ་བྱེད་བསམ་གཏན་ལ་ཆགས་རྟག་ཏུ་ཟན་པ་བློས།
ཉན་ནོ་དུ་ལ་བའི་རྩོལ་ལྡན་གུས་པའི་བརྟུལ་ཞུགས་དག་ནི་ངེས་པར་འཛིན།
མངོན་འདོད་འབྲས་བུ་ཐོབ་པས་གྲུབ་པ་དག་ནི་འཕྲལ་ལ་རབ་ཏུ་སྟོན།
ཡོངས་འཛིས་དག་ཅིང་རྒྱ་ཆེ་ས་བདག་ཉམས་ཀྱི་བསོད་ནམས་དག་གིས་ཐོབ། 27

མྱུར་དུ་རབ་ཀླུ་རྩོམ་པ་ཡིས། ཁྲིས་པ་འདི་ནི་ཉམས་པར་ཆོམ།
དུས་དང་བྲལ་བའི་འབད་པ་ནི། རྗེས་སུ་གཏུང་བྱེད་འབབ་ཞིག་ཡིན། 28

अहो वतावलेपेन भवता मम संशये।
राज्याब्धिकर्णधारेण नौरिव श्रीरुपेक्षिता ॥ २२ ॥

त्वन्मतिन्यस्तचित्तस्य सुखं निद्राभवन्मम।
सैवाद्य प्राणसन्देहज्वरतन्द्रीपदं श्रिता ॥ २३ ॥

गूढ़गर्भं परित्यज्य कैवर्त्तेषु मदन्तकम्।
प्रहृष्टापरमाता मे गणयत्येव वासरान ॥ २४ ॥

अद्यापि तद्वधोपाये त्वया यत्नर्विधीयताम्।
नखच्छेद्ये कुठारोऽपि कालेनायाति कुण्ठताम् ॥ २५ ॥

रक्षति स्वामिराष्ट्रार्थं दुर्गमित्रबलोदयम्।
अमात्यप्रकृतिस्तस्मात् प्रकृतिभ्यो गरीयसी ॥ २६ ॥

व्यसनशमनध्यानासक्ताः सदा हितजापिनः
प्रणिधिनियतव्यक्ता भक्तिव्रताः किल मन्त्रिणः।
अभिमतफलप्राप्त्या सद्यः प्रदर्शितसिद्धयः
शुचिपरिचयोदाराः पुण्यैर्भवन्ति महीभुजाम् ॥ २७ ॥

तूर्णं गुरुतरारम्भैर्दारकोऽसौ विदार्य्यताम्।
कालहीनप्रयत्नो हि पश्चात्तापाय केवलम् ॥ २८ ॥

ཞེས་པ་རྒྱལ་པོས་ཡང་དག་བསྟེན། སྔོན་གྱི་བཏང་སྐོམས་སྐྱེངས་པའི་བློས།
བློན་པོ་གླང་པོ་ར་དང་ནི། ཤིང་རྟའི་ཚོགས་དང་ལྷན་ཅིག་སོང་། 29

ཆོས་བཟང་གིས་ཀྱང་གནས་སྐབས་དེར། བུ་ནི་གསང་ནས་བོས་བྱས་ཏེ།
གྲོས་དེ་དེ་ལ་རྣམ་པར་བཤད། འགྲོ་བར་མཛོད་ཅེས་དེ་ལ་སྨྲས། 30

མ་ཡིས་གཙུག་གི་ནོར་བྱིན་ནས། བཏང་བ་དེ་ནི་རིངས་པས་འཁྲུགས།
རིན་ཅན་གྱིས་བསྐྱུན་འགྲོ་བ་དག། བློན་པོ་ཡིས་ནི་རིང་ནས་མཐོང་། 31

རྒྱལ་པོའི་བུ་དེ་གསང་ནས་ནི། བྲོས་པ་འདི་ཉིད་མ་ཡིན་ནམ།
ཞེས་བརྗོད་དེ་ཡིས་དེ་གསད་སྨད། དཔུང་གི་སྔོན་འགྲོ་དྲག་པོ་བསྐྱལ། 32

མགྱོགས་པས་དེ་དག་ལ་འབྲོས་ཤིང་། རི་དྭགས་ལྟར་མགྱོགས་རིང་བགྲོད་དེ།
ཙམ་པ་ཀ་ཞེས་བྱ་བ་ཡི། ཀླུ་ཡི་གནས་ཀྱི་ཆུ་ལ་བྱིང་། 33

དེ་ནས་མཐོང་ཉམས་དེ་ཡི་ཚེ། བློན་པོ་ཆེན་པོ་འབད་ལྡན་པར།
རྗེས་སུ་དེ་ནི་བཙལ་བའི་སྐད། པ་དྨ་ཀ་ཞེས་ཉན་ནོ་བཏང་། 34

དེ་ནས་གཙུག་གི་ནོར་བུ་ཡི། མཐུ་ཡིས་ཆུ་ནི་རིངས་བྱས་ཤིང་།
ཀླུ་ཡིས་གཞོན་ནུ་དབུགས་ཕྱུང་ནས། འདུག་ཅིག་ཅེས་པ་རབ་ཏུ་སྨྲས། 35

རྒྱལ་སྲས་ལ་འོས་གང་པ་ཡིས། ཀྱི་ལྷན་ས་གཞི་མཐོང་གྱུར་ནས།
ཀླུ་ཡི་གནས་ན་གནས་པ་དག། པ་དྨ་ཀ་ཡིས་དེ་ལ་བརྗོད། 36

इति राज्ञा समादिष्टः पूर्व्वापेक्षाविलक्षधीः।
गजवाजिरथानीकैरमात्यः सहितो ययौ ॥ २९ ॥

अत्रान्तरे सुधर्म्मोऽपि गूढ़माहूय पुत्रकम्।
तन्मन्त्रितं निवेद्यास्मै गम्यतामित्युवाच तम् ॥ ३० ॥

दत्त्वा चूड़ामणिं मात्रा स विसृष्टस्त्वराकुलः।
व्रजन् दूरादमात्येन दृष्टो रत्नविभूषितः ॥ ३१ ॥

राजपुत्रः स एवायं नूनं गूढ़ं पलायते।
इत्युक्तास्य बधायोग्रान् स सेनाग्रानचोदयत् ॥ ३२ ॥

जवेन धावतां तेषां मृगवेगः स दूरगः।
चम्पकाख्यस्य नागस्य ममज्ज भवनाम्भसि ॥ ३३ ॥

दृष्टनष्टे ततस्तस्मिंस्तमन्वेष्टुं प्रयत्नवान्।
पद्काख्यं महामात्यः पश्चाच्चारं विसृष्टवान् ॥ ३४ ॥

चूड़ामणिप्रभावेण संस्तम्भितजलं ततः।
नागः कुमारमाश्वास्य स्थीयतामित्यभाषत ॥ ३५ ॥

विलोक्य राजपुत्राङ्घ्रिपादमुद्रावतीं भुवम्।
स्थितं नागस्य भवने पदकस्तमसूचयत् ॥ ३६ ॥

དེ་ནས་ཀླུ་ཡི་དབང་པོའི་གནས། ཀུན་ནས་ཡོངས་སུ་བསྐོར་ནས་ནི།
བློན་པོ་ཆེན་པོས་ས་བདག་བཀའ། གདེངས་ཅན་དབང་ལ་རབ་ཏུ་བསྒྲགས། 37

ལག་འགྲོ་ཁྱོད་ཀྱི་ཁང་པ་ནི། བདག་གིས་རྡུལ་གྱིས་ཁེངས་པར་བྱ།
ཆུ་ནི་རྗེ་བོ་ཁྲིམས་ལྟ་ཡིས། ཐང་དང་གཙོང་རོང་དག་ཏུ་བྱེད། 38

རང་ཉིད་ལག་འགྲོའི་ལོངས་སྤྱོད་དབང་། གལ་ཏེ་འཆད་པར་མི་འདོད་ན།
རྒྱལ་པོའི་རྒྱལ་པོ་མི་ཕན་པ། རྒྱལ་པོའི་བུ་ནི་ཡོངས་སུ་ཐོང་། 39

དེ་སྐད་དེ་ཡི་སྨྲ་སྒྲིགས་པ་ན། མཚན་མོའི་དུས་སུ་ཀླུ་ཡིས་ནི།
སྒྱུར་བར་རྒྱལ་པོའི་བུ་བཏང་སྟེ། སྲོག་ཆགས་ཉམས་ནི་འཇིགས་དབང་གྱུར། 40

དེ་ནས་རྒྱལ་སྲས་རབ་བསྒྲིབས་ཏེ། འཁྲུད་མཁན་དག་གི་ཁང་པར་གནས།
ཀོང་པ་བཀོད་བའི་རྒྱུ་དག་གིས། པ་ཏྲ་ཀ་ཡིས་ཉེ་བར་མཆོད། 41

དེ་ནས་བློན་ཆེན་འོངས་པའི་ཚེ། དེས་འཇིགས་འཁྲུད་མཁན་དག་གིས་ཀྱང་།
གོས་ཀྱི་ཁུར་གྱི་ནང་བཅུག་ནས། འཇུག་རྟོགས་མཐའ་རུ་ཡོངས་སུ་བཏང་། 42

དེ་ནས་ཀྱང་ནི་གསང་སྟེ་སོང་། དེ་ནི་ཛ་མཁན་ཁང་པ་ན།
གཡུལ་སྐད་ནས་ཀྱང་མི་བདག་བུ། དུས་ལ་སྡོད་ཅིང་རབ་ཏུ་གནས། 43

དེར་ཡང་བ་གླང་རྣ་དག་ནི། ཀོང་པའི་རྒྱུ་ཡིས་རྗེས་འབྲང་བ།
དབྱུང་གི་འཁོར་ལོ་ཆེན་པོ་ཡིས། ལམ་ནི་ཡང་དག་བཀག་པའི་ཚེ། 44

अथ नागेन्द्रभवनं परिवार्य्य समन्ततः ।
अश्रावयन्महामात्यः पार्थिवाज्ञां फणीश्वरम् ॥ ३७ ॥

पांशुभिः पूरयाम्येष भवनं ते भुजङ्गम ।
जलं स्थलं स्थलं श्वभ्रं करोति कुपितः प्रभुः ॥ ३८ ॥

भुजङ्गीभोगविच्छेदं न चेदिच्छसि तत् स्वयम् ।
अहितं राजराजस्य राजपुत्रं परित्यज ॥ ३९ ॥

इति सन्तर्जितस्तेन नागस्तूर्णं क्षपाक्षणे ।
तत्याज राजतनयं भयभोग्या हि जन्तवः ॥ ४० ॥

प्रच्छन्नं राजपुत्रोऽथ रजकावसथे स्थितः ।
चरणन्यासमुद्राभिः पदकेनोपलक्षितः ॥ ४१ ॥

ततः प्राप्ते महामात्ये रजकेनापि तद्भयात् ।
वस्त्रभारान्तरगतः परित्यक्तस्तटान्तरे ॥ ४२ ॥

गूढं ततोऽपि गत्वासौ कुम्भकारनिवेशने ।
तस्थौ योद्धुं समर्थोऽपि कालाकाङ्क्षी नृपात्मजः ॥ ४३ ॥

तत्रापि गोविषाणेन पादमुद्रानुसारिणा ।
महता बलचक्रेण सन्निरुद्धेषु वर्त्मसु ॥ ४४ ॥

ས་བདག་བུ་ནི་གོས་དག་གིས། གཡོགས་ཤིང་མི་རྟོག་འཁྲིད་བས་མཚན།
ཚོང་དང་བཅས་ཇོ་མཁན་གྱིས། རོ་ཡི་ཟྲོལ་གྱིས་དབེན་པར་དོར། 45

དབེན་པར་མགྲོགས་པས་འགྲོ་བྱེད་པ། དེ་ཡི་རྗེས་ཀྱི་འཁྲིད་བ་དག།
སོང་བའི་རྗེས་སུ་སོང་གྱུར་པས། བློན་པོ་ཆེན་པོ་མགྲོགས་པར་འོངས། 46

ཀུན་ཏུ་ཡོངས་སུ་མི་གཏོང་ཞིང་། ལས་བཞིན་དུ་ནི་རྗེས་འབྲང་བ།
འཚོལ་བའི་ངལ་དུབ་ཀྱིས་གཟིར་བ། བློན་པོ་གདུག་པས་དེ་མཐོང་གྱུར། 47

མགྲོགས་ལས་གཡང་ས་མ་བསྟེས་ཏེ། གཡང་ས་ཆེན་པོར་ལྷུང་གྱུར་ནས།
འཁྲི་ཤིང་ཤིང་སྐམ་ཚོགས་དག་ལ། གཙུག་གི་ནོར་བུ་ཆགས་པར་གྱུར། 48

མི་བཟད་གཡང་ས་གཅོད་དག་ཏུ། ལྷུང་བ་དེ་མཐོང་བློན་པོ་ཡིས།
གཙུག་གི་ནོར་བུ་ཡང་དག་བླངས། སོང་ནས་རྒྱལ་པོ་དག་ལ་བཤད། 49

གནོད་སྦྱིན་ཨ་ཛ་ལ་ཞེས་བ། གཡང་སར་གནས་བས་གཞོན་ནུ་ཡང་།
བསྲུངས་ཏེ་འདབ་ཆགས་བཞིན་དུ་ནི། ས་ལ་ཕྱིན་ཅིང་ཤི་མ་གྱུར། 50

བུ་ནི་ལྷུང་ཐོས་ཆོས་བཟང་དག། རང་ཉིད་འཆི་བ་འཚོལ་བ་ནི།
ལྷ་མོ་ནཱརས་ཀྱི་ཁྲོད་ཀྱི་བུ། འཚོ་ཞེས་བརྗོད་ནས་རབ་ཏུ་བསྲུངས། 51

གཞོན་ནུ་ཡང་སྡུག་མིག་སྟོན་པོ་ཡིས། རྗེ་བའི་གཞི་ནི་ཉམས་བྲས་ཤིང་།
གླང་པོའི་ཁྲག་གིས་རྒྱས་པ་ཡིས། མི་བཟད་སྡུག་ལྡན་ནགས་སུ་ཞུགས། 52

वस्त्रैराच्छादितः पुष्पमालाङ्कः क्षितिपात्मजः ।
त्यक्तः कुलालैः साक्रन्दैः शवव्याजेन निर्जने ॥ ४५ ॥

जवेन व्रजतस्तस्य विजने पदपङ्क्तिभिः ।
गतिं मत्वा महामात्यस्तूर्णं पश्चात् समाययौ ॥ ४६ ॥

असंत्यक्तः स सर्व्वत्र कर्म्मणेवानुसारिणा ।
अन्वेषणश्रमार्त्तेन दृष्टः क्रुद्धेन मन्त्रिणा ॥ ४७ ॥

वेगादगणितश्वभ्रः स पपात महावटे ।
लग्नचूडामणिः शुष्कलताविटपसङ्कटे ॥ ४८ ॥

तं दृष्ट्वा पतितं मन्त्री विषमे श्वभ्रकोटरे ।
चूडामणिं समादाय गत्वा राज्ञे न्यवेदयत् ॥ ४९ ॥

कुमारोऽप्यञ्जनाख्येन यक्षेण श्वभ्रवासिना ।
रक्षितः क्षितिमासाद्य पक्षिवन्न व्यपद्यत ॥ ५० ॥

सुधर्म्मा पतितं श्रुत्वा पुत्रं स्वं निधनैषिणी ।
सुतस्ते जीवतीत्युक्त्वा रक्षिता दिव्ययोषिता ॥ ५१ ॥

कुमारोऽपि खरव्याघ्रखुरक्षुण्णशिलातलम् ।
गजास्त्रक्षतशार्दूलदारुणं वनमाविशत् ॥ ५२ ॥

དེ་ནི་རྫོན་པ་མིག་སེར་ཅན། ཞེས་པ་ཡིས་ནི་རབ་བཤད་དེ།
ལམ་ནི་ཐོབ་པའི་སྐྱེས་བུ་དག། ལུས་ཀུན་བཅད་པ་མཐོང་བར་གྱུར། 53

དེ་མཐོང་སྙིང་རྗེ་སྐྱེས་པ་ཡི། མི་བདག་བུ་ཡིས་རབ་ཏུ་དྲིས།
ཁྱོད་ཀྱི་སྡུག་བསྔལ་གནས་སྐབས་འདི། མི་མེད་ནགས་སུ་ཅི་ཡིས་ཐོབ། 54

དེས་སྨྲས་རིང་པོ་མིན་འདི་ན། གཏུམ་པོ་གཏུམ་པོའི་སྤྱོད་ཚུལ་ཅན།
བཟོད་དཀའ་སུ་དྲཱ་ས་ཞེས་པ། སྐྱེས་བུ་ཉམས་ཀྱི་མཐར་བྱེད་གནས། 55

དེ་ལ་དུང་གི་ཁ་ཞེས་བ། ཁྲི་ནི་འཛིགས་སུ་རུང་བ་ཡོད།
ལམ་གནས་མཐའ་དག་གང་མཐོང་བ། གདོན་མི་ཟ་བར་ནམ་འཇོམས་པ། 56

དེ་ཡི་སྤྱོད་ཚུལ་ལྟུང་གྱུར་པ། ཡུད་ཙམ་འཚོ་བའི་ལྷག་མ་ཅན།
བདག་གི་གནད་བསྣུན་ཟུག་རྔུ་འདི། ཡན་ལག་བཅད་ལས་ཡང་དག་སྐྱེས། 57

གཏུམ་པོ་ཉིན་གུང་གདུང་བའི་ཚེ། གདུག་པ་དུང་གི་ཁ་དག་གིས།
མགྲིན་པ་རབ་བཅད་དོན་མཐུན་གྱི། ཁྲག་ནི་རྟག་ཏུ་འཐུང་བར་བྱེད། 58

དེ་ནས་དེ་ཡིས་ཚིག་ཐོས་ནས། བརྩེ་བས་ཡིད་ནི་སྡུག་གྱུར་ཅིང་།
མཚོན་དང་བྲལ་བ་རྒྱལ་པོའི་བུ། ཅི་ཞིག་བྱ་ཞེས་རབ་ཏུ་བསམས། 59

དྲག་པོ་གཞུ་ཡི་དཀྱིལ་འཁོར་ཅན། དེ་ནས་གཏུམ་པོ་འོངས་གྱུར་ཏེ།
ཕྱོགས་སུ་མིག་གིས་ལྟག་གི་ནི། ཁྲག་གི་ཟེར་མ་འཕེན་པ་བཞིན། 60

तत्र पिङ्गलकाख्येन लुब्धकेन निवेदितम् ।
मार्गमासाद्य पुरुषं कृत्तगात्रं व्यलोकयत् ॥ ५३ ॥

विलोक्य जातकरुणस्तं पप्रच्छ नृपात्मजः ।
केनेमां वैशसावस्थां नीतोऽसि विजने वने ॥ ५४ ॥

सोऽब्रवीन्नातिदूरेऽत्र चण्डालश्चण्डचेष्टितः ।
निवसत्यन्तकः पुंसां सुदासो नाम दुःसहः ॥ ५५ ॥

तस्य शङ्खमुखो नाम सारमेयोऽस्ति भीषणः ।
पान्थास्थिशकलाकीर्णा येनैता विहिता दिशः ॥ ५६ ॥

तद्गोचरच्युतस्येयमङ्गच्छेदसमुद्भवा ।
मुहूर्त्तशेषजीवस्य व्यथा मे मर्म्मशातिनी ॥ ५७ ॥

कुद्धशङ्खमुखोत्कृत्तकण्ठानां सार्थगामिनाम् ।
मध्याद्धतनश्चण्डालः सदा पिबति शोणितम् ॥ ५८ ॥

इति तस्य वचः श्रुत्वा राजपुत्रो निरायुधः ।
किं करोमीति कृपया प्रदध्यौ विद्धमानसः ॥ ५९ ॥

अथाजगाम चण्डालश्चण्डकोदण्डमण्डलः ।
दिक्षु क्षिपन्निव दृशा वाराहरुधिरच्छटाः ॥ ६० ॥

དེ་ཡི་ངོས་སུ་ཁྲི་ཡང་མཐོང་། སོག་ལེ་ལྟར་ཙུབ་སོ་དང་ལྡན།
གསར་བའི་བག་གིས་བསྒྲོས་པ་ཡི། སྡེར་མོའི་རྩེ་མོས་ས་ལ་འབྲད། 61

རི་དྭགས་ཚམས་ཀྱི་ཡན་ལག་འཇོམས། གཡག་ཚམས་དག་ནི་འབྲིས་པའི་གདོན།
ཅེ་སྤྱང་ཚམས་ཀྱི་རིགས་ཀྱི་ནད། ཕག་ཚམས་ཉམས་པར་བྱེད་པའི་རིམས། 62

གདུམ་པོའི་ཕྱོགས་སུ་ལྷུང་བ་ཡིས། བྱེད་པོས་ནགས་ཀྱི་ལམ་དུ་ནི།
འཚོ་བ་དག་གི་ངལ་དུབ་བཞིན། དྲེགས་ལྡན་གདུག་པ་ཅན་དེ་སྤྲུལ། 63

འགྲོན་པོའི་རྐང་མ་གསར་དུ་ནི། ཕྱུག་སའི་གདུང་བསྐྱབ་བྱེད་དེའི།
ཧུ་ཞེས་ཀྲ་ཀྲ་སྒྲ་དག་གིས། བསེ་རུ་དྭུས་མ་ཚམ་པར་འབྲོས། 64

ཤིན་ཏུ་གདུམ་པོ་རྔོད་པ་ཡིས། བདེ་ཡི་མཐོན་དུ་འོང་བ་དེ།
མཐོང་ནས་ས་སྐྱོང་བྲུ་ཡིས་ནི། སྐྱུ་རུ་ར་ཡི་ཤིང་ལ་འཛེགས། 65

ཤིང་ལ་འཛེགས་པ་དེ་མཐོང་ནས། ནི་བའི་བར་དུ་མདའ་དྲངས་ཤིང་།
གདུམ་པོས་གདུག་པ་དུང་གི་ཁ། དེ་ནི་གསོད་ལ་མངོན་ཕྱོགས་བྱས། 66

འཕུར་སྨྲ་གདུག་པའི་མིག་དེ་ཡིས། མདའ་དང་ཁྲི་ཡི་མཆེ་བ་ལྟར།
རྣོ་བའི་ཚིག་གིས་ཕྱུག་པ་ཡི། རྒྱལ་པོའི་བུ་ཡིས་རབ་བསམས་པ། 67

ཀྱེ་མ་རྒྱལ་པོའི་རྒྱལ་པོ་ཡིས། གཡུལ་དུ་སྤྲོ་བ་དང་ལྡན་པ།
མཚོན་མེད་བདག་ལུས་འཇིག་པ་འདི། བྱེད་པོ་དག་གི་ཉམ་པར་སྤྲུལ། 68

तत्पार्श्वे क्रकचक्रूरदशनः श्वाप्यदृश्यत ।
प्रत्यग्रशोणितासक्तनखकोटिक्षतावनिः ॥ ६१ ॥

अङ्गभङ्गः कुरङ्गाणां चमराणां गलग्रहः ।
शृगालानां कुलव्याधिः शूकराणां क्षयज्वरः ॥ ६२ ॥

मातङ्गपक्षपातेन विधिना वनवर्त्मनि ।
क्रौर्य्यदर्पः स सिंहानामायास इव निर्म्मितः ॥ ६३ ॥

तस्याध्वन्यवधूनव्यवैधव्यविधिवेधसः ।
झङ्कारघर्घरारावैर्दुद्रुवुः खड्गिधेनवः ॥ ६४ ॥

तमभिद्रुतमत्युग्रचण्डालक्षोभसंज्ञया ।
दृष्ट्वा रुरोह भूपालसूनुरामलकद्रुमम् ॥ ६५ ॥

तं वीक्ष्य पादपारूढमाकर्णाकृष्टसायकः ।
क्रुद्धः शङ्कमुखं चक्रे चण्डालस्तदधोन्मुखम् ॥ ६६ ॥

शरश्वदंष्ट्रातीक्ष्णाभिर्वाग्भिरुद्धतवादिना ।
विद्धः क्रूरदृशा तेन राजसूनुरचिन्तयत् ॥ ६७ ॥

अहो निरायुधस्यायं वेधसा मम निर्म्मितः ।
राजराजरणोत्साहयोग्यस्य वपुषः क्षयः ॥ ६८ ॥

སྐྱེ་བ་ངན་པ་གྲུ་མེད་ཀྱིས། དགྲ་འདི་ཐུལ་བར་གྱུར་པ་ནི།
མཛའ་བས་མ་ཡིན་སྦྱིན་པས་མནི། མཆོད་མིན་ཡོན་ཏན་གྱིས་ཀྱང་མིན། 69

ངེས་པར་དཀྱུལ་བའི་གནས་དག་ནི། འདི་ཡི་མདུན་ན་བསྟན་བྱས་པ།
མིའི་ཀེང་རུས་འཕྲེང་བ་ཅན། ནགས་ཀྱི་ས་གཞི་རབ་ཏུ་སྨྲ། 70

གང་དུ་གྲུལ་རིགས་གཙུག་གི་ནོར། གྲུལ་པོ་ཟླ་བའི་རིགས་སུ་སྐྱེས།
ཁྲི་འམ་གཏུམ་པོའི་བུ་དག་གིས། མཚོན་མེད་བདག་ནི་གསོད་པར་བྱེད། 71

རྣམ་ཀུན་ངེས་པར་མི་གཡོ་ཞིང་། སྐྱེ་བའི་མཐར་ཐུག་གནས་གྱུར་པ།
སྐྱེས་བུའི་དོན་དང་འགལ་འགྱུར་བ། སྔོན་གྱི་ལས་ལ་ཕྱག་འཚལ་ལོ། 72

དམན་པའི་དྲ་བ་དག་ལ་སྐྱོན་ཐུག་རྩེ་མིན་ཡོན་ཏན་སྐུད་གྱིས་མིན།
འཇིག་རྟེན་རབ་མང་སྐྱོན་གྱིས་གང་སྐྱོན་ཤིན་ཏུ་ཆུང་བ་དག།
རིང་ནས་ཤིན་ཏུ་གསལ་བར་མཐོང་ནས་མཛུབ་མོ་དག་གིས་སྟོན་བྱེད་པ།
ཀུན་ལས་མཐོ་བས་རང་རིགས་ཟླ་བ་དེ་ཡི་སྐྱེ་བར་མ་གྱུར་ཅིག། 73

དེ་ལྟར་སེམས་དཔའ་དེ་ཡིས་ནི། མི་བཟད་སྲོག་གི་ཐེ་ཚོམ་ལ།
བདག་ཉིད་ཉམས་པས་ལུས་དག་ནི། འཇིངས་པས་འཇིགས་པ་ཡོངས་མ་གྱུར། 74

སྐབས་དེར་ཐུབ་པ་རིག་པ་འཛིན། མ་ཐར་ཡིས་ལྷ་མིག་གིས།
དེ་ཡི་གནས་སྐབས་མི་བཟད་པའི། ཉོན་མོངས་ཅན་ཞིས་བརྩེ་བ་ཡིས། 75

न स्नेहेन न दानेन न मानेन गुणेन वा ।
अयं निष्कारणरिपुर्निजतामेति दुर्जनः ॥ ६९ ॥

नरकं नियतावासमस्य सज्जीकृतं पुरः ।
नरकङ्कालमालिन्यो वदन्ति वनभूमयः ॥ ७० ॥

क्व जन्म राजचन्द्रस्य वंशे क्षत्रशिरोमणेः ।
शुनश्चण्डालपुत्राद्वा निःशस्त्रस्य बधः क्व मे ॥ ७१ ॥

सर्व्वथा निश्फलायैव जन्मपर्य्यन्तशालिने ।
पुरुषार्थविरुद्धाय नमः प्राक्तनकर्म्मणे ॥ ७२ ॥

न च्छिद्राली न च गुणततिर्गण्यते जाल्मजाले
सर्व्वान्नत्या स्वकुलशशिनस्तस्य जन्मैव माभूत् ।
दोषं दोषप्रचयवसतिर्दर्शयत्येव दूरात्
यस्याङ्गुल्या तनुतरमतिव्यक्तमालोक्य लोकः ॥ ७३ ॥

इति चिन्तयतस्तस्य विषमे प्राणसंशये ।
अभून्मानक्षयादेव न शरीरक्षयाद्भयम् ॥ ७४ ॥

अत्रान्तरे दिव्यदृशा ज्ञात्वा विद्याधरो मुनिः ।
माठरः कृपया तस्य तीव्रक्लेशवतीं दशाम् ॥ ७५ ॥

མཁའ་དང་རལ་གྲི་འགྲོགས་པ་ཡི། ཡོན་ཏན་གཅིག་ཉིད་སྟོན་བྱེད་ཅིང་།
ལག་ན་ཤུབས་མེད་རལ་གྲི་ཅན། མཁའ་ཡི་ལམ་ནས་ཡང་དག་འོངས། 76

ཁྲིས་ཞིང་ཞིན་དུ་སྡུག་པའི་མིག། འཇིགས་རུངས་ལུས་ཅན་དེ་འོངས་ཏེ།
གདུམ་པོའི་བུ་དང་དུང་གི་ནི། ཁ་ཡི་མགོ་དག་རབ་ཏུ་བཅད། 77

དེ་ནས་རང་གི་གནས་སུ་ཁྲིད། མི་བདག་སྲས་དེ་དབུགས་ཕྱུང་ནས།
རྩེ་འཕྲུལ་ཆེ་དང་ལྡན་ཅིག་དེས། སྒྱུ་མའི་རིག་པ་དེ་ལ་བྱིན། 78

དེ་ནས་ཐུབ་པ་དེ་ལ་ཞུས། ཁྱིངས་ལྡན་རྒྱལ་སྲས་རྒྱལ་སྲིད་ནི།
བཞེད་ཅིང་དགྲ་ལས་རྒྱལ་འདོད་པས། ཀཾ་པི་ལར་ནི་དཔལ་གྱིས་སོང་། 79

དེ་ཡིས་དེར་ནི་གར་མཁན་མ། ཡིད་འཕྲོག་དགའ་མའི་གཟུགས་བྲིས་ནས།
ཡིད་འོང་གར་སྟབས་དེ་དང་དེས། གྲོང་པའི་འཇིག་རྟེན་ཆོམ་པར་བྲུས། 80

དེ་ཡི་གར་དང་གླུས་གར་དག། མཁས་པ་མི་བདག་གིས་ཐོས་ནས།
གློན་པོ་དང་བཅས་རང་ཉིད་ནི། གླུས་གར་ཁང་པར་ལྟ་རུ་སོང་། 81

དེ་ཡི་དེ་ནི་སྒྲ་ཅན་གྱིས། རྩེ་དགའ་ཡིད་འོང་དེ་དག་མཐོང་།
མཛེས་མའི་གཟུགས་སུ་གཡོ་མེད་ནི། བདུད་རྩི་ལེན་དུ་འོང་བ་བཞིན། 82

དེ་ཡི་གར་སྟབས་མཛེས་སྡུག་ལ། ཉམས་པར་དབྱུད་ནས་འཛིན་མ་འཛིན།
འཇོ་སྒྲིག་རྒྱང་ཞིང་སྦྱོས་གྱུར་པས། གློན་པོའི་གཙོ་ལ་རབ་སྐྱུས་པ། 83

व्योममार्गेण निष्कोषखड्गपाणिः समाययौ ।
नभोनिस्त्रिंशयोमैत्रीमेकरूपां प्रदर्शयन् ॥ ७६ ॥

सोऽभ्येत्य भीषणतनुः क्रोधक्रूरतरेक्षणः ।
चण्डालस्तनोश्चिच्छेद शिरः शङ्खमुखस्य च ॥ ७७ ॥

अथ स्वमाश्रमं नीत्वा तमाश्वास्य नृपात्मजम् ।
स तस्मै प्रददौ मायाविद्याः सह महर्द्धिभिः ॥ ७८ ॥

ततस्तं मुनिमामन्त्र्य मानी शत्रुजिगीषया ।
राज्यकामः शनैः प्रायात् काम्पिल्यं पार्थिवात्मजः ॥ ७९ ॥

स तत्र नर्त्तकीरूपं कृत्वा रतिमनोरमम् ।
ललिताभिनयैस्तैस्तैः पौरलोकमतोषयत् ॥ ८० ॥

श्रुत्वा नरपतिस्तस्य कौशलं नृत्यवाद्ययोः ।
स्वयं द्रष्टुं सहामात्यैः प्रययौ नाट्यमण्डपम् ॥ ८१ ॥

स तत्र कैशिकी-लीला-ललितं तं व्यलोकयत् ।
अमृताहरणायातं कान्तारूपमिवाच्युतम् ॥ ८२ ॥

तस्याभिनवसौन्दर्य्यं विचार्य्य धरणीधरः ।
शृङ्गारास्वादनक्षीवः प्रधानामात्यमब्रवीत् ॥ ८३ ॥

ཀྱེ་མ་མཛེས་སྡུག་ཀུན་རྫོགས་ཤིང་། བསྔགས་འོས་ལུས་མཆོག་ལྡན་པའི་ལུས།
ངོ་མཚར་གར་སྟབས་ལྡན་པ་ནི། བདག་ཅག་རྣམས་ཀྱི་ཡིད་འཕྲོག་བྱེད། 84

མཐོ་རིས་ཇོ་རའི་རྩེད་འཛོ་མཁན། མི་ན་ཀ་དེ་འདི་མིན་ནམ།
གཞན་དུ་གསར་པའི་ཚོན་རིས་དང་། དཔྱིབས་མཛེས་འདི་ནི་ག་ལ་འོང་། 85

འགྱུར་བག་ཤིན་དུ་ལེགས་པའི་རང་བཞིན་གྱིས་སྤྲས་ནམ་བཀྲ་མཛེས་པའི་རིམ་པ་ཡི།
ཚོགས་རྣམས་ཉིད་ཀྱིས་ཉམས་སུ་མྱོང་བྱ་ཉམས་རྣམས་ངེས་པར་རྫོགས་པ་ལ་བསྟོན་ཞིང་།
རྫོགས་པའི་དབུས་སུ་གླུ་ཡི་འགྱུར་གྱིས་ཡང་ཡང་རབ་ཏུ་དང་བ་སྐྱུབ་བྱེད་པ།
རྫ་རྔ་ཡང་དག་བསྐྲགས་པས་ཉེ་བར་སྤྲས་པའི་ཟློས་གར་ཀྱི་མ་ཡིད་དག་འགུགས། 86

སྐད་ནི་བརྗོད་པ་ཡོངས་སུ་འཛིན་ཚེ་ཡིད་འོང་རྒྱུད་མང་སྒྲ་ཡིས་དགའ་ལྡན་པ།
སྙིང་སྟོབས་གསལ་བར་འབྱེད་པས་འདར་ཞིང་གཡོ་ལྡན་འོག་བག་མཛེས་སྡུག
རི་མོའི་གྲོགས།

གསང་པོར་བརྗོད་ལ་མངོན་ཕྱོགས་མི་འཕྲོགས་ཡིད་འོང་སྟབས་དང་ལྡན་པར་སྒེག
པར་སྤྲས།

གཟུགས་བཟང་སྨིན་མ་ཟུང་ནི་སྒེག་ཅིང་རོལ་པའི་བསྒྲུབ་པས་སྤྲས་པ་ཀུན་ཏུ་བསྟེན། 87

ཞེས་དེ་དེ་གདོང་ཆུ་སྐྱེས་ལ། མིག་བཀོད་ས་ཡི་བདག་པོ་ཡི།
བཞིན་གྱི་ཏུལ་གྱིས་བྲན་པ་ཡི། འདོད་པའི་ཀང་འཕུང་ཡང་དག་སྐྱེས། 88

དེ་ལ་ཆི་མ་མེད་ཉིན་མོའི་མཐར། རིན་ཅེན་ཡོངས་རྫོགས་བྱིན་ནས་ནི།
ཕོ་བྲང་འཁོར་གྱི་ནང་སོང་སྟེ། མི་ཡི་བདག་པོས་བདག་ཉིད་བསམས། 89

अहो सम्पूर्णलावण्या धन्या वरतनोस्तनुः ।
इयं हरति नश्चेतश्चित्राभिनयशालिनी ॥ ८४ ॥

इयं सा मेनका नूनं स्वर्गरङ्ग-विलासिनी ।
अन्यथा नवनेपथ्या कुतः कान्तेयमाकृतिः ॥ ८५ ॥

भावा भव्यतरस्वभावरचना वैचित्र्यचारुक्रमैः
आस्वाद्यस्य रसस्य सङ्गततया निष्पादनायोद्यताः ।
निष्पन्नस्य मुहुः प्रसाधनविधिर्मध्ये भ्रुवो[1] गीतिभिः
संमूर्च्छन्मुरजोपरञ्जितमहो नाट्यं मनः कर्षति ॥ ८६ ॥

वाणी पाठ्यपरिग्रहे [2]परिलसद्वीणास्वनामोदिनी
सत्त्वव्यक्तिविभक्तिकम्पतरला तालोन्मुखी मेखला ।
आहार्यं रचयत्यहार्यरुचिरं सौन्दर्यरेखासखी
तन्व्या लास्यविलासशिष्यकलनां भ्रूयुग्ममासेवते ॥ ८७ ॥

इति तद्वदनाम्भोजन्यस्तनेत्रस्य भूपतेः ।
उद्ययौ वदनस्वेदसिक्तो मदनपादपः ॥ ८८ ॥

दिनान्ते रत्नसम्पूर्णं दत्त्वास्यै पारितोषिकम् ।
अन्तःपुरोदरं गत्वा तामेवाचिन्तयन्नृपः ॥ ८९ ॥

---

१ भ्रुवा in all MSS.   २ W_1 पठियमत् ।

འཁོར་བའི་གྲུས་བཞིན་བདེན་མེད་གཟུགས། བཅོམ་མའི་འདོད་ལྡན་མ་ཡིས་ནི།
ས་བདག་དེ་ཡི་ནང་དག་ཏུ། ཉམས་པར་གནས་ཤིང་སྨོངས་པར་བྱས། 90

འདོད་པས་གཟིར་བ་དེ་ཡིས་དེ། དལ་བུ་ཡིས་ནི་ཁྲིམ་དུ་བོས།
ཡོངས་སུ་གྱུར་པའི་འགལ་བ་ལ། འཆི་བར་འདོད་ཉམས་ཆགས་པར་བྱེད། 91

གྲགས་པ་མེ་ཏོག་ཉམ་བཀྲ་ཞིང་། སྲི་ཚན་གསུམ་གྱི་འབྲས་བུ་ཅན།
མི་བདག་ལྗོན་པ་ཉམས་དག་གིས། དབང་པོ་མ་བསྒུལམས་སྡུ་རེ་ཡིན། 92

གླང་པོ་རྗེས་སུ་ཆགས་པ་དྲག་པོའི་དབང་དུ་གྱུར་པ་ལ།
གལ་ཏེ་གླང་མོ་དེ་ཡིས་སྨོངས་པའི་བསླབ་པ་མ་བྱིན་ན།
ཡོངས་རྫོགས་སྦྱིན་པས་བྱུང་བའི་དོན་མཐུན་ཡོངས་སུ་དགྲེས་བྱས་པ།
ཁྲུ་ཡི་མགོན་པོ་ལྷུང་བའི་གཡང་ལ་ངེས་པར་ལྷུང་བ་མིན། 93

དེ་ནས་དལ་གྱིས་གྲོལ་ཁབ་ཏུ། བྲན་ཁོལ་སྔུན་པོ་འདུན་པ་ཡི།
རྗེས་སུ་འཇུག་པས་བརྟག་པའི་སྐད། བཅོམ་མའི་བུད་མེད་རབ་ཏུ་བཅུག། 94

དབེན་པར་བརྟེན་པ་བཏང་བྱས་ཤིང་། གསང་བ་མངོན་པར་འདོད་དེ་ལ།
དུས་ནི་མཛེས་མའི་གཟུགས་དག་གིས། མགུལ་ནས་འཛིན་ལ་མངོན་ཕྱོགས་གྱུར། 95

དེ་ནས་གཅིད་ནི་རིང་པོའི་སྐད། གུས་པས་མལ་སྟན་འཛོམས་དེ་ལ།
གཞོན་ནུས་གར་མཁན་མ་ཡི་གཟུགས། སྤངས་ནས་འཕྲལ་ལ་རབ་སྨྲས་པ། 96

असत्यरूपा तस्यान्तर्विश्रान्ता कूटकामिनी ।
चक्रे संसारमायेव वामा मोहं महीपतेः ॥ ९० ॥

आनिनाय स तां स्वैरं सदनं मदनातुरः ।
परिणामविरोधीनि स्पृहयन्ति मुमूर्षवः ॥ ९१ ॥

यशःपुष्पप्रकाराणां त्रिवर्गफलशालिनाम् ।
परशुन्द्रपद्मक्षाणामिन्द्रियाणामनिग्रहः ॥ ९२ ॥

नैवावटे पतति पातिनि यूथनाथः
सम्पूर्णदानपरिपूरितभृङ्गसार्थः ।
सा बन्धकी यदि करोति न कुञ्जरस्य
गाढ़ानुरागविवशस्य विमोहदीक्षाम् ॥ ९३ ॥

ततः स्वैरं गृहं राज्ञश्चेटकैः कूटकामिनी ।
छन्दानुवृत्तिभिर्मूढ़ैर्विनाशाय प्रवेशिता ॥ ९४ ॥

विविक्ते त्यक्तधैर्य्यस्य तस्य गाढ़ाभिलाषिणः ।
बभूव कान्तारूपेण कालः कण्ठग्रहोन्मुखः ॥ ९५ ॥

ततस्तं दीर्घनिद्रायै शय्यामारूढ़मादरात् ।
विहाय नर्त्तकीरूपं कुमारः सहसाब्रवीत् ॥ ९६ ॥

ཁྲོད་ཀྱི་ལོངས་སྤྱོད་ལ་ཆགས་ཤིང་། སྤྱན་ལྷའི་མཛའ་ལ་ལྟོས་མེད་པས།
ལྷན་ཅིག་སྤྱོད་པ་རྒྱལ་སྲིད་ནི། གཅིག་པུ་ཡིས་ནི་ཇི་ལྟར་སྤྱོད།། 97

མི་བཟད་ཉོན་མོངས་ཆུ་གཏེར་དུ། སྐྱོན་མེད་ང་ནི་ཁྲོད་ཀྱིས་འཕངས།
དེ་ཡི་ལེ་ལན་སེམས་བྱེད་བདག། རང་གི་ལས་ནི་སྨྱུར་བས་ཐར།། 98

ཞེས་བརྗོད་དེ་ཡིས་མི་བདག་བཅིངས། རྒྱལ་སྲིད་རབ་ཏུ་རྒྱས་པ་ཐོབ།
སྐྱོ་བོ་འི་ཚོགས་ནི་དབུགས་ཕྱུང་སྟེ། སྲིད་ལྡན་རབ་ཏུ་ཞི་བར་བྱས།། 99

གནས་ཐོབ་དེ་ཡི་རང་ཉིད་ཀྱིས། གནོད་པ་དྲག་པོ་སེམས་བྱེད་ཅིང་།
སྤྱི་དྲི་བརྩེ་མེད་ཁྲི་བ་ཡིས། མི་ཡི་བདག་ལ་རྡོ་བ་འཕངས།། 100

སྤྱན་ལྷ་བསད་པས་ཆགས་པ་ཡི། ཁྲག་དང་སྤགས་བཞིན་དཔལ་འབྱོར་དེ།
སྤྱད་ནས་གཞོན་ནུ་སྐྱན་དངགས་མཁན། ལུས་ཀྱི་མཐུག་ཏུ་དགྱེལ་བར་སོང་།།
101

དེ་ཉིད་ང་ཡིན་སྟོང་ཕྲག་ལོར། ལས་ཀྱི་སྡིག་པ་དེ་སྤྱད་ནས།
སྡིག་པ་ཟད་མོད་ད་ལྟ་ཡང་། རྐང་པའི་མཐེ་བོ་ཡོངས་སུ་སྣད།། 102

སྐྱེ་བའི་འཁོར་མོར་རིམ་གྱིས་ཡོངས་འདྲིས་རྒྱུད་དག་གིས་ནི་སྨིན་བྱས་ཤིང་།
ཁྲི་ནས་སྐམ་དང་ཆུ་དང་ཤིང་དང་རྡོ་ཡི་སྙིང་པོ་འི་དབུས་སྐྱེས་ཀྱང་།།
སྣ་ཚོགས་རོ་ཡི་ཡོ་བྱེད་ལུས་ཀྱི་སྣོད་ནི་དེ་དང་དེ་སྤྱད་དེ།
སྐྱེས་བུའི་ལས་ཀྱི་ལྷག་མ་སྐལ་བ་གནོད་པ་ཡིས་ཀྱང་གཏོང་མི་འགྱུར།། 103

भोगलुब्धेन भवता भ्रातृस्नेहानपेक्षिणा ।
सहभोग्यमिदं राज्यं कथमेकेन भुज्यते ॥ ९७ ॥

निर्दोषः क्लेशजलधौ क्षिप्तोऽहं विषमे त्वया ।
स्वकर्म्मयोगादुत्तीर्णस्त्वत्प्रतीकारचिन्तकः ॥ ९८ ॥

उक्त्वेति बद्ध्वा नृपतिं प्राप्तं राज्यमवाप्य सः ।
लुब्धप्रशमनं चक्रे जनताश्वासनेन सः ॥ ९९ ॥

स संप्राप्तपदस्तीव्रं चिन्तयन् स्वपराभवम् ।
शिलां प्रभाते चिक्षेप नृपतेर्मन्युनिष्कृपः ॥ १०० ॥

तां भ्रातृवधसंसक्तरक्तसिक्तामिव श्रियम् ।
भुक्त्वा कविकुमारोऽपि देहान्ते नरकं ययौ ॥ १०१ ॥

सोऽहं वर्षसहस्राणि भुक्त्वा तत्कर्म्मपातकम् ।
प्रक्षीणकिल्बिषोऽप्यद्य पादाङ्गुष्ठे परिक्षतः ॥ १०२ ॥

जन्मावर्त्तक्रमपरिचयैः सन्ततैः पच्यमानम् ।
पश्चाद्यातं स्थलजलतरुग्रावगर्भान्तरेऽपि ।
तैस्तैर्नानारसपरिकरैः कायपात्रे स्वभुक्तम् ।
कल्पापायैरपि न पुरुषः कर्म्मशेषं जहाति ॥ १०३ ॥

དེ་སྐད་སྐྱེ་བ་གཞན་གྱི་སྤྱོད། བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས་ཐོས་ནས།
དགེ་སློང་ཀུན་གྱིས་ལས་ཀྱི་རྒྱུར། བགོམ་པར་བྱ་བ་མིན་པར་ངེས།། 104

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་བརྗོད་པ
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གཞོན་ནུ་སྟོན་དངགས་མཁན་གྱི་
རྟོགས་བརྗོད་པའི་ཡལ་འདབ་སྟི་དྲུག་ཅུ་ཙ་དྲུག་པའོ།།

इत्यन्यजन्मचरितं श्रुत्वा भगवतोदितम् ।
अलङ्घ्यां मेनिरे सर्व्वे भिक्षवः कर्म्मसन्ततिम् ॥ १०४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्वावदानकल्पलतायां
कविकुमारावदानं षट्षष्टितमः पल्लवः ॥

ཡལ་འདབ་དྲུག་ཅུ་རྩ་བདུན་པ།

དགེ་འདུན་སྤུངས་ཀྱི་རྟོགས་བརྗོད་ནི།

འཁོར་བ་ཡངས་པའི་ཀྱུ་ངམ་ལམ་ཆེན་རབ་མང་ཉིན་སོངས་དྲག་པོས་གདུང་བྱེད་པ།

ཡོངས་སུ་རྫོགས་པའི་བསོད་ནམས་གཏེར་གྱུར་དམ་ཆོས་རྟོགས་ཤིང་ཡེ་ཤེས་མཆོག་དང་ལྡན།

ཟླ་མས་ཉེར་བསྟན་རབ་ཏུ་ཀྲུས་པའི་མཐུ་ཐོབ་བདག་ཉིད་ཆེན་པོ་གང་དག་གིས།

ཁྲིམས་ཀྱི་ཁྲིམས་སུ་རྩེ་བ་ལྟ་བུས་ཡང་དག་རྒྱལ་བྱེད་དེ་དག་བསྔགས་པར་འོས།། 1

མཉན་ཡོད་དག་ཏུ་སྔོན་བྱུང་བ། ཁྲིམས་ཀྱི་བདག་པོ་སངས་རྒྱས་སྐྱུང་།

གང་གི་ཁྲིམས་ཀྱི་དཔལ་སྟུག་ནི། སློང་བའི་ཚོགས་ཀྱིས་ཉེར་མཁོར་གྱུར།། 2

གང་ཞིག་ཡིད་སྤྱོད་རབ་དང་བ། དགེ་བའི་སྐད་དུ་བསྐྲུབ་པའི་གནས།

རབ་ཏུ་དང་བའི་དགེ་སློང་མ། ཤཱ་རིའི་བུ་ཡིས་དམ་པར་བྱས།། 3

དེ་སྐད་དམ་པའི་ཀུན་སྤྱོད་ཅན། རིག་གནས་ཀུན་ལ་རྣམ་པར་མཁས།

ཡོན་ཏན་མཚན་ཉིད་ཡང་དག་རྫོགས། དགེ་འདུན་སྤུང་ཞེས་བྱ་བར་གྱུར།། 4

ནམ་ཞིག་ཁྱིམ་དུ་ཤཱ་རིའི་བུ། འོངས་ཚེ་ཕ་ཡིས་དེ་ལ་སྨྲས།

བུ་ཁྱོད་མངལ་ན་གནས་པ་ན། འདི་ཡི་ཉེ་གནས་སུ་དམ་བཅས།། 5

सप्तषष्टितमः पल्लवः ।

सङ्घरक्षितावदानम् ।

धन्यास्ते परिपूर्णपुण्यनिधयः सद्धर्मसंवोधिनः
ज्ञानोदग्रगुरूपदेशमहिमप्राप्तप्रभावोदयाः ।
गेहप्राङ्गणलीलया वहुतरक्लेशोग्रसन्तापकृत्
यैः संसारविसारि-मारव-महामार्गः समुल्लंघ्यते ॥ १ ॥

पुराभवद्गृहपतिः श्रावस्त्यां बुद्धरक्षितः ।
अर्थिसार्थोपकरणगुर्व्यो यस्य गृहश्रियः ॥ २ ॥

यः प्रसन्नमनोवृत्तिः कुशलाय प्रसादिना ।
कृतः शिक्षापदोत्सृष्टः शारिपुत्रेण भिक्षुणा ॥ ३ ॥

संघरक्षितनामाभूत् संपूर्णगुणलक्षणः ।
पुत्रस्तस्य सदाचारः सर्व्वविद्याविचक्षणः ॥ ४ ॥

तं कदाचिद्गृहायाते शारिपुत्रे पिताब्रवीत् ।
त्वमुपस्थायकः पुत्रो गर्भस्थोऽस्य प्रतिश्रुतः ॥ ५ ॥

དེ་སྐད་ད་ནི་བདག་གི་ཚིག ། དེ་ནི་བདེན་པར་བྱ་བར་འོས།
པ་ལ་བུ་ལོན་མེད་བྱེད་པའི། བུ་བཟང་བསོད་ནམས་དབང་གིས་འགྱུར།། 6

དེ་སྐད་ཕ་ཡིས་ཡང་དག་བསྟན། དགེ་འདུན་སྲུང་འདི་རབ་དགའ་སྟེ།
ཤཱ་རིའི་བུ་ཡི་རྗེས་འབྲང་ཞིང་། རིམ་གྱིས་ཡོངས་སུ་སྨིན་བར་གྱུར།། 7

དེ་ནས་དེ་ཡིས་རབ་བྱུང་སྟེ། ཀུན་སྤྱོད་དང་ནི་བསླབ་པ་ལ།
ཆོས་ཀྱི་ལུང་ནི་བཞི་པོ་དག ། མ་ལུས་དེ་ཡི་ཁ་འདོན་སྦྱངས།། 8

དེ་ནས་ནམ་ཞིག་ཚོང་པ་ནི། མཚུངས་པར་སྐྱེས་པའི་གྲོགས་པོ་དག །
བརྒྱ་ཕྲག་ལྔ་ཡིས་རྒྱ་གཏེར་ལ། ལྷན་ཅིག་འགྲོ་བར་གསོལ་བཏབ་སྟེ།། 9

དེ་དག་དགེ་བ་སེམས་བྱེད་པས། འཇིགས་པ་དག་ལ་བརྟན་བསྐྱེད་པ།
བླ་མའི་བཀའ་ནི་བཟུང་བྱས་ཏེ། གཟིངས་ལ་རབ་ཏུ་ཞོན་པར་གྱུར།། 10

དེ་ནས་གཟིངས་དེ་རྒྱ་གཏེར་གྱི། དབུས་སུ་ཡང་དག་འགགས་གྱུར་ཅིང་།
ཚོང་པའི་དོན་མཐུན་ཚོ་ང་དག ། སྐྲགས་ཚེ་རྒྱ་ལས་ཚིག་དྲག་པ།། 11

གལ་ཏེ་གཟིངས་འདི་ཁྱེད་ཅག་རྣམས། གྲོལ་བར་འདོད་པ་དེ་ལྟ་ན།
དགེ་འདུན་སྲུང་འདི་རྒྱ་ལ་ནི། སྐུར་པ་ཉིད་དུ་འཕང་བར་མཛོད།། 12

དེ་ཐོས་སྲོག་ལ་ཐེ་ཚོམ་ཚེ། དེ་དག་རྣམས་ལ་བློ་འདི་བྱུང་།
ཤི་བར་གྱུར་པ་མཆོག་ཡིན་གྱི། དམ་པའི་གྲོགས་པོ་གསོད་པ་མིན།། 13

तस्मात्तदधुना सत्यं कर्त्तुमर्हसि मे वचः ।
पुण्यैर्भवन्ति सत्पुत्राः पितुराज्ञाकारिणः ॥ ६ ॥

इति पित्रा समादिष्टः प्रहृष्टः संघरक्षितः ।
अनुगः शारिपुत्रस्य परिचर्य्यापरोऽभवत् ॥ ७ ॥

ततः प्रव्राजितस्तेन समुदाचारशिक्षया ।
अध्यापितः स निखिलं धर्मागमचतुष्टयम् ॥ ८ ॥

ततः कदाचिद्वणिजां मित्राणान्तुल्यजन्मनाम् ।
शतैः पञ्चभिरम्भोधिगमनेन सहार्थितः ॥ ९ ॥

आरुरोह प्रवहणं तेषां कुशलचिन्तकः ।
भयेषु धैर्य्यजननं गृहीत्वा शासनं गुरोः ॥ १० ॥

अथाब्धिमध्ये संरुद्धे तस्मिन् प्रवहणे क्षणम् ।
साक्रन्दे वणिजां सार्थे प्रोच्चचार वचोऽम्भसः ॥ ११ ॥

यदि प्रवहणस्यास्य मुक्तिर्युष्माकमीप्सिता ।
तदेष क्षिप्यतां क्षिप्रं सलिले संघरक्षितः ॥ १२ ॥

श्रुत्वैतत् प्राणसन्देहे तेषामेकाभवन्मतिः ।
वरन्निधनमेवास्तु न तु साधुसुहृद्वधः ॥ १३ ॥

དེ་དག་མི་བཟད་ཐེ་ཚོམ་ལ། བརྩེ་བ་ཡིས་ནི་བསྐྱང་བརྩོན་པས།
རྒྱ་གཏེར་འཁྲུགས་པར་དགེ་འདུན་སྐྱོང་། རང་གི་བདག་ཉིད་རབ་ཏུ་འཕངས།། 14

དེ་ནས་ཀླུ་ཡི་གནས་སུ་ཕྱིན། དེ་ནི་ཀླུ་ཡིས་གསོལ་བཏབ་དེ།
རྫོགས་སངས་རྒྱས་ཀྱི་མཆོད་རྟེན་ལ། མངོན་པར་ཕྱག་འཚལ་མངོན་བསྒྲུབས་ནས།། 15

བསམ་པས་ཕྲ་དེས་མཐོང་དབུགས་དང་། སོ་རིག་དུག་ལྡན་དེ་དག་ལ།
ཞིགས་པའི་སྤྱོད་ཚུལ་མངོན་འདོད་པའི། ཆོས་ནི་རབ་ཏུ་བསྟན་པ་མཛད།། 16

ཆགས་བྲལ་དྲག་པོ་འི་ཡིད་འབྱུང་གིས། རང་ཡུལ་འགྲོ་བར་འདོད་པ་དེ།
ཀླུ་རྣམས་ཀྱིས་ནི་ཚོང་པ་ཡི། གཟིངས་ལ་སྐད་ཅིག་ཉིད་ཀྱིས་བཀོད།། 17

འཛིག་རྟེན་གཞན་ལས་འོངས་པ་བཞིན། དེ་དག་དགའ་བ་ཡང་དག་ཐོབ།
གཟིངས་ནི་ཕྱིར་ལ་ལོག་གྱུར་ནས། རྒྱ་མཚོ་ཆེན་པོ་འི་ངོགས་སུ་ཕྱིན།། 18

རང་གི་འདོད་པས་དེ་དག་རྣམས། ཤིན་ཏུ་རིངས་པར་བགྲོད་པ་ཡིས།
དགེ་འདུན་སྐྱོང་ནི་བྱེ་མ་ཡི། ངོགས་སུ་གཅིག་དུ་སོང་བ་བཏེར།། 19

དེ་ནས་དོན་མཐུན་སོང་ཚེ་སད། ཐུ་དྲི་མི་མེད་ཕྱོགས་རྣམས་སུ།
ལྟ་ཞིང་གྲོགས་དང་བྲལ་བ་ཡིས། ཆགས་བྲལ་བློ་ཅན་དེས་བསམས་པ།། 20

ཀྱེ་མ་མཐོང་དང་ཉམས་པ་ཅན། ཉི་ཟའི་གྲོང་ཁྱེར་ལྟ་བུ་ཡི།
སྙིང་སྡུག་གཉེན་དང་འགྲོགས་པ་དག། བྲལ་ན་རྣམ་པར་རྨོངས་པར་བྱེད།། 21

विषमे संशये तेषां कृपया रक्षणोद्यतः ।
चिक्षेप स्वयमात्मानं क्षुब्धाब्धौ संघरक्षितः ॥ १४ ॥

स नागनिलयं प्राप्तस्तत्र नागैरथान्वितः ।
विधाय पूर्व्वसंबुद्ध-वृद्धचैत्याभिवन्दनम् ॥ १५ ॥

दृष्टिश्वासरदस्पर्शविषाणां चिन्तया कृशः ।
सुचिराभिमतान्तेषां विदधे धर्म्मदेशनाम् ॥ १६ ॥

तीव्रारतिसमुद्विग्नः स्वदेशगमनोत्सुकः ।
स नागैर्वणिजामेव न्यस्तः प्रवहणे क्षणात् ॥ १७ ॥

ते प्रहृष्टाः समासाद्य परलोकादिवागतम् ।
प्रत्यावृत्तप्रवहणास्तीरं प्रापुर्महोदधेः ॥ १८ ॥

स्वगृहोत्कण्ठया तेषां व्रजतामतिसत्वरम् ।
निद्रालुर्वालुकाकूले विस्मृतः संघरक्षितः ॥ १९ ॥

गते सार्थे प्रबुद्धोऽथ प्रभाते विजना दिशः ।
पश्यन् सुहृद्विरहितः प्रदध्यौ स विषण्णधीः ॥ २० ॥

अहो दृष्टाश्च नष्टाश्च गन्धर्वनगरोपमाः ।
विमोहयन्ति विरहे सुहृद्बन्धुसमागमाः ॥ २१ ॥

ས་ཁར་ཉ་གཉེན་འཕར་བ་ལྟ་བུར་རབ་དུ་གཡོ་བའི་མཛེས་སྡུག་གྲོགས།
མི་རྣམས་དག་ལ་བརྫུན་གྱི་ཡིད་བརྟན་བརྟན་པར་གནས་པའི་འཆིང་བ་སྒྲུབ།།
རང་གི་སྐྱེ་བོ་དང་བྲལ་མལ་དུ་ཉལ་ཞིང་དེ་བཞིན་ངེས་པར་མཆིས།
ཀུན་དུ་ཆགས་པ་དགེ་དང་མི་དགེའི་ལས་དང་ལྡན་ཅིག་སྤྲོག་ཆགས་རྒྱུ།། 22

བརྟན་པའི་བློ་ཡིས་འདི་བསམས་ཏེ། ཡུལ་གྱི་ལམ་ནས་འགྲོ་བ་ངེས།
དལ་གྱིས་སྐྱེ་བོ་འི་བསམ་པ་བཞིན། མཐའ་མེད་སླ་ལའི་ནགས་ཚལ་སླེབ།། 23

དེ་ནས་དེར་ནི་ཁང་བཟང་དང་། ཁང་པ་རིན་ཅན་ལས་འཁྲུངས་པ།
གཙུག་ལག་ཁང་ཆེན་མངོན་གྱུར་ཏེ། དགེ་མཚན་གཟུགས་དང་ལྡན་པ་བཞིན།། 24

ཁྲི་དང་མལ་སྟན་ལེགས་བཤམས་པ། དེར་ནི་དགེ་སློང་དགེ་འདུན་ནི།
ཆོས་གོས་མཛེས་པ་ཞི་བ་ཡི། མཆོད་ཉིད་ཉམས་པ་མེད་པ་མཐོང་།། 25

དེ་ནས་དེ་དག་གིས་མགྲོན་བསྒྲུབས། དེར་ནི་དེ་ཡིས་སྟན་དག་བཀྲུན།
ཟས་དང་བཀུར་སྟི་རྙེད་གྱུར་ནས། སྐད་ཅིག་ངལ་བསོས་ཐོབ་པར་གྱུར།། 26

དེ་ནས་དགེ་སློང་རྣམས་དག་གིས། ཟས་ཀྱི་དུས་ལ་བབ་པའི་ཚེ།
མདུན་དུ་ལྷུང་བཟེད་བསྟན་བྱས་པ། ཐོ་བ་ཆེན་པོ་ཉིད་དུ་གྱུར།། 27

གཙུག་ལག་ཁང་དེ་མི་སྣང་བར། དེ་དག་ཐོ་ཆེན་མཆོད་ཆ་ཡིས།
པན་ཚུན་མགོ་བོ་རྣམས་བཅོམ་ནས། ས་གཞི་ཁྲག་གིས་བྲན་པར་བྱས།། 28

तरुणशफरोत्फाललोलाः परप्रियसङ्गमा
विदधति नृणामास्थामिथ्यास्थिरस्थितिबन्धनीम् ।
स्वजनरहितः शेते गर्भे तथैव विपद्यते
विचरति सहासक्तैर्जन्तुः शुभाशुभकर्म्मभिः ॥ २२ ॥

इति ध्यात्वा धिया धीरः स व्रजन् विषमाध्वना ।
जनचिन्तामिवानन्तां प्राप शालाटवीं शनैः ॥ २३ ॥

ततस्तत्र समुद्भूतरत्नप्रासादमन्दिरम् ।
महाविहारमद्राक्षीत् स मूर्त्तमिव कौतुकम् ॥ २४ ॥

स्वास्तीर्णासनपर्य्यङ्के तस्मिन् रुचिरचीवरम् ।
ददर्श संघं भिक्षूणामक्षुण्णशमलक्षणम् ॥ २५ ॥

ततस्तैर्विहितातिथ्यः स तत्रालंकृतासनः ।
लब्धभोजनसत्कारः क्षणं विश्रान्तिमाप्तवान् ॥ २६ ॥

भिक्षूणामथ संप्राप्ते भोजनावसरे पुरः ।
सज्जीकृतानि पात्राणि स्थूलमुद्गरतां ययुः ॥ २७ ॥

विहारेऽन्तर्हिते तस्मिंस्ते महामुद्गरायुधाः ।
मिथः शिरांसि निर्भिद्य चक्रुः क्ष्मां शोणितोक्षिताम् ॥ २८ ॥

ཟས་ཀྱི་དུས་ནི་འདས་པ་ན། གཙུག་ལག་ཁང་ཡང་མངོན་བྱུང་ཞིང་།
དེ་བཞིན་དགེ་སློང་དེ་དག་རྣམས། རབ་ཞི་ལྡན་པར་རྣལ་དུ་གནས།། 29

ངོ་མཚར་དེ་མཐོང་ཨ་མཚན་ཅན། དེ་ཡིས་དེ་དག་རྣམས་ལ་དྲིས།
ཟས་ཀྱི་དུས་སུ་རྩོད་པ་འདི། ཁྱེད་ཅག་རྣམས་ལ་ཅི་སྐད་བྱུང་།། 30

དེ་ལ་དེས་སྨྲས་བདག་ཅག་གིས། སྐྱེ་བ་སྔ་མར་ཟས་དུས་སུ།
གཙུག་ལག་ཁང་དུ་རྩོད་པ་བྱས། ལས་དེའི་འབྲས་བུ་འདི་དག་གོ།། 31

དེ་དག་ཐོས་ནས་དེ་ནས་དེ། སོང་བས་གཞན་དུ་དེ་ལྟ་ཡི།
གཙུག་ལག་ཁང་གཞན་དགའ་བ་ནི། རབ་ཏུ་འཁྲུངས་པར་གྱུར་པ་མཐོང་།། 32

དེ་ནས་དེར་ཡང་ཟས་ཀྱི་ཚེ། དགེ་སློང་རྣམས་ཀྱི་མདུན་དུ་ཟས།
ལྷུགས་ཀྱི་ཁ་བ་ཉིད་གྱུར་པ། མཐོང་ནས་དེ་དག་ལ་དེ་དྲིས།། 33

དེ་ལ་དེས་སྨྲས་སྔོངས་པ་ལས། དགེ་སློང་འོངས་པའི་ཟས་ཀྱི་གེགས།
དགེ་སློང་ངན་པའི་བདག་ཉིད་ཅན། བདག་ཅག་རྣམས་ཀྱིས་སྔོན་ཆེ་བྱས།། 34

དེ་ཐོས་དེ་ནས་སོང་གྱུར་པ། དེ་ཡིས་གཟེར་ཞིང་མཛེས་པའི་གནས།
གཙུག་ལག་ཁང་ནི་གསུམ་པ་དག། དགེ་སློང་གིས་གང་མདུན་དུ་སོང་།། 35

དགེ་སློང་རྣམས་ཀྱི་ཟས་ཀྱི་ཚེ། དེ་ཡང་ཚིག་ཅིང་སྨྲར་ཡང་བྱུང་།
དེ་མཐོང་ཨ་མཚན་གྱུར་པ་ཡིས། འཚིག་པའི་རྒྱུ་ནི་ཚོགས་ལ་དྲིས།། 36

आहारकालेऽतिक्रान्ते विहारेऽभ्युदिते पुनः ।
स्वस्थास्ते भिक्षवस्तस्थुस्तथैव प्रशमान्विताः ॥ २९ ॥

स तदाश्चर्य्यमालोक्य तान् प्रपच्छ सविस्मयः ।
भक्तकाले कलिः कस्माद् युष्माकमयमुन्नतः ॥ ३० ॥

तमवोचत ते ऽस्माभि र्विहारे पूर्व्वजन्मनि ।
भक्तकाले कृतं युद्धं तस्यैतत् कर्म्मणः फलम् ॥ ३१ ॥

ते तान् बभाषिरे मोहादागन्तूनां दुरात्मभिः ।
भक्तविघ्नः कृतोऽस्माभिः भिक्षूणां भिक्षुभिः पुरा ॥ ३२ ॥

एतदाकर्ण्य स ततो यात्वा पश्यन्नवं पुनः ।
तृतीयं रुचिरावासं विहारं भिक्षुभिर्व्वृतम् ॥ ३३ ॥

भिक्षुभक्तक्षणे तच्च निर्द्दग्धं पुनरुत्थितम् ।
दृष्ट्वा तं विस्मितः सङ्घमपृच्छद्दाहकारणम् ॥ ३४ ॥

ते तमूचुः पुरास्माभिः भिक्षुभिर्भिक्षुमत्सरात् ।
आदीपितः क्रौर्य्यरतैः विहारः पूर्व्वजन्मनि ॥ ३५ ॥

श्रुत्वैतत्स ततो गत्वा ददर्शान्यच्च निश्चलान् ।
स्तम्भकुशहस्ताकारान् मार्जनीरज्जुसन्निभान् ॥ ३६ ॥

དེ་ལ་དེས་སླས་དགེ་སློང་ལ། ཕྲག་དོག་ལས་སྨོན་གཙུག་ལག་ཁང་།
སྨོན་གྱི་སྐྱེ་བར་གདུག་པ་ལ། དགའ་བ་བདག་ཅག་རྣམས་ཀྱིས་བསྒྲིགས།། 37

དེ་ཕྱིར་དེ་ནས་སོང་བ་དེས། གཞན་དུ་གཡོ་མེད་ཀ་བ་དང་།
རྩིག་པ་འབྲས་བུའི་རྣམ་པ་ཅན། ཕྱུགས་མ་ཐག་པར་མཚུངས་པ་དང་།། 38

ཁྲི་སོགས་གདན་ནི་དྲག་པ་དང་། རྣལ་མའི་ལྷག་དང་རྣམ་གཉིས་གྱུར།
ཉལ་ཞིང་སེམས་ལྡན་བདེ་མེད་པའི། སེམས་ཅན་སྙིང་སྟོབས་མཆོག་གིས་མཐོང་།། 39

དེ་མཐོང་འགྲོ་བ་དེ་ཉིད་ཀྱིས། དཀའ་ཐུབ་དྲག་ལྡན་ཐུབ་པ་ནི།
བརྒྱ་ཕྲག་ལྔ་ཡིས་བསྟན་པ་ཡིས། བསོད་ནམས་དཀའ་ཐུབ་ནགས་ཚལ་ཐོབ།།40

དེ་དག་གིས་དེ་རིང་པོ་ནས། མཐོང་ནས་ཕན་ཚུན་ངེས་པར་བྱས།
བདག་ཅག་རྣམས་ཀྱི་འདི་ལ་གནས། འདི་ཕྱིན་སྐྱོན་པར་སྨྲ་མི་བྱ།། 41

ཤཱ་ཀྱའི་སློབ་མ་རང་བཞིན་གྱིས། མང་བརྗོད་ཕེབས་པར་སྨྲ་བྱ་མིན།
ཞེས་པའི་གྲོས་ནི་རབ་བསྒྲུབས་ཏེ། ཐུབ་པ་དེ་དག་རབ་ཏུ་གནས།། 42

དེ་དག་གིས་དེར་གནས་མ་བྱིན། དེ་ཡིས་ཉིན་མོ་ཟད་ཚེ་འཁྲུམས།
འདམ་སྐྱེས་མཛོད་ནི་འཛུམས་པ་ཡིས། ཀུང་དྲུག་རེ་བ་ཉམས་པ་བཞིན།། 43

ཐུབ་པ་གཅིག་གིས་དེ་ལ་ནི། མཚན་མོ་ཁྱོད་ནི་མི་སྨྲ་བར།
གནས་པར་བྱ་ཞེས་རབ་བརྗོད་ནས། ཞག་སར་བསྡུ་གནས་སྟོང་པ་བྱིན།། 44

खट्वाद्युलूखलस्थूलांस्तन्तुशेषान् द्विधागतान् ।
सत्त्वान् सत्त्ववतामग्र्यः सुप्तचैतन्यनिःसुखान् ॥ ३७ ॥

स तान् दृष्ट्वा व्रजन्नेव पुण्यं प्राप तपोवनम् ।
सेवितं तीव्रतपसां मुनीनां पञ्चभिः शतैः ॥ ३८ ॥

ते तं दूरात् समालोक्य चक्रिरे निश्चयं मिथः ।
अस्य दातव्यमस्माभिर्न स्थानं न प्रियं वचः ॥ ३९ ॥

शाक्यशिष्यो न संभाष्यो बहुजल्पः स्वभावतः ।
इति संविदमाधाय ते तस्थुर्मौनिनः परम् ॥ ४० ॥

तैरदत्ताश्रयस्तत्र स बभ्राम दिनक्षये ।
बद्धकोशैर्विनष्टाशः पङ्कजैरिव षट्पदः ॥ ४१ ॥

मुनिरेकस्तु वासाय तस्य शून्यां कुटीं ददौ ।
त्वया मौनवता रात्रौ स्थातव्यमिति संविदा ॥ ४२ ॥

तत्र तैरकृतातिथ्यं तं क्षपाक्षयकारिणम् ।
ऊचे शयानमभ्येत्य शनैराश्रमदेवता ॥ ४३ ॥

उत्तिष्ठ साधो सौजन्यात् कुरु मे धर्मदेशनाम् ।
सद्धर्मवादिनां लोके प्रथमोऽसि मे मतः ॥ ४४ ॥

ཞེས་དེས་གསོལ་བཏབ་ཐུབ་པ་དེས། གཙོས་བསྐྱངས་དེ་ལ་རབ་སྨྲས་པ།
མ་མ་ཁྲིད་དང་ཁོ་བོ་ཡིས། ངེས་པར་འབྲིན་པ་ཅི་སླད་སྤྲུལ།། 45

གནས་དེར་བདག་ལ་ཐུབ་པ་ཡིས། མི་སྨྲ་བ་ཡི་དམ་ཚིག་བྱས།
དེ་ལས་འདས་པར་གྱུར་ན་བདག། ངེས་པར་འདི་ཡིས་འབྲིན་པར་འགྱུར།། 46

ཞེས་སྨྲ་དེ་ལ་གུས་པ་ཡིས། དེ་ཡིས་མང་དུ་གསོལ་བཏབ་སྟེ།
བྲམ་ཟེས་རྗེས་སུ་གནང་བ་ཡིས། ཆོས་ནི་སྨྲ་བར་ཡང་དག་བརྩམས།། 47

ཀུན་དུ་ལུས་ནི་གདུང་བར་བྱེད་པ་ངེས་པ་བརྟུལ་ཞུགས་མིན།
སྐྱེ་བོ་མེད་པའི་དཀའ་ཐུབ་ནགས་ཚལ་དག་པར་བྱེད་པ་མིན།
བཟུང་དཀའི་རལ་པ་བཞེས་པ་ཡོངས་འཛིན་སྐྱེས་བུ་རྣམས་དག་གིས།
ཆགས་པས་ཡོངས་འཛིན་སེམས་ནི་ཡོངས་སུ་གདུང་བར་བྱེད་པ་ཡིན།། 48

ནགས་སུ་འབྲས་བུ་ཟ་བའི་སྤྲེའུ་འདི་དག་རྣམས་དང་ནི།
ལྡོན་པ་འདབ་མ་ཤིང་ཤུན་དང་བཅས་རལ་ཚོགས་ལྡན་པ་དང་།
འཇིག་རྟོགས་རྒྱ་ནང་དུ་ཆགས་ཉེ་མེད་རྣམས་ཀྱང་འགྲོ་བ་མིན།
རབ་ཞི་སྤངས་པ་རྣམས་ཀྱིས་དཀའ་ཐུབ་ཡོ་བྱད་བརྟེན་པ་ཉིད།། 49

ཐལ་བས་དཀར་བའི་གླང་པོ་དང་ནི་རླུང་དག་འཐུང་བའི་སྦྲུལ་རྣམས་དང་།
ནགས་ན་ཞེན་པའི་རི་དྭགས་རྣམས་དང་ཐང་ལ་ཉལ་བའི་གཟུངས་མོ་དང་།
འབྲས་བུ་ཟ་བའི་ནེ་ཙོ་དང་ནི་གོས་མེད་རྗེན་པ་རྣམས་ཀྱིས་ཀྱང་།
ཡུལ་ལ་ཆགས་པ་མ་བཏང་རབ་དུ་ཞི་བ་འགའ་ཡང་རྟོགས་མི་འགྱུར།། 50

इत्यर्थितस्तया मौनी स तां प्राह लघुस्वनः ।
मातर्निष्कासनायैव त्वं मे केनापि निर्म्मिता ॥ ४५ ॥

अस्मिन् मे मुनिना मौनसमयः संश्रयः कृतः ।
निष्कासयति मामेष तद्व्यतिक्रमकारिणम् ॥ ४६ ॥

इति ब्रुवाणः प्रणयाद्बहुशः स तयार्थितः ।
ब्राह्मणानुमतं धर्म्मं वक्तुं समुपचक्रमे ॥ ४७ ॥

नैव व्रतानि तनुशोधनसाधनानि
नो पावनानि विजनानि तपोवनानि ।
पुंसां जटाजिनपरिग्रहदुर्ग्रहाणाम्
चेतः स्पृहापरिचितं परिशोधयन्ति ॥ ४८ ॥

एते वने फलभुजः कपयो न मुक्ताः
वृक्षाः सवल्कलपलाशजटासटाश्च ।
अन्तर्जलप्रणयिनस्तिमयश्च तीर्थे
मिथ्यातपःपरिकरः प्रशमोज्झितानाम् ॥ ४९ ॥

न भूतिधवलैरिभैः पवनपायिभिः पन्नगैः
वनव्यसनिभिर्म्मृगैः सल्लकैः स्थलीशायिभिः ।
फलप्रणयिभिः शुकैरपि निरम्बरैर्लुब्धकैः
अमुक्तविषयस्पृहैरधिगता प्रशान्तिः क्वचित् ॥ ५० ॥

ཞེས་པ་དེ་ཡི་ཚིག་གྲོས་ཏེ། ཡ་མཚན་བཅས་པའི་ཐུབ་རྣམས་ཀྱང་།
དེ་ལ་གུས་པ་མངོན་ཕྱོགས་ཏེ། ཀུན་ཀྱིས་ཡོངས་སུ་བསྐོར་ནས་གནས།། 51

དེ་ཡི་བསམ་པ་འཁོར་བར་ནི། ཡོངས་སུ་བསྐོར་བའི་ཆགས་པ་འདི།
ངེས་པར་བརྫུན་གྱི་བརྡུལ་ཞུགས་ཀྱིས། རྒྱུན་དུ་ཉོན་མོངས་གདུང་བ་སྤྱོད། 52

མི་རྣམས་མ་རིག་འདུ་བྱེད་དང་། རྣམ་ཤེས་མིང་དང་གཟུགས་དང་ནི།
སྐྱེ་མཆེད་དྲུག་དང་རེག་པ་དང་། ཚོར་བ་སྲེད་པ་དང་བཅས་དང་།། 53

ལེན་པ་སྲིད་པ་སྐྱེ་བ་དང་། རྒ་ཤི་ཡིས་ནི་ངན་པར་འགྲོ།
སྡུག་བསྔལ་རང་བཞིན་ཕུང་པོ་འདི། ཤིན་ཏུ་ཆེ་བར་ཡོངས་སུ་འཕེལ།། 54

རབ་ཞི་མཁས་པ་རྣམས་ཀྱིས་ནི། མ་རིག་ལ་སོགས་རིམ་པ་ཡིས།
རེ་རེ་འགགས་པར་གྱུར་པ་ན། གཞན་དང་གཞན་ནི་འགག་པར་འགྱུར།། 55

དེ་ལྟར་ཡིད་ཀྱིས་ངེས་བྱ་དེས། དེ་དག་མདུན་དུ་དེ་ལྟ་ཡི།
དམ་པའི་ཆོས་ནི་བསྟན་བྱས་ནས། སླར་ཡང་དེ་དག་ལ་འདི་སྐད།། 56

གང་དག་ཡིད་ནི་བྱམས་པས་གཙང་གྱུར་ཅིང་།
འཚོ་བ་དག་ཀྱང་དམ་པའི་ཆོས་ཀྱིས་དག།
རབ་ཞི་འོས་པས་མཐོ་བ་དེ་དག་གིས།
སྐྱེ་བ་མྱ་ངན་མི་བྱ་དགའ་བར་བྱ།། 57

इति तद्वचनं श्रुत्वा मुनयोऽपि सविस्मयाः ।
तमादरोन्मुखाः सर्व्वे परिवार्य्यावतस्थिरे ॥ ५१ ॥

सोऽचिन्तयदियं पर्षत् संसारपरिवर्त्तिनी ।
मिथ्यैव व्रतसन्तापसन्ततक्लेशमश्नुते ॥ ५२ ॥

नृणामविद्यासंस्कारा विज्ञानं नामरूपता ।
षड़ायतनसंस्पर्शौ वेदना सह तृष्णया ॥ ५३ ॥

उपादानं भवो जातिर्जरामरणदुर्गतिः ।
एष दुःखमयः स्कन्धः सुमहान् परिवर्द्धते ॥ ५४ ॥

अविद्यादिक्रमेणैव प्रशान्तानां मनीषिणाम् ।
एकैकस्य निरोधेन लयं याति परः परः ॥ ५५ ॥

इति निश्चित्य मनसा स तेषां तद्विधां पुरः ।
सद्धर्म्मदेशनां कृत्वा पुनस्तानिदमब्रवीत् ॥ ५६ ॥

तेषामशोच्यं स्पृहणीयमेव
जन्मप्रशमोचितमुन्नतानाम् ।
मैत्रीपविचाणि मनांसि येषाम्
सद्धर्म्मशुद्धानि च जीवितानि ॥ ५७ ॥

ས་གཞི་འདི་དང་ནམ་མཁའ་དང་ནི་གདེངས་ཅན་དག་གི་གནས་ན་ཡང་།
སེམས་ཅན་གང་འཁོད་དེ་ལ་གུས་པའི་ཚིག་གིས་ལེགས་བྱས་བདག་དོན་གཉེར།
སྙིང་ནི་བྱམས་པའི་སྣོད་དུ་མཛོད་ཅིག་བློ་གྲོས་དག་གིས་ཆོས་དག་སྟེན།
ལུས་ཅན་རྣམས་ལ་མི་བཟད་སྨུན་པར་ཆོས་ལས་གཞན་པའི་སྐྱོན་མ་མེད།། 58

ཅེས་བརྗོད་ལྡོན་པའི་འོག་དུ་ནི། དེ་ཡིས་སྐྱིལ་ཀྲུང་བཅིངས་པ་བྱས།
བྲང་པོ་རབ་ཏུ་གསལ་བ་ཡིས། དགྲ་བཅོམ་ཉིད་དེར་མངོན་དུ་བྱས།། 59

དེ་ལ་ངེས་སྐྱེས་བདག་ཅག་རྣམས། ཤཱ་ཀྱ་ཐུབ་པའི་གནས་སུ་ཁྲིད།
ལེགས་གསུངས་ཆོས་ནི་འདུལ་བ་ལས། རབ་བྱུང་བདག་ཅག་དོན་གཉེར་རོ།། 60

དེ་ནས་དེ་ལྟར་དེ་དག་གིས། གསོལ་བཏབ་ཆོས་གོས་སྣ་ལ་འཕྱངས།
དེ་དག་ཁྲིར་ནས་དགེ་འདུན་སྤྲུངས། ཛུ་འཕྲུལ་ཆེ་དེ་མཁའ་ལ་སོང་།། 61

དེ་ཡིས་སྟོན་པའི་གནས་སུ་ཕྱིན། དེ་ཡི་ཞབས་པད་གཉིས་ལ་ནི།
ཀུན་དགའ་ལྡན་པའི་སྤྱི་བོ་ཡིས། མངོན་བདུད་དེ་ལ་ཐམས་ཅད་བ་ཤད།། 62

དེ་ཡི་ཚིག་གིས་ཐུབ་རྣམས་ལ། བཅོམ་ལྡན་བརྩེ་ལྡན་དགྱེས་པ་ཡིས།
ཡིད་ནི་རབ་དང་སྐྱེད་པ་ཡིས། དམ་པའི་ཆོས་ནི་བསྟན་པར་མཛད།། 63

དྲི་མེད་རབ་ཞི་རྒྱས་པ་ནི། དེ་ཡི་དྲིན་ལས་སྐྱེས་དེ་དག།
ཉོན་མོངས་ཐམས་ཅད་གཏོང་ཞེས་པའི། མཆོད་འོས་དགྲ་བཅོམ་ཉིད་དུ་གྱུར།། 64

यावन्तोऽस्यां भुवि नभसि वा भोगिनामालये वा
सत्त्वाः सन्ति प्रणयवचसा तान् सुहृत् प्रार्थयेऽहम्।
मैत्रीपात्रं कुरुत हृदयं धर्म्मबुद्धिं भजध्वम्
धर्म्मादन्यस्तमसि विषमे देहिनां नास्ति दीपः॥५८॥

इत्युक्त्वा पादपतले कृतपर्य्यङ्कबन्धनः।
ऋजुप्रकाशमर्हत्त्वं तत्र साक्षाच्चकार सः॥५९॥

ते तमूचुर्भदन्तास्मान् नय शाक्यमुनेः पदम्।
स्वाख्याते धर्म्मविनये प्रव्रज्यामर्थयामहे॥६०॥

इति तैरर्थितः सोऽथ चीवरप्रान्तलम्बिनः।
तानादाय ययौ व्योम्ना महर्द्धिः सङ्घरक्षितः॥६१॥

स शास्तुः पदमासाद्य तत्पादनलिनद्वयम्।
मूर्द्ध्नाभिवन्द्य सानन्दस्तस्मै सर्व्वं न्यवेदयत्॥६२॥

भगवान् प्रणयिप्रीत्या मुनीनामथ तद्गिरा।
मनःप्रसादजननीं चक्रे सद्धर्म्मदेशनाम्॥६३॥

ते तत्प्रसादसंजातविमलप्रशमोदयाः।
सर्व्वक्लेशप्रहाणार्हं पूज्यमर्हत्त्वमाययुः॥६४॥

དེ་དག་སོང་ཆེ་སྟོན་པ་ལ། དགེ་འདུན་སྤུངས་ཀྱིས་རབ་དྲིས་པ།
བཅོམ་ལྡན་ཀ་བ་རྩིག་སོགས་གཟུགས། མི་རྟོག་འབྲས་བུ་མཚུངས་པ་དང་།། 65

ཐག་མཚུངས་སྐལ་མའི་ལྷག་མ་ཡང་། སེམས་ཅན་བདག་གིས་ལམ་དུ་མཐོང་།
སྨོངས་པས་བཅིངས་པ་དེ་དག་ནི། དེ་དག་ལས་ནི་ཅི་ཡི་འབྲས།། 66

ཞེས་པ་དེ་ཡིས་གུས་པས་དྲིས། དེ་ལ་ཀུན་མཁྱེན་གྱིས་གསུངས་པ།
དེ་དག་སྔོན་ཆེ་སྟོན་པ་ནི། འོད་སྲུང་ཞེས་པའི་ཉན་ཐོས་གྱུར།། 67

དགེ་འདུན་ཁང་པའི་ཀ་བ་དང་། རྩིག་པ་ལ་དེས་དར་སྣབས་འཐངས།
གཞན་གྱིས་དགེ་འདུན་ལྡོན་པ་ལས། མི་རྟོག་དང་ནི་འབྲས་བུ་བླངས།། 68

དགེ་འདུན་ཟས་དང་བཏུང་བ་ལ། གཞན་གྱི་སྐང་བས་གེགས་དག་བྱས།
གཞན་གྱིས་དགེ་འདུན་ཕྱེད་པ་ནི། དགེ་སློང་དག་ལ་ཡོངས་བསྒྱུར་བྱས། 69

དེ་དག་ལས་ཀྱི་རྣམ་སྨིན་དེས། རྣམ་པ་དེ་དེ་ཉིད་དུ་གྱུར།
བཅོམ་ལྡན་གྱིས་བཤད་དེ་ཐོས་ནས། དེ་ནི་ཡ་མཚན་ལྡན་པར་གྱུར།། 70

དགྲ་བཅོམ་གནས་ཐོབ་དགེ་འདུན་སྤུངས། དགེ་སློང་རྣམས་ཀྱིས་མཐོང་ནས་ནི།
ལས་དེ་རྒྱལ་བ་དག་ལ་དྲིས། དྲིས་པ་དེས་ཀྱང་དེ་ལ་གསུངས།། 71

སྟོན་པ་འོད་སྲུངས་ཞེས་པ་ཡི། བསྟན་པ་པ་ནི་རབ་བྱུང་འདི།
དགེ་འདུན་གཙུག་ལག་ཁང་དུ་སྟོན། ཞལ་ཏ་བྱེད་པ་ཉིད་དུ་གྱུར།། 72

तेषु यातेषु शास्तारमपृच्छत्सङ्घरक्षितः ।
भगवंस्तम्भकुड्यादिरूपाः पुष्पफलोपमाः ॥ ६५ ॥

रज्ज्वाभास्तन्तुशेषाश्च दृष्टाः सत्त्वा मया पथि ।
तत्तेषां कर्म्मणः कस्य फलं मोहानुवर्त्तिनाम् ॥ ६६ ॥

इति तेनादरात् पृष्टः सर्व्वज्ञस्तमभाषत ।
बभूवुः काश्यपाख्यस्य ते शास्तुः श्रावकाः पुरा ॥ ६७ ॥

स्तम्भकुड्येषु तैः श्लेष्म प्रक्षिप्तं सङ्घमन्दिरे ।
भुक्तानि सङ्घवृक्षेभ्यः फलपुष्पाणि चापरैः ॥ ६८ ॥

भिक्षुभोजनपानेषु द्वेषाद्विघ्नः कृतोऽपरैः ।
सङ्घलाभपरावृत्तिर्भिक्षूणामपरैः कृता ॥ ६९ ॥

ते तत्कर्म्मविपाकेन तत्तदाकारतां गताः ।
इत्याख्यातं भगवता श्रुत्वा सोऽभूत् सविस्मयः ॥ ७० ॥

प्राप्तमर्हत्पदं दृष्ट्वा भिक्षवः सङ्घरक्षितम् ।
जिनं तत्कर्म्म पप्रच्छुः पृष्टः स च जगाद तान् ॥ ७१ ॥

एष प्रव्रजितः शास्तुः काश्यपाख्यस्य शासने ।
पुरा विहारे सङ्घस्य वैयापृत्यकरोऽभवत् ॥ ७२ ॥

གཙུག་ལག་ཁང་ན་གནས་པ་ནི། ལྷ་བརྒྱ་དེ་ཡིས་གྲོགས་པོར་གྱུར།
ལུས་ཀྱི་མཛུག་དུ་སྨོན་ལམ་ནི། དགེ་བའི་སླད་དུ་དེ་ཡིས་བྱས།། 73

སྐྱེ་བ་འདི་ལ་དགེ་འདུན་སྲུངས། དེ་ཡིས་དགྲ་བཅོམ་ཉིད་ཐོབ་ཅིང་།
དེ་དག་ཐུབ་པ་ལྷ་བརྒྱ་པོ། འདི་དག་དེ་དང་ཡང་དག་འགྲོགས།། 74

ལུས་ཅན་རྣམས་ནི་དམར་དང་དཀར་དང་གནག་དང་ཐྲ་བའི་ལས་སླད་ཀྱི།
རྣམ་པར་བཀྲ་བ་སྐྱེ་བའི་སོས་ཀྱིས་ལན་མང་དག་དུ་གཡོགས་པར་གྱུར།
ལག་འགྲོ་ཆེན་པོ་ཀློགས་དམན་འདོར་བའི་རིགས་པ་དག་གིས་དེ་བཏང་ནས།
གྲངས་མེད་ཚ་བ་མེད་པའི་འབབ་ཞིག་གང་དེར་དགེ་བ་ལྡན་པ་འཛུག།། 75

ཅེས་བ་དེ་བཞིན་གཤེགས་པ་དེས་གསུངས་པ།
ཐོས་ནས་དགེ་སློང་དེ་དག་གུས་བཅས་པས།
དམ་པའི་སེམས་ལྡན་དེ་ཡིས་སྤྱོད་པ་དག།
ཡིད་ནི་གཞན་དང་བྲལ་བས་རབ་དུ་བསྡུགས།། 76

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དགེ་འདུན་སྲུངས་ཀྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་རྩ་བདུན་པའོ།

पञ्च चास्य शतान्यासन् सङ्गतानि विहारिणाम् ।
प्रणिधानं शरीरान्ते कुशलाय चकार सः ॥ ७३ ॥

तेनास्मिन् जन्मनि प्रापदर्हत्त्वं सङ्घरक्षितः ।
तदेतत् सङ्गतञ्चास्य मुनीनां शतपञ्चकम् ॥ ७४ ॥

रक्तैः शुक्लैरसितशबलैर्देहिनां कर्म्मसूत्रैः
चित्राकारं भवति बहुशः प्रावृतं जन्मवस्त्रम् ।
त्यक्ते तस्मिन् जरठभुजगम्लाननिर्म्मोकयुक्त्या
तत् कैवल्यं विशति कुशली यन्न शीतं न चोष्णम् ॥ ७५ ॥

इति तस्य निशम्य सादराः
कथितं तेन तथागतेन ते ।
प्रशशंसुरनन्यमानसाः
चरितं सच्चरितस्य भिक्षवः ॥ ७६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
सङ्घरक्षितावदानं सप्तषष्टितमः पल्लवः ।

ཡལ་འདབ་དྲུ་བཅུ་རྩ་བརྒྱད་པ།

པདྨ་ལྡན་གྱི་རྟོགས་པ་བརྗོད་པ་ནི།།

ཕན་དང་མི་ཕན་ལས་རྣམས་དག་ནི་སྔོན་དུ་བསྒྲུབས་གྱུར་པ།
ལོངས་སྤྱོད་དུས་ཀྱིས་ཞིན་དུ་འདས་ཞིང་ཉམས་པར་གྱུར་པ་དག།
རབ་རྒྱས་མེ་ཏོག་མཚུངས་པས་དཔལ་རྣམས་དག་ལ་བསྐོ་བ་བཞིན།
སྲོག་ཆགས་རྣམས་ལ་རང་གི་བག་ཆགས་བཞག་ནས་འགྲོ་བར་འགྱུར།། 1

རྡོ་རྗེའི་གདན་ལ་སངས་རྒྱས་བདུད་རྩིའི་ཟེར།
རྡོ་རྗེ་དིང་འཛིན་བཅིངས་ལས་བཞེངས་པའི་ཚེ།
རབ་འབར་ཡེ་ཤེས་རྒྱས་པ་ལོ་དྲུག་གིས།
ཐོབ་པ་དེ་ལ་རིག་སློང་ཚོགས་ཀྱིས་ཞུས།། 2

ཁྱོད་ཐལ་མེ་ཡིས་གདུངས་གྱུར་པ། གྲགས་འཛིན་མ་ཡི་དཀུ་ནང་དུ།
མངལ་ནི་ཆགས་པར་གྱུར་བ་དག། བཅོམ་ལྡན་ལོ་དྲུག་དག་ནས་བཙས།། 3

ཁྱོད་མཚུངས་ཁྲིམས་པ་སྒྲ་གཅན་འཛིན། ཞེས་པ་དེ་ནི་སྐྱེས་པ་ན།
རྒྱལ་པོ་ཟས་གཙང་ཁྲིམས་པ་ཡིས། འདི་ནི་ག་ལས་སྐྱེས་ཞེས་སྨྲས།། 4

ས་བདག་བཀའ་ཡིས་དེ་ཉིད་ནི། གསོད་པའི་སར་ནི་ཁྲིད་གྱུར་པ།
སྐྱིང་ཡིག་གིས་བཞིན་ཁྱོད་ཀྱི་མཐུས། དགག་པ་དེ་ནི་རབ་ཏུ་བསྲུངས།། 5

अथ अष्टषष्टितमपल्लवः ।

पद्मावत्यवदानम् ।

कर्म्माणि पूर्व्वविहितानि हिताहितानि
श्लिष्टानि भोगसमयैरतिवाहितानि ।
गच्छन्ति जन्तुषु खसत्कुसुमोपमानि
लीनन्तिलेष्विव निधाय निजाधिवासम् ॥ १ ॥

वज्रासने वज्रसमाधिबन्धा-
दथोत्थिते बुद्धसुधामयूखे ।
संवत्सरैः षड्भिरवाप्तदीप्त-
ज्ञानोदये भिक्षुगणस्तमूचे ॥ २ ॥

त्वद्वियोगाग्निसन्तप्ता भगवन् कुक्षिकोटरे ।
निलीनं सुषुवे गर्भं षड्भिर्वर्षैर्यशोधरा ॥ ३ ॥

तस्मिन् राहुलकाभिख्ये जाते त्वत्सदृशे शिशौ ।
जातः कुतोऽयमित्याह राजा शुद्धोदनः क्रुधा ॥ ४ ॥

सा बध्यवसुधां नीता शासनेन महीपतेः ।
सती तवैव लेखेन प्रभावेणैव रक्षिता ॥ ५ ॥

དེ་ནས་ཁྲོད་གྲོན་རྗེ་ནང་དུ། དེ་ཡིས་ཁྲིམས་པ་ངེས་པར་བཀོད།
དེ་ཡིས་བདེན་པ་བརྗོད་པ་ཡིས། རྗེ་བ་དེ་ནི་ཆུ་ལ་ལྡིངས།། 6

མི་གཡེམ་དགེ་པའི་བརྟུལ་ཞུགས་ཅན། དེ་ལ་གྲོས་པོ་ཁྲི་བ་སྐྱེས།
སྡུག་བསྔལ་སྐྱེད་ཅིང་གདུང་བ་དེ། ལས་ནི་ཅི་ཡི་རྣམ་སྨིན་ལགས།། 7

ཞེས་པ་དགེ་སློང་ཚིག་ཐོས་ནས། བཅོམ་ལྡན་འདས་ཀྱི་ལན་གསུངས་པ།
ལས་ནི་གང་གིས་གྲགས་འཛིན་མ། སྡུག་བསྔལ་ཐོབ་པ་རབ་ཏུ་ཉེན།། 8

གྲོང་ཁྱེར་ཀམ་པི་ལ་དག་ཏུ། ས་ཡི་བརྒྱ་བྱིན་དཔལ་དང་ལྡན།
འདོད་ལྡན་མ་ཡི་མི་དོག་མཆོན། རྒྱལ་པོ་ཚངས་བྱིན་སྨོན་བྱུང་གྱུར།། 9

གཡུལ་དུ་རལ་གྲིའི་རྒྱན་འཛིན་པའི། དཔུང་པ་ཡིས་ནི་རབ་བསྐྱེས་པས།
གང་གི་གཟི་བྱིན་མི་དགག་ནི། དགྲ་ལ་སྨུན་པ་རབ་སྤྱེར་འབར།། 10

ནམ་ཞིག་ནགས་སུ་གཞུ་འཛིན་དེས། སྨོན་གྱི་རྩེ་དགའི་དགེ་མཚན་ལ།
ཤིན་ཏུ་མགྲོགས་འགྲོ་རྟ་ཡིས་ནི། གཅིག་བུར་བྲས་དེ་རིང་དུ་ཞུགས། 11

དེ་ཡི་འགྲམ་པར་རྟུལ་གྱི་ཐིགས། ཉི་མའི་ཟེར་གྱིས་རབ་བསྐྱེད་པས།
ན་རྒྱན་སྨུ་ཏིག་རྣམས་ཀྱིས་ནི། གཟུགས་བརྙན་དག་དང་མཚུངས་པར་གྱུར།། 12

ལམ་ནས་འོང་བའི་རི་དྭགས་སྡུག་གུ་དགེ་མཚན་གཡོ་མེད་ཀྱིས།
ཡང་དང་ཡང་དུ་དེ་ལ་དགའ་བར་ཀུན་དུ་ལྟ་བྱེད་ཅིང་།

त्वद्यायामश्मिलोत्सङ्गे निक्षिप्तेऽथ तया शिशौ ।
तत्सत्ययाचनेनासौ सलिले पुप्लुवे शिला ॥ ६ ॥

साध्वीव्रतपवित्रायास्तस्याः श्वशुरकोपजः ।
दुःखावमानसन्तापः स पाकात् कस्य कर्म्मणः ॥ ७ ॥

इति भिक्षुवचः श्रुत्वा भगवान् प्रत्यभाषत ।
श्रूयतां कर्म्मणा येन दुःखं लेभे यशोधरा ॥ ८ ॥

काम्पिल्ये नगरे राजा ब्रह्मदत्तः पुराभवत् ।
भूतलाखण्डलः श्रीमान् कामिनीकुसुमायुधः ॥ ९ ॥

खड्गधाराधरेणाजौ भुजेन जनितः परः ।
प्रजज्वाल प्रतापाग्नि र्यस्यारातितमःप्रदः ॥ १० ॥

स कदाचिद्वनं धन्वी मृगयाकेलिकौतुकी ।
विवेश दूरमेकाकी हृतोऽश्वेनातिरंहसा ॥ ११ ॥

तस्यार्ककिरणोद्भिन्नाः कपोले स्वेदविन्दवः ।
चक्रुः कुण्डलमुक्तानां प्रतिविम्बविडम्बनम् ॥ १२ ॥

मार्गागतेन स मुहुर्मृगशावकेन
रम्यावलोकनकुतूहलनिश्चलेन ।

ཧོ་ཤེལ་རྩེ་ཡི་རིན་ཅེན་དུམ་བུར་གཟུག་བརྙན་སྣང་བྱེད་པས།
སྐད་ཅིག་བདུད་རྩིའི་ཟེར་གྱི་གཟུགས་ཀྱི་གནས་དང་མཚུངས་པར་གྱུར།། 13

རྗེས་སུ་ཆགས་ལྡན་རི་དྭགས་མོ་དང་གླང་མོ་ལ་ཆགས་པའི།
མིག་ཟུམ་རི་དྭགས་གཉིས་འཕྲུང་རྣམས་ཀྱིས་རབ་དུ་བསྟན་བྱ་བ།
རི་ཁྲོད་མ་ཡི་སྨྲ་ཚོགས་མི་རྟོག་ལ་རེག་དྲི་བཟང་ཅན།
སྐྱེས་པའི་ནགས་མཐའི་རླུང་གིས་དེ་ཡི་ངལ་བའི་ཀྲུ་དག་སྒྲོགས།། 14

སྐབས་དེར་ཐུབ་པ་ཆེན་པོ་ནི། ཤཀྲ་ཀེ་ལུ་ཡི་གཞོན་ནུ་མ།
གཅི་བ་འཕྲུངས་པས་མངལ་གྱི་སྒོ། ཐོབ་པ་རི་དྭགས་བུ་མོ་ནི། 15

མཛེས་སྡུག་བདུད་རྩིའི་རྒྱན་ཞིང་། ཀུ་ཤི་ཡིན་དུ་འོང་པ་དག།
མིག་རབ་གཡོ་ལྡན་བསྒྱི་གནས་ཀྱི། རྒྱ་གླང་ངོགས་སུ་དེ་ཡིས་མཐོང་།། 16

དཔལ་མོ་པདྨའི་དགའ་ཚལ་ལ། དགའ་བས་བཞིན་དུ་པདྨོའི་ཚལ།
ཀུང་བཀོད་ལས་སྐྱེས་པདྨོ་ཡི། དཀྱིལ་འཁོར་དག་གིས་སྒྲོ་བྱེད་ཅིང་།། 17

སྨོན་མེད་དགེ་མཚན་ལྡན་པ་དེ། མཐོང་ནས་མི་ཡི་དབང་པོ་ནི།
སྐད་ཅིག་མིག་ནི་འཛུམ་བྲལ་པས། ལྷ་ཉིད་ཐོབ་པ་བཞིན་དུ་གྱུར།། 18

དེས་བསམས་ཀྱི་མ་མཛེས་མ་འདི། ཐུབ་པའི་བུ་སྲུ་ཞིག་ཡིན།
རི་དྭགས་མོ་བཞིན་རབ་མཛེས་ཤིང་། ཡིད་འོང་ལྷ་བས་ཡིད་འཕྲོག་བྱེད།། 19

हाराग्ररत्नशकलप्रतिविम्बितेन
प्राप क्षणं सदृशरूपपदं सुधांशोः ॥ १३ ॥

तस्यानुरक्तहरिणी-करिणी-प्रसक्त-
व्यामीलितेक्षणमृगद्विपसेव्यमानाः ।
जह्रुः श्रमाम्बु शवरीकवरीकलाप-
पुष्पस्पृशः सुरभिमत्तवनान्तवाताः ॥ १४ ॥

अस्मिन्नवसरे कन्यां शाण्डिल्यस्य महामुनेः ।
प्रस्नावपानसंप्राप्तगर्भ-मुग्धमृगीसुताम् ॥ १५ ॥

सलिलाहरणायातां लावण्यामृतवाहिनीम् ।
स ददर्शाश्रमसरित्तीरे तरललोचनाम् ॥ १६ ॥

कमलां कमलावासप्रीत्येव कमलाकरम् ।
सृजन्ती चरणन्यासजातैः कमलमण्डलैः ॥ १७ ॥

अपूर्व्वंकौतुकवतीं तां दृष्ट्वा मनुजेश्वरः ।
अमरत्वमिव प्राप निर्निमेषेक्षणः क्षणम् ॥ १८ ॥

सोऽचिन्तयदहो कापि कान्तेयं मुनिकन्यका ।
हरिणीव हरत्येव स्निग्धमुग्धैर्विलोकितैः ॥ १९ ॥

པད་མ་ཅན་ནི་ཀང་པ་ཉིད་པའི་གཡོག་གི་མཚམས་ལ་ངེས་པར་བསྐོས་གྱུར་ཅིང་།
ཀླུ་བ་ཉ་བ་བཞིན་གྱི་མཚན་མ་བྲིས་པའི་འཕབ་ཉིད་རབ་ཏུ་ཐོབ་པར་བྱས།།
སྨིན་ལེགས་སྨིན་མའི་རྣམ་འཕྲུལ་རང་ཉིད་ཀུན་ལས་རྒྱལ་བར་རབ་ཏུ་རྟོམ་པ་ན།
ངེས་པར་འདོད་པའི་གཞུ་ཡི་འཕྲི་ཤིང་དྲི་མེད་ཡོན་དྲན་མེད་པ་ཉིད་ལ་བརྟེན།། 20

འདི་ཡི་བཞིན་གྱི་དཀྱིལ་འཁོར་ཡིད་འོང་བསིལ་ཟེར་ཅན་དག་གིས།
བཀོད་པའི་རི་མོ་འི་རིམ་པས་དབའ་བའི་བདུད་རྩི་རྒྱས་བར་བྱེད།།
མིག་དག་རྣ་བའི་རྩ་བར་ཤིན་དུ་བྱམས་པར་གྱུར་པ་འདི།
ཨུད་པལ་གསར་པ་རོལ་པའི་རྒྱན་གྱིས་མཛེས་པ་རབ་ཏུ་འཛིན།། 21

ཞེས་བསམས་དེ་ཡིས་དལ་གྱིས་ནི། རྟ་ལས་ཡང་དག་བབས་བྱས་དེ།
དགེ་མཚན་བལྟ་ལ་མངོན་ཕྱོགས་མ། དེ་ལ་བདུད་དེ་རབ་སྨྲས་པ།། 22

ལེགས་བྱས་རྒྱ་ཆེ་མི་དམན་པའི། ལྷ་ཡི་མགྲིན་པར་གཟུང་འོས་མ།
རྣམ་རྒྱལ་ནོར་བུའི་འཕྲེང་བ་བཞིན། ཨུད་པལ་མིག་ཅན་ཁྱོད་ནི་སུ།། 23

ཁྱོད་ཀྱི་མཛེས་སྡུག་དགའ་བ་ཡི། ཚོགས་ནི་རྒྱས་པར་བྱེད་པ་འདིས།
སུ་ཡི་ཡིད་ནི་དགེ་མཚན་ལ། འགུགས་པ་ཉིད་དུ་བྱེད་མ་ཡིན།། 24

སུ་ཡི་རིགས་བརྒྱུད་སྤུ་ཏིག་གི། འཕྲི་ཤིང་རབ་ཏུ་འཐོབ་པ་དག།
སྟོན་ཟླ་ལྟར་དཀར་ཁྱོད་འཁྲུངས་པས། རྣམ་པར་བརྒྱན་པ་རབ་ཏུ་སྨྲོས།། 25

ཞེས་པ་དེ་ཡིས་གུས་པས་དྲིས། དེ་ནི་ཐུབ་པའི་བུར་ཤེས་ནས།
འདོད་པའི་སྤྱོད་ཚུལ་མི་ཤེས་ཀྱང་། མངོན་པར་འདོད་ལྡན་དེ་ཡིས་སྨྲས།། 26

सेवासीम्नि निवेशिता कमलिनी संवाहने पादयोः
पूर्णेन्दुर्व्वदनस्य लक्ष्मलिखितं दासत्वमापादितः ।
प्रारब्धे स्वयमेव विश्वविजये भ्रूविभ्रमैः सुभ्रुवः
कामं निर्ममकामकार्म्मुकलता नैर्गुण्यमालम्बते ॥ २० ॥

किरति वदनबिम्बं हर्षपीयूषमस्या
ललितसितमयूखोल्लेखलेखाक्रमेण ।
इयमतिशयमैत्री नेत्रयोः श्रोत्रमूले
नवकुवलयलीलोत्तुङ्गकान्तिं तनोति ॥ २१ ॥

इति संचिन्त्य स शनैरवरुह्य तुरङ्गमात् ।
तामुवाच समभ्येत्य कौतुकालोकनोन्मुखीम् ॥ २२ ॥

अम्लानसुकृतोदारसुरकण्ठग्रहोचिता ।
विजने मणिमालेव का त्वं कुवलयेक्षणे ॥ २३ ॥

इयमानन्दसन्दोहस्यन्दिनी ललिता तव ।
न कस्य कुरुते कान्तिः कौतुकाकुञ्चितं मनः ॥ २४ ॥

ब्रूहि कस्य त्वया प्रांशुः शरच्चन्द्रावदातया ।
काममुक्तालते वंशः सम्भवेन विभूषितः ॥ २५ ॥

इति तेनादरात् पृष्टा ज्ञात्वा तं मुनिपुत्रकं ।
अज्ञातकामवृत्तापि साभिलाषा जगाद सा ॥ २६ ॥

ཀྲུང་པས་པད་འཕྲེང་རབ་བསྐྲེད་པས། བདག་ནི་པདྨ་ཅན་ཞེས་བྱ།
རི་དྭགས་མངལ་སྐྱེས་ཐུབ་པ་ནི། ཤཱཾ་ཏི་ལཱུ་ཡི་བུ་མོ་ཡིན།། 27

ཐུབ་པའི་སྲས་ཁྱོད་ལེགས་པར་འོངས། བདག་ནི་ཁྱོད་མཐོང་རབ་ཏུ་དགའ།
ཤིན་ཏུ་ཡིད་འཕྲོག་བཀྲ་བ་ཡི། ཤིང་ཤུན་བརྟུལ་ཞུགས་འདི་ནི་ཅི།། 28

རྨ་བྱའི་གཙུག་ཕུད་ལྟ་དག་གིས། བརྒྱན་པ་བཞིན་དུ་ཁྱོད་ཀྱི་ནི།
རལ་ཚོགས་འདི་དག་ལྷ་ལས་ཀྱང་། མེ་ཏོག་དག་གིས་རྒྱས་པར་མཛེས།། 29

སྐྱུ་རུ་ར་ནི་རགས་པ་ཡི། འབྲས་བུ་ཁ་བ་རབ་འབར་འདྲ།
བསྒྲང་འཕྲེང་འཕྲེང་བ་རིང་པོ་ཡིས། ཁྱོད་ཀྱི་མགྲིན་ལ་ཡོན་ཏན་མང་།། 30

འོད་མའི་དབྱུག་པ་འཁྱོག་པོ་འདིར། ཡལ་འདབ་གསར་པའི་འཕྲེང་བ་ལ།
ཁྱོད་ཀྱི་ལག་པ་ཀུ་ཤ་ཡིས། དག་བྱེད་བཀྲ་བས་ཀུན་ཏུ་སྣང་།། 31

ལེགས་པ་བདག་ཡིད་རི་དྭགས་ནི། གང་དུ་ངལ་ནི་བསོས་གྱུར་པ།
དགའ་བར་རྨ་བྱའི་བརྟུལ་ཞུགས་ཅན། ཁྱོད་གནས་གང་ན་ཡོད་པ་སྨྲོས།། 32

ཞེས་པ་བཞིན་བཟང་མ་ཡི་ཚིག། སྙན་ཞིང་བདུད་རྩིས་བརླན་པ་དག།
ས་བདག་གིས་ཀྱང་ལམ་བརྒྱགས་ཀྱི། ལ་དུ་བྱིན་ནས་དེ་ལ་སྨྲས།། 33

སྨིན་ལེགས་ཁྱོད་ལུས་ཤིན་ཏུ་གཞོན། ཤིང་དང་རྩ་ནི་བསྐམས་གྱུར་ཅིང་།
ཀུ་ཤའི་ཁབ་ཀྱི་ཚོགས་གདམས་པའི། ནགས་ཚལ་འདིར་ནི་འོངས་པ་མིན།། 34

अहं पद्मावती नाम पादोद्यत्पद्ममालिका ।
मृगीगर्भसमुद्भूता शाण्डिल्यस्य सुता मुनेः ॥ २७ ॥

स्वागतन्ते मुनिसुत प्रियं मे तव दर्शनम् ।
मनोहरतरं चित्रं वल्कलं किमिदं व्रतम् ॥ २८ ॥

विभूषितोऽयं मायूरैः शिखण्डैरिव पञ्चभिः ।
सुरार्चाकीर्णकुसुमः शोभते ते जटाभरः ॥ २९ ॥

अयमामलकस्थूल-प्रालेयफलकोज्ज्वलः ।
दीर्घाक्षसूत्रमालाभिः कण्ठे बहुगुणस्तव ॥ ३० ॥

आसूत्रयति ते पाणिश्चित्रैः कुशपवित्रकैः ।
कुटिले वेणुदण्डेऽस्मिन् बालपल्लवमालिकाम् ॥ ३१ ॥

रमणीयव्रतवतः कथ्यतां क्व तवाश्रमः ।
मनो मृगाजिनं श्रान्तं तत्र विश्रान्तिमेति मे ॥ ३२ ॥

इति मुग्धावचः स्वादु सुधार्द्रं वसुधाधिपः ।
आस्वाद्य दत्त्वा पाथेयमोदकं तामभाषत ॥ ३३ ॥

नैवास्मिन्नुचितं सुभ्रु दर्भसूचीचयाचिते ।
सुकुमारन्तव वपुः शुष्यत्तरुतृणे वने ॥ ३४ ॥

འདི་ནས་ཏ་ཅང་མི་རིང་ན། བདག་གནས་ལོངས་སྤྱོད་འདོས་པའི་དཔལ།
གང་ན་རྣམ་པ་འདི་ལྟ་ཡིས། འབྲས་བུ་བརྒྱད་པ་རྒྱས་པ་ཡོད།། 35

དེར་ནི་རྣམ་པར་གནས་པར་མཛོད། ཡིད་སྤྲུབས་དག་གི་དགའ་ཐུབ་མཛོད།
སྐྱེ་བོ་མཆོག་ནི་ལོངས་སྤྱོད་ཀྱིས། རིམ་གྲོ་དག་ལ་རྣམ་པར་སྤྱོད།། 36

མིག་གསུམ་རབ་དུ་ཁྲོས་ཚེ་མེ་ཡི་ལམ་དུ་ཕྱེ་མ་ལབ་ཉིད་གྱུར་ལྡན་པ།
སྲོག་ནི་རབ་དུ་ཛོགས་པ་བྱེད་པོས་གསར་དུ་སྤྲུལ་པ་འདི་ཉིད་ཡིན་བསམས་སྟེ།
ཁྱོད་ཀྱི་ལུས་མཛེས་ནོར་འཛིན་བདུད་རྩིའི་ཟེར་གྱི་ཆ་ཡི་མཛོད་ཀྱི་རྗེས་མཐུན་པ།
ཡིད་ལས་སྐྱེས་པའི་མཛེས་སྡུག་མཚུངས་མེད་དང་པོ་དེ་ནི་འདི་ཉིད་གཞན་མ་
ཡིན།། 37

ཞེས་པ་སྲ་བདག་མཛངས་པའི་ཚིག། བཞིན་བཟང་མ་ཡིས་ཐོས་ནས་ནི།
ལ་དུ་ཟླ་བ་ལྟར་དཀར་བ། ཀུངས་ནས་དེ་ལ་རབ་སྨྲས་པ།། 38

ཁྱོད་ཀྱི་བརྟུལ་ཞུགས་རྗེས་སྤྱོད་པ། ཁྱོད་ཀྱི་གནས་སུ་བདག་གནས་བགྱི།
རྗེ་སྲིད་སོང་ནས་ཟླ་མའི་བཀའ། དོན་དུ་གཅེར་ལ་སྐད་ཅིག་སྡོད།། 39

ཅེས་པའི་གྲོས་ནི་བསྒྲུབས་ནས་དེ། རང་གི་བསྟི་གནས་དག་ཏུ་སོང་།
མངོན་འདོད་གསར་པས་དབང་བྲལ་བས། ཤུགས་ནི་འཁྲིན་ཅིང་ཐུབ་ལ་སྨྲས།། 40

ཡབ་ལགས་བདག་གིས་ཐུབ་པ་ཡི། གཞོན་ནུ་སུ་ཞིག་ནགས་སུ་མཐོང་།
ཤིང་ཤུན་མཐའ་ནི་བཀྲ་བ་དག། རབ་དུ་དང་བའི་རྒྱ་ལྟར་མཛེས།། 41

इतः संभोगयोग्यश्चोन्नातिदूरे ममाश्रमः ।
एवंविधा विशीर्यन्ते यस्मिन् फलपरम्पराः ॥ ३५ ॥

निवासः क्रियतां तत्र चर्यतां मान्मथं तपः ।
संभोगपरिचर्यासु जनोऽयं विनियुज्यताम् ॥ ३६ ॥

अग्न्युत्सङ्गपतङ्गतां गतवतस्त्र्यक्षप्रकोपक्षणे
जीवोत्पादनमेतदेव विधिना मन्ये नवं निर्म्मितम् ।
कान्तं ते वसुधासुधाकरकलाकोशानुकारं वपुः
लावण्यावनिपुण्यपण्यमसमं नान्यन्मनोजन्मनः ॥ ३७ ॥

इति श्रुत्वा विदग्धस्य मुग्धा भूमिपतेर्वचः ।
चन्द्रावदातमास्वाद्य मोदकं तमभाषत ॥ ३८ ॥

त्वद्व्रतानुव्रतैवाहं निवसामि तवाश्रमे ।
प्रतीक्षस्व क्षणं यावद्गत्वाज्ञामर्थये गुरोः ॥ ३९ ॥

इति संविदमाधाय सा गत्वा निजमाश्रमम् ।
नवाभिलाषविवशा श्वसन्ती मुनिमभ्यधात् ॥ ४० ॥

दृष्टस्तात वने कोऽपि मया मुनिकुमारकः ।
प्रसन्नसलिलच्छायचित्रपर्य्यन्तवल्कलः ॥ ४१ ॥

གང་གི་འབྲས་བུ་གཞན་གྱི་ཚོགས། །བསྒོམ་པར་ཡོངས་སུ་རྫོགས་བྱེད་པ།
དེ་ཡི་གནས་སུ་རབ་འཁྲུངས་པའི། །འབྲས་བུ་མཆོག་ནི་བདག་གིས་སྤྱོད།། 42

དེ་ཡི་དགའ་ཐུབ་ནགས་ཚལ་དུ། །ཁྲིད་ཀྱི་རྗེས་གནང་བདག་མཆིའོ།
དེ་ཡི་གཞུང་བཟང་ལ་ཆགས་པའི། །བདག་བློ་གཞན་ན་དགའ་བ་མེད།། 43

ཅེས་པ་དེ་ཚིག་འདོད་པ་ནི། །གསལ་བྱེད་ཐོས་ནས་ཡ་མཚན་ཞིང་།
ལང་ཚོ་སྨིན་པར་རྟོགས་པ་ཡི། །ཐུབ་པས་མཛེས་མ་དེ་ལ་སྨྲས།། 44

ཁྱོད་ཀྱིས་མཐོང་དེ་ལག་འགྲོ་ནི། །རིན་ཅན་གྱིས་བརྒྱན་ཡིན་ནམ་སྐམ།
བུ་མོ་ཐུབ་པ་རྣམ་དག་ནི། །ལོངས་སྤྱོད་ཅན་མིན་ལྟེ་གཉིས་མིན།། 45

ཡུལ་བཞིན་ཡོངས་སུ་གྱུར་ཚེ་སྡུག་བསྔལ་རབ་སྟེར་སྐུམ་བཅས་ལྷི་བའི་ལ་དུ་ནི།
ཞེན་དུ་དངར་བ་དག་གིས་འོངས་པ་ལ་ནི་དོན་མེད་དགའ་བར་ཡོངས་མ་བྱེད།།
མཛེས་མ་འདོད་པའི་འབྲས་བུར་རོ་ལྡན་ཉོན་མོངས་དག་གིས་བྲན་པ་གང་དེ་རྣམས།
ཞེན་དུ་ངེས་པར་དུག་དང་མཚུངས་པའི་ཉམས་སུ་སྤྱོང་བ་བསྐྱེད་པས་རྒྱལ་བར་བྱེད།། 46

ཚུར་ཤོག་རེ་ཞིག་ཐུབ་པའི་སྨྲས། །དེ་སུ་རིང་ནས་བདག་ལ་སྟོན།
ཅེས་བརྗོད་སྐུང་གི་ངོགས་སུ་ནི། །དེ་དང་ལྷན་ཅིག་ཐུབ་པ་སོང་།། 47

དེ་ཡི་ཆུ་སྐུང་ངོགས་སུ་ནི། །ས་ཡི་བདག་པོ་ཚངས་བྱིན་མཐོང་།
ཡོན་ཏན་ཚོགས་ནི་རྒྱ་ཆེ་སྟེ། །མག་པ་དག་ཏུ་འོས་པར་བསམས།། 48

दिव्यं तदाश्रमोद्भूतं फलमास्वादितं मया ।
येनान्यफलसम्भारे नियमः परिकल्पितः ॥ ४२ ॥

गच्छामि त्वदनुज्ञाता कान्तं तस्य तपोवनम् ।
तत्सौजन्यप्रसक्ता मे नान्यत्र रमते मतिः ॥ ४३ ॥

इति तद्वचनं श्रुत्वा विस्मितः स्मरसूचकम् ।
तामुवाच मुनिर्मुग्धां यौवनोन्मादशङ्कितः ॥ ४४ ॥

दृष्टस्त्वया भुजङ्गोऽसौ मन्ये रत्नविभूषितः ।
भवन्ति मुनयः पुत्रि न द्विजिह्वा न भोगिनः ॥ ४५ ॥

सस्नेहैर्गुरुभिः परं परिणतौ दुःखप्रदैर्मोदकै
रापाते विषयै रिवातिमधुरैः प्रीतिं वृथा माकृथाः ।
मुग्धे कामकलानिभानि सरसान्यायाससिक्तान्यलं
येषामेव विषोपमेन जनता स्वादेन संमूर्च्छति ॥ ४६ ॥

एहि दर्शय मे दूरात् कस्तावत्स मुनेः सुतः ।
इत्युक्त्वा तटिनीतीरं तया सह ययौ मुनिः ॥ ४७ ॥

स विलोक्य सरित्तीरे ब्रह्मदत्तं महीपतिम् ।
योग्यं गुणगणोदारं जामातरममन्यत ॥ ४८ ॥

མི་བདག་གྱིས་ཀྱང་ཐུབ་པ་ནི། མཐོང་ནས་སྐྱེངས་པས་བཞིན་དུད་ཅིང་།
གཉིས་འགྱུར་རབ་ཏུ་བདུད་པ་ཡིས། ངེས་པར་རབ་ཏུ་དང་བ་ཐོབ།། 49

ཐུབ་པས་རང་ལ་འདོས་པ་ཡི། ཚིག་ཡིས་ནི་རབ་ཏུ་བྱིན།
དེ་ནས་རབ་དགའ་བདུད་རྩི་ཡི། ཀླབས་དེ་མི་ཡི་བདག་པོས་ཀླུངས།། 50

ནམ་ཡང་ཁྱོད་ཀྱི་ཚིག་གཞན་གྱིས། འདི་ལ་ཁྲོ་བར་མི་བྱ་ཞིང་།
མཛེས་མ་འདི་ནི་བསྐྱང་བྱ་ཞེས། བརྗོད་ནས་ཐུབ་པ་རང་གནས་སོང་།། 51

དེ་ནས་དགའ་བཞིན་རྟ་ལ་ཞོན། ཆུང་མ་དང་འགྲོགས་སྐད་ཅིག་གིས།
རྒྱལ་སར་ཡང་དག་ཕྱིན་ནས་ནི། རྒྱལ་པོས་དགའ་སྟོན་ཆེན་པོ་བྱས།། 52

ཕོ་བྲང་འཁོར་གྱི་སྐྱེ་ཀུན་གྱི། གཙུག་ཏུ་ས་བདག་གིས་བཀོད་དེ།
སྒྱུ་རྩལ་མཁས་པའི་རྩེད་འཛོ་ལ། བདག་པོ་འི་སློབ་མ་ཉིད་དུ་གྱུར།། 53

དེ་ཡི་ཁང་པ་བཀོད་པས་ས་གཞི་པདྨས་བརྒྱན་པ་མཐོང་གྱུར་ནས།
དེར་ནི་རྒྱལ་པོ་འི་འཁོར་གྱི་ལྷ་མོ་འི་སྨྲ་དག་ཇི་བཞིན་དོན་ཅན་བཟུང་།
བསོད་ནམས་ལྡན་པའི་མཆོག་ཏུ་ཁྱད་འཕགས་ལེགས་བྱས་གྲོགས་ནི་རྟོགས་
གྱུར་པ།
ངོ་མཚར་རྒྱས་པ་སྤྲུལ་བྱུང་རང་བཞིན་མཚན་ཉིད་རྣམས་ཀྱིས་གསལ་བར་བྱེད།། 54

ཕོ་བྲང་འཁོར་གྱི་བུད་མེད་ལས། ཕྱི་རོལ་ཕྱོགས་པའི་ས་བདག་དང་།
རྩེ་ཞིང་ནུ་རྒྱས་ལྡན་པ་དེས། སྐལ་པ་བཟང་ཞིང་མཛེས་པ་ཐོབ།། 55

नृपोऽपि मुनिमालोक्य वैलक्ष्यविनताननः ।
द्विगुणेन प्रणामेन निनायैव प्रसन्नताम् ॥ ४९ ॥

निजोचितेन विधिना मुनिना प्रतिपादिताम् ।
ततस्तां हर्षपीयूषलहरीमग्रहीन्नृपः ॥ ५० ॥

नास्याः कदाचित्कर्त्तव्यो मन्युः परगिरा त्वया ।
मुग्धा पाल्येयमित्युक्त्वा मुनिः प्रायात् स्वमाश्रमम् ॥ ५१ ॥

अथ हर्षमिवारुह्य हयं जायासखः क्षणात् ।
राजधानीं समासाद्य नृपश्चक्रे महोत्सवम् ॥ ५२ ॥

सर्व्वान्तःपुरवर्गस्य मूर्द्ध्नि न्यस्ता महीभुजा ।
सा ययौ शिष्यतां पत्युः कलाकौशलकेलिषु ॥ ५३ ॥

पादन्यासैः कमलकलिकां भूमिमालोक्य तस्या
देवीशब्दं नृपपरिजन स्तत्र मेने यथार्हम् ।
दिव्योत्कर्षः सुकृतसचिवः सूच्यते केतुभूतः
स्फीताश्चर्य्यै रतिशयमयैर्लक्षणैः पुण्यभाजाम् ॥ ५४ ॥

अन्तःपुरपुरन्ध्रीषु विमुखेन महीभुजा ।
लेभे सौभाग्यशोभां सा रममाणा घनस्तनी ॥ ५५ ॥

དེ་ནས་དུས་ཀྱི་ནོར་འཛིན་གྱི། །བདག་ལས་དེ་ཡིས་མངལ་བཟུང་ཞིང་། །
ཕོ་བྲང་བཙུན་མོ་འི་སྐྱེ་བོ་ཡིས། །བསམ་པས་ཆགས་པའི་ལྷག་ཏུ་ཡང་། ། 56

དེ་ནས་ཁྲིམ་དུ་མཛེས་མ་ནི། །བཙར་ཉེ་དེ་ལ་མངོན་ཕྱོགས་ཏེ། །
ཀྱཱ་ཀྱུ་གདུག་པའི་ཕྲག་དོག་ལས། །རྒྱལ་པོ་འི་བཙུན་མ་རྣམས་ཀྱིས་སྨྲས། ། 57

མི་བདག་ལ་འོས་བཙའ་བ་ཡིས། །ཆོ་ག་སྨོངས་མ་ཁྱོད་མི་ཤེས། །
མ་ཨི་མིག་ནི་གོས་དག་གིས། །བསྒྲིབས་ལ་བུ་ནི་བཙའ་བར་བྱ། ། 58

ཞེས་པ་བཙུན་མོ་གཞན་གྱིས་སྨྲས། །མངལ་རྒྱས་ཁར་གྱིས་གཟིར་བ་དེས། །
ཁྱོད་ཀྱིས་བདག་ལ་འོས་པ་ནི། །མཛོད་ཅེས་དེ་དག་རྣམས་ལ་སྨྲས། ། 59

དེ་ནས་དེ་དག་རྣམས་ཀྱིས་མིག །རས་ཀྱི་དམ་དུ་བཅིངས་པས་བཀག །
བཙོ་མ་གསེར་གྱི་འོད་ལྡན་པའི། །ཁྲིས་པ་ཟུང་ནི་དེ་ལ་བཙས། 60

གཞོན་ནུ་དེ་དག་སྒྲོམ་བུར་བཅུག །གོས་ཀྱིས་དཀྲིས་ཤིང་རྒྱ་བདབ་ནས། །
བུད་མེད་སྙིང་རྗེ་མེད་རྣམས་ཀྱིས། །གང་གཱའི་ཆུ་ལ་གསང་སྟེ་འཕངས། ། 61

པདྨ་ཅན་གདོང་ཁྲག་གིས་ནི། །བསྒོས་ཏེ་དེ་དག་གིས་སྨྲས་པ། །
ཁྱོད་ལ་དམ་བུ་གཡོ་མེད་གཉིས། །བཙས་པ་དག་ནི་ཆུ་ལ་འཕངས། ། 62

དགའ་སྟོན་རྒྱ་ཆེ་ཚས་བཅུག་ཅིང་། །བུ་ནི་བལྟ་བར་འདོད་པ་ཡིས། །
ས་ཡི་བདག་པོས་ཅི་སྐྱེས་ཞེས། །ཕོ་བྲང་འཁོར་པ་རྣམས་ལ་དྲིས། ། 63

अथ कालेन सा गर्भमाधत्त वसुधापतेः ।
चिन्ताशल्यञ्च संसक्तमन्तःपुरवधूजनः ॥ ५६ ॥

आसन्नप्रसवां मुग्धां ततस्तामेत्य मन्दिरे ।
कौटिल्यक्रूरमात्सर्य्यादूचे राजाङ्गनाजनः ॥ ५७ ॥

प्रसवस्य विधिं मुग्धे न जानीषे नृपोचितम् ।
जननी हि सुतं सूते पट्टेन पिहितेक्षणा ॥ ५८ ॥

इत्युक्ता सा सपत्नीभिः प्रौढ़गर्भभरार्दिता ।
उचितं भवतीभिर्मे क्रियतामित्युवाच ताः ॥ ५९ ॥

ततस्ताभिर्निरुद्धाक्षी दृढ़बन्धेन वाससा ।
सासूत बालयुगलं प्रतप्तकनकप्रभम् ॥ ६० ॥

धृत्वा तौ वस्त्रपिहिते मञ्जूषे गूढ़मुद्रिते ।
गङ्गाजले निष्करुणाः कुमारौ चिक्षिपुः स्त्रियः ॥ ६१ ॥

कृत्वा रक्ताक्तवदनामूचुः पद्मावतीञ्च ताः ।
शकलद्वयमस्पन्दं जातन्ते क्षिप्तमम्भसि ॥ ६२ ॥

विपुलोत्सवसन्नद्धः किं जातमिति भूपतिः ।
अपृच्छदान्तःपुरिकान् पुत्रसन्दर्शनोत्सुकः ॥ ६३ ॥

དེ་ལ་དེ་དག་གིས་སྨྲས་ལྷ། སྲས་ནི་ཁྱོད་དང་མཚུངས་པ་གཉིས།
ཡང་དག་འཁྲུངས་པ་ལྷ་མོས་ཟློས། ཤ་ཟ་མོ་ཉིད་ཅི་ཞིག་བརྗོད།། 64

འདི་གྲོས་མི་བདག་སྨག་པ་ཡིས། ཕོ་བྲང་འཁོར་གྱི་ཁང་པར་སོང་།
ལྷ་མོ་བཞིན་རས་ཁྲག་གིས་ནི། སྤགས་པ་མཐོང་ནས་བདེན་པར་བསམས།། 65

ས་བདག་རབ་ཏུ་ཁྲོས་པ་ཡིས། དེ་ནི་གསད་སླད་ཕྱི་རོལ་བཏང་།
ཆུན་མའི་སྐྱོན་དུ་དོགས་པ་ཡིས། བློན་པོ་མཆོག་གིས་སྲས་དེ་བཟུང་།། 66

དེ་ནས་མཁའ་ལ་ཤཱན་ཏ་ལུའི། བསྟི་གནས་ལྷ་མོ་མངོན་ཕྱོགས་དེ།
མི་སྣང་བར་ནི་སྐྱེ་བོ་ཡི། མདུན་དུ་འགྲོ་བའི་བདག་ལ་སྨྲས།། 67

ཁྱོད་དབང་བྲུད་མེད་སྐྱོན་མེད་ནི། གསད་སླད་གཏོང་བ་ཁྱོད་ཉིད་ཀྱིས།
རྣམ་པར་མ་དཔྱད་བག་མེད་ཀྱིས། གྲགས་པ་རྩད་ནས་བྱུང་ངམ་སྐམ།། 68

ནགས་ཀྱི་རི་དྭགས་བུ་མོ་སྨོངས། པདྨ་ཅན་ནི་ཆུན་མ་ཡིས།
རང་ཉིད་བདེ་སླད་བསླུས་པ་འདི། ས་བདག་ཁྱོད་ཀྱིས་ཡོངས་མ་ཤེས།། 69

འཁོར་བའི་ཤ་ཟ་དྲག་པོ་ཡིས། རྟག་ཏུ་བྱིན་བརླབས་སེམས་ལྡན་ལ།
ཕལ་ཆེར་རྣམ་པ་འདི་ལྟ་ཡི། བློ་གྲོས་སྐྱོན་པ་འབྱུང་བར་འགྱུར།། 70

ཛཱ་བོ་ལོངས་སྤྱོད་ཀྱིས་ལོང་རང་བཞིན་གྱིས་སྐྱོད་དཔལ་གྱི་རྣམ་འཕྲུལ་ལྡན་ཞིང་འཕྱུར།

ན་ཆུང་བདེན་པ་ཉམས་པའི་ས་གཞི་བསོད་ནམས་མངོན་པར་འཛོམས་པའི་བྱ་བ་ཅན།

ते तं बभाषिरे देव सदृशन्ते सुतद्वयम् ।
सञ्जातं भक्षितं देव्या पिशाच्येव किमुच्यते ॥ ६४ ॥

त्रस्तः श्रुत्वेति नृपतिर्गत्वान्तःपुरमन्दिरम् ।
रक्ताक्तवदनां देवीं दृष्ट्वा सत्यममन्यत ॥ ६५ ॥

बधाय वह्निरुत्सृष्टा सा क्रुद्धेन महीभुजा ।
गुप्तं धृता मन्त्रिवरैः सपत्नीदोषशङ्किभिः ॥ ६६ ॥

अथ व्योम्ना समभ्येत्य शाण्डिल्याश्रमदेवता ।
अन्तर्हिता जनस्याग्रे जगाद जगतीपतिम् ॥ ६७ ॥

निर्दोषां दुर्दशां यातां बधायोत्सृजतस्तव ।
निर्विचारप्रवादेन मन्ये निर्मूलितं यशः ॥ ६८ ॥

पद्मावती सपत्नीभिर्मुग्धा वनमृगीसुता ।
वञ्चिता स्वसुखायेति न जानीषे विशांपते ॥ ६९ ॥

विभवोग्रपिशाचेन नित्याधिष्ठितचेतसाम् ।
एवंविधैव प्रायेण भवत्युन्मादिनी मतिः ॥ ७० ॥

भोगान्धाः प्रभवः स्वभावचपलाः श्रीविभ्रमोच्छृङ्खलाः
सत्यव्यत्ययभूमयो युवतयः पुण्याभिचारक्रियाः ।

ཕྲ་མ་ལྡན་པ་རང་འདུན་མེད་བྱུང་སྐྱ་བྲེད་མཁའ་ལ་རི་མའི་ལས་སྦྱོར་རྣམས།
གང་དུ་ངེས་པར་རྣམ་པར་གནས་པ་དེར་ནི་དམ་པ་དྲང་པོ་ཛི་ལྷར་འཚོ།། 71

ལྷ་མོ་ལུས་ནི་མི་སྣང་བའི། ཚིག་དེ་ཐོས་ནས་ས་བདག་ནི།
ཁྲིས་པས་དེ་ཡི་བྱུང་ཚུལ་དག། བཙུན་མོ་འི་ཚོགས་ལ་རབ་ཏུ་དྲིས།། 72

ཁྲོ་བས་ནོན་པ་མི་བདག་གི། བཀའ་ནི་དྲག་པོས་དོགས་གྱུར་པ།
དེ་དག་གིས་ནི་བྱུང་ཚུལ་བཞིན། པ་ཤད་ནས་འཇིགས་པས་འཁྲུགས་པར་གྱུར།། 73

ཚུན་མས་བསྐུས་པའི་བཙུན་མོ་ནི། གསོད་སར་རབ་ཏུ་བཏང་བ་དག།
སྙིང་མེད་ཤེས་ནས་མི་ཡི་བདག། འཁྲིད་པས་གཟིར་བས་སྐྱ་ངན་བྱས།། 74

མཚུངས་པར་སྤྱོབས་བྲུས་ཆགས་དང་ཁྲོ། བརྩེ་བས་ངོ་ཚ་སྐྱ་ངན་དང་།
སྨོངས་པའི་གྲོགས་ཀྱིས་ཡང་ཡང་དུ། དེ་ནི་བསྐལ་པར་བྱས་བཞིན་གྱུར།། 75

ཀྱི་ཧུད་དགའ་མ་ཁྱོད་དང་ནི། ཕྱི་ནས་བསོད་ནམས་དམན་པ་དག།
གང་དུ་འགྲོགས་པ་ཞེས་བརྗོད་ནས། མི་བདག་ས་ལ་འགྱེལ་བར་གྱུར།། 76

དེ་ནས་གང་གའི་རྒྱུན་ཐོབ་པ། སྒྲོམ་བུ་རྒྱལ་པོ་འི་རྟགས་མཚན་ཅན།
ཉ་བ་བརྒྱ་ཡིས་འཚོ་རྣམས་ཀྱིས། བཟུང་ནས་མདུན་སར་ཡང་དག་འོངས།། 77

དེ་དག་གིས་དེ་མདུན་བཀོད་ཅིང་། འཕྲལ་ལ་མི་བདག་གིས་སྤྱི་ཚོ།
པདྨ་གསར་པའི་འོད་ལྡན་པའི། ཁྲིས་པ་རྡུང་ཞིག་མཐོང་བར་གྱུར།། 78

स्वच्छन्दाद्भुतवादिनश्च पिशुनाः खे चित्रकर्म्मोद्यता
यत्रैकत्र वसन्ति तत्र सरलः साधुः कथं जीवति ॥ ७१ ॥

अन्तर्हिततनोर्देव्याः श्रुत्वेति वचनं नृपः ।
कुपितस्तत्र वृत्तान्तं पप्रच्छान्तःपुरांगनाः ॥ ७२ ॥

क्रोधाक्रान्तस्य नृपतेस्तीव्रशासनशङ्किताः ।
ता निवेद्य यथावृत्तं बभूवुर्भयविह्वलाः ॥ ७३ ॥

निर्दोषां दयितां ज्ञात्वा सपत्नीवञ्चितां नृपः ।
बध्यभूमिसमुत्सृष्टां शुशोचानुशयाकुलः ॥ ७४ ॥

राग-क्रोध-कृपा-लज्जा-शोकैस्तुल्यबलोदयैः ।
मुमोह मोहसचिवैर्भागीकृत इवाभवत् ॥ ७५ ॥

हा प्रिये हीनपुण्यस्य क्व पुनः सङ्गमस्त्वया ।
ममेत्युक्त्वा नरपति र्निपपात महीतले ॥ ७६ ॥

अथ गङ्गाप्रवाहात्तं मञ्जूषं जालजीविनः ।
आदाय राजमुद्राङ्क माययुर्धीवराः सभां ॥ ७७ ॥

तैर्न्यस्ते पुरतस्तस्मिन् सहसोद्घाटिते नृपः ।
ददर्श बालयुगलं प्रत्यग्रकनकोज्ज्वलम् ॥ ७८ ॥

འོད་སྟོང་པ་ཡི་ཐ་སྐར་བཞིན། གཞོན་ནུ་འདི་དག་མི་བདག་གི།
གཟུགས་མཚུངས་མཚན་ཉིད་རྒྱ་ཆེ་བར། སྐྱེས་ཞེས་སྐྱེ་བོས་རབ་ཏུ་བསྒྲགས།། 79

དེ་ནས་ས་བདག་མཆི་མ་དང་། བཅས་པས་སྲས་དག་པང་དུ་བླངས།
དགའ་མ་དང་བྲལ་མྱ་ངན་གྱིས། གཟིར་བའི་བདུང་པ་ལྷག་པར་གྱུར།། 80

དེ་ནས་བློ་གྲོས་རིང་ཞེས་པའི། བློན་པོ་ཆེན་པོས་དེ་ལ་སྨྲས།
ལྷ་གཅིག་ཁྱོད་ཀྱི་བཙུན་མོ་ནི། ཆུན་མའི་ཚོགས་ཀྱིས་བསྐྱུས་པའི་འཚོ།། 81

དེ་ཐོས་འཕྲལ་ལ་རྒྱལ་པོ་ནི། འཚོ་བ་ཐོབ་པ་བཞིན་དུ་ལངས།
དགའ་བས་སྟོན་ཞེས་བརྗོད་ནས་ནི། བློན་པོ་འི་ཁང་པར་རབ་ཏུ་སོང་།། 82

དེར་ནི་སྡུག་བསྔལ་ལྡན་པ་དེ། ཁྲོ་བས་གུས་པ་བརྗོད་གྱུར་ཅིང་།
སྨད་པས་ཀུན་དུ་ཡིད་བྱུང་མ། མཐོང་ནས་འགྲོ་བའི་བདག་གིས་སྨྲས།། 83

གང་གི་མི་བཟད་ལྷག་མ་ནི། དགའ་མ་ཁྱོད་ལ་རྣམ་སྨྱུལ་བ།
ཚུར་ཤོག་ད་ནི་དེ་དག་རྣམས། གསོད་པའི་སྡུག་བསྔལ་དགའ་ལ་ལྟོས།། 84

གདུང་བ་ཐོང་ལ་དང་བར་མཛོད། མི་སྐྱ་མདོན་དུ་ཕྱོགས་མ་བྱེད།
ཅེས་བརྗོད་དེ་ཡི་ཁང་པ་ལ། ས་ཡི་བདག་པོ་རྣམ་པར་འཁྱིལ།། 85

ནུ་མ་རྒྱས་པ་མཆི་མ་ཡི། རྒྱུན་གྱི་བྲན་བྱེད་དེས་སྨྲས་པ།
སྐྱེ་བོ་མི་བཟད་གནོད་བྱེད་ལ། མི་དབང་ཁྲོ་བ་ཡོངས་མ་མཛད།། 86

तुल्यरूपौ नृपस्येमौ सहस्रांशोरिवाश्विनौ ।
कुमारौ लक्षणोदारौ जाताविति जनस्वनः ॥ ७९ ॥

ततः सवाष्पस्तनयौ गृहीत्वाङ्के महीपतिः ।
प्रियाविरहशोकार्त्तः सन्तापमधिकं ययौ ॥ ८० ॥

अथ दीर्घमति र्नाम महामात्यस्तमब्रवीत् ।
देव जीवति ते पत्नी सपत्नीजनवञ्चिता ॥ ८१ ॥

श्रुत्वैतत्सहसा राजा लब्धजीव इवोत्थितः ।
हृष्टः सन्दर्शयेत्युक्त्वा प्रययौ मन्त्रिमन्दिरम् ॥ ८२ ॥

तत्र तां दुःस्थितां दृष्ट्वा मन्युविस्मृतसम्भ्रमाम् ।
अवमानसमुद्विग्नां जगाद जगतीपतिः ॥ ८३ ॥

यैरेष विषमः क्लेशः प्रिये तव विनिर्म्मितः ।
एहि पश्याधुना तेषां विचित्रवधवैशसम् ॥ ८४ ॥

प्रसीद त्यज सन्तापं मा मौनाभिमुखीभव ।
इत्युक्त्वा निपपातास्याः पादयोः पृथिवीपतिः ॥ ८५ ॥

सावदद्वाष्पधाराभिः सिच्यमानोन्नतस्तनी ।
नरेन्द्र माकृथाः कोपं जने तीव्रापकारिणि ॥ ८६ ॥

མི་གདག་བདེན་པར་དགའ་དང་བྲལ་བར་བྱེད་པ་རྣམས་ལ་བདག་ནི་ཁྲོ་ཡོད་མིན།
ངེས་པར་བཟོད་པས་དགྲ་ནི་ཉེ་བར་ཞི་འགྱུར་ཁོན་གྱི་དེ་ཉིད་འཕེལ་བར་འགྱུར།
གནོད་པ་བསྐྱབ་ལ་དགྲ་ནི་ཁྱབ་བདག་མ་ཡིན་ངེས་པར་གྲོགས་ནི་ཕན་ལ་མིན།
ལུས་ཅན་རྣམས་ཀྱི་བདེ་དང་སྡུག་བསྔལ་འདི་དག་ཐམས་ཅད་སྔོན་གྱི་ལས་ཀྱིས་སྐྱེལ།། ༨༧

གཞན་པ་བྱེད་པ་ལ་ཡང་གནོད་པའི་སྦྱོར་བ་དག།
མ་དཔྱད་པར་ནི་བློ་གྲོས་ལྡན་པས་མི་བྱ་སྟེ།
ཁྲོ་བས་མཆོག་ཏུ་ཁྲོ་བའི་དུག་ནི་འཕེལ་བར་འགྱུར།
མེ་ཉིད་མནན་པས་མེ་ནི་ཞི་བར་མི་འགྱུར་རོ།། ༨༨

རེ་ཞིག་སྡུག་བསྔལ་གྱིས་གདུངས་བདག། ཡབ་ཀྱི་དཀའ་ཐུབ་ཚལ་ཉིད་དུ།
འགྲོ་དེ་དེ་ཚོག་འདོད་ལྡན་མ། བདག་གི་སྔོན་ཆེ་ཡོངས་མ་བྱས།། ༨༩

བདག་ནི་འདོད་འབྲས་ལ་ཆགས་པ། དེ་ཡིས་རབ་ཏུ་ཟློག་གྱུར་ཀྱང་།
ཡང་ཆོས་སྲེས་པའི་སྐྱེན་གྱིས་ནི། ཟློག་པར་མ་གྱུར་ཅི་ཞིག་བྱ།། ༩༠

ཞེས་བརྗོད་དེ་ནི་ཤུགས་འབྱིན་ཅིང་། ཀང་པ་ཡིས་ནི་ས་ལ་འབྲི།
སྐད་ཅིག་བཞིན་དང་དུད་པ་ཡིས། མི་སྣླ་བ་ལ་བརྟེན་པར་གྱུར།། ༩༡

མི་བདག་གིས་ནི་ཕྱུག་གྲུས་ཀྱང་། དེ་ནི་རབ་དང་ཉིད་མ་གྱུར།
རྟེན་གྱི་སྐྱོན་ནི་ཡོངས་བཟུང་བ། མཛད་པའི་ཟུག་ཏུ་མཚུངས་བར་འཛིན།། ༩༢

सत्यं विप्रियकारिणीषु नृपते मन्युर्न मे विद्यते
वैरं हि क्षमयैव यात्युपशमं वैरेण तद्वर्द्धते ।
शत्रुर्नैव विभुः पराभवविधौ नैवोपकारे सुहृत्
सर्वं प्राक्तनकर्म्मनिर्म्मितमिदं दुःखादिकं देहिनाम् ॥ ८७ ॥

कृतापकारेऽपि पराभवोद्यमं
न नाम कुर्य्यादविचार्य्य बुद्धिमान् ।
क्रुधा परक्रोधविषं विवर्द्धते
न शान्तिमेति ज्वलितोऽग्निरग्निना ॥ ८८ ॥

दुःखसन्तापिता तावत्तातस्यैव तपोवनम् ।
गच्छामि तद्वचः पूर्व्वं कामिन्या न कृतं मया ॥ ८९ ॥

वारितापि परन्तेन मम कामफलस्पृहा ।
यौवनोन्माददोषेण न निर्वृत्ता करोमि किम् ॥ ९० ॥

इत्युक्ता निःश्वसन्ती सा विलिखन्ती पदा भुवम् ।
बभूवानम्रवदना क्षणं मौनावलम्बिनी ॥ ९१ ॥

प्रणामेनापि नृपतेर्न सा प्राप प्रसन्नताम् ।
प्रेम्णि शल्यतुलां धत्ते मिथ्यादोषपरिग्रहः ॥ ९२ ॥

དེ་ནི་དམར་བའི་བཞིན་བཟུང་ནས། ཡབ་ཀྱི་བསྟི་གནས་དག་དུ་སོང་།
ཁེངས་ལྡན་རྣམས་ཀྱི་ཁྲོ་བ་ནི། ལག་འགྲོ་གྱ་གྱུ་དེ་བཟོད་དཀའ།། 93

བྱུང་བའི་སྒྲ་ཡིས་དགེ་ལེགས་བརྗོད་པ་ཡི།
ཤིང་གྲོགས་མོ་རྣམས་ཀྱིས་འཁྲུད་པ་བཞིན།།
རི་དྭགས་རྣམས་ཀྱི་མཛའ་བས་ཡོངས་བསྐོར་
ཞིང་པ་ཡི་དཀའ་ཐུབ་ནགས་སུ་དེ་ཕྱིན་གྱུར།། 94

དཀའ་ཐུབ་ཁྲུད་པར་གྲིས་བསྒྲུབས་འཇིག་རྟེན་ནི།
དང་པར་ཐུབ་པ་བསོད་ནམས་གཏེར་སོང་ཚེ།
བསྟི་གནས་སྤྱོད་མཐོང་འཚོ་བ་མི་བརྟན་པའི།
པདྨ་ལྡན་ནི་སྨྱོངས་པས་བཅོམ་པར་གྱུར།། 95

རང་བཞིན་རྣལ་གནས་པ་ཡི་མཆེས་གཞོན་དང་།
སྐྱེ་བའི་པར་ནི་ནང་གཙུགས་པ་དྲན།
འཇིག་རྟེན་གསུམ་བཞིན་སྤྱོངས་པར་སེམས་ཤིང་དེ།
དུག་གིས་གཟིར་བཞིན་སྦྲུལ་གྱིས་བཅོམ་བཞིན་གྱུར།། 96

ཐུབ་པས་དམན་པས་ནགས་ཚལ་དེ་ཉིད་ནི།
དེ་ལ་དགའ་བ་དགའ་མིན་ཉིད་དུ་གྱུར།

सा धातुरक्तवसना जगाम पितुराश्रमम् ।
भुजङ्गकुटिलो मन्युर्मानिनीनां हि दुःसहः ॥ ९३ ॥

आलिङ्ग्यमानेव लतासखीभि-
र्भृङ्गस्वनैः स्वागतवादिनीभिः ।
प्रेम्णा मृगीभिः परिवार्य्यमाणा
तपोवनं सा पितुराससाद ॥ ९४ ॥

याते मुनौ पुण्यनिधौ प्रसन्नं
तपोविशेषार्जितमेव लोकम् ।
दृष्ट्वाश्रमं शून्यमधीरवृत्तिः
पद्मावती मोहहता बभूव ॥ ९५ ॥

वात्सल्यमाजन्मनिलीनमन्तः
स्वच्छप्रभावस्य पितुः स्मरन्ती ।
शून्यां त्रिलोकीमिव मन्यमाना
विषादिनेवाहिहतेव साभूत् ॥ ९६ ॥

तदेव तस्या मुनिना विहीनम्
वनं जगाम प्रियमप्रियत्वम् ।

དུས་ཀྱི་སྙིང་པོ་མ་ལུས་འཐུངས་གྱུར་པའི།
དངོས་པོ་རྣམས་ནི་འབྲལ་བའི་རང་བཞིན་ཡིན།། 97

ཡིད་འཕྲོག་ཡུལ་ནི་དེ་དག་ཁོ་ན་དང་།
མི་རྟོག་འབྱུང་གནས་ཉིན་པར་དེ་དག་ཉིད།
སྐུ་ཞིག་གཅིག་དང་བྲལ་བའི་སྐྱོ་བོ་ལ།
ཐམས་ཅད་ཆགས་བྲལ་གནས་ཉིད་དག་ཏུ་འགྱུར།། 98

དེ་ནས་ས་གཞི་དག་གི་ལྷ་རིས་དེ།
རང་བྱུང་རྗེས་སུ་མཐུན་པའི་ཚས་བཟུང་ནས།
བདེ་བས་བདང་སྨེ་ཕྱོགས་སུ་ཡོངས་འཁྲུམ་ཞིང་།
ཉི་བར་བཞིན་དུ་པ་ར་ཏྲ་སིར་ཕྱིན།། 99

དེ་ནས་རྒྱལ་པོ་ཀྲི་ཀི་འདོད་ལྡན་པས།
དེར་ནི་རི་དྭགས་མིག་དེ་དོན་གཉེར་ཡང་།
དཀའ་ཐུབ་མེ་ལྕེ་འབར་བཞིན་དེ་ཡིས་ནི།
ཇི་ཞིག་ལྟར་ཡང་རེག་འདོས་ཉིད་མ་གྱུར།། 100

རྒྱལ་པོ་འདི་བཙུན་མོ་རྣམས་ཀྱིས་རབ་འབད་ནས།
མངོན་པར་མཆོད་ཅིང་ལྷ་མོ་བཞིན་དུ་དེ།

कालेन निःशेषनिपीतसारा
भवन्ति भावा विरसस्वभावाः ॥ ९७ ॥

तेष्वेव देशेषु मनोहरेषु
तेष्वेव पुष्पाकरवासरेषु ।
एकेन केनापि विना जनस्य
सर्व्वं विषादास्पदतामुपैति ॥ ९८ ॥

वेषं ततः प्रव्रजितानुरूपं
विधाय सा भूतलचन्द्ररेखा ।
सुखोज्झिता दिक्षु परिभ्रमन्ती
वाराणसीं शान्तिमिवाससाद ॥ ९९ ॥

तत्राथ राज्ञा रुक्मिणा मृगाक्षी
सा प्रार्थ्यमानाप्यभिलाषभाजा ।
तपःप्रदीप्ताग्निशिखेव तस्य
संस्पर्शयोग्या न कथंचिदासीत् ॥ १०० ॥

सा राजपत्नीभिरतिप्रयत्ना-
दभ्यर्च्यमाना त्रिदशाङ्गनेव ।

ལེགས་སྤྱོད་སེམས་ཤིང་བདག་པོའི་བརྟུལ་ཞུགས་ཀྱིས།
དེར་ནི་ཅུང་ཟད་དུས་ཤིག་ཉེ་བར་གནས།། 101

འབྲལ་བའི་སྡུག་བསྔལ་མོ་ཡིས་སྨིག་བྱེད་ཅིང་།
དེ་ནི་དེ་ན་གནས་པ་ས་ཡི་བདག།
ཚངས་བྱིན་གྱིས་ཀྱང་ཉན་ནུ་བསྐྱངས་ལས་གྲོས།
བྲམ་ཟེའི་ཆས་སུ་བཅོས་ནས་ཡང་དག་འོངས།། 102

དེ་ནས་བརྟུལ་ཞུགས་མཛེས་པའི་ཆས་ཀྱི་བསྒྲིབས།
ཚུལ་ཁྲིམས་གྲགས་པའི་བ་དན་དེ་མཐོང་ནས།
དང་བའི་སྐད་དུ་མི་བདག་གྲུས་པར་ནི།
མངོན་དུ་ཕྱོགས་པས་རང་གཟུགས་གསལ་བར་བྱས།། 103

ས་བདག་བདག་གི་གནོད་པ་མི་བཟད་པ།
ཉེས་སྨྲ་ཚེ་ན་དེ་ནི་ཡུན་རིང་དུས།
ཁྱིངས་ལྡན་རྣམས་ཀྱིས་སྨད་པའི་ཁྲོ་བ་ནི།
བརྗོད་པ་ན་ཡང་གསར་པ་ཉིད་དུ་འགྱུར།། 104

སྡུག་པོ་མཆི་མའི་རྒྱུན་ནི་ཡོངས་སེལ་ཞིང་།
འདོད་པའི་ཟླ་རིས་ཕྱོགས་སུ་འབྲས་ལྡན་བྱེད།

तत्र स्ववृत्तानि विचिन्तयन्ती
पतिव्रता कालमुवास कश्चित् ॥ १०१ ॥

तां ब्रह्मदत्तोऽपि विशिष्टचार-
स्तत्र स्थितां भूमिपतिर्निशम्य ।
वियोगदुःखानलदह्यमानः
समाययौ ब्राह्मणकूटवेषः ॥ १०२ ॥

अथ व्रताच्छादितचारुवेषाम्
विलोक्य तां शीलयशःपताकाम् ।
प्रसादनाय प्रणयाभिसारी
नृपः स्वरूपं प्रकटीचकार ॥ १०३ ॥

तीव्रापराधोऽहमिति ब्रुवाणे
महीपतौ सा सुचिरं रुरोद ।
मनस्विनीनामवमानमन्यु-
रुदीरणेनापि नवत्वमेति ॥ १०४ ॥

घनाश्रुधारापरिहारकारी
स्मरेन्दुरेखासफलीकृताशः ।

རྒྱལ་པོ་སྔོན་དུས་ལྷ་བྱུས་མཛེས་མ་ནི།
དང་བར་བྱུས་ནས་རང་གི་རྒྱལ་སར་ཁྲིད།། 105

ཀང་པའི་པ་དྨོ་བཀོད་པའི་མཚོ་སྐྱེས་འཕྲེང་།
བྲལ་བའི་དུས་སུ་རབ་ཏུ་ཞི་གྱུར་པ།
དགའ་དང་འགྲོགས་ཚེ་དེ་ལ་རབ་འཁྲུངས་ཏེ།
ཆགས་པ་དྲག་པོ་འི་ལོངས་སྤྱོད་དཔལ་འབྱོར་བཞིན།། 106

སྐྱེ་བ་གཞན་ལས་ངེས་པར་བུ་མོ་དེས།
རང་སངས་རྒྱས་ལ་རྩེ་དགའི་པ་དྨ་དག།
ཕུལ་ནས་ཆགས་ཀླངས་དེ་དེ་ཡིས་ནི།
མཛེས་པ་སྤྱད་ནས་སླར་ཡང་དེ་ཡིས་ནི།། 107

རབ་ཏུ་ཕུལ་བས་འདི་ཡི་ཀང་པ་ནི།
བཀོད་པ་རྣམས་ལ་མཚོ་སྐྱེས་འཁྲུངས་པར་གྱུར།
ཀླངས་པའི་སྨོན་ལམ་དུས་སུ་བྲལ་གྱུར་ཅིང་།
སླར་ཡང་ཕུལ་བས་སླར་ཡང་བྱུང་བར་གྱུར།། 108

ཕྲིན་དང་ལྡན་པ་དེ་དག་ལས་འཁྲུངས་པ།
རང་ལས་སྨིན་པ་ཡིས་དེ་སྨོན་རྣམས་ལ།

कान्तां शरत्काल इव प्रसाद्य
निनाय राजा निजराजधानीम् ॥ १०५ ॥

पादाम्बुजन्याससरोजपाली
वियोगकाले प्रशमं प्रयाता ।
प्रादुर्बभूव प्रियसंगमेऽस्याः
सम्भोगलक्ष्मीरिव गाढ़रागा ॥ १०६ ॥

जन्मान्तरे सा किल कन्यकैव
प्रत्येकबुद्धाय विलासपद्मम् ।
दत्वापि लोभात्पुनराददे
तद्विचार्य्य शोभां प्रददौ पुनश्च ॥ १०७ ॥

पद्मप्रदानेन बभूवुरस्याः
पादावतारेषु सरोरुहाणि ।
आदानदोषाद्विरतानि काले
पुनः प्रदानात्पुनरुद्गतानि ॥ १०८ ॥

तेनैव दत्ता हरणोद्भवेन
स्वकर्म्मपाकेन मलीमसेन ।

པདྨོ་ཅན་དེ་གསོད་པའི་གནས་བཏང་སྟེ།
དུས་ཀྱི་ད་ལྟ་གྲགས་འཛིན་མ་ཡང་ངོ༎ 109

ལས་ཀྱི་འབྲས་བུ་རྒྱས་པའི་བཀྲ་བ་དེ།
དེ་སྐད་རྒྱལ་བས་གསུངས་བ་ཐོས་གྱུར་ནས།
དགེ་སློང་དེ་དག་ཐམས་ཅད་ངོ་མཚར་ཉི།
ཡོངས་སུ་འཛིན་པས་ རི་མོར་བཀོད་བཞིན་གྱུར༎ 110

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་པདྨ་ལྡན་གྱི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་དྲུག་ཅུ་རྩ་བརྒྱད་པའོ༎

पद्मावती वध्यपदं विसृष्टा
सैवाद्य कालेन यशोधरा च ॥ १०९ ॥

श्रुत्वेति सर्व्वं कथितां जिनेन
तां चित्रितां कर्म्मफलोदयस्य ।
बभूवुराश्चर्य्यपरिग्रहेण
चित्राभिलीना इव भिक्षवस्ते ॥ ११० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पद्मावत्यवदानमष्टषष्टितमः पल्लवः ॥

ཡལ་འདབ་དྲུག་ཅུ་རྩ་དགུ་པ།

གང་གི་སྤྱོད་པའི་ཁྱད་པར་མཐོ་བའི་མཚན་ཉིད་ལྡན་རྣམས་ཀྱིས།
ལེགས་བྱས་དག་ནི་མཆོད་རྟེན་ལྡན་པའི་ནོར་འཛིན་མས་སྐྱ་ཞིང་།
མ་ལུས་དགེ་བའི་སྨོན་ལམ་གནས་སུ་གྱུར་པ་དེ་དག་ནི།
འཇིག་རྟེན་འདི་དང་གཞན་ཡང་དག་ཅིང་བདེ་བ་བསྟན་པར་གྱུར།། 1

གྲོང་ཁྱེར་པ་ཊ་ལི་པུ་ཏྲར། གང་གིས་ཡང་དག་བསྐྱངས་བསྲུངས་པས།
འཇིག་རྟེན་མྱ་ངན་མེད་པ། ས་བདག་མྱ་ངན་མེད་པ་བྱུང་།། 2

བྱང་ཆུབ་སྙིང་དུ་ཁྲུས་བསྐྲུབས་ནས། གང་གི་གསེར་གྱི་ཆར་འབེབས་ཤིང་།
ཆོས་གོས་གསུམ་ནི་འགེབས་པ་ཡིས། དགེ་སློང་དགེ་འདུན་རྣམ་པར་མཆོད།། 3

འདས་པའི་སངས་རྒྱས་སྐུ་ཡི་ནི། རིང་བསྲེལ་གཟི་བརྗིད་འབར་རྣམས་དང་།
ཟླ་མེད་དཔལ་ལྡན་གནས་བརྟེན་ནི། གྲགས་པ་དེ་ཡིས་མཆོད་བྱར་གྱུར།། 4

རིན་ཐང་མེད་པའི་རིན་ཅན་རྣམས། གུས་པས་བསྒྲུ་བ་བྱས་ནས་ནི།
ས་གཞི་སྤུ་རིག་གདུགས་མཛེས་ཀྱི། མཆོད་རྟེན་དག་གིས་མཚན་པ་བསྐྲུནས།། 5

अथोनसप्ततितमः पल्लवः ।

तेषामशेषकुशलप्रणिधानधाम्नां
शुद्धः सुखस्थितिरयं च परस्य लोकः ।
येषां विशेषरचितोन्नतलक्षणानां
चैत्याङ्किता वसुमती सुकृतं ब्रवीति ॥ १ ॥

पुरे पाटलिपुत्रेऽभूदशोकः पृथिवीपतिः ।
येनाशोकः कृतो लोकः सम्यक्पालनलालितः ॥ २ ॥

विधाय बोधिस्नपनं येन काञ्चनवर्षिणा ।
त्रिचीवराच्छादनेन भिक्षुसंघोऽभिपूजितः ॥ ३ ॥

मान्यस्यानुमते श्रीमान् यशसः स्थविरस्य यः ।
अतीतबुद्धशारीरधातूनां दीप्ततेजसाम् ॥ ४ ॥

अनर्घ्याणां च रत्नानां कृत्वा सङ्ग्रहमादरात् ।
विदधे मौक्तिकच्छन्दचारुचैत्याङ्कितां महीम् ॥ ५ ॥

རང་ཉིད་སྐུ་ཡི་འཛིགས་རྟེན་དུ། ཕྱིན་ནས་བདེ་གཤེགས་རིང་བསྲེལ་ཚོགས།
སྐུ་ཡིས་ཕྱིན་པ་སྣང་ནས་དེ། རིན་ཅན་མཆོད་རྟེན་འཕྱིང་བ་བྱས།། 6

དེ་ཡི་མཆོད་རྟེན་ཆོས་རྒྱལ་གྱིས། ལུགས་དང་ལྡན་པ་སྟོང་ཕྲག་ནི།
བརྒྱད་ཅུ་རྩ་བཞི་དུས་གཅིག་ལ། སྤྲུལ་པ་ཡིས་ནི་རྣམ་པར་མཛེས།། 7

དུས་གཅིག་རབ་ཏུ་གནས་པ་ལ། དེ་ཚེ་གནས་བརྟན་མཁར་སོང་ནས།
ཉི་མ་བསྒྲིབས་དེ་ས་གཞི་ནི། གྲིབ་མའི་འདུ་ཤེས་དག་ཏུ་བརྟགས།། 8

དེ་ནས་དེ་ཡི་དགེ་འདུན་གྱི། མཆོད་རྟེན་རྒྱ་ཆེ་རྟག་འཛུགས་ས་ལ།
རབ་བྱུང་ཁྲི་བས་འཁོགས་གྱུར་པ། འགའ་ཞིག་དལ་གྱིས་འོངས་པར་གྱུར།། 9

དེར་ནི་རྒྱལ་པོ་ལ་འོས་ཟས། ས་ཡི་བདག་པོས་རབ་སྦྱིངས་པ།
ཟ་ཞིང་མཆོག་ཏུ་དགའ་བ་ནི། བདུད་རྩི་བཞིན་དུ་དེ་ཡིས་ཐོབ།། 10

དགེ་སློང་གཞན་གྱིས་དེ་ལ་སྨྲས། རང་ལ་འོས་པའི་བཟའ་བ་འདི།
ཁྱོད་ལ་ས་བདག་གིས་བྱིན་པ། ཅི་ཡི་དོན་སླད་ཁྱོད་ཞེས་སམ།། 11

ཤིན་ཏུ་རྒན་པ་ཁྱོད་ཉིད་ལས། དམ་ཆོས་ཅན་དང་འདོད་པ་ཡི།
ས་སྐྱོང་གིས་ནི་བཀུར་སྟི་དག ཤིན་ཏུ་ཆེ་བས་ཁྱོད་ལ་མཆོད།། 12

ཅེས་པ་བཞིན་འཛུམ་དགེ་སློང་གིས། བརྗོད་ཚེ་རྨོངས་པས་ངོ་ཚ་ཞིང་།
སྨུར་དུ་ཟུག་རྔུས་ཟུག་པ་བཞིན། དགེ་སློང་གན་པོས་རབ་བསམས་པ།། 13

नागाल्लोकं स्वयं गत्वा सौगतं धातुसञ्चयम् ।
स नागाहृतमादाय रत्नस्तूपावलीन् व्यधात् ॥ ६ ॥

तस्याशीतिसहस्राणि चत्वारि च महीतले ।
धर्मराजिकयुक्तानां स्तूपानां निर्मिति बभौ ॥ ७ ॥

एकक्षणप्रतिष्ठासु पृथिव्यां स्थविरस्तदा ।
खमुत्पत्यार्कमाच्छाद्य छायासंज्ञामकल्पयत् ॥ ८ ॥

नित्यप्रवृत्ते तस्याथ वितते सङ्घभोजने ।
शनैः प्रव्रजितः कश्चिज्जराजीर्णः समाययौ ॥ ९ ॥

राजार्हमशनं तत्र प्रेषितं स महीभुजा ।
भुञ्जानः परमां प्रीति माससाद सुधामिव ॥ १० ॥

तं प्राहान्यतमो भिक्षुरपि जानासि भूभुजा ।
किमर्थं स्वोचितं तुभ्यमिदं भोज्यमुपाहृतम् ॥ ११ ॥

अतिवृद्धतरात्त्वत्तः सद्धर्मं श्रोतुमुत्सुकः ।
त्वामर्चयति भूपालः सत्कारेण महीयसा ॥ १२ ॥

इति स्मितमुखेनोक्तो भिक्षुणा मौर्ख्यलज्जितः ।
शल्यविद्ध इव क्षिप्रं वृद्धभिक्षुरचिन्तयत् ॥ १३ ॥

ངོ་ཚའི་སྣོད་དུ་སྡུག་བསྔལ་མཐའ། ཟས་འདི་བདག་གིས་ཅི་སྣད་ཟོས།
ཚོགས་སུ་བཙད་པ་བཞི་ཆ་ཡང་། བདག་གིས་མི་ཤེས་ཡི་གེ་མེད།། 14

དམ་པའི་དབུས་སུ་ས་བདག་གིས། གལ་ཏེ་དྲིས་ན་བདག་ཅི་བྱེད།
སྐྱེ་བོ་འགའ་ཞིག་དགོད་འདི་དག། ལྐུགས་པ་བདག་ལ་ཅི་བརྗོད་འགྱུར།། 15

སྨིན་བྲུ་ཁོག་སྟོང་བྱེད་པ་རྣམས་ཀྱིས་དཔལ་གྱིས་སྟོང་པོ་འི་རྒྱན་ནི་གཞིགས་གྱུར་ཅིང་།
ནང་དུ་མི་དག་ཉལ་ཞིང་དུ་བས་དྲི་མར་གྱུར་པ་གཡང་བའི་ཤིང་ཡང་སླ།
མཁས་པ་བཞིན་རས་མཛེས་པས་བཙོམ་པའི་རྨོངས་པ་སྐྱེངས་ཤིང་ཞུམ་པས་གནས་གྱུར་པ།
ལྐུག་ཅིང་ལོང་བའི་གཟུགས་ཅན་བག་མེད་དུ་གནས་སྐྱེ་བོ་བདག་འདྲར་མ་གྱུར་ཅིག།། 16

དེ་ལྟར་བསམས་པ་ཡོངས་འདྲིས་ཤིང་། ཚ་བའི་དབུགས་འབྱིན་བདེ་མེད་པ།
དེ་ལ་ལྷ་མོས་སངས་རྒྱས་ལ། རབ་དང་མངོན་དུ་ཕྱོགས་ཏེ་གནས།། 17

གང་ཚེ་ཁྱོད་ལ་རྒྱལ་པོ་འདྲི། དེ་ཚེ་ཁྱོད་ཀྱིས་འདི་བརྗོད་བྱ།
ཤིན་ཏུ་རྒྱ་ཆེ་ལྡན་པའི་ཆོས། མདོར་བསྡུས་པ་དག་ཉན་པར་མཛོད།། 18

ནོར་ནི་ཅུང་ཟད་ཙམ་ཞིག་ཕན་པ་བྱེད་ཅིང་བྲུ་བ་ཤིན་དུ་ཉུང་བ་ཉིད།
སྲོག་གི་ཟུངས་ན་ཤིན་ཏུ་ཆུང་ཞིང་རོ་དང་བྲལ་བའི་ཟས་ཀྱིས་ཀྱང་།
མིག་དག་གཉིད་ཀྱི་རྒྱ་ནི་སྐད་ཅིག་གིས་ཀྱང་འདི་ཉིད་རྒྱུན་དུ་ནི།
ཉེར་མཁོ་ལྷག་མ་བཏང་ནས་ལུས་ཅན་ལོངས་སྤྱོད་རྩོམ་པ་རྒྱ་ཆེར་འགྱུར།། 19

लज्जायै किमिदं भुक्तं दुःखान्तमशनं मया ।
अपि गाथाचतुर्भागं न जानामि निरक्षरः ॥ १४ ॥

किं करोमि सतां मध्ये यदि पृच्छेन्महीपतिः ।
तत्किं वक्ष्यति मामेष मूकं हास्यरतिर्जनः ॥ १५ ॥

कीटैः कोटरकारिभिर्विघटितस्कन्धप्रबन्धः शनै
रन्तःसुप्तकृशानुधूममलिनः श्वभ्रेऽपि धन्यस्तरुः ।
मूर्खः पण्डितखण्डिताननरुचि वैलक्ष्यलीनस्थितिः
मूकान्धप्रतिमः प्रमादवसति र्मामास्तु माहग्जनः ॥ १६ ॥

इति चिन्तापरिचितं ततनिःश्वासनिःसुखम् ।
बुद्धप्रसादिनी देवी समभ्येत्य जगाद तम् ॥ १७ ॥

प्रक्ष्यति त्वां यदा राजा वक्तव्यं भवता तदा ।
विस्तीर्णतरधर्मस्य संक्षेपः श्रूयतामिति ॥ १८ ॥

किञ्चिन्मात्रं धनमुपकृतौ कृत्यमभ्यर्थ्यमेव
प्राणाधारं तनुतरमपि स्वादनिर्मुक्तमन्नम् ।
निद्रामुद्रा क्षणमपि दृशोरित्यशक्तोपयुक्तं
शेषं त्यक्त्वा व्रजति विपुलारम्भभोगं शरीरी ॥ १९ ॥

ཞེས་པ་ལྷ་མོས་ཡང་དག་བསྟན། རབ་གསལ་དབྱངས་ཅན་གྲགས་པོ་ཡིས།
ས་བདག་ཉན་དུ་འོངས་པ་ལ། ཆོས་ནི་རབ་ཏུ་བསྟན་པ་མཛད།། 20

སྙིང་ལ་བབ་པ་དེ་ཡི་ནི། ལེགས་བཤད་རྒྱལ་བས་ཐོས་གྱུར་ནས།
ཀྱི་མ་མཁས་པ་བརྗོད་གྱུར་བ། འདི་ནི་བདེན་ཞེས་རབ་ཏུ་བསམས།། 21

བློ་གྲོས་ཆེན་པོས་བདག་ཉིད་ཀྱིས། ཆེད་དུ་ཞམ་པ་འདི་དག་གསུངས།
དེ་ཉིད་བརྗོད་པ་དམ་པའི་ཚིག ཉམས་སྐྱོང་བསོད་ནམས་དག་གིས་ཐོབ།། 22

གང་གི་མཛོད་རྣམས་སུ་ནི་མི་ཡི་བུད་ཤིང་དུ་མཐོང་ནོར་གྱི་ནགས་དག་བསྐྱུབས།
གང་ཡང་བྲུ་བས་རྒྱ་མཚོ་བཞི་ཡི་ནོར་ཅན་སྣ་ཚོགས་འཛིན་པ་ཁྱབ་པར་བྱས།
ཟས་ཀྱང་རྣམ་པར་བཀྲལ་ལ་ཡོངས་སུ་འདྲིས་ཤིང་བདག་གི་གཉེན་ཀྱང་ཤིན་ཏུ་ཆེ།
ཐམས་ཅད་སྤྲོངས་པའི་བདེ་སྐྱིད་མཇུག་གི་དུས་སུ་གང་དུ་ཅི་ཡང་མཐོང་མ་ཡིན།།
23

ཞེས་པ་བསམས་མི་ཡི་བདག་པོ་ཡིས། དེ་ལ་རབ་ཏུ་ཕྱག་འཚལ་ཏེ།
འདོད་ལྡན་མཛེས་པའི་ཆོས་གོས་ནི། གསེར་གྱི་རབ་ཏུ་སྤྲས་པ་ཕུལ།། 24

དེ་ནས་ལམ་དུ་འགྲོ་བྱེད་ཅིང་། རྒྱལ་པོ་འི་མཆོད་པས་མཛེས་པ་དེ།
བསམ་བདན་ཁ་དོན་སྤྱོར་བའི་སྐད། ལྷ་མོ་ཡིས་ནི་ཡང་དག་བསྐུལ།། 25

དེ་ནས་དེ་ཡི་མན་ངག་གིས། དེ་ཡི་བསམ་བདན་བསྐྱབས་པ་ན།
ཉིན་མོངས་མ་ལུས་ཟད་པ་ལས། དགྲ་བཅོམ་ཉིད་ནི་མངོན་དུ་བསྐྱབས།། 26

इति देव्या समादिष्टो वृद्धः स्पष्टतरस्वरः ।
श्रोतुं प्राप्तस्य भूभर्तुर्विदधे धर्मदेशनाम् ॥ २० ॥

राजा हृदयसंवादि श्रुत्वा तस्य सुभाषितम् ।
अचिन्तयदहो सत्यमिदमुक्तं मनीषिणा ॥ २१ ॥

मामेवैतत्समुद्दिश्य हितमाह महामतिः ।
तत्त्वसंवादसास्वादाः पुण्यप्राप्याः सतां गिरः ॥ २२ ॥

यत्कोशेषु निधीयते धनवनं तृष्णानलस्येन्धनं
कृत्यं यच्च चतुःसमुद्ररसनां व्याप्नोति विश्वम्भराम् ।
आहारोऽपि विचित्रतापरिचयी निद्रापि मे भूयसी
सर्वं मोहसुखाय नान्तसमये किञ्चित् क्वचिद्दृश्यते ॥ २३ ॥

इति संचिंत्य नृपतिस्तस्मै काञ्चनचर्चितम् ।
प्रणम्य प्रददौ चारुरुचि सच्चीवरांशुकम् ॥ २४ ॥

व्रजन्तमथ तं मार्गे राजपूजाविराजितम् ।
ध्यानाध्ययनयोगाय देवता समचोदयत् ॥ २५ ॥

ततस्तदुपदेशेन निखिलक्लेशसंक्षयात् ।
साक्षाद्विहितमर्हत्त्वं तेन ध्यानावधानिना ॥ २६

དེ་ནས་ནམ་ཞིག་ས་བདག་གིས། དགེ་འདུན་མཆོད་སྟོན་ཡངས་པ་ལ།
དགེ་སློང་ཆོས་གོས་ལྷ་ཡི་ནི། དྲི་བཟང་ལྡན་པ་གསར་དུ་འོངས།། 27

སྟོན་མེད་དྲི་ལ་ཆགས་པ་ཡི། བུང་བའི་འཕྲེང་བས་བསྐོར་དེ་ལ།
མི་བདག་གིས་དྲིས་ཁྱོད་ཀྱི་དྲི། རྒྱས་འདི་རེ་ཞིག་གང་ལས་བྱུང་།། 28

དེས་སྨྲས་ལྷ་ཡི་འཇིག་རྟེན་གྱི། ཡོངས་འདུ་ལྗོན་པའི་འོག་ཏུ་བདག།
དབྱར་གྱི་དུས་སུ་གནས་གྱུར་པ། དེ་ཡི་མེ་ཏོག་དག་གིས་བསྒོས།། 29

དེ་ཐོས་མི་བདག་དེ་ཡི་ནི། མཐུ་ལ་ལྷག་པར་གུས་གྱུར་ཅིང་།
དཀོན་ཅོག་གསུམ་མཆོད་ལ་ཆགས་པ། བསོད་ནམས་ཀུན་རར་དགའ་བར་གྱུར།།
30

གལ་ཏེ་གུས་པར་ཆོས་ལ་གནས་ན་དེ་ཉིད་འཚོ་བ་ཡིན།
གལ་ཏེ་སྐལ་བཟང་བདེན་པར་སྤྱོད་ན་དེ་ཉིད་སྨྲ་བ་ཡིན།
གལ་ཏེ་མཐར་ཐུག་སེམས་པར་བྱེད་ན་དེ་ཉིད་བློ་གྲོས་ཡིན།
གལ་ཏེ་སྦྱིན་པའི་བྱ་བ་བྱེད་ན་དེ་ཉིད་དཔལ་འབྱོར་ཡིན།། 31

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཆོས་ཀྱི་རྒྱལ་པོ་རབ་གནས་ཀྱི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དྲུག་ཅུ་རྩ་དགུ་པའོ།།

कदाचिदथ भूभर्तुं विपुले सङ्घभोजने ।
नवः समाययौ भिक्षु दिव्यसौरभचीवरः ॥ २७ ॥

अपूर्वगन्धलुब्धालिमालावलयितं नृपः ।
तमपृच्छत् कुतस्तावदयं ते सौरभोद्भवः ॥ २८ ॥

सोऽवदद् देवलोकेऽहं पारिजाततरोस्तले ।
उषितो वार्षिकं कालं तत्पुष्पैरधिवासितः ॥ २९ ॥

एतदाकर्ण्य नृपतिस्तत्प्रभावाधिकादरः ।
रत्नत्रयार्चनासक्तः पुण्यारामरतोऽभवत् ॥ ३० ॥

धर्मस्थितिप्रणयिनी यदि सैव वृत्तिः
सत्योपभोगसुभगा यदि सैव वाणी ।
पर्यन्तचिन्तनरता यदि सैव बुद्धि-
र्दानक्रियोपकरणं यदि सैव लक्ष्मीः ॥ ३१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्प-
लतायां धर्मराजिकाप्रतिष्ठावदानं
ऊनसप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་པ།

གང་གི་གྲགས་པའི་མཚན་ཉིད་ཁྱད་པར་རྣམ་པར་བཀོད་པ་ཡིས།
ས་གཞི་བསོད་ནམས་མཆོག་གི་བསོད་ནམས་ལྡན་པར་ཉེར་བསྐྲུན་ཅིང་།
རྒྱལ་བ་ལ་ནི་གུས་པ་རབ་བསྒྲུབས་བག་ཆགས་བསྐྱེད་བྱས་ལ།
དེ་དག་རྣམས་ཀྱི་མངོན་འདོད་ལེགས་ལྡས་སྦྱོར་བ་རྒྱལ་གྱུར་ཅིག། 1

དགེ་སློང་ཉི་གུང་ཞེས་བྱ་བ། བླ་མ་དགའ་བོ་འི་ཚིག་གིས་ན།
ཁ་ཆེའི་དཀྱིལ་འཁོར་དག་ཏུ་ན། སངས་རྒྱས་བསྟན་པ་འཛིན་དུ་སོང་།། 2

ཀླུ་ཡིས་བྱིན་བརླབས་དེ་ཤེས་ནས། ས་གཞི་འདར་བྱེད་དེ་ཡིས་ནི།
སྙིང་སྟོབས་བདུན་ལྡན་ཏིང་འཛིན་གྱིས། ཀླུ་རྣམས་ཀུན་དུ་བསྐྱོད་པ་བསྒྲུབས།། 3

རྣམ་འགྱུར་ཁྲོ་ལྡན་དེ་དག་གིས། མཚོན་དང་མེ་ཡི་ཆར་སྤྲོས་པ།
མཐུ་ཡིས་དེ་ཡི་སྤྱི་བོར་ནི། པདྨ་ཨུད་པལ་འཕྲེང་བར་གྱུར།། 4

དེ་ནས་དེ་ཡི་བརྩོན་འགྲུས་ཀྱིས། རབ་དུ་ཡ་མཚན་ཀླུས་དེ་ལ།
སྐྲས་པ་ཇི་སྲིད་སྐྱིལ་ཀྲུང་བཅས། དེ་སྲིད་ཡུལ་འདིར་ཁྱོད་ཀྱི་གནས།། 5

ཞེས་པ་བརྗོད་ནས་དེ་ལ་ནི། སྐྱིལ་ཀྲུང་ཡངས་པར་བཅིངས་པ་ཡི།
ཚད་དང་མཚུངས་པ་སྟོང་པ་ཡི། དཀྱིལ་འཁོར་དག་ནི་རབ་ཏུ་བྱིན།། 6

अथ सप्ततितमः पल्लवः ।

भक्तिप्रवर्त्तितजिनोदितवासनानां
तेषां जयत्यभिमतः सुकृताभियोगः ।
यत्कीर्त्तिलक्षणविशेषनिवेशनेन
पुण्यापि पुण्यतरतामुपयाति पृथ्वी ॥ १ ॥

माध्यन्तिकाभिधो भिक्षुरानन्दस्य गुरोर्गिरा ।
बुद्धशासनमाधातुं ययौ काश्मीरमण्डलम् ॥ २ ॥

तन्नागाधिष्ठितं ज्ञात्वा धीरसत्त्वः समाधिना ।
ससङ्क्षोभं प्रणिदधे नागानां कम्पितावनिः ॥ ३ ॥

शस्त्राग्निदृष्टिभिरुत्सृष्टा तैरमर्षविकारिभिः ।
प्रभावेणाभवत्तस्य मूर्द्ध्नि पद्मोत्पलावली ॥ ४ ॥

ततस्तं जगदुर्नागा स्तद्वीर्य्योत्कर्षविस्मिताः ।
यावान् पर्य्यङ्कबन्धोऽत्र देशस्तावान् वशे तव ॥ ५ ॥

उक्त्वेति तस्मै पर्य्यङ्कबन्धतुल्यं प्रमाणतः ।
नवद्रोणमुखायामं प्रददुः शून्यमण्डलम् ॥ ६ ॥

དེར་ནི་དེ་ཡི་གྲོང་ཁྱེར་དང་། གྲོང་གི་ཁྱད་པར་འགོད་བྱེད་ཅིང་།
དགྲ་བཅོམ་ལྔ་བརྒྱ་དག་དང་ནི། ལྷན་ཅིག་རབ་ཏུ་གནས་པར་གྱུར།། 7

དེར་ནི་མི་ཟད་བཅོམ་ལྡན་ཆོས་དག་རྣམ་པར་བཀོད་གྱུར་ནས།
མཛེས་པའི་གཙུག་ལག་ཁང་གི་རྒྱན་དང་ལྡན་པའི་འཛིན་བྱེད་དེ།
སྨྲོས་ངང་ལྡན་གྱི་ངོས་ལས་སླངས་ཤིང་སྙིང་པོ་ཐོབ་གྱུར་པ།
གྲུར་གྲུམ་བསར་པའི་རྩ་བའི་ཚོགས་ཀྱིས་རབ་ཏུ་ཁྱབ་པར་གྱུར།། 8

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཉི་མ་གྲུང་པའི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་བདུན་ཅུ་པའོ།།

स तत्र नगरग्रामसन्निवेशविशेषकृत् ।
स्थितिं बबन्ध सहितः शतैः पञ्चभिरर्हताम् ॥ ७ ॥

तत्राक्षयं भगवतः स निवेश्य धर्मं
कृत्वा विहाररुचिराभरणां धरित्रीम् ।
तां गन्धमादनतटोद्धृतलब्धसारैः
व्याप्तां चकार नवकुङ्कुमकन्दवृन्दैः ॥ ८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्प-
लतायां माध्यन्तिकावदानं नाम
सप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་གཅིག་པ།

ཞི་བ་ལ་རེག་དྲི་མེད་ཚུལ་ཁྲིམས་རས་དཀར་རྩེ་དགའ་ཡིས།
མཛེས་པས་བསྟེན་ཅིང་ཡུལ་དང་ཆས་ལས་ཕྱིར་ཕྱོགས་རྣམས་ལ།
དར་གོས་དག་དང་ཤཱ་ཎའི་གོས་ཧྲུལ་དྲི་མ་ཅན་གྱི་ཀྱང་།
མངོན་པར་ཞེན་པ་སྐྱེད་མིན་དམན་པ་ཉིད་དུ་བསྒྲུབ་པ་མིན། 1

ཤཱ་ཎའི་གོས་ཅན་དགེ་སློང་སྔོན། ཡོན་ཏན་ལྡན་པའི་བླ་མའི་བཀས།
རྒྱལ་བའི་བསྟན་པ་གཟུང་བའི་སླད། གྲོང་ཁྱེར་བཅོམ་བརླག་དག་ཏུ་ཞུགས།། 2

དེ་ནི་ལམ་དུ་འགྲོ་བ་ན། འཕགས་པའི་རང་བཞིན་གྱུར་གཉིས་དང་།
ཕན་ཚུན་རབ་ཏུ་བརྗོད་པ་ཡི། ཞར་བྱུང་འཕགས་པ་འདི་དག་ཐོས།། 3

དྲི་མེད་ཚུལ་ཁྲིམས་གནས་དང་ཐོས་པ་ཡི། མིས་དང་ལྡན་པར་གྲགས་ཤིང་བཟོད་པ་ཅན།
དགེ་སྦྱོང་དེ་དག་ཉིད་ནི་ས་གཞི་ལ། དགེ་སློང་ཤཱ་ཎའི་གོས་ཅན་དག་ཏུ་བརྗོད།། 4

དེ་བརྗོད་དེ་ནས་དེ་ཡིས་ཀྱང་། དེ་ཉིད་བརྗོད་ཐོས་དེ་དག་གིས།
དེང་སྐབས་ཤཱ་ཎའི་གོས་ཅན་དེ། ཁྱོད་ཉིད་ཡིན་པར་ཐེ་ཚོམ་མེད།། 5

ཅི་སྐད་ཤཱ་ཎའི་གོས་ཅན་ཞེས། བློ་བཟང་ཁྱོད་ནི་ཕྱོགས་སུ་གྲགས།
ཐུབ་པ་དམ་ཆོས་སྨྲ་བ་རྣམས། ཁྱོད་ཀྱི་ཚིགས་སུ་བཅད་པ་སྒྲོགས།། 6

अथ एकसप्ततितमः पल्लवः ।

शान्तिस्पृशां विमलशीलदुकूललीला-
शोभाजुषां विषयवेषपराङ्मुखानाम् ।
चीनांशुकैर्मलिनशीर्णपटच्चरैर्वा
नैवाभिमानकलना न च दैन्यवृत्तिः ॥ १ ॥

शाणवासी पुरा भिक्षुर्गुणवान् गुरुशासनात् ।
जिनशासनमाधातुं मथुरां प्रस्थितः पुरीम् ॥ २ ॥

स व्रजन् पथि शुश्राव मल्लयोर्वदतोर्मिथः ।
प्रसङ्गोपगतामेतामार्य्यामार्य्यस्वभावयोः ॥ ३ ॥

ये विमलशीलनिलयाः श्रुतविश्रुतचक्षुषः क्षमावन्तः ।
तानेव शाणवासी कथयति भिक्षुर्भुवि श्रमणान् ॥ ४ ॥

एतदुक्त्वाथ तेनापि तदेवोक्तं निशम्य तौ ।
तमूचतुस्त्वमेवासौ शाणवासी न संशयः ॥ ५ ॥

कस्मात्त्वं शाणवासीति सुमते दिक्षु विश्रुतः ।
गाथा गायन्ति मुनयस्तव सद्धर्मवादिनः ॥ ६ ॥

དེས་སྨྲས་སྐྱེ་བ་གཞན་ལ་བདག། སྨན་པ་གསོ་བར་བྱེད་པ་ཡིས།
རང་སངས་རྒྱས་ནི་སྙིང་ནད་ཀྱིས། གཟིར་བར་རབ་ཏུ་བསོས་པར་བྱས།། 7

དེ་ཡི་ཤཱ་ནའི་གོས་དག་ནི། ཆུང་ཞིང་རབ་ཏུ་རྙིངས་པ་མཐོང་།
རྒྱལ་པོ་ལ་འོས་མཛེས་པའི་གོས། བདག་གིས་རབ་ཏུ་ཕུལ་པས་ཕུལ།། 8

དེ་ཡིས་སྨྲས་པ་གྲོགས་པོ་དག། མཛེས་པའི་གོས་ལ་བདག་མི་སྤྱོད།
ཤཱ་ནའི་གོས་ཀྱི་རབ་ཞི་བ། བསྔགས་པར་འོས་ཤིང་མཛེས་པ་ཐོབ།། 9

ཅེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས ཤཱ་ནའི་གོས་སྙིང་འདོད་པ་བདག།
དམ་པའི་གྲོགས་ཀྱིས་ཆགས་བྲལ་ཐོབ། དམ་པའི་གོས་ལས་ཕྱིར་ཕྱོགས་གྱུར།། 10

དུས་ཀྱི་དེ་ཡི་ཞུས་ཀྱི་མཐར། མཛེས་པའི་མཆོད་པ་བསྒྲུབས་བྱས་ཏེ།
དེ་མཚུངས་ཉིད་ནི་ཐོབ་པའི་སྐད། བད་ ག་གིས་ཡུན་ལམ་ཐོ་གྲུས་བྱས།། 11

སྔོན་ལམ་དེ་དང་དེ་ལ་ནི། ཡང་དག་མཆོད་པ་ཡིས་ཀྱང་བདག།
ཤཱ་ནའི་གོས་དང་ལྡན་པར་སྐྱེས། ཤཱ་ནའི་གོས་ཅན་ཞེས་སུ་གྲགས།། 12

ཞེས་བརྗོད་བཅོམ་བརླག་གྲོང་ཁྱེར་དུ། ཕྱིན་ཅིང་དལ་གྱིས་འགྲོ་བ་དེས།
མགོ་ཅན་ཞེས་པའི་རི་བོ་ལ། རྩོམ་པ་ཆེན་པོ་དག་གིས་འཛེགས།། 13

དེར་ནི་ས་གཞི་འདར་བྱེད་པའི། སྐྱིལ་ཀྲུང་བཅས་དེ་ཉེ་བར་འཁོད།
ཆར་ཆེན་འབེབས་པའི་སྒྲ་དག་ནི། བགེགས་ལ་ཆས་པ་རྣམ་པར་བཏུལ།། 14

स जगाद मयान्यस्मिन् जन्मन्यामयपीड़ितः ।
प्रत्येकसुगतः स्वास्थ्यं नीतो वैद्यचिकित्सया ॥ ७ ॥

शाणं शीर्णतरं वासस्तस्य दृष्ट्वा मयाल्पकम् ।
उपनीतं प्रणयिना राजाहं रुचिराम्बरम् ॥ ८ ॥

सोऽब्रवीन्न सखे मह्यं रोचते रुचिरांशुकम् ।
लभ्यते प्रशमश्लाघ्या शोभा शाणेन वाससा ॥ ९ ॥

इत्यहं तद्वचः श्रुत्वा शीर्णशाणांशुकोत्सुकः ।
सत्सङ्गमाप्तवैराग्यः सद्वस्त्रविमुखोऽभवम् ॥ १० ॥

कालेन तस्य देहान्ते रुचिरार्चाविधायिना ।
मया तत्तुल्यभावाप्त्यै प्रणिधानमतिः कृता ॥ ११ ॥

तेनाहं प्रणिधानेन तत्समभ्यर्चनेन च ।
सशाणवस्त्रः सञ्जातः शाणवासीति विश्रुतः ॥ १२ ॥

इत्युक्त्वा स शनैर्गच्छन्नवाप्य मथुरापुरीम् ।
उरुमुण्डाभिधं शैलमारुरोह महोद्यमः ॥ १३ ॥

तत्रोपविश्य पर्यङ्कबन्धेनाकम्पितस्थितिः ।
विलोक्य विषसन्नद्धौ नागौ तुमुलवर्षिणौ ॥ १४ ॥

བཅོམ་བརྟག་ལ་གནས་ཚོང་དཔོན་བུ། ནཱ་ར་དཏྟ་ཞེས་བྱ་བ།
གྲོགས་ཀྱི་སྐད་དུ་བརྫུང་ནས་ནི། དེ་ཡི་གཙུག་ལག་ཁང་པར་སྤྲུལ།། 15

རིན་ཅན་རབ་འབར་ཞལ་དང་གསེར་གྱི་བ་གམ་དག་དང་ལྡན།
ཁྲི་དང་ཁྲིའུ་མལ་སྟན་དག་གིས་སྤྲས་ཤིང་མཛེས་པར་དགའ།
མཐོ་རིས་ལྷ་བུ་སྐལ་བཟང་ལོངས་སྤྱོད་གཏེར་གྱི་གཙུག་ལག་ཁང་།
བསོད་ནམས་གནས་པ་དེ་ནི་ནཱ་ར་དཏྟ་ཞེས་པར་གྱུར།། 16

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཤཱ་ནའི་གོས་ཅན་གྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་གཅིག་པའོ།།

मथुरावासिनौ श्रेष्ठिसुतौ नटभटाभिधौ ।
आदाय सहदत्याय स विहारं विनिर्ममे ॥ १५ ॥

रत्नोज्ज्वलः स्फटिककाञ्चनरम्यहर्म्यैः
पर्य्यङ्कपीठरचनाशयनाभिरामः ।
स्वर्गोपमः सुभगभोगनिधिर्विहारः
पुण्यस्थितिर्नटभटाभिध एव सोऽभूत् ॥ १६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शाणवास्यवदानमेकसप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་གཉིས་པ།

སྐྱེ་བོ་འདོད་པའི་རྩལ་གྱིས་མིག་ནི་ཡོངས་སུ་ཉམས་པ་ཀུན།
ཡུལ་ནི་གང་དག་ཉིད་ཀྱིས་མངོན་པར་འདོད་པའི་སར་གྱུར་པ།
དེ་ཉིད་ཀྱིས་ནི་བསོད་ནམས་ཡོངས་གཙང་དག་པ་བསྟེན་རྣམས་ཀྱི།
ཡིད་ནི་རབ་ཏུ་ཞི་ཞིང་ཆགས་བྲལ་ལྡན་པ་དག་ཏུ་གྱུར།། 1

བཅོམ་བརྒྱག་དག་ན་གནས་པ་སྤོར། སྤྲས་པ་ཞེས་བྱ་སྤྱོས་འཚོང་གི།
བུ་ནི་དཔལ་དང་ལྡན་པ་དག། ཉེར་སྤྲས་ཞེས་པར་གྲགས་པ་བྱུང་།། 2

ཤཱ་ནའི་གོས་ཅན་དགེ་སློང་གི། རྗེས་འབྲང་ངོ་ཞེས་པ་ཡི་ནི།
ཚིག་གིས་མ་སྐྱེས་པ་ནས་བདགས། དེ་ནི་དེ་ལ་གུས་ལྡན་གྱུར།། 3

ཡང་ཚེ་གསར་པ་དང་ལྡན་དེ། ཆགས་བྲལ་མ་ནི་མངོན་ཕྱོགས་ཚེ།
བགེགས་ཚོགས་རྩོམ་པ་ཉམས་པ་ཡིས། ཡིད་འབྱུང་གི་ནི་བསམ་པ་ཐོབ།། 4

པ་ཡི་ཚིག་གིས་དུས་འགའ་ཞིག། ཧ་རི་ཙནྡན་གླ་རྩི་དང་།
ཨ་ག་རུ་དང་ག་བུར་འཚོང་། ཐ་སྙད་རྣམས་ནི་དེ་ཡི་བྱས།། 5

དེ་ནས་ནོར་ལྷས་བྱིན་ཞེས་པས། སྤྱོས་ནི་ཏོ་རུ་གཏང་བ་ཡིས།
རང་གི་འབངས་མོས་དེ་ཡི་གཟུགས། ཡོན་ཏན་གྲགས་པ་བཤད་ཐོས་ནས།། 6

अथ द्विसप्ततितमः पल्लवः ।

यैरेव याति विषयैरभिलाषभूमिं
सर्वो जनः स्मररजःपरिभूतदृष्टिः ।
तैरेव पुण्यपरिमार्जनशुद्धिभाजां
वैराग्ययोगमुपयाति मनःप्रशान्तिम् ॥ १ ॥

अभूद्गुप्ताभिधानस्य गान्धिकस्य सुतः पुरा ।
मथुरावासिनः श्रीमानुपगुप्त इति श्रुतः ॥ २ ॥

अजातः कल्पितः पित्रा स भिक्षोः शाणवासिनः ।
अनुयायीति वचनात्तद्भक्तिनिरतोऽभवत् ॥ ३ ॥

वैराग्याभिमुखे तस्मिन् नवयौवनशालिनि ।
भग्नविघ्नगणारम्भशङ्कितां लेभे मनोभवः ॥ ४ ॥

हरिचन्दनकस्तूरीकर्पूरागुरुविक्रयी ।
स कश्चित्कालमकरोद्व्यवहारं पितुर्गिरा ॥ ५ ॥

अथ वासवदत्ताख्या गन्धक्रयविसृष्टया ।
स्वदास्या कथितं श्रुत्वा तं रूपगुणविश्रुतम् ॥ ६ ॥

ཆགས་པའི་ཚོགས་ནི་རབ་རྒྱས་ཤིང་། འགྲོགས་པ་དོན་གཉེར་སྨད་འཚོང་མས།
མངོན་པར་འདོད་པའི་པོ་ཉ་མོ། བདང་ནས་དེ་ལ་བསམ་པ་བཤད།། 7

དལ་གྱི་པོ་ཉ་མོས་དོན་གཉེར། འཇུམ་ལྡན་དེ་ཡིས་དེར་སྨྲས་པ།
དེ་དང་ཕྲད་པའི་དུས་འདི་ན། བདག་ལ་མངོན་པར་འདོད་པ་མེད།། 8

དེ་ནས་པོ་ཉ་མོ་འོངས་ཚེ། སྨད་འཚོང་ཆགས་བྲལ་ལྡན་པར་གྱུར།
རྗེས་སུ་ཆགས་པས་ཆགས་བྲལ་བ། སྨད་འཚོང་མ་ལ་ངེས་པ་མེད།། 9

ཚོང་དཔོན་བུ་ནི་ཡང་ཚོ་ལྡན། ནམ་ཞིག་དེ་ཡི་ཁྱིམ་གནས་ཚེ།
དཔལ་དང་ལྡན་པའི་དོན་མཐུན་བདག། གྲོང་གི་ལམ་ནས་གསར་དུ་འོངས།། 10

དེ་ཡི་མཚན་མོ་ལོངས་སྤྱོད་སྐྱད། གོས་དང་བཅས་པའི་གསེར་དག་སྦྱིངས།
བཀེམ་ཆགས་ལྡན་པའི་སྨད་འཚོང་མ། མ་དང་བཅས་པས་རབ་བསམས་པ།། 11

ནོར་ཟད་བྱས་པ་ཚོང་པའི་བུ། འདི་ནི་རེ་ཞིག་ཁྱིམ་ན་གནས།
གཞན་ཡང་དོན་གཉེར་ནོར་ཆེན་ལྡན། བདག་གི་ཅི་བྱ་དེ་མ་རིག།། 12

འདོད་ལྡན་ནོར་ནི་སྐྱུགས་པ་དག། ཕྱི་ནས་ལྷག་པར་སྟེར་མི་འགྱུར།
འབྲས་བུ་མེད་པར་ཡོངས་སྙིང་པར། གྱུར་པ་དེ་ཡིས་ཅི་ཞིག་བྱ།། 13

གསར་པ་མངོན་འདོད་གསར་པ་ལས། མ་བསླངས་པར་ཡང་ཐམས་ཅད་སྟེར།
དང་པོར་གྲུས་པས་མི་མཛད་ཡང་། མཛའ་བ་ཉམས་སུ་སྤྱོང་བར་བྱེད།། 14

सञ्जातरागसंवेगा गणिका संगमार्थिनी ।
विसृज्याभिमतां दूतीं भावं तस्मै न्यवेदयत् ॥ ७ ॥

स स्वैरमर्थितो दूत्या सस्मितस्तामभाषत ।
अयं नाभिमतः कालस्तस्याः सन्दर्शने मम ॥ ८ ॥

अथ दूत्यां प्रयातायां सोद्वेगा गणिकाभवत् ।
नानुरागे विरागे वा नियतिर्वेश्ययोषिताम् ॥ ९ ॥

कदाचिन् मन्दिरे तस्याः स्थिते यूनि वणिक्सुते ।
नवः सार्थपतिः श्रीमानाजगामोत्तरापथात् ॥ १० ॥

विसृष्टे रात्रिभोगाय तेन हेम्नि सहांशुकैः ।
जनन्या सहिता लुब्धा गणिका समचिन्तयत् ॥ ११ ॥

एष तावत् स्थितो गेहे वणिक्सूनुः कृतव्ययः ।
अर्थी महाधनश्चान्यः किं करोमि न वेद्मि तत् ॥ १२ ॥

वान्तचित्तः पुनः कामी न भवत्यधिकप्रदः ।
तेन पर्युषितेनैव क्रियते निष्फलेन किम् ॥ १३ ॥

नवस्त्वभिनवौत्सुक्यात्सर्वं मुञ्चत्ययाचितः ।
अप्रियेऽपि प्रियास्वादं करोति प्रथमादरः ॥ १४ ॥

དེ་སྐད་ནང་དུ་ཟུག་རྔུ་བཞིན། ཞུགས་པ་འདི་ལ་ཅི་ཞིག་བྱ།
ལས་ཀྱི་འཆིང་བཞིན་རྫེས་འབྲང་འདི། མ་བཅད་པར་ནི་འགྲོ་མ་ཡིན།། 15

གལ་ཏེ་ནོར་ལྷུར་འདི་བདང་ན། བདག་ཅག་ལ་ནི་ཚོང་ཁ་མེད།
ཆོས་ཕྱིར་མ་ཡིན་འདོད་ཕྱིར་མིན། བདག་ཅག་ནོར་གྱི་ཕྱིར་དུ་སྐྱོལ།། 16

ཞེས་བསམས་ནོར་ནི་དོན་གཉེར་མ། དེ་ཡིས་མ་ཡི་གྲོས་ཀྱིས་ནི།
ཆང་མཆོག་དུག་ལྡན་བླུད་པ་ཡིས། ཚོང་པའི་བུ་ནི་རབ་དུ་བསད།། 17

དེ་ནས་སྲོག་དང་བྲལ་བ་དེ། ཕྱུག་དར་ཁྲོད་ཀྱི་ཕྱང་པོར་སྤྲས།
དེད་དཔོན་ནང་དུ་རབ་བཅུག་ནས། དེ་ཡིས་ནོར་ནི་རྒྱ་ཆེན་ཐོབ།། 18

སྨད་འཚོང་མ་ཡི་ཁང་པར་ནི། འཇུག་པ་མཐོང་སྟེ་ཕྱིར་འཐོན་མེད།
ཞེས་དེ་གཉེན་རྣམས་ཀྱིས་བཙལ་བས། ཚོང་པའི་བུ་ནི་སྲོག་བྲལ་རྙེད།། 19

དེ་ནས་དེ་བསད་གཏུང་བ་ཅན། དེ་དག་གིས་གསོལ་ས་བདག་གིས།
སྡིག་དྲག་ལ་འོས་ཆད་པ་ནི། མི་བཟད་སྨད་འཚོང་མ་ལ་བསྟན།། 20

སྣ་གྲོལ་གོས་དང་བྲལ་བ་དེ། གསོད་ས་ཡི་ནི་སར་ཁྲིད་དེ།
ལག་པ་རྐང་པ་རབ་བཅད་ཅིང་། རྣ་བ་དང་ནི་སྣ་ཡང་བཅད།། 21

རང་གི་ཁྲག་གི་འདམ་ལ་ནི། གདུང་བས་ཉམས་ཅིང་འདྲེ་ལྡོག་བྱེད།
ཤ་ཟ་ལོག་ཅིང་འཁྱོན་མ་ནི། འབངས་མོར་བཅས་པ་ཀུ་ངན་བྱེད།། 22

तस्मात् किमस्य क्रियतामन्तःसक्तस्य शल्यवत् ।
अभोगेन न यात्येष कर्मबन्ध इवानुगः ॥ १५ ॥

नास्माकमेतद्वाणिज्यं त्यज्यते यदि वित्तवान् ।
न धर्माय न कामाय वयमर्थाय निर्मिताः ॥ १६ ॥

इति संचिंत्य सा मातुः संमते द्रविणार्थिनी ।
वरासवेन न्यवधीत् सविषेण वणिक्सुतम् ॥ १७ ॥

निक्षिप्यावस्करचये ततस्तं गतजीवितम् ।
अवाप्य विपुलं वित्तं सार्थवाहं प्रवेश्य सा ॥ १८ ॥

दृष्टः प्रविष्टो गणिकागृहं न तु विनिर्गतः ।
इति बन्धुभिरन्विष्य व्यसुः प्राप्तो वणिक्सुतः ॥ १९ ॥

ततस्तद्वधसन्तप्तैः श्रावितस्तैर्महीपतिः ।
वेश्यायास्तीव्रपापार्हमादिदेशोग्रनिग्रहम् ॥ २० ॥

सा वध्यवसुधां नीता मुक्तकेशी निरम्बरा ।
निकृत्तपाणिचरणा च्छिन्नश्रवणनासिका ॥ २१ ॥

वेष्टयन्ती व्यथाक्रान्ता निजशोणितकर्दमे ।
निवार्य्यमाणक्रव्यादा दास्या चुक्रोश बन्धकी ॥ २२ ॥

དེ་ནས་དེ་ཡི་སྡུག་བསྔལ་ནི། མི་བཟད་ཉེར་སྦས་ཀྱིས་ཐོས་ནས།
དེ་ནི་བལྟ་བའི་དུས་འདི་ཞེས། བརྗོད་ནས་ས་གཞི་དེ་རུ་སོང་།། 23

ཟླ་འོད་ཅན་དེ་འོངས་པ་ནི། འབངས་མོས་བཤད་པ་མཐོང་གྱུར་ནས།
སྔོན་གྱི་མངོན་འདོད་ལྷག་མ་ཡིས། ངོ་ཚ་ལྡན་ཞིང་ཞུམ་གྱུར་གྱུར།། 24

བག་ཆགས་གོམས་པ་དག་གིས་ལམ། འགའ་ལས་ནང་དུ་རབ་ཞུགས་པ།
ལུས་ཅན་རྣམས་ཀྱི་ཆགས་པ་ནི། གནས་སྐབས་འགར་ཡང་གཏོང་མི་འགྱུར།། 25

འབངས་མོ་འི་གོས་ཀྱི་འདབ་མ་ཡིས། མདོམས་ནི་རབ་དུ་བསྒྲིབས་བྱས་ཤིང་།
ཉུ་མར་ལག་བཀོད་བཞིན་རས་ནི། རབ་དུད་དེ་ཡིས་དེ་ལ་སྨྲས།། 26

བདག་གིས་འབད་པ་ཆེན་པོ་ཡིས། དོན་དུ་གཅེར་ཡང་ཁྱོད་མ་འོངས།
ད་ལྟ་སྐལ་བ་ཞན་པ་བདག། མཐོང་བ་ཡིས་ནི་ཁྱོད་ལ་ཅི།། 27

གང་ཚེ་བདག་ནི་ལོངས་སྤྱོད་ཀྱིས། སྐལ་བཟང་རྣམ་འཕྲུལ་ཅི་ཡང་ལྡན།
དེ་ཡི་ཚེ་ན་ཁྱོད་ཀྱིས་ནི། བལྟ་བའི་དུས་འདི་མིན་ཞེས་སྨྲས།། 28

ཡན་ལག་བཅད་ཅིང་ཁྲག་གིས་བསྒོས། ཉོན་མོངས་རྒྱ་མཚོར་ལྷུང་བ་བདག།
ལྟ་བ་ཡི་ནི་དུས་འདི་དག། པདྨའི་མིག་ཅན་ཁྱོད་ཀྱི་ཅི།། 29

ཞེས་པ་སྨྲ་ཞིང་མཆི་མ་ཡི། རྒྱུ་ཡིས་གོས་ཀྱི་མཐའ་དག་བརླན།
རྗེས་སུ་གདུང་བ་ཅན་དེ་ལ། དལ་གྱིས་ཉེར་སྦས་ཀྱིས་སྨྲས་པ།། 30

उपगुप्तस्ततस्तस्याः श्रुत्वा विषमवैशसम् ।
तद्विलोकनकालोऽयमित्युक्त्वा तां भुवं ययौ ॥ २३ ॥

दास्या निवेदितं दृष्ट्वा तमायान्तं शशिद्युतिम् ।
पूर्वाभिलाषशेषेण सा लज्जाकुटिलाभवत् ॥ २४ ॥

अन्तःप्रविष्टः केनापि वासनाभ्यासवर्त्मना ।
न कस्यांचिदवस्थायां रागस्त्यजति देहिनाम् ॥ २५ ॥

जघनावरणं कृत्वा दास्या वसनपल्लवम् ।
सा स्तनन्यस्तहस्ता तं बभाषे विनतानना ॥ २६ ॥

प्रयत्नेनापि महता नायातस्त्वं मयार्थितः ।
अधुना मन्दभाग्यायास्तव सन्दर्शनेन किम् ॥ २७ ॥

यदा ममाभवत्कोऽपि भाग्यसौभाग्यविभ्रमः ।
न दर्शनस्य कालोऽयमित्युक्तं भवता तदा ॥ २८ ॥

कृत्ताङ्गी रुधिरादिग्धा च्युताहं क्लेशसागरे ।
कालः कमलपत्राक्ष किमयं दर्शनस्य मे ॥ २९ ॥

इति ब्रुवाणां बाष्पाम्बुप्लाव्यमानांशुकांचलाम् ।
शनकैरुपगुप्तस्तां सानुतापमभाषत ॥ ३० ॥

མཛེས་སྡུག་ལྷ་བའི་གྲོགས་དང་ལུས་ནི་གསེར་གྱི་རྩ་ཞིང་མཛེས་པའི་ཀུན་པོ་དང་།
བཞིན་རས་པ་དྨོ་ཟུམ་བྱེད་མིག་ནི་ཨུཏྤལ་དག་ལ་དམན་པ་སྟེར་བྱེད་པ།
ཤིན་ཏུ་ཡིད་འཕྲོག་དེ་དག་རྣམས་ལ་བདག་ནི་མི་དགའ་འོན་ཀྱང་འབད་པས་
བདག།
རྣམ་པར་སྤྱོད་ན་རོ་དང་བྲལ་བ་འདོད་པ་རྣམས་ཀྱི་རང་བཞིན་ལྟ་བུ་འོངས།། 31

རྒྱན་དང་གོས་ཀྱིས་རབ་བསྒྲིབས་ཞིང་། དྲི་བཟང་མཆོག་གིས་རབ་བསྒོས་པ།
ཁྱོད་ཀྱི་ལུས་ནི་མཛེས་པ་དག། སླར་ཡང་རང་བཞིན་འདི་འདྲར་གྱུར།། 32

སྣ་དང་རུས་པས་གང་བའི་དབྱིབས་ཅན་རྟག་ཏུ་མི་ཡིས་ནི།
ཡན་ལག་མ་ལུས་རབ་འཚེད་རྣག་ཁྲག་དང་ལྷན་སྐྱད་པའི་གནས།
ལུས་ཀྱི་མིང་ཅན་དུར་ཁྲོད་སྡུག་བསྔལ་ཚོགས་ཀྱི་གཏེར་དག་ལ།
གང་གི་དགའ་བ་དེ་དག་ཀྱི་རྒྱུད་ཀྱི་རྒྱུད་བརྟག་པར་འགྱུར།། 33

ཀྱི་མ་སྨོངས་ལས་མི་རྣམས་ནི། རྣམ་པར་ཟག་ཅིང་དྲི་ང་ཅན།
རྣམ་འགྱུར་ཐུག་པས་གང་གྱུར་པའི། ལུས་པོ་ལ་ཡང་དགའ་བ་བསྒོམས།། 34

བདེ་གཤེགས་ཉེ་བར་བསྟེན་པ་ལས། ལུས་ཀྱི་རྣམ་གྲངས་གཏོད་པ་ཅན།
མི་བཟད་སྒྲུ་མ་དག་གི་གནས། སྡུག་བསྔལ་ཕུང་པོ་འདི་ཟད་འགྱུར།། 35

སྨོངས་པའི་མུན་པ་དག་གི་ཉིན་བྱེད་ཉོན་མོངས་གནས་སྐབས་མཐའ་དག་གཅོད་
བྱེད་པ།
སྟོན་པའི་བསྟན་པའི་གནས་ལ་གང་དག་གིས་ནི་དགེ་བའི་གྲོགས་ཀྱི་སྐྱོན་ལས་
བཏང་།

कान्तिश्चन्द्र सखी सुवर्णकदलीलावण्यचौरं वपु-
र्वक्त्रं पद्मनिमीलनं कुवलयक्लैव्यप्रदे लोचने ।
नैतन्मे दयितं मनोहरतरं किन्तु प्रयत्नादहं
कामानां प्रकृतिं विचारविरसां द्रष्टुं समभ्यागतः ॥ ३१ ॥

विभूषणांशुकच्छन्ने वरसौरभवासिते ।
शोभा तवाभवत् काये स्वभावः पुनरीदृशः ॥ ३२ ॥

वत वत निहतास्ते कीर्णकेशास्थिसंस्थे
सततमनलतापोत्पच्यमानाखिलाङ्गे ।
कुणपवति रमन्ते ये जुगुप्सानिधाने
व्यसनगणनिधाने कायनाम्नि श्मशाने ॥ ३३ ॥

विस्यन्दिनि दुरामोदे विकृतच्छिद्रसङ्कुले ।
अहो मोहान्मनुष्याणां कायेऽपि प्रियभावना ॥ ३४ ॥

सापायः कायपर्य्यायमायाविषयसंश्रयः ।
दुःखस्कन्धः क्षयं याति सुगतोपासनादयम् ॥ ३५ ॥

मोहध्वान्तदिवाकरस्य सकलक्लेशावकाशच्छिदः
शास्तुः शासनसंश्रये प्रणिहितं कल्याणमित्त्रस्य यैः ।

དེ་དག་ལུས་ཞེས་བརྗོད་པའི་དཔྱལ་བ་དམན་པའི་ཀང་རྒྱུས་དྲ་བས་གང་གྱུར་ཅིང་།
སྒྱུ་མའི་འཕྲེང་བ་རྒྱས་པས་དཀྲིགས་པའི་རྣམ་འགྱུར་སྡོད་དུ་སྐྱུར་ཡང་ལྷུང་མི་
འགྱུར།། 36

དེ་དག་ཐོས་ནས་སྨད་འཚོང་མ། སྡུག་བསྔལ་གྱིས་ཉེན་ཆགས་བྲལ་ཅན།
ཉེ་སྨད་བསོད་ནམས་དཀོན་ཅིག་གསུམ། སྐྱབས་འདིས་དག་ལ་སྐྱབས་སུ་སོང་།།
37

དེ་ནས་དེ་ཡིས་ཉེར་སྦས་ཀྱི། གདམ་གྱིས་རྒྱུན་ཞུགས་འབྲས་བུ་ཐོབ།
ཆོས་ཀྱི་ལམ་ལ་གུས་པ་ཡིས། བདེན་པ་མཐོང་ནས་ཞི་བར་གྱུར།། 38

དེ་ནས་དེ་ནི་ལྷ་ཡི་ཚོགས། འདོད་དང་ལྡན་པར་སྐྱེས་པ་དག།
བཅོམ་བརླག་དགག་ན་འཁྲིད་རྣམས་ཀྱིས། ཐོས་ནས་དེ་ལུས་སྦྱང་པ་བྱས།། 39

སྐབས་དེར་ཤཱ་ནའི་གོས་ཅན་ནི། རབ་དང་བློ་ཡི་མངོན་ཕྱོགས་ཏེ།
ཉེར་སྦས་རབ་ཏུ་འབྱུང་བ་ཡིས། དུས་ལ་བབ་པར་ཡང་དག་བསམས།། 40

དེ་ནས་དེ་ཡིས་རབ་བྱུང་དེས། ཟླ་མེད་དགྲ་བཅོམ་གནས་ཐོབ་ནས།
གྲོང་ཁྱེར་དག་ན་གནས་རྣམས་ལ། དམ་ཆོས་སྟོན་པའི་རྩོམ་པ་མཛད།། 41

འཁོར་དེར་ཆོས་ནི་བདུད་རྩི་དང་། བཅས་པ་རབ་ཏུ་སྟོན་དེ་ལ།
བགེགས་ཚོགས་རྣམ་འགྱུར་རབ་མང་བ། དེ་དང་དེ་ནི་བདུད་ཀྱིས་བྱས།། 42

ཉན་པ་སེམས་ནི་གཡེང་བ་རྣམས། གང་གིས་རྣམ་པར་འཁྲུལ་གྱུར་བ།
མཛེས་པ་གསེར་དང་བཅས་པ་ཡི། དེར་ནི་མུ་ཏིག་ཆར་པ་བབ།། 43

नैव क्लिन्नकलङ्कपङ्ककलिते कीर्णान्त्रमालाकुले
ते मज्जन्ति विकारभाजि नरके कायाभिधाने पुनः ॥ ३६ ॥

एतदाकर्ण्य गणिका दुःखोद्वेगविरागिणी ।
पुण्यं रत्नत्रयं शान्त्यै शरण्यं शरणं ययौ ॥ ३७ ॥

उपगुप्तकथावाप्तश्रोतःप्राप्तफलाथ सा ।
धर्ममार्गप्रणयिनी दृष्टसत्या व्यपद्यत ॥ ३८ ॥

तस्यां देवनिकायेऽथ संभूतायां प्रभामये ।
मथुरावासिनः श्रुत्वा चक्रुस्तद्देहसत्क्रियाम् ॥ ३९ ॥

अत्रान्तरे शाणवासी समभ्येत्य प्रसन्नधीः ।
प्रव्रज्यामुपगुप्तस्य प्राप्तकालाममन्यत ॥ ४० ॥

सोऽथ प्रव्रजितस्तेन प्राप्यार्हत्पदमुत्तमम् ।
सद्धर्मदेशनारम्भं विदधे पुरवासिनाम् ॥ ४१ ॥

धर्मं प्रदिशतस्तस्य तस्यां पर्षदि साम्प्रतम् ।
चकार मारः प्रचुरां तां तां विघ्नौघविक्रियाम् ॥ ४२ ॥

ववर्ष मौक्तिकं तत्र रुचिरं च सकाञ्चनम् ।
येन व्याक्षिप्तचित्तानां श्रोतॄणामभवद्भ्रमः ॥ ४३ ॥

དེ་ཡི་མི་འཁྲུག་གར་མཁན་མ། མཛེས་སྡུག་འཇོ་སྒེག་གཟུགས་བྱས་ནས།
ཏྲི་ཛ་ལྷ་མོ་འི་ཚོགས་རྣམས་དང་། ལྷན་ཅིག་དེར་ནི་གར་དག་བྱས།། 44

མཛེས་པའི་གར་དང་རོལ་རྩེད་ཀྱིས། བདེ་ཐྲག་ཏུ་ནི་སེམས་སྤྲོགས་པ།
གདུལ་བྱ་རྣམས་ཀྱི་ཡིད་ནི་དེར། ངེས་པར་འདོད་པའི་རང་བཞིན་གྱུར།། 45

དེ་ནས་རྣམ་པར་མ་དུལ་བའི། བདུད་ནི་འདུལ་བ་ལ་བརྩོན་པ།
ཉེར་སྦས་ཀྱིས་ནི་རྣམ་འགྱུར་ལ། འོས་པའི་ཕྱིར་བཙོས་རབ་ཏུ་བསམས།། 46

བདུད་ལ་ཕྱོགས་དེ་ངེས་སྨྲས་པ། ཁྱོད་ནི་མཁས་པས་བདག་ཆོམ་སྟེ།
ཀྱེ་མ་གར་དང་ཀྱེ་མ་གླུ། མཆོག་ཉིད་ཁོ་ན་ཅི་ཞིག་བཟོད།། 47

ཅེས་བརྗོད་འབྲིང་བའི་ཁྲོལ་གྱིས་ནི། རོ་ནི་གསུམ་དག་དེ་ལ་བཏགས།
མགོ་ལ་སྤྲུལ་གྱི་རོ་དང་ནི། མགྲིན་པར་མི་དང་ཁྱི་ཡིའོ།། 48

བདུད་དེས་རོ་ནི་གསུམ་པོ་དེ། རང་གིས་དགྲོལ་བར་མ་ནུས་ནས།
དབང་པོ་ཉེ་དབང་གདོང་བཞི་དང་། བཅས་པའི་ལྷ་ལ་སྐྱབས་སུ་སོང་། 49

དེས་གྲོལ་བར་མ་ནུས་ཚེ། པདྨ་སྐྱེས་ཀྱིས་རབ་བསྐུལ་ཏེ།
དེ་ནས་རྫོགས་པ་ཉམས་པའི་བདུད། དེ་ཉིད་ལ་ནི་སྐྱབས་སུ་སོང་།། 50

ཤིན་ཏུ་དུལ་བས་ཉེར་སྦས་ཀྱིས། ཀང་པ་དག་ལ་དེས་གདུགས་ཏེ།
རྒྱུགས་པ་བཏང་ནས་རབ་དང་བས། ཐལ་སྦྱར་དེ་ལ་རབ་སྨྲས་པ།། 51

स कृत्वा हार्यसौन्दर्य्यं ललितं नर्त्तकीवपुः ।
ननर्त्त सहितस्तत्र गन्धर्वाप्सरसाङ्गणैः ॥ ४४ ॥

कान्तानृत्यविलासेन हेलापहृतचेतसाम् ।
अभूत्तत्र विनेयानां कामं काममयं मनः ॥ ४५ ॥

अविनीततरस्याथ मारस्य विनयोद्यतः ।
अचिन्तयद्विकारार्हा मुपगुप्तः प्रतिक्रियाम् ॥ ४६ ॥

सोऽभ्येत्य मारमवदत्तुष्टोऽहं तव कौशलात् ॥
अहो नृत्यमहो गीतं दिव्यमेव किमुच्यते ॥ ४७ ॥

उक्तेति मालाव्याजेन बबन्धास्य शवत्रयम् ।
मस्तके सर्पकुणपं कर्णे च श्वमनुष्ययोः ॥ ४८ ॥

स्वयं मोक्तुमशक्तोऽसौ मारस्तत्कुणपत्रयम् ।
प्रययौ शरणं देवान् सेन्द्रोपेन्द्रचतुर्मुखान् ॥ ४९ ॥

तेषु मोक्तुमशक्तेषु प्रेरितः पद्मजन्मना ।
भग्नदर्पोऽथ कन्दर्प स्तमेव शरणं ययौ ॥ ५० ॥

स निपत्यातिविनयादुपगुप्तस्य पादयोः ।
प्रसाद्य मदमुत्सृज्य तमुवाच कृताञ्जलिः ॥ ५१ ॥

གནོད་པ་བྱས་པ་བདག་ལ་ནི། ཡང་དག་འོས་པ་ཁྱོད་ཀྱིས་བྱས།
ད་ནི་ཁྱོད་ལ་བདག་བརྙེན་པས། ཁྲོ་བ་སྤོང་ལ་བཀའ་དྲིན་མཛོད།། 52

བདག་གིས་གནོད་པ་བྱས་མོད་ཀྱང་། བདེ་གཤེགས་བདག་ཉིད་ཆེན་པོ་ཡིས།
བུ་ནི་རྣམ་པར་མ་དུལ་བ། ཕ་ཡིས་བཞིན་དུ་རབ་དུ་བསྐྱངས།། 53

བྱང་ཆུབ་སྙིང་པོར་རྡོ་རྗེའི་གདན། བསྙེན་པ་དེ་ལས་བདག་གིས་སྤྲོན།
གནོད་པ་ཡིས་ནི་ཚོགས་དག་བྱས། དེ་ཡིས་བདག་ལ་བཟོད་པ་ཉིད།། 54

བྱང་ཆུབ་དིང་འཛིན་གྲུབ་པའི་གནས་དེར་སྐྱིལ་ཀྱང་དག་ནི་བཅས་ནས་གནས་པའི་ཚེ།
རྣམ་འགྱུར་རྣམ་པ་སྣ་ཚོགས་བྱེད་པ་བདག་ལ་ར་བ་ཉིད་ནི་འཛིན་བྱེད་ཅིང་།
ཁྲོ་བ་བཟོད་པས་བཀུས་པའི་སངས་རྒྱས་བཅོམ་ལྡན་དག་པ་ཉིད་ཀྱི་བདག་ཉིད་ཅན།
བསམ་གཏན་མཆོག་ཏུ་སྐྱོང་བར་བྱེད་པ་དེ་ཡི་སྤྱན་ཡང་ཟུང་ཟད་ཁྲེ་མ་ཡིན།། 55

ཁྱོད་ཀྱིས་སྙིང་རྗེ་བཏང་ནས་རིང་། བདག་ནི་རབ་ཏུ་སྨད་པར་བྱས།
གནོད་བྱེད་ལ་ཡང་ཆེན་པོ་ཡིས། ཡིད་ནི་ཁྲོ་བའི་དྲི་ལྡན་མིན།། 56

བདག་ལ་རོ་དག་བདགས་པ་སྤོང་། ཁྱོད་ཀྱི་བཀའ་ལ་བདག་གནས་སོ།
དུལ་བས་དེ་སྐད་སྨྲ་བྱེད་པ། དེ་ལ་ཉེར་སྨྲས་ཀྱིས་སྨྲས་པ།། 57

གལ་ཏེ་སྨྲར་ཡང་ཉེར་འཚོ་ཁྱོད། དགེ་སློང་རྣམས་ལ་མི་བྱེད་ན།
ཁྱོད་ལ་བརྟན་པར་བཅིངས་པ་ཡི། རོ་འདི་དག་ནི་བདག་གིས་དགྲོལ། 58

कृतं कृतापकारस्य त्वया यदुचितं मम ।
प्रसीद त्यज्यतां मन्युरधुनाहं त्वदाश्रयः ॥ ५२ ॥

अहं कृतापराधोऽपि सुगतेन महात्मना ।
अविनीततरः सूनुर्जनकेनेव रक्षितः ॥ ५३ ॥

बोधिमूले मया तस्य वज्रासनयुषः पुरा ।
कृता निकारनिकराः क्षान्तमेव च तेन मे ॥ ५४ ॥

नानाकारनिकारकारिणि मयि प्राकारतां बिभ्रता
तस्मिन् बोधिसमाधिसिद्धिभवने पर्य्यङ्कबन्धस्थितौ ।
क्षान्तिक्षालितमन्युना भगवता बुद्धेन शुद्धात्मना
तेन ध्यानपरायणेन न मनागुन्मीलितं लोचनम् ॥ ५५ ॥

भवता त्वद्य करुणामुत्सृज्याहं खलीकृतः ।
सापराधेऽपि महतां न मन्युमलिनं मनः ॥ ५६ ॥

मुञ्च मे कुणपाबन्धं स्थितोऽहं तव शासने ।
इति ब्रुवाणं प्रणयादुपगुप्तस्तमभ्यधात् ॥ ५७ ॥

न करिष्यसि चेदेवं भिक्षूणां विप्लवं पुनः ।
तदेतत्तव मुञ्चामि दृढं कुणपबन्धनम् ॥ ५८ ॥

གུས་ལྡན་བདག་ལ་དགའ་བ་ནི། འདི་ཡང་ཁྱོད་ཀྱིས་རབ་ཏུ་བྱ།
འདས་པའི་བདེ་གཤེགས་རྣམ་པ་ནི། ཁྱོད་ཀྱིས་ཡང་དག་བསྙེན་པར་འོས། ||59

ཀུན་གྱི་རྗེས་མཐུན་ཁྱོད་ཀྱིས་ནི། ཟློས་གར་ཉམས་པ་བདག་གིས་མཐོང་།
བཅོམ་ལྡན་འདས་ནི་མཐོང་བ་དག། བདག་ནི་མཆོག་ཏུ་འདོད་པར་གྱུར།། 60

བདེ་གཤེགས་ཀྱི་ནི་ཆོས་ཀྱི་སྐུ། ཐོས་པའི་བདག་ཉིད་བདག་གིས་མཐོང་།
ངེས་པར་མིག་གི་བདུད་རྩིའི་རྒྱུན། གཟུགས་ཀྱི་སྐུ་དེ་མ་ཡིན་ནོ།། 61

ཞེས་བརྗོད་དེ་ཡི་རོ་དག་ནི། བཀྲོལ་བ་མེ་ཏོག་མཆོད་ཅན་གྱིས།
དེ་ལ་སྨྲས་པ་བདེ་གཤེགས་ཀྱི། གཟུགས་དང་མཚུངས་པར་བྱེད་མི་ནུས།། 62

དེ་ལྟ་ན་ཡང་ཁྱོད་ཀྱི་བཀའ། འདུལ་བ་ལ་གནས་བདག་གིས་བསྟན།
ཁྱོད་ཀྱིས་བདག་ནི་བདེ་གཤེགས་དབྱིབས། ཕྱག་འོས་ལ་ཡང་ཕྱག་མི་བྱ།། 63

ཞེས་བརྗོད་བདེ་གཤེགས་རྣམ་པ་ནི། རྣམ་པ་ཀུན་ཏུ་བདེ་སྟེར་ཞིང་།
གསེར་གྱི་སྣང་བ་རབ་ཏུ་སྤྲོ། མཛེས་པ་དག་ནི་དེ་ཡིས་བསྟན།། 64

སྤྱན་ནི་ཟུང་དག་རིང་ཞིང་བསམ་བདུན་ལ་ཆགས་སྐྱིན་མའི་ཁྲི་ཤིང་རྣམ་
འགྱུར་བྲལ།
ཤངས་ཀྱི་རྒྱུད་ནི་མཛེས་པར་ཆགས་ཤིང་གསེར་གྱི་གདུགས་དང་མཚུངས་
པའི་མཚན་མ་ཅན།
རྒྱན་མེད་སྙན་གྱི་ཞགས་པ་རིང་ཞིང་མཛེས་ལ་ཕྱག་གི་ལྷོན་པ་ཀུན་ཏུ་འཕྱང་།
སངས་རྒྱས་ཀྱི་ནི་གཟུགས་དག་མཐོང་ན་བསམ་པ་མེད་པ་རྣམས་ཀྱང་དགའ་
བར་གྱུར།། 65

इदं च भवता कार्यं प्रियं प्रणयिनो मम ।
अतीतसुगताकारं सन्दर्शयितुमर्हसि ॥ ५९ ॥

दृष्टा तव मया शक्तिर्नाट्ये सर्वानुकारिणः ।
सन्दर्शने भगवतः परमुत्कण्ठितो ह्यहम् ॥ ६० ॥

धर्मकायो मया दृष्टः सुगतस्य श्रुतात्मना ।
रूपकायस्तु नैवासौ नयनामृतनिर्भरः ॥ ६१ ॥

इति निर्मुक्तकुणपस्तेनोक्तः कुसुमायुधः ।
तमूचे सौगतं रूपं तुल्यं कर्तुं न शक्यते ॥ ६२ ॥

तथापि दर्शयाम्येष त्वदाज्ञाविनये स्थितः ।
प्रणम्येन प्रणम्योऽहं न त्वया सुगताकृतिः ॥ ६३ ॥

इत्युक्त्वा सुगताकारमविकारसुखप्रदम् ।
स समुत्सृष्टकनकालोककान्तमदर्शयत् ॥ ६४ ॥

दीर्घध्याननिमीललोचनयुगं निःसम्भ्रमभ्रूलतम्
नासावंशनिषक्तकान्तकनकच्छायोपमानालिकम् ।
निर्भूषायतकर्णपाशललितं व्यालम्बिबाहुद्रुमम्
बौद्धं रूपमवेक्ष्य निर्वृतिरभून्निश्चेतनानामपि ॥ ६५ ॥

བཅོམ་ལྡན་སྐུ་ནི་མཛེས་པ་དེ། མཐོང་ནས་ཉེར་སྦས་མཆི་མ་དང་།
བཅས་ཤིང་སྤྱི་བོང་གུས་པ་ཡིས། དེ་ཡི་ཞབས་ལ་ཕྱག་དག་བྱས།། 66

ངེས་པར་བདག་གི་ཕྱག་འོས་མིན། ཞེས་པ་ཡིད་སྐྱབས་སྨྲ་བྱེད་ཚེ།
དེ་ལ་ཉེར་སྦས་ཀྱིས་སྨྲས་པ། རྒྱལ་བའི་རྣམ་པ་ཁྱོད་ཕྱག་འོས།། 67

བཅོམ་ལྡན་སྐུ་ནི་བཅོས་མ་ཡི། གཟུགས་རྣམས་ལ་ཡང་ཕྱག་བྱར་འོས།
མཁས་པ་རྣམས་ནི་ས་ཤིང་དང་། ཁམས་ལ་ཕྱག་དེ་བྱེད་པ་མིན།། 68

ཉེར་སྦས་ཀྱིས་ནི་འདི་བརྗོད་པ། རབ་དང་བློ་ལྡན་བདུད་ཀྱིས་ཐོས།
བདེ་གཤེགས་གཟུགས་ནི་ཡོངས་བཏང་སྟེ། རང་གི་གཟུགས་སུ་རབ་ཏུ་བསྟན།། 69

དེ་ནས་དུལ་ཞིང་ཕན་པ་འཚོལ། དེ་ཡིས་ཡང་དག་བོས་པ་ཡི།
གྲོང་ཁྱེར་པ་རྣམས་དམ་པའི་ཆོས། ཉན་དུ་ཉེར་སྦས་དྲུང་དུ་འོངས།། 70

དེ་ཡི་མན་ངག་གདམས་གྱིས་ནི། བདེན་པ་མཐོང་ཞིང་དགའ་བ་ཡིས།
གྲོང་ཁྱེར་ན་གནས་འབུམ་ཕྲག་ནི། བཅོ་བརྒྱད་དགྲ་བཅོམ་ཐོབ་པར་འགྱུར།། 71

དེ་ལྟར་འཇིག་རྟེན་མཐའ་དག་དགེ་བ་དག་གིས་སྣང་བྱེད་ཅིང་།
རབ་རིབ་འཕྲོག་པར་བྱེད་པས་ཆོས་ཀྱི་ལམ་གྱི་མན་ངག་བསྒྲུབས།
རྒྱ་ཆེ་དགེ་བའི་རྩ་བས་བསོད་ནམས་རྒྱས་པ་ཐོབ་རྣམས་ཀྱིས།
རྫུ་འཕྲུལ་ཆེན་པོ་གང་དེ་གཞན་ལ་ཕན་པའི་དོན་དུ་གྱུར།། 72

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཉེར་སྦས་ཀྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་གཉིས་པའོ།།

उपगुप्तस्तदालोक्य कान्तं भगवतो वपुः ।
सबाष्पपुलकाकीर्णश्चक्रे तत्पादवन्दनम् ॥ ६६ ॥

नच नाम प्रणम्योऽहमिति वादिनि मन्मथे ।
उपगुप्तस्तमवदत् प्रणम्यस्त्वं जिनाकृतिः ॥ ६७ ॥

रुचिमेष्वपि बिम्बेषु वन्द्या भगवतस्तनुः ।
न स मृत्काष्ठधातूनां प्रणामः क्रियते बुधैः ॥ ६८ ॥

इत्युक्तमुपगुप्तेन श्रुत्वा मारः प्रसन्नधीः ।
विहाय सौगतं रूपं स्वं वपुः प्रत्यपद्यत ॥ ६९ ॥

तेनैवाथ समाहूता विनीतेन हितैषिणा ।
उपगुप्तान्तिकं पौराः सद्धर्मं श्रोतुमाययुः ॥ ७० ॥

तस्योपदेशकथया सत्यदर्शननिर्वृताः ।
लक्षाण्यष्टादश प्रापुरर्हत्त्वं पुरवासिनाम् ॥ ७१ ॥

इति सकललोकालोक कल्याणकारी
व्यथिततिमिरहारी धर्ममार्गोपदेशः ।
विपुलकुशलमूलप्राप्तपुण्योदयानां
भवति किल महर्द्धिर्या परेषां हिताय ॥ ७२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायामुपगुप्तावदानं नाम द्वासप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་གསུམ་པ།

ཉམས་པ་མེད་པའི་བཀའ་དང་ཡངས་པའི་དཔལ།
གྲགས་པ་བསིལ་ཟེར་བྱེད་པ་བརྒྱ་ལྟར་དཀར།
ངོ་མཚར་སྤྱོད་པས་མཛེས་པའི་མཐུ་དག་ནི།
བདེ་གཤེགས་མཆོད་པའི་འབྲས་བུ་ཆ་ཤས་ཡིན།། 1

གྲོང་ཁྱེར་པ་ཊ་ལི་པུ་ཏྲར། རྒྱལ་པོ་དཔལ་ལྡན་མྱ་ངན་མེད།
བྱུང་སྟེ་གང་གིས་སྦྱིན་པ་དོན། གྲངས་ཀྱི་སྟཱུ་ཡི་དབུལ་བར་གྱུར། 2

ནམ་ཞིག་མདུན་སར་འཁོད་དེ་ལ། ཚོང་པ་གླིང་དུ་འགྲོ་བ་པོ།
བདོག་ཀུན་ཉམས་པའི་མྱ་ངན་གྱིས། གཟིར་ཅིང་ཤུགས་རིང་ལྡན་པས་ཞུས།། 3

དབྱུང་བའི་གྲིབ་མ་རིང་པོ་ལ། སྲིད་པ་ངལ་གསོ་ལྷ་ཁྱོད་ཀྱིས།
རྒྱལ་སྲིད་དག་ན་འགའ་ཞིག་ཀྱང་། རེ་བ་བསམས་པས་གཟིར་བ་མཐོང་།། 4

སྐལ་བ་ཉམ་ཆུང་འབའ་ཞིག་ལས། རྒྱ་མཚོར་གནས་པའི་ཀླུ་རྣམས་ཀྱིས།
བདག་ཅག་རྣམས་ཀྱི་གཟིངས་བཅག་ནས། རིན་ཅན་ནོར་རྣམས་ཕྲོགས་པར་གྱུར།། 5

བདག་ཅག་རྣམས་ནི་གཞན་དུ་འཚོ། ཁྱབ་བདག་དེ་ལ་བཏང་སྙོམས་ན།
རྒྱ་མཚོར་འགྲོ་བ་ཆད་པ་ལས། ཁྱོད་ཀྱི་མཛོད་ཉིད་སྐམ་པར་སྐྱུར།། 6

अथ चिसप्ततितमः पल्लवः ।

अखण्डितं शाशन मायता श्रीः
यशस्तुषारांशुशतावदातम् ।
आश्चर्य्यचर्य्यारुचिरः प्रभावः
फलांशलेशः सुगतार्च्चनस्य ॥ १ ॥

राजा श्रीमानशोकोऽभूत्पुरे पाटलिपुत्रके ।
दानार्थिनामभूद् यस्य संख्याशब्ददरिद्रता ॥ २ ॥

तं कदाचित् सभासीनं वणिजो द्वीपगामिनः ।
सर्वस्वनाशशोकार्ताः सनिश्वासा व्यजिज्ञपुः ॥ ३ ॥

देव दीर्घभुजच्छायाविश्रान्तभुवनस्य ते ।
राज्ये न दृश्यते कश्चिच्चिन्तासन्तापिताशयः ॥ ४ ॥

अस्माकं तु प्रवहणं भंक्ता रत्नधनं हृतम् ।
केवलं भाग्यदौर्बल्यान्नागैः सागरवासिभिः ॥ ५ ॥

वयमन्यत्र जीवामस्तदुपेक्षा तु ते विभो ।
समुद्रयात्राविच्छेदात् कोशशेषविधायिनी ॥ ६ ॥

ཅེས་པ་དེ་དག་ཚིག་ཐོས་ནས། དེ་དག་གདུང་བ་འཕོས་པ་ཡིས།
རྒྱལ་པོས་རྒྱ་མཚོར་སོང་བའི་སྐུ། རྣམ་པར་བསམས་ནས་གཡོ་མེད་གྱུར།། 7

ཡིད་ནི་ཁྲོ་བས་འཁྲུགས་གྱུར་ཅིང་། བཅོས་ཐབས་མེད་པ་དེ་མཐོང་ནས།
དྲང་གནས་མངོན་ཤེས་དྲུག་པ་ཡི། དགེ་སློང་དབང་པོ་ཞེས་པས་སྨྲས།། 8

རིན་ཅན་ཀུན་པོ་སྐུ་རྣམས་ལ། ཁྲོད་མཐུ་མི་ནི་གོ་བྱེད་པ།
ཟངས་ཀྱི་གླེགས་བུ་ལ་བཀོད་པའི། སྤྲིང་ཡིག་ས་བདག་སྤྲིང་བར་མཛོད།། 9

ཅེས་པ་དགེ་སློང་ཚིག་ཐོས་ནས། རྒྱལ་པོ་ཡིས་ནི་སྤྲིང་ཡིག་སྤྲིངས།
ཆུ་གཏེར་དག་ཏུ་འཕངས་པ་དེ། སྐུ་རྣམས་ཀྱིས་ནི་ངོགས་སུ་འཕངས།། 10

མ་བཀུར་པ་དེས་མི་བདག་ནི། བཞིན་གྱི་ཆུ་སྐྱེས་མཛེས་བྲལ་ཞིང་།
བསམ་པས་བློ་ཉལ་དབུགས་འབྱིན་ཅིང་། སྐྲ་མ་སེར་མོ་བཀོད་དེ་གནས།། 11

མ་ཉིད་ལ་ནི་བུད་མེད་བཞིན། དེ་ལ་གཅིད་ནི་ཕྱིར་ཕྱོགས་གྱུར།
བཀྲམ་ཆགས་ཅན་གྱི་སྲིད་པ་ནི། རིང་བཞིན་མཚན་མོ་ཟད་མ་གྱུར།། 12

གཞན་དོན་སྦྱོར་ལྡན་དེ་ལ་ནི། ནམ་མཁའི་ལྷ་སེམས་མངོན་ཕྱོགས་སྨྲས།
ས་སྐྱོང་ཐབས་ནི་ཡོད་པ་ལ། བསམ་པ་བྱ་བར་མི་འོས་སོ།། 13

གང་ཞིག་ཕྱུག་འཚལ་ཡོངས་སུ་བསྡུ་བས་ཆེར་འོས་བསོད་ནམས་ཅན།
ཀྱི་ཏོ་ཐ་པ་མོ་སྦྱར་བས་མཚན་པས་རྒྱལ་བ་མཆོད་བྱེད་པ།

इति तेषां वचः श्रुत्वा राजा संक्रान्ततद्भयः ।
समुद्रान्तर्गतान् नागान् विचिन्त्य स्तिमितोऽभवत् ॥ ७ ॥

तं दृष्ट्वा निष्प्रतीकारकोपव्याकुलमानसम् ।
इन्द्रो नामाब्रवीद् भिक्षुः षडभिज्ञः स्थितोऽन्तिके ॥ ८ ॥

नागानां रत्नचौराणां त्वत्प्रतापाग्निसूचकः ।
ताम्रपट्टार्पितो लेखः प्रेष्यतां पृथिवीपते ॥ ९ ॥

इति भिक्षुवचः श्रुत्वा लेखं राजा विसृष्टवान् ।
क्षिप्तमेव तमम्भोधौ नागास्तीरे प्रचिक्षिपुः ॥ १० ॥

नृपस्तेनावमानेन विच्छायवदनाम्बुजः ।
चिन्तासुप्तमतिस्तस्थौ श्वसन्नासार्पिताङ्गुलिः ॥ ११ ॥

निद्रा पराङ्मुखी तस्य क्लीबस्येवाङ्गनाभवत् ।
दीर्घा तृष्णेव लुब्धस्य न च रात्रिः क्षयं ययौ ॥ १२ ॥

तं व्योमदेवताभ्येत्य परार्थोद्यतमभ्यधात् ।
उपाये सति भूपाल न चिन्तां कर्तुमर्हसि ॥ १३ ॥

ये पूजयन्ति जिनमञ्जलिरञ्जितेन
मूर्ध्ना प्रणामपरिणाममहार्हपुण्याः ।

རྣམ་པར་རྒྱལ་ལྡན་དེ་དག་བཀའ་ཡི་འཕྲེང་བ་རྣམ་བཀྲ་ཞིང་།
དངོས་པོ་མཆོག་གི་མཛེས་པ་ལྷ་རྣམས་ཀྱིས་ཀྱང་སྤྱི་བོར་འཛིན།། 14

དེ་ཕྱིར་ནང་པར་མི་བདག་ནི། ཁྲུས་བྱ་བརྟུལ་ཞུགས་གཙང་ལྡན་པས།
དག་པའི་ཡིད་ཀྱིས་སངས་རྒྱས་ནི། བསམས་ནས་གྲུབ་སྣད་རབ་སྤྲས་པ།།
15

སྐྱིཿ་སྟོབས་ཀྱིས་འཛུམ་རི་ལྡན་སྙིང་རྗེ་ཟླ་བའི་འོད་ཀྱི་རི་བ་སྤྱོང་།
མཛེས་པའི་མཐའ་དག་སྲུན་པ་ཞི་སྐྱད་དཀར་པོ་འི་ཕྱོགས་ལ་རྣམ་པར་གནས།
རྟག་ཏུ་ཀུན་དགའ་རྣམ་འགྱུར་མེད་ཅིང་མཆོག་གི་བདུད་རྩི་རྣམ་པར་སྤྲོ།
གདུང་བ་རབ་ཞིའི་གྲོགས་པོ་སངས་རྒྱས་ཟླ་ཉའི་གཟུགས་ལ་ཕྱག་འཚལ་ལོ།།
16

གང་ཞིག་རྟག་ཏུ་ཡུལ་གྱི་སྐྱོན་ལས་ཕྱི་རོལ་ཕྱོགས་གྱུར་ཅིང་།
རབ་སངས་ཕ་རོལ་ཕྱིན་པ་བརྟེན་པའི་སེམས་ནི་དབང་གྱུར་པ།
གཞན་ཕན་དག་ལ་མཆོག་ཏུ་མངོན་ལྡན་རྟེན་ཅིང་ཀུན་རྟོག་གི།
དཔག་བསམ་ལྗོན་པ་དག་བདག་ལ་དགེ་བར་སྟེར་གྱུར་ཅིག།། 17

ཅེས་པ་ས་ཡི་བདག་པོ་ཡི། སྨོན་ལམ་གསུས་པ་སྒྲུབ་བྱེད་ཀྱིས།
དགྲ་བཅོམ་སྟོང་ཕྲག་དྲུག་ཅུ་ནི། ཕྱོགས་རྣམས་དག་ལ་མྱུར་བར་བྱོན།། 18

དེ་ནས་དགེ་སློང་དབང་པོ་ཡིས། གཅིག་ནི་མི་བདག་མཚུངས་པ་དང་།
གཞན་པ་གླུ་ཡི་རྒྱལ་པོ་ཡི། རྣམ་པ་གསེར་གྱི་རང་བཞིན་བྱས།། 19

तेषां सुरा अपि सुवर्णविचित्रशोभा
माज्ञास्रजं विजयिनां शिरसा वहन्ति ॥ १४ ॥

एतदाकर्ण्य नृपतिः प्रातः स्नातः शुचिव्रतः ।
सिद्धौ शुद्धेन मनसा ध्यात्वा बुद्धं समभ्यधात् ॥ १५ ॥

सत्त्वस्मेरं सरसकरुणाकौमुदीपूरिताशम्
शान्त्यै कान्तं सकलतमसां शुक्लपक्षे निविष्टम् ।
नित्यानन्दं परमममृतं निर्विकारं सृजन्तम्
वन्दे तापप्रशमसुहृदं बुद्धपूर्णेन्दुबिम्बम् ॥ १६ ॥

चित्तं सदा विषयदोषपराङ्मुखानाम्
येषां वशे परमपारमिताश्रयाणाम् ।
ते मे परं परहिताभिनिवेशभाजः
सङ्कल्पकल्पतरवः कुशलं दिशन्तु ॥ १७ ॥

इति भक्तिविधानेन प्रणिधानेन भूपतेः ।
सहस्राण्यर्हतां षष्टिस्तूर्णं दिग्भ्यः समाययुः ॥ १८ ॥

अथेन्द्रो भिक्षुराकारं हैमं रम्यमकारयत् ।
सदृशं नृपतेरेकं नागराजस्य चापरम् ॥ १९ ॥

དེ་ནས་དཔལ་བྲུ་དཔལ་བྲུ་ཡིས། ས་བདག་གཟུགས་ནི་དམའ་བ་དང་།
སྐུ་ཡི་དབང་པོའི་གཟུགས་དག་ནི། ཡ་མཚན་བྱེད་པ་མཐོ་བར་གྱུར། 20

ཇི་ལྟ་ཇི་ལྟར་མི་བདག་གིས། རྟག་ཏུ་དཀོན་ཅོག་གསུམ་མཆོད་བྱས།
དེ་ལྟ་དེ་ལྟར་སྐུ་ཡི་གཟུགས། དམའ་ཞིང་གཞན་པ་མཐོ་བར་གྱུར།། 21

དེ་ནས་རྒྱལ་པོས་སྤྲིང་ཡིག་སྐུར། སྤྲིངས་ཚེ་སྐུ་ཡི་གང་ཟག་རྣམས།
མ་ལུས་ཚོང་པའི་རིན་ཆེན་ཁྲར། ཕྲག་ལ་བཀོད་ནས་འོངས་པར་གྱུར།། 22

མ་ལུས་ནོར་དེ་མི་བདག་གིས། ཚོང་དཔོན་རྣམས་ལ་རབ་ཏུ་བྱིན།
སྐུ་རྣམས་བདང་ནས་རྒྱལ་བ་ཡི། བསྟན་ལ་གུས་དང་བཅས་པར་གྱུར།། 23

མི་བདག་ལ་འོས་ཉེར་སྤྱད་ཀྱིས། དགྲ་བཅོམ་རྣམས་ལ་མཆོད་པ་བསྒྲུབས།
ཀུན་ཏུ་རྟོག་པ་མི་ཆུང་བས། སངས་རྒྱས་བལྟ་བར་འདོད་པར་གྱུར།། 24

ཡོངས་སུ་མྱ་ངན་འདས་གྱུར་པས། རྒྱལ་བ་མཐོང་བ་རྙེད་དཀའི་ཚེ།
ཡོན་ཏན་གྱིས་ནི་ཉེར་སྨྲས་དང་། བདེ་གཤེགས་མཚུངས་པར་དེ་ཡིས་ཐོས།། 25

གུས་དང་ལྡན་པའི་དབང་གྱུར་ཅིང་། མཛོད་ལ་མཉེས་གཤིན་འགྲོ་ཚེ་ན།
གནས་པ་དེ་ནི་མི་བདག་གིས། གུས་པས་ཕོ་ཉ་དག་གིས་བོས།། 26

དམ་ཆོས་དགེ་བ་རྒྱས་པ་ནི། ཡོངས་རྫོགས་དེ་ཡི་མཆོད་པས་ཐོབ།
རྟག་ཏུ་དཀོན་ཅོག་གསུམ་པོ་ནི། རྒྱལ་པོའི་དཔུང་གཉེན་དག་ཏུ་གྱུར།། 27

ततः क्षितिपतेर्मूर्त्तिर्विननाम शनैः शनैः ।
उन्ननाम च नागेन्द्रमूर्त्तिर्विस्मयकारिणी ॥ २० ॥

यथा यथा नृपश्चक्रे सदा रत्नत्रयार्चनम् ।
तथा तथा नागमूर्त्तिर्विननामोद्ययौ पुरा ॥ २१ ॥

अथ राज्ञा पुनर्लेखे प्रहिते नागपुङ्गवाः ।
स्कन्धार्पिताखिलवणिग्रत्नभाराः समाययुः ॥ २२ ॥

तदशेषं नरपतिर्वितीर्य्य वणिजां धनम् ।
विसृज्य नागानभवज्जिनशासनसादरः ॥ २३ ॥

स विधायार्हतां पूजामुपचारैर्नृपोचितैः ।
बभूवानल्पसङ्कल्पैर्बुद्धसंदर्शनोत्सुकः ॥ २४ ॥

दुर्लभे परिनिर्वाणनिलीनजिनदर्शने ।
उपगुप्तं स शुश्राव सुगतप्रतिमं गुणैः ॥ २५ ॥

विधेयं भक्तियुक्तानां नृपः प्रणयिवत्सलः ।
उरुमुण्डस्थितं दूतै रानिनाय तमादरात् ॥ २६ ॥

तत्सपर्य्याप्तपर्य्यन्तसद्धर्मकुशलोदयः ।
बभूव सततं राजा रत्नत्रयपरायणः ॥ २७ ॥

དེ་ལྟར་རྒྱལ་བ་དྲན་པས་ས་ཡི་བདག་པོ་དག།
རབ་རྒྱས་བསོད་ནམས་ཆེ་བར་དར་བ་ཕུན་ཚོགས་ཀྱིས།
བཀའ་ནི་མི་ཏོག་འཕྲེང་བར་གྱུར་པའི་རྩེ་དགའ་དག།
དུག་འཛིན་རྣམས་ཀྱི་མགོ་བོ་ལ་ཡང་ཐོབ་པར་གྱུར།། 28

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཀླུ་ལ་སྦྱིངས་པའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་གསུམ་པའོ།

इति जिनस्मरणेन महीपतिः
प्रसभपुण्यमहोदयसम्पदा ।
विषभृतामपि मौलिषु शासनम्
कुसुमदामविलासमवाप्तवान् ॥ २८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्प-
लतायां नागदूतप्रेषणावदानं नाम
त्रिसप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་བཞི་པ།

གང་ཞིག་སྦྱིན་ལ་བརྩོན་པས་འཕྲལ་ལ་དགའ་བ་གླང་ཆེན་བཞིན།
ཡན་ལག་རྫོགས་ཤིང་མཛེས་སྡུག་རྒྱས་ལ་རྒྱ་ཆེ་དབུས་ཀྱི་ཕྱོགས།
ས་ནི་རང་གི་མཆིས་ག་ཤིན་དང་བཅས་རབ་ཏུ་སྟེར་བྱེད་པ།
དེ་དག་བསོད་ནམས་རབ་སྨིན་ལམ་དུ་ཇི་ལྟར་འགྲོ་མ་ཡིན།། 1

དེ་ནས་ས་བདག་མྱ་ངན་མེད། སྦྱིན་ལ་ཤིན་ཏུ་ཆེར་གོམས་པས།
སློང་བ་ཕྱོགས་ནས་འོངས་རྣམས་ཀྱི། དཔག་བསམ་ཤིང་ཉིད་དག་ཏུ་གྱུར།། 2

རྟག་ཏུ་རྒྱལ་པོ་ལ་འོས་པའི། ཟས་དང་གོས་དང་རྒྱན་རྣམས་ཀྱིས།
ཁྱིམ་དུ་དགེ་སློང་འབུམ་ཕྲག་གསུམ། གུས་ཤིང་གཙང་བ་དག་གིས་མཆོད།། 3

གསེར་ནི་བྱེ་བ་བརྒྱ་སྟེར་བ། གང་གི་ལུགས་ལ་ངེས་པར་གྱུར།
དགེ་བ་ལྡན་པའི་སྙིང་སྟོབས་ཉིད། ཤིན་ཏུ་ཟད་པ་མེད་པའི་མཛོད། 4

རྒྱལ་སྲིད་ཆེ་ལ་འབྱོར་མ་དེས། སྙིང་སྟོབས་བློ་ཡིས་དགེ་འདུན་ལ།
ལོ་ནི་སུམ་ཅུ་དྲུག་གི་གསེར། བྱེ་བ་དགུ་བཅུ་རྩ་དྲུག་ཕུལ།། 5

དེ་ནས་དུས་ཀྱི་མི་བདག་ནི། ནད་ཀྱིས་ཐེབས་པ་ཉིད་དུ་གྱུར།
ལུས་ཅན་རྣམས་ཀྱི་ལེགས་བྱས་ཉིད། བརྟན་པ་ཡིན་གྱི་ལུས་ནི་མིན།། 6

ལུས་ནི་མཐའ་ལ་ཉེ་བ་ཉིད། ངས་ནས་ས་ཡི་དག་པོ་ཡིས།
བྱ་གག་ཀུན་རར་དགེ་སློང་ལ། ནོར་ནི་འབུལ་བར་རྩོམ་པར་གྱུར།། 7

पुण्यं प्रणामपथमेति कथं न तेषाम्
दानोद्यताः सपदि गामिव लीलयैव ।
पूर्णाङ्गपुण्यरुचिरां पृथुमध्यदेशां
ये गां स्ववत्ससहितां प्रतिपादयन्ति ॥ १ ॥

अथाशोकः क्षितिपति र्दानाभ्यासेन भूयसा ।
अभ्यागतप्रणयिनां प्रययौ कल्पवृक्षताम् ॥ २ ॥

राजोचितैः स सततं भोजनाभरणाम्बरैः ।
भिक्षुलक्षत्रयं गेहे भक्तिपूजैरपूजयत् ॥ ३ ॥

हेमकोटिशतं दातुं स्थिरोऽभूद्यस्य निश्चयः ।
सत्त्वमेव स्थिरतरः कोशः कुशलशालिनाम् ॥ ४ ॥

साम्राज्ये भूरिविभवः षड्विंशद्भिः स वत्सरैः ।
हेम्नः षण्णवतिं कोटिं ददौ सङ्घाय सत्त्वधीः ॥ ५ ॥

ततः कालेन नृपति र्व्याधिना ग्लानिमाययौ ।
स्थिराणि सुकृतान्येव न शरीराणि देहिनाम् ॥ ६ ॥

तनुमासन्नपर्यन्तां निश्चित्य पृथिवीपतिः ।
भिक्षुभ्यः कुक्कुटारामे द्रविणं दातुमुद्ययौ ॥ ७ ॥

དེ་ཡི་ཚ་བོ་ཕུན་ཚོགས་ཅན། ཞེས་པས་ཆགས་སླད་མཛོད་སྤུང་ལ།
བསྐོས་པས་སྦྱིན་པའི་བསོད་ནམས་ལ། ཞུགས་པ་དེ་ཡི་བཀའ་དག་བཟློག། 8

ཚ་བོས་སྦྱིན་པ་བཀག་པའི་ཚེ། དགེ་བདུན་ལ་ནི་ས་བདག་གིས།
རང་སྐལ་ཉིད་དུ་གྱུར་པའི་སྨན། སྐྱུ་རུ་ར་ཡི་ཕྱེ་དག་ཕུལ། 9

དེ་ནས་སྔོན་པོ་སྔོ་ལྷན་ནི། མགུ་བྱེད་སྨྲས་པའི་གྲོས་དག་གིས།
དགེ་འདུན་ལ་ནི་ས་གཞི་དག། མ་ལུས་ས་ཡི་བདག་པོས་ཕུལ།། 10

གང་གཞི་ཆ་ཡི་དོ་ཤལ་མཛེས་ལྡན་རྒྱ་མཚོ་བཞི་ཡི་ནི།
རྦ་རླབས་སྐྱེ་རགས་ཡངས་ཤིང་མ་ལ་ཡ་ཡི་ཙ་རྒྱན་ཅན།
ནོར་འཛིན་མ་ཉིད་མ་ལུས་བྱིན་ནས་ཕན་པའི་སླད་དུ་ནི།
བསོད་ནམས་ཚད་ཀྱིས་དཔག་དང་བྲལ་བ་དེ་ཡིས་ཡང་དག་ཐོབ།། 11

དེ་ནས་གསེར་ནི་བྱེ་བ་དགུ་བཅུ་དྲུག་བྱིན་རབ་གྲགས་པ།
ཉི་ཡི་བདག་པོ་མཐྲི་རིས་སོང་ཚེ་དེ་ཡི་ཚ་བོ་ཡིས།
ས་དེ་གསེར་གྱི་ལྷག་མ་བྱེ་བ་ཕྲག་ནི་བཞི་རྣམ་གྲིས།
སྔོན་པོའི་ཚིག་གིས་གསལ་བར་རབ་དུ་ཉེས་དེ་བླངས་པར་གྱུར།། 12

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ས་གཞི་ཕུལ་བའི་རྟོགས་པ
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་བཞི་པའོ།།

तत्पौत्रः सम्पदी नाम लोभान्धस्तस्य शासनम् ।
दानपुण्यप्रवृत्तस्य कोशाध्यक्षैरवारयत् ॥ ८ ॥

दाने निषिद्धे पौत्रेण सङ्घाय पृथिवीपतिः ।
भैषज्यामलकस्यार्द्धं ददौ सर्व्वस्वतां गतम् ॥ ९ ॥

धीमतः संमतेनाथ राधगुप्तस्य मन्त्रिणः ।
ददौ सङ्घाय निखिलां पृथिवीं पृथिवीपतिः ॥ १० ॥

गङ्गाम्बुभाररुचिरां चतुरम्बुराशि-
वेलाविलासवसनां मलयावतंसाम् ।
दत्त्वाखिलां वसुमतीं स समाससाद
पुण्यं प्रमाणकलनारहितं हिताय ॥ ११ ॥

प्रख्यातषण्णवतिकोटिसुवर्णदाने
याते दिवं नरपतावथ तस्य पौत्रः ।
शेषेण मन्त्रिवचसा क्षितिमाजहार
स्पष्टं क्रयी कनककोटिचतुष्टयेन ॥ १२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पृथिवीप्रदानं चतुःसप्ततितमः पल्लवः ॥

ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་ལྔ་པའོ།

མ་རིག་པ་ཡི་རྩ་བ་ཅན། འཁོར་བའི་ལྗོན་པ་རྣམ་བཀྲ་ཀུན།
ཞེས་དང་བརྗོད་དང་གཞོམ་པར་ནི། ཀུན་མཁྱེན་མ་གདོགས་སུ་ཡིས་ནུས།། 1

མཉན་ཡོད་རྒྱལ་བྱེད་ཚལ་ན་སྟོན། བཞུགས་པའི་རྒྱལ་བ་དགེ་ལེགས་ཅན།
མ་ལུས་གཟིགས་པ་བཅོམ་ལྡན་གྱིས། དགེ་སློང་ཚོགས་ལ་བཀའ་སྩལ་པ།། 2

ཨེ་ཞེས་སྣང་བ་དྲི་མེད་ཀྱི། ཡིད་ཅན་དགེ་ལེགས་སྐད་དུ་ཉོན།
རྟེན་ཅིང་འབྲེལ་འབྱུང་བདག་གིས་ནི། ཁྱེད་ལ་རིམ་བཞིན་བཤད་པར་བྱ།། 3

མ་རིག་པ་ཡི་བག་ཆགས་འདི། འཁོར་བ་དུག་གི་ལྗོན་པ་ནི།
སྡུག་བསྔལ་ཕུང་པོ་ཆེན་པོ་ཡིས། རྩ་བ་འཆིང་བ་སྐྲུན་པར་བྱེད།། 4

དེ་ཡི་རྐྱེན་གྱི་འདུ་བྱེད་དེ། ལུས་ངག་ཡིད་ཀྱི་བདག་ཉིད་ཅན།
འདུ་བྱེད་ཀྱིས་བསྐྱུན་རྣམ་ཤེས་ཡིད། དབང་པོ་དྲུག་པོའི་བདག་ཉིད་ཅན།། 5

དེ་ཡི་རྐྱེན་གྱིས་མིང་དང་གཟུགས། མིང་དང་མཐོང་བ་ཞེས་བརྗོད་པའོ།
འདི་ལས་དྲུག་པ་ཡིད་དག་ཀྱང་། དབང་པོ་ལ་གནས་སྐྱེ་མཆེད་དྲུག།། 6

སྐྱེ་མཆེད་དྲུག་གིས་ཡང་དག་སྦྱོར། རེག་པ་ཞེས་ནི་མངོན་པར་བརྗོད།
རེག་པ་དྲུག་གི་ཉམས་མྱོང་གང་། དེ་ནི་ཚོར་བ་དག་དུ་གྲགས།། 7

सर्व्वमविद्यामूलं संसारतरुप्रकारवैचित्र्यम् ।
ज्ञातुं वक्तुं हन्तुं कः शक्नोत्यन्यच्च सर्व्वज्ञात् ॥ १ ॥

श्रावस्त्यां स्वस्तिमान् पूर्व्वं जिनो जेतवने स्थितः ।
अशेषदर्शी भगवान् भिक्षुसङ्घमभाषत ॥ २ ॥

शृणुत श्रेयसे प्रज्ञालोकनिर्मलमानसाः ।
प्रतीत्य समुत्पादं वः कथयामि यथाक्रमम् ॥ ३ ॥

अविद्या वासनैवेयं दुःखस्कन्धस्य भूयसः ।
संसारविषवृक्षस्य मूलबन्ध विधायिनी ॥ ४ ॥

तत्प्रत्ययास्तु संस्काराः कायवाङ्मानसात्मकाः ।
संस्कारोत्थन्तु विज्ञानं मनः षष्ठेन्द्रियात्मकम् ॥ ५ ॥

तत्प्रत्ययं नामरूपं संज्ञासन्दर्शनाभिधम् ।
मनः षष्ठेन्द्रियस्थानं षड़ायतनमप्यतः ॥ ६ ॥

षड़ायतनसंश्लेषः स्पर्शइत्यभिधीयते ।
षट् स्पर्शानुभवो यश्च वेदना सा प्रकीर्त्तिता ॥ ७ ॥

ཡུལ་གྱི་ཀུན་ནས་ཉོན་མོངས་ལས། དེ་ཡིས་ཆགས་སྲིད་རབ་དུ་སྐྱེད།
དེ་ལས་བྱུང་བའི་ལེན་པ་ནི། འདོད་པ་སོགས་ལ་འཇུག་པར་འགྱུར།། 8

ལེན་པ་ལས་བྱུང་སྲིད་པ་འདོད། གཟུགས་དང་གཟུགས་མེད་རང་བཞིན་ནོ།
སྲིད་པ་ལས་བྱུང་སྣ་ཚོགས་ཀྱིས། སྐྱེ་གནས་སུ་འཇུག་སྐྱེ་བ་འོ།། 9

ག་ཤི་སྨྲ་ངན་ལ་སོགས་བརྒྱུད། སྐྱེ་བ་ལ་ནི་བརྟེན་པ་ཡིན།
མ་རིག་ལ་སོགས་འགོག་པ་ཡིས། དེ་དག་རིམ་བཞིན་ཞི་བར་འགྱུར།། 10

མ་རིག་པས་དྲངས་ལུས་མང་རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་བའི་གནས་འདི་ན།
དབེན་པའི་ནགས་སུ་གནས་ཤིང་ཞི་བ་ཁྲིད་རྣམས་དག་གིས་བསམ་པར་བྱ།
ཡང་དག་ཡོངས་སུ་ཤེས་ན་དུས་ཀྱི་ངེས་པར་ཐར་བ་ཉིད་དུ་འགྱུར།
ཐར་བ་ཉིད་ནི་ཡང་དག་ཐོབ་ནས་བདེ་ཆགས་ཉིད་དུ་ལྡོག་པར་འགྱུར།། 11

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རྟེན་ཅིང་འབྲེལ་པར་འབྱུང་བའི་
རྟོགས་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་ལྔ་པའོ།།

तथा विषयसंश्लेषरागात् तृष्णा प्रजायते ।
कामादिषु तदुद्भूत मुपादानं प्रवर्त्तते ॥ ८ ॥

उपादानोद्भवः कामरूपारूप्यमयो भवः ।
नानायोनिपरावृत्त्या जातिर्भवसमुद्भवा ॥ ९ ॥

जरामरणशोकादिसन्ततिर्जातिसंश्रया ।
अविद्यादिनिरोधेन तेषां व्युपरमक्रमः ॥ १० ॥

प्रतीत्योत्पादोऽयं बहुगतिरविद्याकृतपदः
स चिन्त्यो युष्माभि र्विजनवनविश्रामक्षमिभिः ।
परिज्ञातः सम्यग्व्रजति किल कालेन तनुतां
तनुत्वं सम्प्राप्तः सुखतरनिवार्य्यश्च भवति ॥ ११ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
प्रतीत्यसमुत्पादावदानं पञ्चसप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་དྲུག་པའོ།

འོད་ལྡན་རབ་གདུངས་ཡིད་ཅན་རྣམས་ལ་ཕྲག་དོག་དབང་
གི་ཁྲོ་བ་ཉེ་བར་གནས།
ཁྲོ་བས་ལོང་བ་ཉིན་བློ་གྲོས་ཉམས་རྣམས་མི་བཟད་རབ་རིབ་
གཡང་སར་རྣམ་པར་ལྷུང་།
དེར་ནི་རབ་དྲག་རྣམ་མང་དམྱལ་བའི་ཉོན་མོངས་ཚ་བས་
སྨོངས་པ་སྟེན་བྱེད་ཅིང་།
བསྐལ་པའི་བར་དུ་སྤུ་གྲི་མལ་སྟན་དུ་བརྟགས་ཡུལ་གྱིས་
གཞིས་བཅོམ་རྣམས་བརླག། 1

བཅོམ་ལྡན་རྒྱལ་བས་མཉན་ཡོད་ཀྱི། ཆུ་ཀླུང་ཁྲིམས་ལྡན་ཞེས་པར་ནི།
བྲོན་པས་སེམས་ཅན་རྣམ་འགྱུར་ཅན། སྐྱེ་བོས་ཀུན་དུ་བསྐོར་བ་གཟིགས།། 2

རྨ་ལས་བྱུང་བ་སྦྲིན་བུ་ཡི། ཚོགས་ཀྱིས་ལུས་ཆེན་ཟ་བྱེད་ཅིང་།
གདུང་བའི་ཚོ་ངས་དམྱལ་བ་ན། གནས་པའི་སྡུག་བསྔལ་གཉས་བྱེད་པ།། 3

དེ་མཐོང་ཐུགས་རྗེ་སྐྱེས་པ་ཡི། ཀུན་མཁྱེན་ཆུ་ཀླུང་ངོགས་སུ་ནི།
གྲོང་ཁྱེར་པ་ཡི་སྐྱེ་བོ་ཡིས། ཡོངས་སུ་བཀྲམས་པའི་གདན་ལ་བཞུགས།། 4

དེ་ཡི་རང་བཞིན་དྲིང་འཛིན་གྱིས། འཕྲུལ་ལ་སྐྱེ་བ་དྲན་མཛད་ནས།
དམུས་ལོང་རྣམ་འགྱུར་རྣམ་པ་ཅན། མ་དེ་མཚུངས་ལ་དེས་གསུངས་པ།། 5

अथ षट्सप्ततितमः पल्लवः ।

क्रोधः सन्निहितः प्रतप्तमनसा मौर्ष्याविशात् कामिनाम्
क्रोधान्धा निपतन्ति तीव्रतिमिरश्वभ्रे मतिध्वंसिनः ।
तत्र क्रूरतरप्रकारनरकक्लेशात् प्रमूर्च्छाजुषा-
माकल्पक्षुरतल्पकल्पविषमक्षोणीक्षतानां क्षयः ॥ १ ॥

नद्यो मञ्जिरवत्याख्यां श्रावस्त्यां भगवान् जिनः ।
सम्प्राप्तः सत्त्वमद्राक्षीदावृतं विकृतं जनैः ॥ २ ॥

महाकायं कृमिकुलैर्भक्ष्यमाणं व्रणोद्भवैः ।
सूचयन्तं व्यथारावैर्नरकस्थितिवैशसम् ॥ ३ ॥

तं दृष्ट्वा जातकरुणः सर्वज्ञस्तटिनीतटे ।
उपाविशत् पौरजनैरासने परिकल्पिते ॥ ४ ॥

सोऽवदद्विकृताकारं जात्यन्धं महिषोपमम् ।
ज्ञात्वा जातिस्मरं सद्यस्तद्रूपेण समाधिना ॥ ५ ॥

ཁྱི་དུ་ར་ཁྱོད་མི་བཟད་པའི། ལས་ཀྱི་འབྲས་བུ་ཡོངས་སྤྱོད་ནས།
ཚུལ་ངན་སྤྱོད་པར་བྱེད་པ་ཡི། བློ་དེ་ཁྱོད་ཀྱིས་དྲན་ནམ་ཅི།། 6

བདེ་གཤེགས་ཀྱིས་གསུངས་དེ་ཐོས་ནས། མི་ཡི་ཚིག་གི་དེས་སྨྲས་པ།
བཅོམ་ལྡན་མི་བཟད་སྡིག་པ་ཡི། འབྲས་བུ་རྒྱ་ཆེ་ཡོངས་སྤྱོད་དོ།། 7

ཞེས་པ་སྨྲ་བ་དེ་ཡིས་ནི། མཆོག་ཏུ་སྐྱེ་བ་དྲན་པ་ལས།
སྐྱེ་བོ་མང་པོས་འདི་ཅི་ཞེས། དགེ་སློང་དགེ་འདུན་དག་ལ་དྲིས།། 8

དེ་ནས་དགེ་སློང་ཀུན་དགའ་བོས། དེ་ཡི་ལས་ཀྱི་དགེ་མཚན་ལས།
ངོ་མཚར་སྐྱོན་བྱུང་དྲིས་དེ་ལ། བཅོམ་ལྡན་ཀུན་མཁྱེན་གྱིས་གསུངས་པ།། 9

ས་བདག་ཁྱི་དུ་ར་ཞེས་པ་མྱ་ངན་མེད་བཞིན་མིག་གཡོ་མས།
ཀྱང་པས་བསྟན་པའི་དགེ་མཚན་ཅན། འཕགས་རྒྱལ་དག་ཏུ་སྡོར་བྱུང་གྱུར།། 10

ནམ་ཞིག་སྤྲང་རྩི་འཕྲུངས་པའི་གཉན། དཔྱིད་དུས་རླུང་གི་གཡོ་བ་ཡིས།
འཁྲི་ཤིང་ཡིད་འོང་ནགས་ཚལ་དུ། དེ་ནི་བུད་མེད་ཚོགས་དང་རྩེ།། 11

ས་སྐྱོང་བུད་མེད་དེ་དག་དེར། མེ་ཏོག་འཐུ་བས་བྲེལ་གྱུར་པ།
ཀར་ཀུ་བ་སྨྲ་ཡི་འདབ་ཆགས་ནི། རྣམ་པར་བསྐྱོད་ཅིང་རབ་ཏུ་འཁྲམ།། 12

དེར་ནི་ཞི་བ་ལ་བརྟེན་བཞིན། དབེན་པར་རྣམ་པར་གནས་པ་ཡི།
རང་སངས་རྒྱས་ནི་དགྲ་བཅོམ་གྱིས། ཡོངས་བསྐོར་མཛེས་མ་རྣམས་ཀྱིས་
མཐོང་།། 13

अपि को विदुर क्रूरकर्म्मणो भुज्यते फलम् ।
अपि दौर्जन्यजननी सा मतिः स्मर्य्यते त्वया ॥ ६ ॥

श्रुत्वैतत् सुगतेनोक्तं स मनुष्यगिराब्रवीत् ।
तीव्रपापस्य भगवन् भुज्यते विपुलं फलम् ॥ ७ ॥

इति तस्य ब्रुवाणस्य जातिसंस्मरणात् परम् ।
किमेतदिति पप्रच्छ भिक्षुसङ्घं महाजनः ॥ ८ ॥

आश्चर्य्यवृत्तं भगवानानन्देनाथ भिक्षुणा ।
तत्कर्म्म कौतुकात् पृष्टः सर्व्वज्ञस्तमभाषत ॥ ९ ॥

उज्जयिन्यामभूत् पूर्व्वं विदुरो नाम भूपतिः ।
अशोक इव लीलाक्षीचरणाहतिकौतुकी ॥ १० ॥

स कदाचिद्वधूवृन्दैर्मधौ मधुपबान्धवे ।
विलासानिलालोलालताललितकानने ॥ ११ ॥

ता भूमिपाललललनास्तत्र पुष्पोच्चयाकुलाः ।
विचेरु र्नूपुरारावतरङ्गितविहङ्गमाः ॥ १२ ॥

एकान्ते तत्र विश्रान्तं कान्ताः शान्तेरिवाश्रयम् ।
प्रत्येकबुद्धमर्हद्भिर्दद्दृशुः परिवारितम् ॥ १३ ॥

སྐྱིལ་ཀྲུང་ང་ཙམ་ནས་གནས་གྱུར་ཅིང་། བསམ་གཏན་སྦྱིན་ནི་གཡོ་མེད་པ།
དེ་མཐོང་འཕྲུལ་ལ་དེ་དག་རྣམས། ཡིད་ནི་རབ་དུ་དང་བར་གྱུར།། 14

བསམ་གཏན་མཐར་ནི་དག་པའི་ཆོས། བདུད་རྩི་བཞིན་དུ་སྟོན་དེ་ལ།
ཁང་པར་ཕྲུག་བྱས་དེ་དག་གིས། ཡོངས་སུ་བསྐྱོར་ནས་ཉེ་བར་གནས།། 15

མི་བདག་ཡུལ་དེར་སོང་བ་ཡི། བུད་མེད་རྣམས་དེར་མཐོན་ཕྱོགས་མཐོང་།
ཚུལ་ཁྲིམས་དག་ལྡན་དེ་དག་གི། ལུས་ནི་བཅད་ལ་རབ་དུ་བསྐོས།། 16

སྡིག་པ་དེ་ཤེས་ཡངས་པ་ཡི། དུས་སུ་དགྱལ་བ་ཉམ་ང་བར།
རྣམ་འགྱུར་སེམས་ཅན་གྱིས་ཟ་ཞིང་། ངན་པའི་དབྱིབས་ཅན་འདི་དག་སྐྱིན།། 17

མགོ་ནས་ཁང་བར་དུ་མ་ཡི། རྣམ་འགྱུར་རྣ་ལམ་བྱུང་གྱུར་པའི།
སྲིན་བུའི་རིགས་ཀྱིས་ཁེངས་གྱུར་བ། འདི་ཡི་ལུས་ནི་སྨད་པ་ལྡོས།། 18

བསྐལ་པའི་མཐར་ནི་དགྱལ་བ་དག། སྦྱུད་ནས་གདུས་པོ་ཉིད་གྱུར་དེ།
རྟེན་པའི་ངང་ཚུལ་ལྡན་པ་འདིས། རང་སངས་རྒྱས་ནི་གསད་པར་འགྱུར།། 19

སྐྱར་ཡང་དགྱལ་བའི་སྡུག་བསྔལ་གྱིས། ལུས་ཅན་རྣམ་པར་ཉམས་བྱེད་ཅིང་།
གྲངས་ལས་འདས་པའི་དུས་ཀྱིས་ནི། མི་ཉིད་རབ་དུ་ཐོབ་པར་འགྱུར།། 20

དེ་ནས་སྡིག་པ་ཟད་གྱུར་དེ། ཉེན་སོངས་མི་ཆེན་དག་གི་ནི།
ཡིད་བྱུང་སྟོན་པ་ཨུད་དར། ཞེས་པའི་བསྟན་པ་རབ་འབྱུང་འགྱུར།། 21

स्थितं पर्य्यङ्कबन्धेन ध्यानस्तिमितलोचनम् ।
तं दृष्ट्वा सहसैवासां प्रसन्न मभवन्मनः ॥ १४ ॥

ध्यानान्ते ता दिशन्तं तं धर्म्मं शुद्धमिवामृतम् ।
परिवार्य्योपविविशुः कृतपादाभिवन्दनाः ॥ १५ ॥

नृपस्तं देशमभ्येत्य स्त्रैणं दृष्ट्वा तदुन्मुखम् ।
शारीरं शुद्धशीलानां तासां निग्रहमादिशत् ॥ १६ ॥

तेन पापेन विपुलं कालं नरकसङ्करे ।
यक्षोऽयं विकृतैः सत्त्वै र्भक्ष्यमाणो दुराकृतिः ॥ १७ ॥

आपादमस्तकानेकविकारिव्रणसम्भवैः ।
कीर्णं कृमिकुलैः कायं पश्यतास्य जुगुप्सितम् ॥ १८ ॥

कल्पान्ते नरकं भुक्त्वा चण्डालत्वमुपागतः ।
प्रत्येकबुद्धं मृगयाशीलोऽयं निहनिष्यति ॥ १९ ॥

पुनर्नरकसंक्लेशशीर्य्यमाणायताकृतिः ।
संख्यातीतेन कालेन प्रयास्यति मनुष्यताम् ॥ २० ॥

शास्तुरुत्तरसंज्ञस्य ततः क्षपितकिल्बिषः ।
दीर्घक्लेशानलोद्विग्नः शासने प्रव्रजिष्यति ॥ २१ ॥

དེ་ནས་ཀ་ཤིའི་རྒྱལ་པོ་ཡི། སྐྱིད་མོས་ཚལ་དུ་མཛེས་མས་མཆོད།
ཕྲག་དོག་ཁྲོ་བས་ལུས་དག་ནི། ཆད་པ་དྲག་པོས་གཅོད་པར་འགྱུར།། 22

དེ་རྗེས་འདི་ཡི་སྡུག་བསྔལ་མེ། མི་བཟད་རབ་ཏུ་ཉམས་པར་འགྱུར།
ཞེས་པ་སྟོན་པའི་གསུང་ཐོས་ནས། ཐམས་ཅད་ཆགས་བྲལ་ལྡན་པར་གྱུར།། 23

དེ་ནས་དེར་ནི་སྟོན་པའི་གསུང་གི་རང་བཞིན་བདུད་རྩིའི་རྒྱུན་རྫོགས་པས།
ཆགས་བྲལ་སྲིད་པའི་འཇིགས་པའི་ཉོན་མོངས་བསམ་པས་གཟིར་བ་དེ་དག་
རྣམས།
དགའ་བ་དང་ལྡན་དགེ་བའི་རྒྱུ་ཡིས་བསམ་པ་རབ་ཏུ་རྫོགས་གྱུར་ཅིང་།
རབ་ཞི་མེ་ཏོག་དགའ་ཚལ་ལྡན་པ་རྣམས་ཀྱི་གདུང་བ་ག་ཤེད་སོང་།། 24

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གི་ཏུའི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་དགུ་པའོ།།

उद्याने काशिराजस्य कान्ताभिः पूजितस्ततः ।
ईर्ष्याकोपेन शारीर मवाप्स्यत्युग्रनिग्रहम् ॥ २२ ॥

ततोऽस्य तीव्रदुःखाग्मे रवसानं भविष्यति ।
इति शास्तुर्वचः श्रुत्वा सर्व्वे वैराग्यमाययुः ॥ २३ ॥

उद्विग्नानामथ भवभयक्लेशचिन्तातुराणाम्
शास्तुः पूर्णैरमृतविसरैर्वाङ्मयैस्तत्र तेषाम् ।
सत्काह्लादैः कुशलसलिलैः प्लाव्यमानाशयानाम्
तापः क्वापि प्रशमकुसुमारामभाजां जगाम ॥ २४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
विदुरावदानं षट्सप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་བདུན་པ།

མི་བསྐྱུན་རབ་ཏུ་རྒྱས་པ་ཡིས། ཀུན་གྱི་ཡོན་ཏན་ཉམས་པར་བྱེད།
བདག་ཉིད་ཆེན་པོའི་མཐུ་ཡིས་ནི། མངོན་པར་དར་བ་ཉིད་དུ་འགྱུར།། 1

ཨ་ཏྲ་མ་ཡའི་ནགས་ཀྱི་མཐར། འབྱུང་པོའི་ཁང་པའི་ཕུག་ནང་ན།
བཅོམ་ལྡན་བདེ་བར་གཤེགས་པ་སྟོན། བསམ་གཏན་རབ་ཏུ་སྐྱོང་ཞིང་གནས།། 2

དེར་ནི་མི་བཟད་ལྷེ་འབབ་པ། དྲག་པོས་ཁྱུ་མཆོག་ཞིང་པ་བཅོམ།
དེ་ནི་བསམ་གཏན་ལ་ཆགས་པས། སྤྲིན་གྱི་སྒྲ་ཡང་གསན་མ་གྱུར།། 3

དེ་ནས་དཔལ་འབབ་ངོགས་སུ་ནི། བསམ་གཏན་མཐའ་རུ་སྟོན་པའི་གསུང་།
ཉན་དུ་རྒྱལ་པོ་ཆེན་པོ་ནི། བཞི་ཞེས་བརྗོད་པ་སྟོན་དུ་འོངས།། 4

ཡུལ་འཁོར་སྐྱོང་དང་འཕགས་སྐྱེས་པོ། མིག་མི་བཟང་དང་ནོར་བདག་གོ།
དེ་ཡི་ཞབས་ལ་དེ་དག་གིས། ཕྱག་འཚལ་རིན་ཆེན་མེ་ཏོག་གཏོར།། 5

དེ་དག་ལས་ནི་འཕགས་པའི་རིགས། ཡུལ་འཁོར་སྐྱོང་དང་འཕགས་སྐྱེས་པོ།
གཞན་གཉིས་གདུག་པའི་རིགས་ཅན་དེ། དེ་དག་ལ་ནི་དམ་ཆོས་དགག།། 6

བཅོམ་ལྡན་འབྱུང་པོ་དགོངས་པ་ཡིས། རང་ལ་འདྲིས་པའི་སྐད་ཀྱིས་བསྟན།
གང་གིས་དེ་དག་བསྟན་པ་ཡི། ཆོས་ལ་རབ་ཏུ་མཁས་པར་གྱུར།། 7

དཀོན་ཅོག་གསུམ་ལ་རབ་བརྟེན་ཅིང་། བསླབ་པའི་གནས་བཟུང་དེ་དག་རྣམས།
བཅོམ་ལྡན་ཞབས་ལ་བཏུད་ནས་ནི། གཞལ་མེད་ཁང་ནས་མཐོ་རིས་སོང་།། 8

सप्तसप्ततितमः पल्लवः ।

खलोत्कर्षेण सर्वस्य गुणम्लानिः प्रजायते ।
भवत्यभ्युदयायैव प्रभावस्तु महात्मनाम् ॥ १ ॥

आह मायावनोपान्ते भगवान् सुगतः पुरा ।
शून्यागारगुहागर्भे तस्थौ ध्यानपरायणः ॥ २ ॥

तत्र तीव्राशनिस्फोटनिष्पिष्टवृषकर्षकः ।
तेन ध्यानविलीनेन घनशब्दोऽपि न श्रुतः ॥ ३ ॥

ध्यानान्तेऽथ प्रवचनं शास्तुर्मन्दाकिनीतटे ।
चत्वारः श्रोतुमाजग्मुर्महाराजाभिधाः सुराः ॥ ४ ॥

धृतराष्ट्र-विरूढाख्य-विरूपाक्ष-धनाधिपाः ।
ते कीर्णरत्नकुसुमा स्तस्य पादौ ववन्दिरे ॥ ५ ॥

तेषां त्वाचार्यजातीयौ धृतराष्ट्रविरूढकौ ।
द्वावन्यौ क्रूरजातीयौ तेषां स्वोचितभाषया ॥ ६ ॥

सद्धर्मदेशनां चक्रे भगवान् भूतभावनः ।
येन शासनधर्मेषु बभूवुस्ते विशारदाः ॥ ७ ॥

शिक्षापदप्रणयिनस्ते रत्नत्रयमाश्रिताः ।
नत्वा भगवतः पादौ विमानैस्त्रिदिवं ययुः ॥ ८ ॥

དེ་དག་སོང་ཚེ་བཅོམ་ལྡན་ལ། རིག་སྔོང་ཡ་མཚན་སྐྱེ་རྣམས་ཀྱིས།
དེ་དག་སྔོན་ཚེ་བསོད་ནམས་ཚོགས། དྲིས་པ་ཐམས་ཅད་རིག་པས་གསུངས།། 9

སྐུ་ནི་དབུགས་ཆུང་དབུགས་ཆེན་དག། སྔོན་བྱུང་དེ་དག་དགྲ་བོ་ནི།
འདབ་བཟང་གཙུག་ལྷན་དེ་བཞིན་དུ། མི་ཏིའི་དབྱངས་ཞེས་བྱ་བའོ།། 10

སྐུ་ཡིས་སྔོན་པ་འོད་སྲུངས་ཀྱི། བཀའ་ནི་ཡང་དག་ཐོབ་གྱུར་ནས།
སྟོབས་ལྡན་འདབ་བཟང་དག་གིས་ནི། བཟླ་བར་ནུས་པ་མིན་པར་གྱུར།། 11

ཞེ་སྡང་འགྲན་ཞིང་མངོན་ཁེངས་པ། འདབ་བཟང་གིས་ཀྱང་འོད་སྲུངས་ལ།
བསྟན་པ་རིན་ཅེན་བཟུང་ནས་ནི། དཀོན་ཅོག་གསུམ་ལ་སྐྱབས་སུ་སོང་། 12

སྐུ་དེ་དག་ནི་འཕགས་པའི་རིགས། ཡུལ་འཁོར་སྐྱོང་དང་འཕགས་སྐྱེས་པོ།
གདུག་པའི་འདབ་བཟང་དེ་དག་ནི། མིག་མི་བཟང་ནོར་བདག་འདི།། 13

ཞེས་པ་གསུང་བ་རྒྱལ་བ་ཡི། བསོད་ནམས་གསུང་རབ་བདུད་རྩི་ནི།
ནགས་ཚལ་དེ་ན་གནས་པ་ཡི། ཐུབ་པ་ཀ་ནེ་ཡ་ཀས་ཐོས།། 14

དེ་ཡི་མཐུ་ཡི་ཡ་མཚན་དེ། དེ་ཉིད་ལ་ནི་སྐྱབས་སུ་སོང་།
ཕྱིར་མི་འོང་ནི་ཐོབ་གྱུར་ནས། བདེན་པ་མཐོང་ཞིང་དགའ་བར་གྱུར།། 15

དེ་ཡི་ཚ་བོ་ཤི་ལ་ཡང་། དེ་བཞིན་འདུལ་བ་ལ་བརྟེན་ནས།
བདེན་པ་མཐོང་ཞིང་རྒྱ་ཆེ་བ། ཕྱིར་མི་འོང་གིས་འབྲས་ཐོབ་གྱུར།། 16

तेषु यातेषु भगवान् भिक्षुभिर्जातविस्मयैः ।
प्राक् पुण्यसञ्चयं तेषां पृष्टः प्रोवाच सर्ववित् ॥ ९ ॥

अल्पाश्वासमहाश्वासौ पुरा नागौ बभूवतुः ।
तद्द्वेषिणौ सुपर्णौ च चूडिर्मिंटिस्वरस्तथा ॥ १० ॥

नागौ काश्यपसंज्ञस्य शास्तुः संप्राप्य शासनम् ।
सुपर्णयोरप्रधृष्टावभूतां बलशालिनौ ॥ ११ ॥

द्वेषस्पर्द्धाभिमानेन सुपर्णावपि काश्यपात् ।
गृहीत्वा शासनं रत्नत्रयं शरणमापतुः ॥ १२ ॥

तौ नागाचार्य्यजातीयौ धृतराष्ट्रविरूढकौ ।
क्रूरौ सुपर्णौ तावेतौ विरूपाक्षधनाधिपौ ॥ १३ ॥

जिनस्येति ब्रुवाणस्य पुण्यं सुवचनामृतम् ।
तद्वनोपान्तनिलयः श्रुत्वा कैनेयको मुनिः ॥ १४ ॥

विस्मितस्तत्प्रभावेण तमेव शरणं गतः ।
अनागामिफलाप्याभूत् सत्यदर्शननिर्वृतः ॥ १५ ॥

तद्भागिनेयः शैलोऽपि तथैव विनयाश्रितः ।
अनागामिफलोदारं सत्यदर्शन माप्तवान् ॥ १६ ॥

དེ་དག་འཁོར་བཅས་བཅོམ་ལྡན་གྱི། །བསྟན་པའི་ཆོས་ལ་རབ་དགའ་ཞིང་།
རབ་ཏུ་བྱུང་བ་བླངས་ནས་ནི། །བསྒྲུབས་པར་འོས་པའི་དགྲ་བཅོམ་ཐོབ།། 17

དེ་ནས་དེ་ཡིས་ལྷག་རྣམས་ལ། །བདེ་གཤེགས་བཀའ་ཡིས་ཀ་པི་ན།
ཤཱ་རིའི་བུ་དང་མཽ་གལ་གྱི། །བུ་ཡིས་ཀྱང་ནི་བསྟན་པ་མཛད།། 18

ཀཱི་ནེ་ཡ་ཀ་ཤཱི་ལ་ནི། །ཡིད་རབ་དང་མཐོང་དེ་དག་གིས།
སྔོན་གྱི་བསོད་ནམས་དགེ་སློང་གིས། །དྲིས་ཤིང་བཅོམ་ལྡན་འདས་ཀྱིས་གསུངས།།
19

སྔོན་གྱི་སྐྱེ་བར་འདི་དག་ནི། །བཱ་རཱ་ཎ་སཱིར་ཁྱིམ་བདག་གཉིས།
ཨང་ག་ཨ་ག་ནཱ་ཞེས་པ། །གྲོགས་པོ་ཆོས་ལ་དགའ་བར་གྱུར།། 20

བླ་མ་འོད་སྲུངས་བྱུང་དུ་ནི། །ཚངས་པར་སྤྱོད་པ་སྤྱད་དེ་དག
མཐར་ཐུག་སྨོན་ལམ་དག་གིས་ནི། །ད་ལྟ་རབ་ཏུ་ཞི་ཉིད་ཐོབ།། 21

དེ་ལྟར་ཐུབ་མཆོག་བསོད་ནམས་སྨོན་ལམ་ལས་སྐྱེས་པ།
དེ་ལ་དེ་བཞིན་གཤེགས་པས་བཤད་པ་དག་ནི་ཐོས་གྱུར་ནས།
རབ་ཏུ་ཞི་བའི་རིགས་པས་སྲིད་པའི་ལག་འགྲོ་ནི།
ཟིལ་གྱིས་མནན་སྨད་དགེ་སློང་དགེ་འདུན་རྩེ་གཅིག་གྱུར།། 22

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཀཱི་ན་ཡ་ཀའི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་བདུན་པའོ།།

तौ सानुगौ भगवतः प्रसन्नौ धर्म्मशासने ।
प्रव्रज्यां समुपादाय श्लाघ्य मर्हत्त्व मापतुः ॥ १७ ॥

ततस्तदवशिष्टानां चक्रुः सुगतशासनात् ।
कपिणः शारिपुत्रस्य मौद्गल्यस्यापि देशनाम् ॥ १८ ॥

मनःप्रसादमालोक्य परं कैनेयशैलयोः ।
तत्पूर्वपुण्यं भगवान् पृष्टो भिक्षुभिरभ्यधात् ॥ १९ ॥

एतौ गृहपती पूर्वजन्मन्यङ्गाङ्गनाभिधौ ।
सुहृदौ धर्म्मनिरतौ वाराणस्यां बभूवतुः ॥ २० ॥

चरितब्रह्मचर्य्यौ तौ काश्यपस्यान्तिके गुरोः ।
पर्य्यन्तप्रणिधानेन प्राप्तावद्य प्रशान्तताम् ॥ २१ ॥

कथितमिति तथागतेन पुण्यं
मुनिवरयोः प्रणिधानजं निशम्य ।
अभवदवहितः प्रशान्तियुक्त्या
भवभुजगाभिभवाय भिक्षुसङ्घः ॥ २२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कैनेयकावदानं सप्तसप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་ཙ་བརྒྱད་པ།

གང་གི་སྐབས་གསུམ་དབང་ཕྱུག་ལ་ཡང་བརྙེ་བ་དང་ལྡན་པའི།
མིག་ནི་ཞི་བ་མིན་པ་ཞི་བྱེད་ལ་དགའ་ལྷུང་བྱེད་པ།
ཆེན་པོ་དེ་དག་རྣམས་ཀྱི་མཐུ་ནི་ཆེར་འོས་ཆེན་པོ་ཉིད།
དགེ་མཚན་གྱིས་ནི་རྩེ་མོ་ཤིན་དུ་མཐོ་བ་དག་དུ་འཛེགས།། 1

བརྒྱ་བྱིན་མ་དུན་སར་འཁོར་པ་སྟོན། མཐོ་རི་ནས་ལྷུང་མཚན་ཉིད་ཀྱིས།
རིག་ཅིང་སེང་གེའི་གདན་སྟེང་དུ། དགའ་བ་རབ་དུ་ཐོབ་མ་གྱུར།། 2

དེ་ཡི་མགོ་ལ་མན་ད་རའི། འཕྲེང་བ་གསེར་ལྡན་མཛེས་པ་ནི།
བསོད་ནམས་མ་ཡིན་བསྒྲིབས་པ་ཡིས། ཡང་ཚོའི་དཔལ་བཞིན་ཉམས་པར་གྱུར།། 3

དེ་ཡི་ཐིག་ལེ་གྲགས་པ་ལྟར། དཀར་ལ་ཉམས་པར་བྱ་བའི་སྐད།
རྡུལ་གྱི་ཆུ་ཐིགས་གསར་པ་ཡིས། ངན་སྐྱུས་བཞིན་དུ་གནས་དག་བྱུས།། 4

དེ་ནི་སེམས་ནི་བསམས་པ་ལ། ཆགས་ཤིང་ལྷུང་ལ་ཉེ་གྱུར་པ།
དེ་ཡི་བསྟན་པ་ཕྲག་དོག་གིས། ཁྲིས་བཞིན་རབ་དུ་རིང་པོར་སོང་།། 5

ཀླུ་ངན་ཡོངས་འདྲིས་དེ་མཐོང་ནས། འཛིགས་པའི་སྐྱེ་སོགས་ཀྱིས་སྐྱུས་པ།།
ལྷུང་བ་དག་ལ་ཉེ་བ་འདེར། ཉེན་ནི་རབ་དུ་བསམ་པར་མཛོད།། 6

འཇིག་རྟེན་རྣམས་ལ་རྒྱུད་པ་ཡིས། བསྒོམ་བྱ་མིན་པ་ཅེས་དེ་ངེས།
གང་ཞིག་གཅིན་མོངས་ཐིགས་པ་འདི། འགྲོ་བའི་བདག་པོ་ཁྱོད་ལ་ཡང་།། 7

अष्टसप्ततितमः पल्लवः ।

उत्तुङ्गशृङ्गमधिरोहति कौतुकस्य
तेषां प्रभावमहिमा महतां महार्हः ।
ये पातयन्त्यशिरसं शमनप्रगल्भां
दृष्टिं दयाप्रणयिनीं त्रिदशेश्वरेऽपि ॥ १ ॥

सभासीनः पुरा शक्रः त्रिदिवच्युतिलक्षणैः ।
स्पृष्टः सिंहासनोत्सङ्गे न रतिं प्रत्यपद्यत ॥ २ ॥

सुवर्णरुचिरा तस्य मौलौ मन्दारमालिका ।
अपुण्योत्सन्नतारुण्या श्रीरिव म्लानतां ययौ ॥ ३ ॥

यशःशुभ्रे विलोपाय तिलके तस्य चक्रिरे ।
अपवादा इव नवाः पदं स्वेदोदबिन्दवः ॥ ४ ॥

आसन्नपतनस्याथ चिन्तासंसक्तचेतसः ।
ईर्ष्यारुष्टेव प्रययौ तस्य दूरतरं धृतिः ॥ ५ ॥

शुचः परिचितं दृष्ट्वा तमूचे चकिता शची ।
आसन्नेऽस्मिन्निपतने चिन्त्यतामवलम्बनम् ॥ ६ ॥

अलङ्घ्यं नास्ति लोकेषु विपदामिति निश्चयः ।
तवापि जगतां पत्युर्यदिमाः क्लेशविप्लुषः ॥ ७ ॥

ངེས་པར་རྣམ་ཀུན་ཕྱིར་ཕྱོགས་པས། འབད་པ་ཡིས་ནི་བཙལ་བཙལ་ནས།
ལྷུང་བ་ཡོན་ཏན་ལ་སྨོད་ཅིང་། ཆེན་པོ་རྣམས་དང་འགྲོགས་པར་འདོད།། 8

ཁྲབ་བདག་རང་ཉིད་འཛེམ་གླིང་དུ། རེ་ཞིག་བོངས་ལ་ཁྲིད་ཀྱིས་ནི།
རྒྱུད་པ་བསྲུང་པར་བཟོད་པ་ཡི། དགེ་སློང་འགའ་ཞིག་བསྐུལ་བར་མཛོད།། 9

གང་དག་དགེ་བས་བགྲོད་བྱེད་ཅིང་། དགེ་བ་ཉིད་ཀྱིས་སྐྱོར་བྱེད་པ།
དགེ་སློང་མཐུ་ནི་རྒྱ་ཆེ་ཞིང་། ཁྱད་པར་འཕགས་པ་གྲགས་པ་ཐོས།། 10

ཞེས་པ་དགའ་མའི་ཚིག་ཐོས་ནས། དེ་བཞིན་ཞེས་སྨྲ་ལྷ་ཡི་བདག།
ས་ལ་མངོན་ཕྱོགས་ཉིད་སོངས་ནི། འཇིལ་བ་དགེ་སློང་རྣམས་ལ་དྲིས།། 11

བརྒྱ་བྱིན་གྱིས་ནི་དྲིས་ཙམ་གྱིས། མཐུ་ཡིས་མངོན་ཁེངས་དེ་དག་གིས།
ཐལ་མོ་སྦྱོར་བྱས་དེ་ཉིད་ལ། ཕྱག་འཚལ་བཞིན་དུ་རས་བཏུད་པར་གྱུར།། 12

གང་ཞིག་བདག་ཉིད་ལ་འདུད་པ། དེ་ཡི་ཇི་ལྟར་སྐྱོང་བྱེད་འགྱུར།
ཞེས་བསམས་ལྷ་ཡི་བདག་པོ་ནི། རི་བ་ཉམས་པས་རང་གནས་སོང་།། 13

དེ་ནས་དེ་ཡི་བདེ་གཤེགས་ནི། མཆོག་གི་བདུད་རྩི་ཐོབ་ཤེས་ནས།
ལྷུང་པ་རབ་ཏུ་ཉེ་བ་ནི། ཡོངས་སུ་སྐྱོབས་པ་དག་ཏུ་བསམས།། 14

དེ་ནས་དེ་ནི་རྗེས་འབྲང་བཅས། དབང་པོའི་འཁྲུང་བའི་ཕུག་ནང་ན།
དེ་བཞིན་གཤེགས་པ་མི་ཁམས་ལ། སྙོམས་ཞུགས་གནས་པ་ལྟ་རུ་སོང་།། 15

सर्व्वथा खलवैमुख्यादन्विष्यान्विष्य यत्नतः ।
महद्भिः सङ्गमिच्छन्ति गुणलुब्धा इवापदः ॥ ८ ॥

अवतीर्य्य स्वयं तावज्जम्बुद्वीपं त्वया विभो ।
मृग्यतां श्रमणः कश्चिद् व्यसने रक्षणक्षमः ॥ ९ ॥

प्रभावविपुलोत्कर्षाः श्रूयन्ते श्रमणाः किल ।
युज्यन्ते कुशलैरेव येषां कुशलगामिनः ॥ १० ॥

इति प्रियावचः श्रुत्वा तथेत्युक्त्वा मरुत्पतिः ।
क्षितिमभ्येत्य पप्रच्छ श्रमणान् क्लेशसंक्षयम् ॥ ११ ॥

शक्रप्रणयमात्रेण ते प्रभावाभिमानिनः ।
बभूवुरञ्जलिव्यग्रास्तत्प्रणाममनताननाः ॥ १२ ॥

ते कुर्व्वन्ति कथं रक्षां मामेव प्रणमन्ति ये ।
पतिर्ध्यात्वेति मरुतां भग्नाशः स्वपदं ययौ ॥ १३ ॥

ततः स सुगतं ज्ञात्वा संप्राप्तपरमामृतम् ।
प्रत्यासन्ने निपतिते परित्राणममन्यत ॥ १४ ॥

इन्द्रमालगुहागर्भस्थितं सोऽथ तथागतम् ।
तेजोधातुसमापन्नं ययौ द्रष्टुं सहानुगैः ॥ १५ ॥

དེ་ནས་བདེ་སོགས་བདག་པོ་དེས། འཕྲུལ་ལ་ཕྱུག་དང་ཉེ་བར་ཕྱིན།
ཟུར་ཕྱུ་ལྷུ་པ་ཞེས་པ་ཡི། དྲི་ཟའི་བུ་ལ་གུས་པས་སྨྲ། 16

དེ་བཞིན་གཤེགས་པ་བཅོམ་ལྡན་འདས། མི་ཡི་ཁམས་ལ་སྐྱོམས་ཞུགས་པ།
ཁྱོད་ནི་རང་གི་སྒྱུ་རྩལ་ལ། མཁས་པས་རྟོགས་པ་གྲུ་བར་འོས། 17

གང་ཞིག་དུས་མིན་ཉེར་བགྲོད་དང་། མ་བརྗོད་པར་ནི་ནང་འཇུག་དང་།
བསམ་པ་ཤེས་པ་མིན་པ་དེ། དམ་པ་རྣམས་ཀྱིས་སྨད་པའི་གནས། 18

ཞེས་བརྗོད་ལྷ་ཡི་རྒྱལ་པོ་ཡིས། བློ་གྲོས་ལྡན་པ་དྲི་ཟའི་བུ།
བི་ཏྲུ་རུ་ཡི་དཀྲུག་པ་ཅན། རྒྱུད་མང་སྒྲ་སྙན་ལེན་དུ་བཅུག། 19

རང་བཞིན་གྱིས་སྙན་ཡིད་དུ་འོང་། བསྟོད་དབྱངས་དགའ་བ་དང་བཅས་པས།
དེ་ཡིས་རྒྱལ་བ་སད་བྱས་ཏེ། འཕྲོག་བྱེད་ལྟ་བའི་གོ་སྐབས་ཕྱེ། 20

དེ་ནས་ལྷ་དང་བཅས་པ་ཡི། མཆོད་སྦྱིན་བརྒྱ་པ་རབ་ཞུགས་ཏེ།
རབ་ཞིའི་བདུད་རྩིའི་ཆར་འབེབས་པ། དགའ་བ་སྐྱེད་བྱེད་བདེ་གཤེགས་བལྟས། 21

ཕྱག་འཚལ་རབ་ཏུ་བཏུད་པ་དེས། མགོ་ཡི་མན་ད་ར་བའི་ཕོས།
སྟོན་པའི་ཞབས་ཀྱི་སེན་མོ་ཡི། མེ་ལོང་དག་ནི་རབ་ཏུ་ཕྱིས། 22

དེ་ནས་རབ་ཞུགས་དེ་ལ་ནི། གང་གིས་བདེན་པ་མཐོང་བ་ལ།
ཆོས་ཀྱི་མིག་ནི་འབྱུང་གྱུར་པའི། བཀའ་དྲིན་རྒྱལ་བ་དེ་ཡིས་མཛད། 23

गुहान्तिकमथासाद्य ससहायः शचीपतिः ।
ऊचे पञ्चशिखं नाम गन्धर्व्वसुतमादरात् ॥ १६ ॥

तेजोधातुसमापन्नं भगवन्तं तथागतम् ।
स्वकलाकौशलेन त्वं प्रबोधयितुमर्हसि ॥ १७ ॥

उपसर्पत्यकाले यः प्रविशत्यनिवेदितः ।
अनाशयज्ञः स सतामवमानस्य भाजनम् ॥ १८ ॥

इत्युक्तः सुरराजेन धीमान् गन्धर्व्वदारकः ।
वैदूर्य्यदण्डामकरोद्वीणां सुस्वरसारणाम् ॥ १९ ॥

स्वभावमधुरोदाररम्याभिः स्तुतिगीतिभिः ।
स विबोध्य जिनं चक्रे दर्शनावसरं हरेः ॥ २० ॥

ततः प्रविश्य सुगतं देवैः सह शतक्रतुः ।
ददर्श हर्षजननं वर्षन्तं प्रशमामृतम् ॥ २१ ॥

स प्रणामानतः शास्तुर्नखदर्पणमार्जनम् ।
चकार मौलिमन्दारमकरन्देन पादयोः ॥ २२ ॥

ततस्तस्य प्रविष्टस्य प्रसादं विदधे जिनः ।
सत्यसन्दर्शनाद्येन धर्म्मचक्षुर्बभूव सः ॥ २३ ॥

ཡོངས་ལྡང་དེ་ཡི་འཕྲུལ་ལ་ནི། རང་གི་སྟན་ཉིད་ཐོབ་པར་གྱུར།
བསོད་ནམས་མཐུ་ནི་དེ་དག་གིས། ལྡང་བའི་མཚན་ཉིད་རབ་ཏུ་ཞི།། 24

ཇི་སྲིད་འཚོ་བར་བདེ་བར་གཤེགས། སྐྱབས་འོས་དེ་ལ་སྐྱབས་སུ་སོང་།
བདག་ནི་རབ་ཐར་ཅེས་བརྗོད་ནས། དེ་ལ་ཞུས་ནས་མགྲོ་རིམ་སོང་།། 25

དུས་བུ་ར་ཡི་བུ་མོ་མཛེས། ཟུར་ཕུད་ལྔ་པ་ལ་དེས་བྱིན།
དམ་པ་རྣམས་ནི་ཕན་པའི་ཆ། བུ་ལོན་བཞིན་དུ་སེམས་པར་བྱེད།། 26

དགེ་བ་ཐོབ་པས་བརྒྱ་བྱིན་ནི། གསར་དུ་འཁྲུངས་པས་ཡ་མཚན་པ།
དགེ་སློང་གིས་དྲིས་བཅོམ་ལྡན་འདས། ཐམས་ཅད་མཁྱེན་པས་དེར་གསུངས་པ།། 27

གོང་ཁྱེར་མཛེས་ལྡན་དག་ཏུ་སྔོན། ས་ཡི་བདག་པོ་སྐལ་བཟང་གིས།
སྟོན་པ་ཡོག་པར་དང་སེལ་གྱི། སྐུ་ཡི་མཆོད་རྟེན་རབ་ཏུ་བྱས།། 28

དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་རྫོགས་ལྡན་པས།
རྒྱལ་པོ་དེས་ནི་ལྷ་ཡི་དབང་ཉིད་ཐོབ།
འཁོར་བས་ཆོས་ཀྱི་བཅིངས་ཞེས་གསུངས་ནས་ནི།
བཅོམ་ལྡན་གསུང་ནི་རབ་ཏུ་ཞི་བར་གྱུར།། 29

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་བརྗོད་པ་
དཔག་བསམ་གྱི་ཁྲི་ཤིང་ལས་བརྒྱ་སྦྱིན་ལྡང་བའི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་བརྒྱད་པའོ།།

परिच्युतः स सहसा स्वमेवासन मास्तवाम् ।
तेन पुण्यप्रभावेण प्रशान्तश्च्युतिलक्षणः ॥ २४ ॥

यावज्जीवं स सुगतं शरण्यं शरणं गतः ।
अतिक्रान्तोऽहमित्युक्त्वा तमामन्त्र्य ययौ दिवम् ॥ २५ ॥

ललितां तुम्बुरुसुतां ददौ पञ्चशिखाय सः ।
ऋणवत् कुरुते चिन्तामुपकारकणः सताम् ॥ २६ ॥

शक्रस्य कुशलावाप्त्या प्रत्ययोद्भूतविस्मयैः ।
भिक्षुभिर्भगवान् पृष्टः सर्वज्ञस्तानभाषत ॥ २७ ॥

शोभावत्यां पुरि पुरा शोभाख्यः पृथिवीपतिः ।
ककुत्सन्दस्य शारीरं स्तूपं शास्तुरकारयत् ॥ २८ ॥

तत्पूर्णपुण्यप्रणिधानयोगात्
प्राप्तः स राजा चिदशेश्वरत्वम् ।
धर्म्मानुबद्धां भगवान् विभूति
मुक्तेति वाणीमनयत् प्रशान्तिम् ॥ २९ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शक्रच्यवनावदानमष्टसप्ततितमः पल्लवः ॥

ཡལ་འདབ་བདུན་ཅུ་རྩ་དགུ་པ།

བུད་མེད་བློ་ཡི་སྒྲོན་མོ་རྣམས་ཀྱིས་བློ་གྲོས་རྨོངས་བྱས་ཤིང་།
བདེ་བ་འདོད་པ་ཉིད་ཀྱིས་ཡིད་ནི་ནོར་ལ་ཞུགས་གྱུར་པ།
སྐྱེས་བུ་གང་ཞིག་རབ་ཞི་དང་བྲལ་ཞི་བར་མི་བགྲོད་པ།
དེ་དེ་ངེས་པར་འཕྲུལ་ལ་ཉོན་མོངས་དག་ཏུ་ལྷུང་བར་འགྱུར།། 1

གང་གིས་ན་ཚོད་ཕྱིད་དག་ནི། ཐོས་པ་བརྗོད་ཅིང་ཚངས་སྤྱོད་སྤྱད།
བྲམ་ཟེ་འཚོ་བ་བདེ་ཞེས་པ། མཚན་ཡོད་དུ་ནི་སྔོན་བྱུང་གྱུར།། 2

མཛའ་བས་གཉེན་གྱིས་གསོལ་བཏབ་པའི། ཀུན་པོ་སྨ་ར་ཁྲ་བོ་དེ།
ཆོས་ཀྱི་ལམ་གྱི་ངོ་དག་ཏུ། བུད་མེད་རབ་ཏུ་བཟུང་བར་བྱས།། 3

ལོངས་སྤྱོད་གསར་པ་ལ་ཆགས་དེའི། ཆུང་མ་གསོ་ལྡན་མ་ཞེས་པ།
དར་ལ་བབ་ཅིང་མིག་གཡོ་མ། ཤིན་ཏུ་ཡིད་འོང་ཉིད་དུ་གྱུར།། 4

དེ་ནི་དེ་ལ་རིམ་བཞིན་དུ། ཤིན་ཏུ་སྲེད་པ་མིན་པར་གྱུར།
བུད་མེད་མི་གྲུས་ལ་ཆགས་ཤིང་། ཡང་དག་ཆགས་ལ་ཆགས་བྲལ་ཉིད།། 5

དེས་བསམ་ཀུན་དུ་མི་འགྲོགས་པའི། རྒ་བས་སྨ་དཀར་ལྡན་པའི་ཁྲོད།
བདག་གི་ལང་ཚོའི་དྲེགས་འདི་ལ། བསོད་ནམས་མིན་པས་ཉེ་བར་གནས།། 6

ऊनाशीतितमः पल्लवः ।

स्त्रीभिर्विमोहितमतेर्गृहराक्षसीभि-
र्वित्तप्रवृत्तमनसः सुखवाञ्छयैव ।
क्लेशाः पतन्ति परुषाः पुरुषस्य देहे
गच्छन्ति नाम न विना प्रशमं शमं ये ॥ १ ॥

श्रावस्त्यां ब्राह्मणः पूर्व्वं जीवशर्म्माभिधोऽभवत् ।
वयसोऽर्द्धं श्रुताध्यायी ब्रह्मचर्य्यं चचार सः ॥ २ ॥

स जराशवलश्मश्रुः स्नेहाद्बन्धुभिरर्थितः ।
धर्म्ममार्गानुरोधेन विदधे दारसंग्रहम् ॥ ३ ॥

पत्नी तरलिका नाम तरुणी तरलेक्षणा ।
नैव सम्भोगलुब्धस्य तस्यातिदयिताभवत् ॥ ४ ॥

तस्या ज्वरोऽयमेतस्मिन्नरुचिः सुतरामभूत् ।
अभक्तरक्ताः संसक्तविरक्ता एव योषितः ॥ ५ ॥

साचिन्तयदनर्घोऽयं जरासारशिरोरुहः ।
मम यौवनदर्पेऽस्मिन्नपुण्योपनतः पतिः ॥ ६ ॥

རྒན་པོས་གཞོན་ནུ་མ་སྤྱོད་པ། ལུས་ནི་ཉམས་པ་མི་བྱེད་དག།
རྒ་བས་སྐྲ་ནས་བཟུང་བྱས་ཏེ། མཆིན་ག་ཤིན་གྱིས་ནི་ཐློག་པ་བཞིན།། 7

རྒན་པོ་དཔལ་གྱིས་ཁྱུང་ཟད་ནི། འཁྲམས་ཤིང་སྐྲ་ལོར་རབ་གྱུར་པ།
ས་ལ་ལང་ཚོ་འི་ནོར་བུ་ནི། སྟོར་བ་འཚོལ་བར་བྱེད་པ་བཞིན།། 8

རྒན་པོ་བློ་ལྡན་མ་ཡིན་པ། འཇིག་རྟེན་པ་རོལ་དོན་ཤེས་པས།
གཞན་གྱི་ལོངས་སྤྱོད་ལ་སྦྱར་གང་། དེ་ཉིད་བདག་གིས་རབ་དུ་བྱ།། 9

འདི་ནི་ཁྲིམས་ན་གནས་པའི་ཚེ། ཀུན་པོ་འི་འདོད་ལྡན་དང་མཛའ་བས།
བརྩེ་མེད་ལོངས་སྤྱོད་མ་བསྲམས་པ། བདེ་བ་བདག་གིས་སྤྱོད་མི་ནུས།། 10

ཞེས་བསམས་རིགས་བཟང་རྗེས་མཐུན་ཞིང་། ངོ་ཚ་ལྡན་བ་བཞིན་དུ་དེས།
དུལ་བ་ཡིས་ནི་མངོན་ཕྱོགས་ཏེ། དལ་གྱིས་བདག་པོ་ལ་སྨྲས་པ།། 11

གྲུ་མེད་བདེ་བ་འཚོལ་བྱེད་པ། ཁྱོད་ནི་ཁྲིམས་དུ་ཆགས་པ་ཡིས།
བཟོད་པར་དཀའ་བའི་དབུལ་པོ་ཉིད། ཁྱོད་ཀྱི་ལག་པས་དྲངས་ནས་བླངས།། 12

གང་ཞིག་རྩོམ་པ་ལ་སྣང་ཞིང་། དྲག་པོ་འི་སྡོམ་ལས་དག་ལ་དགའ།
རབ་མང་འགོད་པའི་བརྒྱུད་ལྡན་པའི། ཁྲིམས་ན་གནས་པ་དེས་ཅི་བྱེད།། 13

གང་དུ་ཁྲིམས་བདག་སྡོམ་ལས་ལས། ཁྲིམས་ཀྱི་ཟུར་ནི་མིག་གཏོང་བ།
དེར་ནི་བུད་མེད་སྨོངས་པ་རྣམས། ནོར་སྒྲུབ་སྐྱོད་དུ་འབྱུང་ངམ་ཅི།། 14

वृद्धस्य तरुणीभोगः शरीरक्षयसूचकः ।
केशग्रहेण जरया वात्सल्येनेव वार्य्यते ॥ ७ ॥

किञ्चित्सङ्कोचकुटिलः प्रयाति स्थविरः शनैः ।
हारितं यौवनमणिं वीक्षमाण इवावनौ ॥ ८ ॥

वृद्धेन परलोकार्थमानीता यदि धीमता ।
परभोगप्रणयिनी तत्तदेव करोम्यहम् ॥ ९ ॥

अन्तर्गृहगते त्वस्मिन्न शक्यं चौरकामिभिः ।
प्रेमनिर्दयसम्भोगनिरर्गलसुखं मया ॥ १० ॥

इति सञ्चिन्त्य साभ्येत्य शनैः पतिमभाषत ।
लज्जमानेव विनयादाभिजात्यानुकारिणी ॥ ११ ॥

गृहसक्तेन भवता निर्व्यापारसुखैषिणा ।
हस्तेनाकृष्य दारिद्र्यमानीतं वत दुःसहम् ॥ १२ ॥

उद्योगद्वेषिणस्तीव्रमालस्यं यस्य वल्लभम् ।
बहुव्ययप्रवाहार्हं विवाहं स करोति किम् ॥ १३ ॥

यस्यालस्याद् गृहपतिर्गृहकोणं न मुञ्चति ।
धनार्जनाय निर्यान्तु मुग्धास्तत्र किमङ्गनाः ॥ १४ ॥

གང་ན་སྐྱེས་པ་སྨྲོ་ལྡན་པས། བྱི་ཡི་ཕྲ་སྐད་ལ་དགའ་ཞིང་།
བུད་མེད་ཁྲིམ་གྱིས་བྱ་བར་ཆགས། དེ་ནི་དོན་ཀུན་ཕུན་སུམ་མཚོགས།། 15

ལས་དང་བྲལ་བ་རྣམས་ཀྱི་ཁྲིམ་ནི་དགའ་སྟོན་ལོངས་སྤྱོད་ཉམས་གྱུར་ཅིང་།
སྐྱོན་མེད་གོས་མེད་བུད་མེད་དག་ནི་ཟུར་ཕྱུག་དྲི་མ་ཅན་ན་ཞེན།
ཁྲི་དང་མལ་སྟན་རྣམ་པར་ཉམས་ཤིང་ཆུ་སྣོད་ཆག་པའི་སྣྲ་དང་ལྡན།
འབངས་མེད་ཡོ་བྱད་མེད་ཅིང་ཡུན་རིང་ཞོ་སྦྱུབ་སྣྲ་ནི་རྫོགས་པར་འགྱུར།། 16

དེ་ཡིས་དེ་བརྗོད་བྲམ་ཟེ་དེ། ནོར་ལ་མངོན་དུ་ཕྱོགས་ཏེ་སོང་།
བུད་མེད་ཀྱིས་ནི་དབང་བྱས་རྣམས། ཡུལ་གྱི་གཡང་ས་དག་ཏུ་ལྷུང་།། 17

དེ་ཡིས་ནོར་འཛིན་རྒྱ་མཚོ་འི་མཐར། འཁྲམས་ནས་སྦྱིན་པ་ཐོབ་གྱུར་ཏེ།
གསེར་དང་གོས་ནི་རྫོགས་གྱུར་པས། དུས་ཀྱི་རང་གི་གྲོང་ཁྱེར་སོང་།། 18

དེ་ནས་ཁྲིམ་འདོད་ཆགས་ཀྱིས་ཏེ། སོང་བ་གྲོང་མཐའི་ནགས་ཚལ་དུ།
ཆོམ་རྐུན་པ་ཡི་བཅོམ་གྱུར་ནས། ལུས་ཙམ་ལྷག་མ་ཉིད་དུ་འགྱུར།། 19

བདེ་བ་དོན་གཉེར་ནུས་པ་ཡིས། དོན་མེད་ནོར་ནི་ཉེར་བསྒྲུབས་ཀྱང་།
ཀུ་ངམ་ཆུ་ཡི་ཐིགས་པ་བཞིན། བྱེད་པོ་བཞེད་པ་མིན་པས་བྱེད།། 20

དེས་བསམས་ཀྱི་མ་འབད་པ་ཡིས། བདག་གི་ནོར་ར་ནི་བསྒྲུབས་གྱུར་ཀྱང་།
བདག་ནི་སྐལ་དང་མི་ལྡན་པས། མི་ལམ་མཐོང་དང་མཚུངས་པར་གྱུར།། 21

सोत्साहः पुरुषो यत्र व्यवहाररतिर्बहिः ।
गृहव्यापारसक्ता स्त्री सर्व्वास्तत्र सुसम्पदः ॥ १५ ॥

अभूषणमनम्बरं मलिनकोणलीनाङ्गनम्
विशीर्णशयनासनं स्फुटितवारिधानीघटम् ।
अदासमनुपस्करं चिरनिवृत्तमन्थस्वनम्
गृहं विरतकर्म्मणां भवति भग्नभोगोत्सवम् ॥ १६ ॥

इत्युक्तः स तया विप्रः प्रतस्थे द्रविणोन्मुखः ।
पतन्ति विषयश्वभ्रे ह्यपि योषिद्वशीकृताः ॥ १७ ॥

स सागरान्तां वसुधां भ्रान्त्वा लब्धप्रतिग्रहः ।
कालेन स्वपुरीं प्राप सम्पूर्णकनकाम्बरः ॥ १८ ॥

गृहोत्कण्ठोत्कराक्रान्तः पुरीपर्य्यन्तकानने ।
शरीरमात्रशेषोऽभूद् दस्युभिर्मुषितोऽथ सः ॥ १९ ॥

अनर्थोपार्जितोऽप्यर्थः सामर्थ्येन सुखार्थिना ।
करोत्यनिच्छया धातुर्मरुवारिकणायितम् ॥ २० ॥

सोऽचिन्तयदहो यत्नादपि वित्तं मयार्जितम् ।
अभाग्ययोगाद् यातं मे स्वप्नदर्शनतुल्यताम् ॥ २१ ॥

ནོར་ནི་དོན་གཉེར་རྐྱང་མ་ཡིས། གཞན་དུ་ལག་སྟོང་བདག་ཕྱིན་ན།
སྨད་པ་དྲག་པོའི་དུག་ལྡན་པའི། ཚིག་རྩུབ་བརྗོད་པས་བདག་མི་འཚོ། ། 22

དེ་སྨད་བདག་ནི་འདི་ཉིད་དུ། འཕྲུལ་ལ་ཞུགས་པས་བཅིངས་པ་བཞིན།
དབུལ་བའི་ཉེར་འཚོ་དྲག་པོ་ཡིས། ཁྱིམ་དུ་བུད་མེད་མཚོན་མི་བཟོད། ། 23

ཅེས་བསམས་དེ་ཡིས་འཁྲི་ཤིང་གི། ཞགས་པ་དག་ནི་མགྲིན་པར་བཀོད།
ཉོན་མོངས་དྲག་པོས་ཉེན་རྣམས་ཀྱིས། གཉེན་དང་ཕྲད་པ་འཆི་བ་ཡིན། ། 24

སྐབས་དེར་བཅོམ་ལྡན་བརྩེ་བ་ཡི། རྒྱ་མཚོ་འབྱུང་པོ་ལ་དགོངས་པ།
ཐམས་ཅད་མཁྱེན་པས་དེ་ཡིས་ནི། སྡུག་བསྔལ་ཤེས་ནས་ནགས་སུ་བྱོན། ། 25

དེ་ནས་དེ་ཡིས་གཉིས་སྐྱེས་ནི། བརྩེ་བས་དབུགས་ཕྱུང་ཞགས་པ་བཏང་།
དེ་ཡིས་བྱིན་པའི་གཏེར་བླངས་ནས། དེ་ལ་ཕྱག་འཚལ་ཁྱིམ་དུ་སོང་། ། 26

དེ་ཡི་རྐྱང་མ་ནོར་གྱིས་ཀྱང་། རྗེས་སུ་མཐུན་པ་ཉིད་མ་གྱུར།
གཞན་གྱི་རིག་པ་ལ་ཆགས་པའི། བུད་མེད་ནོར་གྱིས་ཚིམ་མི་འགྱུར། ། 27

ལོངས་སྤྱོད་རྩོམ་པ་ཆེ་ལ་ཡང་། དུས་ཀྱིས་ཡིད་ནི་ཆགས་བྲལ་དེས།
བསམ་པ་ཀུ་མ་འཁོར་བ་ན། དེ་ཉིད་དུ་ན་བདེ་བ་མེད། ། 28

དབུལ་དང་མཚུངས་པའི་སྡུག་བསྔལ་ཅི་ཞིག་ཡོད།
དེ་བས་ཀྱང་ནི་ནོར་བསྒྲུབས་རབ་སྡུག་བསྔལ།

शून्यपाणिर्धनार्थिन्याः पत्न्याः प्राप्याहमन्तिकम् ।
न जीवाम्यवमानोग्रविषैः परुषभाषितैः ॥ २२ ॥

तस्मादिहैव मे सद्यः पाशेनोद्बन्धनं हितम् ।
दारिद्र्योपद्रवक्रूरं स्त्रीशस्त्रं न सहे गृहम् ॥ २३ ॥

इति सञ्चिन्त्य स लतापाशं कण्ठे न्यवेशयत् ।
तीव्रक्लेशविषण्णानां निधनं बन्धुसङ्गमः ॥ २४ ॥

अत्रान्तरे कृपासिन्धु र्भगवान् भूतभावनः ।
दुःखं ज्ञात्वास्य सर्व्वज्ञस्तदर्थं वनमाययौ ॥ २५ ॥

दययाश्वासितस्तेन त्यक्त्वा पाशमथ द्विजः ।
तद्दत्तं निधिमादाय तं प्रणम्य ययौ गृहम् ॥ २६ ॥

तस्य भार्य्या धनेनापि न जगामानुकूलताम् ।
परसंस्पर्शरागिण्य स्तुष्यन्त्यर्थैर्न न स्त्रियः ॥ २७ ॥

स कालेन महारम्भभोगेऽप्युद्विग्नमानसः ।
अचिन्तयदहो नास्ति संसारे तत्त्वतः सुखम् ॥ २८ ॥

दारिद्र्यतुल्यं किमिहास्ति दुःखं
धनार्जनं दुःखतरं ततोऽपि ।

ནོར་གྱི་ལོངས་སྤྱོད་བདེ་བའི་ཚས་བསྒྲོས་པ།
གནས་དང་གནས་སུ་སྡུག་བསྔལ་བརྒྱ་ཕྲག་སྐྱེད།། 29

དེ་ལྟར་ཆགས་བྲལ་རབ་བསམས་དེ། རྒྱལ་བྱེད་ཚལ་དུ་སོང་ནས་དེས།
སྲིད་པ་གཅད་སྐད་བཅོམ་ལྡན་འདས། སྟོན་པ་ལ་ནི་སྐྱབས་སུ་སོང་།། 30

དེ་ཡི་བསམ་པ་བག་ལ་ཉལ། ཁམས་དང་དེ་བཞིན་འགྲོ་མཁྱེན་ནས།
ཆོས་ཀྱི་སྨན་ནི་བཅོམ་ལྡན་འདས། སྲིད་པའི་ནད་ཀྱི་སྨན་པས་བྱིན།། 31

བདེན་མཐོང་དེ་ཡིས་རབ་བྱུང་ནི། རབ་ཏུ་དང་བ་ཡང་དག་གླངས།
ཉོན་མོངས་ཐམས་ཅད་སྤངས་པའི་སྐད། དགྲ་བཅོམ་ཉིད་ནི་ཐོབ་པར་གྱུར།། 32

དེ་ཡིས་གྲུབ་པ་སྨྲ་བྱུང་དེ། མཐོང་ནས་ཨ་མཚན་རྒྱས་པ་ཡི།
དགེ་སློང་གིས་ཞུས་བཅོམ་ལྡན་གྱིས། དེ་ཡི་སྔོན་བྱུང་རབ་གསུངས་པ།། 33

བཱ་རཱ་ཎ་སཱིར་མི་ཡི་དབང་། དབང་ཆེན་སྡེ་ནི་སྔོན་བྱུང་སྟེ།
སེམས་ཅན་ཀུན་ལ་གང་གི་ནི། བརྩེ་བ་མཆོག་ཉིད་ཡོད་འོང་གྱུར།། 34

བདག་པོ་ངན་པས་རབ་གདུངས་པ། ཡུལ་གཞན་ནས་འོངས་སྐྱེ་བོ་ཡིས།
ལམ་གནས་གང་གི་གྲིབ་བསིལ་གྱི། ལྗོན་པ་བཞིན་དུ་མངོན་ཕྱོགས་བསྟེན།། 35

ནམ་ཞིག་ཕ་རོལ་རྒྱལ་ཕྲན་གྱི། གྲོང་ཁྱེར་དག་ནི་བཀག་གྱུར་ཀྱང་།
ཁྲོ་མེད་དེ་ཡིས་གཡུལ་དག་ནི། ཐམས་ཅད་གནོད་ལ་བློ་མ་བསྒྲུབས།། 36

धनोपभोगः सुखलेशदिग्धः
पदे पदे दुःखशतानि सूते ॥ २९ ॥

विरक्त श्चिन्तयित्वेति स गत्वा जेतकाननम् ।
भगवन्तं भवोच्छित्त्यै शास्तारं शरणं ययौ ॥ ३० ॥

तस्याशयं सानुशयं धातुं ज्ञात्वा गतिं तथा ।
भगवान् धर्म्मभैषज्यं भवरोगभिषग् ददौ ॥ ३१ ॥

स दृष्टसत्यः प्रव्रज्यां समादाय प्रसादिना ।
सर्व्वक्लेशप्रहाणार्हं मर्हत्त्वं समवाप्तवान् ॥ ३२ ॥

तस्य तामद्भुतां सिद्धिं दृष्ट्वा विपुलविस्मयैः ।
भिक्षुभि र्भगवान् पृष्ट स्तद्वृत्तान्त मभाषत ॥ ३३ ॥

पुरा महेन्द्रसंज्ञोऽभूद्वाराणस्यां नरेश्वरः ।
यस्याग्र्या सर्व्वसत्त्वेषु दयेव दयिताभवत् ॥ ३४ ॥

यं जनः परदेशेभ्यस्तीव्रं कुगतितापितः ।
छायावृक्षमिवाभ्येत्य सन्मार्गस्य मशिश्रियत् ॥ ३५ ॥

कदाचित् प्रतिसामन्तैर्निरुद्धनगरोऽपि सः ।
अक्रोधः सर्व्वनिधने न युद्धे विदधे धियम् ॥ ३६ ॥

དེ་ནི་སྨྲ་བ་མེད་ཞེས་ནས། ཆགས་བྲལ་བློན་པོ་ཐམས་ཅད་ཀྱིས།
སྲིད་པས་ནོར་ནི་བླངས་བྱས་དེ། དགྲ་པོ་དག་ལ་བརྗེན་པར་གྱུར། ། 37

དེ་ནས་སྒྲོག་ཆགས་གསོད་པ་ལ། ཡིད་གྱུར་རྒྱལ་སྲིད་རབ་བཏང་ནས།
ས་ཡི་བདག་པོ་བཟློད་པའི་ཞིང་། གཅིག་པུ་ན་ཚོར་ནགས་སུ་སོང་། ། 38

རྗེ་ལ་གུས་དང་སེམས་ཅན་ལ། ངོ་ཚ་རབ་བཏང་ངན་པ་ཡི།
བློན་པོ་ཆགས་པས་ལྡོང་རྣམས་ཀྱིས། པ་རི་ལ་རྒྱལ་ཕྲན་རྒྱལ་པོར་བྱས། ། 39

མི་བདག་གསར་པའི་ངོས་ན་ནི། གསར་པ་ཉིད་དུ་རྣམ་པར་འཕེལ།
རང་གི་རྗེ་བོ་བཏང་རྣམས་ལ། འོས་པ་མིན་པ་འབབ་ཞིག་ལྷན། ། 40

དེ་དག་ས་བདག་གསར་པ་ཡི། གྲོ་སྐྱོང་རྣམས་ཀྱིས་ཡུན་རིང་བཀག།
སྐྱོ་ནས་བདག་ཉིད་ལ་མཆོན་དེ། ཤུགས་བྱུང་ངོ་ཚས་གླུ་བླངས་པ། ། 41

རྗེ་བོ་མཉེས་གཤིན་རྗེད་སླ་བ། དབང་ཆེན་སྤྱི་ནི་རབ་བཏང་ནས།
སྡིག་ཅན་བདག་ཅག་གཞན་སྐྲོ་ན། དམོད་པའི་གདུང་བ་བཟློད་པར་བྱེད། ། 42

དཔལ་ནི་སྐྱེད་བྱེད་ལྷ་དང་ལྷ་མིན་མི་རྣམས་རིན་ཅན་ཚོགས་ཀྱི་རྒྱས་པར་བྱེད།
རྒྱ་གཏེར་དྲི་མེད་ཤིན་ཏུ་རྒྱ་ཆེ་དེ་ནི་ཁྱིམ་པ་སྟོང་བ་ཁྱོད་ཀྱིས་བཏང་།
ད་ལྟ་བདག་ངན་སློ་ལ་བརྟེན་ཅིང་གྱིན་དུ་ཕྱོགས་ཐོབ་སྨོངས་པའི་དུང་དག་ཀྱི།
ཁ་ལ་བརླང་པོས་ཕུང་བྱས་ཚོ་ངེ་དྲག་པོ་ཅི་ཞིག་ལ་སྒྲོགས་མི་སྣར་འདུག། ། 43

तं विज्ञाय निरुत्साहं विरक्ताः सर्व्वमन्त्रिणः ।
लुब्धा द्रविणमादाय बभूवुः शत्रुसंश्रयाः ॥ ३७ ॥

अथ प्राणिवधोद्वेगत्यक्तराज्यः स भूपतिः ।
अलक्षितः क्षमाक्षेत्र मेकाकी काननं ययौ ॥ ३८ ॥

प्रभुभक्तिं समुत्सृज्य सत्त्वं लज्जाञ्च दुर्जनाः ।
अमात्याः प्रतिसामन्तं लोभान्धा श्चक्रिरे नृपम् ॥ ३९ ॥

नवस्य नृपतेः पार्श्वे नवा एव जजृम्भिरे ।
स्वस्वामित्यागिनां लग्न मनौचित्यन्तु केवलम् ॥ ४० ॥

ते नवस्य क्षितिपते र्द्वारस्थै र्वारिता श्चिरम् ।
खेदादात्मान मुद्दिश्य जगु र्निश्वस्य लज्जिताः ॥ ४१ ॥

महेन्द्रसेनं सन्त्यज्य पेशलं सुलभं प्रभुम् ।
परद्वारि वयं पापाः शापतापं सहामहे ॥ ४२ ॥

त्यक्तः श्रीजनकः सुरासुरवरव्याकीर्णरत्नोत्करः
स स्वच्छः पयसां निधिः पृथुतरः शून्याशयेन त्वया ।
हे नीचोन्मुख शङ्खमूर्ख कुपते द्वारेऽधुना लम्बसे
तूष्णीमास्स्व खले नमत्कृतमुखस्तारं किमाक्रन्दसि ॥ ४३ ॥

དེ་ལྟར་རབ་གདུང་བློན་པོ་རྣམས། རྒྱལ་སྲིད་གསར་པའི་ཚ་གདུང་ལ།
དབང་ཆེན་སྡེ་ཡི་ཟླ་བ་ནི། རབ་ཏུ་བལྟ་བར་འདོད་པར་གྱུར།། 44

སྐབས་དེར་རྒྱལ་པོ་ཞི་བ་ཡི། དགའ་ཚལ་ནགས་ན་གནས་པ་དང་།
ཉེ་བར་བྲམ་ཟེ་སློང་བ་ཡི། ཀོཙྪ་ཤི་ཀ་ཞེས་པ་འོངས།། 45

འབྲས་བུ་རྩ་བས་ས་བདག་གིས། མགྲོན་བྱས་ངལ་བསོས་དེ་ལ་ནི།
དེ་ཡིས་འོངས་པའི་རྒྱུ་མཚན་དག། དུལ་བས་དྲིས་པ་རབ་སྨྲས་པ།། 46

སློང་བའི་ཚོགས་ཀྱི་ཀུན་རྟོག་གི། འབྲས་བུ་ཆེ་ལྡན་དཔག་བསམ་ཤིང་།
མི་བདག་དབང་ཆེན་སྡེ་ལ་བདག། དབུལ་བ་ཡིས་ནི་སློང་དུ་འགྲོ།། 47

དེ་ཐོས་མི་བདག་སྡུག་བསྔལ་དང་། ལྡན་པས་དེ་ལ་རབ་སྨྲས་པ།
བྲམ་ཟེ་ང་ནི་དབང་ཆེན་སྡེ། དཔལ་དང་བྲལ་བས་བདག་སྨད་དོ།། 48

སློང་བ་ཁྱོད་ནི་ཕྱིར་ཕྱོགས་ལས། གང་ལ་གདུང་བ་སྟེར་དུ་འོངས།
སྐྱབ་བྱེད་ཕྱིན་ཅི་ལོག་ལས་ནི། ཕྱིན་ཅི་ལོག་ཉིད་བདག་གིས་ཐོབ།། 49

གང་གི་རེ་བ་ཉམས་པ་ཡི། སློང་བའི་བཞིན་ལོག་མཐོང་གྱུར་པ།
ཤིང་བསྐམ་ལྟ་བུ་བདག་གི་ལུས། འབྲས་བུ་མེད་པ་དག་གིས་ཅི།། 50

ཞེས་པ་རྒྱལ་པོ་འདི་ཚིག་ཐོས་ནས། རྗེ་བ་བསྐུན་བཞིན་གཉིས་སྐྱེས་ནི།
དེ་ཐག་ཆད་པས་ཡུན་རིང་ན། འདུས་ཤེས་ཐོབ་ནས་རབ་སྨྲས་པ།། 51

नवराज्यातपे तीव्रे मन्त्रिणामिति शोचताम् ।
महेन्द्रसेनचन्द्रस्य स्पृहा सन्दर्शनेऽभवत् ॥ ४४ ॥

अस्मिन्नवसरे राज्ञः श्रमारामवनस्थितेः ।
समीपं कौशिको नाम ब्राह्मणोऽर्थी समाययौ ॥ ४५ ॥

स विश्रान्तः कृतातिथ्यः फलमूलै र्महीभुजा ।
पृष्टः प्रोवाच विनयात् तच्चागमनकारणम् ॥ ४६ ॥

सर्व्वार्थिसार्थसङ्कल्पकल्पवृक्षमहाफलम् ।
महेन्द्रसेनं गच्छामि दारिद्र्याद् याचितुं नृपम् ॥ ४७ ॥

एतदाकर्ण्य नृपति स्तमभाषत दुःखितः ।
आशागतार्थिवैमुख्यतापोष्णं निःश्वसन्मुहुः ॥ ४८ ॥

ब्रह्मन् महेन्द्रसेनोऽहं धिङ्मां विरहितं श्रिया ।
वैमुख्याद् यस्य सन्तापमर्थी त्वं दातुमागतः ॥ ४९ ॥

किं निष्फलेन वपुषा शुष्कवृक्षोपमस्य मे ।
आशाभङ्गपरिम्लानं मुखं पश्यन्ति येऽर्थिनः ॥ ५० ॥

इति राजवचः श्रुत्वा द्विज श्छिन्नमनोरथः ।
चिरेण संज्ञा मासाद्य शिलाहत इवाब्रवीत् ॥ ५१ ॥

བདག་ལ་སྐལ་བ་མེད་པ་ཡིས། ས་སྐྱོང་ཁྱོད་ཀྱིས་འབྱོར་བ་སྤངས།
གཏོང་བ་ཁྱོད་ལྟར་ཉིད་སླ་བ། འཇིག་རྟེན་དུ་ནི་ག་ལ་རྙེད།། 52

ཚིག་ཤེས་རྒྱན་ལྡན་ཁྱོད་མཛད་པ། རྒྱལ་སྲིད་དག་ལས་ཤིན་ཏུ་ལྷག།
གང་ཞིག་མཛའ་བོ་གཞན་མེད་པའི། སློང་རྣམས་བསོད་ནམས་མེད་པ་ཉིད།། 53

དཔལ་མོ་གཡོ་བ་ཉིད་ཀྱིས་འཕྲལ་ལ་ངེས་པ་བདང་གྱུར་པའི།
རིན་ཅེན་འབྱུང་གནས་དག་ནི་བག་ཀྱང་དམན་པར་གྱུར་བ་མེད།
དཔལ་ནི་ཁྱོད་བཞིན་མི་བསྒྱུན་བརྐམ་ཆགས་ཁྱིམ་ན་དམན་ལྡན་ཞིང་།
ད་དུང་སྐྱེས་བུ་དམ་པ་ལ་བརྟེན་དགའ་བར་ཡོངས་མ་གྱུར།། 54

ཞེས་བརྗོད་མི་བདག་ལ་གསོལ་ནས། བསམ་བྲལ་དུག་གྲིས་གཟིར་བ་དེ།
འབྲས་བུ་འཚོ་བའི་ཤིང་བཅད་དེའི། སྒྱུ་ངན་ལས་ནི་འཆི་བར་བརྩོན།། 55

དེ་ཡི་མགྲིན་པར་སོང་བ་ཡིས། ཞགས་པས་བདག་དེ་ཡིས་བསལ།
སྙིང་རྗེའི་རྒྱ་མཚོ་སློང་རྣམས་ཀྱིས། མཛའ་གཙུགས་གཉེན་གྱིས་དེ་ལ་སྨྲས།། 56

བདག་ཆིངས་ས་ཡི་བདག་པོ་ནི། མི་མཐུན་ཕྱོགས་ཀྱི་གྲོང་ཁྱེར་ཁྱེར།
ཁྱོད་ལ་བདག་ནི་གསོད་འདོད་དེས། མངོན་འདོད་ལས་ལྷག་ནོར་སྟེར་གྱུར།། 57

དེ་སྐད་ས་ཡི་བདག་པོས་བརྗོད། ང་མཚར་གྱུར་བཞིན་གཉིས་སྐྱེས་ཀྱིས།
སློང་བའི་གཉེན་དེ་བཅིངས་ནས་ནི། ནོར་ལ་སྤྱོད་བས་རབ་ཏུ་ཁྱེར།། 58

अभाग्यै र्मम भूपाल भवान् विभववर्जितः ।
सुलभ स्त्वद्विधो दाता भुवने लभ्यते कुतः ॥ ५२ ॥

राज्यादभ्यधिका शोभा सन्तोषाभरणस्य ते ।
अपुण्यान्यर्थिनामेव येषामन्योऽस्ति नाश्रयः ॥ ५३ ॥

त्यक्तस्य चञ्चलतया सहसैव लक्ष्म्या
रत्नाकरस्य न मनागपि हीनताभूत् ।
लक्ष्मीस्तु नीचखललुब्धगृहावसन्ना
नाद्यापि सत्पुरुषसंश्रयहर्षमेति ॥ ५४ ॥

इत्युक्त्वा नृपमामन्त्र्य स नैराश्यविषातुरः ।
कलत्रवृत्तिविच्छेदत्रिषादान्मर्त्तुं मुद्ययौ ॥ ५५ ॥

तस्य कण्ठगतं पाश मपनीय स भूपतिः ।
तमूचे करुणासिन्धु र्बन्धुः स्निग्धतरोऽर्थिनाम् ॥ ५६ ॥

बद्ध्वा मां प्रतिपक्षस्य नय भूमिपतेः पुरीम् ।
मद्वधी स हि ते वित्तं दास्यत्यभिमताधिकम् ॥ ५७ ॥

इत्युक्तः पार्थिवेन्द्रेण लज्जमान इव द्विजः ।
तमर्थिबान्धवं बद्ध्वा निनाय धनतृष्णया ॥ ५८ ॥

ས་བདག་དེ་ཡིས་ཁྲིད་པ་དེ། ཕ་རོལ་རྒྱལ་ཕྲན་དག་གྱིས་མཐོང་།
དེ་ཡི་བྱུང་ཚུལ་ཐོས་གྱུར་ནས། ཡ་མཚན་གྱུར་བས་དེ་ལ་བསྔགས།། 59

བྲམ་ཟེ་ལ་ནི་ནོར་བྱིན་ནས། རང་གི་གནས་སུ་ས་བདག་དེ།
ནགས་ལ་ཅོད་པན་གྱིས་གདུགས་ཏེ། དང་བར་བྱས་ནས་དེ་ཡིས་བཀོད།། 60

མི་ཡི་བདག་པོ་དབང་ཆེན་སྡེ་ནི་ང་ཉིད་དེ།
གང་འདྲིས་སྐྱོང་བ་ཀོཎྜ་ཞི་ཀའི་ནོར་དག་བསྐྱབས།
སླར་ཡང་དེ་ཉིད་ཁོ་ན་འཚོ་བ་བདེ་བའོ།
ཞེས་པའི་སྤྱོད་པ་རྒྱལ་བས་རང་ལ་དཔེར་བརྗོད་དོ།། 61

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དབང་ཆེན་སྡེའི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བདུན་ཅུ་རྩ་དགུ་པའོ།།

तं दृष्ट्वा प्रतिसामन्तस्तेनानीतं महीपतिम् ।
तद्वृत्तान्तञ्च विज्ञाय विस्मितः प्रशशंस तम् ॥ ५९ ॥

स विप्राय धनं दत्त्वा स्वपदे पृथिवीपतिम् ।
चरणालीनमुकुटस्तं प्रसाद्य न्यवेदयत् ॥ ६० ॥

मनुजपतिरहं महेन्द्रसेनो
धनविरहितस्तु य एष कौशिकोऽर्थी ।
पुनरपि च स एव जीवशर्म्मा
चरितमिति समुदाहृतं जिनेन ॥ ६१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
महेन्द्रसेनावदानमूनाशीतितमः पल्लवः ॥ ० ॥

ཡལ་འདབ་བརྒྱད་བཅུ་ཐམས་པ།

གདུངས་པར་གྱུར་ཀྱང་ཡིད་འབྱུང་མི་འགྱུར་ཞིང་།
བསླབ་པ་བཟུང་བ་ཡིས་ཀྱང་ཕན་པ་བརྗོད།
གཞན་ལ་ཕན་པ་དགའ་ཆེ་རབ་ཞུགས་པ།
དམ་པས་མཆོག་ཏུ་བདག་ཉིད་གདུང་བ་བཟོད།། 1

སྔོན་ཆེ་དཔལ་ལྡན་འབྲིན་འཛིག་ནི། དགའ་བར་འདོད་པས་དགའ་བ་ཡི།
གྲོགས་པོ་དྲི་ཟའི་རྒྱལ་པོ་ནི། རབ་དགའ་དག་གི་ཁང་པར་ཕྱིན།། 2

དེ་ཡིས་དེར་ནི་མཆོད་པ་དག། ཤིན་དུ་ཆེ་ཞིང་མང་བས་མཆོད།
མཛའ་གཙུགས་མཆིན་ག་ཤིན་ལྡན་པའི་ལྷ། སྟོན་ལ་འཁོད་དེས་དེ་ལ་སྨྲས།། 3

རབ་དགའ་ཚུར་ཤོགས་ལ་འདོད། ས་ཡི་བདག་པོ་བསོད་ནམས་ཀྱི།
ཆུ་གཏེར་ཆེན་པོ་ཟས་གཙང་ཞེས། བྲུ་བའི་སྐུས་སྐུ་རབ་འཁྲུངས་པ།། 4

དེ་ཡིས་རབ་ཞི་བ་དུད་རྩི་ཐོབ། དགེ་བའི་སྐད་དུ་འགྲོ་ལ་དེས།
དེ་ནི་ཡང་དག་འགོད་པར་མཛད། ཕྱུ་ཅག་ལ་ཡང་མཛད་པར་འགྱུར།། 5

ད་ལྟ་བདག་གིས་རྒྱུད་མང་ལ། གླུ་དབྱངས་རྒྱུན་ནི་རབ་དུ་སྦྱར།
ཇི་ལྟར་བདག་འགྲོ་ཕྱིན་ནས་ནི། བདག་ལ་བྱ་བ་དཀའ་བར་འགྱུར།། 6

अशीतितमः पल्लवः ।

नोद्वेगमायान्ति कदर्थ्यमानाः
शिखाग्रहेणापि हितं वदन्ति ।
परोपकारेषु हठप्रवृत्ताः
सन्तः सहन्ते भृशमात्मपीडाः ॥ १ ॥

पुरा पुरन्दरः श्रीमान् प्रियस्य प्रियकाम्यया ।
साधुर्गन्धर्वराजस्य सुप्रियस्य गृहं ययौ ॥ २ ॥

स तत्र पूजितस्तेन बहुमानेन भूयसा ।
आत्तासनस्तमवदद् देवः प्रणयिवत्सलः ॥ ३ ॥

एहि सुप्रिय गच्छावः पृथिवीं पृथिवीपतिः ।
जातः शुद्धोदनाख्यस्य पुत्रः पुण्यमहोदधिः ॥ ४ ॥

प्राप्तं शमामृतं तेन जगतां कुशलाय सः ।
तत् संविभागं कुरुते करिष्यत्यावयोरपि ॥ ५ ॥

मया सम्प्रति वीणायां योजिता गीतसारणा ।
कथं गच्छामि पश्चान् मे दुष्करैषा भविष्यति ॥ ६ ॥

ཞེས་པ་དེས་བརྗོད་བརྒྱ་བྱིན་ནི། ཡིད་འབྱུང་རང་གི་གནས་སུ་སོང་།
སེམས་ནི་ཡུལ་ལ་ཆགས་རྣམས་ལ། དགེ་ལ་མངོན་དགའ་ག་ལ་ཡོད།། 7

སྐབས་དེར་སྒོམ་བརྩོན་བརྟུལ་ཞུགས་ཅན། རབ་བཟང་མི་ཡི་འཇིག་རྟེན་གྱི།
ཀུ་ཤའི་གྲོང་ཁྱེར་མཆོ་ཡི་འགྲམ། ཨུ་དུམ྄་རའི་ནགས་ན་གནས།། 8

དེ་ཡི་ཨུ་དུམ་བ་རའི་ཞིང་། མེ་ཏོག་གསར་པས་ཁྱབ་པ་མཐོང་།
མིག་ནི་ཡ་མཚན་གྱིས་གྱུས་པས། ཤིན་ཏུ་ཡང་དག་ཡུན་རིང་བསམས།། 9

ཨུ་དུམ་བ་རའི་ནགས་ཚལ་འདི། རྒྱལ་བ་འབྱུང་ན་མེ་ཏོག་དཔལ།
འབྱུང་ཞིང་འཁོར་ལོས་སྒྱུར་བ་དག། འབྱུང་ན་ཡང་ངོ་བཞིན་ཏུ་མིན།། 10

ཡང་ན་བདག་གི་བསོད་ནམས་ཀྱིས། སྐད་འབྱུང་འདི་ནི་ཡང་དག་སྐྱེས།
ཞེས་པ་བསམས་ནས་རབ་བཟང་ནི། ཀུན་དགའ་རབ་ཏུ་རྒྱས་པར་གྱུར།། 11

དེ་ནས་སླར་ཡང་འཆི་མེད་བདག། སོད་ནམས་རབ་དགའ་དག་ལ་སྨྲས།
དམ་པ་རང་གི་བྱ་བ་ལས། གཞན་གྱི་བྱ་བར་བརྩོན་པ་ལྷག།། 12

ས་གཞི་ཟླ་བ་བདེ་ག་ཤེགས་ཀྱིས། བསྟན་པ་འོད་ཀྱིས་ཐམས་ཅད་ནི།
རབ་ཏུ་གསལ་བའི་ས་གཞི་ལ། རབ་དགའ་ཅུར་ཞོག་བུ་ཅག་འདོད།། 13

དེ་ལ་རབ་དགས་སྨྲས་པ་ལྷ། རྒྱུད་མང་ལ་ནི་གླུ་དབྱངས་རྒྱུན།
བདག་གིས་རབ་ཏུ་སྒྱུར་བ་འདི། ཕྱི་ནས་བྱ་བ་སྣ་མི་འགྱུར།། 14

इत्युक्तस्तेन मघवा विमनाः स्वपदं ययौ ।
विषयासक्तचित्तानां कुशलाभिरतिः कुतः ॥ ७ ॥

अत्रान्तरे मर्त्त्यलोके कुशिपुर्य्यां सरस्तटे ।
उदुम्बरवने तस्थौ सुभद्राख्यो यतिव्रतः ॥ ८ ॥

व्यापान् नवैर्मुकुलितैः स दृष्ट्वोदुम्बरद्रुमान् ।
विस्मयोत्फुल्लनयनः सुचिरं समचिन्तयत् ॥ ९ ॥

जिनजन्मनि जायन्ते चक्रवर्त्त्युद्भवेऽपि वा ।
अस्मिन्नुदुम्बरवने नान्यथा मुकुलश्रियः ॥ १० ॥

ममैव पुण्यैरथवा संजातमिदमद्भुतम् ।
सुभद्रश्चिन्तयित्वेति बभूवानन्दनिर्भरः ॥ ११ ॥

अथामर्त्त्यपतिर्गत्वा सुप्रियं पुनरब्रवीत् ।
निजकार्य्याधिकोद्योगाः परकार्य्येषु साधवः ॥ १२ ॥

एहि सुप्रिय गच्छावः क्षितिं क्षितितलेन्दुना ।
सद्देशनांशुभिर्विश्वं सुगतेन प्रकाशितम् ॥ १३ ॥

तं सुप्रियोऽवदद् देव वीणायां गीतिसारणा ।
योजितेयं मया पश्चात् सुकरा न भविष्यति ॥ १४ ॥

ཞེས་ཐོས་འཆི་མེད་བདག་པོ་ནི། ཡིད་ལ་རེ་བ་ཉམས་པར་གྱུར།
འབད་མེད་བདུད་རྩི་ཉེར་གནས་པ། བསོད་ནམས་དམན་པ་འཕྲུང་བ་མིན།། 15

དུས་ཀྱི་ཞུ་དུ་མ་བ་རའི་ནགས། མེ་ཏོག་རབ་རྒྱས་དྲི་བཟང་གིས།
ཕྱོགས་མཚམས་ཀུན་དུ་ཁེངས་གྱུར་པ། རབ་བཟང་གིས་ཀྱང་མཐོང་བར་གྱུར།། 16

དེ་ཡིས་བསམས་པ་མེ་ཏོག་གི། ཚལ་ནི་རྣམ་པར་རྒྱས་པ་འདི།
སྨིན་པ་དུས་ཚོས་སྨིན་པ་དང་། འཁོར་ལོས་སྒྱུར་བའི་རྒྱལ་ལ་འགྱུར།། 17

ཡང་ན་བདག་གི་བསོད་ནམས་མཐུས། མ་ལུས་ཚལ་ནི་མེ་ཏོག་རྒྱས།
ཞེས་པ་སེམས་པ་དེ་ལ་ནི། ཐྲིགས་དང་དགའ་བ་རབ་ཏུ་སྐྱེས།། 18

དེ་ནས་དགེ་སློང་དགྲ་བཅོམ་ཐོབ། སངས་རྒྱས་ཞེས་བྱ་མངོན་ཕྱོགས་ཏེ།
དེ་ནི་རྫུ་འཕྲུལ་གྱིས་བདུལ་ནས། རབ་ཞི་རང་བཞིན་རྒྱས་པར་བྱས།། 19

དེ་ནས་དུས་ཀྱི་བཅོམ་ལྡན་འདས། རྒྱལ་བས་འགྲོ་བའི་དོན་མཛད་ནས།
ཡོངས་སུ་མྱང་འདས་ལ་རྟོག་ཅིང་། ཐ་མའི་གཟིམས་མལ་དག་ལ་གནས།། 20

དེ་ཞིག་གདུལ་བྱ་འདུལ་བ་ལ། རྣམ་པར་བཀོད་བྱེད་རབ་ཏུ་བསྔགས།
རབ་བཟང་དང་ནི་དྲི་ཟ་དག། རབ་དགའ་དེ་ཡང་བདག་གི་ལྷག།། 21

རབ་བཟང་ཚོགས་ནི་ཆུང་ངུ་ཡི། འདུལ་བ་རབ་ཏུ་ཐོབ་པར་འགྱུར།
དྲི་ཟ་ལྔང་ཚོ་འཁོར་བ་ཡིས། སྤྲོས་པ་ཚོགས་ཀྱིས་འདུལ་བར་འགྱུར།། 22

इत्याकर्ण्यामरपति र्ययौ म्लानमनोरथः ।
प्रयत्नोपनतं हीनपुण्यः पिबति नामृतम् ॥ १५ ॥

उत्फुल्लकुसुमामोदसंपूरितदिगन्तरम् ।
कालेनोदुम्बरवनं सुभद्रोऽपि व्यलोकयत् ॥ १६ ॥

सोऽचिन्तयद् भवत्येतद् विकाशिकुसुमं वनम् ।
धर्म्मप्रवर्त्तने शास्तुर्जये वा चक्रवर्त्तिनः ॥ १७ ॥

सत्पुण्यानां प्रभावाद्वा निखिलं पुष्पितं वनम् ।
इति चिन्तयतस्तस्य दर्पप्रीतिरजायत ॥ १८ ॥

अथ चुन्दाभिधोऽभ्येत्य श्रवणार्हत्वमागतः ।
ऋद्धा चक्रे पराजित्य तं प्रशान्तमदोदयम् ॥ १९ ॥

जगत्कार्यं ततः कृत्वा कालेन भगवान् जिनः ।
कलयन् परिनिर्व्वाणं पश्चिमे शयने स्थितः ॥ २० ॥

प्रदध्यौ विनये तावद्विनयाविनिवेशितः ।
अवशिष्टः सुभद्रो मे गन्धर्व्वः स च सुप्रियः ॥ २१ ॥

अक्लेशेन सुभद्रस्तु विनयं प्रतिपद्यते ।
कृच्छ्रानुशास्यो गन्धर्व्वस्तारुण्यविभवोन्मदः ॥ २२ ॥

ཞེས་པ་བསམས་ནས་དེ་བཞིན་གཤེགས། དྲི་ཟའི་གྲོང་ཁྱེར་དག་ཏུ་བྱོན།
དྲི་ཟའི་རྒྱལ་པོ་གཞན་པ་ནི། མཛེས་པ་ལྷག་པར་མངོན་པར་སྤྲུལ།། 23

བི་ཎུ་རུ་ཡི་དབྱུག་པ་ཅན། རྒྱུད་མང་རྒྱུད་སྟོང་སྤྲིང་བྱེད་ཅིང་།
འགྲན་པས་རབ་དགའི་རྒྱུགས་པ་ནི། ཉམས་པར་བྱེད་ལ་བརྩོན་པར་གྱུར།། 24

རིམ་གྱིས་རྒྱུད་ནི་བཅད་གྱུར་ཀྱང་། དེ་དག་སྒྲ་དབྱངས་ཀུན་རྫོགས་པ།
སྟོན་པར་བྱེད་ལ་མཐུ་ཡིས་ནི། ཁྱད་པར་མེད་པ་དག་ཏུ་འགྱུར།། 25

རྒྱུད་ནི་ཐམས་ཅད་བཅད་གྱུར་ཀྱང་། དྲི་ཟའི་འདྲེན་པ་དག་གིས་ནི།
དབྱངས་ཀྱི་ཚོགས་ནི་རབ་ཏུ་བསྟན། རབ་དགའ་ཡིས་ནི་ནུས་མ་གྱུར།། 26

དེ་ནས་ཁེངས་དང་དྲེགས་བདང་བ། དེ་ལ་བཅོམ་ལྡན་རྒྱལ་བ་ཡི།
ལྕེས་ནི་མངོན་བྱུང་དག་པ་ཡི། དམ་པའི་ཆོས་ནི་བསྟན་པ་མཛད།། 27

འཇིག་ཚོགས་ལྟ་བའི་རི་བོ་ནི། ཡེ་ཤེས་རྡོ་རྗེས་རྣམ་བཅོམ་སྟེ།
དེ་ཡིས་རྒྱུན་ཞུགས་འབྲས་བུ་ནི། རབ་ཏུ་ཞི་སླད་མངོན་དུ་བྱས།། 28

དུས་ཀྱི་ཨུ་དུམ་བ་ར་ཡི། ནགས་ཀྱི་རབ་དགའ་མི་རྟག་ཚོགས།
རྒད་པོ་དག་གིས་ཡོངས་སྤྱོད་བཞིན། དལ་བུས་རབ་ཏུ་ཉམས་པར་གྱུར།། 29

མི་རྟག་ཉམས་པ་དེ་མཐོང་ནས། རབ་བཟང་མྱ་ངན་རྒྱ་ཡིས་ཐེབས།
ངེས་པ་ཉིད་དུ་བདག་ཉིད་ཀྱིས། བསོད་ནམས་མིན་ལས་སྐྱེས་པར་བསམས།། 30

इति संचिन्त्य गन्धर्व्वपुरं गत्वा तथागतः ।
गन्धर्व्वराजमपरं निर्म्ममेऽभ्यधिकद्युतिम् ॥ २३ ॥

सहस्रतन्त्रीं वैदूर्य्यदण्डीं वीणामवादयत् ।
सुप्रियस्य मदोच्छेदं स्पर्द्धया कर्त्तुमुद्ययौ ॥ २४ ॥

क्रमेण तन्त्रीच्छेदेऽपि तौ सर्व्वस्वरमूर्च्छनाः ।
दर्शयन्तौ प्रभावेण निर्विशेषौ बभूवतुः ॥ २५ ॥

छेदेन सर्व्वतन्त्रीणामपि गन्धर्व्वनायकः ।
अदर्शयत् पणङ्गोऽपि न शशाक च सुप्रियः ॥ २६ ॥

संत्यक्तमानदर्पस्य तस्याथ भगवान् जिनः ।
प्रत्यक्षविग्रहश्चक्रे शुद्धसद्धर्म्मदेशनाम् ॥ २७ ॥

ज्ञानवज्रेण सत्कायदृष्टिशैले विदारिते ।
स्रोतःप्राप्तिफलं साक्षात् स चकार प्रशान्तये ॥ २८ ॥

कालेनोदुम्बरवने रम्यः कुसुमसञ्चयः ।
सम्भोग इव वृद्धस्य शनकैर्म्लानिमाययौ ॥ २९ ॥

म्लानपुष्पं सदालोक्य सुभद्रः शोकमुद्रितः ।
अचिन्तयदपुण्यानां नूतनोद्भवमात्मनः ॥ ३० ॥

བསམས་པའི་མི་ཡིས་གདུངས་དེ་ལ། ཨུ་དུམ་བཱ་རའི་ནགས་ཀྱི་དཔལ།
ལྷ་རྣམས་མངོན་ཕྱོགས་རབ་སྐྱེས་པ། དོན་མེད་མྱ་ངན་ཡོངས་མ་བྱེད།། 31

མཐུ་ལྡན་ཁྲོད་ཀྱིས་བསོད་ནམས་ཀྱིས། ཚལ་ནི་མེ་ཏོག་རྒྱས་པ་མིན།
ཁྲོད་ཀྱི་བསོད་ནམས་མ་ཡིན་པས། ཉམས་མིན་འདི་ཡི་རྒྱུ་དག་ཉིད།། 32

བདེ་གཤེགས་ཉིད་ནི་འབྲུངས་པ་ན། མེ་ཏོག་འདི་དག་འབྱུང་འགྱུར་དེ།
བླ་མེད་ཡེ་ཤེས་བརྙེས་པ་ན། ཀུན་ནས་རབ་ཏུ་རྣམ་པར་རྒྱས།། 33

མྱ་ངན་འདས་ལ་ཉེ་བ་ན། ཉམས་པ་དང་ནི་ལྷུང་བར་འགྱུར།
ཀུ་ཤའི་གྲོང་ན་དེ་བཞིན་གཤེགས། ཡོངས་སུ་མྱ་ངན་འདས་པར་བཞེད།། 34

ནགས་ཀྱི་དཔལ་མོ་འི་ཚིག་འདི་དག། རབ་བཟང་གིས་ནི་ཐོས་གྱུར་ནས།
རིང་ཞིང་གྲོ་བའི་ཤུགས་བདང་སྟེ། ཤིན་ཏུ་ཡུན་རིང་ཡང་དག་བསམས།། 35

སྟོན་པའི་ཆོས་ནི་འདུལ་བ་ལ། བདག་ནི་སྐྱོད་དུ་འགྱུར་བར་ཤོག།
ཅེས་པ་འདི་ནི་བདག་སྙིང་ལ། རྟག་ཏུ་རེ་བ་བཅངས་པར་གྱུར།། 36

གང་གིས་སྟོན་པའི་ཞལ་གྱི་པད། མཐོང་ཞིང་ཆོས་ཀྱི་གསུང་རབ་ལ།
དག་པའི་དགའ་སྟོན་ཡོངས་རྫོགས་པ། ཉོན་མོངས་བྲལ་བ་དེ་དག་བསྔགས།། 37

ད་ནི་མྱ་ངན་རབ་ཞི་གྲོགས་པོ་མི་བཟད་སྲིད་པས་གཟིར་བའི་གཉེན།
སུ་ཡི་བཞིན་རས་རི་བོང་ཅན་ལས་རབ་འབྲུངས་རབ་ཏུ་རྒྱས་པའི་གསུང་།

तच्चिन्तानलसन्तप्तमुदुम्बरवनश्रिया ।
उवाच देवताभ्येत्य विषादं मा कृथा वृथा ॥ ३१ ॥

नेदं तव प्रभावाद्यैः पुण्यैः कुसुमितं वनम् ।
न च म्लानं तवापुण्यैः श्रूयतामत्र कारणम् ॥ ३२ ॥

पुष्पाण्येतानि जायन्ते सुगतस्यैव जन्मनि ।
अनुत्तरज्ञानलाभे विकसन्ति समन्ततः ॥ ३३ ॥

आसन्ने परिनिर्व्वाणे म्लायन्ति निपतन्ति च ।
इह ते परिनिर्व्वाणं कुशिपुर्य्यां तथागतः ॥ ३४ ॥

एतदाकर्ण्य वचनं सुभद्रः काननश्रियः ।
दीर्घमुष्णं विनिश्वस्य सुचिरं समचिन्तयत् ॥ ३५ ॥

यास्यामि धर्म्मविनये शास्तुर्भाजनतामहम् ।
इत्येष हृदये नित्यमाशाबन्धो ममाभवत् ॥ ३६ ॥

धन्यास्ते विरतक्लेशाः सम्पूर्णकुशलोद्भवाः ।
धर्म्मप्रवचने शास्तु र्यैं दृष्टं वदनाम्बुजम् ॥ ३७ ॥

कस्येदानीं वदनशशिनः संप्रवृत्ताः प्रवृद्ध-
ज्ञानालोकप्रसररुचिराः पुण्यपीयूषधाराः ।

ཡེ་ཤེས་སྣང་བས་དཀྲིགས་ཤིང་རབ་མཛེས་བསོད་ནམས་བདུད་རྩི་དག་གི་རྒྱུན།
སྲིད་པའི་སྲུ་ངམ་གདུང་བར་འཛིག་རྟེན་ཀུན་པའི་སྨོད་ཀྱིས་འཐུང་བར་འགྱུར།། 38

གང་ན་བཅོམ་ལྡན་རྒྱལ་བ་བཞུགས། ཀུ་ཤའི་གྲོང་དུ་བདག་འགྲོ་འོ།
ཐ་མར་དེ་མཐོང་བདག་གིས་ནི། གལ་ཏེ་ཉིད་སྨྱུར་ཐོབ་པར་འགྱུར།། 39

ཞེས་བསམས་སྐྱོ་ལྡན་དེ་ཡིས་ནི། ལུས་མི་སྣང་བར་སྐད་ཅིག་ལས།
ཡིད་ལྟར་མགྱོགས་པས་ཀུང་གྱི་གནས། ཀུ་ཤའི་གྲོང་ཁྱེར་དག་ཏུ་ཕྱིན།། 40

མེ་ཏོག་དགའ་ཚལ་ས་ལ་ཟང་། ཞེས་པའི་ཚལ་ན་རབ་གཟིམས་པ།
རྒྱལ་བའི་སྐྱོ་གནས་དགའ་བོ་ལ། དེ་ཡིས་ནང་དུ་འཇུག་པ་ཞུས།། 41

དེ་ནས་དཔལ་གྱིས་ཀུན་དགའ་བོས། སོར་མོ་གདངས་ཤིང་གཡོ་བ་ཡིས།
ནང་འཇུག་བསམ་པ་ཟློག་བྱེད་ཅིང་། ཚང་རྒྱང་སྨྲ་ཡིས་དེ་ལ་སྨྲས།། 42

ཁྱོད་ཀྱི་དྲི་དང་ལུང་སྟོན་ལ། རབ་བཟང་དེ་ལྟ་གནས་སྐབས་མེད།
དེ་བཞིན་གཤེགས་པ་ཞི་བའི་སྐད། སྐུ་ནི་ཡོངས་སུ་བསྐྱིལ་ཞིང་བཞུགས།། 43

སྐྱེ་བོ་འདི་དག་པ་རོལ་ནི། གདུང་བ་མི་ཤེས་རང་དོན་གཅེར།
ཀུན་དུ་ཇི་ལྟ་དེ་ལྟ་ཡང་། གནས་སྐབས་དག་ནི་མི་སེམས་སོ།། 44

གང་ཞིག་ཡུལ་དུས་མི་ཤེས་པར། འཐབ་ལ་སྦྲོང་བ་ཉིད་གྱུར་བ།
དེ་དག་བཞེད་དོན་རབ་བདང་ནས། ངོ་ཚ་བླངས་དེ་འགྲོ་བ་ཉིད།། 45

लोकः शोकप्रशमसुहृदस्तीव्रतृष्णार्त्तबन्धो
र्वाच स्तत्ते भवमरुतटे पास्यति श्रोत्रपात्रैः ॥ ३८ ॥

गच्छाम्यहं कुशिपुरं यत्रास्ते भगवान् जिनः ।
प्राप्स्यामि सुलभं तस्य पश्चिमं यदि दर्शनम् ॥ ३९ ॥

इति सञ्चिन्त्य सोत्साहः सोऽन्तर्हिततनुः क्षणात् ।
मल्लाश्रयां कुशिपुरी माससाद मनोजवः ॥ ४० ॥

वैनेयमर्कशालाख्ये कुसुमारामशायिनः ।
जिनस्य द्वाःस्थमानन्दं स प्रवेश मयाचत ॥ ४१ ॥

आनन्दस्तं जगादाथ मन्दमन्दस्वनः शनैः ।
निवारयन् प्रवेशाशा मुन्नताङ्गुलिदोलया ॥ ४२ ॥

सुभद्रावसरो नायं प्रश्नव्याकरणे तव ।
विश्राम्यति परिश्रान्तः कायशान्त्यै तथागतः ॥ ४३ ॥

न चिन्तयत्यवसरं सर्व्वथैव यथा तथा ।
परव्यथानभिज्ञोऽयं स्वार्थमर्थयते जनः ॥ ४४ ॥

देशं कालमविज्ञाय याति यः सहसार्थिताम् ।
स समाहित मुत्सृज्य लज्जामादाय गच्छति ॥ ४५ ॥

རྒྱལ་བའི་སྐུ་ནི་ཞི་བའི་ཚོ་ན་ལྡོན་པ་འདི་དག་ཀྱང་།
ཡལ་འདབ་འཁྲི་ཤིང་རབ་ཏུ་ཉལ་ཞིང་ངེས་པ་མི་གཡོ་ལ།
ཚུ་སྐྱང་དག་ནི་རྣམ་པར་དུད་ཅིང་མགོགས་པ་བདང་ནས་བགྲོད།
རླུང་ཡང་འཕྲུལ་ལ་རབ་ཏུ་གཡོ་ཞིང་བགྲོད་མ་ཡིན།། 46

དེ་ལྟར་ཀུན་དགའ་བོ་ཡིས་ནི། འབད་པས་ཡང་དང་ཡང་དུ་བཟློག།
རི་བ་ཉམས་པས་རབ་འཁྲུགས་པ། རབ་བཟང་གིས་ནི་དེ་ལ་སྨྲས།། 47

གཟིར་བ་ཡིས་ནི་སྐབས་མི་ཤེས། སྨོང་ལ་དང་ཞིང་བརྩེ་བར་མཛོད།
རྒྱལ་བ་ཉིད་སྨྲ་རབ་ཏུ་སྟོན། ཐུབ་པོ་འདི་ལྟ་ཡོངས་མ་མཛོད།། 48

གྲིབ་བསིལ་དག་ལ་ཉེ་བར་འཁོད་ཅིང་བསིལ་བས་རབ་དགའི་སྟོན་ཐོབ་གྱུར་པ།
རྟག་ཏུ་གསར་པ་གསར་པའི་ལམ་འགྲོན་འཛོམས་ཤིང་འབྲས་
བུ་འཛིན་པས་གཟིར་བའི་ཤིང་།
བརྟེན་པ་དག་ལ་མཆེན་ག་ཤིན་སྐྱོང་བ་ཀུན་གྱི་གཞི་ནི་ཉིད་སྐྱར་གྱུར་པ་ཡི།
ལོ་མ་དག་ནི་བཅོས་དང་འཁྲུགས་དང་རབ་ཏུ་བྲངས་པའི་ཉོན་མོངས་
འཕྲོང་བ་སྲུ་ཡིས་ཤེས།། 49

དེ་ལྟར་འབད་པས་རབ་བཟང་ངེས། ཡང་དང་ཡང་དུ་ཞུས་གྱུར་ཀྱང་།
དགག་པ་རྒྱ་ཡི་ཀུན་དགའ་བོས། དེ་ནི་ཀུན་དགའ་མེད་པར་བསྒྲུབས།། 50

བཅོམ་ལྡན་ཀུན་མཁྱེན་གཟིམས་མལ་དུ། ལྷ་ཡི་གནས་ལས་མངོན་ཕྱོགས་དེ།
རབ་བཟང་ནང་དུ་ཐོང་ཞིག་ཅེས། ཀུན་དགའ་བོ་ལ་གསུང་ཆེར་གསུངས།། 51

वेगं विहाय विनताः सरितः प्रयान्ति
वान्ति प्रसह्य चतुरं न तथा समीराः ।
एतेऽपि नैव तनुसंश्रमने जिनस्य
सन्ततपल्लवलतातरव श्चलन्ति ॥ ४६ ॥

आनन्देनेति यत्नेन वार्य्यमाणः पुनः पुनः ।
आशाभङ्गसमुद्भ्रान्तः सुभद्र स्त मभाषत ॥ ४७ ॥

जानाम्यवसरं नार्त्तः प्रसीद दययार्थिनः ।
सुलभं दर्शय जिनं मा मैवं भव निष्ठुरः ॥ ४८ ॥

छायायामुपविश्य शीतलतया लब्धप्रमोदोत्सवै-
रारुह्यात्तफलैः सदा नवनवैः संपीड़ितस्याध्वगैः ।
जानात्याश्रितवत्सलस्य सुलभाधारस्य सर्व्वार्थिना
शाखाभञ्जनमोटनप्रसरणक्लेशावलीं कस्तरोः ॥ ४९ ॥

इति यत्नात् सुभद्रेण याचितोऽपि पुनः पुनः ।
तं निरानन्दमानन्दः प्रतिषेधं गते व्यधात् ॥ ५० ॥

भगवानपि सर्व्वज्ञः शय्यां प्राप्य सुरालयात् ।
उच्चैरानन्दमवदत् सुभद्रः प्रविशत्विति ॥ ५१ ॥

འཇུག་པ་ཐོབ་སྤྱི་ནོར་མེད་ཀྱིས། གཏེར་བཞིན་བདེ་གཤེགས་མཐོང་གྱུར་ནས།
རབ་བཟང་གདོང་ནི་མཆི་མ་དང་། བཅས་པས་ཕྱག་འཚལ་དེར་གསོལ་པ།། 52

བཅོམ་ལྡན་དེ་རིང་འཇིག་རྟེན་ནི། སྐལ་བས་དབུལ་བ་ཉིད་འདི་ཅི།
དེ་རིང་ཁྱོད་ཀྱིས་བཏང་གྱུར་པ། སྐྱང་མེད་དག་གི་འགྲོ་བ་ནི།། 53

བཤེས་གཉེན་ཁྱོད་དང་བྲལ་བ་ན། སུ་ཡི་ཡེ་ཤེས་སྣང་བ་ཡིས།
འགྲོ་བའི་པདྨ་སྨོངས་པ་ཡི། གཉིད་ཀྱི་རྒྱ་ལྡན་རྒྱས་བྱེད་འགྱུར།། 54

མཐའ་དག་འགྲོ་ལ་རྒྱུད་མེད་དུ། ཕན་པ་དག་ནི་རབ་མཛད་ནས།
ཀུན་མཁྱེན་ཉིད་པ་སླ་བ་ཁྱོད། བདག་ལ་ཉིད་དཀའ་ཇི་ལྟར་གྱུར།། 55

ཅེས་པ་དེ་ཡིས་གུས་པས་གསོལ། དེ་ལ་བཅོམ་ལྡན་འཇམ་ལྡན་ཞིང་།
བཞིན་གྱི་ཆུ་སྐྱེས་གཟེངས་བསྟོད་དེ། རབ་དངས་མཛེས་པས་བཀའ་སྩལ་པ།། 56

མཉེན་གཞིན་རྟག་ཏུ་མི་རྟག་ཉིད། འདི་ཁྱོད་རིག་པ་མིན་ནམ་ཅི།
འདུ་བྱེད་ཐམས་ཅད་སྐད་ཅིག་ལ། ལུས་ཀྱི་གདོན་ནི་སུ་ཞིག་འཛིན།། 57

གང་དག་རྟག་ཏུ་ཉིད་བྱེད་འཁོར་བས་རབ་བརླམས་པའི།
མཚན་མོ་བཀྲ་བའི་ཉིན་པར་རིང་དུ་རབ་འགྲོ་བ།
མི་ཡི་འཚོ་བ་རྣམས་ཀྱི་དགེ་བ་འདི་དག་ནི།
རྒྱ་ཆེ་དུས་ཀྱི་འཁོར་ལོ་ལྷུང་བས་གཅོད་པ་ཉིད།། 58

लब्धप्रवेशः सुगतं दृष्ट्वा निधिमिवाधनः ।
जगाद साश्रुवदनः सुभद्रः प्रणिपत्य तम् ॥ ५२ ॥

भगवन् भुवनस्यास्य केयं भाग्यदरिद्रता ।
संत्यक्तस्याद्य भवता निरालोकस्य का गतिः ॥ ५३ ॥

को नाम त्वां विना भिन्नं ज्ञानालोकैः करिष्यति ।
मोहनिद्रासमुद्रस्य जगत्पद्मस्य बोधनम् ॥ ५४ ॥

कृत्वा समस्तजगतामुपकारमकारणम् ।
प्रयासि सर्व्वसुलभः कथं दुर्लभतां मम ॥ ५५ ॥

इत्युक्तः प्रणयार्त्तेन समुन्नाम्य मुखाम्बुजम् ।
प्रसन्नकान्ति भगवान् सस्मित स्त मभाषत ॥ ५६ ॥

इमां वत्स न वेत्सि त्वं किन्तु नित्यामनित्यताम् ।
क्षणिकाः सर्व्वसंस्काराः कोऽयं देहग्रहाग्रहः ॥ ५७ ॥

दूरं प्रयान्ति दिनकृद्भ्रमनिर्गतानि
यानि क्षताश्रवलितानि सदा दिनानि ।
एतानि तानि निपतत्पृथुकालचक्र-
संक्रान्तितानि शकलानि नृजीवितानाम् ॥ ५८ ॥

རི་འདི་སྐྱིལ་འཁྱུར་ཆུ་གཏེར་འཛིང་ནི་མཆོག་ཏུ་བསྐམས།
རབ་སྐྱེས་འབྱུང་པོ་དང་བཅས་སྲིད་པའི་ལམ་རབ་འཛིན།།
རི་དགས་སྐྲས་མིག་ལྟར་གཡོ་སྙིང་པོ་མེད་འཁོར་བར།
མང་དུ་ཡོངས་འདྲིས་ལུས་ཀྱི་ཚོགས་ནི་བརྟན་གནས་མིན།། 59

ཞེས་པ་གསུངས་ནས་བཅོམ་ལྡན་གྱིས། རབ་ཏུ་ཞི་སྣང་རབ་བཟང་ལ།
བདེན་པའི་ལམ་ནི་གསལ་བའི་གདམས། རབ་དང་ཀུན་དགའ་ལྡན་པར་མཛད།། 60

དབྱིག་བ་གསུམ་དང་རིལ་བའི་ཚོགས། ལམ་འགྲོན་གྱིས་ནི་ཁྲར་བཞིན་བཏང་།
སྟོན་པའི་བཀའ་ལས་རབ་བྱུང་ནི། དེ་ནས་རབ་བཟང་དག་གིས་བླངས།། 61

དེ་ནས་ཉོན་མོངས་ཀུན་བཅོམ་པ། དགྲ་བཅོམ་གནས་ནི་ཐོབ་གྱུར་ནས།
བསམས་པ་ཀྱི་མ་བདག་གི་ནི། སྐྱོབ་པ་ཉིད་འདི་ངེས་པ་མིན།། 62

བདག་གི་མདུན་དུ་བཅོམ་ལྡན་འདས། མྱ་ངན་འདའ་བ་ཇི་ལྟར་བལྟ།
དེ་ནས་སྟོན་ནས་ལུས་བཏང་ནས། བདག་ནི་རང་གི་གནས་དག་བསྟེན།། 63

ཞེས་བསམས་བྱིན་བརླབས་ལྷ་དག་ནི། བསྟེན་པ་དེ་ཡི་དཔལ་བུ་ཡིས།
གདིངས་ཅན་ཤུན་པ་དོར་བ་ལྟར། ཡོངས་སུ་མྱ་ངན་འདས་པ་ཐོབ།། 64

དེ་ནས་དེ་ཡི་ལུས་སྦྱོང་ལ། དགེ་སློང་རྣམས་དང་སུ་ཕྱོགས་དག།
སུ་ཡི་ཚང་སྤྱོད་དང་ལྷར་ཞེས། རྣམ་པར་རྩོད་པ་ཡང་དག་སྐྱེས།། 65

दलन्त्येते शैला जलधिवलयः शुष्यति परम्
सहोद्भूते भूते भुवनसरणिः भ्रश्यतितराम् ।
असारे संसारे चकितहरिणीलोचनचले
चिरस्थायी नायं बहुपरिचयः कायनिचयः ॥ ५९ ॥

अभिधायेति भगवान् सुभद्रस्य प्रशान्तये ।
प्रसादानन्दिनीं चक्रे व्यक्तसत्यपथा कथाम् ॥ ६० ॥

त्रिदण्डकुण्डी सम्भारं त्यक्त्वा भारमिवाध्वगः ।
प्रव्रज्यां शासने शास्तुः सुभद्रोऽप्याददे ततः ॥ ६१ ॥

अर्हत्पदमथासाद्य स सर्व्वक्लेशसंक्षयात् ।
अचिन्तयदहो नेयमुचिता शिष्यता मम ॥ ६२ ॥

पश्यामि परिनिर्व्वाणमग्रे भगवतः कथम् ।
तस्मात् पूर्व्वमहं देहं विहाय स्वपदं भजे ॥ ६३ ॥

इति सञ्चिन्त्य स शनैः पञ्चाधिष्ठानसंश्रयः ।
फणिनिर्मोककलया परिनिर्वृतिमाप्तवान् ॥ ६४ ॥

तस्याथ देहसत्कारे भिक्षूणां सह तीर्थिकैः ।
कस्य सब्रह्मचारीति विवादः समजायत ॥ ६५ ॥

དེ་ནས་སྐུ་སྡིགས་བྱེད་རྣམས་ཀྱིས། དེ་ཡི་སྐྱབ་བྱེད་ཚོག་ལ།
ཁྲིགས་ཁྲིར་མ་ནུས་སོང་བའི་ཚེ། དགེ་སློང་ཚོགས་ཀུན་དག་གིས་བསྐྱབས།། 66

དེ་ནས་དེ་ཡི་གདུང་གི་ཚོགས། མཆོད་རྟེན་བྱས་ནས་དགེ་སློང་གི།
སྟོན་ལམ་མྱ་ངན་འདའ་བ་ཡི། རྒྱ་མཚན་བདེ་བར་བཞེགས་ལ་དྲིས།། 67

དེ་དག་ལ་ནི་དེས་གསུངས་པ། བཱ་རཱ་ཎ་སེར་སྒྲོན་གྲམ་ཟེ།
མྱ་ངན་མེད་དེ་སྟོན་པ་ནི། འོད་སྲུངས་སློབ་མཚུངས་གྲོགས་སུ་གྱུར།། 68

མཐའ་ཡི་མལ་སྟན་ལ་གནས་པ། དེ་ལས་དེ་ཡིས་འདུལ་བའི་ཆོས།
ལྷ་ཡིས་མཐོང་བར་བྱས་ཐོབ་ནས། བསྒྲགས་པར་འོས་པའི་དགྲ་བཅོམ་ཐོབ།།69

གུས་པའི་ངང་ཚུལ་དེ་ཡི་ལུས། རང་གི་བླ་མའི་མདུང་དུ་བཏང་།
དེ་ནས་དེར་ནི་ལྷ་ཡིས་དེར། མཐོང་ནས་སྨོན་ལམ་རབ་དུ་བཏབ།། 70

ཇི་ལྟར་ལེགས་བྱས་ལྡན་པ་འདི། འོད་སྲུངས་སྟོན་དུ་ཡོངས་འདས་པ།
དེ་བཞིན་བདག་ཀྱང་བླ་མའི་མཐར། སྟོན་དུ་འགྲུ་བ་པོར་གྱུར་ཅིག།། 71

ལྷ་དེ་རབ་བཟང་འདི་ཉིད་དེ། རྣམ་པར་དག་པའི་སྨོན་ལམ་དང་།
དད་པ་དེ་ཡིས་ལེགས་བྱས་པ། བདག་གི་མདུན་དུ་ལུས་དག་བཏང་།། 72

སྟོན་པ་འོག་པར་དད་སེལ་གྱིས། མཐའ་ཡི་གཟིམས་ཁལ་དག་ལ་སྟོན།
ལྷ་དེ་རང་གིས་ཁྲིད་གྱུར་པའི། ཐུབ་པ་བརྒྱ་ཕྲག་ལྔ་དག་ནི།། 73

तस्याथ शिबिकां वोढुमशक्तेषु क्रियाविधौ ।
तीर्थिकेषु प्रयातेषु सर्व्वभिक्षुगणोऽभ्यधात् ॥ ६६ ॥

शरीरनिचये स्तूपं कृत्वा तस्याथ भिक्षवः ।
पप्रच्छुः सुगतं पूर्व्वं परिनिर्व्वाणकारणम् ॥ ६७ ॥

स तानुवाच विप्रोऽसौ वाराणस्यामभूत् पुरा ।
अशोकः काश्यपाख्यस्य शास्तुः प्राणसमः सुहृत् ॥ ६८ ॥

स तस्माद्धर्म्मविनयं पर्य्यन्तशयनस्थितेः ।
देवताप्रापितं प्राग्रं स्लाघ्यमर्हत्त्वमाप्तवान् ॥ ६९ ॥

स भक्तिशीलः स्वगुरोरग्रे विग्रहमत्यजत् ।
तं दृष्ट्वा देवता तत्र प्रणिधानमथाकरोत् ॥ ७० ॥

यथायं काश्यपस्याग्रे सुकृती परिनिर्वृतः ।
तथाहमपि भूयासं गुरोरग्रेऽग्रगामिनी ॥ ७१ ॥

सा देवता सुभद्रोऽयं ममाग्रे त्यक्तविग्रहः ।
तेन श्रद्धाविशुद्धेन प्रणिधानेन सत्कृतः ॥ ७२ ॥

ककुत्सन्दस्य शास्तुश्च पश्चिमे शयने पुरा ।
प्राप्तार्हत्पदमालोक्य मुनीनां शतपञ्चकम् ॥ ७३ ॥

དགྲ་བཅོམ་ཉིས་ཐོབ་གྲགས་པ་ཡིས། སྔོན་དུ་ལུས་བདུང་མཐོང་གྱུར་ནས།
རྣམ་པ་དེ་ལྟའི་སྨོན་ལམ་གྱིས། དེ་ཉིད་རབ་བཟང་ཉིད་དུ་གྱུར།། 74

ལུས་ལ་རང་བཞིན་གྱིས་སྐྱེས་པ། མཐུར་ཐུག་ཉེ་བའི་གདུང་བ་འདི།
བཟོད་པར་བྱེད་ཅིང་བདག་གིས་དེ། གདུང་བ་མེད་པའི་གནས་སྐབས་གོད།། 75

དེ་ནི་མི་བདག་ཚངས་བྱིན་དང་། བདག་ཀྱང་རྡར་གྱུར་ཐེ་ཆོས་ལ།
བདག་ནི་རྒྱ་མ་དྲལ་བས་ཀྱང་། དེ་ནི་དགྲ་ཡིས་བཅོམ་པ་བསྐུལ།། 76

ཀ་ཏུ་ཀཔ་ཛའི་ནགས་སུ་སྔོན། ང་ནི་རི་དགས་ཁྲུ་བདག་གྱུར།
རབ་བཟང་ཁྲུ་ཡི་ནང་ནས་ནི། བདག་གི་རྗེས་འབྲང་རི་དགས་གྱུར།། 77

ནགས་སུ་ས་བདག་ཀ་རྟེ་ནི། རྡོན་ལ་འདས་པས་བཀག་གྱུར་ཏེ།
ཆུ་ཀླུང་ངོགས་སུ་རི་དགས་རྣམས། སྐྲག་ཅིང་དགའ་བ་མེད་པར་གྱུར།། 78

དེ་ནས་ཆུ་ཀླུང་ནང་དུ་ནི། གཡོ་མེད་བདག་གིས་རབ་ཏུ་བབས།
བདག་གི་རྒྱབ་ཏུ་རྐང་བཀོད་པས། རི་དགས་འཛེགས་པ་དེ་དག་བསྒྲལ།། 79

དེ་དག་རྨིག་པ་བཀོད་པས་བདག། ཉམས་ཤིང་འཆི་བ་འདོད་གྱུར་ཏོ།
རི་དགས་དེ་ཉིད་གཅིག་བུ་ནི། དེ་ཚེ་རྐྱལ་ཞིང་འོངས་པར་གྱུར།། 80

སྐྲག་པས་ཉེན་པ་དེ་དག་གིས། གདུང་བ་བཟོད་དཀའ་བརྣགས་བྱས་ཏེ།
ཕྱུར་བར་སྐྱིང་རྗེས་ཡང་དག་བསྐུལ། འཇུག་ངོགས་དེར་ནི་ཤི་བར་གྱུར།། 81

स्वयं देवतयानीतं भक्त्याग्रे त्यक्तविग्रहम् ।
तद्विधप्रणिधानेन सैव याता सुभद्रताम् ॥ ७४ ॥

देहे स्वभावजामेतां पर्य्यन्तायतनां व्यथाम् ।
मया प्रसह्यमानेन निर्व्यथः प्रापितः पदम् ॥ ७५ ॥

ब्रह्मदत्तो नृपः सोऽभूदश्वमस्यास्य संशये ।
स मया शत्रुविन्नस्तच्छिन्नान्त्रेणापि तारितः ॥ ७६ ॥

कन्यकुब्जवने पूर्व्वमभवं मृगयूथपः ।
अभूत् सुभद्रस्य मृगो यूथमध्ये मृगानुगः ॥ ७७ ॥

मृगयार्त्तेन संरुद्धे वने कर्णेन भूभुजा ।
त्रस्तानां तटिनीतीरे मृगाणां नागतिर्भवेत् ॥ ७८ ॥

अवतीर्य्य सरिन्मध्ये निश्चलेन मया ततः ।
मत्पृष्ठन्यस्तचरणास्ते भीतास्तारिता मृगाः ॥ ७९ ॥

तत्खुराघातदलिते याते मयि मुमूर्षुताम् ।
एकः स एव हरिणः प्लवन्नेवं तदागतवान् ॥ ८० ॥

तमहं त्रासतरलं व्यथां संस्तभ्य दुःसहाम् ।
तूर्णं सन्तार्य्य कारुण्यात् पुलिने निधनं गतः ॥ ८१ ॥

དེ་ཉིད་རབ་བཟང་དེ་རིང་ཡང་། གདུང་བ་དང་བཅས་བདག་གིས་བསྒྲལ།
ཅེས་གསུངས་བཅོམ་ལྡན་ཞི་བ་ལ། མངོན་ཕྱོགས་མི་གསུང་ཉིད་ལ་བརྟེན།། 82

དགེ་སློང་རྣམས་ཀྱི་རབ་དགའ་ཡང་། དགེ་བ་ཐོབ་པའི་རྒྱུ་མཚན་གྱིས།
གྲུས་པས་མཉེན་ག་ཤེན་ཀུན་མཁྱེན་གྱིས། དལ་བུ་ཡིས་ནི་རབ་ཏུ་གསུངས།། 83

སྟོན་པ་འདོད་སྦྱངས་དག་གི་ནི། དགེ་བསྙེན་གླིང་བཟང་ཞེས་བྱ་བ།
དེ་ཡི་དྲིན་གྱིས་བསླབ་གནས་ནི། ཡོངས་རྫོགས་ཐོབ་ཅིང་གླིང་གནས་གྱུར།། 84

དེ་ཡི་དྲི་ཟའི་ཚོགས་ཀྱི་མཆོག། གླུ་དབྱངས་མཁས་པ་མཐོང་གྱུར་ནས།
དྲི་ཟའི་བདག་པོ་ཉིད་ཀྱི་ནི། ཆེད་དུ་སྨོན་ལམ་རབ་ཏུ་བསྒྲུབས།། 85

དེ་ནི་སྨོན་ལམ་དེ་ཉིད་ཀྱིས། རབ་དགའ་ཉིད་དུ་ཉེ་བར་གྱུར།
བསླབ་པའི་གནས་ནི་ཡོངས་བཟུང་ནས། འདུལ་བའི་ཆོས་ནི་མང་དག་ཐོབ།། 86

རབ་བཟང་རབ་དགའ་འདི་དག་ནི། བདག་གིས་དགེ་བ་ལྡན་པར་བྱས།།
གཞན་གྱི་མངོན་འདོད་བྱས་པ་ལ། ཀུན་ཏུ་བདག་ནི་བདུང་བ་མེད།། 87

གྲོང་ཁྱེར་མཆོད་འོས་ཞེས་བྱ་བ། མཐོ་རིས་དག་དང་མཚུངས་པར་ནི།
མི་བདག་དཔལ་ལྡན་བརྒྱ་བྱིན་བཞིན། རྣམ་པར་རྒྱལ་བ་ཞེས་པ་བྱུང་།། 88

བསོད་ནམས་ལ་ནི་རབ་བཞུགས་དེའི། ཆོས་ལམ་རྗེས་སུ་འབྲང་བ་ཡི།
གྲོང་པ་མཐོ་རིས་བགྲོད་རྣམས་ཀྱིས། ལྷ་ཡི་ས་གཞི་ཁེངས་པར་གྱུར།། 89

स एव सव्यथेनाद्य सुभद्रस्तारितो मया ।
इत्युक्त्वा भगवान् मौन मालम्ब्य शमोन्मुखः ॥ ८२ ॥

भिक्षुभिः कुशलावाप्तौ सुप्रियस्यापि कारणम् ।
पृष्टः प्रोवाच सर्व्वज्ञः शनैः प्रणयिवत्सलः ॥ ८३ ॥

काश्यपस्य सुधीर्नाम शास्तुरासीदुपासकः ।
तत्प्रसादाप्तपर्य्याप्तशिक्षापदप्रसन्नधीः ॥ ८४ ॥

स दृष्ट्वा गीतिकुशलं गान्धर्व्विकगणोत्तमम् ।
प्रणिधानं प्रविदधे गन्धर्व्वाधिपतिं प्रति ॥ ८५ ॥

स तेन प्रणिधानेन सुप्रियत्वमुपागतः ।
संप्राप्तधर्म्मविनयः शिक्षापदपरिग्रहात् ॥ ८६ ॥

सुभद्रसुप्रियावेतौ कृतौ कुशलिनौ मया ।
पराभिमतकृत्येषु निर्व्यथाः सर्व्वथा वयम् ॥ ८७ ॥

अजितोदयसंज्ञेऽभून्नगरे स्वर्गसन्निभे ।
शतक्रतुरिव श्रीमान् विजयन्ताभिधो नृपः ॥ ८८ ॥

तस्य पुण्यप्रवृत्तस्य धर्म्यंमार्गानुयायिभिः ।
व्रजद्भिस्त्रिदिवं पौरैः पूरिताः सुरभूमयः ॥ ८९ ॥

རྒྱལ་པོ་དེ་ཡི་བསོད་ནམས་མཐུས། མི་ཡི་མཐོ་རིས་ཀུན་གང་བ།
མཐོང་ནས་ལྷ་ཡི་དབང་པོ་ཡིས། སྙིང་སྟོབས་ཤེས་འདོད་སྤྲོ་བ་བྱས།། 90

དེ་ནས་བརྒྱ་བྱིན་གྱིས་སྤྲུལ་པའི། སེམས་ཅན་གདུག་པས་ས་ཡི་བདག།
དེ་ལ་ལུས་ནི་བཙན་པ་ཡི། ཤ་དང་ཁྲག་དག་རབ་ཏུ་བླངས།། 91

མི་བདག་བློ་གྲོས་རྣམ་འགྱུར་མེད། དེ་ཡི་མཛེས་འདོད་རྩུས་པའི་ལྷག།
དེ་དག་རྣམས་ལ་བྱིན་ནས་ནི། བསམ་པ་ཆེན་པོས་སྨྲ་ལམ་བཏབ།། 92

ལུས་ཀྱི་སྦྱིན་པའི་བསོད་ནམས་འདས། ལུས་ཅན་རྣམས་ནི་བསྐྱལ་པའི་སྐད།
བླ་མེད་ཡང་དག་རྫོགས་པ་ཡི། བྱང་ཆུབ་ཆེན་པོ་ཐོབ་པ་ཤོག།། 93

དེ་ནས་བརྒྱ་བྱིན་དེར་ཕྱོགས་སྨྲས། རྒྱལ་པོ་རབ་གདུང་ཁྱེད་ཀྱིས་ནི།
ལུས་ནི་རབ་ཏུ་བྱིན་པ་ལ། རྣམ་འགྱུར་བྱུང་ངམ་བདེན་པར་སྨྲོས།། 94

ཞེས་པ་ལྷ་ཡི་དབང་པོས་དྲིས། སྙིང་བ་རྫོགས་པས་རབ་བསྐྱེད་པ།
དགའ་བས་མིག་ནི་རབ་རྒྱས་པས། མི་ཡི་དབང་པོ་དེ་ལ་སྨྲས།། 95

གལ་ཏེ་བདག་ནི་གདུང་བ་ན། རྣམ་འགྱུར་མེད་ན་བདེན་པ་དེས།
བདག་གི་ལུས་འདི་རྨ་བསོས་ཤིང་། མཛེས་ལྡན་རྣལ་དུ་གནས་གྱུར་ཅིག།། 96

ཅེས་པ་རབ་ཏུ་བརྗོད་ཙམ་གྱིས། དེ་ལུས་རབ་མཛེས་རྣལ་གནས་གྱུར།
སྦྱིན་དང་རྣམ་པར་གྲོལ་བ་ཡི། རྒྱུ་སྐར་བདག་པོའི་གཟུགས་བཞིན་ནོ།། 97

राज्ञः पुण्यानुभावेन स्वर्गमापूरितं नरैः ।
दृष्ट्वा युक्तिं चकारास्य सत्त्वं ज्ञातुं सुरेश्वरः ॥ ९० ॥

ततस्तन्निर्मिताः क्रूरसत्त्वास्तं पृथिवीपतिम् ।
मांसं शरीरनिष्कृत्तं रुधिरञ्च ययाचिरे ॥ ९१ ॥

निर्विकारमतिस्तेभ्यः स दत्त्वाभिमतं नृपः ।
अस्थिशेषं प्रविदधे प्रणिधानं महायशाः ॥ ९२ ॥

शरीरदानपुण्येन तारणाय शरीरिणाम् ।
एतेनानुत्तरां सम्यक्सम्बोधिं महामाप्नुयाम् ॥ ९३ ॥

ऊचे शक्रस्तमेत्याथ राजन् प्रव्यथितस्य ते ।
अपि देहप्रदानेऽभूद्विकारः सत्यमुच्यताम् ॥ ९४ ॥

इति पृष्टः सुरेन्द्रेण नरेन्द्रस्तमभाषत ।
अर्थिसंपूरणोद्भूतप्रहर्षोत्फुल्ललोचनः ॥ ९५ ॥

व्यथायां निर्विकारोऽहं यदि सत्येन तेन ते ।
संरूढव्रणसच्छायः स्वस्थ एवास्तु विग्रहः ॥ ९६ ॥

इत्युदीरितमात्रेण कान्तं स्वस्थमभूद्वपुः ।
तस्य मेघविनिर्मुक्तं विम्बं तारापतेरिव ॥ ९७ ॥

མི་བདག་རྣམ་རྒྱལ་དེ་ཉིད་ང་། གཞན་གྱི་དོན་ལ་གདུང་བ་མེད།
ཅེས་པ་བརྗོད་ནས་བཅོམ་ལྡན་འདས། བསམ་གཏན་ལ་ཆགས་སྤྱན་ལྡན་འགྱུར། ། 98

འཕྲུལ་ལ་རི་བོ་བསྐྱོད་པས་བསྒྱུངས་པའི་ཉོན་མོངས་གཟིར་མ་དེ་དང་རི།
ལྷ་ཚོགས་ཆེད་དུ་བདུད་རྩིའི་ཆུ་གཏེར་བསམ་པ་ཆེན་པོས་བཟོད་པར་བྱེད།
ཉི་མེད་ཡིད་ལྡན་ལུས་ནི་གནོད་པ་དང་བཅས་ཆེ་ཡང་རྣམ་འགྱུར་མེད།
གཞན་ཕན་བསྒྲུབ་པར་ཞེས་པ་རྣམས་ལ་གདུང་བ་དག་ཀྱང་བདེ་བར་སྤྱོད། ། 99

ཅེས་པ་དགེ་བའི་དབང་པོས་བྲུས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རབ་བཟང་གི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་པའོ། །

विजयन्तो नृपः सोऽहं परकायेषु निर्व्ययः ।
इत्युक्त्वा भगवान् ध्याननिलीननयनोऽभवत् ॥ ९८ ॥

अचलचलनैर्मैन्यक्लेशच्छटा मन्दताम्बुधिः
सुरगणकृते तां तां सेहे प्रसह्य महाशयः ।
विमलमनसां कायापायक्षणेऽप्यविकारिणाम्
परहितविधौ सन्नद्धानां व्यथापि सुखायते ॥ ९९ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
सुभद्रावदानमशीतितमः पल्लवः ॥ ० ॥

ལམ་འདྲེན་བརྒྱད་ཅུ་རྩ་གཅིག།

ལེགས་སྨོས་ཞིང་ལ་རབ་ཞུང་གང་བདག་དང་།
བྱས་ཤེས་དག་ལ་ཕན་པ་གང་བྱས་དང་།
ཡོན་ཏན་དག་གིས་མཐོ་ལ་གང་བྱིན་པ།
དེ་ནི་ལོ་མ་སྟོང་ཕྲག་འཕེལ་བར་འགྱུར།། 1

ལེགས་ལྡན་གཙན་ཡོད་རྒྱལ་བྱེད་ཀྱི། ཚལ་དུ་བཅོམ་ལྡན་རྒྱལ་བས་སྤྱོད།
གདམས་ཀྱི་ཞར་ལ་ཉེར་འདུས་པའི། དགེ་སློང་ཚོགས་ལ་བཀའ་སྩལ་བ།། 2

གང་ཞིག་རང་གིས་སྤྱད་འོས་པ། དེ་དག་ཐམས་ཅད་འབྲས་བུ་བྲལ།
འཇིག་རྟེན་དུ་ནི་དགྲ་བཅོམ་ལ། གང་ཕུལ་དེ་ཉིད་འབྲས་བུར་ལྡན།། 3

དམ་པའི་སྣོད་ལ་ཡོན་ཉིད་ཀྱིས། ཡོན་ནི་རབ་ཏུ་ཕུལ་བ་དག།
དང་པའི་གྲོགས་བཞིན་མི་ཟད་པས། ཡོན་ཏན་གྲངས་མེད་ལྡན་པར་གྱུར།། 4

གྲོང་ཁྱེར་པཱ་ཊ་ལི་པུ་ཏྲའི། ཚོང་པ་ཙ་ནྜ་ནོར་གཉེར་སྤྱོད།
གཟིངས་ཆེན་དག་ལ་ཞོན་ནས་ནི། ཙ་ནྜ་གླིང་དུ་ཕྱིན་པར་གྱུར།། 5

དེ་ནས་ཙ་ནྜ་ས་མཆོག་སོགས། གླིང་ས་ནས་དགའ་བས་དེ་དག་རྣམས།
དེ་ལས་ཕྱིར་ནི་ལོག་གྱུར་ཏེ། རྒྱ་གཏེར་ཆེན་པོའི་དབུས་སུ་ཕྱིན།། 6

एकाशीतितमः पल्लवः ।

क्षेत्रे सुकृष्टेऽल्पतरं यदुप्तं
कृतं कृतज्ञस्य हिताय यच्च ।
समर्पितं यच्च गुणोन्नताय
शाखासहस्रैस्तदुपैति वृद्धिम् ॥ १ ॥

श्रावस्त्यां भगवान् भव्ये पुरा जेतवने जिनः ।
कथाप्रबन्धोपगतं भिक्षुसङ्घमभाषत ॥ २ ॥

विफलं सर्व्वमेवैतत् स्वभोगाय यदर्ज्यते ।
तदेव सफलं लोके यत्समर्पितमर्हते ॥ ३ ॥

दक्षिणा दक्षिणतया सत्पात्रप्रतिपादिता ।
असङ्ख्यगुणतामेति सत्सङ्गतिरिवाक्षया ॥ ४ ॥

पुरा पाटलिपुत्रीया वणिजश्चन्दनार्थिनः ।
महाप्रवहणारूढाश्चन्दनद्वीपमाययुः ॥ ५ ॥

गोशीर्षचन्दनचयं समादाय ततस्ततः ।
हृष्टाः प्रतिनिवृत्तास्ते प्रापुर्मध्यं महोदधेः ॥ ६ ॥

གྲུ་ཆེ་དུས་མིན་རླུང་འཚུབ་ཀྱིས། བསྐྱོད་པའི་བ་རླབས་སྤོབས་ཀྱིས་དེར།
དུས་ཀྱི་རྩེ་དགའ་གཡོ་བ་ཡིས། གཟིངས་ནི་བརླམས་པ་མེད་པར་གྱུར།། 7

སྐྱོབ་པ་དོན་གཉེར་ཚོང་པའི་ཚོགས། ལྷ་ལ་བསྟོད་པ་བྱེད་པའི་ཚེ།
དོན་མཐུན་ཡིད་ལ་རེ་བ་དང་། ལྷན་ཅིག་གཟིངས་ནི་ཞིག་པར་གྱུར།། 8

མི་བཟང་སྒྲོག་ལ་ཕྲེ་ཆོས་དེར། དོན་མཐུན་འདྲེན་པ་བསོད་ནམས་སྐྱེ།
ཞེས་པ་འདར་བ་དང་བཅས་པས། ཡོངས་སུ་བསྐྱོབ་པ་རབ་ཏུ་བསམས།། 9

བདག་གི་ཁྲིམས་དང་ཉེ་བ་ན། དགེ་བསྙེན་ཆོས་ཀྱི་བྱང་ཆུབ་ཡོད།
དེ་ནི་ཉོན་མོངས་དུས་དག་ཏུ། སྟོན་པ་རྒྱ་ཡི་མཚོ་ཉིད་བསྟོད།། 10

ཅེས་པ་ཡིད་ཀྱིས་རབ་བསམས་ནས། དེ་ཉིད་ལ་ནི་སྐྱབས་སོང་སྟེ།
དེད་དཔོན་མཆེ་མ་དང་བཅས་པས། འཛིགས་ཤིང་ངལ་བས་ཐྲིབ་ལྷབི་སླས།། 11

རྫོགས་པའི་སངས་རྒྱས་རྒྱ་ཡི་མཆོག། དགེ་བ་ཡི་ནི་དཔག་བསམ་ཤིང་།
ཉོན་མོངས་ཅན་ཀུན་བདེ་མཛད་པ། དགྲ་བཅོམ་ཆེ་ལ་ཕྱག་འཚལ་ལོ།། 12

ཞེས་པ་དེ་ཡིས་བརྗོད་པའི་ཚེ། འཕྲུལ་ལ་རྒྱ་མཚོ་འི་ལྷ་འོངས་དེ།
དོན་མཐུན་སྒྲོག་ནི་སྐྱར་བྱུང་ཉམས། རྒྱ་གཏེར་གྱི་ནི་ངོགས་སུ་བསྐྱལ།། 13

འཛིགས་ཆེན་དེ་ལས་གྲོལ་གྱུར་པ། དེ་དག་རང་གི་ཡུལ་དུ་ཕྱིན།
རྒྱ་ཡི་མཆོག་ལ་ཕྱག་བྱེད་ལ། དུས་ཀུན་དུ་ནི་ཆགས་པར་གྱུར།། 14

विपुलाकालवातालीवलितोर्म्मिबलैरभूत् ।
तत्र प्रवहणं कालदोलाकेलिविशृङ्खलम् ॥ ७ ॥

त्राणार्थिनि वणिक्चक्रे चिद्दशस्तोचकारिणि ।
अभज्यत प्रवहणं सहसार्थमनोरथम् ॥ ८ ॥

पुण्यसेनाभिधस्तत्र विषमे प्राणसंशये ।
अचिन्तयत् परित्राणं साकम्पः सार्थनायकः ॥ ९ ॥

अस्ति मद्वेश्मनिकटे धर्म्मबोधिरुपासकः ।
हेतूत्तमं क्लेशकाले स्तौति शास्तारमेव सः ॥ १० ॥

इति सञ्चिन्त्य मनसा तमेव शरणं गतः ।
ऊचे सार्थपतिः सास्रः साध्वसायासगद्गदः ॥ ११ ॥

हेतूत्तमाय महते संबुद्धायार्हते नमः ।
कल्याणकल्पवृक्षाय सकलक्लेशशर्म्मणे ॥ १२ ॥

इत्युक्ते तेन सहसा समभ्येत्याब्धिदेवता ।
सार्थं प्रत्यागतप्राणं चिक्षेप जलधेस्तटे ॥ १३ ॥

तस्मान् महाभयान्मुक्ता स्ते स्वदेशमुपागताः ।
हेतूत्तमनमस्कारनिरताः सर्व्वदाभवन् ॥ १४ ॥

གནས་སྐབས་དེར་ནི་སྟོན་པ་དག། རྒྱུ་ཡི་མཆོག་གི་སྐུ་ལ་ནི།
ལས་ཀྱི་ལྷག་མ་འགའ་ཡི་རིམས། དྲག་པོའི་གདུང་བ་གནས་པར་གྱུར།། 15

གང་དག་གཟིགས་པ་སྲིད་པའི་འཇིགས་པ་ཆེན་པོའི་སྨན་གྱིས་ནི།
འགྲོ་བ་ཐམས་ཅད་ལེགས་པར་བསོས་པ་ཉིད་ནི་བསྒྲུབས་མཛད་པ།
དེ་དག་གིས་ཀྱང་རང་ལས་འཕྲི་ཤིང་ཁྲུད་པར་ཆགས་པའི།
ལྷག་མ་ལྷག་པར་གནས་ཤིང་ཆགས་པ་དག་ནི་བཏོང་མི་འགྱུར།། 16

དེ་ཡི་དྲག་པོར་གདུང་བ་ནི། ཉི་སྨད་ཙནྡན་ས་མཆོག་དག།
རྒྱལ་པོ་ཟླ་བ་སྣང་ཞེས་པས། ཐམས་ཅད་དུ་ནི་བཙལ་བར་བརྩམས།། 17

ས་བདག་གིས་ནི་འབུམ་ཕྲག་བཞིས། དེད་དཔོན་དེ་ལ་དོན་དུ་གཉེར།
ཙནྡན་ས་མཆོག་ས་ལ་ནི། ཉིད་དཀའ་སྲིད་གཅིག་བྱིན་མ་གྱུར།། 18

དེད་དཔོན་རང་ཉིད་མདོན་ཕྱོགས་དེ། དྲན་པ་ཙམ་གྱིས་ཕན་མཛད་པ།
སྟོན་པའི་སྐུ་ལ་ཙནྡན་གྱིས། གུས་པ་ཡིས་ནི་བྱུགས་པ་བྱས།། 19

དོ་ཤལ་དང་ནི་ཁ་བའི་ཚོགས། ཟླ་བ་བསིལ་བ་དམན་བྱེད་པ།
གྲགས་པ་ལྷར་དཀར་ཙནྡན་དེས། རྒྱལ་བ་རྣལ་དུ་གནས་པར་གྱུར།། 20

དེ་ཡིས་བསོད་ནམས་མཐུ་ཡིས་ནི། དཔལ་དང་ལྡན་པ་བསོད་ནམས་སྡེ།
ཟླ་བའི་འོད་དང་ཡོན་ལག་ཀུན། རྨད་བྱུང་རྗེ་བཟང་ལྡན་པར་གྱུར།། 21

तस्मिन्नवसरे शास्तुः कर्म्मशेषेण केनचित् ।
गात्रे हेतूत्तमस्याभूत् तीव्रतापस्थितिज्वरः ॥ १५ ॥

ये स्वस्थतां भवमहाभयभेषजेन
कुर्व्वन्ति सर्व्वजगतामवलोकनेन ।
तेऽपि प्रसक्तनिजकर्म्मलताविशेषे
शेषाधिवासकलनां न परित्यजन्ति ॥ १६ ॥

गोशीर्षचन्दनं तस्य तीव्रसन्तापशान्तये ।
राजा चन्द्रावलोकाख्यः सर्व्वत्रान्वेष्टुमाययौ ॥ १७ ॥

लक्षैः क्रतुभिर्भूपेन स सार्थपतिरर्थितः ।
गोशीर्षचन्दनमलं न ददौ भुवि दुर्लभम् ॥ १८ ॥

भक्त्या स्वयं समभ्येत्य स्मृतिमात्रोपकारिणः ।
शास्तुः सार्थपतिश्चक्रे वपुश्चन्दनचर्च्चितम् ॥ १९ ॥

तेन हारतुषारौघशशिशैत्योपहासिना ।
स्वस्थः स्वकीर्त्तिशुभ्रेण चन्दनेनाभवज्जिनः ॥ २० ॥

तेन पुण्यानुभावेन पुण्यसेनः शशिप्रभः ।
श्रीमान् बभूव सर्व्वाङ्गप्रोद्भूताद्भुतसौरभः ॥ २१ ॥

དེ་ཡི་ཙནྡན་རིན་ཆེན་སོགས། རྒྱ་མཚོ་ཆུ་ལ་གང་ལྷུང་བ།
དེ་དག་ཐམས་ཅད་རང་ཁྱིམ་དང་། ཉེ་བར་ཁྲོན་པའི་ནང་ནས་བྱུང་། ॥ 22

ཚོང་པ་རྣམས་ལ་ཙནྡན་སོགས། རང་རང་དག་ལ་དེས་བྱིན་ནས།
ཟས་དང་རིན་ཆེན་གོས་རྣམས་ཀྱིས། ཁྱིམ་དུ་དགེ་སློང་དགེ་འདུན་མཆོད། ॥ 23

དེ་ནས་དེད་དཔོན་དག་གིས་ནི། མཆོག་གི་མཐུ་ཡིས་བརྒྱན་པའི་དཔལ།
མཐོང་ནས་མངོན་དུ་ཉེར་གནས་ཀྱིས། དེ་ཡིས་ལེགས་བྱས་རྒྱལ་ལ་དྲིས། ॥ 24

དེ་ནས་བཅོམ་ལྡན་རྒྱུ་ཡི་མཆོག། འཛུམ་དང་བཅས་པས་དེ་ལ་གསུངས།
དེད་དཔོན་གྱིས་ནི་ཙནྡན་གྱིས། གུས་ལ་བྱུགས་པས་དཔལ་འབྱོར་ཐོབ། ॥ 25

བསོད་ནམས་སྨོ་ནི་ལེགས་བྱས་ཀྱི། ངང་ཚུལ་དག་གིས་ལས་དེ་བྱས།
བདུད་རྩི་ཉིད་ནི་རབ་ཐོབ་པ། གང་གི་འདི་དག་ཆ་ཡི་ཕྱོགས། ॥ 26

དགེ་བའི་རྩ་བ་སྨིན་པ་ན། སྐྱེ་བ་ཐ་མ་དག་ལ་འདི།
རབ་བྱུང་བླ་མེད་ཡང་དག་པར། རྫོགས་པའི་བྱང་ཆུབ་ཐོབ་པར་འགྱུར། ॥ 27

བསོད་ནམས་དག་གི་ཙནྡན་ཞིང་། ཡངས་པ་ཡི་ནི་རྩ་བར་འདི།
ཙནྡན་དཔལ་ཞེས་གྲགས་པ་ཡི། དེ་བཞིན་གཤེགས་པ་ཉིད་དུ་འགྱུར། ॥ 28

དེ་སྐད་བཅོམ་ལྡན་རྒྱུ་ཡི་མཆོག། ཡེ་ཤེས་སྤྱན་དང་ལྡན་པས་གསུངས།
ཞེས་པ་ཤཱ་ཀྱ་ཐུབ་པ་ཡིས། གསུངས་ཚེ་དགེ་སློང་ཡ་མཚན་གྱུར། ॥ 29

तस्य चन्दनरक्तादि च्युतं यत्सागराम्भसि ।
तत्सर्व्वं स्वगृहोपान्तकूपमध्यात् समुद्गतम् ॥ २२ ॥

निजं निजं स मत्त्वा च वणिजां चन्दनादिकम् ।
भोज्यरत्नाम्बरैर्गेहे भिक्षुसङ्घमपूजयत् ॥ २३ ॥

अथ सार्थपतेर्दिव्यप्रभावाभरणां श्रियम् ।
दृष्ट्वोपस्थापकेनाग्रे पृष्टस्तत्सुकृतं जिनः ॥ २४ ॥

हेतूत्तमोऽथ भगवान् सस्मित स्तमभाषत ।
प्राप्ता श्रीः सार्थवाहेन लिम्पता चन्दनेन माम् ॥ २५ ॥

कृतं सुकृतशीलेन पुण्यसेनेन कर्म्म तत् ।
अमृतत्वमवाप्तस्य यस्यैता लेशविप्रुषः ॥ २६ ॥

पाके कुशलमूलानामेष जन्मनि पश्चिमे ।
प्रव्रज्यानुत्तरां सम्यक्सम्बोधिं समवाप्स्यति ॥ २७ ॥

चन्दनश्रीरिति ख्यातः पुण्यचन्दनशाखिनः ।
एवं मूले विशालस्य भविष्यति तथागतः ॥ २८ ॥

इति हेतूत्तमः प्राह भगवान् ज्ञानलोचनः ।
इत्युक्ते शाक्यमुनिना भिक्षवो विस्मयं ययुः ॥ २९ ॥

ལེགས་བྱས་ཅན་གྱི་དད་པའི་སྨིན་པའི་ཆ་ཡི་སྒྱུ
གྱུ་ལོ་འདབ་བརྒྱ་ཡིས་འཛེལ།
དཀྲ་བཅོམ་ཞིང་ལ་ཡང་དག་བདབ་པ་ཡོངས་སུ
སྨིན་ཅི་ཆགས་བྲལ་ཕུན་ཚོགས་འབྲས།
གང་ལ་སྐབས་གསུམ་བདག་པོ་དྲི་མེད་གདུགས་ཅན
དར་ཞིང་བསོད་ནམས་དྲི་ཡིས་རྒྱགས།
རབ་དགའི་གྲོགས་པོ་ཕུན་ཚོགས་འདི་དག་མི་རྟོག
གསར་པ་ཉིད་དུ་རབ་ཏུ་རྒྱས།། 30

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རྒྱུའི་མཆོག་གི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་གཅིག་པའོ།།

अर्हत्क्षेत्रसमर्पणात् परिणतौ वैराग्यलक्ष्मीफलः
श्रद्धादानकणाङ्कुरः सुकृतिनां शाखाशतैर्वर्धते ।
यस्यैतास्त्रिदशाधिपत्यविशदच्छायोदयाः सम्पदः
पुण्यामोदमदप्रमोदसुहृदः प्रत्यग्रपुष्पोद्भवाः ॥ ३० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
हेतूत्तमावदानमेकाशीतितमः पल्लवः ॥ ० ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་གཉིས་པ།

འཇིག་རྟེན་ཕ་རོལ་བློ་ལྡན་དོན་མེད་བྱ་ལ་ཆགས་པ་ཅི་སྣང་སྒྲུབ།
བསོད་ནམས་གང་རིགས་དེ་ནི་རང་གིས་བྱས་ཏེ་གཞན་གྱིས་བྱས་པ་སྤྱོད་མ་ཡིན།
གང་གིས་སྡིག་པའི་ལས་རྣམས་མ་ལུས་རིགས་ནི་རྣམ་པར་ལྷུང་ཞིང་བཞིན་
དམན་ཉམས་བྱེད་པ།
དེ་དག་མཚུངས་མེད་གདུག་པའི་བྱ་བ་ལ་མཁས་བྱ་ནི་འགའ་ཡི་རྣམ་པ་
བསྒྲུབས།། 1

མཉན་ཡོད་དུ་སྔོན་ཁྱིམ་གྱི་བདག། ཕོས་པའི་མགོ་ཆ་དག་གིས་ནི།
ཀྱང་མ་རྒྱལ་བའི་སྒོ་ལ་བྱ། སྤྱིད་པའི་མགོ་ཆ་ཞེས་པ་བྱུང་།། 2

དལ་བུ་དལ་བུས་བྲིས་པ་དེ། ཁྲི་ཤུག་དེ་དག་གིས་བསྐྱེད་དེ།
རིགས་བརྒྱུད་ཁྱད་འཕགས་ཁྱད་པར་ཀྱིས། རེ་བ་རྣམ་པར་འགོད་པ་བྱས།། 3

དུས་ཀྱི་ཕ་ནི་དུས་དབང་དུ། སོང་ཚེ་སྤྱིད་པའི་མགོ་ཆ་ནི།
མཛེར་ཞིང་སྨོངས་པས་གཟིར་བ་ཡི། མ་ཡིས་བསྐྱེད་བསྲིངས་བསྐྱངས་
པར་གྱུར།། 4

ཁྱིམ་མཚེས་གྲོགས་པོ་དག་དང་ནི། ལྷན་ཅིག་རྩེ་ཞིང་མ་བསླམས་པ།
ལས་ཚོ་དག་ལ་གནས་པ་དེ། གཉིས་འཐུང་ལྕུགས་ཀྱུ་མེད་བཞིན་འཁྲུམ།། 5

ལག་འགྲོ་རྒྱ་ལམ་ནས་བགྲོད་དེ། དཔའ་བ་ཡི་ནི་བུད་མེད་དག།
མཛེས་པ་ཞེས་པ་ཁང་བཟང་གི། རྩེ་མོ་དག་ན་གནས་པ་མཐོང་།། 6

द्व्यशीतितमः पल्लवः ।

लोकः किं परलोकधीः प्रकुरुते पुत्राय मिथ्यास्पृहाम्
तत्पुण्यं क्रियते स्वयं यदुचितं नान्यैः कृतं भुज्यते ।
पुत्रस्तद्विदधाति कश्चिदसमक्रूरक्रियाकोविदः
पापाद् येन निपातभग्नवदनः सीदत्यशेषान्वयः ॥ १ ॥

पुराभवद् गृहपतेः श्रावस्त्यां श्रुतवर्म्मणः ।
जायायां जयसेनायां भववर्म्माभिधः सुतः ॥ २ ॥

तौ दम्पती शिशौ तस्मिन् वर्द्धमाने शनैः शनैः ।
वंशोत्कर्षविशेषाशाविनिवेशं प्रचक्रतुः ॥ ३ ॥

कालेन कालवशगे जनके भववर्म्मणः ।
जननी स्नेहमोहार्त्ता संवर्द्धनपराभवत् ॥ ४ ॥

प्रातिवेश्यवयस्येन सह लीलाविशृङ्खलः ।
यौवनस्थः स बभ्राम निरङ्कुश इव द्विपः ॥ ५ ॥

व्रजन्तं राजमार्गेण भुजङ्गसुभटाङ्गना ।
ददर्श सुन्दरी नाम तं हर्म्यशिखरस्थिता ॥ ६ ॥

མངོན་པར་སྤྲིད་དང་ལྡན་པ་དེས། འཇོ་སྒྲིག་ལྡན་ལ་རྣམ་པར་བལྟས།
བཞིན་འཛུམ་མ་དེས་དེ་ཡིས་ནི། སྤྱི་བོར་མི་དོག་འཕྲེང་བ་འཕངས། 7

ཁྲུམ་མཆོས་དེ་ཡིས་དེ་དག་གིས། བསམ་པ་རྣམ་འཕྲུལ་དང་བཅས་པ།
མཐོང་ནས་ལོངས་སྤྱོད་གོ་བྱེད་པའི། བརྡ་རྣམས་ཐམས་ཅད་རིག་པར་གྱུར། 8

གྲོགས་ལ་མཛའ་བས་ཆགས་གྱུར་ཅིང་། གནོད་པ་འབྱུང་བར་དོགས་པ་ཡིས།
འཛིགས་པ་དེ་ནི་སོང་གྱུར་ནས། སྲིད་པའི་གོ་ཆའི་མ་ལ་སྨྲས། 9

ཁྱོད་ཀྱིས་བུ་དང་དཔའ་བོ་ཡི། བུད་མེད་གསལ་བའི་བརྡ་དག་བྱས།
མཚན་མོ་རྣམ་པར་ན་ཉལ་བ། དམན་མིན་རྒྱུ་ཞིང་འགྲོ་བར་འགྱུར། 10

མི་ཡི་རི་དགས་འཁོར་བ་སྡུག་བསྔལ་ནགས་ཚལ་འདིར་ནི་རྒྱུ་བྱེད་ཅིང་།
མཆོག་ཏུ་ལོངས་སྤྱོད་ཀྱིས་འཁྲུགས་མ་ལུས་བདེ་བའི་རྩ་ལ་ཆགས་གྱུར་རྣམས།
འཇིག་པའི་བྱ་བ་དང་ལྡན་རྔོན་པ་ཞགས་པ་དག་ཏུ་ལྷུང་འགྱུར་དེ།
མཐུག་ཏུ་དུག་ལྡན་རྣོ་བའི་མཚོན་རྣམས་དག་གིས་བརྒྱག་པ་ཐོབ་པར་འགྱུར། 11

གཡོ་བའི་བསམ་པ་དང་ལྡན་ཞིང་། རེ་ཞིག་ཉིན་པར་བདག་གིས་བསྲུང་།
མཚན་མོ་ཁྱོད་ཀྱིས་བསྲུང་བར་བྱ། ཞེས་པ་བརྗོད་ནས་གྲོགས་པོ་སོང་། 12

དེ་ནས་ཁྱིམ་ནང་དུ་ཉལ་བྱ། སྐྲ་རྩ་ཉལ་བའི་མ་ཡིས་ནི།
མཚན་མོ་རབ་ཏུ་སད་བཞིན་དུ། ཀུན་ཏུ་བསྲུང་བ་ལ་ཆགས་གྱུར། 13

सा तेन साभिलाषेण सविलासं विलोकिता ।
उत्ससर्ज स्मरसखीं तन्मूर्द्ध्नि कुसुमस्रजम् ॥ ७ ॥

तयोः सविभ्रमाकूतं स दृष्ट्वा प्रातिवेशिकः ।
सम्भोगसूचकं सर्व्वं स सङ्केत ममन्यत ॥ ८ ॥

स गत्वा चकितः प्राह जननीं भवशर्म्मणः ।
सुहृदः स्नेहसंसक्तः शङ्कमानः पराभवम् ॥ ९ ॥

पुत्रस्ते कृतसङ्केतः स्पष्टं सुभटयोषिता ।
रजन्यामविनीतोऽद्य स्वैरचारी गमिष्यति ॥ १० ॥

चरन्तः संसारव्यसनगहनेऽस्मिन्नरमृगा
भृशं भोगव्यग्रा निखिलसुखशस्यप्रणयिनः ।
विनाशव्यापारस्मरशवरपाशे निपतिता
लभन्ते पर्य्यन्ते विषयभितशस्त्रै र्विशसनम् ॥ ११ ॥

वासरे रक्षितस्तावन्मयायं चपलाशयः ।
रक्षणीयस्त्वया रात्रा वित्युक्ता प्रययौ सुहृत् ॥ १२ ॥

अथान्तर्गृहसुप्तस्य पुत्रस्य द्वारशायिनी ।
माता निशि प्रबुद्धैव संरक्षणपराभवत् ॥ १३ ॥

ཆུ་ཡི་དག་བྱེད་ཟློལ་གྱིས་ནི། ཕྱིར་འབྱུང་ཞུ་བར་བྱེད་པ་ལ།
མཛའ་བས་སྨྲོངས་པའི་མ་ཡིས་ནི། ཕྱིར་ལ་འཐོན་པ་བྱིན་མ་གྱུར།། 14

དེ་བསམས་ཀྱི་མ་དགའ་བ་ཡི། བུད་མེད་རིན་ཅན་དང་འགྲོགས་ལ།
གེགས་ནི་སྐྱེད་པར་བྱེད་པ་ཡི། བདག་གི་མ་འདི་ཅི་ཡི་སྐྱུལ།། 15

རེ་ཞིག་སྐལ་བས་མ་ནི་བདག། ལང་ཚོ་ལྡན་ཞིང་འཚོ་བར་གྱུར།
བསོད་ནམས་མིན་པས་སྐྱུལ་ནག་ནི། འཛིགས་རུང་མ་ནི་ཁྱིམ་ན་གནས།། 16

གཉིད་དང་བྲལ་མ་འདི་ལ་ནི། གལ་ཏེ་བདག་གིས་འགོམས་ཕྱིན་ན།
འདི་ལ་འཐབ་མོ་འི་སྨྲ་བརྗོད་ཀྱིས། སྐྱེ་བོ་རྣམས་ཀྱང་རབ་སད་གྱུར།། 17

མཚན་མོ་ཐལ་ཆེ་ཡོངས་ཟད་ཅིང་། མཛེས་མ་རིང་ལ་བདག་ཅི་བྱེད།
སྐལ་བ་དམན་པ་བདག་ལ་ནི། སྐལ་བཟང་མ་དེ་ཇི་ལྟར་མོད།། 18

ཁང་བཟང་ནང་དུ་སོན་ཞིང་རྣམ་པར་བལྟ་བའི་རོ་ལས་བཞིན་གྱི་ཆུ་སྐྱེས་དུད།
ནུ་བའི་ཨུ་དྲ་ལ་ལྷུང་བར་གྱུར་པས་མིག་གི་མཛེས་པ་ནུ་བ་དག་ལ་སྤེར།
ནུ་རྒྱན་འོད་ཟེར་དག་གིས་འཁྲུས་པ་ཟུང་ལ་པ་དྲའི་འཕྲེང་བ་རྣམ་པར་འཛིན།
མཛེས་མ་དེ་ནི་ལེགས་ལྡན་དག་གིས་སྐལ་བ་རྣམས་ཀྱིས་སྨྲད་བྱ་འོས་རུ་འགྱུར།།
19

དེ་ལྟར་བསམས་པས་གཟིར་ཞིང་སྐྱོ། ཡང་དང་ཡང་དུ་སྒྲོང་བྱེད་པ།
དེ་ལ་མ་ཡིས་འདི་ཉིད་དུ། གཙང་པ་མཛོད་ཅེས་རབ་ཏུ་སྨྲས།། 20

वारिशौचापदेशेन याचमानस्य निर्गमम् ।
न निर्गन्तुं ददौ तस्य जननी स्नेहमोहिता ॥ १४ ॥

सोऽचिन्तयदहो रम्यरामारत्नसमागमे ।
केनेयं विघ्नजननी जननी मम निर्म्मिता ॥ १५ ॥

भाग्यैर्मे जनकस्तावद् यौवने निधनं गतः ।
इयन्त्वपुण्यैः कङ्काली कालव्याली गृहे स्थिता ॥ १६ ॥

गच्छाम्येनां समुल्लङ्घ्य निद्राविरहितां यदि ।
तदस्याः कलहालापै र्जनोऽपि प्रतिबुध्यते ॥ १७ ॥

प्रायः क्षपा परिक्षीणा दूरे कान्ता करोमि किम् ।
सुलभा भाग्यहीनस्य कथं सा सुभगा मम ॥ १८ ॥

हर्म्योत्सङ्गगता त्रिलोकनरसान्नम्राननाम्भोरुहा
न्यस्तस्य श्रवणोत्पलस्य नयनच्छायां दिशन्ती पदे ।
ताडङ्कद्युतिभिः कपोलयुगले पत्रावलीं बिभ्रती
भाग्यै र्भोगभुवं प्रयाति सुभगा भव्यस्य सा सुन्दरी ॥ १९ ॥

इति चिन्तातुरं द्वारं याचमानं पुनः पुनः ।
अत्रैव क्रियतां शौचमिति माता तमब्रवीत् ॥ २० ॥

དེ་ནས་རལ་གྲིས་མ་ཡི་མགོ། །བཅད་ནས་དེ་ནི་མགྲོགས་པར་སོང་། །
ཆགས་པ་ཉེར་བསྟུན་སྡིག་བདག་ཉིད། །ངན་པ་རྣམས་ལ་བྲ་མིན་ཏེ།། 21

མཚན་མོ་ངལ་དུབ་མ་རྩིས་པར། །མཛེས་མའི་ཁང་པར་དེ་སོང་ནས། །
མཁས་ཤིང་ལོངས་སྤྱོད་ལ་ཆས་མ། །དེ་ནི་དབེན་པར་ཡང་དག་ཐིབ།། 22

དེ་ལ་རང་གིས་བྱས་པའི་སྡིག །གྱུས་པའི་སྐད་དུ་དེ་ཡིས་བཤད། །
གང་གིས་སྨད་པ་ཉིད་འགྱུར་པ། །དེ་ཉིད་ལ་ནི་སྨོངས་པ་བསླུགས།། 23

མ་བསད་སྡིག་པ་དྲག་པོ་ནི། །ཐོས་ནས་འདར་བར་གྱུར་བ་དེ། །
གདུམ་པོ་ལ་བཞིན་དེ་ལ་ནི། །རེག་ལ་ཤིན་དུ་ཕྱིར་ཕྱོགས་གྱུར།། 24

དེ་ཡི་གནས་ནས་ཁང་བཟང་ལ། །འཇིག་པའི་ཐོལ་གྱིས་དེ་སོང་སྟེ། །
སྡིག་པ་རྣམས་ཀྱིས་གྱུས་པ་ཡིས། །སྲིད་ལྡན་དག་ཀྱང་ཆགས་བྲལ་གྱུར།། 25

སྡིག་པ་ལས་ནི་ཕྱིར་ཕྱོགས་མ། །དེ་ཡིས་བ་གམ་མཐོན་པོར་འཛེགས། །
འདི་ནི་ཆོས་ཀུན་ཆོས་ཀུན་ཞེས། །འཇིགས་པ་བཞིན་དུ་སྐད་ཆེར་བསྒྲགས།། 26

འཁོར་གྱི་སྐྱེ་བོས་རྒྱུགས་པའི་ཚེ། །འཇིགས་པས་ཉེན་པ་དེ་རབ་བྲོས། །
ཇི་སྲིད་རང་གི་ཁྱིམ་དུ་སོང་། །ཁྱི་རྣམས་ཀྱིས་ནི་ཙ་ཙོ་བྱས།། 27

བདག་གི་མ་ནི་ཆོས་ཀུན་གྱིས། །བསད་ཅེས་སྐད་ཆེར་རབ་སྨྲ་ཞིང་། །
སྤྲ་རྡོ་དེ་ཡིས་མ་ཡི་ནི། །ལུས་ལ་སོགས་པ་སྣང་བ་བྱས།། 28

अथ मातुः शिरश्छित्त्वा खड्गेन स ययौ जवात् ।
रागोपदिष्टपापानां किमकार्य्यं दुरात्मनाम् ॥ २१ ॥

रात्रावगणितायासः स गत्वा सुन्दरीगृहम् ।
रहः सम्भोगसन्नद्धां विदग्धा मारससाद ताम् ॥ २२ ॥

स तस्यै स्वकृतं पाप मादराय न्यवेदयत् ।
तेनैव मूर्खाः श्लाघन्ते येनैवायान्ति निन्द्यताम् ॥ २३ ॥

तस्य मातृवधक्रूरपापश्रवणकम्पिता ।
श्वपाकस्येव संस्पर्शे विमुखी साभवत् परम् ॥ २४ ॥

हर्म्याधिरोहणव्याजात् सा जगाम तदन्तिकात् ।
साभिलाषोऽपि पापानामाचारेण विरज्यति ॥ २५ ॥

उच्चहर्म्यसमारूढ़ा प्रौढ़पापपराङ्मुखी ।
चौरश्चौरोऽयमित्युच्चैश्चुक्रोश चकितेव सा ॥ २६ ॥

प्रधाविते परिजने भयदिग्धः स विद्रुतः ।
ययौ जवान्निजगृहं कृतकोलाहलः श्वभिः ॥ २७ ॥

हता मे जननी चौरैरिति तारप्रलापवान् ।
प्रभाते विदधे मातुः स शरीरादिसत्क्रियाम् ॥ २८ ॥

རབ་བསྒྲིབས་སྡིག་པའི་གདུང་བ་ཡིས། སྡིག་ཅིང་ཞེན་དུ་མི་བཟད་པའི།
དམྱལ་བར་ལྷུང་བ་དེ་བསམས་དེ། འབྱུང་པོ་བཞིན་དུ་ས་ལ་འཁྲམས།། 29

སྡིག་པ་སྨྲ་བྱེད་དེ་ཡིས་ནི། ཕྱིར་བཅོས་དྲིས་ལ་གཉིས་སྐྱེས་ཀྱིས།
སྨྲས་པ་མ་བསད་དྲག་པོ་ཡི། སྡིག་པ་དག་ལ་བཅོས་ཐབས་མེད།། 30

དེ་ནས་རྒྱལ་བྱེད་ཚལ་སོང་བས། དེར་ནི་དགེ་སློང་ཚོགས་བརྗོད་པའི།
སྡིག་པ་ཐམས་ཅད་ཉམས་བྱེད་པའི། ཆོས་ཀྱི་ཁ་དོན་རབ་ཏུ་ཐོས།། 31

དེར་ནི་བློ་ལྡན་རབ་བྱུང་སྟེ། ཁ་དོན་དག་ལ་མཆོག་ཏུ་ཆགས།
དེ་ནས་དེ་ནི་སྡེ་སྣོད་གསུམ། བརྗོད་ཅིང་ཆོས་ཀྱི་གཏམ་ཅན་གྱུར།། 32

དེ་ནས་ཀུན་མཁྱེན་བཅོམ་ལྡན་འདས། མངོན་ཕྱོགས་དགེ་སློང་ཚོགས་གསུངས།
སྡིག་ཅན་འདི་ལ་རབ་བྱུང་ནི། ཁྱོད་ཀྱིས་ཅི་སླད་ཡང་དག་བྱིན།། 33

མ་བསད་དྲག་པོར་གྱུར་པ་ཡི། སྡིག་པ་དེ་ཡིས་བག་མེད་འདི།
མཐུག་ཏུ་མནར་མེད་ཚ་བར་ནི། ཡུན་རིང་གནས་ལ་རབ་ཏུ་ཉེ།། 34

དེ་བཞིན་གཤེགས་པས་དེ་གསུངས་ཚེ། དེ་ཡང་མཁན་པོ་ཉིད་དུ་གྱུར།
དུས་ཀྱིས་དུས་ཀྱི་མཐུག་ཏུ་ནི། འཇིགས་སུ་རུང་བའི་དམྱལ་བ་ཐོབ།། 35

དེར་ནི་མནར་མེད་ཚོགས་འཁྲུངས་པ། མི་བཟད་མེ་ལྕེ་བརྒྱ་ཕྲག་གིས།
ཡུན་རིང་འཚེད་པར་བྱེད་ཅིང་དེས། དམྱལ་བའི་གནས་ནི་སྐྱོ་བར་བྱས།། 36

प्रच्छन्नपापसन्तापदह्यमानः स चिन्तयन् ।
सुतीव्रनरकापातं बभ्राम भुवि भूतवत् ॥ २९ ॥

प्रायश्चित्तं द्विजास्तेन पृष्टाः पातकवादिना ।
ऊचु र्मातृवधक्रूरपातके नास्ति निष्कृतिः ॥ ३० ॥

अथ जेतवनं गत्वा तत्र भिक्षुगणोदितम् ।
शुश्राव धर्म्माध्ययनं सर्व्वपापप्रणाशनम् ॥ ३१ ॥

धीमान् प्रव्रजितस्तत्र स्वाध्यायनिरतः परम् ।
तत स्त्रिपिटकाध्यायी स धर्म्मकथिकोऽभवत् ॥ ३२ ॥

सर्व्वज्ञोऽभ्येत्य भगवान् भिक्षुसङ्घ मथाब्रवीत् ।
किं भवद्भिः सपापाय प्रव्रज्यास्मै समर्पिता ॥ ३३ ॥

तेन मातृवधक्रूरकिल्बिषेण प्रमादिनः ।
प्रत्यासन्नास्य पर्य्यन्ते तप्तावीचौ चिरस्थितिः ॥ ३४ ॥

उक्ते तथागतेनेति सोऽप्युपाध्यायतां गतः ।
कालेन कालपर्य्यन्ते घोरं नरकमाप्तवान् ॥ ३५ ॥

तप्तावीचिचयोदञ्चत्तीव्रवह्निशिखाशतैः ।
पच्यमानश्चिरं चक्रे स खेदं नरकौकसाम् ॥ ३६ ॥

དཀྱུལ་སྤྲུང་རབ་ཏུ་ཁྲོས་པ་ཡིས། ཐོ་བས་བརྡུངས་ཤིང་ཕྱི་མར་བདགས།
དེ་ཡིས་རིང་ནས་སྡིག་པ་ཡི། མི་ཡིས་ཡོངས་སྨིན་ལུས་ཟད་ཐོབ། 37

དེ་ནས་དེ་ནི་རབ་བྱུང་གི། མཐུ་ཡིས་རྒྱལ་པོ་ཆེན་པོ་དག།
བཞི་པ་ཡི་ནི་ལྷ་རྣམས་སུ། ལྷ་ཡི་རྒྱན་གྱིས་བརྒྱན་པར་སྐྱེས། 38

དེ་ནས་དྲི་མེད་འཕྲེང་བ་ཅོད་པན་དཔུང་རྒྱན་དོ་ཤལ་ལས།
རབ་འཕྲོས་ནོར་བུའི་འོད་ཀྱིས་སྣང་བྱུང་དཔལ་ནི་འདྲི་བྱེད་ཅིང་།
ལྷ་ཡིས་བསྟེན་བྱ་ཛེས་འབྲང་འོད་ཀྱིས་རབ་མཛེས་ཟླ་བ་ལྟར།
མཛེས་པ་དེ་ནི་བདེ་བར་གཤེགས་ལ་ཕྱག་འཚལ་སླད་དུ་སོང་། 39

དེ་ཡི་ཞབས་ཀྱི་པར་མོ་ཟླུང་ལ་གུས་པས་ཕྱག་བཙལ་དེ།
ཀུན་དགའ་འཕེལ་ཞིང་མཛེས་པའི་བཞིན་གྱི་པ་དྨ་རྣམ་པར་རྒྱས།
སྟོན་པའི་ཆོས་ཀྱི་ཡང་དག་གདམས་ཀྱི་དེ་ནི་མྱུར་ཉིད་དུ།
བདེན་པ་མཐོང་ཞིང་ཡིད་ནི་རབ་ཏུ་ཕྱིས་པ་བཞིན་དུ་གྱུར། 40

སྡིག་པ་མཚན་མོའི་རབ་རིབ་ཞི་བའི་དུས་སུ་ནི།
ཡུན་རིང་ཉེ་བར་སྤྱད་པས་སྡུག་བསྔལ་ཉམས་པའི་སྐྱེ་བོ་ལ།
ལེགས་བྱས་སྤྲོ་དྲི་འི་དུས་ནི་དྲི་མ་མེད་ཅིང་ཡངས་པ་ཡི།
དགེ་བ་ཕུལ་བྱུང་སྣང་བ་དེ་ལྟར་ཀུན་དུ་རྒྱས་པར་གྱུར། 41

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དཀྱིལ་བ་སྟོན་ལྡན་གྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་གཉིས་པའོ།།

कोपान्नरकपालेन मुद्गराघातचूर्णितः ।
स चिरात् प्राप पाकाग्निपरिपक्वतनुः क्षयम् ॥ ३७ ॥

चातुर्महाराजिकेषु सोऽथ देवेष्वजायत ।
प्रव्रज्यायाः प्रभावेण दिव्याभरणभूषितः ॥ ३८ ॥

अथ स विमलमालामौलिकेयूरहार-
प्रसृतमणिमयूखोल्लिख्यमानाद्भुतश्रीः ।
अगमदमरवन्द्यो वन्दनायेन्दुकान्तिः
सुगत मनुगताभि र्भ्राजमानः प्रभाभिः ॥ ३९ ॥

तत्पादपद्मयुग मादरवन्दनोद्य-
दानन्दसुन्दरविबुद्धमुखारविन्दः ।
धर्म्मोपदेशकथयैव बभूव शास्तु-
रुन्मृष्टमानस इवाश्रुतदृष्टसत्यः ॥ ४० ॥

दीर्घोपभोगचलितव्यसनस्य काले
पापप्रदोषतिमिरोपरमे जनस्य ।
इत्यातनोति विमला सुकृतप्रभाव-
वेलाविशालकुशलातिशयप्रकाशम् ॥ ४१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मारकपूर्व्विकावदानं द्व्यशीतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་གསུམ་པ།

མངལ་དུ་གནས་དང་སྐྱེ་དང་དེ་ནས་བྱིས་པ་དག་དང་ནི།
དར་བབ་དེ་ནས་དཔལ་གྱི་རྒན་པོ་ཉིད་ལ་བརྟེན་གྱུར་པ།
སྐྱེ་བོ་མཚུངས་མེད་དུས་ཀྱི་གླང་པོས་ཕྱུང་བ་དག་གི་ནི།
ལས་སྐྱུད་འདི་ནི་པད་སྐྱུད་ཚུལ་གྱིས་ངེས་པར་གཡོ་མི་འགྱུར།། 1

ཟས་གཙང་གི་ནི་གུས་པས་སྦྱིན། བཅོམ་ལྡན་འདས་ནི་མགྲོན་དུ་གཉེར།
དགེ་སློང་རྣམས་དང་བཅས་པ་ཡིས། དེ་ཡི་ཟས་ནི་རབ་བཞེས་མཛད།། 2

དེ་ནས་གསོལ་ཇེས་རབ་དང་དེས། བཞུགས་དེ་ས་ཡི་བདག་པོ་ལ།
ཇེས་སུ་བཟུང་བས་དག་པ་ཡི། ཆོས་ནི་རབ་ཏུ་བསྟན་པ་མཛད།། 3

དེར་ནི་དེ་དུས་མཐོང་བ་ལ། བྱིས་པ་སྣ་གཙན་འཛིན་གྱིས་དེ།
དགེ་སློང་དབུས་སུ་ཡོངས་ཤེས་ནས། ཡབ་ནི་ལ་དུ་དག་གིས་མཆོད།། 4

དེ་ཡི་དུས་ན་བཅོམ་ལྡན་ལ། བྱིས་པ་གུས་པ་མཐོང་གྱུར་ནས།
རབ་དུད་དགེ་སློང་ཐམས་ཅད་ནི། དགེ་མཚན་དག་དང་ལྡན་པས་ཏྲེས།། 5

ལས་ཀྱི་རྣམ་སྨིན་ཅི་ཞིག་པ། ཁྱོད་ཀྱི་གཟུགས་ཅན་ལུས་ལྡན་པའི།
བྱིས་པ་འདི་ནི་ལོ་དྲུག་དག། དཀྱུ་ཏུ་ངེས་པར་བསྒོམས་དེ་སྐྱེས།། 6

अशीतितमः पल्लवः ।

गर्भस्थितस्य निसृतस्य ततः शिशोश्च
यूनः शनैः स्थविरता मथ संश्रितस्य ।
नासौ चलत्यतुलकालगजोद्धृतस्य
जन्तो र्मृणालकलया किल कर्म्मतन्तुः ॥ १ ॥

शुद्धोदनेन भगवान् भक्त्या भोक्तुं निमन्त्रितः ।
भिक्षुभिः सहित श्चक्रे तस्य भोज्यप्रतिग्रहम् ॥ २ ॥

भुक्तोत्तर मथासीनः प्रसन्नः पृथिवीपतेः ।
अनुग्रहेण विदधे स शुद्धां धर्म्मदेशनाम् ॥ ३ ॥

तत्र तत्क्षणहृष्टोऽपि शिशुना राहुलेन सः ।
भिक्षुमध्ये परिज्ञाय मोदकेनार्च्चितः पिता ॥ ४ ॥

भगवन्तं क्षणे तस्मिन् प्रणताः सर्व्वभिक्षवः ।
बालप्रणयमालोक्य पप्रच्छुः सकुतूहलाः ॥ ५ ॥

षड्भिर्वर्षै रयं जातः शिशुः कुक्षिनिपीड़ितः ।
केन कर्म्मविपाकेन प्रतिबिम्बवपुस्तव ॥ ६ ॥

ཅི་སྐད་ལྷ་མོ་གྲགས་འཛིན་མ། ཉིན་དང་མཚན་མོ་མངལ་གྱི་ཁྲར།
ཤིན་ཏུ་ཆེ་བས་ཡོངས་མནར་ཅིང་། ཤིན་ཏུ་ཡུན་རིང་གདུང་བས་བསྟེན།། 7

དགེ་སློང་རྣམས་ཀྱི་གུས་པས་ནི། བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་ལ་དྲིས།
སྐད་ཅིག་བསམས་ནས་དེ་དག་ལ། གསུངས་པ་འདིར་ནི་རྒྱུ་དག་ཉོན།། 8

ལུས་འཕགས་ཀྱི་ནི་མི་ཐི་ལར། ས་བདག་མེ་ཏོག་ལྷ་ལ་ནི།
ཉི་མ་ཟླ་བ་ཞེས་པ་ཡི། བསོད་ནམས་ངང་ཚུལ་བུ་གཉིས་བྱུང་།། 9

ཡབ་ནི་མཐོ་རིས་སོང་བའི་ཚེ། དེ་དག་དཀའ་ཐུབ་ནགས་འདོད་ལྡན།
རྒྱལ་སྲིད་ཆེན་པོ་འཁོར་འཛིན་ལ། ཕན་ཚུན་ཞུ་བ་རབ་ཏུ་བྱས།། 10

རྣམ་པ་ཀུན་ཏུ་ཆགས་བྲལ་བས། ཉི་མས་བཏང་བའི་རྒྱལ་སྲིད་ནི།
ཕུ་བོ་ཡི་བཀའ་ཡིས་བསྒྲིམས་པ་ཡིས། ཟླ་བས་ཇི་ཞིག་ལྟར་སྡེས་བཟུང་།། 11

རྒྱལ་པོ་འི་དྲང་སྲོང་ཉི་མ་དེ། ཞི་དགེ་དཀའ་ཐུབ་ཚུལ་སོང་ནས།
ཆོག་ཤེས་རྒྱལ་སྲིད་བདེ་བ་ཡིས། ཤིན་ཏུ་ཡུན་རིང་དཀའ་ཐུབ་བྱས།། 12

ནམ་ཞིག་ཡོངས་སུ་ངལ་གྱུར་ཅིང་། སྐོམ་པ་དྲག་པོས་གདུངས་པ་དེ།
ཐུབ་པ་ཡི་ནི་བུམ་པའི་ཆུ། སྔོངས་ལས་མ་བཟོད་ཉིད་དུ་འཐུངས།། 13

དྲན་པ་སྐྱེས་ནས་མཁས་པ་དེས། མི་བྱིན་ལེན་ནི་སྡིག་པ་ལ།
ཏོག་ཅིང་བཞིན་ནི་ལོག་གྱུར་པས། འགྱོད་པ་ལས་ནི་རབ་ཏུ་བསམས།། 4

भूयसा गर्भभारेण परिभूता दिवानिशम् ।
पीड़ां चिरतरं सेहे कस्माद्देवी यशोधरा ॥ ७ ॥

सर्व्वज्ञो भगवान् पृष्टः प्रणयादिति भिक्षुभिः ।
तानुवाच क्षणं ध्यात्वा श्रूयतामत्र कारणम् ॥ ८ ॥

मिथिलायां विदेहेषु पुष्पदेवस्य भूपतेः ।
सूर्य्यचन्द्राभिधौ पुत्रौ पुण्यशीलौ बभूवतुः ॥ ९ ॥

पितरि त्रिदिवं याते तौ तपोवनसस्पृहौ ।
साम्राज्यभारग्रहणे मिथ श्चक्रतु रर्थनाम् ॥ १० ॥

राज्यं सूर्य्येण वैराग्यात् सर्व्वथैव समुज्झितम् ।
चन्द्रः कथञ्चित्तत्राह ज्येष्ठशासनयन्त्रितः ॥ ११ ॥

सूर्य्यस्तु गत्वा राजर्षिः शमश्लाघ्यं तपोवनम् ।
सन्तोषराज्यसुखितश्चक्रे चिरतरं तपः ॥ १२ ॥

स कदाचित् परिश्रान्तः सन्तप्तस्तीव्रतृष्णया ।
कमण्डलुजलं मोहादनुक्तैव पपौ मुनेः ॥ १३ ॥

स सञ्जातमति र्विदानदत्तादानपातकम् ।
कलयन् म्लानवदनः पश्चात्तापादचिन्तयत् ॥ १४ ॥

ལས་ཀྱི་ཞགས་པས་ཡང་དག་བྲངས། དབང་མེད་ལུས་ཅན་རྣམས་ཀྱིས་ནི།
མི་འདོད་བཞིན་དུ་ལེགས་བྱས་སམ། ཉེས་བྱས་དག་ནི་ཐོབ་པར་འགྱུར།། 15

སྐྱེ་བོ་ལེགས་བྱས་སྤྱོད་ཅིང་དཀར་བ་འདིར་ཡང་ཉེས་བྱས་དག་གི་ཆ།
འཛིན་འདི་གང་གི་བཞིན་རས་དྲི་མ་ཅན་འདི་མཆོག་ཏུ་གདུང་བར་བྱེད།
སྐད་ཅིག་སྲིད་པའི་བདེ་བསྡུག་བསྔལ་ཚོགས་ལ་ཆགས་པས་འཕང་བ་རྣམས་ལ།
ལོ་འདབ་བརྒྱ་ལྡན་ཕྲ་རྒྱས་ནང་དུ་ཞུགས་དེ་གདུང་བ་སྤྱིར་བར་བྱེད།། 16

མི་བདག་སྔོན་དུ་བདག་ཕྱིན་ལ། སྡིག་པ་བདག་གིས་བརྗོད་པར་བྱ།
རྒྱལ་པོ་འི་བཀའ་ཡིས་དག་པ་རྣམས། བླ་ལྡོན་མེད་པའི་ཆོས་ཀྱི་ཚོགས།། 17

ནད་ཀྱིས་གཟིར་རྣམས་སྨན་པས་གསོ། ཆོས་ལ་ཞུགས་རྣམས་བསྟན་བཅོས་ཀྱིས།
སྡིག་ལས་ཅན་རྣམས་མི་བདག་ནི། རིགས་གནས་ལུགས་ལྡན་བླ་མ་ཡི།། 18

ཞེས་བསམམས་ཡོངས་སུ་གདུང་བ་ཡིས། ས་བདག་སྤྲུན་ཟླའི་དྲུང་དུ་ནི།
ཕྱིན་ནས་དེ་ཡིས་སྲུར་བར་ནི། མ་བྱིན་བླངས་པའི་སྡིག་པ་སྨྲས།། 19

སྤྲུན་ཟླ་ཐུ་བོ་མངོན་མཆོད་དེ། དེ་ལ་ས་བདག་གིས་སྨྲས་པ།
སྐྱེས་ནས་དག་པའི་དངོས་གྱུར་པ། ཁྱོད་ལ་སྡིག་པ་ཡོད་མ་ཡིན།། 20

རིགས་མིན་ཤིན་ཏུ་ཕྲ་བ་ཡང་། རྗེ་ཞིག་ལྷུར་སྤྱེས་གང་བྱས་པ།
ནང་དུ་རྗེས་སུ་གདུང་བ་འཛིན། དེ་ཉིད་དེ་ཡི་རྣམ་དག་ཉིད།། 21

कर्म्मपाशसमाकर्षविवशैः समवाप्यते ।
अनिच्छयैव सुकृतं दुष्कृतं वा शरीरिभिः ॥ १५ ॥

जनः शुभ्रेऽप्यस्मिन् सुकृतचरिते दुष्कृतकणा
निधत्ते येनासौ मलिनवदनः शोचतितराम् ।
स्पृहानिक्षिप्तानां क्षणभवसुखे दुःखनिचये
प्रविश्यान्तः शोषं दिशति शतशाखो ह्यनुशयः ॥ १६ ॥

गच्छामि नृपतेरग्रे पापमावेदयाम्यहम् ।
राजशासनशुद्धानामन्तणो धर्म्मसञ्चयः ॥ १७ ॥

शास्त्रं धर्म्मप्रवृत्तानां रोगार्त्तानां चिकित्सकः ।
वर्णाश्रमगुरु र्नेता नृपतिः पापकर्म्मणाम् ॥ १८ ॥

स विचिन्त्येति सन्तापान्नृपते र्भ्रातुरन्तिकम् ।
गत्वा न्यवेदयत्तूर्णं मदत्तादानपातकम् ॥ १९ ॥

ज्येष्ठभ्रातर मभ्यर्च्य तं भूमिपति रब्रवीत् ।
आजन्मशुद्धभावस्य न पापं विद्यते तव ॥ २० ॥

सुसूक्ष्ममपि यः कृत्वा दैवात् किञ्चिदसाम्प्रतम् ।
पश्चात्तापं वहन्त्यन्त स्तस्य सैव विशुद्धता ॥ २१ ॥

ཅེས་པས་བདག་ཅིག་ཐོས་ནས། ཉི་མས་དེ་ལ་རབ་སྨྲས་པ།
དམ་པའི་ཆོས་ནི་དཀར་བ་ཡི། གོས་ལ་དྲི་མའི་ཆ་མི་བཟོད།། 22

རྒྱལ་པོ་ཆད་པ་བདག་འཚམ་ལོ། ཤིན་དུ་དཔྱད་ནས་བསྒྲུབ་པར་མཛོད།
དག་བྱེད་ཀྱིས་བཞིན་རྒྱལ་པོ་ཡི། ཆད་པས་སྡིག་ཅན་གཙང་བར་འགྱུར།། 23

ཞེས་དེ་འབད་པས་ལན་མང་དུ། རང་གི་ཆད་པ་དོན་གཉེར་བ།
དེ་ལ་ནུ་བོ་རྒྱལ་པོས་སྨྲས། ནང་པར་བདག་གིས་གང་བཟོད་བྱ།། 24

རེ་ཞིག་ཁྱོད་ནི་སྐྱིད་ཚལ་གྱི། ནགས་འདི་ཉིད་དུ་གནས་པར་མཛོད།
ཅེས་བརྗོད་གྲོང་པའི་བྱ་བ་ལ། ས་ཡི་བདག་པོ་ཕྱི་རོལ་སོང་།། 25

དེ་ནས་དེར་ནི་ཐུབ་པ་དག། ངེས་པར་གཡོ་མེད་གནས་པའི་ཚེ།
རྒྱལ་པོ་དེ་ཡི་བྱ་བ་བརྗེད། ཉི་མ་དྲུག་ནས་མངོན་པར་འོངས།། 26

དེ་ནས་རྒྱལ་པོ་ཕུ་བོ་ནི། ཟས་མེད་རིད་པའི་རྣམ་པ་མཐོང་།
ཀུན་རྨོངས་རང་གི་ཀློ་སྨྲེ་ཅིང་། དེ་ལ་རབ་དུ་དང་བར་བྱ།། 27

དེ་ནི་བྲམ་ཟེ་དང་བཅས་པས། དེ་ཡི་སྡིག་པ་དག་བྲུས་ནས།
ཉིན་དྲུག་ཉོན་མོངས་བྱིན་པ་ཡིས། དེ་སོང་ཚེ་ན་རབ་དུ་གདུངས།། 28

ང་ཉིད་རྒྱལ་པོའི་དྲུང་སོང་ཉི། བྱིས་པ་འདི་ཡང་རྒྱལ་པོ་ལྷ།
ཉིན་དྲུག་ཐུབ་པ་ཉོན་མོངས་པར། བྱས་པས་ལོ་དྲུག་དག་ནས་སྐྱེས།། 29

इति क्षितिपतेर्वाक्यं श्रुत्वा सूर्य्यस्तमभ्यधात् ।
कलङ्कलेशं न सहे सद्धर्म्मधवलांशुके ॥ २२ ॥

दण्डमेवार्थये राजन् सुविचार्य्य विधीयताम् ।
पूयते पावकेनेव राजदण्डेन किल्बिषम् ॥ २३ ॥

इत्याग्रहेण बहुशो याचमानं स्वशासनम् ।
तमुवाचानुजो राजा प्रातः कर्त्तास्मि यत् क्षमम् ॥ २४ ॥

अस्मिन् प्रतीक्ष्यतां तावद्भवानुद्यानकानने ।
इत्युक्त्वा पौरकार्य्याय निर्ययौ पृथिवीपतिः ॥ २५ ॥

तत्र प्रतीक्षमाणेऽथ मुनौ नियमनिश्चले ।
राजा विस्मृततत्कृत्यः षड्भिरभ्याययौ दिनैः ॥ २६ ॥

कृशाकारं निराहारमथ दृष्ट्वाग्रजं नृपः ।
निन्दन् स्वबुद्धिसंमोहं चक्रे तस्य प्रसादनम् ॥ २७ ॥

ब्राह्मणैः सहितः कृत्वा स तत्पापप्रमार्जनम् ।
षड्दिनक्लेशदानेन याते तस्मिन्नतप्यत ॥ २८ ॥

अहं स सूर्य्यो राजर्षिश्चन्द्रो राजाप्ययं शिशुः ।
जातः संवत्सरैः षड्भिः षड्दिनक्लेशकृन् मुनेः ॥ २९ ॥

བཟང་མོ་ཞེས་བྱ་བ་ཛྷི་མོ། རྒྱན་མོ་གྲོང་ཁྱེར་ལ་ཕྱོགས་ཏེ།
བུ་མོ་རི་དགས་མོ་དག་དང་། འགྲོགས་ནས་དར་བ་འཚོང་དུ་སོང་།། 30
དེ་ཡི་བུ་མོ་དར་བབ་མས། རང་གི་བུམ་པ་རབ་ལྷེ་བ།
མ་ཤཱན་དག་ལ་བྲིན་ནས་ནི། དེ་ཡི་བུམ་པ་ཡང་བ་བཟུང་།། 31
མ་ནི་ཤཱན་ཞིང་ཉམ་ཆུང་དེ། བུ་མོས་དཔག་ཚང་ཕྱེད་དང་གཉིས།
བདང་བས་གྲོང་ཁྱེར་ཉེ་བ་ནི། ཤིན་དུ་ཡོངས་སུ་ངལ་བར་གྱུར།། 32
གྲགས་འཛིན་མ་ནི་བ་ཛྷི་ཡི། བུ་མོ་མ་ཡི་ཉེན་སོངས་ལས།
རྒྱང་གྲགས་དྲུག་མཚུངས་ལོ་དག་ནི། མངལ་གྱི་ཁུར་གྱིས་གཟིར་བར་གྱུར།།33
མཐོ་རིས་ས་དང་གདེངས་ཅན་འཛིག་རྟེན་བྲིས་དང་ལང་ཚོ་དང་།
རྒྱན་དང་འཆི་དུས་མངལ་གྱི་མལ་སྟན་ལ་བརྟེན་དག་ལ་ཡང་།
ལུས་དང་ལྡན་པ་རྣམས་ཀྱི་སྔོན་གྱི་ལས་ནི་ལྷན་ཅིག་ཏུ།
འགྲོ་བ་འདོད་པ་རྣམ་པ་ཀུན་དུ་བརླག་པར་འོང་མི་འགྱུར།། 34
དེ་ལྟར་སྒྲ་གཅན་འཛིན་ནི་སྔོན་གྱི་ལས་ལྡན་པ།
ངོ་མཚར་གཏམ་ནི་དེ་བཞིན་གཤེགས་པས་གསུངས་པ་དག།
ངེས་པར་བཟུང་ནས་དགེ་སློང་ཚོགས་དང་ས་སྐྱོང་དང་།
སྐྱེ་བོ་དང་བཅས་ཡ་མཚན་རབ་ཏུ་རྒྱས་པར་གྱུར།། 35

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སྒྲ་གཅན་འཛིན་གྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེས་བརྒྱད་ཅུ་རྩ་གསུམ་པའོ།།

आभीरभार्य्या भद्राख्या हरिण्या सुतया सह ।
नगराभिमुखी भद्रा तक्रं विक्रेतु मायया ॥ ३० ॥

तत्सुता तरुणी भारं निजं गुरुतरं घटम् ।
दत्त्वा जनन्यै वृद्धायै लघुं जग्राह तद्घटम् ॥ ३१ ॥

वाहिता योजनं सार्द्धं जननी जरती कृशा ।
सा दुहित्रा पुरोपान्ते परिश्रान्ततराभवत् ॥ ३२ ॥

आभीरतरुणी सेयं मातुः क्लेशाद् यशोधरा ।
षट्क्रोशतुल्यवर्षेण गर्भभारेण पीड़िता ॥ ३३ ॥

दिवि भुवि फणिलोके शैशवे यौवने वा
जरसि निधनकाले गर्भशय्याश्रये वा ।
सहगमनसहिष्णोः सर्व्वथा देहभाजां
नहि भवति विनाशः कर्म्मणः प्राक्तनस्य ॥ ३४ ॥

इति राहुलपूर्व्वकर्म्मयुक्तां
कथितां चित्रकथां तथागतेन ।
अवधार्य्य बभूव भिक्षुसङ्घः
क्षितिपालः सजनश्च विस्मयाढ्यः ॥ ३५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
राहुलकर्म्मप्लुत्यवदानं अशीतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་བཞི་པ།

གང་གིས་ལེགས་པའི་ཡིད་ཅན་རྣམས་ཀྱིས་ཡིད་ནི་ཀུན་དགའ་
མཉེན་ལྡན་རིག་པར་བྱེད།
གང་གི་མཐུ་ཡིས་གདུག་རྣམས་ཀྱི་ཡང་ཡོངས་སུ་འདྲིས་པའི་
སྨུན་པ་ཞི་བར་བྱེད།
གང་གི་བསོད་ནམས་གྲངས་མེད་གྲངས་ཀྱི་ཚོག་གི་ཚད་ཀྱི་ཡུལ་དུ་མ་འགྱུར་བ།
འགྲོ་བ་ཐུབ་པའི་མགོན་པོ་རབ་རྒྱས་མཐུ་ལྡན་དེ་ཉིད་གཅིག་པུ་འབྱུང་བ་ཡིན།། 1

མཉན་ཡོད་དུ་སྟོན་ཁྱིམ་ན་གནས། དཔལ་ལྡན་ཤིན་དུ་བརྟན་པ་ཡི།
ཆུང་མ་མིག་བཟང་མ་དག་མ། འདོད་པའི་བུ་ནི་བཙས་པར་གྱུར།། 2

སྐྱེས་པ་ཙམ་ན་རབ་འབྲུངས་པ། ལྷ་ཡི་རིན་ཆེན་གྱིས་བརྒྱན་པའི།
ཁྲི་སྟན་རང་གི་བསོད་ནམས་ཀྱིས། མཚན་ལ་གང་ཞིག་ཉེར་འཁོད་མཛེས།། 3

དེ་སྐྱེས་ཚེ་ན་ཆུ་འཛིན་ནི། སྙན་ཞིང་འཇམ་པའི་སྒྲ་དབྱངས་ཅན།
སྦྲང་རྩི་འབེབས་པས་མེ་ཏོག་དང་། བཅས་པའི་རིན་ཆེན་ཆར་པ་ཕབ།། 4

རྫོགས་པའི་གཞོན་ནུ་ལུས་ངན་གྱིས། གཏེར་ནི་བརྒྱ་ཡིས་བསྐོར་བ་དེ།
སྦྲང་རྩིའི་ཆར་པ་ཕབ་པ་ལས། སྦྲང་རྩིའི་དབྱངས་ཞེས་བྱ་བར་གྱུར།། 5

རིན་ཆེན་ཆར་འབེབས་དེ་ཡིས་ནི། ས་ལ་དབུལ་པ་མེད་ཉིད་བསྒྲུབས།
གང་དུའང་བྱ་རོག་དཀར་པོ་བཞིན། སློང་བ་པོ་ནི་མཐོང་མ་གྱུར།། 6

चतुरशीतितमः पल्लवः ।

औचित्येन करोति यः सुमनसामानन्दसान्द्रं मनः
क्रूराणामपि शीर्य्यते परिचितं यस्यानुभावोत्तमः ।
एकः कोऽपि स जायते जितजगन्नाथप्रभावोद्भवः
पुण्यं यस्य न याति मानकलनां निःसंख्यसंख्यापदैः ॥ १ ॥

श्रीमान् पुरा सुधीरस्य श्रावस्त्यां गृहमेधिनः ।
जायाया मौक्षितः सूनुः सुनेत्राया मजायत ॥ २ ॥

जातमात्रः समुद्भूते दिव्यरत्नविभूषिते ।
उपविष्टः स्वपुण्याङ्के यः पर्य्यङ्के व्यरोचत ॥ ३ ॥

तस्य जन्मनि रत्नानि पुष्पैः सह पयोधराः ।
मधुरस्निग्धनिर्घोषा ववृषुर्मधुवर्षिणः ॥ ४ ॥

पूर्णः कुमारः कौवेरैः स निधानशतैर्वृतः ।
मधुवृष्टिप्रपतनान्मधुरस्वर इत्यभूत् ॥ ५ ॥

तेनादरिद्रतां नीते भुवने रत्नवर्षिणा ।
श्वेतकाक इव क्वापि नैवादृश्यत याचकः ॥ ६ ॥

ནམ་ཞིག་དགེ་སློང་ཀུན་དགའ་བོ། རབ་ཞི་འཕགས་པའི་ལམ་གནས་པ།
ཁྱིམ་དུ་བྱོན་པ་དེ་མཐོང་ནས། མདུན་དུ་ཕ་ལ་རབ་དྲིས་པ།། 7

ཡབ་གཅིག་དྲི་མེད་དགེ་བ་ཅན། འདི་ཡི་བརྟུལ་ཞུགས་འདི་ནི་ཅི།
གང་ཞིག་ཡང་དག་མཐོང་ཉིད་ན། འཕྲལ་ལ་ཡིད་ནི་དང་བར་བྱེད།། 8

ཅེས་པ་བུ་ཡི་ཚིག་ཐོས་ནས། ཤིན་དུ་བརྟན་པས་དེ་ལ་སྨྲས།
བུ་གཅིག་སྙིང་སྟོབས་རབ་གསལ་འདི། ཞི་བའི་བརྟུལ་ཞུགས་ཡོངས་སུ་འཛིན།། 9

གང་ཞིག་འཁོར་བའི་མཚོ་ལ་མཐའ་དག་འགྲོ་བའི་ཟམ་སྟེགས་དྲང་པོ་དང་།
ཁྲོ་བའི་ནད་ཀྱིས་གསོ་བྱེད་དག་དང་ཞི་བའི་བདུད་རྩིའི་སྙིང་པོས་སྲིད་
འཕྲོག་དང་།

སྐྱོན་གྱི་ཚོགས་ཀྱི་སྨན་པ་ཞི་བྱེད་ཉི་མ་སངས་རྒྱས་འོད་ཟེར་རབ་རྒྱས་པ།
དེ་ཡི་ཉན་ཐོས་ཞི་བའི་ཡིད་ཅན་རྣམས་ཀྱི་མཆོག་གྱུར་འདི་ནི་ཀུན་དགའ་བོ།། 10

བཅོམ་ལྡན་འདས་ཀྱི་མངོན་བརྗོད་དག། ཐོས་པ་ཉིད་ནི་སྣང་རྩེའི་རྒྱངས།
སྤུར་སྐྱེ་དགེ་བ་རྒྱས་པ་ལས། བ་སྤུ་རབ་ཏུ་ལངས་པར་གྱུར།། 11

དེ་ནས་ཀུན་དགའ་དང་བཅས་དེས། གུས་པས་མངོན་ཕྱོགས་ཕྱག་འཚལ་ཏེ།
དགེ་སློང་ཚོགས་བཅས་ཀུན་དགའ་བོ། ལོངས་སྤྱོད་ཀུན་གྱིས་རབ་ཏུ་མཆོད།། 12

དེ་ནས་འདུན་པས་དེ་ཉིད་དང་། ལྷན་ཅིག་རྒྱལ་བྱེད་ཚལ་སོང་ནས།
འོད་ཟེར་ཕུང་པོ་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་མཐོང་གྱུར་ཏེ།། 13

स कदाचिद् गृहायातं प्रशान्तेर्यापथस्थितम् ।
आनन्दं भिक्षुमालोक्य पप्रच्छ पितरं पुरः ॥ ७ ॥

तात व्रतविशेषोऽस्य कोऽयं वैमल्यशालिनः ।
यस्य सन्दर्शनेनैव मनः सद्यः प्रसीदति ॥ ८ ॥

पुत्रस्येति वचः श्रुत्वा सुधीर स्त मभाषत ।
पुत्र सत्त्वप्रकाशोऽयं शान्तिव्रतपरिग्रहः ॥ ९ ॥

यः सेतुः सरलः समस्तजगतां संसारघोरार्णवे
क्रोधव्याधिचिकित्सकः शमसुधासारेण तृष्णापहः ।
दोषोत्सिक्ततमोविरामतरणि र्बुद्धः प्रबुद्धद्युतिः
तस्य श्रावक एष शान्तमनसा मानन्दनामाग्रणीः ॥ १० ॥

अभिधानं भगवतः श्रुत्वैव मधुरस्वरः ।
बभूवोद्भूतरोमाञ्चः प्राग्जन्मकुशलोदयात् ॥ ११ ॥

आनन्द मथ सानन्दः प्रणम्य प्रणयोन्मुखः ।
स भिक्षुसङ्घैः सहितं सर्व्वभोगै रपूजयत् ॥ १२ ॥

औत्सुक्यात् सह तेनैव गत्वा जेतवनं ततः ।
ददर्श स त्विषां राशिं भगवन्तं तथागतम् ॥ १३ ॥

པདྨ་འདབ་མ་རྒྱས་པའི་སྤྲིན། མཆོག་གི་མཚན་ཉིད་དག་གིས་མཚན།
མཛེས་ཤིང་ཡིད་འོང་རྣམ་པ་ཅན། གསེར་གྱི་ད་ལ་བཞིན་དུ་མདོག ॥ 14

བདུད་རྩིས་བྲུབས་པ་ལྟ་བུ་སྟེ། མཐོང་ནས་དགའ་བ་རབ་རྒྱས་པ།
དེ་ཡི་སྤྱི་བོར་འཕྲེང་བ་བཞིན། དེ་ཡི་ཞབས་སེན་འོད་ཟེར་སྣངས ॥ 15

འབད་པས་གསོལ་བ་བདབ་ཁ་ཡིས། གུས་ལ་མཉེན་གཤིན་བཅོམ་ལྡན་འདས།
དེ་སྐད་དེ་ཡི་ཁང་པར་བྱོན། མཆོད་སྟོན་རབ་ཏུ་བཞེས་པ་མཛད ॥ 16

བཅོམ་ལྡན་འདས་ནི་མངོན་མཆོད་ནས། རྒྱལ་བྱེད་ཚལ་དུ་གཤེགས་པའི་ཚེ།
སྐྱེ་བོ་འི་ཚོགས་ནི་རིན་ཅན་གྱིས། སྤྲང་རྫིའི་དབྱངས་ཀྱིས་ཡོངས་རྫོགས་བྱས ॥ 17

དབུལ་པོ་རྣམས་ཀྱི་ཁྱིམ་ཁྱིམ་དུ། རང་གི་བསོད་ནམས་མ་ཡིན་པས།
རིན་ཅན་ཕྱུང་པོ་དེས་བྱིན་བ། སྐད་ཅིག་ཉིད་ཀྱིས་སོལ་ཕྱུང་གྱུར ॥ 18

དེ་ནས་བྱང་ཚུལ་དེ་ཐོས་ནས། སྤྲང་རྫིའི་དབྱངས་ནི་སྡུག་བསྔལ་ཞི།
དེ་དག་ལ་སྨྲས་ཁྱོད་ཀྱིས་སྟོན། ལེགས་བྱས་དག་ནི་ཡོངས་མ་བྱས ॥ 19

བརྩེ་བས་སྦྱིན་པ་མ་བྱིན་ཅིང་། དགེ་འདུན་མཆོད་པ་མ་བྱས་ལ།
བཅོམ་ལྡན་མངོན་པར་མ་མཆོད་པས། འབྱོར་བ་འདི་དག་ཐོབ་ར་ཡིན ॥ 20

དེ་སྐད་ཁྱོད་ཀྱིས་བདེ་གཤེགས་ལ། སོགས་པའི་དགེ་འདུན་མངོན་པར་མཆོད།
ཁྱོད་ལ་ལོངས་སྤྱོད་དག་གི་ཚོགས། ཐམས་ཅད་བདག་གིས་ཕྱུན་ཚོགས་བགྱི ॥ 21

फुल्लपद्मपलाशाक्षं दिव्यलक्षणलक्षितम् ।
लावण्यललिताकारं हेमतालमिवोन्नतम् ॥ १४ ॥

लिम्पन्त ममृतेनेव तं दृष्ट्वा हर्षनिर्भरः ।
मालामिवाददे मूर्द्ध्नि स तत्पादनखद्युतिम् ॥ १५ ॥

प्रणयार्थनया तस्य प्रीत्यै प्रणयिवत्सलः ।
गत्वा चकार भगवान् गृहे भोगपरिग्रहम् ॥ १६ ॥

अभ्यर्चिते भगवति प्रयाते जेतकाननम् ।
जनतां रत्नसम्पूर्णां चकार मधुरस्वरः ॥ १७ ॥

निर्जैरपुण्यै र्निस्वानां रत्नराशि र्गृहे गृहे ।
तद्वितीर्णः क्षणेनैव जगामाङ्गारराशिताम् ॥ १८ ॥

तद्वृत्तान्त मथाकर्ण्य दुःखितो मधुरस्वरः ।
तामुवाच पुरा नैव भवद्भिः सुकृतं कृतम् ॥ १९ ॥

अदत्त्वा दयया दान मकृत्वा सङ्घभोजनम् ।
भगवन्त मनभ्यर्च्य न लभ्यन्ते विभूतयः ॥ २० ॥

सुगतप्रमुखः सङ्घ स्तस्माद् युष्माभि रर्च्यताम् ।
सर्व्वोपभोगसामग्री महं सम्पादयामि वः ॥ २१ ॥

ཞེས་པ་དེས་བསྐུལ་དེ་དག་གིས། དེ་ཡི་ཉེར་བསྐྱབས་ཚོགས་རྣམས་ཀྱིས།
བཅོམ་ལྡན་དགེ་འདུན་དང་བཅས་པ། ཕྱིག་པ་ཞི་བའི་སླད་དུ་མཆོད།། 22

དེ་ནས་དེ་ཚེ་དགེ་བ་བྱས། ཕྱིག་པ་ཟད་པ་དེ་དག་གིས།
རང་ཁྲིམ་རབ་འབར་རིན་ཆེན་གྱི། ཕྱུང་པོས་ཀུན་དུ་གང་བ་མཐོང་།། 23

དེ་ནས་ཆགས་བྲལ་སད་པ་ཡི། ཀློ་དང་ལྡན་པ་སྦྲང་རྩིའི་དབྱངས།
བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་སོང་ནས། རབ་དུ་ཞི་སླད་རབ་བྱུང་བླངས།། 24

སྟོན་པའི་བཀའ་ཡིས་དུལ་བ་ཡི། བརྟུལ་ཞུགས་ཅན་གྱིས་མཉན་ཡོད་བདང་།
སྐྱེ་བོ་འི་མཐའ་ཡི་གཙུག་ལག་ཁང་། རི་བྲག་དག་ལ་བརྟེན་པར་སོང་།། 25

དེར་དེས་བསླབ་པའི་གནས་བྱིན་པ། རི་བྲག་པ་ཡི་སྐྱེ་བོ་རྣམས།
ཉོན་མོངས་དུག་ནི་རབ་ཞིའི་སླད། དཀོན་ཅོག་གསུམ་ལ་སྐྱབས་སུ་སོང་།། 26

གནས་སྐབས་དེར་ནི་ཆོས་ཀུན་པ། ནགས་ཀྱི་མཐའ་ན་གནས་པ་རྣམས།
དུར་གཞི་ཡ་སྟུགས་ཁས་བླངས་པའི། མི་ནི་ཚོལ་བ་དག་ལ་ཞུགས།། 27

ཕྲ་མ་ཅན་གྱིས་རབ་བསྟན་པའི། གཙུག་ལག་ཁང་དེར་དེ་དག་འོངས།
གཎྜིའི་སྒྲ་ལ་འདུས་པ་ཡི། དགེ་སློང་དགེ་འདུན་ཚོགས་རྣམས་བཅིངས།། 28

ཡ་སྟུགས་སླད་དུ་དགེ་སློང་ནི། གཅིག་ཉིད་ཁོ་ན་བདག་ཅག་འདོད།
ཆོས་ཀུན་ཚོགས་ཀྱིས་འདི་བརྗོད་ཚེ། དགེ་སློང་རྣམས་ཀྱིས་རིམ་པས་སྨྲས།། 29

इति ते प्रेषितास्तेन सम्भारै स्तदुपाहृतैः ।
ससङ्घ मंहसः शान्त्यै भगवन्त मपूजयत् ॥ २२ ॥

ततस्ते कृतकल्याणा स्तत्क्षणक्षीणकल्मषाः ।
ददृशुः स्वगृहं दीप्तैः सम्पूर्णं रत्नराशिभिः ॥ २३ ॥

ततः प्रवृद्धवैराग्यः प्रशान्त्यै मधुरस्वरः ।
प्रव्रज्या माददे धीमान् गत्वा भगवतोऽन्तिकम् ॥ २४ ॥

स शास्तुः शासनात्त्यक्ता श्रावस्तीं नियतव्रतः ।
जगाम जनपर्य्यन्तं विहारं कर्वटाश्रयम् ॥ २५ ॥

दत्तशिक्षापदस्तेन तत्र कार्वटिको जनः ।
रत्नत्रयं क्लेशविषप्रशान्त्यै शरणं ययौ ॥ २६ ॥

अस्मिन्नवसरे चौराः काननान्तनिवासिनः ।
उक्तं दुर्गोपहाराय नर मन्वेष्टु माययुः ॥ २७ ॥

ते तं विहारमासाद्य पिशुनेन प्रदर्शितम् ।
बबन्धु र्भिक्षुसङ्घातं गण्डीशब्दसमागतम् ॥ २८ ॥

एक एवोपहाराय भिक्षुरस्माक मीप्सितः ।
इत्युक्ते चोरचक्रेण जगदु र्भिक्षवः क्रमात् ॥ २९ ॥

ཡ་སྟགས་དོན་དུ་བདག་བྱུང་ལ། དགེ་སློང་ཐམས་ཅད་བཏང་བར་མཛོད།
ཅེས་པ་ཀུན་རིམ་གྱིས་བརྗོད་ཅིང་། སྤྲང་རྫིའི་དབྱངས་ཀྱིས་རབ་སྨྲས་པ།། 30

ང་ཉིད་ཁོ་ན་ཨ་སྟགས་དོན། དགེ་འདུན་ཐམས་ཅད་རྣམ་པར་ཐོང་།
ཞེས་པ་ཐོས་ནས་དེ་དག་གིས། རྣམ་པ་མཆོག་ལྡན་དེ་བཟུང་སོང་།། 31

གསོད་པར་ཆས་པ་དེ་དག་གིས། བཅིངས་ཁྲིར་རྣམ་འགྱུར་བློ་མེད་དེས།
དུ་རྐའི་གནས་ནི་ནགས་ནང་དུ། ཤིན་ཏུ་འཇིགས་སུ་རུང་བ་མཐོང་།། 32

དེ་ཡང་དུས་མཐའི་སྤྲིན་གྱིས་བཞིན། གཏེར་མ་ལ་ནི་བསྲུང་བྱས་པའི།
མ་ཏེ་སྤྲེ་ལོ་རིགས་པ་ཡི། རྟག་ཏུ་ཡ་སྟགས་དག་གིས་གང་།། 33

དཔའ་བོས་བན་དུ་ཛི་བ་ཡི། རང་བཞིན་མི་དགོག་འཕྲེང་སྤོས་བཞིན།
རུ་རུའི་ཁྲག་གི་ཟེར་མ་བརྒྱ། ཞབས་ཀྱི་རྗེ་ལ་ཆགས་པས་ཁྱབ།། 34

ག་ཤིན་རྗེས་མི་དགོག་རྒྱས་པ་ཡི། སྒྲ་ལ་མཆོད་པ་བྱས་པ་བཞིན།
དྲིལ་བུའི་སྒྲོན་དུ་འཕྱང་བ་ཡི། དཔའ་བོ་འི་མགོ་ཡིས་ཡོངས་སུ་བསྐོར།། 35

རི་ཁྲོད་མ་ཡི་ཀང་བཀོད་པས། སེན་རྩེ་རབ་དུ་ཆགས་པ་བཞིན།
མི་ཁྲག་གསར་པས་བསྒོས་པ་ཡི། བཀས་དག་གིས་ནི་དམར་པའི་འོད།། 36

ཡ་སྟགས་མ་ཐོབ་རྟེན་པ་ཡི། བུད་མེད་རྣམས་ཀྱིས་གྲུས་པ་ཡིས།
རང་གི་བུ་བཅད་སྐྱིང་གི་ནི། པདྨས་ཁྲམས་ཀྱི་ཁ་ཁྲིར་བཀང་།། 37

मा मादायोपहारार्थं मुच्यन्तां सर्व्वभिक्षवः ।
उक्ते वृद्धैः क्रमेणेति प्रोवाच मधुरस्वरः ॥ ३० ॥

अह मेवोपहारार्हः सङ्घः सर्व्वो विमुच्यताम् ।
इत्याकर्ण्य वराकारं ते समादाय तं ययुः ॥ ३१ ॥

बद्धः स बधसन्नद्धै र्नीत स्तै र्निर्विकारधीः ।
दुर्गायतन मत्युग्रं ददर्श गहनोदरे ॥ ३२ ॥

बलिसज्जीकृतैः स्थूलशकलै र्माहिषैश्च तत् ।
कल्पान्तमेघैः स्वसुतोपहारैरिव पूजितम् ॥ ३३ ॥

व्याप्तं पादशिलासक्तरुधिररक्तच्छटाशतैः ।
स्रग्दामभि र्भटोत्सृष्टै र्बन्धुजीवमयैरिव ॥ ३४ ॥

घण्टाग्रालम्बिभि र्वीरशिरोभिः परिवारितम् ।
कृतद्वाराचर्नं फुल्लकमलैरिव मृत्युना ॥ ३५ ॥

प्रत्यग्रनररक्ताक्तैः सोपानै रक्तणप्रभम् ।
शवरीचरणन्याससंसक्तालक्तकैरिव ॥ ३६ ॥

असम्प्राप्तोपहाराभिः किरातस्त्रीभिरादरात् ।
स्वशिशूत्कृत्तहृत्पद्मकीर्णप्राङ्गनवेदिकम् ॥ ३७ ॥

དེ་མཐོང་སྡིག་ཆགས་རྣམས་ཀྱི་ཚོགས། སྡུག་བསྔལ་ངལ་དུབ་བཟོད་
དཀའ་བཞིན།
འཁོར་བ་ཆགས་བྲལ་སྙིང་པོ་ཅན། སྙིང་རྗེ་དབྱངས་ཀྱིས་རབ་ཏུ་བསམས། 38

དེ་ནས་ཉོན་མོངས་ཐམས་ཅད་ནི། ཡོངས་ཟད་དགྲ་བཅོམ་མངོན་དུ་གྱུར།
ཁམས་གསུམ་པ་ལས་ཆགས་བྲལ་དེ། དགའ་དང་མི་དགའ་མཚུངས་པར་གྱུར། 39

དེ་བསམས་གང་གི་དྲིན་གྱིས་ནི། འཁོར་བ་མེད་པ་བདེ་བའི་ས།
ཀྱི་མ་བདག་གིས་ཐོབ་པ་འདི། སྟོན་པ་སྲིད་པ་གཅོད་པའི་མཐུ། 40

རྨོངས་པའི་ལྕགས་སྒྲོག་བརྟན་པ་གཅོད་ཅིང་ལྟ་བའི་རི་མོ་ཉམས་པར་བྱེད།
མི་བཟད་སྲིད་པའི་ཆུ་བོ་སྒྲོལ་ཞིང་སྐྱེ་བའི་ལྡོན་པ་རབ་ཏུ་ཕྱིན།
གང་དུ་སྨྲ་ངན་མིག་ལ་སྣང་ཡང་མཆི་མ་དག་ནི་མི་འཛིན་པ།
སྟོན་པའི་དྲིན་གྱིས་གདུང་བ་ཞི་བར་གྱུར་པའི་གནས་དེར་རབ་ཏུ་ཐོབ། 41

ཅེས་པ་བསམས་སྙིང་སྟོབས་རྒྱ་མཚོ་དེ། རི་བཞིན་གཡོ་བ་མེད་པར་གནས།
ཁྲི་བས་མཆོད་སླངས་ཆོས་ཀུན་གྱིས། གསོད་དྲགས་མི་དོག་འཕྲེང་བ་བཅིངས། 42

དེ་ལུས་གསེར་གྱི་གཟི་ལྡན་ལས། དེ་དག་རྣམས་ཀྱི་གོས་དག་ཤུས།
གོས་ནི་གཞན་དང་གཞན་བྱུང་བ། དེ་དག་མདུན་དུ་ཕུང་པོར་གྱུར། 43

སྐབས་དེར་ལྷ་མོ་དེ་ཡིས་ནི། རབ་བསྐྱེད་འབྱུང་པོ་ལྔ་བརྒྱ་ཡིས།
ཆོས་ཀུན་དག་ནི་ལྔ་བརྒྱ་པོ། རབ་ཏུ་གཡོ་བ་མེད་པར་བྱས། 44

स दृष्ट्वा प्राणिसङ्घातं वैशसायासदुःसहम् ।
उद्वेगसारं संसारं प्रदध्यौ मधुरस्वरः ॥ ३८ ॥

ततः साक्षात्कृतार्हत्त्वः सर्व्वक्लेशपरिक्षयात् ।
त्रैधातुको वीतरागः सोऽभूत् तुल्यप्रियाप्रियः ॥ ३९ ॥

सोऽचिन्तयदहो शास्तुः प्रभावोऽयं भवच्छिदः ।
प्राप्तोऽयं यत्प्रसादेन निःसंसारसुखां भुवम् ॥ ४० ॥

मोहश्छिन्नो निविड़निगड़ः खण्डिता दृष्टिशैलाः
तीर्णा तृष्णा विषयतटिनी प्रोद्धृता जन्मवृक्षाः ।
प्राप्तं धाम व्यसनशमनं तत्प्रसादेन शास्तुः
यस्मिन् वाष्पं दधति न पुनः शोचनालोचनानि ॥ ४१ ॥

इति ध्यात्वा स सत्त्वाब्धिस्तस्थौ शैल इवाचलः ।
निबद्धबध्यमालाङ्कः चौरैः क्रोधोद्यतायुधैः ॥ ४२ ॥

तैस्तस्यापहृते वस्त्रे गात्रात् काञ्चनरोचिषः ।
अन्यदन्यदभूद्वास स्तैश्च राशिः पुरोऽभवत् ॥ ४३ ॥

अत्रान्तरे समुद्भूतैः भूतानां पञ्चभिः शतैः ।
सा देवी निश्चलं चक्रे तच्चौरशतपञ्चकम् ॥ ४४ ॥

དེ་དག་མཆོད་ཀྱི་ཚོགས་ལྷུང་ཆེ། སྦྲང་རྩི་དབྱངས་ཀྱི་སྤྲི་བོར་ནི།
མཁའ་ལས་མེ་ཏོག་དག་གི་ཆར། རིན་ཆེན་རབ་ཏུ་མཛེས་པ་བབ།། 45

དེ་ནས་མཁའ་ལ་འགྲོ་བ་དེ། ཆོས་ཀུན་རྣམས་ཀྱིས་མཐོང་གྱུར་ནས།
དེ་ཡི་མཐུ་ཡི་རིག་པ་ཡིས། དེ་ཉིད་ལ་ནི་སྐྱབས་སུ་སོང་།། 46

དེ་ནས་བབ་སྟེ་བཟོད་པའི་སྐད། ཀང་པར་མགོ་བཀོད་དེ་དག་ལ།
ཉིས་བྱས་ཐོང་ལ་ཆོས་ཀྱི་ནི། དགའ་བར་མཛོད་ཅིག་དེ་ཡིས་སྨྲས།། 47

དེ་ནས་དེ་དག་ཆགས་བྲལ་སྐྱེས། སྡིག་པ་བཏང་ནས་འཁོར་བ་ཡི།
འཆིང་བ་ཞི་སྐད་རབ་བྱུང་ནི། ཀླངས་ནས་དགྲ་བཅོམ་གནས་ཐོབ་གྱུར།། 48

དེ་ནས་དགྲ་བཅོམ་དེ་དག་དང་། རི་བྲག་ན་གནས་དེ་དག་བཅས།
སྦྲང་རྩིའི་དབྱངས་ནི་རྒྱལ་བྱེད་ཀྱི། ཚལ་དུ་སྟོན་པ་བལྟ་རུ་སོང་།། 49

ལྷ་ཡི་སྐྱེས་བོས་འོངས་པ་ཡི།། ལོངས་སྤྱོད་སྐབས་གསུམ་པས་བསྒྲུབས་པ།
བདུད་རྩིའི་རོ་ལྡན་འདུ་བྱེད་ཀྱི། དེར་ནི་དེ་ཡིས་བཅོམ་ལྡན་མཆོད།། 50

བཅོམ་ལྡན་འདས་ཀྱིས་དེ་དག་ལ། ཐར་པའི་ལམ་མཆོག་གསལ་བྱེད་ཅིང་།
དགེ་བའི་དང་བ་བསྐྱེད་པ་ཡི། ཆོས་ནི་ཕན་སྐད་བསྟན་པར་མཛད།། 51

བུ་ནི་བདུད་རྩིའི་སྣོད་ཉིད་ཐོབ། ཤེས་ནས་ཤིན་ཏུ་བརྟན་པས་ཀྱང་།
ལེགས་བྱས་ལས་འབྲངས་གསེར་གྱི་པད། བཟུང་ནས་རྒྱལ་བྱེད་ཚལ་དུ་སོང་།། 52

च्युते तदायुधचये पुष्पवृष्टि र्नभस्तलात् ।
पपात रत्नरुचिरा मधुरस्वरमूर्द्धनि ॥ ४५ ॥

गाहमानमथ व्योम तं विलोक्य च दस्यवः ।
स्पृष्टा स्तस्यानुभावेन तमेव शरणं ययुः ॥ ४६ ॥

सोऽवतीर्य्य ततः शान्त्यै चरणन्यस्तमस्तकान् ।
धर्मे रमध्वं संत्यज्य दुष्कृतानीत्युवाच तान् ॥ ४७ ॥

अथ ते जातवैराग्याः प्रव्रज्यां वृजिनोज्झिताः ।
आदायार्हत्पदं प्रापुः संसाराश्रवशान्तये ॥ ४८ ॥

ततस्तैः सहितोऽर्हद्भि स्तैश्च कर्वटवासिभिः ।
ययौ जेतवनं द्रष्टुं शास्तारं मधुरस्वरः ॥ ४९ ॥

तत्र दिव्यजनानीतै र्भोगै स्त्रिदशसाधितैः ।
स सुधारससंस्कारै र्भगवन्त मपूजयत् ॥ ५० ॥

शुद्धप्रसादजननीं भगवान् धर्म्मदेशनाम् ।
हिताय विदधे तेषां मोक्षमार्गाग्रदूतिकाम् ॥ ५१ ॥

सुधीरोऽप्यमृतप्राप्त्यै ज्ञात्वा पुत्रस्य पात्रताम् ।
हेमाब्जं सुकृतोत्पन्नं प्राप्य जेतवनं ययौ ॥ ५२ ॥

དེ་ཡིས་བདེ་གཤེགས་མངོན་མཆོད་ཅིང་། ཞབས་ལ་ཅོད་པན་གྱིས་གདུགས་དེ།
དེ་ཡི་སྨྲུན་ནི་རབ་དང་བས། རབ་ཏུ་ཕྱིས་པ་བཞིན་དུ་གྱུར།། 53

དེ་ནས་ཉེ་བར་དགེ་བ་དེར། དེ་ལ་བཅོམ་ལྡན་གྱིས་གསུངས་པ།
ཀང་པ་བཀོད་པས་གསེར་གྱི་ནི། པདྨོ་འཁྲུངས་པར་ཁྱོད་འགྱུར་རོ།། 54

པདྨོ་འི་མཆོག་ཅེས་གྲགས་པ་ཡི། ཡང་དག་རྫོགས་སངས་རྒྱས་འགྱུར་དེ།
སེམས་ཅན་ཡང་དག་བསྒྲལ་བྱས་ནས། ཡོངས་སུ་མྱ་ངན་འདའ་བར་འགྱུར།།55

ཀུན་མཁྱེན་བདེན་པ་གཟིགས་པ་ཡིས། དེ་སྐད་བརྗོད་ཚེ་ཤིན་ཏུ་བརྟན།
འགྲོ་བའི་དགེ་ལེགས་བརྟགས་པ་ཡི། ཡིད་ལ་རེ་བ་བཟུང་བར་གྱུར།། 56

གུས་པས་བསོད་ནམས་ཕྱག་འཚལ་དུས་སུ་སྲིད་པ་འབིགས་བྱེད་
བཅོམ་ལྡན་སྟོན་པ་ཡི།
ཞབས་ནི་ལེགས་བྱས་ལྡན་པ་གང་གི་མགོ་ལ་བདེ་ལེགས་བྱས་པར་
བཟུང་བྱས་པ།
དེ་དག་ཕྱི་ནས་སྐྱེ་བོ་མ་ཡི་ཕང་དུ་ཆོས་སྦྱོར་ནུ་མའི་འོ་མ་ལ།
གན་རྒྱལ་དུ་ཉམ་སོ་ཡི་སྟོང་པའི་བཞིན་ནི་ཟླུན་པོ་འི་འཛུམ་དུ་བྱེད་མི་འགྱུར།། 57

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སྣང་ཙི་དབྱངས་ཀྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་བཞི་པའོ།།

स तेनाभ्यर्च्य सुगतं चरणालीनशेखरः ।
दृशा तस्य प्रसादिन्या स संहृष्ट इवाभवत् ॥ ५३ ॥

तत स्तमूचे भगवानासन्नकुशलोदयम् ।
पादन्यासोदितस्वर्णकमलस्त्वं भविष्यसि ॥ ५४ ॥

पद्मोत्तर इति ख्यातः सम्यक्सम्बुद्धतां गतः ।
सत्त्वसन्तारणं कृत्वा परिनिर्व्वाण मेष्यसि ॥ ५५ ॥

सर्व्वज्ञेनेत्यभिहितः सुधीरः सत्यदर्शिना ।
जगत्कल्याणकलनामनोरथ मथाददे ॥ ५६ ॥

भक्त्या यैर्भवभेदिनो भगवतः पुण्यप्रणामक्षणे
शास्तुः स्वस्ति कृतं कृतं सुकृतिभिः पादोपधानं शिरः ।
अङ्के ते जननीजनस्य न पुनस्तृप्तिप्रयुक्ताः स्तन-
स्तन्योत्तानितदन्तशून्यवदनाः कुर्व्वन्ति मूढ़स्मितम् ॥ ५७॥

इति श्रीक्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मधुरस्वरावदानं चतुरशीतितमः पल्लवः ॥ ० ॥

ཡུལ་འདབ་བརྒྱད་ཙུ་ཙ་ལྷ་པ།

གང་གིས་མིག་ལ་རྗེས་འབྲིལ་ཆགས་པའི་ནད།
སྣང་བའི་ཟུག་རྔུ་སྙིང་ལ་རབ་ཆགས་དང་།
ཡན་ལག་ཀུན་ལ་ཁྲབ་པ་སྒྲིག་པའི་མཛོ།
འགྲོག་བྱེད་སྨན་པ་དེ་ལ་ཕྱག་འཚལ་ལོ། ༎ 1

དེ་ནས་གདམ་མཐར་དེ་བཞིན་གཤེགས། དཀའ་ཐུབ་ནགས་མཐར་
བཞུགས་པ་ཡི།
དྲི་མེད་ཐུགས་ལ་དགེ་སློང་རྣམས། དགེ་མཚན་དག་གིས་བསྐུལ་བས་དྲིས། ༎ 2

བཅོམ་ལྡན་ཅི་སྐད་འཛིག་རྟེན་ནི། ཀུན་གྱི་ཐུ་ངན་སེལ་བྱེད་པ།
སྲིད་པའི་ནད་ཀྱི་སྨན་པ་ཁྱོད། ནད་པ་རྣམས་ལ་ལྷག་པར་བྱམས། ༎ 3

དེ་དག་ལ་རེས་གསུངས་པ་བདེན། ལྷག་པར་ནད་པ་ལ་བདག་མཛད།
སྐྱེས་བུ་རྣམས་ལ་ལུས་གཟིར་དང་། མཚུངས་པའི་ཐུ་ངན་ཚོགས་གཞན་མེད། ༎ 4

སྐྱེ་བ་གཞན་རྣམས་དག་ལ་ཡང་། རང་བཞིན་གྱིས་ནི་སྨན་པའི་ས།
ནད་པ་རྣམས་ལ་རྟག་ཏུ་བདག། ཤིན་ཏུ་ཕྱོགས་སུ་ལྷུང་བར་གྱུར། ༎ 5

གྲོང་ཁྱེར་ཤི་བིའི་དབྱངས་དག་ཏུ། སློང་བ་རྣམས་ཀྱི་གཉེན་མཆོག་བཞིན།
བསམ་པ་ཀུན་ལ་རབ་བཞུགས་པ། མི་བདག་ཤི་བི་ཞེས་པ་བྱུང་། ༎ 6

पञ्चाशीतितमः पल्लवः ।

ये रागरोगं नयनानुबन्धं
विद्वेषशूलं हृदयप्रसक्तम् ।
सर्व्वाङ्गसंसर्पितपापकुष्ठं
हरन्ति तेभ्योऽस्तु नमो भिषग्भ्यः ॥ १ ॥

तपोवनान्तविश्रान्तं कथान्तेऽथ तथागतम् ।
भिक्षवः कौतुकाक्षिप्ताः पप्रच्छुः स्वच्छमानसम् ॥ २ ॥

भगवन् भवतः सर्व्वलोकशोकापहारिणः ।
भवार्त्तिभिषजः कस्माद्रोगिणोऽप्यधिकं प्रियाः ॥ ३ ॥

स तानुवाच सत्यं मे रोगिणोऽधिकवल्लभाः ।
कायपीड़ासमः पुंसां नास्त्यन्यः शोकसञ्चयः ॥ ४ ॥

जन्मान्तरेष्वपि परं प्रकृत्या दैन्यभूमिषु ।
आतुरेष्वेव सततं पक्षपातो ममाभवत् ॥ ५ ॥

नगर्य्यां शिखिघोषायां शिविर्नामा भवन्नृपः ।
प्रविष्टः सर्व्वचिन्तासु सदान्धव इवार्थिनाम् ॥ ६ ॥

ཀུན་དུ་ནད་པ་ཐམས་ཅད་ནི། ཀུན་ནས་བདག་གིས་གསོ་བར་བྱ།
ཞེས་པ་བདེན་པའི་སྙིང་སྟོབས་ཅན། དེ་ཡི་ངེས་པ་དག་དུ་འགྱུར།། 7

ནམ་ཞིག་གྲོང་པ་ནད་པ་ནི། ཡུན་རིང་ནད་ཀྱི་གཟིར་གྱུར་བ།
སྨན་ལ་མཆིས་ག་ཤིན་དེ་ལ་ནི། མངོན་དུ་ཕྱོགས་དེ་གསོ་བར་ཞུས།། 8

དེ་ནས་གསོ་སྤྱད་ས་བདག་གིས། དྲིས་ཚེ་སྨན་པ་ཐམས་ཅད་ཀྱིས།
རབ་རྒྱས་ནད་ཀྱིས་གཟིར་བ་ལ། ཡུན་རིང་དཔྱད་ནས་རབ་སླས་པ།། 9

ཤིན་དུ་ལྷི་བའི་ནད་འདི་ཡིས། རྒྱལ་པོ་སྐྱར་ནི་རྗེད་པར་དགའ།
སྐྱེས་ནས་བཟོད་ལྡན་སྐྱེས་བུ་ཡི། ཁྲག་གི་དེ་ནི་ཞི་བར་འགྱུར།། 10

དེ་དག་ཐོས་ནས་མི་ཡི་བདག། ཡིད་ནི་སྙིང་རྗེ་རྒྱས་པ་ཡིས།
ཡུན་རིང་ནད་པ་གསོ་བའི་སྐད། དེ་ཡིས་བསྟན་པ་ཡང་དག་བསམས།། 11

ཁྲིས་པའི་ཚེ་ཡང་བདག་ལ་ནི། ནམ་ཡང་གང་ཡང་ཁྲོམ་བྱུང་།
བདག་ནི་མངལ་ན་གནས་ཚེ་ཡང་། མ་ནི་ཁྲོ་བ་སྤངས་པར་གྱུར།། 12

དེ་སྐད་ཁྲོ་མེད་འཛིག་རྟེན་ན། བདག་ལྟ་བུ་ཡང་ཡོད་མ་ཡིན།
བདག་གི་ཁྲག་གི་རྒྱུན་ཉིད་ཀྱིས། འདི་ཡི་ནད་ནི་ཞི་བར་འགྱུར།། 13

དེ་ལྟར་སྦྱོར་བའི་བློ་གྲོས་ཀྱིས། རྗེས་འབྲང་ཀུན་གྱིས་བཟློག་གྱུར་ཀྱང་།
རྒྱལ་པོས་མགོ་ལས་བྱུང་བ་ཡི།། རང་ཁྲག་དག་དུ་དེ་ལ་བྱིན།། 14

सर्व्वे सर्व्वेच रोगार्त्ता श्चिकित्स्याः सर्व्वथा मया ।
इत्यभूत् सततं तस्य सत्यसत्त्वस्य निश्चयः ॥ ७ ॥

कदाचिदातुरः पौरै श्चिररोगनिपीड़ितः ।
तं ययाचे समभ्येत्य चिकित्सा मार्त्तवत्सलम् ॥ ८ ॥

स्वास्थ्याय तस्य भिषजः पृष्टाः सर्व्वे महीभुजा ।
प्रवृद्धव्याधिवैधुर्य्यं विचार्य्य चिरमूचिरे ॥ ९ ॥

दुर्लभं भेषजं राजन् रोगस्यास्य गरीयसः ।
आजन्मक्षमिणः पुंसः शोणितेनैष शाम्यति ॥ १० ॥

एतदाकर्ण्य नृपतिः करुणाकीर्णमानसः ।
अचिन्तयत्तदादिष्टं स्वास्थ्याय चिररोगिणः ॥ ११ ॥

बालस्यापि न मे कोपः कदाचिदभवत् क्वचित् ।
मयि गर्भस्थितेऽप्यासीज्जननी क्रोधवर्जिता ॥ १२ ॥

तस्मादक्रोधनः कश्चिल्लोकेऽस्मिन्नास्ति मद्विधः ।
ममैव रक्तपूरेण व्याधिरस्य प्रशाम्यति ॥ १३ ॥

इत्युद्यतमतिः सर्व्वै र्वार्य्यमाणोऽनुजीविभिः ।
सदा शिरोद्भवं तस्मै ददौ राजा स्वशोणितम् ॥ १४ ॥

དེ་ནས་གླ་བ་དྲུག་གི་ནི། ཁྲག་གིས་ནད་པ་བསོས་པར་གྱུར།
ས་བདག་རིད་པ་ལ་ཞུས་ནས། བསམ་པ་ཡོངས་སུ་རྫོགས་དེ་སོང་། ། 15

དེ་ནས་ནམ་ཞིག་ས་སྐྱོང་བུ། ཕན་པ་ཆོལ་ལ་ངལ་དུབ་ནི།
བསྟེན་ལས་ཉམས་པ་གསལ་བྱེད་པ། གཞིགས་སྐམ་ནད་ནི་བྱུང་བར་གྱུར། ། 16

སྔོན་གྱི་ལས་ཀྱི་རྣམ་སྨིན་ལས། རྣམ་པར་བཟློག་པའི་རང་བཞིན་འདི།
ནད་མེད་རྣམས་ལ་ཁ་ཟས་མེད། དཔལ་ལྡན་རྣམས་ནི་ནད་དང་འགྲོག ། 17

དེ་ནས་སྨན་པ་མཆོག་རྣམས་ཀྱིས། སྨན་པ་སྟོང་གིས་ལེགས་བསྒྲུབས་པ།
ཀུན་གྱི་སྙིང་པོ་ཞེས་པའི་མར། དེ་ནི་བསོས་སླད་ཅེ་བར་བསྟེན། ། 18

རྫས་ཀུན་གྱི་ནི་སྙིང་པོ་བླངས། འདབ་ཆགས་ཤང་ཤང་དག་གི་ནི།
ཁྲུས་ཀྱི་རྩ་ཡི་ཐང་དང་ལྡན། འབད་པ་ཆེན་པོས་ཞུན་མར་ནི། ། 19

བཅུ་གཉིས་ལོ་ཡིས་ལེགས་པར་གྲུབ། གཞོན་ནུ་འཕྲུང་བར་བརྩོན་པ་ན།
ནད་ཀྱིས་གཟིར་བའི་རང་སངས་རྒྱས། ཅི་སྟེ་དེ་ལ་སློང་དུ་འོངས། ། 20

ཀུན་གྱིས་བཟློག་པར་གྱུར་མོད་ཀྱང་། གཞོན་ནུ་སྙིང་སྟོབས་རྒྱ་མཚོ་ཡིས།
ཀུན་གྱི་སྙིང་པོ་ཕན་པའི་མར། ཐམས་ཅད་དེ་ལ་གུས་པས་བྱིན། ། 21

དེ་ནས་རང་སངས་རྒྱས་བསོས་དེ། རབ་དང་སྨོན་ལམ་ལྡན་པ་ཡིས།
གཞོན་ནུ་དག་ནི་བསོས་པར་བསྒྲུབས། དམ་པ་བསྟེན་པ་བདུད་རྩི་ཡིན། ། 22

रक्तेन स्वास्थ्यमायातः षड्भिर्मासै रथातुरः ।
जगाम परिपूर्णांशः क्षमामामन्त्र्य भूपतिम् ॥ १५ ॥

ततः कदाचिद् भूपालसूनो र्व्यायामशीलनात् ।
पार्श्वशोकक्षयाशंसी प्रादुरासीद्धितैषिणः ॥ १६ ॥

विपरीतस्वभावोऽयं विपाकः पुण्यकर्म्मणाम् ।
स्वस्थानामशनं नास्ति श्रीमतां रोगसङ्गतिः ॥ १७ ॥

उपदिष्टं ततस्तस्य स्वास्थ्याय भिषजां वरैः ।
सहस्रपाकसंसिद्धं सर्व्वसाराभिधं घृतम् ॥ १८ ॥

सर्व्वद्रव्यात्तसारेण जीवञ्जीवस्य पक्षिणः ।
स्नानाम्बुक्वाथयोगेन घृतं यत्नेन भूयसा ॥ १९ ॥

सिद्धं द्वादशभिर्वर्षैः कुमारे पातुमुद्यते ।
प्रत्येकबुद्धः शोकार्त्तस्तद् याचितु मथाययौ ॥ २० ॥

सर्व्वं निवार्य्यमाणोऽपि कुमारः सत्त्वसागरः ।
भंक्त्वा सर्व्वं ददौ तस्मै सर्व्वसारघृतं हितम् ॥ २१ ॥

स्वस्थः प्रत्येकबुद्धोऽथ प्रसन्नः प्रणिधानवान् ।
कुमारं विदधे स्वस्थमसृतं साधुसेवनम् ॥ २२ ॥

ཕན་པ་ཚོལ་བ་རྒྱལ་པོ་འདི་བུ། དེར་ནི་ཚེ་རིང་ང་ཉིད་གྱུར།
རང་བཞིན་གྱིས་བདག་ནད་པ་ཡི། གདུང་བ་ཞི་བར་བྱེད་ལ་དགའ། ། 23

ཞེས་པ་ཐོས་ནས་རྒྱལ་བ་ལ། དགེ་སློང་ཀུན་གྱིས་སྨྲར་དྲིས་པ།
དེ་དག་ལས་ནི་ཅི་ཞིག་གིས། མཚུངས་པར་ནད་ཀྱང་བསོས་པར་གྱུར། ། 24

ཅེས་དྲིས་བཅོམ་ལྡན་འདས་ལ་དྲིས། ཐམས་ཅད་མཁྱེན་པས་དེར་གསུངས་པ།
བཱ་རཱ་ཎ་སི་དག་ཏུ་སྔོན། ས་ཡི་བདག་པོ་ཚངས་བྱིན་བྱུང་། ། 25

དེ་ཡི་བུ་གཉིས་དགའ་བོ་དང་། ཉེ་དགའ་ཞེས་པ་དག་ཏུ་གྱུར།
ཐུ་བོ་གྲགས་པའི་ཁྱད་པར་གཅེར། དེ་གཞིན་གཞན་ནི་རྒྱལ་སྲིད་འདོད། ། 26

དེ་ནས་ཉེ་དགས་དབེན་པར་ནི། གྲོགས་པོ་ཁ་གསག་ཅན་ཞེས་པ།
ཨཱ་ཐརྦ་ཡི་མཆོད་སྦྱིན་མཁས། མདུན་ན་འདོན་གྱི་བུ་ལ་སྨྲས། ། 27

བདག་གི་སྤུན་ཟླ་ཐུ་བོ་འདི། སྐྱེ་བོ་དགའ་བ་དེ་དག་སྐྱོང་།
གྲགས་པ་བརྗོད་པས་སྐྱེ་བོ་ལས། རྒྱལ་སྲིད་དག་ནི་ཐོབ་པར་གྱུར། ། 28

བདག་ནི་སྐྱེ་བོ་ཀུན་གྱི་སྡངས། ཉམས་ཤིང་སྐལ་བ་མེད་པར་གྱུར།
དབེན་པར་ཤི་བ་བསྡུགས་པར་འོས། སྨད་པར་གྱུར་པས་འཚོ་བ་མིན། ། 29

ཁྱོད་ཀྱི་སྤུན་ཟླ་ཐུ་བོ་ཉིད། མདུན་ན་འདོན་དུ་རིམ་པར་འགྱུར།
ཕྱུ་ཅག་མཚུངས་པའི་སྡུག་བསྔལ་ཅན། དགོན་པ་དག་ཏུ་འགྲོ་བར་འོས། ། 30

हितैषी राजपुत्रोऽसावहमेव तदाभवम् ।
रोगिणामार्त्तिशमनं स्वभावेनैव मे प्रियम् ॥ २३ ॥

इति श्रुत्वा जिनं सर्व्वे पप्रच्छु र्भिक्षवः पुनः ।
कर्म्मणा केन तौ तुल्यरोगौ स्वास्थ्यमुपागतौ ॥ २४ ॥

इति तैर्भगवान् पृष्टः सर्व्वज्ञ स्तानभाषत ।
ब्रह्मदत्तः क्षितिपति र्वाराणस्यामभूत् पुरा ॥ २५ ॥

नन्दोपनन्दनामानौ तस्य पुत्रौ बभूवतुः ।
ज्येष्ठः कीर्त्तिविशेषार्थी राज्यकामस्तथापरः ॥ २६ ॥

उपनन्दस्ततः प्राह पुरोहितसुतं रहः ।
आथर्व्वयोगकुशलं वयस्यं कुहनाभिधम् ॥ २७ ॥

एष ज्येष्ठो मम भ्राता जनरञ्जनतत्परः ।
जनात् कीर्त्तिप्रवादेन राज्यमासादयिष्यति ॥ २८ ॥

निरंशोऽहं भविष्यामि ध्वस्तः सर्व्वजनोज्झितः ।
विजने निधने श्लाघ्यं नावधूतस्य जीवितम् ॥ २९ ॥

ज्येष्ठस्यैव तव भ्रातुः पौरोहित्यं क्रमागतम् ।
अरण्यगमनं युक्तमावयोः समदुःखयोः ॥ ३० ॥

ཞེས་པ་སྒྲ་ངན་སྨྲ་བ་པོ། རྒྱལ་པོའི་བུ་ཡི་ཚིག་ཐོས་ནས།
ཁྱོད་ལ་ཕན་པར་བྱའོ་ཞེས། མདུན་ན་འདོན་གྱི་བུ་ཡིས་སྨྲས།། 31

གང་གིས་ཕ་ཡི་མཛུག་དུ་ནི། ནུ་བོ་དེ་ཡིས་རྒྱལ་སྲིད་འཕྲོབ།
དེ་ཡི་རྫས་སྦྱོར་དག་གིས་དེའི། ཕྲུ་བོ་ཡན་ལག་མ་ཚང་བསྒྲུབས།། 32

དུས་ཀྱི་དེ་ཡིས་རྒྱལ་སྲིད་འཕྲོབ། ཡན་ལག་མ་ཚང་སྐྱུན་ལྷ་ནི།
ཕྲུ་བོ་ལག་འཁར་ལ་བརྟེན་པ། མཐོང་ནས་རྗེས་སུ་འགྲོད་པར་གྱུར།། 33

དེ་ནས་མདུན་ན་འདོན་གྱི་བུ། མདུན་ན་འདོན་དུ་བཀོད་པ་ལ།
སྨྲས་པའི་སྡིག་པས་འཇིགས་པ་དེས། ཤུགས་རིངས་ཚ་བ་ཕྱུང་ནས་སྨྲས།། 34

ཀྱི་མ་རྒྱལ་སྲིད་ལ་བརྐམ་ཞིང་། ཆོས་མི་ཤེས་པ་དག་གིས་ནི།
ཕ་མཚུངས་སྐྱུན་ལྷ་ཕྲུ་བོ་ནི། གནས་སྐབས་ངན་པ་འདི་ལ་བཀོད།། 35

སྐད་ཅིག་འཇིག་པའི་བདེ་བ་དྲངས། ཀྱི་མ་མ་བརྟགས་བྱེད་རྣམས་ཀྱིས།
སྡིག་པ་བྱས་ནས་བདག་ཉིད་ནི། མི་བཟང་སྡུག་བསྔལ་རྣམས་སུ་འཕེན།། 36

ཞེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། མདུན་ན་འདོན་ནི་འགྱོད་སྐྱེས་པས།
དེ་ལ་སྨྲས་པ་བདག་ཀྱང་འདིར། རྒྱལ་པོ་འགོད་པའི་རིམས་དང་ལྡན།། 37

སླར་ཡང་དེ་ཡི་རྫས་སྦྱོར་གྱིས། མི་བདག་ཆུ་དེ་བསོས་པར་བྱས།
བསོས་པ་དེ་ལ་རང་གི་ནི། རྒྱལ་སྲིད་ནུ་བོ་དེས་ཀྱང་བྱིན།། 38

श्रुत्वेति राजपुत्रस्य वचः शोकप्रलापिनः ।
हितं तव करोमीति पुरोहितसुतोऽब्रवीत् ॥ ३१ ॥

सोऽथ द्रव्यप्रयोगेन व्यङ्गं तस्याग्रजं व्यधात् ।
येनासौ जनकस्यान्ते कनीयान् राज्यमाप्तवान् ॥ ३२ ॥

प्राप्तराज्यः स कालेन दृष्ट्वा भ्रातरमग्रजम् ।
व्यङ्गं यष्टीकरालम्बं पश्चात्तापं समाययौ ॥ ३३ ॥

पुरोहितसुतं सोऽथ पौरोहित्यनिवेशितम् ।
उवाचोष्णं विनिश्वस्य गूढं पातकशङ्कितम् ॥ ३४ ॥

अहो नु राज्यलोभेन मया धर्ममजानता ।
ज्येष्ठो भ्राता पितृसमः प्रापितः कुदशामिमाम् ॥ ३५ ॥

क्षणक्षयि सुखाक्षिप्ताः पापं कृत्वा क्षयेष्वहो ।
क्षिपन्ति दुःखेष्वात्मान मसमीक्षितकारिणः ॥ ३६ ॥

इति तस्य वचः श्रुत्वा जाततापः पुरोहितः ।
तमुवाच ममाप्येष राजन्ननुशयज्वरः ॥ ३७ ॥

तं पुन र्द्रव्ययोगेन स्वस्थं चक्रे नृपात्मजम् ।
स्वस्थाय प्रददौ तस्मै निजराज्यं स चानुजः ॥ ३८ ॥

དེ་ནས་དུས་ཀྱིས་ཉེ་དགའ་དང་། མདུན་ན་འདོན་གྱི་བུ་དེས་ཀྱང་།
རང་སངས་རྒྱས་ལ་མཆོད་བྱས་ནས། ལུས་ཀྱི་མཐའ་ནི་རབ་ཏུ་ཐོབ།། 39

རྒྱལ་པོ་འི་བུ་དེ་ས་བདག་ནི། ཞི་བའི་བུ་ཉིད་ཐོབ་གྱུར་ཏེ།
མདུན་ན་འདོན་གྱི་བུ་དེ་ཡང་། རང་སངས་རྒྱས་ཉིད་རབ་ཏུ་ཐོབ།། 40

དེ་དག་སྨྲས་པའི་ཚིག་པ་དེས། མཚུངས་པར་ནད་ཀྱིས་ཐེབས་གྱུར་ཅིང་།
ཡན་ལག་ཉམས་པ་གསོ་བྱེད་པས། དེ་དག་བསོས་པ་ཉིད་དུ་གྱུར།། 41

རྒྱལ་བ་ཡོངས་པས་གཟིར་བ་སྐྱོབ་གཉེན་གྱིས།
རྟག་ཏུ་སེམས་ཅན་ལ་ཆགས་སྙིང་རྗེའི་སྤྱི།
འདས་པའི་སྐྱེ་བོ་དང་འབྲེལ་དེ་ཐོས་ནས།
མགུ་བའི་དགེ་སློང་དེ་དག་བདེ་བ་ཐོབ།། 42

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཤན་པ་འཚོལ་བའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་ཙ་ལྔ་པའོ།།

उपनन्दोऽथ कालेन पुरोहितसुतश्च सः ।
कारां प्रत्येकबुद्धाय कृत्वा देहान्तमापतुः ॥ ३९ ॥

शिवेर्भूमिपतेः प्राप राजपुत्रः स पुत्रताम् ।
प्रत्येकबुद्धतां लेभे पुरोहितसुतश्च सः ॥ ४० ॥

तेन तौ गूढपापेन तुल्यरोगौ बभूवतुः ।
व्यङ्गस्य स्वास्थ्यकरणाद् युगपत् स्वास्थ्यमागतौ ॥ ४१ ॥

इत्याकर्ण्यातीतजन्मानुबद्ध-
मापन्नार्त्तित्राणबन्धो र्जिनस्य ।
नित्यासक्तं सत्त्वकारुण्यवृत्तं
हृष्टाः प्रापु र्निर्वृतिं भिक्षवस्ते ॥ ४२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
हितैष्यवदानं पञ्चाशीतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་དྲུག་པ།

ཆོས་ཀྱི་བསྟན་པའི་རིག་པ་གང་གིས་མཆོད་པ་རྣམས་ལ་
དུལ་བར་གྲན་རིམ་གྱིས།
མཆོད་བྱའི་ཚོགས་ལ་རབ་འདུད་དུལ་བས་ཕྱག་བྱེད་དེ་དག་
མགྲོ་བ་ཐོབ་པར་འགྱུར།
དྲིགས་པས་འཕྲུར་ལས་བློ་གྲོས་རྣམ་པར་མ་བསྒམས་
རྨོངས་ལས་འོག་ཏུ་འགྲོ་བྱེད་ཅིང་།
གྲན་འདས་རྣམས་ལ་འཛིག་རྟེན་འདི་དང་ཕ་རོལ་དེ་ཡང་
དྲག་ཏུ་ལྷ་ངན་བཅས།། 1

གྲན་པོ་མཆོད་པའི་ཞར་ལ་སྨྲར། དགེ་སློང་རྣམས་ཀྱིས་དྲིས་པ་དག།
གྲན་པོ་ཆོ་ག་ཇི་བཞིན་སྨྲར། བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་པས་གསུངས།། 2

བྲ་ར་ཎ་སིར་དེ་དག་སྔོན། མི་བདག་ཚངས་བྱིན་ཞེས་པ་བྱུང་།
འགྲོ་བ་གང་གི་བསོད་ནམས་མཐུས། ཆོས་ཀྱི་ཀུན་དགའ་ར་བར་གྱུར།། 3

དེ་དུས་གྲོང་མཐའི་ནགས་ཚལ་དུ། སློན་གྱི་བསོད་ནམས་མཚན་ཉིད་ལས།
མི་ཡི་སྐྱུ་བརྗོད་ལ་ཞུགས་པ། སློག་ཆགས་བཞི་ནི་བྱུང་བར་གྱུར།། 4

བ་སེན་དང་ནི་རི་བོང་དང་། སྤྲེའུ་དེ་བཞིན་སྤྱང་པོའི་མཆོག།
དེ་དག་དགའ་བའི་སྤྱོད་ཚུལ་ཅན། ཕན་ཚུན་མཛའ་བས་བཅིངས་པར་གྱུར།། 5

ཉལ་ཞིག་བདེ་ཐོབ་དེ་དག་གིས། གདངས་ཀྱི་མཇུག་ཏུ་ཕན་ཚུན་སྨྲས།
ཕྱུ་སྐྱིལ་གྲན་རིམ་མེད་པ་ལ། མཆོད་པ་དག་ནི་ཇི་ལྟར་སྒྲུབ།། 6

षड़शीतितमः पल्लवः ।

वन्दन्ते स्थविरक्रमेण नियतं ये धर्म्मशिक्षाविदः
पूज्यान् पूज्यगुणाः प्रणामविनयैस्ते प्राप्नुवन्त्युन्नतिम् ।
दर्पानुद्धतया विशृङ्खलधिया मोहादधःपातिनां
ज्येष्ठातिक्रमिणामयं स च परो लोकः सशोकः सदा ॥ १ ॥

ज्येष्ठपूजाप्रसङ्गेन भिक्षुभि र्भगवान् पुनः ।
यथादृष्टविधिं पृष्टः सर्व्वज्ञः पुनरब्रवीत् ॥ २ ॥

ब्रह्मदत्ताभिधः पूर्वं वाराणस्यामभून्नृपः ।
यस्य पुण्यानुभावेन धर्म्मारण्य मभूज्जगत् ॥ ३ ॥

तस्य काले पुरोपान्तवने प्राक्पुण्यलक्षणात् ।
प्रवृत्तमानुषालापा श्चत्वारः प्राणिनोऽभवन् ॥ ४ ॥

कपिञ्जलोऽथ शशकः कपि र्गजवरस्तथा ।
ते बभूवुः सदाचाराः स्नेहबद्धाः परस्परम् ॥ ५ ॥

कदाचित् सुखसक्तास्ते कथान्ते जगदु र्मिथः ।
ज्येष्ठक्रमं विनास्माकं कथं पूजा प्रवर्त्ततांम् ॥ ६ ॥

དམ་པས་ཇི་ལྟར་གཏན་རིམ་གྱིས། བཀུར་སྟི་དག་ནི་རབ་བསྒྲུབ་པ།
ངེས་པར་དགེ་ལེགས་སྐྱེད་བྱེད་ཅིང་། དགེ་བ་ཉིད་དང་ལྡན་པར་གྱུར།། 7

གཏན་པོའི་ཞེ་སས་མཆོད་བྱ་གང་། ཡུ་ཞས་རེ་ཞིག་གཏན་པ་སུ།
ཞེས་པ་སྨྲ་བ་དེ་དག་ལས། གླང་ཆེན་ཁྱུ་མཆོག་གིས་སྨྲས་པ།། 8

འདབ་མ་ཆེ་རྒྱལ་ནྱ་གྲོ་དྷ། གང་འདི་སྙིང་པར་མཐོང་གྱུར་པ།
འདི་ཡི་ཡལ་འདབ་གསར་པ་དང་། རང་གི་ལུས་ནི་མཚུངས་པ་དྲན།། 9

སྤྲེའུ་ཡིས་ཀྱང་དེར་སྨྲས་པ། བདག་ནི་ནགས་ན་རྒྱུ་བ་ཡིས།
ནྱ་གྲོ་དྷ་འདི་རང་ལུས་དང་། མཚུངས་པ་ཤིན་དུ་ཆུང་བ་མཐོང་།། 10

རི་བོང་གིས་ཀྱང་སྨྲས་པ་སྟོན། ནྱ་གྲོ་དྷ་འདི་སོར་ལྡེ་པ།
འདབ་མ་གཉིས་ཀྱིས་མཚན་པ་ལ། ཟིལ་ཕྲིགས་ཀྱིས་བརླན་བདག་གིས་ཟུང་།| 11

དེ་དག་རིམ་པས་དེ་བརྗོད་ཚེ། བྱི་ནས་བ་མེན་གྱིས་སྨྲས་པ།
བདག་གི་ལྕི་བའི་ས་བོན་ལས། ཤིང་ཆེན་ནྱ་གྲོ་དྷ་འདི་སྐྱེས།། 12

དེ་ནས་གཏན་རིམ་ཤེས་གྱུར་ནས། དེ་དག་པན་ཚུན་མཛའ་བ་ཡིས།
རྗེས་ཕྱུགས་དགའ་བས་མཆོད་པ་ནི། རྟག་ཏུ་ཞེ་ས་ལ་དོས་བྱས།། 13

དེ་ནས་སྲོག་གཅོད་ཀུ་བ་དང་། དེ་བཞིན་བསྒྲོད་མིན་འགྲོ་བ་དང་།
མི་བདེན་ཚ་མཚུངས་འབྲས་བུ་ནི། སྨྱུར་པོ་ཟ་བ་དག་ལས་ཀྱང་།། 14

यथाहृद्विकया सद्भिः सत्कारोऽथ प्रवर्त्तितः ।
कलयन् किल कल्याणं कुशलायैव कल्पते ॥ ७ ॥

ज्येष्ठः कस्तावदस्माकं योऽर्च्यः स्थविरगौरवात् ।
इति तेषां ब्रुवाणानां जगाद गजयूथपः ॥ ८ ॥

योऽयं जीर्णमहाशाखः पुराणो दृश्यते वटः ।
तुल्यमेनं स्वकायस्य स्मरामि नवपल्लवम् ॥ ९ ॥

मर्कटोऽप्यथ तानूचे वने विचरता मया ।
स्वकायतुल्य एवायं दृष्टः स्वल्पतरो वटः ॥ १० ॥

शशकोऽप्यवदत् पूर्वं मया पत्रद्वयाङ्कितः ।
अवश्यायलवार्द्रोऽयं लीढः पञ्चाङ्गुलो वटः ॥ ११ ॥

तैः क्रमेणेति कथिते पश्चात्प्राह कपिञ्जलः ।
ममैवायं शकृद्बीजाज्जातः प्राज्यतरो वटः ॥ १२ ॥

अथ ज्येष्ठक्रमं ज्ञात्वा ते सदा गौरवोचिताम् ।
स्नेहानुवृत्तिनिरताः पूजां चक्रुः परस्परम् ॥ १३ ॥

प्राणापहरणाच्चौर्य्यादगम्यागमनात्तथा ।
असत्यान्मद्यतुल्याम्लफलसंभक्षणाच्च ते ॥ १४ ॥

ཆགས་བྲལ་རང་གནས་ཀུན་སྤྱོད་ཀྱི། བསླབ་པས་ལེགས་བྱས་ལ་ཆགས་པའི།
བསོད་ནམས་མཐུ་ཡིས་ནགས་ཚལ་ན། གནས་རྣམས་སྤྱོད་ཚུལ་མཚུངས་
པར་བྱས། 15

དེ་ནས་དེ་དག་རྣམས་ཀྱི་མཐུས། རྟག་ཏུ་མེ་ཏོག་འབྲས་ལྡན་ཞིང་།
སྤྲིན་ནི་དུས་སུ་ཆར་འབེབས་ཤིང་། ས་ལ་འབྲུ་རྣམས་རྒྱས་པར་གྱུར། 16

ས་ཡི་ལེགས་བྱས་མཚན་ཉིད་ནི། ངོ་མཚར་ཆེ་བ་དེ་མཐོང་ནས།
ཐམས་ཅད་ས་བདག་ཚངས་བྱིན་གྱིས། རང་གི་བསོད་ནམས་ལས་སྐྱེས་
བསམས། 17

ལོག་པར་ཁེངས་པས་ཆོས་དེ་ལ། ཐུབ་པ་མངོན་ཤེས་ལྔ་བས་སྨྲས།
མེ་ཏོག་འབྲས་བུ་རྒྱས་པ་འདི། མི་བདག་ཁྱོད་ཀྱི་དྲིན་གྱིས་མིན། 18

ནགས་ན་སྤྲེའུ་རི་བོང་དང་། གཉིས་འཐུང་བ་མེན་ལྷན་ཅིག་གནས།
ཡོན་ཏན་རྒྱས་འདི་དམ་ཆོས་ཀྱི། ངང་ཚུལ་དེ་དག་རྣམས་ཀྱི་ཡིན། 19

དེ་དག་བརྟུལ་ཞུགས་ལྔ་ཡིས་དག། ཇི་ལྟར་རྒན་པ་མཆོད་བྱེད་ཅིང་།
བ་མེན་ཚིག་གིས་ཐམས་ཅད་ནི། དམ་ཆོས་དམ་ཚིག་དག་ལ་བརྟེན། 20

ཞེས་པ་ཐུབ་པའི་ཚིག་ཐོས་ནས། མཆོག་ཏུ་དགུས་སྐྱེས་རྒྱལ་པོ་ནི།
གྲོང་པ་བཙུན་མོ་བློན་བཅས་པས། བརྟུལ་ཞུགས་ལྔ་པོ་དེ་དག་བསྟེན། 21

བ་མེན་ང་ཉིད་རི་བོང་ནི། ཤཱ་རིའི་བུ་འིད་ཉིད་དུ་གྱུར།
སྤྲེའུ་མཽ་གལ་གྱི་བུ། གླང་ཆེན་ཁྱུ་བདག་ཀུན་དགའ་བོ། 22

विरताः सुकृतासक्ताः स्वपदाचारशिक्षया ।
चक्रुः पुण्यानुभावेन तुल्यवृत्तान् वनौकसः ॥ १५ ॥

अथ तेषां प्रभावेण नित्यपुष्पफलद्रुमाः ।
स्फीतशस्याभवद् भूमिः कालवर्षी च वारिदः ॥ १६ ॥

तद्दृष्ट्वा महदाश्चर्य्यं भुवः सकृतलक्षणम् ।
मेने स्वपुण्यजं सर्व्वं ब्रह्मदत्तो महीपतिः ॥ १७ ॥

तं मिथ्यामानसं तुष्टं पञ्चाभिज्ञो मुनि र्नृपम् ।
उवाच त्वत्प्रभावेण नायं पुष्पफलोदयः ॥ १८ ॥

कानने कपिना सार्द्धं शशद्विपकपिञ्जलाः ।
स्थिताः सद्धर्म्मशीलानां तेषामेष गुणोदयः ॥ १९ ॥

ते व्रतैः पञ्चभिः शुद्धा यथास्थविरपूजकाः ।
कपिञ्जलगिरा सर्व्वे सद्धर्म्मसमयं श्रिताः ॥ २० ॥

इति श्रुत्वा मुनेर्वाक्यं राजा जातादरः परम् ।
सपौरान्तःपुरामात्य स्तद्भेजे व्रतपञ्चकम् ॥ २१ ॥

कपिञ्जलोऽहमेवासौ शारिपुत्रः शशोऽभवत् ।
कपिश्च मुद्गरापत्य आनन्दो गजयूथपः ॥ २२ ॥

དེ་དག་ཇི་ལྟར་གན་པའི་རིམ། མཆོད་ལས་ཆོས་ཉི་དྲི་མེད་ཐོབ།
དེ་སྐྲད་ཕྱག་དང་མཆོད་པ་ལ། གན་པའི་རིམ་པ་རབ་བརྟག་བྱ།། 23

སྟོན་པའི་འདུལ་བ་ཉེར་བསྟན་དེ་ཐོས་ན།
གན་པོ་མཆོད་པའི་དགའ་སྟོན་ཁྲིད་པར་ཐོབ།
ཇི་ལྟར་གན་བཞིན་དགེ་སློང་དེ་དག་གིས།
ཉི་སར་བཅས་པའི་མཆོད་པ་མདུན་སར་བྱས།། 24

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བ་མེན་གྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་དྲུག་པའོ།

ते प्रापुर्धर्म्मवैमल्यं यथाज्येष्ठक्रमार्चनात् ।
तस्मात् प्रणाम पूजासु द्रष्टव्यः स्थविरक्रमः ॥ २३ ॥

श्रुत्वेति शास्तुर्विनयोपदेशं
ज्येष्ठार्चनं प्राप्य तपोविशेषम् ।
सगौरवां पर्षदि भिक्षवस्ते
पूजां यथावृद्धिकयैव चक्रुः ॥ २४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कपिञ्जलावदानं षड्शीतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་བདུན་པ།

གང་ཞིག་གཡོ་དང་ཡོངས་ཁྲུབ་དྲིགས་པ་མི་བཟད་གང་
ཡང་གདུག་པ་རྣམ་པར་བཅས།
གང་ཡང་ཤིན་ཏུ་རབ་དྲག་ནག་པོ་བརྩེགས་པ་རྩོམ་པ་ཆོར་ནས་བརྡན་པ་དང་།
གང་དག་གཞན་ཡང་བཟོད་དཀའི་དུག་རྣམས་གསལ་བར་
གཅིག་དུ་བྲུས་པ་དེ་དག་གིས།
ཚིག་རྩུབ་དུག་གི་རྣོ་བ་ཉིད་ལ་ཆ་དང་དཔེར་ཡང་མཚུངས་པའི་མི་འགྱུར་རོ ༎ 1

ཁྲིམས་བདག་ཡིད་ཅེས་བྱ་བའི་བུ། ཡོན་དེན་ལྡན་པ་མཉེན་ཡོད་དུ།
བད་མའི་སྙིང་པོ་འི་འོད་མཚུངས་པ། པདྨ་ཅན་ཞེས་བྱ་བ་བྱུང་ ༎ 2

ཚུལ་ཁྲིམས་ཅན་གྱི་དུལ་བ་དང་། བློ་ལྡན་རྣམས་ཀྱི་དབེན་པ་དང་།
དམ་པའི་ཡོན་ཏན་ལ་གུས་བཞིན། དེ་ཡི་མདུན་དུ་དེ་རབ་བསྐྱེད ༎ 3

གཟུགས་ནི་འདོད་པ་རྒྱས་ལྡན་ཞིང་། ལང་ཚོ་གསར་པ་རྩོམ་ཚེ་དེ།
ལོངས་སྤྱོད་རྩོམ་ལ་ཆགས་བྲལ་བས། ཆགས་བྲལ་ཉིད་ལ་མངོན་ཕྱོགས་གྱུར ༎ 4

དགེ་སློང་བཟོད་པའི་སེམས་ལྡན་པ། ཉི་སྨེ་ཞེས་ནི་བྱ་བ་ཡི།
བསྟན་ལ་རབ་ཞི་བསྔགས་འོས་པ། རབ་བྱུང་དེ་ཡིས་ཡང་དག་བླངས ༎ 5

འཁོར་བའི་ཕྱོགས་ལ་ཆགས་བྲལ་བས། ཆགས་པ་དང་བྲལ་ཟླ་བ་བཞིན།
ལག་ན་ལྷུང་བཟེད་ཆོས་གོས་དང་། ཡང་དག་ལྡན་དེ་མཆོག་དུ་མཛེས ༎ 6

सप्ताशीतितमः पल्लवः ।

यत्सार्पं परिसर्पि दर्पविषमं क्रूरञ्च यन्मारकं
यच्चात्युत्कटकालकूटविकटाटोपस्थिरस्थावरम् ।
यान्यन्यानि चितानि दुःसहविषाण्येकीकृतानि स्फुटं
वाक्पारुष्यविषस्य तैक्ष्ण्यतुलया नायान्ति लेशोपमाम् ॥ १ ॥

श्रावस्त्यां मानसाख्यस्य पद्मगर्भनिभप्रभः ।
अभूद्गृहपतेः सूनुर्गुणवान् पद्मकाभिधः ॥ २ ॥

सुशीलस्येव नियमः साधोरिव गुणादरः ।
सोऽवर्द्धत गृहे तस्य विवेक इव धीमतः ॥ ३ ॥

स नवे यौवनारम्भे रूपकन्दर्पहासिनि ।
भोगोद्योगविरागेण वैराग्याभिमुखोऽभवत् ॥ ४ ॥

उपसेनाभिधानस्य स भिक्षोः क्षान्तिचेतसः ।
शासने प्रशमश्लाघ्यां प्रव्रज्यां समुपाददे ॥ ५ ॥

स पात्रपाणिः संसक्तचीवरः शुशुभे परम् ।
संसारे क्षणवैराग्याद्विरक्त इव चन्द्रमाः ॥ ६ ॥

དེ་ནས་ནམ་ཞིག་གཅིག་པུ་ཉིད། ལྗོངས་ནི་རྒྱུ་ཞིང་འགྲོ་བ་དེ།
གཙུག་ལག་ཁང་དང་དགའ་ཚལ་གྱིས། མཛེས་པའི་བཅོམ་བརླག་དག་ཏུ་ཕྱིན།། 7

དེར་ནི་བསོད་སྙོམས་དོན་གཉེར་དེས། གསར་བུ་ཉིད་ཕྱིར་མ་ཤེས་ནས།
སྨད་འཚོང་ཟླ་བའི་རི་མོ་ཡིས། ཁང་པའི་ཁྱམས་ཀྱི་ནང་དུ་ཞུགས།། 8

ཨུ་དྤལ་མིག་ཅན་དེ་ཡིས་ནི། དེ་ལ་སྟན་དང་བཀུར་སྟི་བྱས།
གཟུགས་ནི་མཐོང་བས་ཡ་མཚན་ཞིང་། གུས་དང་ལྡན་པས་དེ་ལ་སྨྲས།། 9

ལང་ཚོ་གསར་པ་དང་ལྡན་པ། ཁྱོད་ཀྱི་གཟུགས་ནི་ཡིད་འོང་ལྡན།
སྲུ་ཡི་མིག་ལ་བདུད་རྩི་ཡི། ལོངས་སྤྱོད་སྟོན་པར་བྱེད་མ་ཡིན།། 10

ན་ཚོ་འདི་དང་གཟུགས་འདི་ལ། འདོད་པ་འགལ་ཟླ་སྲུ་ཞིག་གིས།
རྒན་པོ་ལ་འོས་ཆགས་བྲལ་གྱིས། སྡུག་བསྔལ་ཡང་དག་ཉེ་བར་བསྟན།། 11

ཆགས་ལྡན་བུད་མེད་ནུ་མ་ནི། རབ་རྒྱས་རག་པས་བདེར་འོས་པ།
ལོངས་སྤྱོད་སྣོད་གྱུར་ཁྱོད་ཀྱི་ནི། ལག་ན་ལྷུང་བཟེད་མཛེས་མ་ཡིན།། 12

ང་ནི་ནུ་མའི་ཁུར་གྱིས་ནོན། ཁྱོད་ནི་ལང་ཚོས་རྣམ་པར་གཡོ།
ཡུ་ཐག་གཉིས་ནི་མཛའ་བར་འོས། ད་ནི་བཏུལ་ཞུགས་བཟོད་པར་མཛོད།། 13

གཡོ་སྒྱུས་ཞི་དང་དུལ་བ་གོམས་པས་ལོངས་སྤྱོད་བདུད་རྩི་
དག་ལ་ཆགས་མེད་ཅིང་།

མིག་ཡངས་མཚུ་ཡི་ཡལ་འདབ་རབ་མཐུང་རབ་དགའི་དགའ་
སྟོན་རབ་དུ་སྤངས་པ་བཞིན།

ततः कदाचिदेकाकी जनचारिकया व्रजन् ।
विहारारामरुचिरां मथुरा माससाद सः ॥ ७ ॥

स तत्र पिण्डपातार्थी नवत्वादनभिज्ञया ।
वेश्यायाः शशिलेखायाः प्रविवेश गृहाङ्गनम् ॥ ८ ॥

सा तस्यासनसत्कारं कृत्वा कुवलयेक्षणा ।
तं जगादादरवती रूपालोकनविस्मिता ॥ ९ ॥

इयन्ते ललिता मूर्त्तिं नैवयौवनशालिनी ।
करोत्यमृतसम्भोगदीक्षां कस्य न चक्षुषोः ॥ १० ॥

अस्मिन् वयसि रूपेऽस्मिन् केन कामविरोधिना ।
कष्टं समुपदिष्टं ते वैराग्यं स्थविरोचितम् ॥ ११ ॥

ललनावसनोत्कर्षकुचस्पर्शसुखोचिते ।
पाणौ सम्भोगपात्रस्य पात्रं तव न शोभते ॥ १२ ॥

अहं कुचभराक्रान्ता त्वं तारुण्यतरङ्गितः ।
उचितेवावयोः प्रीतिः सम्प्रति क्षमतां व्रतम् ॥ १३ ॥

उत्सृज्यायतलोचनाधरदलस्वादप्रमोदोत्सवं
सम्भोगामृतनिस्पृहः शमदमाभ्यासेन शापादिव ।

མཛེས་མའི་ཉུ་མ་གྱུར་གྱུམ་གྱིས་མཚན་མཛེས་པས་སྙིང་ལ་
ཆགས་པ་མི་འཛིན་གང་།
སྐྱེ་བོ་འདི་ནགས་སུ་ཉོན་མོངས་དམན་པའི་འབྲས་བུ་ཟ་བའི་
དུལ་བ་དེ་ལ་འདུད།། 14

གལ་ཏེ་མཛའ་ལ་བཀམ་ཆགས་ཅན། བདག་གི་ཚིག་འདི་མི་བྱེད་ན།
ཁྱོད་ཀྱི་བཞིན་རས་པ་དྨ་འདི། སྟོབས་ཀྱིས་མནན་ཏེ་བདག་གིས་བདུད།། 15

དེ་ཕྱིར་ཀུན་དུ་སྐྲག་པ་བཞིན། ཉ་བ་བསྒྲིབས་ནས་དེ་ལ་དེས།
སྐྲས་པ་མ་གཅིག་བདག་གིས་ནི། བསྟན་པ་སྲུན་འཁྱིན་འོས་པ་མིན།། 16

བདག་ཉིད་ཀུན་གྱིས་ལེགས་སྦྱང་རྒྱན་ལྡན་སྐྱེས་བུ་ལ།
བདེ་གཤེགས་བརྟུལ་ཞུགས་ཅོད་པན་ཉིད་དུ་རབ་གྱུར་ཅིང་།
སྙིང་སྟོབས་དཔལ་ནི་གཙང་བས་ཐིག་ལེ་ཉིད་གྱུར་པ།
ཚུལ་ཁྲིམས་མཚུངས་པའི་རྒྱན་ནི་ཅུང་ཟད་ཡོད་མ་ཡིན།། 17

ཞེས་པ་བརྗོད་ནས་དུལ་ལྡན་དེ། གནོད་པའི་ཟུག་རྔུ་མི་བཟོད་ཅན།
མཆོད་པ་རབ་བདང་སྒྱུར་བ་དང་། བཅས་པ་སྣོད་སྤྱོད་ཉིད་དུ་སོང་།། 18

དེ་ནས་ཕྱུགས་སྐྱོབས་ཞེས་པ་ཡི། སྨད་འཚོང་གདུམ་མོ་འདོད་ལྡན་མ།
དབང་དགུག་སོགས་ལ་འཁྲུལ་འཁོར་དང་། ཕྱུགས་དང་རྒྱུད་སོགས་དེ་སྦྱོར་མ།། 19

བོས་ནས་དེ་ལ་རང་ཉིད་ནི། ཆགས་པའི་ཟིལ་གྱིས་མནན་པ་བཤད།
ནོར་གྱིས་ཚིམ་བྱས་ཆགས་པ་ཡིས། གཟིར་མས་དགའ་དང་འགྲོགས་པ་ཞུས།། 20

यः कान्ताकुचकुङ्कुमाङ्कितरुचि धत्ते न रागं हृदि
क्लेशक्लिन्नतृणाशिने जनवने दान्ताय तस्मै नमः ॥ १४ ॥

यदि मे प्रीतिलुब्धाया वचनं न करिष्यसि ।
तदेतत्ते बलात् कान्तं पास्यामि वदनाम्बुजम् ॥ १५ ॥

एतदाकर्ण्य सन्त्रस्त इव कर्णौ पिधाय सः ।
तामूचे नोचितं मात र्मम शासनदूषणम् ॥ १६ ॥

उत्तंसता मुपगतं सुगतव्रतस्य
सत्त्वश्रियः शुचितया तिलकायमानम् ।
सर्व्वात्मना सुचरिताभरणस्य पुंसः
शीलोपमं नहि विभूषण मस्ति किञ्चित् ॥ १७ ॥

इत्युक्ता संयतः शून्यपात्र एव जगाम सः ।
अपायशल्यविषमां पूजामुत्सृज्य सत्वरम् ॥ १८ ॥

अथ मन्त्रबलां नाम चण्डालीं वेशकामिनीम् ।
वश्याकर्षादिनिर्यन्त्र मन्त्रतन्त्रादितत्पराम् ॥ १९ ॥

आहूय विनिवेद्यास्यै निजं स्मरपराभवम् ।
ययाचे धनसन्तुष्टां रागार्त्ता प्रियसङ्गमम् ॥ २० ॥

དེ་ནས་དེ་ཡིས་འཕྲུལ་ལ་ནི། ཕྲུགས་སྤོབས་ཀྱིས་དྲངས་པདྨ་ཅན།
དབང་མེད་དེ་ལ་མངོན་ཕྱོགས་དེ། བདག་གི་ཅི་ཞིག་བྱ་ཞེས་སྨྲས། ‖ 21

དེ་ལ་དེས་སྨྲས་བསོད་ནམས་ཀྱིས། ཉེར་གནས་མཛེས་མ་ཟླ་བཞིན་མ།
མཛའ་མོ་འདི་ནི་རབ་ཏུ་བསྟན། ཡང་ན་འབར་བའི་མེ་ལ་ཞུགས། ‖ 22

པདྨོ་ཅན་གྱི་མདུན་དུ་ནི། མེད་འབར་མཐོང་ནས་གོས་བཞག་སྟེ།
སྙིང་སྟོབས་དཀར་བའི་གོས་ཅན་གྱིས། མཆོད་པར་ཆས་ནས་རབ་སྨྲས་པ། ‖ 23

གཙང་བྱེད་འབར་བར་བདག་འཇུག་གི། མི་གཙང་ཆགས་པའི་མེད་མ་ཡིན།
ཆགས་པས་བསྒྲིབས་པའི་སྐྱེས་བུ་རྣམས། སྐྱེ་བ་བརྒྱ་ཡི་རྗེས་འབྲང་སྲིག ‖ 24

ཅེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། གཏུམ་མོ་རེ་བ་ཉམས་བྱས་ཅིང་།
བྱ་མིན་བྱས་པས་ཡིད་བྱུང་སྟེ། རྗེས་སུ་གདུང་བ་དག་ཏུ་འགྱུར། ‖ 25

དེ་ཡི་བཟོད་པའི་གནས་དེ་ལ། གུས་པ་ཡིས་ནི་དང་བར་བྱས།
ཆགས་བྲལ་ཞི་ཞིང་བསིལ་བ་ཡིས། ཟླ་ལྡན་སྨད་འཚོང་མ་དག་ཀྱང་། ‖ 26

ཆོས་ཀྱིས་ཀུན་དུ་དག་པའི་སྐད། དེ་དག་ལ་ནི་ཆོས་བསྟན་མཛད།
གང་གིས་ཉོན་མོངས་ཀུན་ཞི་ནས། དེ་དག་གིས་ནི་དགྲ་བཅོམ་ཐོབ། ‖ 27

དགེ་ལེགས་ལྡན་པ་པདྨོ་ཅན། རང་ཉིད་དགྲ་བཅོམ་ཉིད་ཐོབ་ནས།
མཚན་ཡོད་གྲོང་དུ་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་ལྷ་རུ་སོང་། ‖ 28

अथ मन्त्रबलाकृष्टस्तथा सपदि पद्मकः ।
विवशस्तां समभ्येत्य किं करोमीत्यभाषत ॥ २१ ॥

सा तमूचे शशिमुखीं भज प्रणयिनीमिमाम् ।
पुण्यैरुपनतां कान्तां दीप्तं वा वह्निमाविश ॥ २२ ॥

तां पद्मकोऽवदद् दृष्ट्वा ज्वलितं पावकं पुरः ।
जातसज्ञः समुत्सृज्य वस्त्रं सच्चसितांशुकः ॥ २३ ॥

विशामि पावकं दीप्तं रागाग्निं नत्वपावकम् ।
पुंसां मदनदग्धानां दाहो जन्मशतानुगः ॥ २४ ॥

इति तस्य वचः श्रुत्वा चण्डाली खण्डिताशया ।
अकार्यकरणोद्विग्ना पश्चात्तापं समाययौ ॥ २५ ॥

स तया क्षान्तिनिलयः प्रणयेन प्रसादितः ।
वेश्यया च सवैराग्यशमशीतलया धिया ॥ २६ ॥

विदधे जन्मसंशुद्ध्यै तयोः सद्धर्मदेशनाम् ।
ते सर्व्वक्लेशशमनाद् ययार्हत्त्व मवापतुः ॥ २७ ॥

स्वयञ्चार्हत्त्व मासाद्य भगवन्तं तथागतम् ।
पद्मकः प्रययौ द्रष्टुं श्रावस्तीं स्वस्तिमान् पुरीम् ॥ २८ ॥

དེར་ནི་རྒྱལ་བྱེད་ཚལ་བཞུགས་པའི། རྒྱལ་བ་དེས་མཐོང་ཕྱུག་འཚོལ་ནས།
བྲུ་བ་བྲུས་པར་རང་ཉིད་ཀྱི། ཕྱོད་མཐའ་དགེ་སློང་མདུན་དུ་བཀོད།། 29

བཅོམ་ལྡན་འདས་ལ་དགེ་སློང་གིས། དེ་ཡི་བསོད་ནམས་ཡ་མཚན་དྲིས།
སྨད་འཚོང་མ་དང་པདྨ་ཅན། གཏུམ་མོའི་སྔོན་བྱུང་རྒྱལ་བས་གསུངས།། 30

སྔོན་ཚེ་སྟོན་པ་བཅོམ་ལྡན་འདས། འོད་སྲུངས་ཞེས་པའི་བསྟན་པ་ལ།
ཁྲིམ་བདག་བ་ཤེས་གཉེན་ཞེས་པ་ནི། རབ་ཏུ་བྱུང་བ་ཉིད་དུ་གྱུར།། 31

དེ་ཡི་ཆུང་མ་དགའ་མོ་དང་། རབ་དགའ་མོ་ཡང་རབ་བྱུང་སྟེ།
མཐུ་ནི་བདག་པོ་དང་མཚུངས་པ། གཙུག་ལག་ཁང་དུ་གནས་པར་བྱ།། 32

དེར་ནི་དེ་དག་སྤྱོད་པ་ཡི། ཚིག་རྩུབ་ཆེན་པོས་དགེ་སློང་མའི།
ཚོགས་ནི་ཡིད་དག་བྱུང་བར་བྱས། རང་བཞིན་ངེས་པར་གདུང་བར་དཀའ།། 33

གཅིག་གིས་གཏུམ་མོ་འི་ཚིག་དང་ནི། གཞན་གྱི་སྨད་འཚོང་མར་བརྗོད་པས།
དགེ་སློང་མ་རྣམས་སྨད་པ་དག། བྱས་པའི་སྡིག་པ་ཐོབ་པར་གྱུར།། 34

དེ་ཉིད་གཏུམ་མོ་ངག་སྐྱོན་ལས། དེ་བཞིན་གཞན་སྨད་འཚོང་མར་སྐྱེས།
རབ་ཏུ་བྱུང་བའི་མཐུ་ཡིས་ནི། སླར་ཡང་དགེ་བ་དག་ལ་བརྟེན།། 35

ཁྲིམ་བདག་བ་ཤེས་གཉེན་དེ་ཡང་ནི། བརྟུལ་ཞུགས་ཀྱིས་བསྒྲིམས་པད་ལྡན་འདི།
ཚུལ་ཁྲིམས་གཙང་བས་རྣམ་བརྒྱན་ཅིང་། དགྲ་བཅོམ་གནས་ནི་ཐོབ་པས་མཛེས།། 36

जिनं जेतवनासीनं तत्र दृष्ट्वा प्रणम्य सः ।
कृतकृत्यः स्ववृत्तान्तं भिक्षूणामब्रवीत् पुरः ॥ २९ ॥

भिक्षुभिर्भगवान् पृष्टस्तत्पुण्योदयविस्मयात् ।
वेश्या-पद्मक-चण्डालीप्राग्वृत्त मवदज्जिनः ॥ ३० ॥

पुरा भगवतः शास्तुः काश्यपाख्यस्य शासने ।
मित्रनामा गृहपतिः प्रव्रज्यां समुपाददे ॥ ३१ ॥

तस्य नन्दा सुनन्दा च भार्य्ये प्रव्रजिते पुनः ।
भर्त्तृतुल्यानुभावेन विहारे चक्रतुः स्थितिम् ॥ ३२ ॥

वाक्पारुष्येण महता कलहे भिक्षुणीगणः ।
ताभ्यामुद्वेजितस्तत्र स्वभावः किल दुस्त्यजः ॥ ३३ ॥

चण्डालीवचनेनैका वेश्यावादेन चापरा ।
भिक्षुणीनामधिक्षेपं कृत्वा पाप मवापतुः ॥ ३४ ॥

वाग्दोषात् सैव चण्डाली जाता वेश्या तथापरा ।
प्रव्रज्यायाः प्रभावेण पुनः कुशल माश्रिते ॥ ३५ ॥

स तु मित्रो गृहपतिः पद्मकोऽयं दृढव्रतः ।
विभात्यर्हत्पदावाप्त्या शुचिशीलविभूषणः ॥ ३६ ॥

པད་ཅན་སྐྱེ་བ་གཞན་ལ་ཡང་། མེ་ཏོག་སྐྱེ་ཞེས་མེ་ཏོག་པ།
མེ་ཏོག་ཚོགས་ཀྱི་སྡོང་བ་ཡི། སྐྱེ་བོ་རྟག་ཏུ་ཁེངས་བྱེད་གྱུར།། 37

དེ་ཡི་རང་རྒྱལ་ལོངས་སྤྱོད་ཀྱིས། མཆོད་ནས་གོས་ཀྱིས་གཡོགས་བྱས་ཏེ།
པདྨ་ཨུཏྤལ་ཀ་ད་ར། མེ་ཏོག་རྣམས་ཀྱིས་ཡང་དག་མཆོད།། 38

བསོད་ནམས་སྐྱེ་ཡིས་པདྨོ་ཅན། པདྨའི་སྙིང་པོ་འི་འོད་མཚུངས་འདི།
ལེགས་བྱས་རྒྱ་ཆེའི་དྲི་བཟང་ཅན། བདག་གི་བསྟན་པ་ལ་འོས་གྱུར།། 39

གཟུགས་ནི་ཚུལ་ཁྲིམས་ཀྱིས་བརྒྱན་གྲགས་པ་གཙང་ཞིང་
ཟླ་བ་ལྟ་བུར་དཀར་བའི་རིགས།
སེམས་དབེན་པ་ནི་ཡོངས་སྨིན་ཤིན་ཏུ་དྲི་མེད་འཁོར་བའི་
གཡོན་ཕྱོགས་ཞི་གྱུར་པ།
འདི་དག་མཁས་པ་རྣམས་ཀྱི་བསོད་ནམས་ཆེར་དར་མཚན་
ཉིད་བལྟ་བར་བརྗོད་པ་ཡིན།
ཤིན་ཏུ་སྨད་འོས་རིགས་དང་ཡིད་ནི་དྲི་མ་ཅན་ཡང་མི་རྣམས་
ལས་ངན་རྟགས།། 40

ཞེས་པ་ཀུན་མཁྱེན་གྱིས་བཤད་པའི། སྨད་བྱུང་ལས་སྨིན་གཏམ་དག་གིས།
དགེ་སློང་རྣམས་ནི་དགའ་བ་ཡིས། རིག་ཅིང་ཡ་མཚན་གྱུར་པར་གྱུར།། 41

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་པདྨ་ཅན་གྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་བདུན་པའོ།།

पौष्पिकः पुष्पसेनाख्यः पद्मकोऽप्यन्यजन्मनि ।
बभूव पुष्पनिचयैः पूरितार्थिजनः सदा ॥ ३७ ॥

प्रत्येकबुद्धं सोऽभ्यर्च्य भोगेनाच्छाद्य वाससा ।
कमलोत्पलकह्लारकुसुमैः समवाकिरत् ॥ ३८ ॥

तेन पुण्येन जातोऽयं पद्मगर्भनिभप्रभः ।
पद्मकः शासनार्हो मे सुकृतोदारसौरभः ॥ ३९ ॥

रूपं शीलविभूषणं शुचि यशश्चन्द्रावदातं कुलं
चेतः पक्वविवेकनिर्मलतरं संसारवामः शमः ।
एतत् पुण्यमहोदयस्य कृतिनां दृष्टिक्षमं लक्षणं
जातिर्निन्द्यतमा मनश्च मलिनं दुष्कर्मचिह्नं नृणाम् ॥ ४० ॥

इति सर्व्वज्ञकथितैः कर्म्मपाककथाद्भुतैः ।
बभूव हर्षसंस्पर्शो भिक्षूणां विस्मयोदयः ॥ ४१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पद्मकावदानं सप्ताशीतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་བརྒྱད་པ།

ཤིན་ཏུ་དྲག་པོའི་འདུལ་བ་མཐོང་ནས་འཕྲོག་རྗིང་ཞི་བ་
ངེས་པར་བཟློད་མི་བྱེད།
སྐུར་བར་ཡིད་དགའ་ཁབ་དང་མཚུངས་མཛུག་ཏུ་སྨྲིག་
པར་བཟློད་པའི་ལམ་དག་བྱེད།
བྱ་མིན་དག་ལ་འཇིགས་བཏང་བློ་གྲོས་རབ་འཇུག་འཁོར་
བའི་གྲོགས་མོ་བུད་མེད་ཀྱི།
རྨི་ལམ་དག་དང་མཚུངས་པའི་རྣམ་འཕྲུལ་མཚན་ཉིད་འདི་
དག་ཐམས་ཅད་ངེས་པར་འཛིན།། 1

མི་བདག་གཟུགས་ཅན་སྙིང་པོ་ཡི། གྲོང་ཁྱེར་རྒྱལ་པོའི་ཁབ་ཏུ་སྔོན།
ནག་པ་ཞེས་པ་གླང་སྡེའི་བདག། གླང་ཆེན་སྟོན་གྱི་བུ་རུ་གྱུར།། 2
རྒྱལ་པོའི་འཁོར་པ་དང་མཚུངས་ཁྱིམ། ཡོ་བྱད་བཅས་པ་རབ་བཏང་ནས།
ཆགས་བྲལ་ལ་ནི་མངོན་ཕྱོགས་དེ། གཞོན་ནུ་ཉིད་ལ་རབ་བྱུང་བཟུང་། 3
དེ་ཡི་ཆུང་མ་གཟུགས་མཛེས་མ། འཁོར་བ་རྒྱས་པའི་ཁྱིམ་དུ་ནི།
བདག་པོའི་ཡོངས་སྤྱོད་དང་བྲལ་བས། ཡུན་རིང་བསམས་པ་འཁྲུགས་པར་གྱུར།། 4
དེ་ནས་དུས་ཀྱིས་ཡོངས་འདྲིས་ལ། ཀུས་པས་མཐའ་ནི་རྒྱུ་བྱེད་པ།
ནག་པ་གླང་ཆེན་སྟོན་གྱི་བུ། དེ་ནི་རང་གི་ཁྱིམ་དུ་སོང་།། 5
དེ་ནས་མངོན་དུ་འོངས་དེ་ལ། ཆུང་མ་མཛའ་གཙུགས་ལྡན་མ་དེས།
རྗེས་སུ་འབྲངས་ནས་མཆོད་པ་ནི། སྔོན་དུ་འགྲོ་བས་མགྲོན་གཉེར་བྱས།། 6

अष्टाशीतितमः पल्लवः ।

हृष्ट्या तीव्रतरं हरन्ति नियमं नैव क्षमन्ते श्रमं
कर्म्म क्षिप्रमनोरमं हिमसमं पर्य्यन्तदाहक्षमम् ।
एता बिभ्रति सर्व्वमेव विषमं स्वप्नोपमं विभ्रमं
त्यक्त्वा कार्य्यभियः प्रवर्त्तनधियः संसारसख्यः स्त्रियः ॥ १ ॥

बिम्बिसारस्य नृपतेः पुरे राजगृहे पुरा ।
चित्राख्यो हस्तिशय्यातिपुत्रोऽभूद् गजसैन्यपः ॥ २ ॥

स राजतुल्यं विभवं गृहञ्च सपरिच्छदम् ।
त्यक्त्वा युवैव प्रव्रज्यां वैराग्याभिमुखोऽग्रहीत् ॥ ३ ॥

पत्नी तस्य सुरूपाख्या प्रभूतविभवे गृहे ।
भर्त्तृसम्भोगरहिता चिरं चिन्तातुराभवत् ॥ ४ ॥

अथ कालेन पर्य्यन्तचारी परिचितादरात् ।
स चित्रो हस्तिशय्यातिपुत्रः स्वपुरमाययौ ॥ ५ ॥

अभ्यागतस्य तस्याथ सानुगस्य निमन्त्रणम् ।
पूजापुरःसरं चक्रे पत्नी प्रणयशालिनी ॥ ६ ॥

ལམ་རིང་གིས་དུབ་བདེ་མེད་དེས། མཐོང་ནས་དེ་ཡིས་རབ་བསམས་པ།
ཀྱི་མ་འདི་ཡི་མཛེས་སྡུག་ནི། ལང་ཚོ་ཉིད་ཀྱིས་ངེས་པར་བཟུང་། 7

ན་ཚོད་ལོངས་སྤྱོད་འོས་འདི་ལ། ཁྲིམས་ཀྱི་དཔལ་ནི་ལོངས་བཏང་ནས།
རྣམ་པ་མ་དཔྱད་འདི་ཡིས་ནི། རྫུན་གྱིས་བདག་ཉིད་ཅི་ལ་གདུང་།། 8

གང་ཞིག་ཕྱོགས་ལྷུང་བཅས་པ་ཡི། མིག་གིས་ཁྲིམས་ལ་ལྟ་བྱེད་པ།
དཀའ་ཐུབ་ཅན་ནི་མཛའ་བའི་ལྷག། ད་དུང་ཞི་བ་མིན་པར་ངེས།། 9

ཡང་ན་དང་པོར་བརྟན་པ་ཉིད། ཡོངས་བརྟགས་བརྟན་པའི་རྒྱུ་མཚན་གྱིས།
འདི་ཡི་ཆགས་བྲལ་གཡོ་བའམ། བརྟན་པ་བདག་གིས་ཤེས་པར་བྱ།། 10

ཁྱིམ་དུ་ལོངས་སྤྱོད་ཚོགས་ཀྱིས་ཚིམ། ཐམས་ཅད་ནགས་ཚལ་མངོན་པར་འདོད།
དབེན་པར་བདེ་བ་ཉམས་པའི་ཚེ། བདག་ཉིད་རྗེས་སུ་གདུང་བ་བྱེད།། 11

ཅེས་པ་བསམས་དེ་དེ་ཡི་ནི། མདུན་དུ་ཟས་ཀྱི་གནས་སྐབས་སུ།
སྨྲ་དང་བཅས་པར་ཟངས་ཀྱིས་སྣོད། བ་གམ་རྩེ་ལས་རང་གིས་དོར།། 12

སྨྲ་དེས་ཀུན་དུ་སྒྲག་པ་བཞིན། སྐད་ཅིག་ཕྱོགས་སུ་རྣམ་པ་བལྟས།
འདི་ཅི་ཞེས་པ་ནག་པ་ནི། འཁྲུལ་པས་མངོན་ཕྱོགས་དེ་ལ་རྫིས།། 13

དེ་ནས་དར་བབ་བཞིན་འཛུམ་ལྡན། དེ་ཡིས་ཟངས་སྣོད་ཅུང་ཟད་ནི།
ལྷུང་བར་དེ་ལ་བཤད་བྱས་ནས། དགའ་བས་སླར་ཡང་རབ་བསམས་པ།། 14

साचिन्तयत् तमालोक्य दूराध्वश्रमनिःसुखम् ।
अहो वतास्य लावण्यं यौवनेनैव धार्य्यते ॥ ७ ॥

अस्मिन् वयसि भोगार्हं परित्यज्य गृहश्रियम् ।
मिथ्यैव किमनेनात्मा निर्विचारेण पीड़ितः ॥ ८ ॥

स्नेहशेषोऽस्य नाद्यापि जाने शान्त स्तपस्विनः ।
गेहं सपक्षपातेन चक्षुषा यन्निरीक्षते ॥ ९ ॥

अथवा धैर्य्यमेवादौ परीक्ष्य स्थैर्य्यकारणम् ।
अस्य जानामि वैराग्यं चलं विश्रान्तमेव वा ॥ १० ॥

गृहे भोगगणैस्तृप्तः सर्व्वः कानन मीहते ।
विजने तु सुखभ्रष्ट मात्मान मनुशोचति ॥ ११ ॥

इति सञ्चिन्त्य सा तस्य भोजनावसरे पुरः ।
स्वयं तत्याज हर्म्म्याग्रात् सशब्दं ताम्रभाजनम् ॥ १२ ॥

तेन शब्देन संत्रस्त इवालोक्य दिशः क्षणम् ।
किमेतदिति पप्रच्छ चित्र स्तां संभ्रमोन्मुखः ॥ १३ ॥

ततः स्मितमुखी किञ्चित् पतितं ताम्रभाजनम् ।
प्रौढ़ा निवेद्य सा तस्मै हर्षात् पुनरचिन्तयत् ॥ १४ ॥

རེ་ཞིག་རྣམ་འགྱུར་མེད་པ་ཡི། གནས་ལ་གནས་པ་ཇི་དས་མ་ཐོབ།
འདི་ཡི་ཡིད་ནི་ཞེད་པ་དག། ཙེ་དགས་སྐྱུར་དུ་ཁྲེགས་པར་འགྱུར།། 15

གང་ཞིག་སྟོད་ཀྱི་སྨྲ་ཙམ་གྱིས། ཀུན་དུ་སྨག་ཅིང་འཁྲུགས་གྱུར་པ།
ནམ་དཔྱོད་ཐལ་བ་དེ་ལ་ནི། ཡུལ་གྱི་ཅི་དང་ཅི་མི་བྱེད།། 16

ངང་པ་ཐམས་ཅད་རྩ་འཛིན་དག་གི་སྨྲ་ཙམ་ལ།
སྨག་ཅིང་བརྟན་པ་ཉམས་པས་བཅིངས་ནས་འབྲོས་པར་བྱེད།
གང་ཞིག་སྤྲིན་ཚོགས་བཅིངས་པར་སྒྲོགས་ལ་གཡོ་མེད་པ།
པད་སྡོན་ངང་པའི་རྒྱལ་པོ་དེ་ནི་ཁ་ཅིག་ཡིན།། 17

ཞེས་པ་ཡིད་ཀྱིས་ངེས་བྱས་ནས། སྤྲིན་མའི་འཁྲི་ཤིང་རོལ་རྩེད་ཅན།
འཛམ་པ་སྨྲ་བ་དེ་ཡིས་ནི། དེ་ལ་མངོན་ཕྱོགས་དལ་གྱི་སླས།། 18

བདག་ནི་རྩྭ་བཞིན་རབ་སྤངས་ནས། ཁྱོད་ནི་རིང་དུ་སོང་བའི་ཚེ།
བདག་གི་ཁྲིམ་ནི་རྒྱུན་མས་བཞིན། རྒྱུད་པས་ཟིལ་གྱིས་མནན་ལ་ལྟོས།། 19

རྩོམ་ཆེན་འབྱོར་པ་འདི་ལ་ཡང་། ལོངས་སྤྱོད་དག་ནི་རབ་སྤངས་པ།
བདེ་མེད་བདག་ནི་གྲོགས་ཀྱིས་བཞིན། ཁྱོད་མཐོང་རེ་བ་ཉིད་ཀྱིས་བཟུང་།། 20

གང་ཡང་བརྗོད་པར་མི་འོས་པ། འདི་ནི་སྡུག་བསྔལ་དག་གིས་བརྗོད།
མི་སྨྲ་འདོད་ཀྱང་བརྗོད་པ་འདི། ལྕེ་ཡང་རབ་ཏུ་ངོ་ཚར་ཤེས།། 21

अयन्तावदसम्प्राप्तनिर्विकारपदस्थितिः ।
शिथिलं लीलयैवास्य तूर्णमाकृष्यते मनः ॥ १५ ॥

यः प्रावृशब्दमात्रेण संत्रासाकुलतां गतः ।
किं किं न क्रियते तस्य विषयैरविमर्षिणः ॥ १६ ॥

सर्व्वः प्रणश्यति पयोमुचशब्दमात्र-
संत्रासलुप्तधृतिबन्धन एव हंसः ।
ते सन्ति केऽपि कमलासनराजहंसा
ये पुष्करावगुरुगर्जितनिष्प्रकम्पाः ॥ १७ ॥

इति निश्चित्य मनसा सा शनै र्मृदुवादिनी ।
तमुवाच समभ्येत्य भ्रूलतालास्यलीलया ॥ १८ ॥

तृणवन् मां परित्यज्य त्वयि दूरतरं गते ।
सपत्नीभि रिवाक्रान्तं विपद्भिः पश्य मे गृहम् ॥ १९ ॥

अस्मिन्नपि महारम्भविभवे भोगवर्जिता ।
त्वद्दर्शनाशयैवाहं धृता सख्येव निःसुखा ॥ २० ॥

यदप्यनुचितं वक्तुं दुःखात्तदिद मुच्यते ।
वदन्ती मौनकामेयं जाने जिह्वापि लज्जते ॥ २१ ॥

ཁྱིམ་བདག་གིས་ནི་ཆུང་མ་ཡི། ཚུལ་ཁྲིམ་བསླད་མཐོང་དེ་ལ་ནི།
ཆགས་བྲལ་སྐྱེས་པ་མ་ཡིན་ནམ། གཞན་དུ་དུས་མིན་ཇི་ལྟར་འགྱུར།། 22

ཞེས་པ་གཞན་གྱི་ཡོན་དན་ནི། ཉམས་པ་བསྒྲང་བ་ལ་མཁས་པའི།
བཞིན་འཛུམ་སྐྱེ་བ་ཐམས་ཅད་ནི། ཕན་ཚུན་རྣམ་པར་ལྟ་ཞིང་སྨྲ།། 23

འཁྲུལ་བས་གདུངས་པ་བདག་ལ་ནི། འཇིག་རྟེན་སེམས་སོས་ཞེས་པར་འཛིན།
དར་མ་ཉོན་མོངས་དག་ལ་ནི། མ་ཉམས་གཟུགས་དག་ཅི་ཞིག་བྱ།། 24

ཁྱིམ་དུ་གཡོག་འཁོར་འདི་དག་ཀྱང་། བདག་ལ་ཤིན་དུ་མ་བརླམས་གྱུར།
སྦྲད་མེད་བདག་པོ་མེད་རྣམས་ཀྱི། མདུན་དུ་ཁྲི་ཡང་རབ་དུ་དགོད།། 25

བདག་གི་ལྷག་མ་ཉིད་ཀྱིས་ནི། རབ་དུ་བསོས་པ་འབངས་ཕྲུག་འདི།
བཀའ་བསྒོས་ཁྲིམས་པས་བདག་གི་ནི། སྨྲ་ནས་འདྲེན་པར་འདོད་ལ་ལྟོས།། 26

ཞེས་པ་བརྗོད་ནས་བཟ་བྲས་དེ། བདག་པོའི་སེམས་ནི་རྣམ་འགྱུར་སྐྱད།
རང་གི་འབངས་ཀྱིས་ཟིལ་གནོན་པ། དེ་ཡིས་མངོན་སུམ་ཉིད་དུ་བསྟན།། 27

མ་ཉམས་གཟུགས་ཞེས་ཆགས་པ་དང་། བདེ་བ་མེད་ཅེས་འཁྲུགས་པ་དང་།
སྐྱད་པར་གྱུར་ཅེས་ཕྲག་དོག་དང་། འབངས་ཀིས་གཟིར་ཞེས་ཁྲོ་བ་ཡང་།། 28

ཐོབ་ནས་དེ་ལ་ལྟ་བྱེད་ཅིང་། བརྟུལ་ཞུགས་ཀྱིས་བསྡམས་བཏང་བ་དེ།
མཚུངས་པར་འཁོར་བའི་སྐྱོན་རྣམས་ནི། ཐམས་ཅད་དག་གི་དབང་དུ་འགྱུར།། 29

नूनं गृहाधिपतिना पत्न्याः शीलस्य विप्लवः ।
दृष्टोऽस्य जातं वैराग्यमकाले कथमन्यथा ॥ २२ ॥

इति स्थितमुखः सर्व्वैः परस्परविलोकनैः ।
वदत्यन्यगुणग्लानिगणनानिपुणो जनः ॥ २३ ॥

वियोगतप्तां मां लोकः स्वस्थचित्तेति मन्यते ।
क्लेशेऽप्यक्लिष्टरूपाहं तारुण्यस्य करोमि किम् ॥ २४ ॥

गृहे परिजनश्चायं ममोच्छृङ्खलतां गतः ।
अस्वामिकानां नारीणामग्रे श्वापि प्रगल्भते ॥ २५ ॥

दासस्तनु मयैवाय मुत्सृष्टेन विवर्द्धितः ।
पश्याज्ञादानकोपान्मे केशाकर्षेण मोहते ॥ २६ ॥

इत्युक्त्वा कृतसङ्केता तदा दासपराभवम् ।
भर्त्तुश्चित्तविकाराय सा प्रत्यक्षमदर्शयत् ॥ २७ ॥

स्पृहामक्लिष्टरूपेति वैक्लव्यं निःसुखेति च ।
ईर्ष्यां जातापवादेति क्रूरं दासार्द्दितेत्यपि ॥ २८ ॥

स तां विलोकयन् प्राप्य संत्यक्तव्रतयन्त्रणः ।
तुल्यं संसारदोषाणां सर्व्वेषां वशमाययौ ॥ २९ ॥

ལྷུང་བཟེད་ཆོས་གོས་རབ་བཏང་ཞིང་། འཇིགས་རུང་རལ་གྲི་ཕྱུང་ནས་ནི།
དགའ་མའི་གཉེན་པ་ལ་ཁྲོས་པས། དེ་ཡིས་འབངས་ནི་གསོད་པར་ཞུགས།། 30
འབངས་ནི་གསོད་པའི་སྡིག་པ་ལས། ཆུང་མས་འབད་ནས་ཟློག་པ་དེས།
དགྲ་ལས་རྒྱལ་འདོད་ཁྲིམ་གྱིས་ནི། བདེ་བ་དམན་པ་སླར་ཡང་བསྟེན།། 31
དེ་ནི་ལོངས་སྤྱོད་ཡོངས་སུ་བཟུང་བས་བུད་མེད་ལོངས་སྤྱོད་
སྐལ་བཟང་མ་གཞིར་གྱུར།
རྣམ་པ་སྣ་ཚོགས་གཉེན་པའི་གདམ་གྱི་རྒྱུ་ལས་གཡོག
འཁོར་རྣམས་ལ་ཁྲོ་བས་འཁྲུགས།
འདོད་པས་དུལ་བ་ཉམས་བྱེད་ཁྲོ་བས་སྐད་ཅིག་ཉིད་ཀྱིས
བཟོད་པ་ཀླག་པ་བྱེད།
རྫུན་གྱི་བརྟུལ་ཞུགས་དག་གིས་གདུང་བའི་ཡིད་ཀྱིས
ཆགས་བྲལ་ཉིད་ནི་འཐོབ་མ་ཡིན།། 32
དེ་ནས་རྒྱལ་པོས་གྲོང་ཆེན་གྱི། སྣ་ཆེན་གནས་ནི་སླར་ཡང་བྱིན།
འབྱོར་པ་རྒྱ་ཆེན་ཐོབ་གྱུར་ནས། དེ་ནས་ལྷག་པར་རྒྱས་པར་གྱུར།། 33
སྐབས་དེར་གྲོང་ཁྱེར་ནང་དག་ལས། དགེ་སློང་རྣམས་ཀྱིས་བསོད་སྙོམས་
བསླངས།
བཅོམ་ལྡན་རྒྱལ་བ་ནགས་ཚལ་ན། གནས་པ་དག་ལ་མངོན་ཕྱོགས་ཏེ།། 34
ཆགས་བྲལ་བཞིན་གྱིས་དེ་ལ་ནི། ཕྱག་འཚལ་གྲོང་ཆེན་སྔོན་གྱི་བུ།
ནག་པ་དག་གི་བརྟུལ་ཞུགས་ནི། ངེས་པ་མིན་པ་རྣམ་པར་བཤད།། 35
དེ་ནས་བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན། འཛུམ་དང་ལྡན་པས་རབ་གསུངས་པ།
དེ་ཡི་དགེ་བ་མ་སྨིན་པས། བརྟུལ་ཞུགས་དག་ནི་ལྷུང་བར་གྱུར།། 36

पात्रचीवरमुत्सृज्य खड्गमाकृष्य भीषणम् ।
प्रियानिकारक्रौर्य्येण स दासं हन्तु मुद्ययौ ॥ ३० ॥

प्रणयाद्वारितः पत्न्या सद्यः स वधवैशसात् ।
लीनं पुनर्गृहसुखं भोजनेन जिगीषया ॥ ३१ ॥

सोऽभूद् भोगपरिग्रहेण ललनासम्भोगसौभाग्यभू-
र्नानाकारनिकारकारणकथान्त्येषु कोपाकुलः ।
कामः कर्षति संयमं क्षपयति क्रोधः क्षणेन क्षमां
नो मिथ्याव्रतशोषितेन मनसा वैराग्यमासाद्यते ॥ ३२ ॥

अथ हस्तिमहामात्रपदं राज्ञार्पितं पुनः ।
आसाद्य विभवोदारः सोऽभूदभ्यधिकोद्भवः ॥ ३३ ॥

अत्रान्तरे पिण्डपातमादाय नगरान्तरात् ।
भगवन्तं वनासीनं जिनमभ्येत्य भिक्षवः ॥ ३४ ॥

विषण्णवदनास्तस्मै प्रणिपत्य न्यवेदयन् ।
चित्रस्य हस्तिशय्यातिपुत्रस्यानुचितं व्रतम् ॥ ३५ ॥

भगवानथ सर्व्वज्ञः सस्मित स्तानभाषत ।
अपक्वकुशलेनैव कृतस्तेन व्रतग्रहः ॥ ३६ ॥

གང་ཞིག་དབེན་པ་སྨིན་ཞིང་རྫོགས་པའི་བདག་པས་ཡིད་ཀྱི་འཁྲི་ཤིང་བསྐམས་གྱུར་པ།
དེ་དག་ཕྱི་ནས་ཡུལ་གྱི་ཉམས་མྱོང་སྙིང་པ་བྲལ་བའི་དབང་དུ་འགྱུར་མ་ཡིན།
གང་ཞིག་དོན་གྱིས་བཀག་ཅིང་ཁེངས་པས་ལྷོད་ལ་རྒྱུན་དུ་གྲུས་པ་རབ་བདུང་བ།
དེ་དག་འདོད་དང་ཞི་བའི་བར་མཚམས་དག་ལ་ཡིད་ནི་འཕྱང་མོ་ཡུག་པར་བྱེད།། 37
གང་གིས་གཡང་སར་ལྷུང་བའི་མཁས་པ་རྣམས་ཀྱང་དུལ་བ་དག་ཉི་ཡོངས་གཏོང་ཞིང་།
ཆགས་པའི་དུག་རྒྱས་ནལ་འབྱོར་ཅན་རྣམས་མི་བཟད་སྡུག་རྡུམ་ས་ལ་འཛུག་པར་བྱེད།
སྐྱེ་བར་ལོངས་པས་ཆགས་ཤིང་ཡུལ་གྱི་རིག་པ་མཆོག་ཏུ་མངོན་པར་འདོད་གྱུར་པ།
ནམ་འགྱུར་མདའ་ཡི་ཚར་དྲག་དཀྲིགས་མི་འདོད་པ་འདི་ནི་སུ་ལ་བཟོད་པར་བྱེད།། 38

ཅེས་པ་བརྗོད་ནས་བཅོམ་ལྡན་འདས། རྒྱལ་བ་ནག་པའི་ཁྲིམ་བྲོན་ནས།
སྐུ་ཡི་འོད་ཀྱི་ཕྱི་རོལ་གྱི། རབ་རིབ་རྣམ་པར་འཇོམས་ཤིང་སྣང་།། 39
རྗེས་སུ་བརྫུང་བའི་སྣང་བ་ཡིས། དེ་ཡི་ཡིད་ནི་དྲི་མེད་མཛད།
ཕྱག་དང་བསྙེན་བཀུར་བྱས་པ་དེ། རང་ཉིད་ཀྱི་ནི་གནས་སུ་ཁྲིད།། 40
དེར་ནི་སླར་ཡང་གུས་པ་ཡིས། ཟོལ་མེད་རབ་བྱུང་དེ་ཡིས་བསྙེན།
གུབ་སྐད་རྒྱལ་བས་དག་པ་ཡི། དམ་པའི་ཆོས་ནི་རབ་བསྟན་མཛད།། 41
ཉོན་མོངས་ཐམས་ཅད་རབ་ཟད་པས། དེ་ནི་དགྲ་བཅོམ་གནས་ཐོབ་ཚེ།
དེ་ཡིས་སྔོན་བྱུང་དགེ་སློང་གིས། དྲིས་ནས་བཅོམ་ལྡན་གྱིས་གསུངས་པ།། 42

ये निष्पन्नविवेकपापकलनानिःशेषिताशालता-
स्ते नायान्ति पुनः पुराणविषयास्वादस्मृते र्वश्यताम्।
ये त्वर्थप्रतिषिद्धगर्व्वशिथिलत्यक्तप्रसक्तादरा-
स्तेषामन्तरसीम्नि कामसमयो दोलायमानं मनः॥ ३७॥

जन्माभ्यासनिषक्त एष विषयस्पर्शाभिलाषः परं
विद्वांसोऽपि परित्यजन्ति नियमं येनावटे पातिताः।
रागोदग्रविषा विशन्ति विषमध्वान्तां भुवं भोगिनः
कामः कस्य करोति कीर्णविशिखासारे विकारे क्षमाम्॥ ३८

इत्युक्त्वा भगवान् गत्वा चित्तस्य भवनं जिनः।
देहप्रभाभि स्तिमिरं वाह्य मुन्मूलयन् पुरः॥ ३९॥

अनुग्रहप्रकाशेन कृत्वास्य विमलं मनः।
कृतप्रणामसत्कारं तं निनाय निजाश्रमम्॥ ४०॥

पुनस्तत्रास्य निर्व्याज-प्रव्रज्या-वर्जनाजुषः।
जिनः प्रविदधे सिद्धै शुद्धसद्धर्म्मदेशनाम्॥ ४१॥

स प्राप्तार्हत्पदे तस्मिन् सकलक्लेशसंक्षयात्।
तत्पूर्व्ववृत्तं भगवान् पृष्टो भिक्षुभिरभ्यधात्॥ ४२॥

སྔོན་གྱི་སྐྱེ་བ་གཞན་ལ་དེས། རང་སངས་རྒྱས་ནི་གུས་པ་ཡིས།
རྟག་དུ་མཆོད་ཅིང་དེ་ཡིས་ནི། མཐུག་དུ་མཆོད་རྟེན་ཆེན་པོ་བསྒྲུབས། ། 43

དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་གྱིས། སྐལ་ལྡན་ནག་པ་འདི་ཡིས་ནི།
བདག་གི་བསྟན་ལ་རབ་བྱུང་དག། གླངས་ནས་དགྲ་བཅོམ་གནས་ལ་བརྟེན། ། 44

འདི་ནི་སྔར་ཡང་འདོད་པ་ལ། རབ་ཏུ་འཇུག་པའི་རྒྱུ་དག་ཉིད།
སྔོན་གྱི་སྐྱེ་བ་དག་ལ་ཡང་། འདི་ནི་ཆུང་མས་རབ་དུ་བསླུས། ། 45

བ་ར་ཎ་སི་དག་དུ་ནི། ས་ཡི་བདག་པོ་ཚངས་བྱིན་གྱི།
ཡིན་དན་ཡོངས་རྫོགས་མ་དུ་ན་འདོན། དཔལ་ལྡན་འཕྲོག་བྱེད་ཀྱིས་བྱིན་བྱུང་། ། 46

དེ་ལ་རིག་དང་འདུལ་བ་དག། རྫོགས་པའི་བུ་གཉིས་བྱུང་གྱུར་ཏེ།
གཅིག་ནི་འཕྲོག་བྱེད་བུ་ཞེས་དང་། དེ་བཞིན་གཞན་པ་འཕྲོག་བྱེད་སྟེ། ། 47

དེ་དག་ཆགས་བྲལ་དབེན་པ་ཐོབ། སྲིད་པའི་ལོངས་སྤྱོད་ལས་ཕྱིར་ཕྱོགས།
དཀའ་ཐུབ་ནགས་ཚལ་ལོངས་ཀྱུ་ཞིང་། མངོན་ཤེས་ལྔ་ནི་ཐོབ་པར་གྱུར། ། 48

རྒྱལ་དང་སྐྱེ་བོས་མཆོད་བྱེད་ཅིང་། རབ་ཞི་བསྔགས་པར་འོས་པ་ཡིས།
མཁའ་ལ་རྒྱུ་བ་དེ་དག་ནི། ཐུབ་པ་རྣམས་ཀྱི་འདང་མཆོད་བྱར་གྱུར། ། 49

ནམ་ཞིག་ས་བདག་ཁང་པ་ན། འཕྲོག་བྱེད་ཆེ་གནས་མི་བདག་ནི།
ཕྱོགས་ལས་རྒྱལ་ཁ་མངོན་ཕྱོགས་པས། བུ་མོ་མཛེས་ལྡན་ཞེས་ལ་སྨྲས། ། 50

जन्मान्तरे पुरा तेन भक्त्या सतत मर्चितः ।
प्रत्येकबुद्ध श्चैत्यञ्च तस्यान्ते विहितं महत् ॥ ४३ ॥

तत्पुण्यप्रणिधानेन धन्योऽयं मम शासने ।
प्रव्रज्यां समुपादाय चिनोऽर्हत्पदमाश्रितः ॥ ४४ ॥

कारणं श्रूयतामस्य पुनः कामप्रवर्त्तने ।
एष प्रसारितः पत्न्या पूर्व्वस्मिन्नपि जन्मनि ॥ ४५ ॥

बभूव ब्रह्मदत्तस्य वाराणस्यां महीपतेः ।
परिपूर्णगुणः श्रीमान् हरिदत्तः पुरोहितः ॥ ४६ ॥

निष्पन्नविद्याविनयौ पुत्रौ तस्य बभूवतुः ।
हरिद्रायण इत्येक स्तथा हरिशिखोऽपरः ॥ ४७ ॥

तौ विवेकात्तवैराग्यौ भवभोगपराङ्मुखौ ।
तपोवने परिव्रज्य पञ्चाभिज्ञत्व मापतुः ॥ ४८ ॥

तौ व्योमचारिणौ राज्ञा पूज्यमानौ जनेन च ।
प्रापतुः प्रशमश्लाघ्यौ मुनीनामपि मान्यताम् ॥ ४९ ॥

कदाचिन्नृपभवनं स्थिते हरिशिखे नृपः ।
कन्यां लावण्यवत्याख्यामूचे दिग्विजयोन्मुखः ॥ ५० ॥

མཉེས་ག་ཤིར་ཁྲོད་ཀྱིས་གྲུས་པ་ནི། ཤིན་དུ་ཆེ་བས་ཐུབ་པ་དག།
མཆོད་བྱ་འདི་ལ་མཆོད་པ་བྱ། འདི་ནི་བདག་གིས་བཀུར་སྟི་འོས།། 51

ཞེས་པ་བུ་མོ་ལ་བསྟན་ནས། ས་ཡི་བདག་པོ་རབ་སོང་ཆེ།
རྒྱལ་པོ་འི་བུ་མོ་གུས་ལྡན་མས། ཐུབ་པ་རྟག་ཏུ་མཆོད་པར་གྱུར།། 52

གསེར་བཙད་འོད་ལྟར་ཡོངས་སུ་ཤེས་པའི་མཛེས་པ་ལུས་ལ་འཛིན་བྱེད་ཅིང་།
པ་དྨའི་སྤྱན་དང་ལྡན་པ་དེ་མཐོང་དེ་ནི་མངོན་པར་སྲིད་ལྡན་གྱུར།
སྐད་ཅིག་འཁོར་པས་ངེས་པར་མཛེས་པའི་ཡུལ་ལ་དམིགས་པའི་འདོད་པ་ཡིས།
འགྲོགས་པའི་བསམ་པ་སྙིང་ལ་ཙ་བ་བརྒྱུག་པ་ཅི་ཡང་བྱེད་པར་འགྱུར།། 53

རླུང་གཞོན་དག་གིས་བསྐྱོད་པའི་འཁྲི་ཤིང་བཞིན།
འདོད་པའི་རྣམ་འཕྲུལ་ཤུགས་འཐྲིན་ལུས་དག་ནི།
ངུར་པས་དེ་ཡི་ལུས་ཀྱི་ཀུན་དགའ་དང་།
བཅས་པས་གྲོགས་མེད་ཐུབ་ལ་འཁྲིད་པ་བྱས།། 54

དེ་ཡི་ནུ་མ་གསར་པའི་རྩེར་ཆགས་ལུས་ཀྱི་ཆོན་གྱིས་ནི།
འདོད་པ་རྒྱལ་པོ་འི་བཀའ་ཡིག་རྒྱ་ལྡན་སྙིང་ལ་འཛིན་བྱེད་ཅིང་།
དེ་དུས་ཉིད་ན་གློ་བུར་དུ་ནི་དུལ་བའི་གདུགས་ཐག་ཅད།
ཐུབ་པ་འདོད་པའི་རྩེ་དགའ་གསར་པ་དག་ལ་འགྱོར་པར་གྱུར། 55

ཁྱུ་མཆོག་གཉམས་ལས་འཁྲིག་པའི་བྱ་བ་ལ།
རབ་ཏུ་སྦྱོར་ཞིང་སྤྲིག་པས་བརླང་བ་བཞིན།

वत्से त्वया मुनेरस्य गौरवेण गरीयसा ।
पूज्यस्य पूजनं कार्य्यं सत्काराहों ह्ययं मम ॥ ५१ ॥

सुतामिति समादिश्य प्रयाते पृथिवीपतौ ।
राजपुत्री सदैवाभूत् पूजाप्रणयिनी मुनेः ॥ ५२ ॥

हेमच्छेदच्छविपरिचितां कान्तिमङ्के दधानं
तं पश्यन्ती कमलनयनं साभिलाषाभवत् सा ।
कामः कामं रुचिरविषयालम्बनः सङ्गमाशां
प्रत्यासत्त्या किमपि हृदये बद्धमूलां करोति ॥ ५३ ॥

सा निःश्वसन्ती स्मरसंभ्रमेण
बालानिलेनाकुलिता लतेव ।
अङ्गैरनङ्गस्य मुनेश्चकार
सानन्दमालिङ्गन मानताङ्गी ॥ ५४ ॥

नवकुचमुखलग्नेनाङ्गरागेण तस्या
हृदि मदननृपाज्ञालेख्यमुद्रां दधानः ।
मुनिरभवदकाण्डे संयमालानभङ्गा-
दभिमतनवलीलोच्छृङ्खल स्तत्क्षणेन ॥ ५५ ॥

वृषव्यपायान् मिथुनक्रियायां
समुद्यतः कर्कटदुर्ग्रहेण ।

རྒྱལ་པོ་སེང་གེའི་ཁྱིམ་དུ་ཉི་མཚུངས་དེ།
གདུང་སྐྱད་བུ་མོ་ལ་ནི་འགྲོ་འདོད་གྱུར།། 56

འཁྲུད་པའི་སྒྲུབ་བྱེད་དག་ལ་ལག་འགྲོ་མ་རྣམས་དུག་ནི་སི་བཟེད་པ།
ཡང་ཡང་རྒྱལ་སྐྱོངས་འཛིག་བྱེད་རང་བཞིན་ལུས་ངེས་པར་ཞུགས་པ་དག།
སྨུགས་ཀྱིས་ཞི་བ་མ་ཡིན་འོད་ཀྱི་རང་བཞིན་བསྟན་བཅོས་དོར་བྲུས་མིན།
སྦྱོར་མིན་བསམ་གཏན་གྱིས་མིན་ཞི་བའི་ཁྲིད་པར་སྨན་གྱི་རི་ཡིས་མིན།། 57

མཛའ་བའི་རང་བཞིན་ཀུན་པོ་འི་ལོངས་སྤྱོད་ཚུར།
རི་དགས་མིག་ཅན་གྱིས་འཕངས་དེ་ལྷུང་སྟེ།
དབེན་པ་མེད་ལས་སྐྱེས་པའི་ཡིད་སྨུབས་ཚོགས།
མཁས་རྣམས་ཀྱི་ཡབ་བརྟན་པ་མཐར་བྱེད་ཡིན།། 58

འགྲོགས་ལས་ཕྱིར་ཕྱོགས་སྐྱིང་ལ་ཆགས་དང་བརླས་པའི་
གཞི་མ་མཆུ་ལ་འོ་དང་ནི།
བསམ་གཏན་དག་ལ་དམིགས་པའི་སྤྱན་ལ་མཛའ་གཏུགས་
མཛེས་སྨུག་བདུང་བའི་དགའ་སྟོན་དང་།
ལྷུང་བཟེད་ཀྱིས་གཙང་ལག་པར་ཉ་མ་བཟུང་སྟེ་མི་དོག་
མཚན་ལྡན་མཉིས་པ་ལས།
དུལ་མིན་བསླབ་པ་དག་གིས་དེ་ཡིས་བརྟུལ་ཞུགས་ཐམས་
ཅད་གསར་པ་ཉིད་དུ་གྱུར།། 59

ས་བདག་བུ་མོ་འི་ལག་པ་ཡིས། དྲ་བར་གནས་པ་དེ་ལ་ནི།
དགའ་སྟབ་གྱུབ་འབར་འཐལ་ཉིད་ལ། ཕྲག་དོག་ཅན་བཞིན་ཕྱིར་ཕྱོགས་འགྱུར།།
60

स राजसिंहस्य गृहेऽर्कतुल्य-
स्तापाय कन्यागमनोत्सुकोऽभूत् ॥ ५६ ॥

न मन्त्रैरुत्सार्य्यं नच रुचिमयैः शास्त्रमणिभि-
र्न योगै र्न ध्यानै र्नच शमविशेषौषधिरसैः।
मुहुर्मूर्च्छामोहप्रणयमयमालिङ्गनविधौ
भुजङ्गीनां नूनं विषमविषमङ्गे निवसति ॥ ५७ ॥

निपातितः प्रीतिमये मृगाक्ष्या
स चौर्य्यसम्भोगरसे ममज्ज ।
मनीषिणा मप्यविवेकजन्मा
धैर्य्यान्तकन्मन्मथसन्निपातः ॥ ५८ ॥

रागः सङ्गपराङ्मुखे हृदि जपाधारेऽधरे चुम्बनं
ध्यानालम्बिविलोचने प्रणयिनीलावण्यपानोत्सवः ।
पाणौ पाशपविच्चिते कुचयुगं पुष्पायुधाराधने
तस्याः संयमदीक्षयैव नवतां सर्व्वं जगाम व्रतम् ॥ ५९ ॥

तस्याभूद् भूपतिसुता भुजपञ्जरवर्त्तिनी ।
दीना सेर्ष्यैव सहसा तपःसिद्धिपराङ्मुखी ॥ ६० ॥

དེ་ཉི་མ་ཐུལ་ཆེ་བའི་ཚེ། ཕོ་བྲང་འཁོར་གྱི་སྐྱེ་བོ་ཡིས།
སྤྱོད་ཚུལ་ཞེས་ཀྱང་འཛིགས་གྱུར་ནས། སུས་ཀྱང་ཅི་ཡང་དེར་མ་སྨྲས།། 61

དེ་ནས་ས་བདག་ཡུན་རིང་ན། ཁྱིར་ལོག་རྒྱལ་བའི་དགའ་སྟོན་ཅན།
འབྱོར་བ་རྨད་དུ་བྱུང་བའི་ཚོགས། རབ་ཏུ་ལང་བ་རྒྱས་པར་གྱུར།། 62

སྟོན་བྱུང་ཐུབ་པ་འཕྲོག་བྱེད་རྩེ། ས་བདག་གསུམ་ཞིང་དུལ་ལྡན་དེ།
རང་གི་ས་སྐྱོང་འོས་པའི། ལོངས་སྤྱོད་ཀུན་གྱིས་རབ་ཏུ་མཆོད།། 63

ཐུབ་པ་གསོལ་བའི་མདུན་དུ་ནི། ས་བདག་གུས་པས་འཁོད་པའི་ཚེ།
མཛེས་ལྡན་མ་ཡིས་སྟོན་དུ་ནི། རིམ་གྲོ་དག་ནི་ལེགས་པར་བྱས།། 64

དེ་ནས་གསེར་གྱི་ཆུ་སྣོད་ཀྱིས། ལག་གཉིས་བྲིལ་བ་དེ་ལ་ནི།
ཐུབ་པ་བརྟན་པ་བརྗེད་པ་ཡིས། ལག་བརྐྱངས་ཚུར་ཤོག་ཅེས་པ་སྨྲས།། 65

དེ་ཡི་འདོད་པའི་ནམ་འགྱུར་དེ། མཁྱེན་ནས་མི་བདག་རབ་ཁྲོས་དེ།
སྡིག་པའི་ཕྱིར་བཅོས་སྦྱོར་བ་ལ། ཆད་པས་བཅད་པའི་བློ་གྲོས་བསྒྲུབས།། 66

དྲག་པོ་ཁྲོས་པ་ཕ་ཡི་བཞིན། མཁྱེན་ནས་མཛེས་ལྡན་མ་ཡིས་ཀྱང་།
ཐུབ་པའི་མགྲིན་པར་ཟམ་ཆགས་ཞེས། བརྗོད་ནས་དེ་ལ་ཆུ་དག་བྱིན།། 67

ཀུ་མེད་ཕྱུར་བུའི་བློ་གྲོས་ཅན། སྐབས་སུ་ཉེར་མཁོ་འི་ཚིག་དག་ནི།
ཞིར་བློག་སྐྱུ་མའི་རང་བཞིན་གྱིས། སྡིག་པའི་སྒྲིབ་བྱེད་རྣམ་པར་བཀྲ།། 68

न तं विज्ञातवृत्तोऽपि भीत्यान्तःपुरिको जनः ।
महत्यविनये तस्मिन् कश्चिन्नोवाच किञ्चन ॥ ६१ ॥

चिरप्रत्यागतस्याथ भूपतेर्विजयोत्सवः ।
बभूवाद्भुतसम्भारप्रभूतविभवोद्भवः ॥ ६२ ॥

स पूर्व्वं भक्तिविनतः स्वयं हरिशिखं मुनिः ।
भूपतिं भूमिपालार्हैः सर्व्वभोगैरपूजयत् ॥ ६३ ॥

भुञ्जानस्य क्षितिपतौ प्रणयात् पुरतः स्थिते ।
मुने र्लावण्यवत्यग्रे परिचर्य्यापराभवत् ॥ ६४ ॥

ततस्तां हेमभृङ्गारव्यग्रपाणियुगां मुनिः ।
एह्येति विस्मृतधृतिः प्रसार्य्य भुज मब्रवीत् ॥ ६५ ॥

तस्य स्मरविकारं तं दृष्ट्वैव कुपितो नृपः ।
पापप्रतिक्रियायोगे विग्रहे विदधे मतिम् ॥ ६६ ॥

क्रूरकोपं पितुर्वक्त्रं दृष्ट्वा लावण्यवत्यपि ।
कण्ठलग्नं मुनेर्भक्ष्य मित्युक्त्वास्य ददौ पयः ॥ ६७ ॥

पापापह्नववैचित्र्यप्रत्युत्पन्नगिरः परम् ।
मायामये विनिमये बृहस्पतिधियः स्त्रियः ॥ ६८ ॥

བྲུ་མོ་ཡི་ནི་ཚིག་དེ་ཡིས། འཕྲུལ་ལ་ཉིད་དུ་མི་ཡི་བདག།
ཀ་དྭ་ཀ་ཡི་ཕྱེ་མ་ཡིས། ཆུ་ཡི་གནས་བཞིན་དང་བར་གྱུར།། 69

སྐབས་དེར་ཐུབ་པ་རྫུ་འཕྲུལ་གྱི། དེ་ཡིས་མཁའ་ལ་འགྲོ་ཉམས་པ།
སྤྱན་ཟླ་ཕྲུ་བོ་ནགས་ན་གནས། ལྷ་ཡི་སྤྱན་ལྡན་གྱིས་ཤེས་ནས།། 70

ཕྱག་བསྟོལ་རང་ཉིད་མངོན་ཕྱོགས་ཏེ། དེ་ནི་རང་གི་གནས་ཁྲིད་ནས།
སྔར་ཡང་བསམ་གཏན་བཞི་བསྐྱངས་ཏེ། མངོན་ཤེས་ལྔ་དང་ལྡན་པར་གྱུར།། 71

ཐུབ་པ་ཆགས་པའི་ཆུ་གཏེར་དུ་ལྷུང་མི་བཟོད་ཡུལ་གྱིས་ནི།
ཉོན་མོངས་འཁོར་ལོ་དག་ལས་ཕྱིར་ཕྱུང་རབ་མང་དཀའ་ཐུབ་ཀྱི།
གཟི་ཡི་འདོད་པ་དྲན་པའི་སྡིག་བཀུགས་ཤེས་ནས་ཁྲོ་བའི་ཚོགས།
བདང་ནས་མི་བདག་བློ་ལྡན་དག་ཀྱང་རབ་ཏུ་དང་བར་གྱུར།། 72

དེ་ཡི་ཚེ་ན་ང་ཉིད་ནི། འཕྲོག་བྱེད་བུ་ཡི་མིང་ཅན་དེ།
ནག་བ་དག་ཀྱང་འཕྲོག་བྱེད་ཏེ། ཆུང་མ་རྒྱལ་པོ་འི་བུ་མོར་གྱུར།། 73

དེ་སྐད་དེར་ནི་མི་བདེན་མ་ཡིན་རབ་གྲགས་པའི།
རང་གི་གདམ་འདི་དེ་བཞིན་གཤེགས་པས་བཤད་གྱུར་ཏེ།
གང་གི་སྲིད་པ་མཐའ་དག་སྐྱོན་གྱི་རང་བཞིན་ལས།
དགེ་སློང་ཚོགས་ཀྱིས་བློ་གྲོས་ཅི་ཡང་ཞུགས་མ་གྱུར།། 74

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ནག་པ་གླང་པོ་འི་སྐུན་གྱི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་བརྒྱད་པའོ།།

दुहितु र्वचसा तेन सहसैव प्रसन्नताम् ।
नृपः कतकचूर्णेन जलाशय इवाययौ ॥ ६९ ॥

अत्रान्तरे मुनेस्तस्य ज्येष्ठो भ्राता वनस्थितिः ।
विनष्टा दिव्यधीर्ज्ञात्वा लुप्तर्द्धिर्गगने गतिम् ॥ ७० ॥

दुःखितः स्वयमभ्येत्य तं नीत्वा निजमाश्रमम् ।
पञ्चाभिज्ञं पुनश्चक्रे चतुर्ध्यानपरायणम् ॥ ७१ ॥

नरपतिरपि ज्ञात्वा रागोदधौ पतितं मुनिं
विषमविषयक्लेशावर्त्तात् पुनश्च विनिर्गतम् ।
बहुतरतपस्तेजोदग्धस्मरस्मृतिपातकं
रुष मुपचितां त्यक्त्वा धीमान् प्रसादमुपाययौ ॥ ७२ ॥

हरिहायनसंज्ञोऽसावहमेव तदाभवम् ।
चित्रो हरिशिखश्चाभूत् तत्पत्नी च नृपात्मजा ॥ ७३ ॥

अवितथां प्रथितां स्वकथा मिमां
कथितवानिति तत्र तथागतः ।
प्रसभमेव भवाभिभवे मतिः
किमपि भिक्षुगणस्य ययाभवत् ॥ ७४ ॥

इति श्रीक्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
चित्रहस्तिशय्यातिपुत्रावदानमष्टाशीतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱད་ཅུ་རྩ་དགུ་པ།

འཇིགས་རུང་སྨུག་པོའི་ཀླུང་གིས་རབ་བསླངས་རྦ་རླབས་རྣམ་སྤྲོལ་པས།
མ་ལུས་ཕྱོགས་ཀུན་ཡོངས་འགེངས་དྲག་པོའི་སྒྲ་དང་རབ་དུ་ལྡན།
ཆུ་སྤྲིན་འབྱུང་གནས་བརྙོག་དཀའ་ཆུ་ཡི་རྣམ་འགྱུར་ཅན་དེ་ཡང་།
བདེ་གཤེགས་དྲན་པའི་མི་རྣམས་དག་ལ་མཐའ་རུ་གྱུར་པ་ཉིད། ॥ 1

རྒྱལ་བ་འགྲོ་ཀུན་བདེ་ལེགས་ལ། དྲག་ཏུ་སྐྱོར་ཞིང་མཆོན་ཡོད་ཀྱི།
རྒྱལ་བྱེད་ཚལ་གྱི་ཀུན་དགའ་རྭ། གཙུག་ལག་ཁང་ན་སྤྲོན་ཞུགས་ཚེ། ॥ 2

ཡངས་པའི་གྲོང་དུ་འགྲོ་བ་ལ། སྐྱོ་བ་ཡི་ནི་དུས་བྱུས་པ།
རིན་ཅེན་དོན་གཉེར་ཚོང་པ་ཡི། དོན་མཐུན་ཆུ་གཏེར་ཆ་འགྲུས་ཕྱིན། ॥ 3

དེ་ནས་གཟིངས་ལ་དོན་མཐུན་ནི། རབ་དུ་ཞེན་ཆེ་ལྷི་བའི་ཁུར།
དཔྱད་ནས་བྱིང་དུ་དོགས་པ་ཡི། རྣ་བ་འཛིན་པས་དེ་ལ་སླུས། ॥ 4

ཁྱེད་རྣམས་རབ་དུ་སྤྲིད་པ་ཡིས། བརྒྱུད་མར་ཞེན་པ་འདི་ནི་ཅི།
ཆུ་གཏེར་རྦ་རླབས་རྩེ་མོ་འདི། ཁྲིམས་ཀྱི་ཁྲུམས་ནི་ཡོངས་མ་ཡིན། ॥ 5

རེ་ཞིག་ཁྱོད་ཀྱིས་གཟིངས་ལ་ནི། འཚམས་པའི་ཁུར་དག་རབ་དུ་མཛོད།
རིན་ཅེན་ཕུང་པོ་སྲུ་མི་འདོད། འོན་ཀྱང་ཆུ་གཏེར་འཚོ་བ་མང་། ॥ 6

ऊननवतितमः पल्लवः ।

उद्भूतभैरवघनानिलनिर्म्मितोर्म्मि-
संपूरिताखिलदिगन्तरघोरघोषः ।
दुर्वारवारिविकृतिं मकराकरोऽपि
सौम्यत्वमेति सुगतस्मरणेन पुंसाम् ॥ १ ॥

श्रावस्त्यां स्वस्तये सर्व्वजगतां सततोद्यते ।
जिने जेतवनारामविहारनिरते पुरा ॥ २ ॥

विपुलद्वीपयात्राया मुत्साहेन कृतक्षणः ।
रत्नार्थी वणिजां सार्थस्तीरं प्राप महोदधेः ॥ ३ ॥

ततः प्रवहणारूढे सार्थे गुरुतरं भरम् ।
विचिन्त्य कर्णधारस्तानूचे मज्जनशङ्कितः ॥ ४ ॥

केयं युष्माकमौत्सुक्यादारोहणपरम्परा ।
तुङ्गतरङ्गभङ्गोऽयं न गृहाङ्गनमम्बुधिः ॥ ५ ॥

सह्यस्तावत् प्रवहणे भवद्भिः क्रियतां भरः ।
रत्नराशिर्न कस्येष्टः किन्त्वब्धिर्बहुविप्लवः ॥ ६ ॥

ཆུ་གཏེར་ན་ནི་གཞན་ན་རྦ་རླབས་རབ་འཁྲུག་དྲག་པོ་འི་ཆུ་སྲིན་ཚོགས་
དཀྲིགས་ཤུགས།

གཞན་ན་རང་གི་རི་བོ་བརྟན་པའི་རྩེ་མོ་ཚོགས་ཀྱི་རྒྱུན་བཀག་འགྲོར།

གཞན་ན་རླུང་ནི་མཐར་བྱེད་དག་གི་དབུགས་ལྟར་དྲག་པ་ལང་བས་
ཀུན་ཏུ་བསྐྱུན་ཅིང་འཁོར།

གཞན་ན་སྒྲོ་བུར་ཉམས་བྱེད་རྟ་གདོང་མེ་ནི་རབ་བརྟན་མེ་ལྕེའི་
དཀྱིལ་འཁོར་གདུམ་པ་ཡོད། 7

ཅེས་པ་ཉ་བའི་འཇིགས་པ་ཡིས། ཆུ་གཏེར་རང་བཞིན་བཤད་ཐོས་ནས།
འགའ་ཞིག་བབས་ནས་སོང་བར་གྱུར། བསམ་པ་ཆེ་བ་འགའ་ཞིག་འཁོད། 8

དེ་ནས་རིན་ཅན་གླིང་ཕྱིན་ཏེ། ནོར་མཐུན་དོན་གྲུབ་ཉིད་གྱུར་ཅིང་།
དཔལ་བུམ་དཔལ་བུམ་རྗེས་མཐུན་གྱི། རླུང་གི་རྗེས་སུ་ལོག་པའི་ཚེ། 9

རི་བོ་མན་དྷ་ར་བསྐྱང་བཞིན། ནམ་མཁའ་ཀུན་ཏུ་གང་གྱུར་ཅིང་།
ཁ་གདངས་ཕྱུབ་ལྟར་གྱུར་པ་ནི། ཚོང་པ་ཀུན་གྱི་མ་ཏུན་ཏུ་མཐོང་། 10

རུས་སྦལ་ཉ་དང་ཆུ་སྲིན་བཅས། རྒྱ་མཚོ་ཡི་ཆུ་ནི་མ་ལུས་པ།
གཡང་སར་ལྷུང་བཞིན་དེ་ལ་ནི། མདོང་སྐྱོགས་མགོགས་པར་སོང་གྱུར་ཅིང་། 11

དེ་ནས་གཟིངས་ནི་མཐར་བྱེད་ཀྱི། ཁ་ཡི་ཕུག་དང་ཉེ་བའི་ཚེ།
ཚོང་པ་བསྐྱོད་པས་འཁྲུགས་རྣམས་ཀྱིས། ཉ་བ་འཇིགས་པ་དག་ལ་དྲིས། 12

སྔོན་མ་བྱུང་བ་བྱུང་གྱུར་པ། སྒྲ་བྱུང་འབྱུང་བོ་འདི་ནི་ཅི།
གང་གི་སྐྱི་བོར་ཆ་ཟེར་ཅན། རླུང་ཞིག་ཤར་བ་ལྟ་བུར་མཐོང་། 13

अन्यत्रोर्म्मिप्रबन्धः खरमकरकुलव्याकुलोऽन्यत्र वेगः
कीर्णोऽन्यत्रान्तराद्रिस्थिरशिखरघनोद्घातसम्पाकतोयः ।
अन्यत्रोद्यत्कृतान्तश्वसिततरमरुत्सन्निपातभ्रमोऽब्धे-
श्चण्डोऽन्यत्रास्त्यकाण्डक्षयनिविड़शिखामण्डलो बाड़वाग्निः ॥
७ ॥

श्रुत्वेति कर्णधारेण कथितं रूपमम्बुधेः ।
अवरुह्य ययुः केचित् तस्थुः केचिन्महाशयाः ॥ ८ ॥

रत्नद्वीपमथासाद्य याते सार्थे कृतार्थताम् ।
अनुकूलानिले काले प्रत्यावृत्ते शनैः शनैः ॥ ९ ॥

ददृशु र्वणिजः सर्व्वे पुरः संपूरिताम्बरम् ।
विसारितास्यकुहरं मन्दराद्रिमिवोन्नतम् ॥ १० ॥

सकूर्म्ममीनमकरः सलीलः सकलोऽम्बुधिः ।
तस्यैवाभिमुखं वेगात् प्रस्थितः श्वभ्रपातवत् ॥ ११ ॥

कृतान्तवक्त्रकुहरासन्ने प्रवहणे ततः ।
पप्रच्छु र्वणिजः कर्णधारं विप्लवविह्वलाः ॥ १२ ॥

अभूतपूर्व्वं मुहूर्तं भूतं किमिदमद्भुतम् ।
उदितं मूर्ध्नि चण्डांशुयुगलं यत्र दृश्यते ॥ १३ ॥

འདི་ནི་མངོན་ཕྱོགས་རྒྱ་འདི་དག། ཅི་སྙད་ཡོངས་སུ་རྒྱུག་པར་བྱེད།
གང་གི་ཤུགས་ཀྱིས་གཟིངས་འདི་ནི། འདྲེན་པར་བྱེད་ཅིང་རྣམ་པར་གཡོ། ། 14

དེ་ལྟ་གློ་བུར་བརྟགས་རྩོམ་པའི། འཇིགས་པའི་རྣམ་འཕྲུལ་གྱིས་སྐྲག་པ།
ཚོང་པ་རྣམས་ཀྱིས་ཐེ་ཚོམ་དྲིས། ཉ་བ་འཛིན་པས་རབ་སྨྲས་པ། ། 15

ཉ་མིད་མིད་པར་བྱེད་པའི་ཉ། སེམས་ཅན་འཇོམས་བྱེད་ཆེན་པོ་འདི།
རྒྱ་མཚོ་དག་ན་རྣམ་པར་གནས། འཁོར་བ་ན་ནི་ཀུན་སློངས་བཞིན། ། 16

ཉི་མ་བཅུ་གཉིས་འཆར་རྩོམ་ཚོ། ཉི་མ་ཟུང་ནི་ཤར་བ་བཞིན།
དུས་མཐའ་འཇིགས་རུང་འདི་ཡི་ནི། མིག་ནི་ཟུང་དག་རབ་ཏུ་མཐོང་། ། 17

འདི་ཡི་ཁ་ཡི་གཡང་སའི་མཐར། སྤྲིན་དཀར་དག་གིས་ཡོངས་བསྐོར་བའི།
རི་རྩེ་ཆེན་པོ་འི་འཕྲེང་བ་བཞིན། སོ་ཡི་འཕྲེང་བ་རབ་ཏུ་མཚོན། ། 18

འདི་ཡི་ཁ་རུ་ལྷུང་བ་ཡི། རྒྱུན་གྱིས་གཟིངས་ནི་དྲངས་པ་དག།
ཡུལ་ལ་མངོན་པར་ཕྱོགས་པ་ཡི། སེམས་བཞིན་གཟུང་བར་ནུས་མ་ཡིན། ། 19

འཆི་བ་ལས་ཀྱིས་སྤྲུལ་གྱུར་པ། འདི་ལ་ཕྱིར་བཅོས་ཡོད་མ་ཡིན།
སྐྱེ་བ་གཞན་ལ་དགེ་སྤྱིར་བའི། ལྷ་ནི་ཅུང་ཟད་དྲན་པར་མཛོད། ། 20

ཅེས་པ་ཉ་བ་འཛིན་གྱིས་བརྗོད་པ། ཚོང་པའི་ཚོགས་ཀུན་གྱིས་ཐོས་ནས།
སངས་རྒྱས་སངས་རྒྱས་ཕྱག་འཚལ་ཞེས། ཅོ་ངའི་སྒྲ་དང་ལྡན་པས་སྨྲས། ། 21

अस्याभिमुखमेतत् किं सलिलं परिसर्पति ।
कृष्यमाणं प्रवहणं यस्य वेगेन घूर्णते ॥ १४ ॥

इत्यकाण्डक्षयारम्भभयसम्भ्रमकातरैः ।
वणिग्भिः संशये पृष्टः कर्णधारः समभ्यधात् ॥ १५ ॥

तिमिङ्गिलगिलि मत्स्यः सत्त्वसंहारकृन्महान् ।
संमोह इव संसारे निवसत्येष सागरे ॥ १६ ॥

अस्य कल्पान्तघोरस्य नेत्रयुग्मं प्रदृश्यते ।
द्वादशार्कोदयारम्भे सूर्य्यद्वयमिवोदितम् ॥ १७ ॥

अस्यास्यश्वभ्रपर्य्यन्ते शुभ्राभ्रपरिवारिता ।
महाद्रिशृङ्गमालेव लक्ष्यते दशनावली ॥ १८ ॥

प्रवाहेण प्रवहणं कृष्टमस्यास्यपातिना ।
विषयाभिमुखं चित्तमिव धर्त्तुं न शक्यते ॥ १९ ॥

स्मर्य्यतां दैवतं किञ्चिज्जन्मान्तरशुभप्रदम् ।
प्रतिक्रियास्मिन्नास्त्येव निधने कर्म्मनिर्म्मिते ॥ २० ॥

इत्युक्तं कर्णधारेण श्रुत्वा सर्व्वे वणिङ्नराः ।
नमो बुद्धाय बुद्धायेत्यूचुः साक्रन्दनादिनः ॥ २१ ॥

འཇིགས་པས་གཟིར་བ་དེ་དག་སྐྲ། བཅོམ་ལྡན་རྒྱལ་བ་རྒྱལ་བྱེད་ཀྱི།
ཚལ་བཞུགས་འབྱུང་པོ་ལ་དགོས་པས། ལྷ་ཡི་རྔ་བ་དག་གིས་ཐོས།། 22

ཕྱུག་པ་ཞི་བྱེད་མངས་རྒྱས་ཀྱི། མཚན་ཐོས་ཉིད་ན་སེམས་ཅན་གྱི།
ཉིད་འཚོ་ཞི་སྐད་ཅ་མིད་ཁ། དལ་བུ་ཡིས་ནི་ཟུམ་པར་གྱུར།། 23

དལ་གྱིས་དེ་ནི་ཁ་བསྒྲིབས་ཚེ། མི་མཐུན་ཕྱོགས་འགྲོ་རྒྱུན་ཉམས་པས།
དུས་ཀྱི་ཁ་ལས་གྲོལ་བ་ཡི། གཟིངས་ནི་རང་གི་ངོས་སུ་ཕྱིན། 24

དེ་ནས་མི་བཟད་འཇིགས་ལས་ཐར། གྲགས་པའི་དཔལ་ལྡན་རིན་ཅན་གྱིས།
ཁངས་ཤིང་དགེ་བ་ལྡན་བ་ཀུན། མཉན་ཡོད་དུ་ནི་རྣམ་པར་ཞུགས།། 25

གྲུས་ལྡན་དེ་དག་སོང་གྱུར་ནས། ག་ུང་བ་སྐྱོབ་པར་མཛད་པ་པོ།
རྒྱལ་བ་བཅོམ་ལྡན་རྒྱལ་བྱེད་ཀྱི། ཚལ་ན་བཞུགས་ལ་ཕྱག་དག་འཚལ།། 26

དེ་དག་དེ་མཐོང་ཉིད་ན་ནི། འཁོར་བའི་འཆིང་བ་ཆད་གྱུར་ཅིང་།
འཕྲལ་ལ་རབ་དུ་དང་བ་ཐོབ། རབ་དུ་བྱུང་ནས་དགྲ་བཅོམ་གྱུར།། 27

འདི་དག་སྔོན་གྱི་སྐྱེ་བ་ལ། སྟོན་པ་འོད་སྲུངས་ཞེས་པ་ཡི།
བསྟན་ལ་ཞུགས་པར་གྱུར་ཏོ་ཞེས། བཅོམ་ལྡན་འདས་ཀྱིས་རབ་དུ་གསུངས།། 28

རྒྱ་མཚོར་ཉ་མིད་མིད་པ་ཡང་། སེམས་ཅན་འཛེམས་ལས་ཆགས་བྲལ་དེ།
བཀྲིས་པའི་མེ་ཏོག་གྱིས་ཉེན་ཅིང་། སྐད་ཅིག་གིས་ནི་སྒྲིག་ཟད་ཐོབ།། 29

नादं तेषां भयार्त्तानां भगवान् भूतभावनः ।
दिव्यश्रोत्रेण शुश्राव जिनो जेतवने स्थितः ॥ २२ ॥

बुद्धाभिधानं श्रुत्वैव तमःप्रशमनं तिमिः ।
शनैर्निमीलयन् वक्त्रं सत्त्वोपप्लवशान्तये ॥ २३ ॥

संवृतास्ये शनैस्तस्मिन् प्रतिवेगौघविप्लवात् ।
कालवक्त्रात् प्रवहणं मुक्तं सतत मायया ॥ २४ ॥

ततः कुशलिनः सर्व्वे तीर्णाः तीव्रतराद् भयात् ।
श्रावस्तीं रत्नसम्पूर्णां विविशु र्विश्रुतश्रियः ॥ २५ ॥

ते गत्वा भक्तिसंयुक्ता व्यसनत्राणकारिणम् ।
जिनं जेतवनासीनं भगवन्तं ववन्दिरे ॥ २६ ॥

ते तस्य दर्शनेनैव च्छिन्नसंसारबन्धनाः ।
सद्यः प्रसादमासाद्य प्रव्रज्यार्हत्त्वमाययुः ॥ २७ ॥

अभवन् काश्यपाख्यस्य शास्तुः शासनवर्त्तिनः ।
एते जन्मनि पूर्व्वस्मिन् प्रोवाच भगवानिति ॥ २८ ॥

तिमिङ्गिलगिलि स्त्वब्धौ विरतः सत्त्वसंहृतेः ।
प्राप क्षणेन तीक्ष्णाग्निक्षुत्क्षतः प्राणसंशयम् ॥ २९ ॥

ཉི་དང་མི་བཟོད་ཡིད་འབྱུང་དང་། བཙས་པའི་ཀླུ་ནི་སྟོབས་ལྡན་གྱིས།
དེ་ཡི་རོ་ནི་མི་གཙང་བ། རྒྱ་གཏེར་དག་གི་ངོགས་སུ་འཕངས།། 30

དུས་ཀྱིས་རུས་པ་སྐམ་པོ་ཡི། རང་བཞིན་ལུས་དེ་ཆུས་བཀུས་པ།
རི་བོ་བརྩེགས་པ་ཁ་བ་ཡི། ཕྱུང་པོས་བསྒྲིབས་པ་བཞིན་དུ་མཛེས།། 31

དེ་ནས་མཚན་ཡོད་ཁྲམ་ཟེ་ནི། ཤྲུམན་དུ་ཡི་བུ་ཉིད་གྱུར།
མ་ལ་བཀྲིས་པའི་སྡུག་བསྔལ་ཚོར། མི་བཟད་མངལ་གནས་དེ་ཡིས་མྱུས། 32

སྐྱེས་ཚེ་བཀྲིས་པ་བུད་མེད་ནི། བརྒྱ་ཡི་འོ་མས་ཚིམ་མ་གྱུར།
དཔལ་གྱིས་སྐྱིད་བསྐྱངས་ཚེ་ན་ནི། ཟས་ཚོགས་ཤིན་དུ་མང་བས་ཀྱང་། 33

མ་ཚིམ་མཆོག་དུ་ཡིད་བྱུང་བ། དེ་ནི་དགེ་སློང་ཚོགས་སོང་ནས།
རབ་དུ་བྱུང་བ་ཉེ་བར་བླངས། བསོད་སྙོམས་དག་གིས་ཚིམ་མ་གྱུར།། 34

དེ་ནས་ཆེར་བཀྲིས་གྲགས་པ་དེ། དད་བས་མགྲོན་གཉེར་དགེ་འདུན་གྱི།
རྒྱ་ཆེ་མཆོད་སྟོན་དེ་དང་དེས། གང་དུ་ཡང་ནི་ཚིམ་མ་གྱུར།། 35

སྐབས་དེར་ཁྱིམ་བདག་དཔལ་དང་ལྡན། སྦྱིན་པའི་བརྟུལ་ཞུགས་ཞེས་བརྗོད་པས།
དད་པ་ཡི་ནི་དགེ་སློང་རྣམས། མགྲོན་དུ་གཉེར་སླད་ཉེ་བར་འོངས།། 36

དགེ་འདུན་གཞན་དུ་གསོལ་བ་ལ། གཤེགས་ཚེ་མང་ཟ་དེ་ཉིད་ནི།
གཅིག་བུ་དེ་ཡིས་ཡང་དག་ཐོབ། དེ་ལ་ཟས་ནི་རབ་དུ་ཕུལ།། 37

क्लिन्नं कलेवरं तस्य दुरामोदासहिष्णुभिः ।
सोद्वेगैर्बलिभिर्नागैः क्षिप्तं जलनिधेस्तटे ॥ ३० ॥

स शुष्कास्थिमयः कायः कालेन क्षालितोऽम्बुभिः ।
तुषारराशिसंच्छन्नः शैलकूट इवाबभौ ॥ ३१ ॥

श्रावस्त्यां ब्राह्मणस्याथ सुमतेः पुत्रतां गतः ।
मातुः स चक्रे गर्भस्थ स्तीव्रां क्षुद्दुःखवेदनाम् ॥ ३२ ॥

स जातः स्तौशतस्तन्यै स्तृप्तिं न क्षुधितो ययौ ।
स शनैर्वर्द्धमानश्च संभृतैर्भूरिभोजनैः ॥ ३३ ॥

अतृप्त्या परमुद्विग्नः स गत्वा भिक्षुसङ्गमम् ।
प्रव्रज्यां समुपादाय तृप्तिं न प्राप पिण्डकैः ॥ ३४ ॥

बहुभुग्विश्रुतः सोऽथ विपुलैः सङ्घभोजनैः ।
श्रद्धानिमन्त्रणै स्तैस्तै र्न क्वचित् तृप्तिमाययौ ॥ ३५ ॥

अत्रान्तरे गृहपतिः श्रीमान् दानव्रताभिधः ।
निमन्त्रणाय भिक्षूणां श्रद्धया समुपाययौ ॥ ३६ ॥

सङ्घे ऽन्यत्र गते भोक्तुं तमेव बहुभोजनम् ।
एकमेव स संप्राप्य भोज्यं तस्मै न्यवेदयत् ॥ ३७ ॥

སྐྱེས་བུ་རབ་ཏུ་མང་བའི་ཟས། སྐད་གཅིག་གྱིས་ནི་དེ་ཟོས་ཚེ།
མཐའ་དག་དགེ་འདུན་མཆོད་སྟོན་ནི། ཁྱིམ་གྱི་བདག་པོས་དེ་ལ་བྱིན།། 38

ཡ་མཚན་བྱེད་པོ་དེ་ཡིས་ནི། གཟན་གྱི་ཕུང་པོ་ཟོས་པའི་ཚེ།
ཁྱིམ་གྱི་བདག་པོ་འཇིགས་པ་ཡི། འབྱུང་པོར་བརྟགས་དེ་ཡང་དག་བསམས།། 39

ཀྱེ་མ་རབ་གཞོན་ཆུང་ངུ་ཡི། ཟས་ཅན་འདི་ནི་བདག་གིས་ཐོབ།
གང་ཞིག་གཅིག་ཕུས་དགེ་འདུན་གྱི། མཆོད་སྟོན་དག་ནི་མ་ལུས་ཟོས།། 40

ཟ་སྲིད་གནོད་སྦྱིན་འདི་ཡིས་ནི། ཞར་ལ་བདག་ཀྱང་མ་ཟོས་པས།
དེ་སྲིད་འདི་ལ་ཡོན་བྱིན་ནས། བདག་ནི་མགྱོགས་པར་འགྲོ་བར་བྱ།། 41

ཞེས་བསམས་དོགས་དང་བཅས་པ་དེ། དེ་ལ་ཡོན་ནི་རབ་ཕུལ་ནས།
ཕྱི་ནས་འོང་བ་ལ་སྐྲག་པས། ཕྱིར་མིག་རྣམ་པར་བལྟ་ཞིང་སོང་།། 42

ཕྱིན་ནས་དེ་ཡི་སྤྱོད་ཚུལ་ཀུན། དེ་ཡིས་བཅོམ་ལྡན་ལ་བཤད་དེ།
འདི་ནི་གནོད་སྦྱིན་སྲིན་པོ་འམ། ཅི་ཞེས་བདེ་གཤེགས་སྤྲོད་དུ་དྲིས།། 43

བཅོམ་ལྡན་གྱིས་ཀྱང་དེར་གསུངས་པ། གནོད་སྦྱིན་འདི་མིན་སྲིན་པོ་མིན།
དགེ་སློང་ཆོས་སྲིད་ཅེས་བྱ་བ། འདི་ནི་དགྲ་བཅོམ་ཉིད་དུ་འགྱུར།། 44

དེ་ནས་སྟོན་པ་རང་ཉིད་ཀྱིས། ཆོས་སྲིད་མཁའ་ལ་ཁྲིད་ནས་ནི།
དེ་ལ་འཇིགས་སུ་རུང་བ་ཡི། རང་གི་ལུས་དག་རབ་ཏུ་བསྟན།། 45

तस्मिन् क्षणेन भुञ्जाने प्रभूतपुरुषाशनम् ।
ददौ गृहपतिस्तस्मै समस्तं सङ्घभोजनम् ॥ ३८ ॥

अन्धसां शकटे तेन भुक्ते विस्मयकारिणा ।
भीत्या गृहपतिर्भूतशङ्कार्त्तः समचिन्तयत् ॥ ३९ ॥

अहो मयायं संप्राप्तः सुकुमारोऽल्पकाशनः ।
निःशेषं भुक्तमेकेन येन सङ्घस्य भोजनम् ॥ ४० ॥

प्रसङ्गेन न यक्षोऽयं यावन्मामपि खादति ।
दत्त्वास्मै दक्षिणां तावज्जवादपसराम्यहम् ॥ ४१ ॥

इति सञ्चिन्त्य साशङ्क स्तस्मै दत्त्वा स दक्षिणाम् ।
पश्चादागमनत्रासाद् ययौ विवलिताननः ॥ ४२ ॥

गत्वा भगवते सर्व्वं तद्वृत्तान्तं निवेद्य सः ।
कोऽसौ यक्षो नु रक्षो वेत्यपृच्छत् सुगतं पुरः ॥ ४३ ॥

भगवानपि तं प्राह नासौ यक्षो न राक्षसः ।
एष धर्म्मरुचिर्नाम भिक्षु रर्हत्त्व मेष्यति ॥ ४४ ॥

अथ धर्म्मरुचिं शास्ता स्वयं नीत्वा विहायसा ।
अदर्शयन्निजं तस्य विकरालं कलेवरम् ॥ ४५ ॥

འཁོར་བ་བཞིན་དུ་འཇིགས་རུང་བ། དེ་ཡི་མཐའ་ནི་མཐོང་གྱུར་ནས།
ཆོས་སྤྱོད་སྐྱོ་ནས་རྒྱལ་བ་ལ། འདི་ཅི་ཞེས་པ་རབ་ཏུ་དྲིས།། 46

ཕུང་ཟད་འཛུམ་དཀར་བཞིན་རས་ཅན། ཐམས་ཅད་མཁྱེན་པས་དེ་ར་གསུངས་པ།
འཇིགས་སུ་རུང་བའི་ལུས་འདི་ནི། བརླམས་ཤིང་རགས་པ་རུས་པའི་གཟེབ།།47

ཆོས་སྤྱོད་རབ་ཏུ་ཞི་བ་བསྟན། དངོས་པོ་ཡོངས་སུ་འཛིན་པ་མཐོང་།
རྒྱབ་ཀྱི་ཚིགས་རུས་ལྷུགས་སྐྱོགས་ཅན། རགས་པ་འདི་ནི་ཁྱིད་ཀྱིའོ།། 48

བདེ་གཤེགས་ཀྱིས་གསུངས་དེ་ཐོས་ནས། རང་གི་ལུས་ལ་རྟོགས་སྐྱེད་ཅིང་།
ཆོས་སྤྱོད་སྤྱོད་པ་འཁྲུལ་པ་ལ། མཆོག་ཏུ་སྐྱོ་བ་ཉིད་དུ་གྱུར།། 49

དེ་བསམསམས་ཀྱི་མ་རྨོངས་པ་ཡིས། ལམ་ལ་རབ་ཏུ་འགྲོད་པའི་འགྲོན།
མི་རྣམས་སྐད་ཅིག་བསྟེན་པ་ཡི། ལུས་ལ་རང་གི་ཉིད་དུ་ཆགས།། 50

ལུས་ནི་རབ་ཉམས་སྲིན་བུའི་ཚོགས་ཀྱིས་ཀང་ནི་བུག་པར་གྱུར་ཅིང་།
དབྱིབས་ངལ་རུས་པའི་ཀ་བ་རབ་གསལ་སོ་ཡི་འཕྲེང་བ་འཇིགས་རུང་འདི།
འཇིག་པའི་རང་བཞིན་སྐྲ་མ་ལ་ཆགས་མི་རྣམས་དག་གི་སྲིད་འཕེལ་ཞིང་།
ཆགས་བཅས་ཡུལ་གྱི་ཉམས་སྟོང་ས་གཞི་གཏོར་བ་དང་བཅས་དེ་དག་གོ།། 51

དེ་ལྟར་རང་གི་ལུས་མཐོང་བས། ཆགས་བྲལ་ཡང་དག་སྐྱེས་པ་དེ།
རྒྱལ་བས་བླངས་ནས་ནམ་མཁའ་ལ། སླར་ཡང་རྒྱལ་བྱེད་ཚལ་དུ་སོང་།། 52

तदपर्यन्तमालोक्य संसारमिव भीषणम् ।
किमेतदिति पप्रच्छ खेदाद्धर्म्मरुचिर्जिनम् ॥ ४६ ॥

तमवोचत् स सर्व्वज्ञः किञ्चित्स्मितसिताननः ।
अयं भयङ्करः कायः शुष्कः स्थूलास्थिपञ्जरः ॥ ४७ ॥

भज धर्म्मरुचे शान्तिं त्यज भावपरिग्रहम् ।
स्थवीयसी तवैवेयं पृष्ठस्थूणास्थिशृङ्खला ॥ ४८ ॥

श्रुत्वैतत् सुगतेनोक्तं कलयन् स्वकलेवरम् ।
भवभ्रमे धर्म्मरुचिः परं निर्व्वेदमाययौ ॥ ४९ ॥

सोऽचिन्तयदहो मोहमार्गे संसरतां नृणाम् ।
क्षणप्रतिश्रये काये पान्थानां निजवासना ॥ ५० ॥

विसंस्थास्थिस्थूणः प्रकटदशनश्रेणिविकटः
प्रणष्टः कायोऽयं कृमिकुलचितच्छिद्रनलकः ।
इमास्ताः सापायाः प्रलय —— मायाप्रणयिणां
नृणां रोहत्स्नेहाः सरसविषयास्वादनभुवः ॥ ५१ ॥

इति संजातवैराग्यं स्वकलेवरदर्शनात् ।
व्योम्ना जिन स्तमादाय ययौ जेतवनं पुनः ॥ ५२ ॥

དེར་ནི་དེ་ལ་བཅོམ་ལྡན་གྱི། །བརྩེ་བས་བསྟན་མཛད་གང་གིས་ནི། །
རྒྱུན་དང་ལན་གཅིག་ཕྱིར་མི་འོང་། །རིམ་པས་དགྲ་བཅོམ་ཉིད་ཐོབ་གྱུར། ། 53

ཉོན་མོངས་ཀུན་ལས་རྣམ་གྲོལ་དེས། །དེ་བཞིན་གཤེགས་ལ་ཕྱག་འཚལ་ཏེ། །
སྔོན་གྱི་སྐྱེ་བའི་ཚོགས་དྲན་ནས། །བཞིན་ནི་འཛུམ་པ་དང་བཅས་སོང་། ། 54

དེ་ནས་ནམ་ཞིག་བཅོམ་ལྡན་འདས། །ཀུན་མཁྱེན་དགྱེས་པས་དགེ་སློང་གི། །
ཚོགས་དང་ཉེ་བར་འོངས་པ་ཡི། །འཆིང་བ་བཅད་པ་དེ་ལ་གསུངས། ། 55

ཆོས་སྤྱོད་ཉོན་མོངས་ལམ་དག་ནི། །ཡངས་པའི་དུས་ལ་ཡུན་རིང་གི། །
ཤིན་ཏུ་ཆེས་ཀྱང་ཡུན་རིང་བ། །ཡུན་རིང་ལས་ཀྱང་ཡུན་རིང་བར། ། 56

ཡུན་རིང་རྒྱུ་བས་བསགས་པ་ཡི། །ཕ་རོལ་མེད་པའི་ཀུན་ཉོན་མོངས། །
བར་མེད་དེ་ཡིས་ཆོས་སྤྱོད་ཁྲོད། །མི་ངལ་ལམ་ཅི་ཙུང་ཞིག་སྤྲོས། ། 57

ཐམས་ཅད་མཁྱེན་པས་དམ་པ་ཡི། །མདུན་དུ་ཆོས་སྤྱོད་ལ་འདི་དྲིས། །
སྔོན་སྐྱེ་དྲན་པ་སྟེར་བ་ཡི། །བཅོམ་ལྡན་འདས་ལ་དེས་གསོལ་པ། ། 58

བཅོམ་ལྡན་རེ་ཞིག་ཉོན་མོངས་ལམ། །ཡངས་པའི་དུས་ལ་ཡུན་རིང་གི། །
ཤིན་ཏུ་ཆེ་ཀྱང་ཡུན་རིང་བར། །ཡུན་རིང་ལས་ཀྱང་ཡུན་རིང་བ། ། 59

རྣམ་པ་སྣ་ཚོགས་རབ་ལྡིའི་ཁྲར་བུ་མངལ་གྱི་མལ་སྟན་དྲི་མས་མཚན། །
ལུས་ཀྱི་སྦྲུར་མའི་ཚོགས་ནི་ཤིན་དུ་ཡུན་རིང་བཟུང་ནས་ངལ་ཞིང་འཁྲུམ། །

तत्रास्य चक्रे भगवान् दयया देशनां यया ।
स्रोतःसकृदनागामि स यदर्हत्त्वमाप्तवान् ॥ ५३ ॥

सर्व्वक्लेशविनिर्मुक्तः स प्रणम्य तथागतम् ।
प्राग्जन्मनिचयस्मृत्या प्रययौ सस्मिताननः ॥ ५४ ॥

ततः कदाचिदायातं तं भिक्षुगणसन्निधौ ।
जगाद भगवान् प्रीत्या सर्व्वज्ञ श्छिन्नबन्धनम् ॥ ५५ ॥

चिरस्य किं धर्म्मरुचे महता सुचिरेण च ।
क्लेशाध्वविपुले काले चिराच्चिरतरेण च ॥ ५६ ॥

वद धर्म्मरुचे कच्चिच्चिरसञ्चारसञ्चितैः ।
तैरपारपरिक्लेशै र्न श्रान्तोऽसि निरन्तरैः ॥ ५७ ॥

इति धर्म्मरुचिः पृष्टः सर्व्वज्ञेन सतां पुरः ।
प्राग्जन्मस्मृतिदातारं भगवन्त मभाषत ॥ ५८ ॥

चिरस्य तावद् भगवन् महता सुचिरेण च ।
क्लेशाध्वविपुले काले चिराच्चिरतरेण च ॥ ५९ ॥

नानाकारै र्गुरुतरभरै र्गर्भशय्यामलाङ्कैः
श्रान्तः श्रान्तश्चिरतरधृतैः कायकन्यासमूहैः ।

སྡུག་བསྔལ་ཅན་རྣམས་གདུང་ལ་སྙིང་རྗེའི་གཉེན་བྱེད་རབ་ཏུ་ཐོབ་གྱུར་ནས།
སྐྱིབ་པ་ཀུན་དང་བྲལ་བའི་ངལ་གསོས་འདི་ནི་ཀྱི་མ་བདག་གིས་ཐོབ།། 60

དེ་ལྟར་དེར་ནི་ཆོས་སྲིད་དང་། རྒྱལ་བའི་གདམས་ཀྱི་མཛུག་དུ་ནི།
མཚར་ནས་ཚུལ་དེ་དགེ་སློང་གིས། དྲིས་ཤིང་དེ་བཞིན་གཤེགས་པས་གསུངས།།
61

སྔོན་གྱི་བསྐལ་པར་གྲོང་ཁྱེར་ནི། དགེ་བ་ཅན་དུ་སྐུ་ཡི་བདག།
དགེ་བ་ཞེས་ལ་བཅོམ་ལྡན་འདས། བདེ་གཤེགས་དགེ་མཛད་ཅེས་པ་བྱུང་།། 62

དེ་ཡི་དུས་ན་ཁྱིམ་བདག་ནི། ཆོས་ཀྱི་ངང་ཚུལ་ཞེས་པ་བྱུང་།
རྒྱ་མཚོར་བགྲོད་པའི་རིན་ཅན་གྱིས། རྣམ་ཐོས་སྲས་དང་མཚུངས་པ་ཐོབ།། 63

དེ་ནས་དུས་ཀྱིས་དེ་བཞིན་གཤེགས། གཟི་བརྗིད་དཔག་ཏུ་མེད་པ་དེ།
འགྲོ་བ་ཀུན་གྱི་དོན་མཛད་ནས། མྱང་འདས་དབྱིངས་སུ་ཞུགས་པ་ན།། 64

དེ་དང་བྲལ་བའི་སེམས་གདུངས་པའི། ཁྱིམ་བདག་ཆོས་ཀྱི་ངང་ཚུལ་ནི།
གུས་པས་བཅོམ་ལྡན་འདས་དེ་ཡི། མཆོད་རྟེན་བྱེད་པ་ལ་བརྩོན་གྱུར།། 65

བདག་ཉིད་ཆེན་པོ་དེ་ཡིས་ནི། ནོར་བུ་གསེར་ཚོགས་མཆོད་རྟེན་རྩེས།
རྒྱལ་བའི་བསྟན་པ་ལ་སྣང་བའི། བྲམ་ཟེ་ཡིས་ནི་རྣམ་པར་བརྒྱིག།། 66

བྲམ་ཟེ་ཆོས་ཀྱི་གེགས་རྣམས་ཀྱི། སྤྱོད་ཚུལ་དེ་ཡིས་རྒྱལ་ལ་བཤད།
དེ་ཡིས་བྱིན་པའི་དཔའ་བོ་ནི། འགོག་བྱེད་སྒྲིག་པར་བྱེད་པ་ཐོབ།། 67

त्वां लब्ध्वाहं व्यसनकरुणाबान्धवं दुःखितानां
प्राप्तः सर्व्वावरणरहितां हन्त विश्रान्तिमेताम् ॥ ९० ॥

इति धर्म्मरुचे स्तत्र जिनस्य च कथान्तरे ।
कौतुकाद् भिक्षुभिः पृष्ट स्तद्वृत्तं सुगतोऽभ्यधात् ॥ ९१ ॥

पूर्व्वस्मिन् भगवान् कल्पे क्षेमनाम्नि महीपतौ ।
क्षेमङ्कराख्यः सुगतः क्षेमवत्या मभूत्पुरि ॥ ९२ ॥

तस्य काले गृहपति र्धर्म्मशीलाभिधोऽभवत् ।
समुद्रयाचासंरब्धरत्नै र्वैश्रवणोपमः ॥ ९३ ॥

कृत्वा सर्व्वं जगत्कार्य्यं तस्मिन्नथ तथागते ।
निर्व्वाणधातुसंलीने कालेनामिततेजसि ॥ ९४ ॥

धर्म्मशीलो गृहपति स्तद्वियोगाग्नितापितः ।
भक्त्या भगवत स्तस्य स्तूपं कर्त्तुं समुद्ययौ ॥ ९५ ॥

मणिकाञ्चनसम्भारस्तूपारम्भे महात्मनः ।
जिनशासनविद्वेषाद्विप्रा स्तस्य न्यवारयन् ॥ ९६ ॥

विप्राणां धर्म्मविघ्नानां राज्ञो वृत्तं निवेद्य सः ।
तद्दत्तं सुभटं प्राप्य प्रतिषेधकवारणम् ॥ ९७ ॥

མིང་གི་སྟོང་ཕྲབ་ཅེས་བྱ་བ། རྒྱལ་པོའི་དཔའ་བོ་མཁས་པ་དེས།
ཁྲམ་ཟེ་རྣམས་ལ་རབ་བརྫིགས་ནས། ཚད་པས་སྐྲག་པས་ཕྱིར་ཕྱོགས་བྱས།། 68

དེ་ནས་གེགས་ཐལ་ཁྲིམ་བདག་གིས། གསེར་གྱི་མཆོད་རྟེན་ནོར་བུ་དང་།
ཤུ་རིག་དག་གིས་སྤྲུས་པ་དག། སྨོན་ལམ་དག་ནི་རབ་བསྒྲུབས་པ།། 69

བདག་ནི་དགེ་བ་འདི་དག་གིས། སེམས་ཅན་ཡང་དག་སྒྲོལ་ལ་ཆགས།
བླ་མེད་ཡང་དག་རྫོགས་བྱང་ཆུབ། བདུད་རྩི་ཐྲན་པ་ཐོབ་གྱུར་ཅིག།། 70

དེ་བརྗོད་དེ་དག་ཐོས་གྱུར་ནས། སྟོང་ཕྲབ་གུས་དང་བཅས་པས་བདག།
ཁྱོད་ཀྱི་ཉན་ཐོས་ཉིད་གྱུར་ཅིག། ཅེས་པ་སྨྲས་དེ་སྨོན་ལམ་བཏབ།། 71

ཆོས་ཀྱི་ངང་ཚུལ་ཡེ་ཤེས་ཀྱི། སྤྱན་ནི་ཐོབ་པས་དེ་ལ་སྨྲས།
སྡིག་པ་རབ་ཏུ་མང་བ་ཁྱོད། ཚོགས་ཆེན་དག་གིས་ཉན་ཐོས་གྱུར།། 72

བསྐལ་པ་མང་པོ་སོང་བའི་ཚེ། ཡངས་པའི་དུས་ལ་སྡིག་ཟད་ནས།
སངས་རྒྱས་མཚན་ནི་ཐོས་པ་ན། ཁྱོད་ཀྱིས་དགེ་བ་ཐོབ་པར་འགྱུར།། 73

ཁྲིམ་བདག་ཆོས་ཀྱི་ངང་ཚུལ་དེར། དེ་ཡི་ཚེ་ན་ང་ཉིད་གྱུར།
གང་ཞིག་སྟོང་ཕྲབ་ཏུ་གྱུར་དེ། ཡུན་རིང་ལོན་ནས་ཆོས་སྤྱོད་འདི།། 74

གཉིས་པའི་བསྐལ་པར་གྲོང་ཁྱེར་ནི། མར་མེ་ཅན་དུ་ས་ཡི་བདག།
མར་མེ་ཞེས་ལ་བཅོམ་ལྡན་འདས། སྟོན་པ་མར་མེ་མཛད་ཅེས་གྱུར།། 75

नाम्ना सहस्रयोधीति स राजसुभटः कृतौ ।
निर्भर्त्स्य विदधे विप्रान् दण्डत्रासपराङ्मुखान् ॥ ६८ ॥

हेमस्तूपं गृहपति र्निचितं मणिमौक्तिकैः ।
वीतविघ्नं ततः कृत्वा प्रणिधानं समादधे ॥ ६९ ॥

सत्त्वसन्तारणासक्तां सुधासिक्तामनुत्तराम् ।
अनेन कुशलेनाहं सम्यक्सम्बोधि माप्नुयाम् ॥ ७० ॥

सहस्रयोधी तेनोक्त मेतदाकर्ण्य सादरः ।
श्रावकोऽहं तत्रैव स्या मित्यूचे प्रणिधानवान् ॥ ७१ ॥

धर्म्मशील स्त मवदत् स प्राप्य ज्ञानलोचनम् ।
प्रभूतपापः कृच्छ्रेण श्रावकस्त्वं भविष्यसि ॥ ७२ ॥

बहुवर्षे गते काले विशालकुक्कुतक्षयात् ।
बुद्धाभिधानमाकर्ण्य कुशलं समवाप्स्यसि ॥ ७३ ॥

धर्म्मशीलो गृहपतिः सोऽहमेव तदाभवम् ।
सहस्रयोधी यश्चाभूत् सोऽयं धर्म्मरुचिश्चिरात् ॥ ७४ ॥

द्वितीयकल्पे भगवान् दीपाख्ये पृथिवीपतौ ।
दीपङ्कराभिधः शास्ता दीपवत्यामभूत् पुरि ॥ ७५ ॥

ནམ་ཞིག་དཀའ་ཐུབ་ནགས་དགྲེས་དེ། རང་གི་གྲོང་ཁྱེར་འཛུག་པའི་སླད།
ས་བདག་དེ་ཡི་གྲུས་པ་ཡིས། ཕྱིན་ནས་རང་གིས་རབ་དུ་ཞུས།། 76

མི་བདག་གྲུས་པས་དེ་ལ་ནི། མཉམ་གཞིན་རབ་དུ་དང་བ་ཡི།
བདེ་བར་གཤེགས་པས་ཁས་བླངས་ཚེ། དགོད་པའི་ཚོགས་ནི་རབ་དུ་བཞམས།།
77

ཀ་ཤིའི་གྲོང་ཁྱེར་དག་དུ་ནི། ས་བདག་ནོར་ལྷའི་བུ་ཞེས་པའི།
གྲོགས་ལ་བཙོམ་ལྡན་ལྡོས་ཤིག་ཅེས། རྒྱལ་པོ་དེ་ཡི་པོ་ཉ་སྐྱོངས།། 78

སྐབས་དེར་རྒྱལ་པོ་ནོར་ལྷའི་བུ། མཆོད་སྦྱིན་ལོ་ནི་བཅུ་གཉིས་པ།
ཚོ་ག་བཞིན་དུ་རྫོགས་པ་ན། ཡོན་ལྡ་དག་གིས་བརྟག་པ་བྲུས།། 79

ས་བདག་དེ་ལ་ལྷུས་སྨྲས་པ། ཁྱོད་ཙན་བྲམ་ཟེ་གཉིས་འོང་འགྱུར།
བློ་གྲོས་བཟང་དང་བློ་གྲོས་སོ། དེ་ལས་དང་པོ་ལ་སྦྱིར་འོས།། 80

དེ་ནས་ཁ་དོན་མཐར་ཕྱིན་དེ། བླ་མའི་ཡོན་ནི་དོན་གཉེར་བའི།
བྲམ་ཟེ་དེ་དག་ས་བདག་གི། མཆོད་སྦྱིན་ཞིང་དུ་ཡང་དག་འོངས།། 81

ས་སྐྱོང་ནོར་ལྷའི་བུ་ཡིས་ཀྱང་། དེ་ཡི་མིང་ཐོས་གྲུས་པ་ཡིས།
བློ་གྲོས་བཟང་ལ་མཆོད་སྦྱིན་ནི། མཇུག་དུ་ཡོན་ལྡ་དགའ་བས་ཕུལ།། 82

ཁྲི་སྟན་རིན་ཅེན་བཞི་རང་བཞིན། གསེར་གྱི་དབྱིག་པ་རིལ་བ་དང་།
རིན་ཅེན་གསེར་གྱི་སྣོད་དང་ནི། གསེར་ནི་བརྒྱ་ཕྲག་ལྔ་དག་གོ།། 83

तपोवनरुचि भंक्त्या कदाचित्तेन भूभुजा
जिनः पुरप्रवेशाय स गत्वा स्वय मर्थितः ॥ ७६ ॥

प्रणये नृपते स्तस्मिन् वात्सल्येन प्रसादिना ।
सुगतेनाभ्युपगते सम्भारः समवर्त्तत ॥ ७७ ॥

स राजा काशीनगरीं वासवाख्यस्य भूपतेः ।
सुहृदः प्राहिणोद्दूतं भगवान् दृश्यतामिति ॥ ७८ ॥

अत्रान्तरे वासवेन राज्ञा द्वादशवार्षिके ।
यज्ञे समाप्ते विधिवत् कल्पिताः पञ्चदक्षिणाः ॥ ७९ ॥

तं देवतावदद् भूपं विप्रौ त्वा मागमिष्यतः ।
सुमतिश्च मतिश्चेति दानार्हः प्रथम स्तयोः ॥ ८० ॥

अथाध्ययनपर्य्यन्ते गुरवे दक्षिणार्थिने ।
यज्ञक्षेत्रं क्षितिपते स्तौ समाजग्मतु र्द्विजौ ॥ ८१ ॥

वासवोऽपि महीपाल स्तन्नामश्रवणादरात् ।
ददौ हृष्टः सुमतये यज्ञान्ते पञ्चदक्षिणाः ॥ ८२ ॥

चतूरत्नमयीं शय्यां हैमौ दण्डकमण्डलौ ।
सुवर्णरत्नपात्रीञ्च हिरण्यशतपञ्चकम् ॥ ८३ ॥

རང་གི་བུ་མོ་རྒྱན་གྱིས་བརྒྱན། མི་བདག་སྟེར་བར་བརྩོན་པ་ན།
བློ་གྲོས་བཟང་གི་ཚངས་སྤྱོད་ནི། བརྗོད་ཅིང་བུ་མོ་ཡོངས་མ་བླངས།། 84

མཛེས་མ་ཞེས་པ་བུ་མོ་དེ། གསེར་གྱི་འོད་ཅན་དེ་མཐོང་ནས།
མངོན་འདོད་ལྡན་པས་ངོ་ཚ་ནི། རབ་ཏུ་བཏང་ནས་ཞུ་བ་བྱས།། 85

དེ་ནས་དེ་ཡིས་ཕྱིར་བཟློག་ཆེ། བུ་མོ་ཚངས་སྤྱོད་ལྡན་མ་དེ།
ཆགས་བྲལ་གཉེན་ལས་ཕྱིར་ཕྱོགས་དེ། མར་མེ་ཅན་གྱི་གྲོང་ཁྱེར་སོང་།། 86

དེར་ནི་རྒྱན་གྱི་རིན་ཅེན་རྣམས། རིམ་པ་ཡིས་ནི་འཚོང་བྱེད་ཅིང་།
རིན་གྱིས་ཉོས་པའི་མེ་ཏོག་གིས། དེ་ཡིས་རྟག་ཏུ་ལྷ་མཆོད་བྱས།། 87

བློ་གྲོས་བཟང་གིས་ཡོན་ཐོབ་པ། བཞུད་པ་བླ་མ་ལ་ཕུལ་ནས།
དེ་ཡི་ཆུང་མས་བསྟན་པ་ཡི། གསེར་གྱི་ལྷག་མ་རང་གིས་བཟུང་།། 88

དེ་ཉིད་ཀྱི་ནི་མཚན་མོ་ལ། དེ་ཡི་རྨི་ལམ་བཅུ་མཐོང་སྟེ།
བདུད་རྩིའི་རྒྱ་མཚོ་འཐུང་བ་དང་། ནམ་མཁའ་ལ་ནི་འགྲོ་བ་དང་།། 89

ཉི་ཟླ་མཐོང་དང་རྒྱལ་པོ་དང་། ཐུབ་པའི་ཚོགས་དང་ཤིང་རྟ་དང་།
གླང་དཀར་དང་ངང་པ་དང་། དེ་བཞིན་སེང་གེའི་རི་ལ་འཛེག།། 90

དེ་ནས་དེ་ན་རབ་སད་དེ། ཐུབ་ཆེན་མངོན་ཤེས་ལྔ་ལྡན་པ།
ལོ་མ་གསོལ་བའི་ཚལ་དུ་ནི། རྨི་ལམ་འབྲས་བུ་ཉན་དུ་སོང་།། 91

अलङ्कृताञ्च स्वसुतां नृपे दातुं समुद्यते ।
सुमति र्नाग्रहीत् कन्यां ब्रह्मचर्य्यं मुदाहरन् ॥ ८४ ॥

कन्यापि सुन्दरी नाम तं दृष्ट्वा कनकद्युतिम् ।
साभिलाषा समुत्सृज्य लज्जां चक्रे तदर्थनाम् ॥ ८५ ॥

प्रत्याख्याता तत स्तेन सा कन्या ब्रह्मचारिणा ।
वैराग्याद्वन्धुविमुखी ययौ दीपवतीं पुरीम् ॥ ८६ ॥

तत्रालङ्काररत्नानां कुर्व्वाणा विक्रयं शनैः ।
सा मूल्यक्रीतकुसुमैः सदा चक्रे सुरार्चनाम् ॥ ८७ ॥

सुमति र्गुरवे दत्त्वा दक्षिणास्तं समीहितम् ।
हिरण्यशेषं तत्पन्त्या निर्द्दिष्टं स्वय मग्रहीत् ॥ ८८ ॥

तस्यामेव विभावर्य्यां स्वप्नान् दश ददर्श सः ।
पानं सुधासमुद्रस्य गमनं गगनेन च ॥ ८९ ॥

चन्द्रार्कस्पर्शनं राज्ञां मुनीना मथ याजनम् ।
श्वेतेभ-हंस-सिंहाद्रिशिखरारोहणं तथा ॥ ९० ॥

सोऽथ प्रबुद्धः स्वप्नानां फलं श्रोतुं महामुनेः ।
जगाम पञ्चाभिज्ञस्य पर्णादस्य तपोवनम् ॥ ९१ ॥

དེ་ཡིས་དྲིས་ལ་དེས་སྨྲས་པ། ཁྱོད་ཀྱི་མི་ལམ་འབྲས་བུ་རྒྱས།
མར་མེ་ཅན་གྱི་གྲོང་གནས་པ། བཅོམ་ལྡན་རྒྱལ་བ་ཉིད་ཀྱིས་མཁྱེན།། 92

དེ་ཐོས་སྤྱུར་བར་བློ་གྲོས་བཟང་། མི་ལམ་ལུང་བསྟན་འདོད་པ་ཡིས།
མཆེད་ནི་བློ་གྲོས་དང་འགྲོགས་ཏེ། གྲོང་ཁྱེར་མར་མེ་ཅན་དུ་སོང་།། 93

སྐབས་དེར་རྒྱལ་པོ་མར་མེ་ཡིས། བཅོམ་ལྡན་ནང་དུ་བྱོན་པ་ཡི།
དགའ་སྟོན་ཆེ་ལ་གྲོང་ཁྱེར་དེ། རིན་ཅན་དང་ནི་གོས་ཀྱིས་སྤྲས། 94

དེ་ཡི་མཆོད་པའི་མེ་ཏོག་ཚོགས། དེར་ནི་ས་བདག་གིས་བསྒྲུབས་ཚེ།
ཉི་ཚོང་དྲག་གི་གནས་སུ་ནི། ངས་པར་མེ་ཏོག་མཐོང་མ་གྱུར།། 95

དེ་ནས་བྲ་མོ་མཛེས་མ་དེ། མེ་ཏོག་སྙིད་དཀའ་གྱུར་པའི་ཚེ།
མཆོད་པ་འཆད་པའི་སྡུག་བསྔལ་གྱིས། གཟིར་བ་འཕྲེང་བ་མཁན་ལ་ཞུས།། 96

དེ་ནས་བློ་བཟང་བསོད་ནམས་མཐུས། འདམ་སྐྱེས་མེད་པའི་རྫིང་བུ་ནི།
འགའ་ཞིག་ཏུ་ཡང་དེ་དུས་ནས། པདྨ་དག་ནི་འཁྲུངས་པར་གྱུར།། 97

དེ་དག་རྒྱལ་པོའི་འཇིགས་པ་ཡིས། སྤྲས་ནས་སྲིད་པས་འཕྲེང་མཁན་གྱིས།
དེ་ལ་བྱིན་ཅིང་དེ་ཡིས་ཀྱང་། བུམ་ཆུའི་ནང་བཅུག་མགྱོགས་པར་སོང་།། 98

བློ་གྲོས་བཟང་པོ་རང་མཆོད་སྐད། མེ་ཏོག་དོན་གཉེར་ཡོངས་འཁྱམས་པས།
པདྨ་རྒྱས་པའི་བཞིན་རས་ཅན། མཛེས་མ་དག་ནི་ལམ་དུ་མཐོང་།། 99

स तेन पृष्टः प्रोवाच त्वत्स्वप्नानां फलोदयम् ।
जिनो जानाति भगवान् द्वीपवत्यां पुरि स्थितः ॥ ९२ ॥

तच्छ्रुत्वा सुमति स्तूर्णं स्वप्नव्याकरणोत्सुकः ।
सहैव मतिना भ्रात्रा ययौ द्वीपवतीं पुरीम् ॥ ९३ ॥

तस्मिन्नवसरे राज्ञा द्वीपेन विपुलोत्सवे ।
सा प्रवेश्ये भगवतः पुरी रत्नाम्बरै र्वृता ॥ ९४ ॥

यत्पूजापुष्पसम्भारे सम्भृते तत्र भूभुजा ।
क्रयविक्रयवीथीषु नैवादृश्यत पुष्पकम् ॥ ९५ ॥

ततः सा सुन्दरी कन्या पुष्पं दुर्लभतां गतम् ।
पूजाविच्छेददुःखार्त्ता मालाकार मवोचत ॥ ९६ ॥

ततः सुमतिपुण्यानां प्रभावादप्यपङ्कजे ।
ह्रदे बभूव कस्मिंश्चित् तत्कालकमलोद्भवः ॥ ९७ ॥

तानि राजभयात्तस्यै लुब्धः प्रच्छाद्य मालिकः ।
ददौ साप्यम्बुकुम्भान्त र्निक्षिप्य त्वरितं ययौ ॥ ९८ ॥

सुमति र्जिनपूजायै कुसुमार्थी परिभ्रमन् ।
तां फुल्लपद्मबहुलां ददर्श पथि सुन्दरीम् ॥ ९९ ॥

དེ་ནས་དེ་ཡི་བསོད་ནམས་མཐུས། སྡིག་དང་བཅས་པ་དག་གིས་བཞིན།
ཐུམ་པའི་ནང་ན་རབ་བསྒྲིབས་པའི། པདྨོ་རྣམས་ཀྱིས་བཞིན་དག་བསྟན།། 100

མི་དགེ་དོན་དུ་གཅེར་བ་དེས། གསེར་གྱིས་དེ་ལ་བསླངས་པ་ན།
སྲིད་ལྡན་མ་ཡིས་ཡོངས་ཤེས་ནས། འཛུམ་བཅས་དེ་ལ་རབ་སྨྲས་པ།། 101

ཁྱོད་ཀྱིས་བདག་ནི་སྟོན་བཏང་ནས། ད་ལྟ་མི་དགེ་སྐྱོང་བར་བྱེད།
དམ་པ་ཚངས་སྤྱོད་བུ་མོ་ལ། ཕེབས་པར་སྨྲ་བའི་རིགས་མ་ཡིན།། 102

ཁྱོད་ལ་མི་དགེ་རབ་བྱིན་པས། སྐྱེ་བ་གཞན་དུ་ཆུང་མར་བདག།
གྱུར་ཅིག་ཅེས་པའི་སྨོན་ལ་གྱིས། འདི་དག་སྔར་གྱི་གཞན་དུ་མིན།། 103

དེ་ལྟར་གྱུར་ཅེས་དེ་བརྗོད་ཚེ། པདྨ་ལྷ་ནི་དེ་ལ་བྱིན།
རང་ཡང་མཆོད་ཕྱིར་དེ་ཡིས་ནི། པདྨོ་གཉིས་དག་རབ་ཏུ་བཟུང་།། 104

དེ་ནས་ས་བདག་མར་མེ་དང་། ས་བདག་ནོར་ལྷའི་བུ་དག་ཀྱང་།
བཅོམ་ལྡན་ལེགས་པར་བྱིན་པ་ཅན། གུས་པས་མངོན་དུ་འོངས་པར་གྱུར།། 105

དེ་ནས་མར་མེས་དེ་ཡི་གདུགས། རིན་ཆེན་ཕྲུར་མས་མཚན་པ་བཟུང་།
ནོར་འཛིན་བདག་པོ་ནོར་ལྷའི་བུས། ཟླ་བ་ལྟར་དཀར་ཟ་ཡབ་བོ།། 106

ལྷ་དང་གྲུབ་པ་དྲང་སྲོང་དང་། དྲི་ཟ་མཆོད་དང་གྲོང་ཁྱེར་དུ།
རབ་ཏུ་བཞུགས་ཚེ་སེམས་ཅན་ཀུན། ཀུན་ཏུ་བདེ་བའི་དགའ་སྟོན་རྒྱས།། 107

पुण्यानुभावात्तस्यैव कुम्भाभ्यन्तरसंहृतैः ।
सञ्जीवितैरिव सुखं दर्शितं कमलैस्ततः ॥ १०० ॥

प्रार्थ्यमाना हिरण्येन सा तेन कमलार्थिना ।
साभिलाषा परिज्ञाय सस्मिता तमभाषत ॥ १०१ ॥

त्यक्ताहं भवता पूर्व्वं कुसुमान्यद्य याचसे ।
कन्यासम्भाषणं साधो न युक्तं ब्रह्मचारिणः ॥ १०२ ॥

तव पुष्पप्रदानेन भार्य्या स्यामन्यजन्मसु ।
इत्येवं प्रणिधानेन ददाम्येतानि नान्यथा ॥ १०३ ॥

एवमस्त्विति तेनोक्ते पञ्च पर्व्वाणि सा ददौ ।
तस्मै स्वयञ्च पूजायै जग्राह कमलद्वयम् ॥ १०४ ॥

अथ दीपक्षितिपति र्वासवश्च महीपतिः ।
भगवन्तं समायान्तं भक्त्या प्रत्यभिजग्मतुः ॥ १०५ ॥

तस्य रत्नशलाकाङ्कं दीप्तं छत्त्र मथाग्रहीत् ।
चामरं चन्द्रधवलं वासवो वसुधाधिपः ॥ १०६ ॥

सुरसिद्धर्षिगन्धर्व्वैः पूज्यमानस्य सर्व्वतः ।
पुरप्रवेशे तस्यासीत् सर्व्वसत्त्वसुखोत्सवः ॥ १०७ ॥

སྐྱེ་བོའི་ཚོགས་ནི་སྡུག་པོ་ལ། རྒྱལ་བ་ལྟ་བར་འདོད་པ་ཡིས།
བློ་གྲོས་བཟང་གི་དེ་མཐུ་ལས། ཛེ་ཞིག་ལྷུར་ལྡུས་ལམ་ཐོབ་གྱུར།། 108

སྟོན་པའི་ཞབས་ལ་པདྨ་དག། རབ་དུ་འཕངས་ནས་ཐལ་སྦྱར་ཏེ།
ཀུན་དགའ་ཅན་དེས་རལ་པའི་ཁུར། ས་ལ་བཀྲམ་ནས་དེར་ཕྱག་འཚལ།། 109

དེ་ཡི་མདུན་ན་འཕངས་པ་ཡི། ལེགས་བྱས་བཞིན་དུ་པདྨོ་རྣམས།
དེ་མདུན་ཞལ་གྱི་ཟླ་བའི་མཐར། མཆོད་པ་ཡང་དག་རྒྱུ་བ་ཐོབ།། 110

བཅོམ་ལྡན་མདུན་དུ་དད་པ་ཡི། མཛེས་མས་གྲུས་པས་རབ་གཏོར་བའི།
པདྨོ་རྒྱུས་པ་བཟང་དག་ནི། སྙན་གྱི་རྒྱན་ཉིད་དག་དུ་གྱུར།། 111

བློ་བཟང་རབ་དུ་བདུད་པ་ཡི། རལ་པའི་ཚོགས་ནི་བདེ་ག་ཤེགས་ཀྱི།
ཞབས་ཀྱིས་མནན་པས་སློང་གྱུར་ཅིང་། དེ་བཞིན་གཞན་ནི་རབ་དུ་འཕྲུངས།། 112

དེ་ནི་བུ་བ་བྲུས་གྱུར་ཅིང་། མཁའ་ལ་འགྲོ་བ་ཐོབ་པ་ནི།
འཇིག་རྟེན་ཐམས་ཅད་ཉན་པ་ལ། བཅོམ་ལྡན་རྒྱུས་པས་བཀའ་སྩལ་བ།། 113

བླ་མེད་ཡང་དག་རྫོགས་པ་ཡི། བྱང་ཆུབ་ཐོབ་ནས་བློ་བཟང་ཁྲིད།
འཇིག་རྟེན་དུ་ནི་དེ་བཞིན་ག་ཤེགས། ཤཱ་ཀྱ་ཐུབ་ཅེས་བྱ་བར་འགྱུར།། 114

ཞེས་པ་རྒྱལ་བས་རབ་གསུངས་ཤིང་། མཁའ་ལ་མེ་ཏོག་ཆར་ལྷུང་ཚེ།
མཆོད་རྟེན་རབ་དུ་གནས་པའི་སྐད། སློན་མོ་ཀུན་གྱིས་རལ་པ་བླངས།། 115

निविड़े जनसंपाते जिनसन्दर्शनोत्सुकः ।
सुमति स्तत्प्रभावेण कथञ्चिन्मार्ग मात्तवान् ॥ १०८ ॥

क्षिप्त्वा शास्तु श्चरणयोः कमलानि कृताञ्जलिः ।
स तं ववन्दे सानन्दः क्षितौ कीर्णजटाभरः ॥ १०९ ॥

तस्य पद्मानि वैपुल्यं सुकृतानीव तत्क्षणात् ।
अवाप्य चक्रुश्चक्राभां सर्व्वां सञ्चारिणीं पुरः ॥ ११० ॥

सुन्दर्य्या सादरोत्सृष्टं भक्त्या भगवतोऽग्रतः ।
फुल्लारविन्दयुगलं ययौ कर्णावतंसताम् ॥ १११ ॥

जटाकटप्रः सुमतेः सुगतेन प्रणामिनः ।
व्यशीर्य्यत पदाक्रान्तः प्रादुरासीत्तथा परः ॥ ११२ ॥

लब्धाकाशगतौ तस्मिन् प्रयाते कृतकृत्यताम् ।
शृण्वतः सर्व्वलोकस्य बभाषे भगवान् जिनः ॥ ११३ ॥

सम्यक्सम्बोधि मासाद्य सुमते त्व मनुत्तराम् ।
लोके शाक्यमुनि र्नाम भविष्यसि तथागतः ॥ ११४ ॥

उदीरिते जिनेनेति पुष्पवर्षे दिवश्च्युते ।
जटां स्तूपप्रतिष्ठायै जगृहुः सर्व्वमन्त्रिणः ॥ ११५ ॥

སཱ་ལ་མཆེད་ཀྱི་རོལ་པ་ནི། བཅོམ་ལྡན་ཞབས་ཀྱིས་མནན་མཐོང་ནས།
ཉན་པ་ཉིད་དུ་མངོན་ཁེངས་པས། བློ་གྲོས་ཁྲོ་བས་འཁྲུགས་པར་གྱུར།། 116

དེ་ཡི་རྣམ་འགྱུར་སྨོངས་པ་ལས། སྐྱེས་པ་བློ་གྲོས་བཟང་པོས་བཟློག།
དེ་ཉིད་དང་ནི་ལྷན་ཅིག་ཏུ། སྟོན་པའི་མདུན་དུ་རབ་བྱུང་བླངས།། 117

དེ་ནས་དུས་ཀྱི་ལུས་ཀྱི་མཐར། བློ་གྲོས་བཟང་གིས་ལྷ་ཡི་གནས།
དགའ་ལྡན་ཞེས་པ་ཐོབ་གྱུར་དེ། བློ་གྲོས་དག་ནི་སྐྱུལ་བར་སོང་།། 118

ད་ལྟ་བློ་བཟང་དེ་ཉིད་ང་། བློ་གྲོས་བློ་གྲོས་རྣམ་བསྣད་པས།
ཉམས་པར་གྱུར་པ་ཆོས་སྤྱོད་འདི། མཛེས་མ་དེ་ནི་གྲགས་འཛིན་མའོ།། 119

གསུམ་པའི་བསྐལ་པར་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་འཁོར་བ་
འཇིག།
བླ་ན་མེད་པའི་ཡེ་ཤེས་གཏེར། འཛམ་བུའི་གླིང་དུ་སྟོན་བྱུང་གྱུར།། 120

དེ་ཡི་དུས་ན་འཕགས་རྒྱལ་དུ། ཚོང་པ་ཙནྡན་བྱིན་ཞེས་པ།
ནོར་ཆེན་ཉོ་ཚོང་དག་གིས་ནི། རབ་ཏུ་གྲགས་པ་བྱུང་བར་གྱུར།། 121

དེ་ཡི་ཆུང་མ་འདོད་པའི་སྟོབས། ཞེས་ལ་ཀྱིས་བྱེད་ལྷུར་མཛེས་བུ།
རྣས་བྱིན་ཞེས་ནི་བྲ་བ་དག། ལུས་བཞིན་དུ་ནི་དགའ་བ་བྱུང་།། 122

ཁྲིམ་ལུགས་ཆུང་མ་ལ་བཀོད་ནས། ནོར་དོན་གཉེར་དེ་རྒྱ་མཚོར་སོང་།
ལན་ཚྭ་ཡིས་བཞིན་ནོར་ཅན་རྣམས། ནོར་དག་གིས་ནི་སྤྱོད་པ་འཕེལ།། 123

भगवच्चरणाक्रान्ता भ्रातु र्दृष्ट्वा जटाः क्षितौ ।
औचित्यत्वाभिमानेन मतिः कोपाकुलोऽभवत् ॥ ११६ ॥

निवार्य्य सुमति स्तस्य विकारं मोहसम्भवम् ।
तेनैव सहितः शास्तुः प्रव्रज्या मग्रहीत् पुरः ॥ ११७ ॥

ततः कालेन सुमति र्देहान्ते तुषिताभिधम् ।
अवाप देवनिलयं मतिश्च नरकं ययौ ॥ ११८ ॥

सोऽहं सुमतिरेवाद्य मतिश्च मतिविक्लवात् ।
अयं धर्म्मरुचिः क्लिष्टः सुन्दरी सा यशोधरा ॥ ११९ ॥

तृतीये भगवान् कल्पे ककुच्छन्द स्तथागतः ।
अनुत्तरज्ञाननिधि र्जम्बुद्वीपे पुराभवत् ॥ १२० ॥

बभूव समये तस्मिनुज्जयिन्यां महाधनः ।
वणिक् चन्दनदत्ताख्यः प्रख्यातक्रयविक्रयः ॥ १२१ ॥

तस्य कामबलाख्यायां जायायां मदनद्युतिः ।
अश्वदत्ताभिधानो ऽभूत् पुत्रः काय इव प्रियः ॥ १२२ ॥

अर्थार्थी स जगामाब्धिं पत्नीन्यस्तगृहस्थितिः ।
धनेन धनिनां तृष्णा लवणेनेव वर्द्धते ॥ १२३ ॥

དེ་ཡི་ཆུང་མ་ཁྲོ་སོང་ཚེ། །ཡང་ཆོས་སྲུས་ཤིང་རྨོངས་པ་ཡིས།
ཁྲིམས་ཀྱི་བསམ་པ་ཡོངས་བཏང་ནས། །འདོད་པའི་བསམ་གཏན་ལ་ཆགས་གྱུར། ། 124

དེ་ཡིས་ནོར་གྱི་ལས་ལ་ནི། །གཞོན་ནུ་དུས་ཕྲིན་རྣམ་བཀོད་ནས།
རྟག་ཏུ་ཁང་བཟང་ཟ་གས་དུ། །གནས་དེ་རྒྱལ་པོའི་ལམ་ལ་བལྟས། ། 125

གཡོག་འཁོར་མང་པོའི་ཁྲིམས་དུ་ནི། །རང་དབང་གནས་སྐབས་བྲལ་བ་དེས།
ཤུགས་རིངས་ཕྱུང་ནས་མ་མ་ནི། །ཚོན་མོ་དག་ལ་མཚོན་ཕྱོགས་སྨྲས། ། 126

ཁྲིམས་ནི་འབྱོར་ཞིང་ལོངས་སྤྱོད་མང་། །སྐྱེ་བོ་བཀའ་ལས་ཉན་པ་འདིར།
རང་དབང་སྤྱོད་པས་དམན་པ་ཡི། །མ་མ་བདག་ལ་དགའ་བ་མེད། ། 127

སྐྱེས་པའི་ལོངས་སྤྱོད་མེད་པ་ན། །བུད་མེད་དགའ་བ་བསྟེན་པ་ནི།
དབང་གིས་མ་ཡིན་བཀུར་སྟི་མིན། །རྒྱན་གྱིས་མ་ཡིན་ཟས་ཀྱིས་མིན། ། 128

དེ་སྐད་ཁྲིམས་ནི་ཡོངས་བཏང་ནས། །བདག་ནི་འདུན་པས་རྒྱུ་ཞིང་འགྲོ།
གཞོན་སྐྱེས་བུ་ནི་འདི་ལ་ཡང་། །བདག་ནི་ཆགས་པའི་དབང་མ་གྱུར། ། 129

རིགས་ཀྱི་འཇིག་རྟོགས་ཀྱིས་བཅིངས་ཤིང་། །གཉེན་གྱི་འཆིང་བས་བསྡམས་པ་དག།
བུད་མེད་དགའ་བའི་ངང་ཚུལ་ཅན། །གཡོ་ལྡན་དག་གིས་བཟོད་མ་ཡིན། ། 130

ཞེས་སྨྲ་དེ་ལ་མ་མ་ནི། །ཤིན་ཏུ་མཛའ་བས་འཁྲུགས་པས་སྨྲས།
མཉེས་ག་ཤིན་ཤིན་ཏུ་ཡངས་པའི་དཔལ། །བཏང་ནས་འགྲོ་བ་རིགས་མ་ཡིན། ། 131

तत्पत्नी प्रोषिते पत्यौ यौवनोन्मादमोहिता ।
गृहचिन्ताः परित्यज्य काममध्यानपराभवत् ॥ १२४ ॥

कुमार मश्वदत्तं सा निधाय धनकर्म्मणि ।
सदा प्रासादशृङ्गस्था राजमार्गं व्यलोकयत् ॥ १२५ ॥

स्वैरावकाशरहिता बहुभृत्यजने गृहे ।
वृद्धधात्रीः समभ्येत्य दीर्घोच्छ्वासाज्जगाद सा ॥ १२६ ॥

विभवे बहुभोगेऽस्मिन्नात्माधीनजने गृहे ।
स्वैरसञ्चारहीनाया मातः सत्यं न मे रतिः ॥ १२७ ॥

नाधिकारै र्न सत्कारै र्नालङ्कारै र्न भोजनैः ।
विना पुरुषसम्भोगं भजन्ते ललनाः सुखम् ॥ १२८ ॥

तस्माद् गृहं परित्यज्य गच्छामि च्छन्दचारिणी ।
बाल्ये जातः सुतोऽप्येष न स्नेहायतनं मम ॥ १२९ ॥

कुलकूलद्वयाबद्धा बन्धुबन्धनयन्त्रणाम् ।
न सहन्ते तरङ्गिण्यो रतिशीलाहि योषितः ॥ १३० ॥

इति ब्रुवाणां तामूचे धात्री वात्सल्यविक्लवा ।
वत्से न गमनं युक्तं त्यक्त्वा सुविपुलां श्रियम् ॥ १३१ ॥

བྲུ་བ་མང་པོས་ཁྲིམ་འདིར་ནི། སྨྲས་པས་སྤྱོད་པ་མི་སྨྲར་དེ།
གསང་བའི་སྤྱོད་པ་སྐད་ཅིག་གིས། རྒྱལ་པོ་ཡི་ནི་ལམ་དུ་རྒྱུ།། 132

ལང་ཚོ་ཚ་བས་རབ་གདུངས་པ། ཁྱོད་ཀྱིས་སྤྱོད་པ་ཇི་ལྟར་བསྲུང་།
ཁྲིམ་གྱི་གཏེར་ཡང་རྐང་པ་ཡིས། རབ་སྤངས་ཁྱོད་ཀྱིས་ཇི་ལྟར་འགྲོ།། 133

འདི་ནས་འདོད་པའི་དུག་འབེབས་ཤིང་། འདི་ནས་སྐད་ཅིག་གཡང་ལ་ལྷུང་།
གཉིས་ཀ་ཐེ་ཚོམ་འདི་ལ་ནི། ཁྱོད་ཀྱིས་ཅི་བྱ་ཡོངས་མི་ཤེས།། 134

གཡོ་ཞིང་དགེ་མཚན་ལྡན་པ་རྣམས། ཇི་སྲིད་གོས་ནི་མ་དོར་བར།
དེ་སྲིད་སྲོག་གི་ཟོང་གིས་ཀྱང་། གཞན་གྱི་བུད་མེད་དོན་དུ་གཉེར།། 135

འོག་པག་གོས་ནས་བྲངས་པ་ན། མ་མ་མ་ཞེས་འདར་བྱེད་ཅིང་།
བདག་འགྲོ་ཐོངས་ཤིག་ཐོངས་ཤིག་ཅེས། སྨྲ་སྒྲོགས་དེ་ནི་སུ་ཞིག་འདོད།། 136

རྣམ་པ་ཀུན་དུ་བྲུ་བ་བྲུས། སྐྱེ་བོས་གོས་མེད་མཐོང་ནས་ནི།
ལག་པའི་གཟེབ་ཀྱིས་བསྒམས་པ་ཡིས། ནེ་ཙོ་རྒྱལ་བཞིན་འབྲོས་པར་བྱེད།། 137

སྨུན་པར་དགའ་བའི་ཆོམ་རྐུན་དང་། སྐད་ཅིག་ཁྱེད་ནི་བདེ་བར་འགྲོགས།
ཕྱིན་ནས་སྣང་བ་རབ་སྤངས་པའི། འཇིག་རྟེན་ཕ་རོལ་དག་ཏུ་འགྲོགས།། 138

བཞིན་སྣང་ངོ་ཚའི་སྡུག་བསྔལ་ཅན། འབྲས་མེད་ཉམས་ཤིང་དམན་པ་དེ།
ཚུལ་ཁྲིམས་རིན་ཅན་ལམ་ངན་དུ། སྟོར་བར་གྱུར་པ་འཚོལ་བ་བཞིན།། 139

बहुकृत्ये गृहे त्वस्मिन् गुप्तचर्य्या नियुज्यते ।
क्षणेन स्वैरचरितं राजमार्गेषु धावति ॥ १३२ ॥

कथं रक्षसि चारित्रं सन्तप्ता यौवनोष्मणा ।
कथं गृहनिधानञ्च पादेनोत्सार्य्य गच्छसि ॥ १३३ ॥

इतः कामविषावेशः श्वभ्रपातः क्षणादितः ।
अस्मिन्नुभयसन्देहे न जाने किं करिष्यसि ॥ १३४ ॥

तावत् प्राणपणेनापि चपलाः सकुतूहलाः ।
परस्त्रियं प्रार्थयन्ति न यावद्धस्त मुञ्चति ॥ १३५ ॥

न न नेति समुत्कम्पिरसनांशुककर्षणे ।
गच्छामि मुञ्च मुञ्चेति क्वणन्ती कस्य नेप्सिता ॥ १३६ ॥

दृष्ट्वा विवसनां दृत्तकर्त्तव्यः सर्व्वथा जनः ।
भुजपञ्जरनिर्मुक्तः शुकवृत्त्या पलायते ॥ १३७ ॥

तिमिरे रतिचौरेण क्षणार्द्धसुखसङ्गमः ।
पुनः प्रविरतालोके परलोकसमागमः ॥ १३८ ॥

सा नष्टा निष्फलाकृष्टा लज्जाकष्टादधोमुखी ।
कुमार्गे हारितं यान्ती शीलरत्नमिवेक्ष्यते ॥ १३९ ॥

ཏྲི་མེད་ཚུལ་ཁྲིམས་དེ་ཞལ་འདོད་པའི་ངལ་དུབ་ཀྱིས་ཆད་ཅིང་།
སྒྲ་དིག་འབྲས་བུ་ས་གཞི་ཡོངས་སུ་ཁེངས་པར་བྱེད་པ་བཞིན།
མི་དམན་ཆགས་བྲལ་དུ་བཏགས་མཆི་མའི་ཐིགས་པ་རགས་པ་ཡིས།
ཉེས་སྤྱོད་སྐད་པ་རབ་ཏུ་སྤྲོས་པ་དེ་ཉི་ཚ་བར་བྱེད།། 140

བྱིས་པའི་འཛུམ་བུ་བསིལ་ཟེར་ཅན་ལྟར་མཛེས་པ་ལ་ཡང་རབ་
ཏུ་སེམས་བྱེད་ཅིང་།
པདྨ་སྟོན་ལྟར་ལུས་ནི་མཆོག་ཏུ་ཟུམ་ཞིང་འཕྲལ་ལ་རབ་ཏུ་ཉམས་གྱུར་ཏེ།
ཁྲིམ་གྱི་ནང་དུ་ཕན་ཚུན་གདམས་རྣམས་ཕྱིར་ནི་རང་གི་གདམས་དུ་ཐོས་གྱུར་པ།
འཕྱོན་མ་རྣམས་ཀྱི་ཡིད་ནི་རྩ་ཡི་འདབ་མ་བསྐྱོད་པ་ལས་དོགས་པར་གྱུར།། 141

གཟུགས་ཀྱི་རྡེགས་པས་གཞོན་ནུ་མས། ཁྱོ་ཡི་ཁྲིམ་ལས་ཕྱི་རོལ་འཐོན།
ཡོངས་རྟོག་རྣམས་ཀྱི་བསོད་ནམས་ཀྱིས། གནས་ལ་ཡོངས་བརྟགས་ཕྱི་
ནས་དོར།། 142

དེ་སྐད་ཁྲིམ་ན་གནས་པ་ཁྱོད། ཇི་ལྟར་སྐྲིས་བུ་དང་འགྲོགས་ཤིང་།
འཇིག་རྟེན་དག་གིས་མི་ཤེས་པ། དེ་ལྟར་རིགས་པ་བདག་གིས་བརྗོད།། 143

ཁྱོད་ཀྱི་གཞོན་ནུ་རྡས་བྱིན་འདི། ཅུང་ཟད་ཡང་ཚོ་དགག་ལ་ཉེ།
སྐྲུ་བོས་དོགས་བྲ་མིན་པའི་སྐད། མཆོག་ཏུ་བདེ་བ་ཡོངས་སྤྱོད་འོས།། 144

རྣམ་པ་འདི་ལྟའི་བཞིན་བཟང་མ། མཛེས་སྡུག་ཅན་ནི་ག་ལ་རྙེད།
གལ་ཏེ་རི་ཞིག་རབ་བསྒྲུབས་ན། འདི་ནི་གནོད་མེད་རྣམ་པ་སེན།། 145

सा रोदिति प्रसृतदुश्चरितापवादा
स्थूलास्रविन्दुभि रमन्दविषादकन्दैः ।
कामश्रमत्रुटितनिर्म्मलशीलहार-
मुक्ताफलैरिव धरां परिपूरयन्ती ॥ १४० ॥

बालस्यापि तुषाररश्मिरुचिरं संचिन्तयन्त्याः स्मितं
म्लायन्त्याः सहसा निमीलिततनोः पद्माननायाः परम् ।
गेहान्तः स्वकथां मिथः कथयता माकर्णयन्त्या वहिः
स्वैरिण्या स्तृणपल्लवेऽपि ललिते साशङ्कशङ्कं मनः ॥ १४१ ॥

रूपदर्पेण निर्यान्ति तरुण्यः पतिवेश्मनः ।
पश्चात् परीक्ष्य त्यज्यन्ते पुण्यस्थाने परीक्षकैः ॥ १४२ ॥

तस्माद् गृहस्थिताया स्ते यथा पुरुषसङ्गमः ।
लोके भवत्यविदित स्तथा युक्तिं वदाम्यहम् ॥ १४३ ॥

अश्वदत्तः कुमारोऽसौ किञ्चिदासन्नयौवनः ।
जनस्याशङ्कनीयत्वात् सुखभोग्यः परन्तव ॥ १४४ ॥

एवं विदग्धः सुमुखः कान्तिमान् प्राप्यते कुतः ।
निरपायः प्रकारोऽयं यदि तावत् प्रवर्त्तते ॥ १४५ ॥

ཞེས་པ་མ་མའི་ཚིག་ཐོས་ནས། དེ་ཡིས་ཀྱང་ནི་རིགས་པར་བསམས།
ཆགས་པ་དྲག་པོ་འི་རྣམ་པ་ཡིས། ལོང་བས་ཐེག་ལྷུང་མཐོང་མ་ཡིན།། 146

དེ་ནས་མ་མས་དཔལ་བྲུ་ཡིས། བུད་མེད་ལོངས་སྤྱོད་བདེ་བསྡུགས་པ།
བསྒྲུབས་ཤིང་བསྒྲུབས་ནས་གཞོན་ནུའི་ཡིད། ཡུལ་ལ་མངོན་པར་ཕྱོགས་
པར་བྱས།། 147

རྟག་དུ་འདོད་པ་རབ་སྤྲོས་ནས། དེ་ལ་དེ་ཡིས་རབ་སྨྲས་པ།
བུ་ཁྱོད་ལ་འོས་འགའ་ཞིག་ནི། བདག་པོ་ཡུལ་གཞན་སོང་བ་ཡོད།། 148

ཁང་སྟོང་སྐྲོན་མ་མེད་པར་ནི། མཚན་མོ་མི་སྣ་ལ་བརྟེན་ཏེ།
ཤིན་ཏུ་ངོ་མཚར་ལྡན་མ་དེ། ཁྱོད་དང་ཡང་དག་འགྲོགས་པར་འདོད།། 149

ཅེས་པ་དེ་ཡི་ཚིག་ཐོས་ནས། མངོན་པར་འདོད་ལྡན་ཆེང་པའི་བུས།
རྟག་ཏུ་སྨྲས་པའི་ཁྲིམ་དུ་ནི། མ་དང་དགའ་མགུར་འགྲོགས་པ་བསྟེན།། 150

རྟག་ཏུ་རབ་བསྐྲིབས་ཁྲིམ་དུ་ནི། དགའ་མགུར་སྤྱོད་པ་སྟེན་བྱེད་པ།
དེ་ལ་ཆགས་པའི་མེ་དག་ནི། རབ་དུ་འཕེལ་ཞིང་ཞི་མ་གྱུར།། 151

དེ་ཡི་བསམས་པ་རྟག་དུ་ནི། རབ་དུ་བསྐྲིབས་པའི་སྡུག་བསྔལ་འདི།
མི་བཟོད་གཟུགས་ཀྱི་ལོངས་སྤྱོད་ལ། སྣང་བ་ཉིད་ནི་འཆོ་བ་ལོ།། 152

པན་ཚུན་བཞིན་གྱི་ཆུ་སྐྱེས་ལ། རྣམ་པར་ལྟ་བའི་རོ་བྲལ་བའི།
འོ་ཡི་དགའ་མགུར་སྤྱོད་པ་ལ། བདེ་བའི་དགའ་སྟོན་འགའ་ཡོད་མིན།། 153

इति धात्रीवचः श्रुत्वा सापि युक्त ममन्यत ।
तीव्ररागप्रकारान्धः पापपातं न पश्यति ॥ १४६ ॥

धात्री ततः कुमारस्य सम्भोगसुखवर्णनाम् ।
स्वैरं विधाय विदधे विषयाभिमुखं मनः ॥ १४७ ॥

त मवोचत साशङ्कं कृत्वा कामप्रतारणाम् ।
अस्ति वत्स त्वदुचिता काचित् प्रोषितभर्त्तृका ॥ १४८ ॥

शून्ये वेश्मनि निर्दीपे रात्रौ मौनावलम्बिनी ।
लज्जावती सा सुतरां त्वया सङ्गम मिच्छति ॥ १४९ ॥

इति तस्या वचः श्रुत्वा साभिलाषो वणिक्सुतः ।
सदा गुप्तगृहे भेजे जनन्या रतिसङ्गमम् ॥ १५० ॥

सततं सेवमानायाः प्रच्छन्नभवने रतिम् ।
वर्द्धमानः परं तस्या रागाग्नि र्न शमं ययौ ॥ १५१ ॥

साचिन्तयदिमां नित्यं प्रच्छादनकदर्थनाम् ।
न सहे रूपभोगस्य प्रकाशः किल जीवितम् ॥ १५२ ॥

अन्योन्यवदनाम्भोजविलोकनरसं विना ।
न चुम्बने न सुरते कश्चिदस्ति सुखोत्सवः ॥ १५३ ॥

དེ་བསྒྲིབས་པ་ཡི་ཉོན་མོངས་ནི། རབ་ཏུ་འབད་པས་བཅོམ་བྱས་ཏེ།
འཕྲུལ་ལ་ལོངས་སྤྱོད་གཞོན་ནུ་མ། གསལ་བར་བདག་གིས་བསྟན་པར་བྱ།། 154

ཞེས་པ་མཚན་མོ་རབ་བསམས་ཏེ། རབ་གསལ་ལུས་དེར་གོས་དག་ནི།
ཡོངས་སུ་རྫེ་བའི་རིག་བ་ཡི། ནང་པར་དེ་ལ་རབ་གསལ་གྱུར།། 155

དེ་ཡིས་རང་གིས་མ་མཐོང་ནས། རྩ་བ་བཅད་པའི་ལྡོན་པ་བཞིན།
སྡིག་པའི་དུག་ནི་འབེབས་པ་ཡི། རབང་དང་བྲལ་བར་བྱས་ཏེ་ལྷུང་།། 156

དེ་ཡིས་བསིལ་བའི་ཆུས་བྲན་ཏེ། དལ་གྱིས་འདུ་ཤེས་ཐོབ་པ་དེས།
གྲུ་ཆེ་གཡང་སར་འཁྲུམ་པ་ལ། སྡུག་བསྔལ་གྱུར་བཞིན་སྨྲེ་སྔགས་ཕྱུང་།། 157

དཀྱུལ་བར་ལྷུང་བའི་ཟོ་ཀ་མོ། འདོད་པས་རྨོངས་མ་དེ་ཡིས་ནི།
སྨིན་མའི་འཁྲི་ཤིང་གཟེངས་བསྟོད་ཅིང་། ལག་པས་ཡོངས་འཁྲུད་དེ་ལ་སྨྲས།།
158

ཁྱོད་ཀྱི་སྤྱ་ངན་བཟོད་དཀའ་འདི། གནས་མིན་རྫུན་པ་དག་ལ་ཅི།
བྲུད་མེད་ཆོས་ཀྱིས་བསྒམས་པ་རྣམས། མི་བདེན་ཁྱོད་ཀྱིས་མི་ཤེས་སམ།། 159

ཁྱོད་ཀྱི་སྡུག་བསྔལ་ཡོངས་མ་སྐྱེད། སྨུ་ཡི་ཡང་ནི་ནོར་མ་སྒྲིགས།
ཕྲུན་མོངས་བདེ་བའི་ལོངས་སྤྱོད་འདྲིས། ཁྱོད་ལ་སྡིག་པའི་བག་ཆགས་ཅི།། 160

གསོ་ལྡན་བསམས་པ་མེད་པ་ཡི། ཆུ་སྐྱུང་བྲུད་མེད་ཕྲུན་མོང་ཉིད།
གང་ལ་པ་ཡིས་ཁྲུས་བྱས་ཏེ། བུ་ནི་ཁྲུས་བྱེད་མིན་ནམ་ཅི།། 161

तस्मात् प्रच्छादनायासं कुमारस्य प्रयत्नतः ।
भंक्त्वा प्रसभसंभोगे प्रदिशामि प्रगल्भताम् ॥ १५४ ॥

इति सञ्चिन्त्य सा रात्रौ प्रभाते व्यक्तविग्रहा ।
ययौ वस्त्रपरावृत्तियुक्त्या तस्य प्रकाशताम् ॥ १५५ ॥

स निजां जननीं दृष्ट्वा च्छिन्नमूल इव द्रुमः ।
पपात पातकविषावेशेन विवशीकृतः ॥ १५६ ॥

तया शीताम्बुना सिक्तः शनैः संज्ञा मवाप्य सः ।
विललाप पृथुश्वभ्रे विभ्रष्टइव दुःखितः ॥ १५७ ॥

त मुवाच परिष्वज्य भुजाभ्यां काममोहिता ।
भ्रूलतां सा समुन्नाम्य नरकापातदूतिकाम् ॥ १५८ ॥

मिथ्या किमय मस्थाने विषाद स्तव दुःसहः ।
किं न जानासि नारीणा मसत्यधर्म्मयन्त्रणाम् ॥ १५९ ॥

न त्वयोत्पादितं दुःखं हृतं वा कस्यचिद्धनम् ।
साधारसुखभोगेऽस्मिन् केयं ते पापवासना ॥ १६० ॥

सरित्साधारणा नार्य्य स्तरङ्गिण्यां निरर्गलम् ।
यस्यामेव पिता स्नाति तस्यां न स्नाति किं सुतः ॥ १६१ ॥

ལམ་གང་ནས་ནི་པ་སོང་བ། དེ་ཉིད་ནས་ནི་བུ་ཡང་འགྲོ།
བུད་མེད་བརྒྱ་ལམ་དག་དང་མཚུངས། ཕྲུན་སོང་པ་ཡིས་བགྲོད་བྱ་ཉིད།། 162

བུད་མེད་གཅིག་གིས་སྤྱད་བྱ་ཉིད། གཞན་དང་གཞན་གྱིས་འོས་མིན་པ།
འདི་ནི་འགའ་ཞིག་ཕྲག་དོག་དང་། ལྡན་པས་དམ་ཚིག་བྲུས་པ་ཙམ།། 163

དམ་པའི་དོན་དུ་དགའ་མགུའི་སྐད། བགྲོད་པར་མི་བྱ་འགའ་ཡང་མེད།
ཕ་དང་བུ་ཡི་སྤྱོད་གཅིག་བཞིན། བུད་མེད་ཉེ་བར་ལོངས་སྤྱོད་བྱ།། 164

ཞེས་ཏེ་དེ་ཡི་འབད་པ་ཡིས། ལོངས་སྤྱོད་ལ་དེ་མངོན་ཕྱོགས་བྱས།
འདོད་ཆགས་སྐྱེས་པས་དྲག་པར་ཡང་། ཕྱུགས་བཞིན་དུ་ནི་མ་ཉིད་བསྟེན།། 165

དེ་ནས་དུས་ཀྱི་ཕ་དག་ནི། ཆུ་གཏེར་ཆེ་ལས་སླར་འོངས་པ།
མ་ཡིས་བསྐུལ་བ་དེས་གསང་ནས། དུག་གིས་སྲོག་དང་བྲལ་བར་བྱས།། 166

དེ་ནས་ཆགས་པ་འཕེལ་བ་ཡི། མ་བསྣམས་བདེ་བ་འཚོལ་བ་དེས།
མཛའ་བས་རྫོངས་པའི་གཉེན་ཉུ་ལ། མཛའ་བས་དཔལ་གྱིས་རབ་སླུས་པ།། 167

མ་བསྣམས་བདེ་བ་ཐོབ་པའི་སྐད། སྙིང་པོ་འི་ནོར་དག་བླངས་བྱས་ལ།
ཚོར་མ་སྤྱངས་པའི་ཡུལ་གཞན་དུ། ཨུ་ཅག་རེ་ཞིག་འགྲོ་བར་བྱ།། 168

ཞེས་པ་དེ་ཚིག་ཕྱུན་རིང་གི། དུས་སུ་འདོར་པ་ཐོབ་གྱུར་ནས།
ནོར་གྱི་སྙིང་པོ་བླངས་བྱས་ཏེ། དེ་ནི་དེ་དང་འགྲོགས་ནས་སོང་།། 169

यथा येन पिता यात स्तेन पुत्रोऽपि गच्छति ।
सामान्यगमना एव वर्त्तनीसन्निभाः स्त्रियः ॥ १६२ ॥

एकभोग्यैव ललना न परस्पर मर्हति ।
ईर्षालुभिः कृतं कैश्चिद्देतत् समयमाचकम् ॥ १६३ ॥

नैव काचिदगम्यास्ति रत्यर्थं परमार्थतः ।
एकपात्रोपभोग्या हि पितुः पुत्रस्य च स्त्रियः ॥ १६४ ॥

इति यत्नेन स तया सम्भोगाभिमुखः कृतः ।
स जातरागः सततं सिषेवे जननीं पशुः ॥ १६५ ॥

ततः कालेन पितरं प्रत्यायातं महोदधेः ।
स गूढ़े प्रेरितो मात्रा विषेण विदधे व्यसुम् ॥ १६६ ॥

ततः सा रागरुद्धैव निरर्गलसुखैषिणी ।
स्वैरं कुमारं प्रणयादुवाच स्नेहमोहितम् ॥ १६७ ॥

सारद्रविणमादाय निर्यन्त्रणसुखाप्तये ।
एहि देशान्तरं तावद् गच्छावः कण्टकोज्झितम् ॥ १६८ ॥

इति तद्वचनं श्रुत्वा चिरकालसमीहितम् ।
सारद्रविण मादाय स ययौ सहित स्तया ॥ १६९ ॥

ཡུལ་གཞན་དག་ཏུ་གནས་བྱས་ཏེ། །སྡིག་པས་རབ་བསྒྲིབས་དེ་དག་ནི།
ཚུང་མ་ཁྱི་པོ་ཉིད་དུ་གྲགས། །མཆོག་ཏུ་བདེ་བ་ཐོབ་པར་གྱུར། ། 170

དེ་ནས་ནམ་ཞིག་ཁྱིམ་དེར་ནི། །རང་གི་ཡུལ་ཡང་མངོན་ཞེས་པས།
ཡོངས་འདྲིས་དགེ་སློང་མངོན་ཕྱོགས་ཏེ། །མཉེས་པ་ཤིན་ལས་ནི་དེ་ལ་སྨྲས། ། 171

ཁྱོད་ཀྱི་མ་ནི་དགེ་བའམ་ཅི། །སྐྱེ་བ་བདང་ལས་ཡང་ཡང་དུ།
བསེམ་པའི་དབང་དུ་གྱུར་པའི་སེམས། །འཁྱོད་གདུང་མེད་པར་གྱུར་དམ་ཅི། ། 172

ཞེས་པ་དགེ་སློང་ཚིག་ཐོས་ནས། །ཇོ་བ་ཡིས་ནི་བསྟུན་པ་བཞིན།
འདྲི་ཞེས་བདག་གིས་འཛིགས་པ་དེས། །རིགས་པ་དེ་དེ་རབ་བསམས་པ། ། 173

གྲོས་བྱེད་འཛིགས་པས་འཁྲུངས་པ་དེས། །མ་དང་ལྷན་ཅིག་བགྲོས་བྱས་ནས།
དགེ་སློང་དེ་ནི་མགྲོན་གཉེར་ཏེ། །མ་བསླམས་མཚོན་གྱིས་ཁྱིམ་དུ་བསད། ། 174

དགེ་སློང་དགྲ་བཅོམ་བསད་ལ་ཡང་། །དེ་ཡི་བདག་ཀྱང་འདར་མ་ཡིན།
གདུག་པོ་རྣམས་ནི་སྡིག་པ་ཡིས། །ཇོ་རྗེ་ལས་ལྷག་སྨྲ་བར་འགྱུར། ། 175

ངོས་མེད་གཡང་སར་ཆོས་ཀྱི་རི་རྩེ་ཡི། །སྟེང་ནས་ཁ་ནི་ཐུར་ལྟས་ལྷུང་གྱུར་ཅིང་།
འཁྲུལ་མང་བྱ་སྐྱིབས་རྒྱ་ཡིས་བསྟུན་པ་རྣམས། །ངེས་པར་རྒྱུན་མ་དག་ཏུ་
ལྷུང་བར་འགྱུར། ། 176

བུ་དང་རོལ་བར་བྱེད་མོད་ཀྱང་། །ལོངས་སྤྱོད་དག་ལ་ཆགས་པ་དེས།
མཛེས་པ་ཞེས་བྱ་ཚོང་པའི་བུ། །མཐོང་ནས་དེ་ལ་ཆགས་ལྡན་གྱུར། ། 177

देशान्तरे कृतपदौ परं प्रच्छन्नपातकौ ।
जायापतित्वं विख्याप्य तौ निर्वृति मवापतुः ॥ १७० ॥

ततः कदाचित्तन्नेहं स्वदेशप्रत्यभिज्ञया ।
भिक्षुः परिचितोऽभ्येत्य वात्सल्यात्तमभाषत ॥ १७१ ॥

कच्चित्ते कुशलं मातुः कच्चिज्जन्ममही मुहुः ।
त्यक्तां चिन्तयतश्चित्तं नायात्यनुशयव्यथाम् ॥ १७२ ॥

इति भिक्षो र्वचः श्रुत्वा शिलयेव स ताडितः ।
प्रत्यभिज्ञानचकित स्तां तां युक्ति मचिन्तयत् ॥ १७३ ॥

स मात्रा सह संमन्त्र्य मन्त्रभेदभयाकुलः ।
भिक्षुं निमन्त्र्य निर्यन्त्र स्तं शस्त्रेण गृहेऽवधीत् ॥ १७४ ॥

अर्हद्भिक्षुवधेऽप्यस्य नाकम्पत मनाङ्मनः ।
नृशंसाः पातकै र्यान्ति वज्रादपि कठोरताम् ॥ १७५ ॥

धर्माद्रिशृङ्गाग्रपरिच्युताना मधोमुखाना मतटावटेषु ।
बहुभ्रमश्वभ्रशताहतानां भवत्यलं पातपरम्परैव ॥ १७६ ॥

सुतेन रममाणापि सा सम्भोगपरायणा ।
सुन्दराख्यं वणिक्पुत्रं दृष्ट्वाभूत्तत्र सस्पृहा ॥ १७७ ॥

དགའ་མགུར་སྤྱོད་པ་ཡོངས་འདྲིས་གོམས་པས་ལོངས་སྤྱོད་དག་ནི་
མཆོག་ཏུ་འཕེལ།
ཉེར་ནི་རབ་འཕེལ་དང་བས་ཆགས་པ་སྟུག་པོ་ཅི་ཡང་སྟེན་པར་བྱེད།
ལན་ཚྭའི་ཆུ་དག་འཕྲུངས་པས་ཤིན་ཏུ་མ་ཟད་སྲིག་པར་འགྱུར།
ཆུ་ནི་རྒྱ་ཆེ་མི་ལྟེམས་ཀྱུངས་པས་རྟ་གདོང་མེ་ནི་རབ་ཏུ་འབར། 178

འདོད་ལྡན་གསར་པ་དེ་དང་ནི། ཆགས་ལྡན་མ་དེ་གསང་འགྲོགས་པ།
རྟས་བྱིན་གྱིས་མཐོང་ཁྲོས་པ་ཡིས། རལ་གྲི་དག་གིས་མ་ཉིད་བསད། 179

མཚམས་མེད་གསུམ་གྱི་སྡིག་ཁུར་གྱིས། དེ་ནི་ལྕི་བ་ཉིད་དུ་གྱུར།
སྐྱེ་བོ་ལྷ་ཡིས་བསྐུལ་རྣམས་ཀྱིས། མྱུར་དུ་གྲོང་ཁྱེར་དག་ལས་ཕྱུང་། 180

འགྲོད་པ་དྲག་པོ་སྐྱེས་པ་དེ། སོང་ནས་དགེ་སློང་ཚོགས་མང་ལ།
ཕྱག་བཙལ་ལས་ནི་རབ་བྱུང་ཞུས། གང་ཆེ་སྡིག་ཅན་ལ་མ་བྱིན། 181

དེ་ཚེ་དེ་ཡི་ཞེས་སྡང་གིས། དགེ་སློང་ཚོགས་ཉལ་མཚན་མོ་བསྲེགས།
དེ་ལ་བརྩེ་བས་བརྟན་པའི་བློ། དགེ་སློང་བྱང་ཆུབ་སེམས་དཔའ་ཆེ། 182

གཅིག་གིས་དེ་ཚེ་བསླབ་པའི་གནས། སྤངས་པའི་རབ་ཏུ་བྱུང་བ་བྱིན།
རབ་ཏུ་འབད་ཅིང་ནན་ཏན་གྱིས། བསླབ་པའི་གནས་ནི་ཞུ་བྱེད་པ། 183

དེ་ལ་དགེ་སློང་གིས་སྨྲས་ཁྱོད། བསླབ་གནས་འཛིན་པ་ཡོངས་མི་འོས།
སངས་རྒྱས་སངས་རྒྱས་ཕྱག་འཚལ་ལོ། ཞེས་པ་འདི་ཉིད་རྟག་ཏུ་བཟླས། 184

इति परिचितै र्भोगाभ्यासैः स्मरः परिवर्द्धते
किमपि भजते लोभः प्रौढिं प्रवृद्धधनोदयैः ।
लवणसलिलापानै स्तृष्णा प्रयात्यतितीव्रतां
ज्वलति विपुलज्वालोऽगाधै र्जलै र्वडवानलः ॥ १७८ ॥

तां गूढसङ्गतां तेन रागिणा नवकामिना ।
दृष्ट्वाश्वदत्तः खड्गेन जघान जननीं क्रुधा ॥ १७९ ॥

आनन्तर्य्यै स्त्रिभिः पापभारैः स गुरुतां गतः ।
निष्काशितः पुरात्तूर्णं देवताप्रेरितै र्जनैः ॥ १८० ॥

स जतानुशय स्तीव्रं गत्वा भिक्षुगणान् बहून् ।
दुःखाद् ययाचे प्रव्रज्यां निवेद्य निजदुष्कृतम् ॥ १८१ ॥

तस्मै न कश्चित्प्रव्रज्यां पतिताय ददौ यदा ।
तदा ददाह स द्वेषात् सुप्तं भिक्षुगणं निशि ॥ १८२ ॥

एकस्तु बोधिसत्त्वांशो भिक्षु स्तस्य दयार्द्रधीः ।
तदा दिदेश प्रव्रज्यां शिक्षापदविवर्जिताम् ॥ १८३ ॥

शिक्षापदानि निर्बन्धाद् याचमानं प्रयत्नतः ।
भिक्षु स्तमूचे नार्होऽसि शिक्षापदपरिग्रहे ॥ १८४ ॥

རྒྱལ་བའི་མཚན་ནི་ཐོས་ཉིད་ཀྱིས། །དུས་ཀྱི་མཐར་ནི་ཁྱོད་གྲོལ་འགྱུར། །
དེ་ནས་རྫས་བྱིན་ལུས་ཀྱི་མཐར། །འཇིགས་སུ་རུང་བའི་དམྱལ་བར་ཞུགས། ། 185

གང་མདུན་རབ་ཏུ་ཉམ་ང་བའི། །གྲང་བ་འཇིག་པའི་མི་ལྡན་པ། །
དེ་ཉིད་ཆོས་སྤྱོད་ཡུན་རིང་གི །ཡུན་རིང་ལས་ཞེས་བདག་གིས་དྲིས། ། 186

ཞེས་པ་བརྗོད་ནས་བཅོམ་ལྡན་འདས། །དེ་བཞིན་གཤེགས་པ་རྣམ་པར་བཞུགས། །
། 187

ཐ་རླབས་ལྟར་གཡོ་མ་ཡི་རླུང་འཚུབ་དག་ལ་ངོགས་པ་མེད་པ་རབ་ཏུ་འཁྲུད། །
དར་བ་ཐོབ་ནས་ཕ་ནི་གཟི་བྱིན་གཏེར་དེ་སྣང་བ་མིན་པ་དག་ཏུ་གཏོད། །
དགྲ་བཅོམ་སེམས་ཅན་གནས་ནི་རབ་ཏུ་གསལ་བར་འབྱོར་པ་མ་ཟད་
རིམ་པས་བཅོམ། །
དུ་བ་ཤིན་ཏུ་དྲི་མ་ཅན་གྱིས་མཆོག་ཏུ་ཉེས་བྱས་ཅི་དང་ཅི་མ་བྱས། ། 188

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཆོས་སྤྱོད་ཀྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་བརྒྱད་ཅུ་རྩ་དགུ་པའོ། །

नमो बुद्धाय बुद्धायेत्येतदेव सदा वद ।
जिनाभिधानं श्रुत्वैव कल्पान्ते मुक्तिमेष्यसि ॥ १८५ ॥

अथाश्वदत्तो देहान्ते घोरं नरकमाविशत् ।
यस्याग्रे प्रबलोत्तालः शीतलः प्रलयानलः ॥ १८६ ॥

सोऽयं धर्म्मरुचिः पृष्टश्चिरस्येति चिरान्मया ।
अभिधायेति भगवान् विरराम तथागतः ॥ १८७ ॥

वाताली जननी तरङ्गतरला निःशङ्कमालिङ्गिता
प्राप्य प्रौढिं मदर्शनं स जनकस्तेजोनिधिः प्रापितः ।
अर्हत्सत्त्वपदप्रकाशविभवस्तीव्रक्रमेणाहतो
धूमेनातिमलीमसेन न परं किं किं कृतं दुष्कृतम् ॥ १८८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
धर्म्मरुच्यवदानमेकोननवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་བཅུ་ཐམས་པ།

ཡིད་ནི་དགེ་བའི་སྤྲུལ་བྱེད་ཅན། སྨིན་པ་ཤིན་ཏུ་ཆུང་ངུ་ཡིས།
སྙིང་སྟོབས་ཅན་ལ་ཕུན་ཚོགས་ནི། བརྟག་པས་བགོམས་པར་བྱ་མི་འགྱུར༎ 1

བྲི་ཛཱིའི་ཡངས་པ་ཅན་དུ་སྔོན། སྤྲེའུའི་ལྡིང་ཛིང་ཞེས་བྱ་བའི་འགྲམ།
ཁང་པ་བརྩེགས་པའི་ཁྱིམ་གནས་ན། བཅོམ་ལྡན་རྒྱལ་བ་བཞུགས་པའི་ཚེ༎ 2

ཡོན་ཏན་མཐའ་དག་ལྡན་པ་ལས། སྐྱེས་བུ་མཆོག་ཉིད་དུ་གྱུར་པ།
ཁྱིམ་བདག་དཔལ་གྱིས་བསྐོར་བ་ནི། ནོར་ཅན་ཞེས་པ་བྱུང་བར་གྱུར༎ 3

དེ་ཡི་ཆུང་མ་ཆོས་ཀྱི་གྲོགས། ངང་ཚུལ་ཅན་ཞེས་བྱ་བར་གྱུར།
བུ་ནི་གདོང་ཡོད་ཅན་ཞེས་དང་། དེ་བཞིན་མནའ་མ་བདེན་ལྡན་མའོ༎ 4

ཡངས་པ་ཅན་པའི་བྲམ་ཟེ་རྣམས། འཚོགས་ནས་དེར་ནི་ངེས་པར་བྱས།
ཐམས་ཅད་བཚོགས་ནས་བཅོམ་ལྡན་འདས། མགྲོན་དུ་གཉེར་བྱ་གཞན་དུ་མིན༎ 5

ནོར་གྱིས་རྒྱགས་པས་གཅིག་གིས་ནི། གལ་ཏེ་རྒྱལ་བ་མགྲོན་གཉེར་བྱེད།
གཞན་གྱིས་ཆོས་ཀྱི་བཀགས་བྱེད་པ། དེ་ནི་ཀུན་གྱིས་འབྱུང་བར་བྱ༎ 6

དེ་དག་ངེས་པ་མ་ཤེས་ན། ནོར་ཅན་མཆོག་གི་ཕུན་ཚོགས་ལྡན།
བསོད་ནམས་ལྡན་པ་རང་ཉིད་ཀྱིས། སོང་ནས་རྒྱལ་བ་མགྲོན་གཉེར་བྱས༎ 7

नवतितमः पल्लवः ।

मनःशुद्धिविधानेन दानेनातिलघीयसा ।
भवन्त्यलङ्घ्याः संकल्पैः सम्पदः सत्त्वशालिनाम् ॥ १ ॥

पुरा वृजिषु वैशाल्यां मर्कटाख्यह्रदान्तिके ।
कूटागारगुहावासे जिने भगवति स्थिते ॥ २ ॥

बभूव धनिको नाम श्रिया गृहपति र्वृतः ।
समग्रपुण्यसंयोगात् पुरुषोत्तमतां गतः ॥ ३ ॥

पत्नी धर्म्मसखी तस्य शीलवत्यभिधाभवत् ।
वदान्याख्यश्च तनयः स्नुषा सत्यवती तथा ॥ ४ ॥

संहताः समयं चक्रुः तत्र वैशालिका द्विजाः ।
निमन्त्रणीयो भगवान् सर्व्वैः संभूय नान्यथा ॥ ५ ॥

एकश्चेत् कुरुते वित्तमदाज्जिननिमन्त्रणम् ।
सर्व्वै र्निर्वासनीयोऽसौ परेषां धर्म्मविघ्नकृत् ॥ ६ ॥

तेषां समय मज्ञात्वा पुण्यवान् धनिकः स्वयम् ।
दिव्यसम्पद्युत स्वके गत्वा जिननिमन्त्रणम् ॥ ७ ॥

བཅོམ་ལྡན་རང་ཉིད་དགེ་འདུན་དང་། ལྷན་ཅིག་ཁྱིམ་དུ་གཤེགས་པར་ནི།
ཞལ་གྱིས་བཞེས་ཚེ་གྲུས་ལྡན་དེ། དགའ་བས་རང་གི་ཁྱིམ་དུ་སོང་།། 8

དེར་ནི་དེ་ཡིས་ལྷ་ལ་འདིས། མཆོག་གི་འཁོར་པའི་ཚོགས་རྣམས་ཀྱིས།
རིན་ཅན་སྟན་དང་ཡོ་བྱད་དང་། ཟས་ཀྱི་ས་གཞི་བསྟར་བ་བྱས།། 9

སྐབས་དེར་གཉིས་སྐྱེས་ཐམས་ཅད་ནི། འདུས་ནས་ཡོ་བྱད་ཚོགས་བསྒྲུབས་པས།
བཅོམ་ལྡན་འདས་ཀྱི་དྲུང་སོང་ནས། གྲུས་པས་མགྲོན་དུ་གཉེར་བ་བྱས།། 10

དེ་ནས་དེ་ལ་བཅོམ་ལྡན་འདས། རབ་དང་དྲི་མེད་བསམ་པས་གསུངས།
སྔོན་དུ་དགེ་འདུན་དང་བཅས་པ། ནོར་ཅན་གྱིས་ནི་མགྲོན་དུ་གཉེར།། 11

དེ་དག་ཐོས་ནས་བཅོམ་ལྡན་འདས། མཆོད་པ་སྔོན་གྱི་ཉིན་པར་ལ།
རབ་ཏུ་རྟོག་ཅིང་དེ་དག་རྣམས། རང་གི་ཁྱིམ་དུ་སོང་བའི་ཚེ།། 12

ནོར་ཅན་ཁང་པར་བཅོམ་ལྡན་འདས། དགེ་སློང་རྣམས་དང་བཅས་བྱོན་ནས།
ལྷ་ཡི་རྨད་བྱུང་ཕུན་སུམ་ཚོགས། མཆོད་སྟོན་རབ་ཏུ་བཞེས་པ་མཛད།། 13

དེ་ཡི་ཆུང་མས་ཉིན་གཞན་ཡང་། དེ་མཚུངས་ཡངས་པའི་དཔལ་གྱིས་ནི།
མཆོག་གི་ལོངས་སྤྱོད་ཚོགས་རྣམས་ཀྱིས། བཅོམ་ལྡན་འདས་ལ་མཆོད་པ་བྱས།། 14

གསུམ་པའི་ཉིན་ལ་དེ་ཡི་བུས། བཞི་པར་མནའ་མས་རྒྱལ་བ་ནི།
ངོ་མཚར་འབྱོར་པའི་ལོངས་སྤྱོད་ཀྱི། ཉེར་སྤྱད་རྣམས་ཀྱི་མགྲོན་དུ་གཉེར།། 15

स भक्तिमान् भगवता गृहाभिगमने स्वयम् ।
ससङ्घेनाभ्युपगते हृष्टः स्वभवनं ययौ ॥ ८ ॥

स तत्र दिव्यविभवः सम्भारै स्त्रिदिवोचितैः ।
रत्नासनोपकरणां सज्जां भोज्यभुवं व्यधात् ॥ ९ ॥

अत्रान्तरे द्विजाः सर्व्वे गत्वा भगवतोऽन्तिके ।
संभूय कृतसंभारा अक्रु र्भक्त्या निमन्त्रणम् ॥ १० ॥

तानुवाचाथ भगवान् प्रसादविशदाशयः ।
पूर्व्वमेव ससङ्घोऽहं धनिकेन निमन्त्रितः ॥ ११ ॥

एतदाकर्ण्य यातेषु तेषु स्वभवनं शनैः ।
परं प्रतीक्षमाणेषु दिनं भगवतोऽर्चने ॥ १२ ॥

धनिकस्य गृहं गत्वा भगवान् सह भिक्षुभिः ।
दिव्याद्भुतर्द्धिसंभारं चक्रे भोज्यप्रतिग्रहम् ॥ १३ ॥

अन्येद्युरपि तत्पत्नी तत्तुल्यं विपुलश्रिया ।
दिव्योपभोगसंभारै र्भगवन्त मपूजयत् ॥ १४ ॥

तत्पुत्रेण तृतीयेऽह्नि चतुर्थे स्नुषया जिनः ।
आश्चर्य्यविभवाभोगै रुपभोगै र्निमन्त्रितः ॥ १५ ॥

ཡངས་པ་ཅན་པའི་ཚོགས་རྣམས་ཀྱིས། སྟོན་པ་མཆོད་པའི་སྐབས་མ་ཐོབ།
ནོར་ཅན་ལ་ནི་རབ་ཁྲོས་ཏེ། གནས་ནས་དབྱུང་བའི་རྩོམ་པ་བྱས།། 16

དེ་ནས་བདེ་བར་གཤེགས་པའི་བཀས། གཉིས་སྐྱེས་དེ་དག་རྣམས་ལ་ནི།
བདག་གིས་མ་ཤེས་ཞེས་བརྗོད་ནས། ནོར་ཅན་གྱིས་ནི་དང་བར་བྱས།། 17

དེ་ནས་ནོར་ཅན་ཚུང་མར་བཅས། བུ་དང་བཅས་ཤིང་མནའ་མར་བཅས།
སྟོན་པས་ཆོས་ནི་བསྟན་པ་ཡིས། བདེན་པ་མཐོང་བ་ཐོབ་པར་གྱུར།། 18

དེ་དག་སྔོན་བྱུང་བསོད་ནམས་ནི། འབྱོར་པ་ཆེན་པོ་རྒྱ་ཆེ་བ།
དགེ་སློང་གིས་དྲིས་བཅོམ་ལྡན་འདས། ཐམས་ཅད་མཁྱེན་པས་དེར་གསུངས་པ།། 19

བཱ་རཱ་ཎ་སིར་སྔོན་བྱུང་བ། པདྨ་ཞེས་པ་འཕྲེང་རྒྱུད་མཁན།
མུ་གེས་ཉེན་པའི་དུས་སུ་ནི། མཆོག་ཏུ་དབུལ་བ་ཉིད་དུ་གྱུར།། 20

ཚུང་མ་ཡལ་འདབ་ཅན་ཞེས་དང་། བུ་ནི་ཤྲུ་དྲ་ལ་ཞེས་པ་དང་།
མནའ་མ་པ་ཊ་ལ་ཞེས་པ། འདི་དག་དེ་ཡི་ཚོགས་པར་གྱུར།། 21

ནམ་ཞིག་དེ་དག་ཁྱིམ་དང་ཉེ། མེ་ཏོག་དགའ་ཚལ་རབ་མཛེས་ཤིང་།
ཆིམ་པ་དག་ཏུ་ཉིན་མོའི་མཐར། རང་སངས་རྒྱས་ནི་བཞུགས་པར་གྱུར།། 22

དེ་དག་ཀུན་གྱི་མི་བདག་གི། གནས་སུ་གོས་གཉིས་རེ་མོས་ཀྱིས།
མེ་ཏོག་ཕུལ་ནས་འོངས་པ་ཡིས། འོད་ཀྱི་རང་བཞིན་དེ་མཐོང་གྱུར།། 23

अलब्धपूजावसरः शास्तु र्वैशालिको गणः ।
धनिकाय परं क्रुद्धा श्चक्रु र्निष्कासनोद्यमम् ॥ १६ ॥

शासनात् सुगतस्याथ धनिकेन द्विजातयः ।
न मया ज्ञात इत्युक्त्वा तेन सर्व्वे प्रसादिताः ॥ १७ ॥

सपत्नीकोऽथ धनिकः सपुत्रश्च स्नुषान्वितः ।
धर्म्मदेशनया शास्तुः सत्यदर्शन माप्तवान् ॥ १८ ॥

तत्पूर्व्वपुण्यवृत्तान्तं महाविभवविस्तरम् ।
भिक्षुभि र्भगवान् पृष्टः सर्व्वज्ञ स्तानवोचत ॥ १९ ॥

वाराणस्यामभूत् पूर्व्वं मालिकः कमलाभिधः ।
दुर्भिक्षक्षपिते काले परां दुर्गति माप्तिः ॥ २० ॥

पत्नी पल्लविका नाम पुत्रः कुवलयाभिधः ।
पाटलाख्या स्नुषा चेति बभूवु स्तस्य संमिता ॥ २१ ॥

कदाचित् कुसुमारामे दिनान्ते तद्गृहान्तिके ।
प्रत्येकबुद्धः सन्तोषकान्ते विश्रान्ति माप्तवान् ॥ २२ ॥

ते त्वेकवसनाः सर्व्वे पर्य्यायेण नृपालये ।
पुष्पाणि दत्त्वा संप्राप्ता ददृशु स्तं प्रभामयम् ॥ २३ ॥

གཟི་བརྗིད་གཏེར་དེ་མཐོང་གྱུར་ནས། སྔ་དྲོ་དེ་ལ་མཆོད་འདོད་པས།
གཤོགས་པ་བཅད་པའི་བྱ་བཞིན་དུ། དེ་དག་ནོར་མེད་གདུང་བ་ཐོབ།། 24

བདག་ཅག་བཞི་ལ་བདོག་པ་ཀུན། གོས་ནི་གཅིག་ཉིད་ཁོ་ན་ཡོད།
མཆོད་འོས་འདི་ཡི་ལུས་ཀྱི་མཆོག། དེ་ཉིད་ཀྱིས་ནི་གཡོག་པར་བྱས།། 25

དེ་རིང་གཅེར་བུར་རྒྱལ་པོ་ཡི། འཁོར་དུ་མི་འགྲོ་ཅི་འབྱུང་འགྱུར།
ཞེས་པའི་དམ་ཚིག་དེ་དག་གིས། བྱས་ནས་གོས་ཀྱིས་དེ་ལ་མཆོད།། 26

དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་གྱིས། འཕྲེང་རྒྱུད་མཁན་འདི་ནོར་ཅན་འདི།
ཆུང་མ་བུ་དང་མནའ་མར་ལྡན། ལྷ་མ་བུ་ཕུན་སུམ་ཚོགས་པར་གྱུར།། 27

ཅེས་པ་ཚོགས་སུ་ཀུན་མཁྱེན་གྱིས། བཤད་པ་ཐོས་ནས་དགེ་སློང་རྣམས།
སེམས་ནི་དྲི་མེད་རྩ་བ་དག། སྦྱིན་པའི་འབྲས་བུའི་དཔལ་དུ་སེམས།། 28

དེ་ནས་བྲམ་ཟེ་དེ་དག་རྣམས། ཀུན་འཚོགས་གཙང་པའི་ཟས་དག་གིས།
བཅོམ་ལྡན་འདས་ནི་ཡང་དག་མཆོད། དགེ་བ་རབ་ཏུ་འབར་བར་གྱུར།། 29

དམན་བྱིན་རིན་ཅན་ནོར་ནི་རྩ་ཡི་རྩེ།
དད་པས་བྱིན་པའི་རྩ་ཡང་རིན་ཐང་མེད།
མཛེས་པ་དུ་མའི་ཉམས་སྐྱོང་ནོར་ཡིན་ཏེ།
དགེ་བར་བྱུང་བའི་རྒྱུ་ནི་སེམས་ཉིད་དོ།། 30

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་འཁྲི་ཤིང་ལས་ནོར་ཅན་གྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་དགུ་ཅུ་པའོ།།

तेजोनिधिं त मालोक्य प्रात स्तत्पूजनोत्सुकाः ।
निर्द्धना स्ते व्यथां प्रापु श्छिन्नपक्षाः खगा इव ॥ २४ ॥

चतुर्णां विद्यतेऽस्माक मेकं सर्व्वस्व मम्बरम् ।
आच्छादयाम स्तेनैव पूज्यस्यास्य वरं वपुः ॥ २५ ॥

नाद्य राजकुलं नग्ना गच्छामः किं भविष्यति ।
इति ते समयं कृत्वा वस्त्रेण त मपूजयन् ॥ २६ ॥

तत्पुण्यप्रणिधानेन धनिकोऽयं स मालिकः ।
जातो दिव्यप्रभावर्द्धिः पत्नीपुत्रस्नुषान्वितः ॥ २७ ॥

सर्व्वज्ञेनेति कथितं श्रुत्वा सपदि भिक्षवः ।
मेनिरे चित्तवैमल्यमूलां दानफलश्रियम् ॥ २८ ॥

तत स्ते ब्राह्मणाः सर्व्वे संभूय शुचिभोजनैः ।
भगवन्तं समभ्यर्च्य बभूवुः कुशलोज्ज्वलाः ॥ २९ ॥

हेलार्पितं रत्नवनं तृणाग्रम्
श्रद्धावितीर्णं तृणमप्यनर्घ्यम् ।
अनेकशोभानुभवं न वित्तम्
चित्तं निमित्तं शुभसम्भवानाम् ॥ ३० ॥

इतिक्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
धनिकावदानं नवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་ཅུ་རྩ་གཅིག་པ།

སྣང་བ་མེད་པའི་གནས་རྣམས་དག་ཏུ་སྨོན་མི་བཞིན།
ལེགས་པར་བཤད་པ་བདེན་པའི་ལམ་ནི་གསལ་བར་བྱེད།
དེ་ཉིད་ཕྱིར་ནི་རྟགས་སུ་ཉེ་བར་མཁོ་བ་ལས།
བདག་ཉིད་ཆེ་རྣམས་དགེན་པ་སྤྱོད་ལ་ཡིད་དུ་འོང་། ། 1

གང་ཚེ་གྲུད་ཀྱི་སྐྱེ་བའི་གནས། ཀུ་ཤའི་གྲོང་དུ་བཅོམ་ལྡན་འདས།
དགེ་བ་འཚོལ་བས་དགེ་སློང་ཚོགས། དགྲ་བཅོམ་གནས་ལ་བཀོད་གྱུར་པ། ། 2

དེ་ཚེ་ཕན་ཚུན་སྐྱན་པར་ཚེས། སྨྲ་བྱེད་དགེ་སློང་རྣམས་དག་གིས།
ལེགས་བཤད་བདེ་བར་ག་ཞེགས་པ་ནི། དགྱེས་པ་དང་ལྡན་རང་གིས་གསན། ། 3

དེ་ཡི་ལེགས་བཤད་ལ་གཙགས་པ། དེ་མཐོང་དགེ་སློང་རྣམས་ཀྱིས་ནི།
དེ་ལ་གསོལ་པ་ཀུན་མཁྱེན་ཉིད། ངེད་ཀྱི་ཚིག་ལ་ཇི་ལྟར་དགྱེས། ། 4

དགེ་སློང་ཚོགས་ཀྱིས་དེ་བརྗོད་ཚེ། བཅོམ་ལྡན་རྒྱལ་བས་བཀའ་སྩལ་པ།
བདག་ནི་སྐྱེ་བ་གཞན་དུ་ཡང་། ལེགས་བཤད་དག་ལ་མཆོག་དུ་དགའ། ། 5

གྲོང་ཁྱེར་ཞི་ལྡན་དག་ཏུ་སྔོན། མི་བདག་ཤིབི་ཞེས་བྱ་བ།
འབྱུང་པོ་ཀུན་ལ་བརྩེ་བ་ཡི། ཡིད་འོང་གཅེན་དུ་གྱུར་པ་བྱུང་། ། 6

एक नवतितमः पल्लवः ।

सुभाषितं सत्यपथप्रकाशनं
करोत्यनालोकपदे सुदीपवत् ।
सदोपकारादत एव वल्लभं
विवेकचर्य्यासु महात्मनामपि ॥ १ ॥

कुशिपुर्य्यां भगवता यदा मल्लजनास्पदे ।
अर्हत्पदं भिक्षुगणः प्रापितः कुशलैषिणा ॥ २ ॥

तदा कथयतां धर्म्मं भिक्षूणां मधुरं मिथः ।
स्वयं शुश्राव सुगतः प्रीतियुक्तः सुभाषितम् ॥ ३ ॥

सुभाषितव्यसनितां तां दृष्ट्वा तस्य भिक्षवः ।
त मूचु स्तव सर्व्वज्ञ कथ मस्मद्वचः प्रियम् ॥ ४ ॥

इत्युक्ते भिक्षुसङ्घेन भगवानभ्यधाज्जिनः ।
जन्मान्तरेष्वपि परं वल्लभं मे सुभाषितम् ॥ ५ ॥

शिववत्यां पुरा पुर्य्यां शिवि र्नाम नरेश्वरः ।
बभूव सर्व्वभूतानां दयादयितबान्धवः ॥ ६ ॥

དེ་ཡི་བསོད་ནམས་བཀར་གནས་པའི། མི་ཡི་མཐོ་རིས་ཀུན་གང་བ།
མཐོང་ནས་དེ་ཡི་སྙིང་སྟོབས་ནི། རྟག་ཏུ་མཆོད་སྦྱིན་བརྒྱ་བ་འོངས།། 7

དེ་ནི་རིན་ཅན་ཁང་བཟང་རྩེར། འཛེགས་པའི་མི་བདག་ཅན་སོང་ནས།
འཇིགས་རུང་སྲིན་པོ་འི་གཟུགས་བསྒྱུབས་ཏེ། དེ་ཡི་མདུན་དུ་མངོན་
ཕྱོགས་སྨྲས།། 8

འདུ་བྱེད་མི་རྟག་ཤིན་ཏུ་གཡོ་བའི་སྒྲོག་རབ་མཛེས་པ་དག་དང་མཚུངས།
རབ་ཏུ་སྐྱེས་ཤིང་སྐྱེས་ཤིང་འཇིག་པའི་ཡོངས་སུ་འགྱུར་བ་དག་ལ་ཆགས།། 9

ཞེས་པའི་ལེགས་བཤད་ཕྱེད་བརྗོད་ནས། སྲིན་པོ་དེ་ནི་མི་སྨྲ་གྱུར།
ས་ཡི་བདག་པོས་ཐལ་སྦྱར་ནས། ཕྱག་འཚལ་དེ་ལ་རབ་སྨྲས་པ།། 10

དགེ་བ་ལེགས་པར་བཤད་པའི་ཕྱིར། ཡིད་བདེ་ལྷག་མ་གསུང་བར་མཛོད།
བྱང་ཆུབ་ཡན་ལག་གྱུར་སྐད་དེ། སློབ་མར་གྱུར་ནས་བདག་ཉན་ནོ།། 11

དུལ་བས་དེ་སྨྲ་མི་བདག་ལ། སྲིན་པོ་ཡིས་ནི་རབ་སྨྲས་པ།
རྒྱལ་དབང་སློབ་མ་འབྲས་བུ་མེད། ཁྱོད་ཀྱིས་བདག་ལ་ཅི་ཞིག་བྱ།། 12

སྐོམ་པས་བདག་ནི་ཡོངས་ཉེན་ཅིང་། བཀྲེས་པས་སྐུ་ནི་ཡོངས་སུ་ཉམས།
རྒྱལ་པོ་བདག་ནི་ཟླ་མ་ཡི། ཞེས་པ་འབའ་ཞིག་འདི་མི་འདོད།། 13

བཀྲེས་སྐོམ་དག་གིས་གཟིར་གྱུར་པས། གང་ཞིག་ཅུང་ཟད་བདག་སྨྲ་འོ།
ལྷག་མ་བརྗོད་པར་ཡོངས་མི་ནུས། བདག་ལ་སྡུག་བསྔལ་མ་མཛད་ཅིག།། 14

तत्पुण्यशासनासीनैः स्वर्गमापूरितं नरैः ।
दृष्ट्वा शतक्रतु र्ज्ञातुं सत्त्वं तस्य समाययौ ॥ ७ ॥

रत्नप्रासादशिखराक्रान्तं नृपति मेत्य सः ।
रक्षोरूपं विधायोग्रं तदग्राभिमुखोऽब्रवीत् ॥ ८ ॥

अनित्याः संसारा स्तरलतरविद्युद्द्युतिनिभाः ।
समुत्पन्नोत्पन्नप्रलयपरिणामप्रणयिनः ॥ ९ ॥

सुभाषितार्द्धमित्युक्त्वा तुष्णीमासीत् स राक्षसः ।
तं प्रणम्य क्षितिपतिः कृताञ्जलिरभाषत ॥ १० ॥

साधो सुभाषितस्यार्द्धं शेषं शंस मनःसुखम् ।
वाणीं बोध्यङ्गभूतां ते शिष्यो भूत्वा शृणोम्यहम् ॥ ११ ॥

इति ब्रुवाणं विनयान्नृपं प्रोवाच राक्षसः ।
त्वया शिष्येण राजेन्द्र निष्फलेन करोमि किम् ॥ १२ ॥

पिपासापरिभूतोऽहं क्षामकुक्षि र्बुभुक्षया ।
नैतन्ममेप्सितं राजन् केवलं गुरुगौरवम् ॥ १३ ॥

क्षुत्तृष्णाव्याकुलतया यत्किञ्चित् प्रलपाम्यहम् ।
शेषं वक्तुं न शक्नोमि मा कृथा मे कदर्थनाम् ॥ १४ ॥

སྙན་པའི་གདངས་ལྡན་རོ་ནི་འོས་པ་ཅན།
ལེགས་པར་བཤད་པ་རབ་ཏུ་རྒྱས་གྱུར་པ།
ཆོམ་ལ་བདེ་བ་སྟེར་བྱེད་འདི་དག་ནི།
ངེས་པར་བཀྲིས་དང་སྐོམ་པར་བྱེད་པ་མིན།། 15

ཐོས་དང་བློ་དང་སྙན་དངགས་ངལ་བས་ཡོངས་འདྲི་དག་མཚན་སྒྲུབ་བྱེད་དང་།
ནོར་བུ་ཤེས་དང་འབྱུང་པོ་གདོན་ནད་དུག་དང་སྐྱོ་བ་ཞི་བྱེད་དང་།
ས་འཛིན་བསྟེན་དང་ཆུ་གཏེར་སྒྲོལ་བར་བྱེད་དང་གསེར་འགྱུར་དག་དང་རྩིས།
འདི་དག་མ་ལུས་མཐར་ཐུག་འབྲས་བུ་མི་རྣམས་དག་གི་བཟའ་བ་ཡིན།། 16

འཕྲལ་ལ་བཙད་པའི་ཤ་དད་ནི། ཁྲག་དག་བདག་ལ་ཆོམ་བྱེད་པ།
འཚོ་མེད་སྐོམ་པས་བཅིངས་གྱུར་པ། ཁྱོད་ལས་ཤིན་ཏུ་རྙེད་པར་དཀའ།། 17

ཁྱོད་དང་ཉེ་བར་བདག་ཅི་བྱེད། འགའ་ཞིག་ལ་ནི་སློང་དུ་འགྲོ།
ཟས་དང་གནས་ནི་མཚུངས་པ་ཡི། རྩེད་མོ་དང་ནི་གཏམ་དག་མཛེས།། 18

ཞེས་དེས་བརྗོད་ཚེ་མི་བདག་ནི། གུས་དང་བཅས་པས་དེ་ལ་སྨྲས།
རང་གི་ལུས་ནི་རབ་བཙད་པའི། ཁྲག་དང་ཤ་ནི་ཁྱོད་ལ་བྱིན།། 19

རྒྱ་ཆེ་བློ་གྲོས་ལྡན་པ་ཁྱོད། རྟེན་ཅིང་འབྲེལ་འབྱུང་དང་པོ་འི་སྒོ།
ཁྱོད་ཀྱི་ལེགས་བཤད་ཐུང་འདས་ཀྱི། གྲོང་ཁྱེར་གྱི་ནི་ལམ་གྱི་མཆོག།། 20

རྒྱལ་པོ་ཟླ་བས་འདི་བརྗོད་ཚེ། མཚན་མོ་རྒྱུ་བས་དེ་ལ་སྨྲས།
བློ་གྲོས་བཟང་པོ་མྱུར་དུ་ཉོན། དམ་བཅས་པ་དག་སྦྱིན་པར་མཛོད།། 21

माधुर्य्यधुर्य्याणि रसोचितानि
सञ्चार्य्यमाणानि सुभाषितानि ।
नैव क्षुधं न क्षपयन्ति तृष्णा
मेतानि तृप्तस्य सुखप्रदानि ॥ १५ ॥

श्रुतं गीतं काव्यं श्रमपरिचयः कौतुकविधिः
मणिज्ञानं भूतग्रहगदविषोन्मादशमनम् ।
नृणां भूभृत्सेवा जलधितरणं हेमकरणम्
तदेतत् पर्य्यन्ते गणित मखिलं भोजनफलम् ॥ १६ ॥

सद्यःकृत्तस्य रुधिरं मांसञ्च मम तर्पणम् ।
अहिंसाबद्धनियमात् त्वत्त स्तदतिदुर्ल्लभम् ॥ १७ ॥

गच्छामि याचितुं कञ्चित् त्वत्समीपे करोमि किम् ।
क्रीड़ाकथाश्च शोभन्ते तुल्याहारविहारयोः ॥ १८ ॥

इत्युक्त स्तेन नृपति स्त मभाषत सादरः ।
निजदेहसमुत्कृत्तं सासृङ्मांसं ददामि ते ॥ १९ ॥

त्वं प्रतीत्यसमुत्पादपूर्व्वार्थं समुदाहर ।
निर्व्वाणनगरस्याग्र्यः पन्था तव सुभाषितम् ॥ २० ॥

इत्युक्तो राजचन्द्रेण त मुवाच क्षपाचरः ।
श्रूयतां सुमते तूर्णं दीयताञ्च प्रतिश्रुतम् ॥ २१ ॥

འདུ་བྱེད་མི་རྟགས་ཤིན་ཏུ་གཡོ་བའི་གློག་རབ་མཛེས་པ་དག་དང་མཚུངས།
རབ་ཏུ་སྐྱེས་ཤིང་སྐྱེས་ཤི་འཇིག་པའི་ཡོངས་སུ་འགྱུར་པ་དག་ལ་ཆགས།
དེས་བསྐྱེད་འཁོར་ཞིང་ཡོངས་སུ་སྒྱུར་བས་སྡིག་ཆགས་དག་ནི་དབང་གྲུལ་ཞིང་།
ངལ་དུབ་ལྡན་པ་རྣམས་ལ་ཉེར་ཞི་འགོག་པས་ངལ་སོ་སྟེར་བར་བྱེད།། 22

དེ་དག་ཐོས་ནས་མི་བདག་ནི། དགའ་མགུ་མིག་དག་རབ་རྒྱས་པས།
རང་གི་ལུས་ནི་བཅད་པའི་ཤ། ཁྲག་དང་བཅས་པ་དེ་ལ་བྱིན།། 23

རང་ཤ་བཅད་ཅིང་བཅད་ཅིང་ནི། སྟེར་བར་བྱེད་པ་ས་བདག་གི།
སྙིང་སྟོབས་རྣམ་འགྱུར་མེད་པ་ཡིས། མཚན་མོ་རྒྱུ་བ་ཡ་མཚན་གྱུར།། 24

དེ་ཡིས་ལུས་ནི་ཐམས་ཅད་ལས། ཤ་ཟ་དག་ལ་ཤ་བྱིན་ནས།
སེམས་ཅན་ཐམས་ཅད་སྐྱོལ་བ་ལ། སྨོན་ལམ་མི་ཡི་བདག་པོས་བྱས།། 25

དེ་ནས་དེ་ལ་གཙུགས་པ་ལས། འབྱོར་འཇིག་སྲིན་པོའི་གཟུགས་ཀྱིས་སྨྲས།
ཁྱོད་ཀྱི་གནད་ནི་བཅད་པ་ལ། གདུང་བས་མི་དགའ་བསྐྱེད་དམ་ཅི།། 26

སྐབས་གསུམ་རྒྱལ་པོས་དྲིས་པ་ན། རྒྱལ་པོའི་རྒྱལ་པོས་དེར་སྨྲས་པ།
ལུས་ཀྱི་གཞན་ལ་ཕན་པ་དག། བྱས་ལ་བདག་ནི་མི་དགའ་མེད།། 27

གལ་ཏེ་གདུང་བ་དག་ལ་བདག། རྣམ་འགྱུར་མེད་ན་བདེན་པ་དེས།
བདག་གི་ལུས་འདི་སྔོན་གཟུགས་བཞིན། རྨ་རིད་བསོས་བ་ཉིད་གྱུར་ཅིག།། 28

अनित्याः संसारा स्तरलतरविद्युद्द्युतिनिभाः
समुत्पन्नोत्पन्नप्रलयपरिणामप्रणयिनः ।
तदुत्थे जन्तूनां भ्रमणपरिवर्त्तैः श्रमवतां
निरोधाद्विश्रान्तिं दिशति विवशाना मुपशमः ॥ २२ ॥

एतदाकर्ण्य नृपतिः प्रहर्षोत्फुल्ललोचनः ।
ददौ स्वदेह मुत्कृत्य तस्मै मांसं सशोणितम् ॥ २३ ॥

उत्कृत्योत्कृत्य ददतः स्वमांसानि महीपतेः ।
निर्विकारेण सत्त्वेन विस्मितोऽभून्निशाचरः ॥ २४ ॥

स दत्त्वा सर्व्वगात्रेभ्यः पिशितं पिशिताशिने ।
प्रणिधानं व्यधात् सर्व्वसत्त्वसन्तारणे नृपः ॥ २५ ॥

तत स्तं प्रणयादूचे रक्षोरूपः पुरन्दरः ।
अपि ते मर्म्मविच्छेदे विषादजननी व्यथा ॥ २६ ॥

पृष्ट स्त्रिदशराजेन राजराज स्त मब्रवीत् ।
न विषादोऽस्ति मे देहे परोपकरणीकृते ॥ २७ ॥

व्यथायां निर्विकारोऽहं यदि सत्येन तेन मे ।
निर्व्रणस्वस्थमेवास्तु पूर्व्वरूपमिदं वपुः ॥ २८ ॥

ཅེས་སྨྲས་ས་ཡི་བདག་པོ་ཡི། བདེན་པའི་ཚིག་ནི་བརྗོད་པ་ལས།
འཕྲུལ་ཉིད་ལུས་ནི་སྤྲིན་གྱི་གཟུགས། ས་དང་བྲལ་བ་ཉིད་དུ་གྱུར། ‖ 29
མཁའ་ལ་རྒྱུ་བས་མེ་ཏོག་ཆར། ཡངས་པས་དེ་ནི་གསོགས་བྱས་ཤིང་།
ལྷ་ཡི་དབང་པོས་སྤྲིན་པོའི་གཟུགས། ཡོངས་སུ་བཏང་ནས་རབ་ཏུ་བསྔགས། ‖ 30
བརྒྱ་བྱིན་སྙིང་སྟོབས་ལྡན་པ་ཡིས། མི་བདག་ལ་ནི་དང་བྱས་སོ།
དེ་ཡི་ལེགས་བཤད་བདུད་རྩི་ཡི། ཉམས་མྱོང་ས་ཡི་བདག་པོས་བསམས། ‖ 31
ང་ཉིད་སྤྲིན་གྱི་སྐྱེ་བ་ལ། མི་དབང་ཤི་བི་དེར་གྱུར་ནས།
དེ་ལྟར་སྲོག་གི་རྫོང་གིས་བདག ། ལེགས་བཤད་ལ་ནི་དགའ་བར་གྱུར། ‖ 32
རང་གི་སྐྱེ་བ་གཞན་གྱི་གཏམ། དེ་བཞིན་གཤེགས་པས་གསུངས་པ་དག།
ཐོས་ནས་ཡ་མཚན་ལྡན་པ་ཡི། དགེ་སློང་ཀུན་གྱིས་རབ་ཏུ་བསྔགས། ‖ 33
མཐོང་དང་མ་མཐོང་བདེ་ལ་ལམ་ནི་ལེགས་བཤད་ཀྱིས་
གསལ་སྒྲོན་མ་ལྟ་བུར་སྤྱོད།
ལེགས་བཤད་བདུད་རྩིའི་རོ་ནི་ཉམས་མྱོང་ལྡན་པས་
མཆོག་ཏུ་དགའ་བའི་ཆར་དག་འབེབས།
ལེགས་བཤད་དོན་གཉེར་ཡུལ་ལ་གཉེར་བ་ཀུན་མཁྱེན་
དག་ཀྱང་དོན་གཉེར་ཉིད་དུ་འགྱུར།
དེ་སྐད་དམ་པ་རྣམས་ལ་ལེགས་བཤད་དང་མཚུངས་
དགའ་བ་ཅི་ཡང་ཡོད་མ་ཡིན། ‖ 34

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཞི་བའི་ལེགས་བཤད་ཀྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་གཅིག་པའོ། ‖

इति ब्रुवाणस्य भुवः पत्युः सत्योपयाचनात् ।
सहसैव वपुः पूर्व्वरूपं निर्व्रणतां ययौ ॥ २९ ॥

तं पुष्पवर्षैर्विपुलैः श्लाघ्यमानं नभश्चरैः ।
रक्षोरूपं परित्यज्य प्रशशंस सुरेश्वरः ॥ ३० ॥

प्रसाद्य नृपतिं याते दृष्टसत्ये शतक्रतौ ।
अचिन्तयत् सुधास्वादं भूपति स्तत् सुभाषितम् ॥ ३१ ॥

शिवि र्नरेश्वरः सोऽह मभवं पूर्व्वजन्मनि ।
इति प्राणपणेनाभूद्दल्लभं मे सुभाषितम् ॥ ३२ ॥

तथागतेन कथितां जन्मान्तरकथां निजाम् ।
आकर्ण्य भिक्षवः सर्व्वे प्रशशंसुः सविस्मयाः ॥ ३३ ॥

दृष्टादृष्टसुखे सुभाषितरुचि र्मार्गे प्रदीपायते ।
संवादेन सुभाषितामृतरसः प्रीतिं परां विन्दति ।
सर्व्वज्ञोऽपि सुभाषितार्थविषये यात्यर्थनीयोऽर्थितां
तस्मान्नास्ति सुभाषितेन सदृशं किञ्चित् सतां वल्लभम् ॥ ३४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शिविसुभाषितावदान मेकनवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་ཅུ་རྩ་གཉིས་པའོ།

བླ་མ་རྣམས་ཀྱི་མདུན་དག་ཏུ་ཡང་ཞིང་དུ་བླ་མའི་གནས་སུ་ཆེ།
འབྱུང་པོ་རྣམས་ནི་འཛིན་བྱེད་མཐའ་དག་རི་ཡི་སྙིང་པོ་རབ་ཏུ་བསྐྱུར།
ལུས་ནི་མཛའ་གཟུགས་བཞིན་དུ་རྒྱས་བྱེད་སྐབས་གསུམ་རྩ་བོ་གཙང་བའི་ལུས།
མ་དེ་ཉིད་ནི་རྟག་ཏུ་མཁས་པས་མཆོད་བྱ་ཡིན་གྱི་ནོར་འཛིན་མིན། 1

མཉན་ཡོད་དག་གི་རྒྱལ་བྱེད་ཚལ། དགའ་བར་རྒྱལ་བས་རྒྱ་ཆེའི་ཆོས།
རབ་ཏུ་བསྟན་ནས་མདོར་བསྡུ་ས་པ། སྐྱར་ཡང་དགེ་སློང་ཚོགས་ལ་གསུངས། 2

ཕ་མ་མཆོག་ཏུ་ཚངས་པ་སྟེ། གཡོ་བའི་བསོད་ནམས་དག་གི་གྲོགས།
གང་ཞིག་དེ་མཆོད་ཆོས་ལྡན་པའི། རིགས་དེ་བསྔགས་པར་འོས་པ་ཡིན། 3

འཇིག་རྟེན་གསུམ་ན་བདེན་མཚུངས་དཀའ་ཐུབ་མེད།
འཆི་མེད་མཚུངས་པའི་ཆོས་ནི་གང་ནའང་མེད།
བླ་མ་ལྷི་བ་ཕ་ལས་གཞན་ཡོད་མིན།
ལྷ་ཡི་མཆོག་ནི་མ་ལས་གཞན་པ་མིན། 4

གང་ཞིག་ལྷག་པར་གུས་པ་རབ་རྒྱས་པས།
བླ་མའི་ཞལ་གྱི་པདྨ་ཟླུང་མི་བསྒྲེར།
དེ་དག་མཆོག་ཏུ་རྒྱུར་སྤྲོད་འབབ་ཞིག་གིས།
འཟུག་ངོགས་ཀུན་དུ་སོང་ཡང་འབྲས་བུ་མེད། 5

द्विनवतितमः पल्लवः ।

गुरूणामप्यग्रे गुरुतरपदे सैव महती
सदा सद्भिः पूज्या त्रिदशतटिनीपावनतनुः ।
धरित्री भूतानां सकलरससारप्रसविनी
शरीरं पुष्णाति प्रणयमिव माता न वसुधा ॥ १ ॥

श्रावस्त्यां विस्तरतरं धर्म्मं जेतवने जिनः ।
प्रतिपाद्य पुन र्भिक्षुसंघं संक्षिप्त मब्रवीत् ॥ २ ॥

पितरौ परमं ब्रह्म जङ्गमः पुण्यसङ्गमः ।
कुलानि तानि धन्यानि येषां धर्म्म स्तदर्चनम् ॥ ३ ॥

सत्योपमं नास्ति तप स्त्रिलोके
न क्वाप्यहिंसासदृशोऽस्ति धर्म्मः ।
गुरु र्गरीयान् न पितुः परोऽस्ति
मातुः परं दैवत मस्ति नान्यत् ॥ ४ ॥

सेवितं प्रसभभक्तिनिर्भरैः
पादपुष्करयुगं गुरो र्न यैः ।
ते परं जलरुचैव केवलं
सर्व्वतीर्थगमनेऽपि निष्फलाः ॥ ५ ॥

བདེ་བས་བསྟེན་བྲ་ཕྱི་རོལ་མི་ཕྱོགས་རྟག་ཏུ་བཟོད་པ་འཛིན།
དྲག་པོ་འི་བརྟུལ་ཞུགས་ལ་སོགས་ངེས་པས་གདུང་བ་སྤྱེར་མི་བྱེད།
གུས་པའི་རིམ་གྲོ་ཆུང་ངུ་ལ་ཡང་མི་ཆུང་འབྲས་བུ་སྤྱེར།
ཕ་དང་མ་དང་མཉམ་པའི་བླ་མ་གསུམ་པ་ཡོད་མ་ཡིན།། 6

ལེགས་བྱས་དོན་སྟོན་བྱེད་པས་སློབ་དཔོན་རྟག་ཏུ་སུ་ཡིས་མངོན་པར་དཀའ་མི་བྱ།
སློག་རྣམས་སྐྱེད་བྱེད་བླ་མ་རྣམས་ཀྱི་བླ་མ་པ་ནི་ཇི་ལྟར་མཆོད་མི་བྱ།
དེ་བས་ཀྱང་ནི་མཆོག་ཏུ་སྐད་ཅིག་མངལ་གྱི་ཁྲར་བཟུང་མ་ཡི་ངལ་དུབ་ལ།
བུ་ལོན་དག་པར་སྒྲུབ་བྱེད་བསོད་ནམས་ཚོགས་ནི་ཅི་ཡིས་དག་པ་ཐོབ་པར་འགྱུར།། 7

དབེན་པ་མ་སླེན་སྡིག་པའི་ཚོགས་ནི་ཡང་དག་ཐོབ་གྱུར་པ།
གང་གི་མ་ལ་སྨད་པའི་ཆ་ཡང་ངེས་པར་སྒྲུབ་བྱེད་པ།
སྡིག་པའི་བརྟུལ་ཞུགས་དེ་ཡི་སྤྱི་བོར་རལ་པའི་ཚོགས་དག་ནི།
རབ་འབར་མེ་ཡི་དྲ་བའི་རྩེ་མོའི་ཚོགས་པ་དག་ཏུ་འགྱུར།། 8

སྐྱེ་བ་གཞན་དུ་མ་ལ་ནི། སྨོད་པར་བྱེད་པ་བདག་གིས་ཀྱང་།
སྡིག་དམོད་རང་བཞིན་མི་འདོད་པ། ཡོངས་སུ་རྫོགས་པའི་གདུང་བ་ཐོབ།། 9

བ་ར་ཎ་སི་དག་ཏུ་སྡོན། ཁྱིམ་བདག་མཛའ་བོ་ཞེས་པ་བྱུང་།
དེ་ཡི་ཆུང་མ་ནོར་འཛིན་མ། ཞེས་པ་ཤིན་ཏུ་ཡིད་འོང་གྱུར།། 10

सेव्यः सुखैरविमुखः सततं क्षमाभूः
तीव्रव्रतादिनियमै रवितीर्णशोषः ।
अल्पेऽप्यनल्पफलदः प्रणयोपचारे
मातुः पितुश्च न समोऽस्ति गुरुस्तृतीयः ॥ ६ ॥

आचार्य्यः सुकृतार्थदेशिकतया कै र्नाभिवन्द्यः सदा
प्राणानां जनकः कथं न जनकः पूज्यो गुरूणां गुरुः ।
तत्रापि क्षणगर्भधारणभरक्लेशस्य मातुः परं
केनानृण्यविधानपुण्यनिचयेनासाद्यते निर्वृतिः ॥ ७ ॥

मातु र्निकारकणमप्यविवेकपाक
सम्प्राप्तपातकुशलः किल यः करोति ।
तस्य ज्वलज्ज्वलनजालशिखाकलापः
पापव्रते भवति मूर्ध्नि जटाकटप्रः ॥ ८ ॥

विकारकारिणा मातु र्मयाप्यपरजन्मनि ।
पापशापमय स्तापः प्राप्तः पर्य्यायवैशसः ॥ ९ ॥

वाराणस्यां गृहपति मैंत्रो नाम पुराभवत् ।
पत्नी वसुन्धरा नाम तस्याभूदतिवल्लभा ॥ १० ॥

དེ་ཡི་བུ་རྣམས་སྐྱེས་ཙམ་ན། ལྔ་པ་ཉིད་ནི་ཐོབ་པའི་ཚེ།
ན་ཚོད་མཐའ་རུ་ཕྱུ་དག་ནི། དཔལ་དང་ལྡན་པ་གཅིག་བཙས་གྱུར།། 11

དེ་ཡང་འཆི་བས་འཇིགས་པ་ཡི། ཕ་ཡི་བུ་མོ་ཞེས་པར་དྲགས།
དེ་ཡི་མཛའ་བོ་འི་བུ་མོ་ཞེས། ཁྱིས་པ་དེ་ནི་གྲགས་པར་གྱུར།། 12

དེ་ཡི་ཕ་ནི་རྒྱ་མཚོ་རུ། སོང་ཞིང་ཤི་བར་གྱུར་པའི་ཚེ།
བུ་གཅིག་པ་ཉིད་མ་ཡིས་ནི། གཏེར་དང་མཚུངས་པ་དག་ཏུ་བསྲུངས།། 13

རིགས་ཀྱི་རིམ་པས་འོངས་པ་ཡིས། གླིང་དུ་འགྲོ་བ་བཟློག་ནས་དེས།
དེ་ལ་མཚོ་ཐབས་རང་ཡུལ་དུ། འོས་པས་ཆུང་ངུ་འཚོང་པ་བསྟན།། 14

དང་པོར་ཚོང་ལས་སྐྱེས་པ་ནི། ཀརྵ་པ་ཎ་བཞི་དག་དང་།
དེ་ནས་ཉི་མ་གཞན་ལ་ནི། དེ་ལས་གཉིས་འགྱུར་བཞི་འགྱུར་དང་།། 15

དེ་ནས་བརྒྱད་འགྱུར་དག་ཀྱང་རྙེད། ཐམས་ཅད་དེ་ཡིས་མ་ལ་ཕུལ།
དེ་ནས་གླིང་བགྲོད་རིགས་ལ་ནི། འོས་པ་ཐོས་ནས་འདོད་ལྡན་གྱུར།། 16

རྒྱ་མཚོར་འགྲོ་བ་རྩོམ་པ་ཡི། ཚོགས་ལ་ཆགས་ཤིང་གུས་ལྡན་དེ།
མ་ཡིས་བཟློག་པར་གྱུར་མོད་ཀྱང་། བཟློག་པ་ཉིད་དུ་ཁས་མ་བླངས།། 17

དེ་ནས་མ་ནི་ངུ་ངན་གྱིས། འཁྲུགས་ཤིང་རྐང་པ་ལ་འཁྱིལ་བས།
གཏུག་པ་དེ་ཡི་དཔལ་བཞིན་དུ། རྐང་པས་རབ་ཏུ་སྤྲངས་ནས་སོང་།། 18

जातमात्रेषु पुत्रेषु तस्याः प्राप्तेषु पञ्चताम् ।
पश्चिमे वयसि श्रीमानेकः सूनु रजायत ॥ ११ ॥

विपत्तिभीत्या तस्यापि कन्यानामाकरोत् पिता ।
मैत्रकन्यकनामासौ तेनाभूद्विश्रुतः शिशुः ॥ १२ ॥

समुद्रगमने तस्य जनके निधनं गते ।
एकपुत्रैव जननी निधितुल्यं ररक्ष तम् ॥ १३ ॥

कुलक्रमागतां तस्य द्वीपयात्रां निवार्य्य सा ।
आदिदेश स्वदेशार्हां स्वल्पविक्रयजीविकाम् ॥ १४ ॥

स पूर्व्वविक्रयोत्पन्नं कार्षापणचतुष्टयम् ।
ततो द्विगुण मन्यस्मिन् दिनेऽप्यथ चतुर्गुणम् ॥ १५ ॥

ततश्चाष्टगुणं लाभं सर्व्वं मात्रे न्यवेदयत् ।
कुलोचितां द्वीपयात्रां श्रुत्वाभूदथ सोत्सुकः ॥ १६ ॥

समुद्रगमनारम्भसम्भाररससादरः ।
स मात्रा वार्य्यमाणोऽपि नामन्यत निवर्त्तनम् ॥ १७ ॥

ततः स पादपतितां जननीं शोकविह्वलाम् ।
हतः श्रियमिवोत्सार्य्य चरणेन विनिर्ययौ ॥ १८ ॥

དང་པོར་ཁྲིམས་པ་འཁྲུལ་ཞིང་ཡི་གེ་ཕྱིད་བརྗོད་ཡིད་འོང་བདུད་རྩིའི་
ཚར་དག་འཛིབས།

དེ་ནས་དུལ་བའི་ཡིད་ལ་རེ་བའི་དགའ་སྟོན་རྒྱས་པ་བརྒྱ་ཡིས་དགའ་བ་འཛིན།
ཕྱི་ནས་མི་བཟད་ལང་ཚོའི་ཚ་བ་དྲག་པོས་བཀྲང་པ་དག་ཏུ་སླ་བྱེད་མཁས།
གསལ་བར་ནག་པོ་བརྩེགས་པ་ལྟར་རྩུབ་ངན་པའི་བྲུ་ཡིས་སྡུག་
བསྔལ་གདུང་བར་བྱེད།། 19

རིན་ཅེན་བསྒྲུབ་པར་འདོད་པ་དེ། མ་ཡི་སྲུ་ངན་ཡངས་པར་བཞིན།
རྒྱ་མཚོའི་དྲུང་དུ་ཕྱིན་ནས་ནི། གཟིངས་ལ་རབ་ཏུ་ཞོན་ཏེ་སོང་།། 20

དེ་ནས་དེ་ཡི་གཟིངས་ཆེན་ནི། རབ་རྔོ་ཆུ་སྲིན་སེན་མོ་ཡིས།
སོག་ལེ་དྲག་པོས་དྲལ་བར་བྱས། འཇིག་རྟོགས་དག་ཏུ་ཞིག་པར་གྱུར།། 21

གློ་གྲོས་རབ་འཕྱུར་དེ་ཡིས་ནི། མ་ཡི་བསམ་བཅོམ་ཁྲར་ལྟེ་བས།
གཟིངས་ནི་ཞིག་པར་གྱུར་བ་དེས། དམོད་པ་བཞིན་དུ་སྨོངས་པ་ཐོབ།། 22

དེ་ནས་ཤིང་གི་ཚལ་པ་ཐོབ། དལ་གྱིས་འདུ་ཤེས་ཐོབ་པ་དེས།
ཆུ་གཏེར་གྱི་ནི་ངོགས་ཕྱིན་ནས། ནགས་ཚལ་ཆེན་པོའི་ནང་དུ་ཞུགས།། 23

གཅིག་པུ་བདྲན་ཉམས་འགྲོ་བ་དེས། སྐྱེ་བོ་མེད་པར་ཡུན་རིང་ན།
གྲོང་ཁྱེར་རྩེ་དགའ་ཅན་ཞེས་པ། དགའ་བ་མཆོག་ནི་ཐོབ་པར་གྱུར།། 24

བཞིན་རས་ཟླ་ཟེར་ཚོགས་རྣམས་ཀྱིས། ཟླ་བའི་འོད་ནི་སྨྲོ་བྱེད་པ།
ལྷ་ཡི་བུ་མོ་བཞི་དག་གིས། གུས་བཅས་མགྲོན་ནི་བྱས་པ་དེ།། 25

पीयूषं स्खलिताङ्घ्रिवर्णललितालापैः शिशु र्वर्षति
प्रीतिं स्फीततरां मनोरथशतैर्धत्ते विनेय स्ततः ।
पश्चादुत्कटयौवनोष्मविकटाहङ्कारवादी पटुः
दुष्पुत्रः स्फुटकालकूटकटुकः कष्टां करोति व्यथाम् ॥ १९ ॥

विपुलं जननीशोकमिव प्राप्य स सागरम् ।
समारुह्य प्रवहणं ययौ रत्नार्जनोत्सुकः ॥ २० ॥

मकरस्फारनखरक्रूरक्रकचदारितम् ।
तत स्तस्य प्रवहणं कूले प्राज्य मभज्यत ॥ २१ ॥

तस्योत्सिक्तमते र्मातु राशाभङ्गगुरो र्भरात् ।
भग्ने प्रवहणे तस्मिन् मोहः शाप इवाभवत् ॥ २२ ॥

ततः फलहकावाप्त्या शनैः संज्ञा मवाप्य सः ।
तीर मासाद्य जलधे र्जगाहे गहनं महत् ॥ २३ ॥

एकाकी हारितधृतिः स व्रजन् विजने चिरात् ।
रम्यं रमणकं नाम नगरं दिव्य माप्तवान् ॥ २४ ॥

अप्सरोभि श्चतसृभि र्वदनेन्दुत्विषां चयैः ।
ज्योत्स्नापूरं सृजन्तीभिः कृतातिथ्यः स सादरम् ॥ २५ ॥

གསེར་གྱི་རྫིང་བུ་དག་གིས་འགྲམ། རིན་ཅན་འཁྲི་ཤིང་དགའ་བའི་ཚལ།
ནོར་བུའི་ཁང་པ་ཁྲི་སྟན་ཅན། དེར་ནི་ལོངས་སྤྱོད་ལྡན་པར་གྱུར།། 26

སྐྱིད་པ་དག་ནི་བདེ་བའི་མཐའ། ཕུན་ཚོགས་ཉིན་མོངས་དག་ལ་མཛེས།
ལུས་ཅན་རྣམས་ལ་རེ་མོས་ཀྱིས། ངེས་པ་ཉིད་དུ་འཁོར་བ་ཡིན།། 27

དགའ་མགུར་སྤྱོད་པ་ལ་ཆགས་པའི། རི་དགས་མིག་ཅན་དེ་དག་རྣམས།
དེ་དང་རོལ་པས་ཡུན་རིང་དུ། སྐལ་བཟང་དོན་བྲས་ཉིད་དག་ཐོབ།། 28

ཁྱོད་ཀྱིས་གྲོང་ཁྱེར་ལྷ་ཡི་ལམ། བདག་ཉིད་ཀུན་གྱིས་སྣང་བྱ་ཞེས།
དེ་དག་གིས་བརྗོད་ཚེ་ན་དེ། ལྷག་པར་དེ་ནི་འགྲོ་འདོད་གྱུར།། 29

རང་དབང་མངོན་པར་མི་འདོད་ཅིང་། ངེས་པར་བསྔམས་པའི་སི་མཐུན་ཕྱོགས།
སྤྲོག་ཆགས་རྣམས་ནི་བཀག་པ་ལ། ཐལ་ཆེར་གྱུས་པ་ལྷག་པར་འཕེལ།། 30

དེ་ནས་དགེ་མཚན་གྱིས་དྲངས་དེ། ལྷོ་ཡི་ཕྱོགས་ཀྱི་ལམ་དེ་ནས།
སོང་བས་རྟག་དུ་སྲོས་ཞེས་པར། ལྷ་ཡི་གྲོང་ཁྱེར་གཞན་པ་ཐོབ།། 31

དེར་ནི་དེ་བཞིན་ལྷ་མོ་བརྒྱད། སྤྱོད་བྱ་ཉིད་དུ་གྱུར་རྣམས་ཀྱིས།
དེ་ལ་རིམ་གྲོ་འི་བཀོད་པ་དག། དེ་ལས་ལྷག་པ་ཡུན་རིང་བྱས།། 32

དེ་དག་རྣམས་ཀྱིས་རིམ་པ་དེས། ལྷོ་ཡི་ལམ་ནི་བཀག་པ་ན།
དེ་ནི་དགེ་མཚན་ལས་སོང་བས། གྲོང་ཁྱེར་གསུམ་པ་དགའ་བྱེད་ཐོབ།། 33

हेमपुष्करिणीतीरे रम्ये रत्नलतावने ।
मणिमन्दिरशय्यासु तत्र सम्भोगवानभूत् ॥ २६ ॥

विपदः सुखपर्य्यन्ताः क्लेशप्राप्ताश्च सम्पदः ।
अवर्त्तिन्यो भवन्त्येव पर्य्यायेण शरीरिणाम् ॥ २७ ॥

रतिभोगप्रणयिना तास्तेन हरिणेक्षणाः ।
रममाणा श्चिरं प्रापुः सौभाग्यस्य कृतार्थताम् ॥ २८ ॥

नगरे दक्षिणः पन्था वर्ज्यः सर्व्वात्मना त्वया ।
इत्युक्त स्ताभिरधिकं सोऽप्यभूद् गमनोत्सुकः ॥ २९ ॥

कामं नियमवामस्य स्वाधीनानभिलाषिणः ।
प्रायेण वर्द्धते जन्तो र्निषेधेनाधिकादरः ॥ ३० ॥

ततः स कौतुकाकृष्ट स्तेन दक्षिणवर्त्मना ।
व्रजन् प्राप सदामत्तं नाम दिव्यं पुरं परम् ॥ ३१ ॥

अष्टावप्सरस स्तत्र तदङ्गोग्यत्व मागताः ।
तस्योपचाररचनां चिरं चक्रु स्ततोऽधिकाम् ॥ ३२ ॥

ताभिः क्रमेण तेनैव निषिद्धे दक्षिणेऽध्वनि ।
स कौतुकाद्गतः प्राप तृतीयं नन्दनं पुरम् ॥ ३३ ॥

དེར་ནི་རིམ་པ་དེ་ཉིད་ཀྱིས། །རྩེ་དགས་རྣམ་པར་རོལ་དེ་ལ།
ལྷ་མོ་བཅུ་དྲུག་དགའ་མགུ་ཡིས། །ལོངས་སྤྱོད་སྤྱད་བྱ་ཉིད་དུ་གྱུར། ། 34

དེ་དག་གིས་ཀྱང་བཀག་པ་ཡི། །ལྷ་ཡི་ལམ་ནས་སོང་གྱུར་པ།
གྲུས་བཅས་དེ་ཡིས་ཁང་བཟང་ནི། །ཚངས་པའི་མཆོག་ཅེས་བྱ་བར་ཕྱིན། ། 35

དེ་ནས་དེར་ཡང་ལྷ་མོ་གཞན། །སུམ་ཅུ་རྩ་གཉིས་ལོངས་སྤྱོད་ཀྱིས།
སྐལ་བཟང་གིས་ནི་ཡང་དག་ཐོབ། །དེ་བཞིན་ལྷོ་ཡི་ལམ་ནས་སོང་། ། 36

དེ་ནི་སོང་པས་མི་བསྲུན་པའི། །གྲོགས་བཞིན་ཉེན་མོངས་ཚོགས་ཀྱི་གནས།
ལྕུགས་ཀྱི་རང་བཞིན་རྩུབ་པོ་ཡིས། །གྲོང་ཁྱེར་ངན་འགྲོ་མང་པོ་ཐོབ། ། 37

དེར་དེ་ནང་དུ་ཞུགས་པ་ན། །རིམ་པས་ས་ལ་སྒོ་རྣམས་ནི།
སྒྲ་ཞིག་དག་གིས་བསྒྲིབས་པ་བཞིན། །མཚམས་མེད་བསྡམས་པ་ཉིད་དུ་གྱུར། ། 38

དེ་ཡི་ནང་ན་སྐྱེས་བུ་ནི། །ལུས་ཆེན་གནས་པ་དེ་ཡིས་མཐོང་།
མཐའ་དག་ཉན་མོངས་སྐྱོན་རྣམས་ཀྱིས། །སྣོད་ནི་ཤིན་དུ་ཆེ་བ་བཞིན། ། 39

བཅིངས་ཤིང་རྒྱུན་དུ་ཁྲག་རྒྱུན་འབབ། །དེ་ཡི་སྤྱི་བོར་འཁོར་ལོ་ནི།
རྣོན་པོ་འབར་བས་དཀྲིགས་པ་དག། ལོངས་སུ་འཁོར་བ་མཐོང་བར་གྱུར། ། 40

རང་གི་མགོ་ལས་ཟགས་པ་ཡི། །རྣག་ཁྲག་གིས་ནི་ཟས་བསྒྲུབས་པ།
དེ་མཐོང་དྲག་པོའི་ཡིད་བྱུང་ནས། །མཛའ་བོའི་བུ་མོས་རབ་སྨྲས་པ། ། 41

षोडशाप्सरस स्तस्य रतिभोगोपभोग्यताम् ।
तत्र क्रमेण तेनैव ययुर्लीला विलासिनः ॥ ३४ ॥

ताभि र्निषिद्धेन पुन र्दक्षिणेन पथा व्रजन् ।
अष्टोत्तराख्यं प्रासाद माससाद स सादरः ॥ ३५ ॥

द्वात्रिंशदेव संप्राप्य तत्राप्यप्सरसः पराः ।
सम्भोगसुभग स्तद्वद्ययौ दक्षिणवर्त्मना ॥ ३६ ॥

स व्रजन् नगरं प्राप दुर्गप्राय मयोमयम् ।
परुषं खलसौहार्द मिवायासचयाश्रयम् ॥ ३७ ॥

तस्य तत्र प्रविष्टस्य क्रमाद्द्वाराणि भूमिषु ।
केनापि पिहितान्येव ययु र्निःसन्धिबन्धताम् ॥ ३८ ॥

तदन्तरे महाकायं सोऽपश्यत् पुरुषं स्थितम् ।
सकलक्लेशदोषाणां विस्तीर्णमिव भाजनम् ॥ ३९ ॥

ज्वालावलयितं चक्रं तस्य मूर्ध्नि परिभ्रमत् ।
तीक्ष्णं ददर्श चक्रस्य सक्तं रक्तप्रवाहिणः ॥ ४० ॥

स्वशिरःप्रसुतैः पूयशोणितै र्विहिताशनम् ।
तं दृष्ट्वा तीव्रनिर्वेदादवदन्मैत्रकन्यकः ॥ ४१ ॥

གདུང་བ་དྲག་པོས་ཉོན་ཁྲིད་སྲུ། འདི་ན་ལས་དག་ཅི་ཡི་འབྲས།
ཞེས་དེས་སྙིང་རྗེས་དྲིས་པ་ན། སྐྱེས་བུས་དེ་ལ་རབ་སྨྲས་པ།། 42

བདག་ཉི་མ་ལ་གནོད་བྱེད་དོ། འདི་ནི་ལས་དེ་ཉིད་ཀྱི་འབྲས།
དེ་དག་གྲོས་ནས་དེ་ཡིས་ནི། སྡིག་པ་དྲན་ནས་དོགས་པར་གྱུར།། 43

དེ་ཡིས་བསམས་པ་བདག་ལ་ཡང་། མ་ལ་གནོད་བྱས་སྡིག་པ་ཡོད།
སྡིག་པ་རབ་ཏུ་བརྗོད་པའི་གྲོགས། དྲན་པར་བྱེད་འདི་བདག་གིས་མཐོང་།། 44

ཁྲི་ར་བ་ཡི་སྒྲ་སྒྲོན་གྱི། ནགས་ནས་རི་དགས་རྒྱུ་བ་བཞིན།
སྡིག་དེས་བདེ་བའི་དཀྱིལ་འཁོར་ནས། ང་ཉིད་དྲངས་པ་མ་ཡིན་ནམ།། 45

ཞེས་པའི་བསམ་པས་དེ་འཁྲུགས་ཤིང་། སྒོ་བསྡམས་སྒྲོན་ན་གནས་པའི་ཚེ།
སྙིང་ནི་ཀུན་ཏུ་འདར་བྱེད་པའི། སྐད་ནི་མཁའ་ལ་རབ་གྲགས་པ།། 46

ཡུན་རིང་བཅིངས་པ་ངེས་པར་གྲོལ། གསར་དུ་འོངས་པ་དམ་དུ་ཆིངས།
གསར་པ་ཆིངས་ལ་བཅིངས་པ་གྲོལ། འདི་ནི་མཚམས་ཀྱི་དུས་ལ་བབ།། 47

ཅེས་སྒྲ་མཁའ་ལས་གྲགས་པའི་ཚེ། སྐྱེས་བུ་དེ་གྲོལ་སྐད་ཅིག་ལས།
མཛའ་བོ་འི་བུ་མོ་འི་མགོ་ལ་ནི། འཁོར་ལོ་རབ་ཏུ་འབར་བ་ལྷུང་།། 48

དེ་དུས་གནན་གཙོད་གདུང་བས་གཟིར། གསར་བཅིངས་མཛའ་བོ་འི་བུ་མོ་དེས།
བཅིངས་པ་གྲོལ་བར་གྱུར་པ་ཡི། སྐྱེས་བུ་དེ་ལ་རབ་སྨྲས་པ།། 49

कस्त्वं क्रूरव्यथाक्रान्तः कस्येदं कर्म्मणः फलम् ।
पृष्ट स्तेनेति कारुण्यात् पुरुष स्त मभाषत ॥ ४२ ॥

मातुः कृतापकारोऽहं तस्येदं कर्म्मणः फलम् ।
एतदाकर्ण्य सोऽप्यासीत् पापसंवादशङ्कितः ॥ ४३ ॥

सोऽचिन्तयन्ममाप्यस्ति पापं मातुः कृतागसः ।
अयं पापसहाध्यायी दृष्टः स्मरणकृन्मया ॥ ४४ ॥

नूनं तेनैव कृष्टोऽहं पापेन सुखमण्डलात् ।
शौनिकेन चरन् कामं मृगः शष्पवनादिव ॥ ४५ ॥

इति चिन्ताकुले तस्मिन् बद्धद्वारपुरस्थिते ।
उच्चचाराम्बराद्वाणी हृदयाकम्पकारिणी ॥ ४६ ॥

चिरबद्धाः प्रमुच्यन्तां निबध्यन्तां नवागताः ।
बद्धमुक्तिनवाबन्धेष्वयं प्राप्तोऽवधिक्षणः ॥ ४७ ॥

इत्युदीर्णे दिवः शब्दे मुक्तः स पुरुषः क्षणात् ।
दीप्तं तच्चक्र मपतन्मैत्रकन्यस्य मस्तके ॥ ४८ ॥

नवबद्धः स तत्कालं मर्म्मच्छेदव्यथातुरः ।
तं मुक्तबन्ध मवदत् पुरुषं मैत्रकन्यकः ॥ ४९ ॥

ལྷ་མོ་རྗེས་སུ་ཆགས་ལྡན་ལོངས་སྤྱོད་ཡིད་ནི་འཕྲོག་པ་ཅན།
གྲོང་ཁྱེར་ནོར་བུའི་ཁང་ཁྱིམ་མཛེས་པ་དེ་དག་ལོངས་བཏང་ནས།
སྡིག་པའི་ལས་ཀྱིས་ཐག་པ་བཞིན་དུ་རབ་ཏུ་གྱུར་པས་དྲངས།
དེ་ཡིས་བཀུག་ནས་ཀྱང་ནི་དབང་མེད་མི་རྣམས་འཇུག་པར་བྱེད། 50

ཁྲི་རྣམས་ལ་བཞིན་ས་འདི་ཉིད་དུ་ཕྱུགས་དག་འོངས་པར་གྱུར།
གང་ན་འདི་ཡི་ལས་ཀྱི་འཕྲི་ཤིང་ཆ་ཡིས་ལོངས་བསྐྱབས་པ།
དུས་ཀྱིས་ལོངས་སྨིན་སྤྱོད་བྱ་ཉིད་དུ་གྱུར་པ་མདུན་ན་གནས།
ངེས་པར་སྤྱོད་བྱ་སྤོབས་ལྡན་འདི་ཡིས་མཆོག་ཏུ་འགུགས་པར་བྱེད། 51

མ་ལ་གནོད་པ་བྱས་རྣམས་ཀྱིས། ཉོན་མོངས་སྤྱོད་མཚམས་ཇི་སྲིད་དུས།
སྐྱེ་བོ་ཁ་ཅིག་བདག་ལྟ་བུ། གསར་དུ་འོང་བ་འགྱུར་རམ་ཅི། 52

ཞེས་པ་ལུས་ཅན་འཁོར་ལོ་ནི། རབ་ཏུ་འབར་བའི་རྩིས་བཙོམ་ཞིང་།
གཟིར་བ་དེ་ཡིས་ཚིག་ཐོས་ནས། སྐྱེས་བུས་དེ་ལ་རབ་སྨྲས་པ། 53

ལོ་ནི་སྟོང་ཕྲག་དྲུག་ཅུ་དང་། ལོ་ནི་བརྒྱ་ཕྲག་དྲུག་ཅུ་དག།
ཉོན་མོངས་ཉེ་བར་ལོངས་སྤྱོད་འདི། སྡིག་པའི་ལས་ཅན་རྣམས་ལ་ངེས། 54

མ་ལ་གནོད་པ་བྱས་པ་ཡི། སྡིག་ཅན་རྣམས་ལ་འདི་ན་གནས།
འཇིགས་སུ་རུང་བ་གཞན་དག་ཡོད། གཞན་ཡང་དེ་ལྟར་འོང་བར་འགྱུར། 55

त्यक्त्वा पुराणि मणिमन्दिरसुन्दराणि
तान्यप्सरःसरसभोगमनोहराणि ।
कृष्टः प्रकृष्टतरपातकभोग्यकाले
कालेन कल्पितफला किल कर्म्मवल्ली ॥ ५० ॥

शूनामिव क्षिति मिमां पशुरागतोऽस्मि
कर्षत्यलं बलवती भवितव्यतैव ।
कृष्ट स्तथैव च विशत्यवशो मनुष्यः
यत्रास्य तिष्ठति पुरः परिपाकभोग्या ॥ ५१ ॥

क्लेशभोगावधौ कालः कियान् मातुः कृतागसाम् ।
अप्यागमिष्यति नवः कश्चिदस्मद्विधो जनः ॥ ५२ ॥

इति ज्वलितचक्राग्रदीर्य्यमाणस्य दाहिनः ।
तस्यार्त्तस्य वचः श्रुत्वा पुरुष स्त मभाषत ॥ ५३ ॥

षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ।
अस्य क्लेशोपभोग्यस्य नियतिः पापकर्म्मणाम् ॥ ५४ ॥

इहापराणि घोराणि सन्ति स्थानानि पापिनाम् ।
मातुः कृतागसामन्ये ये समेष्यन्ति तद्विधाः ॥ ५५ ॥

དེས་བརྗོད་ཤིན་དུ་བཟོད་དཀའ་དེ། མཛའ་བོ་འི་བུ་མོས་ཐོས་གྱུར་ནས།
རབ་གདུང་སྡུག་བསྔལ་མྱོང་བ་ལས། གཞན་དག་གཟིར་ལ་བརྩེ་བས་སྨྲས།། 56

ད་ནི་སྡིག་པ་བྱེད་པའི་མི། གང་ཞིག་རབ་དུ་འོང་འགྱུར་བ།
དེ་དག་དོན་དུ་འཁོར་ལོ་འདི། བདག་གི་མགོ་ལ་གནས་གྱུར་ཅིག། 57

འདི་ལྟའི་གདུང་བ་དྲག་ཅིང་རིང་། དེ་དག་རྣམས་ཀྱིས་ཇི་ལྟར་བཟོད།
བདག་ཉིད་གཅིག་པུ་གདུང་གྱུར་ལ། ཐམས་ཅད་གདུང་མེད་གནས་གྱུར་ཅིང་།། 58

འཁོར་ལོ་རང་གི་འབྲས་བཅད་ནས། གཞན་གྱི་དོན་དུ་བདག་གིས་བཟུང་།
སྐྱེ་བོ་རང་ཉིད་གདུང་མེད་པས། གཞན་གྱི་གདུང་བ་ཡོངས་མི་ཤེས།། 59

སེམས་ཅན་ཕན་ཚོལ་སྙིང་རྗེ་ཡིས། གཟིར་བ་དེ་ཡིས་འདི་བརྗོད་ཚེ།
དམ་པའི་ཀུན་རྟོག་མཐུ་ཡིས་ནི། དེ་ཡི་འཁོར་ལོ་མཁའ་ལ་སོང་།། 60

ཡལ་འདབ་དག་ནི་གདུང་བ་འཕྲོག་ཅིང་མི་རྟོག་གྲགས་སྙན་དཀར་པོ་རྒྱས་
པར་བྱེད།
འཕྲུལ་ལ་རྡི་བཟང་ལེགས་ལྡན་ལོངས་སྤྱོད་སྐལ་བཟང་ཕུན་སུམ་ཚོགས་པ་
སྨྲར་ཡང་འཛིན།
དམ་པའི་ཀུན་རྟོག་འཕྲི་ཤིང་སྙིང་རྗེའི་བརྟན་ལྡན་དམ་པ་རྣམས་ཀྱི་སྙིང་ལ་ནི།
གང་ཚེ་ཡང་དག་བདབ་པ་དེ་ཚེ་རོ་ལྡན་འབྲས་བུ་ཅི་དང་ཅི་མི་སྐྱེད།། 61

སྙིང་རྗེའི་བསོད་ནམས་བདག་ཉིད་ཀྱིས། སྐད་ཅིག་དེ་ལ་སྡིག་ཟད་དེ།
ལུས་ནི་ཡོངས་སུ་བཏང་ནས་དེ། ལྷ་ཡི་གནས་སུ་ལྷར་གྱུར་ཏོ།། 62

श्रुत्वेति दुःसहतरं तेनोक्तं मैत्रकन्यकः ।
स्वव्यथादुःखसंवादात् परार्त्तिदययावदत् ॥ ५६ ॥

अधुना ये समेष्यन्ति नराः पातककारिणः ।
तेषामर्थे ममैवेदं चक्रं तिष्ठतु मस्तके ॥ ५७ ॥

कथं सहन्ते ते तीव्रां दीर्घा मेवंविधां व्यथाम् ।
एकस्यैव व्यथा मेऽस्तु सर्व्वे तिष्ठन्तु निर्व्यथाः ॥ ५८ ॥

परार्थे धारयिष्यामि चक्रं भुक्ता निजं फलम् ।
परव्यथां विजानाति न जनः स्वव्यथां विना ॥ ५९ ॥

इत्युक्ते करुणार्त्तेन तेन सत्त्वहितैषिणा ।
सत्संकल्पप्रभावेन तच्चक्र मगमन्नभः ॥ ६० ॥

तापं पल्लविता निहन्ति तनुते शुभ्रं यशः पुष्पिता
सद्यः सौरभभव्यभोगसुभगा लक्ष्मीं विधत्ते पुनः ।
कारुण्यार्द्रतया यदैव हृदये सद्भिः समारोपिता
सत्संकल्पलता सदैव सरसं किं किं न सूते फलम् ॥ ६१ ॥

कारुण्यात् पुण्यमाहात्म्यात् तत्क्षणात् क्षतकिल्बिषः ।
स बभूव परित्यज्य देहं देवः सुरालये ॥ ६२ ॥

ང་ཉིད་སྨོན་ཚེ་བྱམས་བདག་ཉིད། མཛའ་བོ་འི་བུ་མོ་ཉིད་གྱུར་ཏེ།
མ་ནི་ཀྱང་པས་རབ་འཕངས་པའི། སྡུག་བསྔལ་གནས་སྐབས་དེ་དག་ཐོབ།། 63

ཀར་ཤ་པ་ཙམ་མ་ལ་ནི། མཆོད་པས་ལྷ་མོ་འི་གནས་ཀྱང་ཐོབ།
དེ་སྐད་མ་ཡི་སྲིད་ཞུ་ནི། ཆོས་ཀྱི་མཆོག་ཏུ་བཅོམ་ལྡན་གསུངས།། 64

མ་ནི་བཀྲ་ཤིས་འཕྲེང་བ་ཡོན་ཏན་དང་ལྡན་པ་ནི་མཉེས་ག་ཤིན་ཅོད་པན་ཏེ།
དེ་དག་དགྱེས་སྐད་གང་གི་སྤྱི་བོར་ཞབས་ཀྱི་པདྨོ་རབ་ཏུ་འགོད་བྱེད་པ།
ཕྱོགས་ཀུན་ཡོངས་སུ་འགེངས་པར་བརྩོན་པའི་གྲགས་པ་ཕུན་ཚོགས་རབ་
ཏུ་གསལ་བ་རྒྱས།
རྟག་ཏུ་དགའ་སྟོན་བསོད་ནམས་རྒྱུན་ལྡན་དེ་དག་འགྲོ་བའི་མཆོད་བྱ་ཉིད་དུ་གྱུར།། 65

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་ བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མཛའ་བོ་འི་བུ་མོ་འི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་དགུ་ཅུ་རྩ་གཉིས་པའོ།།

सोऽहमेवाभवं पूर्व्वं मैत्रात्मा मैत्रकन्यकः ।
पादेनोत्सारणान्मातुः प्राप्त स्तां दुःखवर्त्तिनीम् ॥ ६३ ॥

कार्षापणार्पणान्मातुः प्राप्त श्चाप्सरसां पदम् ।
इत्यूचे भगवान् मातुः शुश्रूषाधर्म्म मुत्तमम् ॥ ६४ ॥

माता मङ्गलमालिका गुणमयी वात्सल्यमौलिः पिता
तौ येषां शिरसि प्रियाय कुरुतः पादाम्बुजारोपणम् ।
सर्व्वाशापरिपूरणोद्यतयशःसम्पत्प्रकाशोदया-
स्ते पुण्याभरणाः प्रयान्ति जगतां नित्योत्सवाः पूज्यताम् ॥
६५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
मैत्रकन्यकावदानं द्वानवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་ཅུ་རྩ་གསུམ་པ།

གང་གིས་མཆོད་འོས་མཆོད་པར་བསྐྱབ་ལ་མི་དགོག་ལ་སོགས་དེ།
སེམས་མེད་རྣམས་ཀྱང་འོས་པའི་སེམས་དང་ལྡན་པ་ཉིད་དུ་འགྱུར།
རྒྱལ་ལ་གུས་པའི་ཁྱད་པར་བསྟེན་པ་རྣམས་ལ་བསྔགས་འོས་ཤིང་།
དད་པ་རབ་རྒྱས་བདུད་རྩིའི་རྒྱུན་ཐིགས་དེ་དག་རྒྱལ་གྱུར་ཅིག ། 1

མཉན་ཡོད་རྒྱལ་བྱེད་ཚལ་དུ་སྔོན། དབེན་པར་བཞུགས་པའི་བཅོམ་ལྡན་འདས།
རྒྱལ་བ་དེ་ལ་མངོན་ཕྱོགས་དེ། མགོན་མེད་ཟས་སྦྱིན་གྱིས་གསོལ་བ། ། 2

བཅོམ་ལྡན་ཁྱོད་ཀྱི་གུས་པར་བཞིན། ཀུན་དུ་ཆེར་འོས་ཡོན་དན་གྲགས།
བདག་གི་བུ་མོ་མ་ག་དྷ། བཟང་མོ་དར་པ་བབ་པར་གྱུར། ། 3

གྲོང་ཁྱེར་བུ་རམ་ཤིང་འཕེལ་གྱི། དཔལ་ལྡན་དོན་མཐུན་མགོན་པོ་འི་བུ།
ཁྱུ་མཆོག་བྱིན་ཞེས་བྱ་བ་ནི། དེ་ཡི་ལག་པ་འཛིན་པར་འདོད། ། 4

བཅོམ་ལྡན་གལ་ཏེ་བཟོད་ན་བདག བུ་མོ་དེ་ནི་དེ་ལ་སྟེར།
ནོར་སྒྲོག་ཁྱོད་ཀྱི་དབང་གྱུར་བདག ཁྱོད་ཀྱི་བཀའ་ཡི་རྗེས་སུ་འབྲང་། ། 5

དེ་འདྲི་གསོལ་ཚེ་བཅོམ་ལྡན་འདས། དྲི་མེད་མཉེས་གཤིན་བསམ་ལྡན་པས།
ཅི་སྐྱོན་བུ་མོ་དེ་ལ་ནི། སྦྱིན་པར་མཛོད་ཅེས་བཀའ་སྩལ་བ། ། 6

चिनवतितमः पल्लवः ।

श्लाघ्या जयन्ति जिनभक्तिविशेषभाजां
श्रद्धासुधाप्रसरनिर्झरशीकरा स्ते ।
निश्चेतनोऽप्युचितचेतनतामिवैति
यः पूज्यपूजनविधौ कुसुमादिवर्गः ॥ १ ॥

श्रावस्त्यां विजनासीनं जिनं जेतवने पुरा ।
अनाथपिण्डदोऽभ्येत्य भगवन्त मभाषत ॥ २ ॥

त्वद्भक्तिरिव सर्व्वंच महार्हगुणविश्रुता ।
भगवन् प्रौढ़ि मायाता कन्या मम सुमागधा ॥ ३ ॥

श्रीमतः सार्थनाथस्य नगरे पुण्डवर्द्धने ।
सूनु र्वृषभदत्ताख्य स्तत्पाणिग्रह मिष्यते ॥ ४ ॥

कन्यां ददामि तां तस्मै भगवन् यदि मन्यसे ।
त्वदधीनधनप्राण स्त्वदाज्ञाशरणो ह्यहम् ॥ ५ ॥

इत्युक्ते तेन भगवान् वात्सल्यविमलाशयः ।
को दोष स्तनया तस्मै दीयता मित्यभाषत ॥ ६ ॥

སྟོན་པའི་བཀའ་ནི་རབ་བཟུང་ནས། དེ་ལ་གུས་པར་ཕྱག་འཚལ་ཏེ།
དཔལ་ལྡན་མགོན་མེད་ཟས་སྦྱིན་ནི། རང་གི་ཁང་པར་རབ་ཏུ་སོང་། 7

དེ་ནས་འཁོར་བ་ཆེ་དང་བཅས། བུ་མོ་མ་ག་དྷ་བཟང་མོ།
རིན་ཅེན་གོས་མང་རབ་སྤྲེར་དེས། འོས་པ་དེ་ལ་རབ་ཏུ་བྱིན། 8

དེ་ནས་བྱིན་པའི་མ་ག་དྷ། བཟང་མོ་ཐག་རིང་ཡུལ་བགྲོད་ཅིང་།
བཅོམ་ལྡན་འདས་ཀྱི་ཞབས་དྲན་ནས། མིག་ནི་མཆི་མ་དང་བཅས་གྱུར། 9

གྲོང་ཁྱེར་བུ་རམ་ཤིང་འཕེལ་དུ། ཡུན་རིང་ཞིག་ན་དེས་སླེབ་ནས།
རྟག་ཏུ་ཁྱོ་ཡི་ཁྱིམ་དུ་ནི། བདག་པོའི་བཀུར་སྟི་ལ་ཆགས་གྱུར། 10

དེ་ནས་ནམ་ཞིག་སྐྱུག་མོ་ནི། གྲངས་ལས་འདས་པ་འགོད་བསྟོན་ཞིང་།
ཟས་ཀྱི་ཚོགས་རྣམས་སྦྱོར་བྱེད་པ། ནོར་ཅན་ཞེས་པས་དེ་ལ་སྨྲས། 11

མ་ག་དྷ་བཟང་མཆོད་པ་ཡིས། ཡོ་བྱད་ཐམས་ཅད་ཆས་དག་མཛད།
འགྲོ་བས་འཚོད་བྱ་ཡོན་ཏན་ཅན། སྐྱེ་བོ་ནང་པར་བདག་ཁྱིམ་འོང་། 12

བླ་མ་སྐྱེ་བོ་ཐམས་ཅད་ཀྱིས། ཞི་བའི་གནས་སུ་མཆོད་བྱ་བ།
ཀུན་སྤོངས་ཟད་སྦྱོར་ཟད་བྱེད་པ། དེ་དག་རྣམས་ནི་འོང་པར་འགྱུར། 13

ཞེས་དེས་བརྗོད་པ་དེར་ནི་དེས། དགེ་སློང་ཚོགས་ལ་མཆོད་པ་དེ།
ཡོངས་སུ་བརྟག་པར་ཤེས་གྱུར་ནས། རྩོམ་པ་དེ་ལ་ཆགས་པར་གྱུར། 14

शास्तुः शासन मादाय सादरं प्रणिपत्य तम् ।
अनाथपिण्डदः श्रीमान् प्रययौ निजमन्दिरम् ॥ ७ ॥

ततः सुमागधां कन्यां विभवेन महीयसा ।
अहार्य्यं स ददौ तस्मै भूरिरत्नाम्बरप्रदः ॥ ८ ॥

दत्ता दूरतरं देश मथ यान्ती सुमागधा ।
भगवच्चरणस्मृत्या सवाष्पनयनाभवत् ॥ ९ ॥

चिरेण सा समासाद्य नगरं पुण्ड्रवर्द्धनम् ।
शुश्रूषाभिरता पत्युः सदा भर्त्तृगृहेऽवसत् ॥ १० ॥

कदाचिदथ तां श्वश्रूः भोज्यसम्भारकारिणी ।
उवाच धनवत्याख्या संख्यातीतव्ययोद्यता ॥ ११ ॥

पूज्योपकरणं सज्जं कुरु सर्व्वं सुमागधे ।
गृहान्नः प्रातरागन्ता जगत्पूज्यगुणो जिनः ॥ १२ ॥

गुरवो गौरवपदं पूज्याः सर्व्वजनस्य ते ।
समेष्यन्ति क्षपणकाः संमोहक्षपणोद्यताः ॥ १३ ॥

इत्युक्ता सा तया तत्र बभूवारम्भतत्परा ।
ज्ञात्वा भिक्षुगणायैव तां पूजां परिकल्पिताम् ॥ १४ ॥

དེ་ནས་ཉིན་གཞན་ཁྲིམ་དུ་ནི། སྐྲ་དང་སྨ་ར་རབ་འབལ་ཞིང་།
དཀའ་ཐུབ་དྲག་པོས་ཀུན་ཉོན་སྨོངས། གཅེར་བུ་ཟད་བྱེད་པ་རྣམས་ཞུགས། ‖ 15

མ་དེ་སྨན་མ་རྩྭ་ཡི་ཟས། སྒོམས་པས་རགས་པར་གྱུར་པ་བཞིན།
གོས་མེད་ངོ་ཚ་མེད་དེ་དག། མ་ག་དྷ་བཟང་གྲིས་མཐོང་ནས། ‖ 16

བླ་མའི་དྲུང་དུ་ངོ་ཚ་སྟེ། བཞིན་ནི་གོས་ཀྱིས་རབ་བསྒྲིབས་ནས།
སྐྱོ་དང་ཆགས་བྲལ་ཀྱིས་དུད་པས། སྒྲུག་མོའི་སྐྱེ་བོ་ལ་སྨྲས་པ། ‖ 17

གང་འདིར་ཕྱོགས་གོས་རྣམས་ཀྱི་ཡང་། མདུན་དུ་བུད་མེད་སྐྱེ་བོ་འཁོད།
ཀྱི་མ་ཀུན་ཏུ་སྤྱོད་པ་འདི། ཤིན་ཏུ་ཡུན་རིང་ཡོན་ནས་མཐོང་། ‖ 18

མི་མིན་རྭ་དང་བྲལ་གྱུར་པ། དུལ་བ་འདི་དག་ཁྲོད་ཀྱི་ནི།
ཁྲིམ་ན་གསོལ་བྱེད་འདི་དག་ལ། བུད་མེད་ངོ་ཚ་མེད་དམ་ཅི། ‖ 19

གང་གིས་ཁ་ཟས་མ་བཏང་བ། དེ་ཡིས་གོས་ནི་ཇི་ལྟར་བཏོང་།
མ་བསླམས་རིམ་པ་འདི་ནི་ཅི། ཁྱེད་ནི་གནས་མིན་དག་ལ་གུས། ‖ 20

སྐྲ་ནི་རབ་ཏུ་འབལ་བའི་ལས་དག་ཉིད་ཀྱིས་བརྩེ་བ་མེད་པ་དྲག་པོ་བསྟན། སྐྱེ་བོར་བཅས་ལ་འདོམས་དཀྲིས་གོས་དག་སྤྱངས་པས་ཚུལ་ཁྲིམས་ཀྱིས་ནི་གཏམ་ཉིད་ཅི། ཚུལ་འཆོས་སྡོམ་པ་དང་ལྡན་འཛིགས་བྱེད་བཞིན་ལ་ཁྲོ་བ་རང་ཉིད་རྣམ་པར་བསྟེན། དུལ་བ་དང་ལྡན་གཅེར་བུ་འདི་དག་ཕྱུགས་རྣམས་བཞིན་དུ་ཟས་དགའ་འཚོལ་བར་བྱེད། ‖ 21

अथापरेऽह्नि विविशु र्नग्नाः क्षपणका गृहम् ।
उल्लुञ्चितकचश्मश्रुसंक्लेशनिश्चितव्रताः ॥ १५ ॥

तानलज्जानवसनानवलोक्य सुमागधा ।
माषशष्पाशनाभ्यासपीवरान् महिषानिव ॥ १६ ॥

लज्जिता वाससाच्छाद्य वदनं गुरुसन्निधौ ।
खेदनिर्व्वेदविनता श्वश्रूजन मभाषत ॥ १७ ॥

अहो बताय माचारः सुचिरादवलोकितः ।
दिगम्बराणामप्यग्रे यदिहास्ते बधूजनः ॥ १८ ॥

एते भवद्गृहेऽदान्ता भुञ्जन्ते शृङ्गवर्जिताः ।
अमानुषत्वान्नैतेषां लज्जन्ते नून मङ्गनाः ॥ १९ ॥

अस्थाने भवतां भक्तिः कोऽय मुच्छृङ्खलः क्रमः ।
न त्यक्त मशनं येन स कथं वस्त्र मुञ्झति ॥ २० ॥

केशोन्मूलनकर्म्मणैव निश्चितं नैर्घृण्य मावेदितम्
कौपीनांशुकवर्जनेन सुजने शीलस्य वार्त्तैव का ।
दम्भारम्भभयङ्करे च वदने क्रोधः स्वयं लक्ष्यते
नग्नाना मशनैषिणां नियमिना मेषां पशूनामिव ॥ २१ ॥

གང་ན་ཕྱུགས་འདི་མཆོད་བྱེད་པ། དེ་ན་སྤྲང་པར་བྲ་བ་སྤྱ།
ཡང་ན་འདི་ནི་ཡུལ་གྱི་སྐྱོན། སོང་བའི་རྗེས་སུ་འགྲོ་བའི་ལུགས།། 22

ཞེས་སྨྲ་ཆགས་བྲལ་དང་ལྡན་མ། དེ་ལ་ཕྲུག་མོས་ལན་སྨྲས་པ།
བཟང་མོ་ཁྱེད་ཀྱི་ཡབ་ཀྱི་ནི། ཁང་པར་ཅི་འདྲ་མཆོད་པ་སྨྲོས།། 23

དེས་སྨྲས་བདག་གི་ཕ་ཁྱིམ་དུ། སྙིང་རྗེས་འགྲོ་བ་ཐམས་ཅད་ནི།
ཁྱེད་འཕགས་དགེ་བ་ལ་སྦྱོར་བའི། བཅོམ་ལྡན་རྒྱལ་བ་མཆོད་པར་བྱེད།། 24

བསམ་གཏན་ལ་ཆགས་གཡོ་མེད་སྤྱན་ལྡན་མཛེས་སྨུག་རྫོགས་པའི་རྒྱ་མཚོ་སྟེ།
ཤངས་ཀྱི་རྒྱུད་ནི་ཡངས་ཤིང་དྲང་པོ་ཟམ་སྟེགས་དག་ཏུ་གྱུར་པ་ཡིན།
རབ་བརྒྱང་མཛེས་ལྡན་རྒྱན་གྱིས་སྤོང་པའི་སྐྱན་གྱི་ཞགས་པ་མདོན་དཀར་སྟེ།
མཛེས་པ་ཉིད་ཀྱིས་མཁས་རྣམས་ནང་དུ་ཞི་བ་ཅི་ཡང་རྒྱས་པར་བྱེད།། 25

ཟླ་ཟེར་ལྟར་མཛེས་དེ་ནི་ལག་གཉིས་གླང་ཆེན་ལག་པའི་རྣམ་པ་དང་།
སྒང་བ་རབ་རྒྱས་དབུ་ལ་ལྷུན་སྐྱེས་རབ་བཀུས་རང་བཞིན་ནོར་བུ་དང་།
ལག་མཐིལ་དུ་སོན་ནི་མོ་དུང་དང་རྒྱལ་མཚན་ཆུ་སྐྱེས་འཁྲིང་བ་དང་།
ཞི་བའི་རང་བཞིན་རྒྱལ་སྲིད་ཆེན་པོ་ལ་འོས་མཚན་ཉིད་རྣམ་པར་འཛིན།། 26

ཐུབ་ཆེན་རྣམས་ཀྱིས་མངོན་པར་འདོད་པ་སྐྱེད་བྱེད་དེ་ཡི་ནི།
རང་བཞིན་མངོན་པར་འདོད་པའི་རྟག་པ་ཀུན་དང་བྲལ་བ་ཉིད།

यच्चैते पशवः पूज्या स्तत्नोत्सार्य्या भवन्ति के ।
अथवा देशदोषोऽयं गतानुगतिका स्थितिः ॥ २२ ॥

इति ब्रुवाणां तां श्वश्रू विषण्णा प्रत्यभाषत ।
पितु स्ते भवने भद्रे पूज्यते वद कीदृशः ॥ २३ ॥

सावदन्मत्पितु र्गेहे पूज्यते भगवान् जिनः ।
कारुण्यात् सर्व्वजगतां कुशलातिशयोद्यतः ॥ २४ ॥

ध्यानाधीनः स्तिमितनयनः पूर्णलावण्यसिन्धुः
नासावंशं विपुलसरलं सेतुभूतं दधानः ।
भूषाशून्यप्रसृतरुचिमत्कर्णपाशाभिरामः
कान्त्यैवासौ किमपि विदुषां शान्ति मन्त स्तनोति ॥ २५ ॥

शिरसि सहजप्राज्यालोकप्रसेकमयं मणिं
करिपतिकराकारौ बाह्न कवत्कनकद्युतिः ।
करतलगतां लेखां शङ्खध्वजाम्बुजमालिकां
शमयममहासाम्राज्यार्हं बिभर्त्ति स लक्षणम् ॥ २६ ॥

तस्याभिलाषजनकस्य महामुनीनां
सर्व्वाभिलाषकलनारहितः स्वभावः ।

དྲན་པའི་ས་གཞི་བག་མེད་གནས་ནི་ལྷག་མ་མེད་པར་བྲུས།
ཆགས་པ་རབ་ཏུ་བཏང་བའི་མཆུ་ནི་ཤིན་ཏུ་དམར་དང་བཅས།། 27

གྲོལ་བ་ལྷག་པར་འགྲོགས་པའི་མཛེའ་གཙུགས་དང་ལྡན་བྲུམས
པ་དག་ནི་ཡིད་ལ་ཉལ།
བཟོད་པ་དེ་ཡི་རང་བཞིན་བྱེད་ཅིང་བརྩེ་བ་སྙིང་ལ་དམ་དུ་མཉམ་པར་སྦྱོར།
ཡིད་འོང་མང་པོ་ལ་ཆགས་ཀུན་གྱི་བསམ་པ་རྒྱས་བྱེད་སྨོན་མེད་ཐུབ་པ་ནི།
དེ་ཡི་ཞི་བ་སྨོན་མེད་བདག་ཉིད་ཆགས་བྲལ་སྙིང་པོ་ཅན་ནི་ལེགས་པར་མཆོད།། 28

ཚུལ་ཁྲིམས་དུ་ཀུ་ལ་དང་ལྡན། དམ་པ་རྣམས་ཡིད་སྒྲིབ་བྲལ་ཉིད།
གང་གི་རབ་ཏུ་སྲུང་བར་འཛིན། དེ་དག་བདག་ཅག་ཁྲིམ་དུ་མཆོད།། 29

ཐམས་ཅད་བསྲུངས་པའི་ནོར་བུ་གང་། དྲན་པ་ཡིས་ཀྱང་སྲིད་པའི་སྤྲུལ།
ཆགས་སྡང་དྲག་པོའི་མཆེ་ལྡན་པས། སྦྲུར་ཡང་སྐྱེ་བོ་ལ་གནོད་མེད།། 30

ཅེས་པ་དེ་ཚིག་རྣ་བ་ཡི། བཅུད་ལེན་ཐོས་ནས་སྐྱུག་མོ་ནི།
འཕྲལ་ལ་རབ་དང་དྲི་མ་མེད། དགའ་མགུ་ལྡན་པས་དེ་ལ་སྨྲས།། 31

དེ་ནི་བཟླ་བའི་ཐབས་འགའ་ཞིག། མཆོག་གི་བཞིན་ལྡན་ཡོད་དམ་ཅི།
ཁྱོད་ཀྱི་བསོད་ནམས་འབྲེལ་བ་ལས། ངེད་ཀྱང་བདུད་རྩིའི་གནས་ཐོབ་བམ།། 32

ཞེས་པ་སྐྱུག་མོས་གུས་ལྡན་སློ། ཚུལ་དང་མཐུན་པར་དེ་ལ་ཞུས།
བདག་གིས་ཁྱེད་ལ་དེ་བསྟན་ཞེས། གུས་དང་བཀུར་བ་ལྡན་མས་སྨྲས།། 33

निःशेषितस्मृतिभुवः प्रमदाश्रयस्य
रागोज्झितस्य सुतरा मधरः सरागः ॥ २७ ॥

मूर्त्तिं निर्भरसङ्गमप्रणयिनी मैत्री मनःशायिनी
क्षान्तिस्तन्मयकारिणी हृदि दया गाढं समाश्लेषिणी ।
सर्व्वाशाभरणस्य भूरिदयितासक्तस्य संलक्ष्यते
तस्यापूर्व्वमणे रनन्यमहिमा वैराग्यगर्भः शमः ॥ २८ ॥

पूज्यः स भवनेऽस्माकं यस्य प्रव्रज्यया सताम् ।
धत्ते शीलदुकूलानां निरावरणतां मनः ॥ २९ ॥

विश्वरक्षामणे र्यस्य स्मृत्यापि भवभोगिना ।
रागद्वेषोग्रदंष्ट्रेण बाध्यते न पुनर्जनः ॥ ३० ॥

इति तस्या वचः श्वश्रूः श्रुत्वा श्रोत्ररसायनम् ।
सद्यः प्रसादविशदा तां जगाद प्रमोदिनी ॥ ३१ ॥

अपि तद्दर्शनोपायः कश्चिदस्ति वरानने ।
अपि त्वत्पुण्यसम्बन्धाद्वयमप्यमृतास्पदम् ॥ ३२ ॥

इति सानुनयं श्वश्र्वा सा सादरधियार्थिता ।
तं वः सन्दर्शयामीति बभाषे भक्तिमानिनी ॥ ३३ ॥

དམ་བཅའ་ཆེན་པོ་འི་ཚོགས་ཀྱིས་ནི། ཁྲར་དག་ཁྱེར་བ་འདོད་པ་ཡི།
སྒྲོད་ལ་མལ་སྟན་སྤང་ལ་འཛོགས། སྐད་ཅིག་བསམ་གཏན་བསྐྱངས་པར་གྱུར། 34

དེ་ནས་ཁང་བཟང་ལ་འཛེགས་ས་དེ། བཅོམ་ལྡན་བསྟན་པའི་ཕྱོགས་སུ་ནི།
ཕྱག་འཚལ་མཆོད་བྱ་མཆོད་འོས་པའི། མེ་ཏོག་སྙིམ་པ་རབ་ཏུ་གཏོར། 35

དེ་ཡི་གནས་སུ་མངོན་ཕྱོགས་ངེས། མེ་ཏོག་ག་ཏུག་པ་རྒྱས་མཆོད་ནས།
ཡངས་པའི་མིག་ནི་ཀུན་དགའ་ཡི། མཆི་མས་འགགས་པས་རབ་སྨྲས་པ། 36

བཅོམ་ལྡན་ཐུགས་རྗེ་འོས་པ་བདག། དཀོན་ཅིག་བསྟུམ་པོ་རྣམ་སྤངས་དེ།
ཁྱོད་ཀྱི་གནས་ཀྱི་རི་དགས་བཞིན། ཤིན་དུ་ཐག་རིང་ཡུལ་འདིར་ཕྱིན། 37

ཁྱོད་ཀྱི་ཞབས་ཀྱི་པདྨ་ཟུང་གི་སྐྱབས་ནི་ཐོབ་པ་བདག།
རིང་དུ་གནས་པར་གྱུར་ཀྱང་སྤྱན་ཀྱི་རེག་མཛོད་བརྩེ་བ་ཅན།
མཉེན་ག་ཤིན་མཉེར་པའི་བློ་ལྡན་ཆེན་པོ་རྣམས་ཀྱི་ཐུགས་རྗེ་ནི།
ཡུལ་གཞན་རིང་པོར་ཕྱིན་པ་རྣམས་ལ་ཆུང་བ་ཉིད་མི་འགྱུར། 38

འབངས་ཀྱི་བུ་མོ་དག་གིས་དེང་། བཅོམ་ལྡན་ཁྱོད་ནི་མགྲོན་དུ་གཉེར།
ནང་པར་བྱོན་པས་བདག་ལ་ནི། ཁྱབ་བདག་ཁེངས་པ་གནང་བར་མཛོད། 39

ཅེས་པ་བརྗོད་ནས་དེས་འཕངས་པ། རྣམ་པར་བཀྲ་བའི་མེ་ཏོག་འཕྲེང་།
གྲུས་པའི་ཕོ་ཉ་སྨྲོག་བཅས་བཞིན། ནམ་མཁའ་ལས་ནི་རབ་ཏུ་སོང་། 40

महाप्रतिज्ञासंभारभरनिर्वहणैषिणी ।
सा संशयतुलारूढा क्षणं ध्यानपराभवत् ॥ ३४ ॥

ततः प्रासाद मारुह्य भगवत्सेवितां दिशम् ।
प्रणिपत्यासृजत् पूज्यपूजार्हंकुसुमाञ्जलिम् ॥ ३५ ॥

पुष्पधूपोदकैरर्चां सा कृत्वा तत्पदोन्मुखी ।
आनन्दबाष्पसंरुद्धविस्तीर्णनयनावदत् ॥ ३६ ॥

अनुकम्प्यैव भगवन् रत्नत्रयविवर्जिता ।
तवाश्रममृगीवाहं दूरं देश मिमं गता ॥ ३७ ॥

त्वत्पादपद्मयुगलं शरणं प्रपन्नां
दूरस्थितामपि दृशा स्पृश मां दयालो ।
वात्सल्यपेशलधियां महतां प्रवास-
दूरीकृतेषु करुणा न तनुत्व मेति ॥ ३८ ॥

भगवन् दाससुतया त्वं मयाद्य निमन्त्रितः ।
प्रातरागमनेनैव मानं वितर मे विभो ॥ ३९ ॥

इत्युदीर्य्य तयोत्सृष्टा विचित्रकुसुमावली ।
सजीवितेव प्रययौ नभसा भक्तिदूतिका ॥ ४० ॥

དཀར་དང་དམར་དང་སེར་དང་སྔོན་པོ་དག་གི་མེ་ཏོག་འཕྲེང་།
གདུག་པའི་དུ་བས་བཀྲ་བ་དཔལ་གྱིས་མཁའ་ལ་འགྲོ་བ་དེ།
བདེ་སོགས་བདག་པོ་འི་གཞུ་ཡི་ཁྲི་ཤིང་ཡང་དག་རྒྱུ་བ་ནི།
ཆུ་འཛིན་གཞོན་ནུ་དག་ལ་རབ་ཏུ་ཆགས་ཤིང་ཡུན་རིང་མཛེས༎ 41

དེ་ནས་རྒྱལ་བྱེད་ཚལ་སོང་ནས། སྐད་ཅིག་གིས་ནི་མེ་ཏོག་འཕྲེང་།
གུས་པ་དག་དང་ལྡན་པ་དེ། སྟོན་པའི་ཞབས་པད་དག་ལ་ལྷུང་༎ 42

བཅོམ་ལྡན་ཐམས་ཅད་མཁྱེན་པས་ཀྱང་། མ་ག་དྷ་ནི་བཟང་མོ་ཡིས།
འདོད་པ་ཀུན་མཁྱེན་ཐུགས་རྗེ་ཡིས། ཀུན་དགའ་བོ་ལ་སྔོན་དུ་གསུངས༎ 43

གྲོང་ཁྱེར་བྲུ་རམ་ཤིང་འཕེལ་དུ། ནང་པར་བདག་ཅག་འགྲོ་བར་བྱ།
མ་ག་དྷ་བཟང་དགེ་འདུན་དང་། བཅས་པའི་བདག་མཆོད་དོན་དུ་གཉེར༎ 44

འདི་ནས་གྲོང་དེ་དཔག་ཚད་ནི། དྲུག་ཅུ་ལྷག་པའི་བརྒྱ་ཕྲག་དེ།
ཉི་མ་གཅིག་གིས་འགྲོ་བར་བྱ། འདི་ལ་ཐོགས་འཁོར་རིགས་པ་མིན༎ 45

གང་གང་རྫུ་འཕྲུལ་ཆེན་པོ་ཡིས། མཁའ་ལ་འགྲོ་ནུས་མཐུ་ལྡན་པ།
དེ་དང་དེ་ལ་ཁྱོད་ཀྱིས་ནི། མགྲོན་དུ་གཉེར་བའི་ཚུལ་ཤིང་བྱིན༎ 46

ཞེས་པ་བདེ་གཤེགས་ཀྱི་བསྐུལ་དེ། ཉིན་གཅིག་བགྲོད་པས་ཕྱིན་པ་དང་།
ཚུལ་ཤིང་གིས་ནི་མགྲོན་གཉེར་བ། དགེ་སློང་རྣམས་ལ་རབ་ཏུ་བཤད༎ 47

सा श्वेतरक्तहरितासितपुष्पपाली
खे धूपधूमशबला शनकैः प्रयान्ती ।
बालाम्बुदप्रणयिनी सुचिरं चकाशे
सञ्चारिचापलतिकेव शचीधवस्य ॥ ४१ ॥

अथ जेतवनं प्राप्य क्षणेन कुसुमावली ।
सा भक्तिशालिनी शास्तुः पपात चरणाब्जयोः ॥ ४२ ॥

भगवानपि सर्व्वज्ञः सर्व्वं ज्ञात्वा समीहितम् ।
सुमागधायाः कारुण्यादानन्द मवदत् पुरः ॥ ४३ ॥

प्रात र्गन्तव्य मस्माभि र्नगरं पुण्ड्रवर्द्धनम् ।
सुमागधा प्रार्थयते ससङ्घस्य ममार्च्चनम् ॥ ४४ ॥

शतषष्ट्यधिकं तच्च योजनानामितः परम् ।
एकेनाह्ना च गन्तव्यं न विलम्बोऽत्र युज्यते ॥ ४५ ॥

व्योम्ना महर्द्ध्या शक्नोति गन्तुं यो यः प्रभाववान् ।
निमन्त्रणशलाकां त्वं तस्मै तस्मै समर्पय ॥ ४६ ॥

प्रेरितः सुगतेनेति स भिक्षुभ्यो न्यवेदयत् ।
एकाह्नगमनप्राप्यं शलाकाभि र्निमन्त्रणम् ॥ ४७ ॥

རྫུ་འཕྲུལ་ཆེ་ལྡན་ཐམས་ཅད་ཀྱིས། དེར་ནི་རྩལ་ཤིང་བླངས་པའི་ཚེ།
གང་པོ་བྲུམ་པར་སྤུས་བྲུས་པ། ཀུན་པོ་ཡིས་ཀྱང་རིམ་པས་བླངས།། 48

མ་གྲུ་ནི་ཐོབ་པ་མིན་པ་དེས། རྩལ་ཤིང་དག་ལ་ལག་བཀྲུངས་ཚེ།
ཅུང་ཟད་འཛུམ་དཀར་བཞིན་རས་ཅན། ཀུན་དགའ་བོ་ཡིས་དེ་ལ་སྨྲས།། 49

མགོན་མེད་ཟས་སྦྱིན་ཁྱིམ་དུ་ནི་ཀྱང་པ་གཉིས་ཀྱི་འགྲོ་བྲ་མིན།
དཔག་ཚད་དྲུག་ཅུ་དང་བཅས་བརྒྱ། ཉིན་ཕྱེད་ཀྱིས་ནི་འདའ་བར་བྱ།། 50

ཞེས་པ་དེ་བརྗོད་ཀུན་པོ་ནི། སྐྱེངས་པས་བཞིན་རས་རྣམ་པར་དུད།
བསམས་དེ་རང་གི་སྣེ་མདུན་དུ། དམན་པའི་དངོས་པོ་བཟོད་པར་དཀའ།། 51

ཐོག་མེད་དུས་སུ་བསགས་པ་ཡི། ཉོན་མོངས་སྐྱེས་དང་ཀྱ་བ་སོགས།
འབད་པ་ཅན་གྱི་གཞོམ་ནུས་ན། རྫུ་འཕྲུལ་གནས་ནི་ཐོབ་ལ་ཅི།། 52

ཆགས་བྲལ་དྲག་པོའི་བློ་གྲོས་ཀྱིས། དེ་ལྟར་སེམས་ཤིང་དག་པ་ཡིས།
སེམས་ལྡན་དེ་ལ་སྐད་ཅིག་གིས། རྫུ་འཕྲུལ་ཆེན་པོ་རབ་ཏུ་སྐྱེས།། 53

དེ་ནས་མཚན་མོ་འདས་གྱུར་ཏེ། སྔ་དྲོ་དགེ་སློང་ཐམས་ཅད་ནི།
སྣ་ཚོགས་ལྷ་ཡི་ཆས་ལྡན་པའི། གཞལ་ཡས་ཁང་ནས་མཁའ་ལ་གཤེགས།། 54

སྐབས་དེར་སྟོན་པ་ཆེན་པོ་ལ། ཚོགས་ཀྱིས་ཡོངས་སུ་གང་གྱུར་པ།
བདག་པོའི་ཁྱིམ་དུ་བཅོམ་ལྡན་འདས། ལྷ་འདོད་མ་ག་དྷ་བཟང་མོ།། 55

शलाकासु गृहीतासु तत्र सर्व्वैं र्महर्द्धिभिः ।
पूर्णः कुम्भोपधानो यः स्थविरोऽप्यग्रहीत् क्रमात् ॥ ४८ ॥

तेन प्राप्तप्रभावेन शलाकायां प्रसारिते ।
पाणौ प्राह त मानन्दः किञ्चित् स्मितसिताननः ॥ ४९ ॥

अनाथपिण्डदगृहं न गन्तव्यं पदद्वयम् ।
सषष्टियोजनशतं दिनार्द्धेनैव लङ्घ्यते ॥ ५० ॥

इत्युक्तः स्थविर स्तेन वैलक्ष्यविनताननः ।
अचिन्तयत् स्ववर्गाग्रे न्यूनभावो हि दुःसहः ॥ ५१ ॥

अनादिकालोपचिताः क्लेशजन्मजरादयः ।
हन्तुं सयत्नैः शक्यन्ते प्राप्तु मृद्धिपदं कियत् ॥ ५२ ॥

इति चिन्तयत स्तस्य तीव्रसंवेगया धिया ।
प्रादुरासीत् क्षणेनैव महर्द्धिः शुद्धचेतसः ॥ ५३ ॥

अथ रात्र्यां व्यतीतायां प्रभाते सर्व्वभिक्षवः ।
नानाचित्रदशवेशेन विमानै र्नभसा ययुः ॥ ५४ ॥

अत्रान्तरे महारम्भसम्भारपरिपूरिते ।
सुमागधा भर्त्तृगृहे भगवद्दर्शनोत्सुका ॥ ५५ ॥

མེ་ཏོག་གདུག་པའི་མཆོད་པ་ཡི། བཀོད་པ་འཛིན་ལ་མངོན་ཕྱོགས་ཤིང་།
སྐྱུག་མོ་གྲོས་པོ་ཁྲོ་རྣམས་དང་། ལྷན་ཅིག་ཁང་བཟང་ལ་འཛོག་འཁོད།། 56

དེ་ནས་ཧ་ཡི་ཤིང་རྟར་གནས། དགེ་སློང་ཀུན་ཤེས་ཀཽ་ཎྜི་ནྱ།
རྣམ་མང་ངོ་མཚར་རྫུ་འཕྲུལ་ནི། མཆོག་ལྡན་དང་པོ་རབ་ཏུ་མཐོང་།། 57

ཉི་མ་དང་མཚུངས་དེ་མཐོང་ནས། ཡ་མཚན་གྲོས་སོགས་དགའ་བ་ཡིས།
མ་ག་དྷ་བཟང་ལ་སྨྲས་པ། བཅོམ་ལྡན་ཞེས་པ་འདི་འམ་ཅི།། 58

དེས་སྨྲས་འདི་ནི་བཅོམ་ལྡན་མིན། དགེ་སློང་ཀུན་ཤེས་ཀཽན་ཎྜི་ནྱ།
འོད་ཟེར་དམན་པ་མིན་པ་འདི། ཉི་མ་དག་དང་མཚུངས་པར་མཐོང་།། 59

དེ་ནས་རིམ་གྲིས་ཤིང་རྟ་ཡིས། ཁྲོན་པའི་ཚོ་ན་གྲོས་སོགས་ཀྱིས།
བཟང་མ་བཅོམ་ལྡན་འདི་འམ་ཅི། འདི་འམ་ཅི་ཞེས་རབ་ཏུ་སྨྲས།། 60

དེས་སྨྲས་འདི་ནི་སྟོན་པ་མིན། འདི་དག་དེ་ཡི་བཀའ་ལ་འོས།
དགེ་སློང་རབ་ཞི་བསྔགས་པར་འོས། དཀའ་ཐུབ་རབ་འབར་འོད་ཟེར་ཅན།། 61

གསེར་ལྡོན་མཛེས་པས་དགའ་བ་རི་ཡི་ནི།
རྩེ་མ་ལ་ཞོན་སྔོན་ལ་བྱོན་པ་གང་།
ངོ་མཚར་བྱེད་པ་མཐུ་ནི་གཟུགས་ཅན་བཞིན།
དཔལ་ལྡན་དགེ་སློང་འདི་ནི་འོད་སྣངས་ཆེ།། 62

सह प्रासाद मारुह्य श्वश्रूश्वशुरभर्त्तृभिः ।
तस्थौ कुसुमधूपार्घ्यरचनासंग्रहोन्मुखी ॥ ५६ ॥

भिक्षुराज्ञातकौण्डिन्य स्ततोऽम्बरथ मास्थितः ।
दिव्यर्द्धिविविधाश्चर्य्यैः प्रथमं प्रत्यदृश्यत ॥ ५७ ॥

तं दृष्ट्वा सूर्य्यसङ्काशं विस्मिताः श्वशुरादयः ।
ऊचुः सुमागधां प्रीत्या किमेष भगवानिति ॥ ५८ ॥

सावदद्भगवान्नायं दृश्यते तरणिप्रभः ।
अय माज्ञातकौण्डिन्यो भिक्षुरक्षुसदीधितिः ॥ ५९ ॥

आपतत्सु क्रमेणाथ रथेषु श्वशुरादयः ।
किमयं किमयं भद्रे भगवानिति तां जगुः ॥ ६० ॥

साब्रवीन्नैव शास्ताय मेते तच्छासनोचिताः ।
भिक्षवः प्रशमश्लाघ्या स्तपोदीप्ततरत्विषः ॥ ६१ ॥

यः कान्तहेमद्रुमरम्यशैल—
शृङ्गाधिरूढः परतोऽभ्युपैति ।
आश्चर्य्यसज्जन्मूर्त्त इव प्रभावः
श्रीमान् महाकाश्यप एष भिक्षुः ॥ ६२ ॥

ཆུ་ལྡན་ཆར་སྤྲིན་ཟབ་མོའི་འབྲུག་སྒྲ་ལྡན།
གདོང་ལྔ་ཤིང་རྟ་དག་ལ་གནས་པ་གང་།
མཁའ་ལ་སྤྲིན་དུ་བྲིན་པའི་དགེ་སློང་འདི།
ས་ལ་ཡོན་ཏན་གྱིས་བསྒྲགས་ཤཱ་རི་བ་བུ།། 63

གཉིས་འཐུང་སོ་བཞི་ཀི་ལ་ཤ་བཞིན་དུ།
རབ་དཀར་ལ་ཞེན་མཐའ་ཡས་མཛེས་པ་གང་།
བྲིན་པའི་དགེ་སློང་དེ་ནི་འགྲོ་རྣམས་ན།
བསོད་ནམས་ལྡན་མཆོག་མཽ་གལ་བུ་ཞེས་བྱ།། 64

གསེར་པད ཊི་ཏྲུ་རུ་ཨི་ཡུ་བ་ཅན།
རིན་ཅེན་སྦྱུ་གུ་གེ་སར་གྱིས་མཚན་ཞོན།
ཕྱོགས་ནི་དྲི་བཟང་གིས་འགེངས་བྲིན་པ་གང་།
དགེ་སློང་དེ་ཉིད་མ་འགགས་པ་ཞེས་གྲགས།། 65

གང་ཞིག་མཁའ་ལྡིང་ལ་ཞོན་གཤོག་རླུང་གིས།
ཆུ་འཛིན་རབ་ཏུ་གཏོར་བའི་འཆི་མེད་ལམ།
མགྱོགས་པ་རྒྱས་པ་རྣམ་པར་གཅོད་བྱེད་པ།
དགེ་སློང་འདི་སྟེ་བྱམས་པའི་བུ་གང་པོ།། 66

སྙིང་སྟོབས་ཆུ་གཏེར་ཆེ་གང་མཆོག་གི་ལམ།
ཤིན་དུ་ཞི་བ་མཐའ་མེད་དག་ལ་གནས།

पञ्चाननस्यन्दन माश्रितो यः
सतोयजीमूतगभीरघोषम् ।
व्योम्ना समभ्येति गुणैः प्रगीतः
स एष भिक्षु र्भुवि शारिपुत्रः ॥ ६३ ॥

आरुह्य कैलास मिवातिशुभ्रं
द्विपं चतुर्दन्त मनन्तकान्तिः ।
आयाति यः पुण्यवतां जगत्सु
मौद्गल्यनामा च स एष भिक्षुः ॥ ६४ ॥

वैदूर्य्यनालं कनकारविन्द-
मारुह्य रत्नाङ्कुरकेशराढ्यम् ।
उपैति यः सौरभपूरिताशः
स एष भिक्षुः प्रथितोऽनिरुद्धः ॥ ६५ ॥

यश्चाम्बराग्रं गरुडाधिरूढः
पक्षानिलोत्सारितवारिवाहः ।
विगाहते स्फीतवनेन भिक्षु-
र्मैत्रायणीह्यनुरयं सुपूर्णः ॥ ६६ ॥

अनन्त मास्थाय नितान्तशान्त-
मौर्थ्यापथं सत्त्वमहोदधि यः ।

འོད་ཀྱི་བདུད་རྩིས་ཕྱོགས་ཆོས་རབ་དུ་སྤྲོ།
མཐུ་ལྡན་དགེ་སློང་འདི་ཧ་ཐུལ་ལོ། ། 67

གསེར་གྱི་དྲ་ལ་ཡངས་པའི་འཁྲི་ཤིང་ནི།
རྣམ་པར་གཡོ་བས་དཀྲིགས་པ་མདོན་དགའ་ཞོན།
བསོད་ནམས་གསལ་རྫོགས་མདོན་པར་འོངས་པ་གང་།
དགེ་སློང་འདི་ནི་གློ་ལྡན་ཉེ་བར་འཁོར། ། 68

གསེར་དང་རིན་ཅེན་རབ་འབར་པ་དྲི་རིས།
བི་དྲུ་རུ་ཡི་གཞལ་ཡས་ཁང་རྩེར་ཞོན།
འོད་ཀྱི་བྲུགས་བཞིན་བྱོན་པ་གང་འདི་ནི།
དགེ་སློང་ཀུ་ཎྜ་ཨ་ན་ཞེས་པ་འོ། ། 69

གང་ཞིག་གཟུགས་དང་ལྡན་པའི་ཆོས་ལ་བཞིན།
ཁྱུ་མཆོག་ལ་ཞོན་མཁའ་ལ་རྣམ་པར་ལྡིང་།
རབ་གནས་ཡོངས་སུ་གནས་ཐ་རྣམས་ཀྱི་མཆོག།
བློ་བརླིང་དགེ་སློང་འདི་ནི་ཀཽ་ཎྜི་ལ། 70

ཡང་ཡང་དང་བ་གཞལ་ཡས་ཁང་འོད་ཀྱིས།
ཡུད་ཙམ་བར་སྣང་འཛུམ་རླབས་དགའ་ལྡན་པར།
བྲེད་ཅིང་དཀའ་ཐུབ་གཏེར་གང་བྱོན་འདི།
དགེ་སློང་པི་ལིན་ད་བད་སྭ་ཞེས་བརྗོད། ། 71

प्रभाम्बुतैः सर्पति तर्पिताशः
प्रभाववानेष्यजिदेष भिक्षुः ॥ ६७ ॥

विलोलवल्लीवलयाभिरामं
विशाल मारुह्य सुवर्णतालम् ।
यः पुण्यपूर्णद्युति रभ्युपैति
स एष भिक्षु र्मतिमानुपाली ॥ ६८ ॥

आरुह्य वैदूर्य्यविमानशृङ्गं
सुवर्णरत्नोज्ज्वलपत्रलेखम् ।
लिम्पन्निवागच्छति यः प्रभाभिः
कात्यायनो नाम स एष भिक्षुः ॥ ६९ ॥

शरीरिणं धर्म्म मिवाधिरुह्य
विगाहते खं वृषवाहनो यः ।
श्रेष्ठः प्रतिष्ठापरिनिष्ठितानां
गरिष्ठधीः कौष्ठिल एष भिक्षुः ॥ ७० ॥

विमानहंसद्युति भिर्मुहूर्त्तं
सितोर्म्मिरम्यं मुहु रन्तरीक्षम् ।
कुर्व्वन् समभ्येति तपोनिधि र्यः
पिलन्दवत्साह्वय एष भिक्षुः ॥ ७१ ॥

མི་རྟོག་རབ་རྒྱས་འཁྲི་ཤིང་རྒྱས་པ་ཡིས།
གསེར་ཚལ་ནང་ན་ང་ཞུགས་ཤིང་བྱོན་པ་གང་།
མི་དམན་ཁྲིམས་ཀྱི་དཔལ་ལ་ལྟོས་མེད་པའི།
དགེ་སློང་འདི་ནི་རྣ་པ་བྱེ་བར་གྲགས། 72

གསེར་གྱི་འོད་ཀྱིས་ཕྱོགས་ཆ་རྣམ་པར་བརྒྱན།
ལྷུན་པོའི་གཟུགས་གཞན་བཞིན་དུ་ལེགས་པར་མཚོན།
འཁོར་ལོ་སྒྱུར་གང་མཁའ་ལ་མཛེས་པ་འདི།
སྟོན་པའི་སྲས་པོ་སྒྲ་གཅན་འཛིན་ཞེས་བརྗོད། 73

དེ་ནས་རི་དང་ཕྱོགས་མཚམས་རྣམས་དང་ནི།
ས་ཡི་དཀྱིལ་འཁོར་མཁའ་ངོས་ཁོང་ལས་ཀྱང་།
རྣམ་བཀྲ་རིན་ཆེན་ཁྲི་དང་བཞོན་པར་གནས།
གྲངས་མེད་རྨད་བྱུང་དགེ་སློང་ཚོགས་འདི་བྱོན། 74

དེ་ལྟར་དེ་ཡིས་རིམ་པས་བཤད་གྱུར་པའི།
དགེ་སློང་དགེ་འདུན་ཁྱད་འཕགས་བཞིན་མཐོང་ནས།
གཞན་དག་མཚོན་མིན་དེ་དག་མཚུངས་པར་ནི།
དགའ་དང་རྨད་བྱུང་གུས་པའི་དབང་ཉིད་གྱུར། 75

དེ་ནས་རང་འབར་གསེར་གྱི་ཕྱེ་མའི་གོས།
ཉི་བརྒྱ་གསལ་བ་འགྲོ་ལ་བྱུང་།

योऽयं समुत्फुल्ललतावितान-
वनान्तराले विहरन्नुपैति ।
स श्रोणकोटिः श्रुत एव भिक्षु-
रक्षुण्णलक्ष्मी र्गृहनिर्व्यपेक्षः ॥ ७२ ॥

य श्चक्रवर्त्ती दिवि भाति सोऽयं
शास्तुः सुतो राहुलकाभिधानः ।
हेमप्रभाभूषितदिग्विभागः
संलक्ष्यते मेरुरिवान्यरूपः ॥ ७३ ॥

एते गिरिभ्योऽथ दिगन्तरेभ्यः
क्ष्मामण्डलाद्व्योमतटान्तराच्च ।
आयान्त्यसंख्याद्भुतभिक्षुसङ्घा
विचित्ररत्नासनवाहनस्थाः ॥ ७४ ॥

तया क्रमेणेति निवेद्यमानं
ते भिक्षुसङ्घं विमुखं विलोक्य ।
ययुः प्रहर्षाद्भुतसम्भ्रमाणां
विधेयतां तुल्य मनन्यलक्ष्म्या ॥ ७५ ॥

अथ ज्वलत्काञ्चनचूर्णवर्णां
जगद्बभूवार्कशतप्रकाशम् ।

གདུང་བའི་ཁྲིད་པར་མ་ལུས་ཞི་བྱེད་པས།
བསིལ་ཟེར་འཕྲེང་བ་བརྒྱ་ལྡར་བསིལ་བ་ཡང་ ॥ 76

དེ་ནས་ནོར་བདག་བརྒྱ་བྱིན་ཚངས་སོགས་བློན་པོ་རྣམས་ཀྱི་ནི།
རྒྱ་ཆེ་ནམ་མཁའ་བགྲོད་པ་བསྟེན་ཅིང་རྗེས་སུ་བགྲོད་པ་ཕྱུལ།
འཆི་མེད་གྲོང་གི་བུ་མོས་མེ་ཏོག་ཚོགས་ནི་གཏོར་བ་ལས།
རྒྱལ་བའི་ཟླ་བ་བསོད་ནམས་ལྡན་པ་རྣམས་ཀྱིས་མིག་ལམ་གྱུར ॥ 77

གྲོང་ཁྱེར་སྒོ་ལམ་བཅོ་བརྒྱད་ལྡན་པ་དེར།
མཚུངས་པའི་སྐུ་ནི་བཅོ་བརྒྱད་དང་བཅས་པས།
རབ་ཞུགས་མ་ག་དྷ་ནི་བཟང་མོའི་ཁྱིམ།
ཟླ་ཞལ་རིན་ཅན་རྡོ་ཡི་རང་བཞིན་བྱས ॥ 78

དེར་ནི་ཡོ་བྱད་རྫོགས་པ་རྣམ་མང་གིས།
མངོན་པར་མཆོད་ཅིང་ཀུན་གྱིས་ཕྱག་འཚལ་ཏེ།
གྲོང་པའི་སྐྱེ་བོ་དག་གིས་ཀུན་ནས་མཆོད།
རྩིག་པར་གཟུགས་བརྙན་སྣང་དེ་ཕྱི་ནས་ཀྱང་ ॥ 79

བཅོམ་ལྡན་བརྩེ་ལྡན་དགེ་འདུན་དང་བཅས་པས།
བརྩེ་བས་མཆོད་པ་བླངས་ནས་རྗེས་གཟུང་ནི།
གཟིགས་པའི་ཚ་ཡིས་མ་ག་དྷ་བཟང་མོ།
གཉེན་དང་བཅས་པ་རྣམས་ལ་བཀའ་དྲིན་བསྐྱབས ॥ 80

अशेषसन्तापविशेषशान्त्या
शीतांशुमालाशतशीतलश्च ॥ ७६ ॥

अथ धनपतिशक्रब्रह्ममुख्यै रमर्त्यै-
र्विपुलगगनयात्रादत्तसेवानुयात्रः ।
अमरपुरपुरस्त्रीकीर्णपुष्पप्रभावा-
न्नयनपथ मयासीत् पुण्यभाजां जिनेन्द्रः ॥ ७७ ॥

अष्टादशद्वारपथा पुरं तत्
स तुल्य मष्टादशमूर्त्तिरेव ।
प्रविश्य चक्रे शशिकान्तरत्न-
शिखामयं वेश्म सुमागधायाः ॥ ७८ ॥

अभ्यर्च्चित स्तत्र वहुप्रकारैः
पूर्णोपचारैः प्रणिपत्य सर्व्वैः ।
अपूजयत् पौरजनः समन्तात्
वहिश्च भित्तिप्रतिविम्बितं तम् ॥ ७९ ॥

सुमागधाया दयया दयालुः
पूजां गृहीत्वा भगवान् ससङ्घः ।
अनुग्रहालोकनसंविभागैः
सर्व्वान्ववाया विदधे प्रसादम् ॥ ८० ॥

མ་ག་དྷ་བཟང་གྲོས་སོགས་སྐྱེ་དང་བཅས།
གྲོང་པའི་སྐྱེ་བོ་ཀུན་དང་བཅས་པ་ཡང་།
དེ་ཚེ་སྟོན་པའི་བསྟན་པ་དག་གིས་ནི།
དེ་དུས་བདེན་མཐོང་བསམ་པ་དག་པར་གྱུར།། 81

དགེ་བ་རྗེས་འབྲེལ་མ་ག་དྷ་བཟང་གི།
བསོད་ནམས་མཐུ་ནི་ཡངས་པ་མཐོང་གྱུར་ནས།
དགེ་སློང་དེ་དག་གིས་དེར་དགེ་མཚན་ལས།
དེ་ཡི་སྔོན་བྱུང་རྒྱལ་བ་དག་ལ་དྲིས།། 82

མ་ག་དྷ་བཟང་དགེ་བའི་རྒྱུ་དག་ནི།
ཚོགས་སུ་དེ་དག་གིས་དྲིས་བཅོམ་ལྡན་འདས།
ཀུན་གཟིགས་དེ་ཡི་ཚེམས་ཀྱི་འོད་རྣམས་ཀྱིས།
ཕྱོགས་སྐོར་སྣང་བ་བྱིན་ཅིང་རབ་གསུངས་པ།། 83

བ་ར་ཎ་སི་དག་ཏུ་སྔོན། ས་བདག་མཛེས་པ་ཀྲི་ཀི་ཡིས།
བུ་མོ་གསེར་འཕྲེང་ཅན་ཞེས་པ། གསེར་འཕྲེང་སྒྲ་དང་ལྡན་པ་བྱུང་།། 84

སྟོན་པ་འོད་སྲུངས་ཞེས་པ་ལ། རྟག་ཏུ་གུས་དང་ལྡན་པ་དེས།
གྲོགས་མོ་བརྒྱ་ཕྲག་སྐྱེ་དང་ནི། ལྷན་ཅིག་དག་ཏུ་རིམ་གྲོ་བསྒྲུབས།། 85

सुमागधा सश्वशुरादिवर्गा
सहापरैः पौरजनैश्च सर्व्वाः ।
शास्तु स्तया देशनया बभूवुः
शुद्धाशया स्तत्क्षणदृष्टसत्याः ॥ ८१ ॥

सुमागधायाः कुशलानुबन्धं
पुण्यं प्रभावं विपुलं विलोक्य ।
ते भिक्षव स्तत्र कुतूहलेन
पप्रच्छु रम्यं जिन मादिरत्नम् ॥ ८२ ॥

पृष्टः स तैः संसदि सर्व्वदर्शी
सुमागधायाः कुशलस्य हेतुम् ।
दन्तप्रभाभिः ककुभां मुखेषु
दिशन् प्रकाशं भगवान् बभाषे ॥ ८३ ॥

वाराणस्या मभूत् पूर्व्वं कृकेः कान्तस्य भूपतेः ।
सुता काञ्चनमालाख्या कुचकाञ्चनमालिका ॥ ८४ ॥

काश्यपाख्यस्य शास्तुः सा सततं भक्तिशालिनी ।
परिचर्य्यां व्यधात् सार्द्धं सखीनां पञ्चभिः शतैः ॥ ८५ ॥

ནམ་ཞིག་ས་ཡི་བདག་པོ་དེས། རྣམ་འགྱུར་རྨི་ལམ་མཐོང་བ་ལས།
འཇིགས་པའི་ཐེ་ཚོམ་ཀུན་འཁྲུལ་བས། འབྲས་བུ་མཁས་པ་དག་ལ་དྲིས།། 86

རྒྱལ་པོ་འི་བུ་མོ་ལ་སྣང་བས། མཚན་ཤེས་དེ་དག་གིས་དེར་སྨྲས།
ཤིན་ཏུ་མཛའ་བ་དག་གི་སྙིང་། མེ་ལ་བསྲེགས་ན་ཞི་བ་ཐོབ།། 87

ཅེས་པ་དེ་དག་རྣམས་ཀྱི་ཚིག། རབ་གདུག་མ་བཟུང་མི་བདག་ནི།
བུ་མོ་འི་ཚིག་གིས་བཅོམ་ལྡན་འདས། འོད་སྲུངས་དག་ལ་བལྟ་རུ་སོང་།། 88

དེ་ལ་ཕྱོགས་དེ་དེས་གསོལ་བ། རྨི་ལམ་མཆོག་ཏུ་རྣམ་འགྱུར་ཅན།
བདག་གིས་རིང་མཐོང་དེ་འབྲས་ཀུན། ཐམས་ཅད་མཁྱེན་པས་གསུང་བར་འོས།།
89

གླང་ཆེན་རྒྱ་སྐར་ནས་འཐོན་པ། ཛ་མ་དག་ལ་ཐོགས་པ་དང་།
དེ་བཞིན་སྐོམ་པའི་ཕྱིར་ཛེས་ནས། ཁྲོན་པ་རྒྱུག་པ་བདག་གིས་མཐོང་།། 90

སྤྲེ་ནི་བྲི་གང་དག་ལ་ཡང་། སྨུ་ཏིག་བྲི་གང་འཚོང་བ་མཐོང་།
ངན་པའི་ཤིང་དང་ཙན་དན་ནི། མཉམ་པ་དག་ཏུ་བྱེད་པ་མཐོང་།། 91

དེ་བཞིན་གཡུལ་དུ་གླང་ཕྲུག་གིས། གླང་པོ་ཆེན་པོ་ཡང་དག་འབོད།
མི་གཙང་བ་ཡིས་ལུས་བྲུགས་པའི། སྤྲེའུ་འཕར་ཞིང་གཞན་ལ་འབྲུག།། 92

སྤྲེའུ་ངན་པ་གཡོ་བའི་གདེར། རྒྱལ་སྲིད་རྒྱལ་ལ་མངོན་དབང་བསྐུར།
རས་ཡུག་སྐྱེས་བུ་བཅོ་བརྒྱད་ཀྱིས། དྲངས་ཀྱང་ཀུན་ཏུ་ཉམས་པ་མེད།། 93

स कदाचिन्नरपति र्विकृतस्वप्नदर्शनात् ।
भयसंशयसंभ्रान्तः पप्रच्छ फलकोविदम् ॥ ८६ ॥

ते तं राजसुताद्वेषान्निमित्तज्ञा बभाषिरे ।
अतिप्रियस्य हृदयं हुत्वाग्नौ लभ्यते शिवम् ॥ ८७ ॥

इति तेषा मनादृत्य वचः क्रूरतरं नृपः ।
भगवन्तं ययौ द्रष्टुं काश्यपं दुहितु र्गिरा ॥ ८८ ॥

स त मेत्यावदत् स्वप्नः सविकारः परं मया ।
दृष्टोऽद्य सर्व्वं सर्व्वज्ञ तत्फलं वक्तुमर्हसि ॥ ८९ ॥

वातायनेन निर्गच्छन् रुद्धपुच्छो मया गजः ।
तृषितस्य तथा पश्चात् कूपो धावन् विलोकितः ॥ ९० ॥

तृप्तश्च शक्तुप्रस्थेन मौक्तिकप्रस्थविक्रयः ।
समीकृतानि दृष्टानि कुदारूणि च चन्दनैः ॥ ९१ ॥

कलभेन महाहस्ती समाहूत स्तथाहवे ।
परानशुचिलिप्ताङ्गः प्रलिम्पन् विसृतः कपिः ॥ ९२ ॥

स्फीतराज्याभिषिक्तश्च कुचापलनिधिः कपिः ।
पटोऽष्टादशभिः कृष्टः पुरुषैरप्यसंक्षयः ॥ ९३ ॥

མི་དྲོག་འབྲས་བུའི་དགའ་ཚལ་ནི། དགའ་བ་ཚོམ་ཀུན་དག་གིས་དཀྲུགས།
ཞེ་སྡང་བཞད་གད་རྩོད་པ་ལ། སྐྱེ་བོ་མང་པོ་ཚོགས་པ་སྟེ།། 94

རྨད་བྱུང་རྨི་ལམ་འདི་དག་གིས། འབྲས་བུ་ཤིན་ཏུ་འཇིགས་རུང་སྙམ།
ཞེས་པ་ས་བདག་གིས་དྲིས་ལ། བཅོམ་ལྡན་འོད་སྲུངས་ཀྱིས་གསུངས་པ།། 95

སྐྱེ་བོའི་ཚེ་ལོ་བརྒྱ་པའི་ཚེ། སྟོན་པ་ཞི་བ་ཤཱ་ཀྱ་ཐུབ།
རྒྱལ་བ་བདུད་རྩིའི་ཆུ་གཏེར་འབྱུང་། དེ་ནི་ཁྱོད་ཀྱིས་གླང་པོར་མཐོང་།། 96

དེ་ཡི་ཉན་ཐོས་ཐ་མ་ཡི། དུས་སུ་རྩོད་པ་ལ་བརྟེན་ནས།
ཚུལ་ཁྲིམས་ཡོན་ཏན་ཀུན་སྤྱོད་བཏང་། བསྐྱད་པ་དང་བཅས་འབྱུང་བར་འགྱུར།།
97

དེ་དག་ལྟོབས་ཀྱི་ཁྲིམས་ན་གནས། དབེན་པ་མ་སྨིན་ཚུང་རྣམས་ལ།
རང་གིས་བསྟེན་པ་ལ་བརྟེན་ཅིང་། བསྟན་པ་དག་ནི་འབྲིད་པར་འགྱུར།། 98

གང་ཕྱིར་ཞུ་བ་ཞུ་བྱེད་ཀྱིས། དངོས་པོས་བསྙེན་པ་དག་ལ་རྒྱུག།
དེ་སྐད་སྙམ་པའི་ཕྱི་ནས་ནི། ཁྲོན་པ་འགྲོས་པ་རྣམ་པར་མཐོང་།། 99

ཆགས་པས་ལོང་ཞིང་ཀུན་རྨོངས་ཀྱིས། བཅོམ་པ་དེ་དག་བྱང་ཆུབ་ཀྱི།
ཡན་ལག་མུ་ཏིག་བྲེ་གང་ནི། ཕྱེ་བྲེ་གང་ལ་འཚོང་བར་འགྱུར།། 100

མུ་སྟེགས་ཚིག་ནི་ཤིང་ངན་དང་། སངས་རྒྱས་ཀྱིས་གསུངས་ཙན་དན་དག།
རྨོངས་པ་ཁྱད་པར་མི་ཤེས་པ། དེ་དག་གིས་ནི་མཚུངས་བྱེད་འགྱུར།། 101

रम्यपुष्पफलाराम श्चौरैरपि विलुण्ठितः ।
द्वेषोपहासकलहासक्तश्च विपुलो जनः ॥ ९४ ॥

स्वप्नाद्भुताना मेतेषा मन्ये घोरतरं फलम् ।
इति पृष्टः क्षितिभुजा भगवान् काश्यपोऽब्रवीत् ॥ ९५ ॥

शतायुषि जने शास्ता शान्तः शाक्यमुनि र्जिनः ।
भविष्यत्यमृताम्भोधिः स दृष्टः कुञ्जर स्त्वया ॥ ९६ ॥

तस्यापि पश्चिमे काले श्रावकाः कलिसंश्रयात् ।
त्यक्तशीलगुणाचारा भविष्यन्ति सविप्लवाः ॥ ९७ ॥

अपक्वाल्पविवेकानां बलात्ते गृहवासिनाम् ।
स्वयं सेवां समालम्ब्य करिष्यन्त्येव देशनाम् ॥ ९८ ॥

अर्थनीयोऽर्थिभावेन यस्मात् सेवासु धावति ।
तृषितस्य व्रजन् पश्चात् कूप स्तस्माद्विलोकितः ॥ ९९ ॥

ते करिष्यन्ति लोभान्धाः संमोहोपहताः परम् ।
बोध्यङ्गमुक्ताप्रस्थस्य शक्तुप्रस्थेन विक्रयम् ॥ १०० ॥

तीर्थवाक्यकुदारूणि बुद्धभाषितचन्दनैः ।
साम्यमापादयिष्यन्ति ते मौग्ध्यादविशेषिणः ॥ १०१ ॥

དུལ་བའི་དགེ་སློང་གླང་པོ་ཆེ། བཟང་པོ་ཐོབ་ནས་འགའ་ཞིག་དུ།
དགེ་སློང་ཁྲིམས་འཆལ་གླང་ཕྲུག་གིས། འཁྲུན་ཞིང་སྨོད་པར་བྱེད་པར་འགྱུར།། 102

གཡོ་བའི་མི་གཙང་གིས་བྲུགས་ལུས། དགེ་སློང་སྤྲེའུ་ཁྲིམས་བཟང་རྣམས།
རང་གི་སྐྱོན་གྱིས་སྨོ་བྱེད་ཅིང་། བདག་ཉིད་མཚུངས་པ་བྱེད་པར་འགྱུར།། 103

སྤྲེའུ་བཞིན་དུ་རིགས་འཁྲུལ་བ། མངོན་པར་དབང་ནི་བསྐྱུར་བར་འགྱུར།
རྫོགས་སངས་རྒྱས་ཀྱི་བསྟན་པ་ཡི། རས་ཡུག་དྲངས་པས་ཉམས་མི་འགྱུར།། 104

དགེ་འདུན་ཛས་དང་འབྲས་བུ་ཡི། དགའ་ཚལ་དག་ཀྱང་ཀུ་བར་འགྱུར།
པན་ཚུན་སྐྱོན་ནས་ཛོད་བྱེད་ཅིང་། འཐབ་མོ་འི་དང་རྩུལ་དག་ཏུ་འགྱུར།། 105

ཁྱོད་ཀྱི་རྩི་ལམ་རྣམ་སྨིན་མཐར། འབྲས་བུ་འདི་དག་ས་ལས་བྱུང་།
ཞེས་པ་སྟོན་པའི་ཚིག་ཐོས་ནས། ས་ཡི་བདག་པོ་ཡ་མཚན་གྱུར།། 106

དེ་ནས་སྟོན་དེས་མི་བདག་ནི། རྫས་འབྲང་བཅས་ལ་ཆོས་བསྟན་པ།
མཛོད་ནས་གསེར་འཕྲེང་ཅན་མ་ལ། དགེ་བ་འཛིས་པ་ཉིད་དག་བསྟན།། 107

སྐྱེ་བ་གཞན་དུ་མཆོད་རྟེན་ལ། ནུ་རང་ག་སི་འཕྲེང་བས་མཆོད།
ལེགས་བྲུས་དེ་ཡིས་དེ་ཉིད་ནི། གསེར་འཕྲེང་དག་གིས་མཚན་པར་སྐྱེས།། 108

མ་ག་དྷ་ནི་བཟང་མོ་འདི། དེ་ཉིད་བསོད་ནམས་མཐུ་ཚན་གྱིས།
ཡང་དག་དགེ་བའི་ཟམ་སྟེགས་ཉིད། དེ་རིང་སྐྱེ་བོ་འི་ཚོགས་ཀྱིས་ཐོབ།། 109

क्वचिद् भद्रं समासाद्य विनीतं भिक्षुकुञ्जरम् ।
दुःशीलकलभो भिक्षुः स्पर्द्धया धिक्करिष्यति ॥ १०२ ॥

चापलाशुचिलिप्ताङ्गः सुशीलान् भिक्षुमर्कटः ।
अनुलिम्पन् स्वदोषेण करिष्यत्यात्मसन्निभान् ॥ १०३ ॥

षण्ढकस्याभिषेकश्च भविष्यति कपेरिव ।
संबुद्धशासनपटं क्षप्यमाणं न नंक्ष्यति ॥ १०४ ॥

सङ्घद्रव्यफलारामेष्वपि यास्यन्ति चौरताम् ।
मिथः कलहशीलाश्च भविष्यन्त्यपवादिनः ॥ १०५ ॥

तव स्वप्नविपाकान्ते फलान्येतानि भूतले ।
इति शास्तु र्वचः श्रुत्वा विस्मितोऽभून्महीपतिः ॥ १०६ ॥

सानुगस्याथ नृपतेः स शास्ता धर्म्मदेशनाम् ।
कृत्वा काञ्चनमालाया दिदेश कुशलार्हताम् ॥ १०७ ॥

जन्मान्तरे चकारार्चां स्तूपे नारङ्गमालया ।
सा तेन सुकृतेनैव जाता हेमस्रजाङ्किता ॥ १०८ ॥

सेयं सुमागधा पुण्यप्रभावेण महीयसा ।
प्रापाद्य जनकायस्य सम्यक् कुशलसेतुताम् ॥ १०९ ॥

ཅེས་གསུངས་བཅོམ་ལྡན་རྒྱལ་བ་ནི། དགེ་སློང་རྣམས་དང་བཅས་པ་དག།
མཛེས་པས་ཕྱོགས་རྣམས་ཡོངས་འགེངས་ཤིང་། མཁའ་ལས་རྒྱལ་བྱེད་
ཚལ་དུ་གཤེགས།། 110

སྐྱེས་བུ་རྣམས་ཀྱི་རིགས་མཆོག་འཕེལ་སྐད་སྤོབས་ལྡན་བུ་
ལ་ཆགས་པས་བརྫུན་པ་ཉིད།
གལ་ཏེ་བུ་ལ་ཡོན་ཏན་མེད་ན་དེ་ཚེ་རིགས་ཀུན་ཉམས་པ་མིན་ནམ་ཅི།
གང་གི་བསོད་ནམས་མཐུ་ཡིས་འཁོར་བའི་ཆུ་ཀླུང་བདག་པོ་ཆེ་ལ་གྲུ་བཞིན་དུ།
རིགས་ཟླུང་ཡང་དག་སྒྲོལ་བྱེད་ཡོན་ཏན་ལྡན་པའི་བུ་མོ་དེ་དག་ངེས་པར་འབྱུང་།། 111

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་མག་དྷ་བཟང་མོ་འི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་གསུམ་པའོ།།

अभिधायेति भगवान्नभसा भिक्षुभिः सह ।
रचा संपूरयन्नाशां ययौ जेतवनं जिनः ॥ ११० ॥

पुंसां सत्कुलभूतये बलवती मिथ्यैव पुत्रस्पृहा
हन्तु स्वेदगुणा स्तदेव विकलं तत् किं न सर्व्वं कुलम् ।
सा कन्या किल जायते गुणवती पुण्यप्रभावाद् यया
संसारोरुसरित्पतौ कुलयुगं नावेव सन्तार्य्यते ॥ १११ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
सुमागधावदानं त्रिनवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་བཅུ་རྩ་བཞི་པ།

སྐལ་བ་ཉམས་པ་ཁ་ཅིག་རབ་གསོ་བྲ་སླབས་སྐྱིད་པ་ཡི།
ཟབ་མོ་འི་རྒྱུ་ལྷན་འགྲོ་བ་དག་དུ་གཱུང་བ་ཉིད་འཛིན་ཅིང་།
བསོད་ནམས་རྒྱས་པ་ཁ་ཅིག་སྤྱ་ངན་དྲག་པོས་ཡོངས་གཱུངས།
ལྷན་སྐྱེས་རྒྱུ་ཡི་ཚོགས་ཀྱི་མི་བཟད་སྡིད་པ་གཏོང་བར་བྱེད།། 1

མཉན་ཡོད་དུ་ནི་ཁྲིམ་གྱི་བདག། བསོད་ནམས་བ་ཞེས་གཉེན་དག་གི་བུ།
གྲགས་པའི་བ་ཞེས་གཉེན་ཞེས་བྱ་བ། གྲགས་པ་ཅན་གྱི་ཚད་གྱུར་བྱུང་།། 2

བདུད་རྩིའི་ཟེར་གྱི་འོད་ཟེར་ཅན། དེ་སྐྱེས་ཚེ་ན་བསོད་ནམས་ཀྱི།
རྒྱུ་ཡི་ཆར་མེད་ལས་སྐྱེས་པ། མི་བཟད་རྒུད་པ་ཞི་བར་གྱུར།། 3

གཞོན་ནུ་ཉིད་ལ་དབང་གྱུར་ཅིང་། སྡིད་པའི་ལོངས་སྤྱོད་ལས་ཕྱིར་ཕྱོགས།
དགེ་ལ་བརྩོན་པ་དེ་སོང་ནས། རྒྱལ་བ་རྒྱལ་བྱེད་ཚལ་བཞུགས་བསྟེན།། 4

སྟོན་པས་ཆོས་ནི་བསྟན་པ་ཡིས། རབ་བྱུང་དགྲ་བཅོམ་གནས་ལ་བརྟེན།
དེ་ནི་གསེར་དང་རྡོ་མཚུང་ཞིང་། དགའ་དང་མི་དགའ་བཏང་བར་གྱུར།། 5

དེ་ཡི་མཆེ་བ་དག་ལས་རྒྱུ། རོ་ལྡན་དྲི་མེད་ཞིལ་གྱི་ན།
ཁྲ་བ་ཟགས་པ་གང་ཞིག་གིས། དེ་ནི་རྟག་དུ་སྡིད་བྲལ་གྱུར།། 6

चतुर्नवतितमः पल्लवः ।

तरलतरतरङ्गोद्गारगम्भीरतोये
दधति जगति केचित् तप्ततां भग्नभाग्याः ।
खरमरुपरितापे केचिदुत्सक्तपुण्याः
सहजसलिलसारैस्तीव्रतृष्णां त्यजन्ति ॥ १ ॥

श्रावस्त्यां पुण्यमित्रस्य सूनु र्गृहपतेरभूत् ।
यशोमित्र इति ख्यातः प्रतिमानं यशस्विनाम् ॥ २ ॥

तस्य जन्मक्षणे पुण्यैः पीयूषकिरणत्विषः ।
अदृष्टिप्रभवा वाग्भिः शशाम विषमा विपत् ॥ ३ ॥

स युवैव वशी गत्वा भवभोगपराङ्मुखः ।
जिनं जेतवनासीनं सिषेवे कुशलोद्यतः ॥ ४ ॥

धर्म्मदेशनया शास्तुः प्रव्रज्यार्हत्पदं श्रितः ।
तुल्यकाञ्चनपाषाणः सोऽभून्मुक्तप्रियाप्रियः ॥ ५ ॥

दंष्ट्राभ्यां सरसं तस्य द्रुतस्फटिकनिर्म्मलम् ।
सुस्राव वारि येनासौ वीततृष्णः सदाभवत् ॥ ६ ॥

ནམ་ཞིག་དགེ་སློང་ཐམས་ཅད་ཀྱིས། དགེ་མཚན་ལས་ནི་བཅོམ་ལྡན་ལ།
དེ་ཡི་སྲིད་པ་བྲལ་བ་ཡི། བསོད་ནམས་རྒྱུ་ནི་རབ་ཏུ་དྲིས།། 7

དེས་གསུངས་ཀ་ཤིའི་གྲོང་དུ་སྔོན། མཛེས་པ་ཞེས་བྱ་ཚོང་དཔོན་བུ།
སྟོན་པ་འོད་སྲུངས་ཞེས་པ་ཡི། རབ་ཏུ་བྱུང་བ་ཉིད་དུ་གྱུར།། 8

ནམ་ཞིག་སྐྱོམ་པས་གཟིར་གྱུར་ཅིང་། བདུང་བས་ཉིན་པས་ལུས་ཅན་དེས།
སོ་ཀའི་ཙཱ་ཏ་ཀ་བཞིན་དུ། འགར་ཡང་ཆུ་ནི་ཐོབ་མ་གྱུར།། 9

དེ་ཡི་བསོད་ནམས་མ་ཡིན་པས། ཆུ་སྣོད་སྟོང་པ་ཉིད་དང་ནི།
ཁྲོན་པ་ཡང་ནི་ཆུ་མེད་དང་། འཛུག་ངོགས་འཕྲལ་ལ་བསྐམས་པར་གྱུར།། 10

དེ་ནས་སྐྱོམ་པས་ཆོ་ངེ་སྨྲས། ལུས་ནི་གདོང་བར་བརྩོན་དེ་ལ།
མཁན་པོས་ཆུ་ནི་བྱིན་པ་དག། མཐོང་བ་མིན་པ་ཉིད་དུ་གྱུར།། 11

དེ་ནས་དེ་ཡིས་སྟོན་པ་ནི། འོད་སྲུངས་བཀའ་ཡིས་ཆུ་ཡི་སྣོད།
མི་ཟད་པ་ཉིད་བཞིན་གྱུར་པ། དགེ་འདུན་དག་ལ་ཕུན་རིང་བྲིམས།། 12

དེ་ཡི་ཆུ་ནི་བཅོམ་ལྡན་འདས། འོད་སྲུངས་དགེ་ལེགས་དག་གི་གཏེར།
རབ་ཏུ་དང་བས་ཐུགས་རྗེ་ནས། ཕྱག་གི་པདྨས་རབ་བཞེས་མཛད།། 13

དེར་ནི་སྐྱེ་བོ་འི་ཚོགས་འོངས་པས། ཆུ་ནི་ཟད་པ་མེད་གྱུར་པ།
མཐོང་ནས་ཡ་མཚན་དག་དང་བཅས། བདེན་པ་མཐོང་བ་ཐོབ་པར་གྱུར།། 14

कदाचिद् भिक्षवः सर्व्वे भगवन्तं कुतूहलात् ।
तृष्णाव्युपरमे तस्य पप्रच्छुः पुण्यकारणम् ॥ ७ ॥

सोऽब्रवीत् काश्यपाख्यस्य शास्तुः काशिपुरे पुरा ।
अभूत् प्रव्रजितः श्रेष्ठिसुतः सुन्दरकाभिधः ॥ ८ ॥

स कदाचित् तृषाक्रान्तः सन्तापक्लान्तविग्रहः ।
निदाघे चातक इव न क्वचिज्जल माप्तवान् ॥ ९ ॥

शून्यतां तोयपात्राणि कूपा निर्जलतामपि ।
स्रोतांसि सहसा शोषं तस्यापुण्यैः समाययुः ॥ १० ॥

देहत्यागोद्यतस्याथ तस्य तृष्णाप्रलापिनः ।
उपाध्यायेन सलिलं दत्तं प्रायाददृश्यताम् ॥ ११ ॥

शासनात् काश्यपस्याथ स शास्तु र्जलभाजनम् ।
अक्षयत्व मिवायातं सङ्घे चिर मचारयत् ॥ १२ ॥

कारुण्यात् तस्य भगवान् काश्यपः श्रेयसां निधिः ।
प्रसन्नपाणिपद्मेन चक्रे वारिप्रतिग्रहम् ॥ १३ ॥

दृष्ट्वा सविस्मय स्तत्र जनसङ्घः समागतः ।
तोय मक्षयतां यातं सत्यदर्शन माप्तवान् ॥ १४ ॥

དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་གྱིས། གྲགས་པའི་བཤེས་གཉེན་དགེ་རྩ་ལྡན།
ཞི་བ་བསྟེན་འདི་མཆེ་བ་ལས། ཆུ་ཡི་ཚོགས་ནི་འཁྲུངས་པར་གྱུར།། 15

དེ་ལྟར་གྲགས་པའི་བཤེས་གཉེན་གྱིས། སྐྱེ་བ་གཞན་ལ་བྱིན་པ་ནི།
རྒྱལ་བས་གསུང་ཐོས་གྱུར་པ་ཡིས། དགེ་སློང་རྣམས་ནི་ཡ་མཚན་གྱུར།། 16

བདེ་བ་དྲི་མེད་ཆུ་གང་ཞི་བ་ནི།
ཁ་བའི་རླབས་ལྡན་རྒྱལ་བ་བསྟེན་པ་དག།
ཐོབ་ནས་འཁོར་བ་སྐྱུ་ངམ་ཐང་ལ་ནི།
ཡོངས་འཕྲུམ་སྲིད་པའི་གདུང་བ་གཏོང་བར་བྱེད།། 17

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གྲགས་པའི་བཤེས་གཉེན་གྱི་རྟོགས་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་བཞི་པའོ།།

तत्पुण्यप्रणिधानेन सोऽयं कुशलमूलवान् ।
यशोमित्रः श्रितः शान्तिं दंष्ट्रोद्भूतपयोभरः ॥ १५ ॥

इति जन्मान्तरोदन्तं यशोमित्रस्य सादराः ।
जिनेन कथितं श्रुत्वा भिक्षवो विस्मयं ययुः ॥ १६ ॥

संसारमरुपरिभ्रम
तृष्णातापं त्यजति जिनसेवा ।
सुखविमलसलिलां
कलितांशमहिम कल्लोलिनीं प्राप्य ॥ १७ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
यशोमित्रावदानं चतुर्नवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་བཅུ་རྩ་ལྔ་པ།

རྒྱ་ཆེ་སྤྱིག་པའི་སྒྲུན་པར་འཇུག་པ་དག་ནི་རབ་སྤངས་ནས།
འཕྲུལ་ལ་སྙིང་རྗེའི་འོད་ཟེར་སྣང་བ་རབ་ཏུ་རྒྱས་པ་ཡིས།
སྐྱོན་སེལ་ཅི་ཡང་ཡོངས་སུ་གཏུང་བ་དག་ཀྱང་འཕྲོག་བྱེད་པ།
སངས་རྒྱས་འོད་སྟོང་ལྡན་པས་དམ་པའི་ལམ་ནི་སྟོན་པར་བྱེད།། 1

གྲོང་ཁྱེར་རྒྱལ་པོ་འི་ཁབ་ན་སྡོན། ཀ་ལན་ད་ཀའི་གནས་ཞེས་པ།
འོད་མའི་ཚལ་ན་བཅོམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་རྣམ་པར་བཞུགས།། 2

གྲོང་དེར་དེད་དཔོན་དོན་བྱིན་གྱི། ཆུང་མ་ནོར་མོ་ཞེས་པ་ལ།
བུ་གཉིས་དག་ནི་དུས་གཅིག་ཏུ། མཚོ་མ་ཉིད་དུ་བྱུང་བར་གྱུར།། 3

ཕ་ནི་ལྷ་པ་ཉིད་གྱུར་ཅིང་། ནོར་དང་འཁོར་ནི་ཟད་པའི་ཚེ།
ཤང་ཀུ་མཚམས་བྱིན་ཞེས་བྱ་བ། དེ་དག་མ་ཡི་ཚིགས་ཀྱིས་བསྐྱེད།། 4

མ་ཡི་ཚིག་གིས་ཚོམ་ཀུན་ལ། རབ་ཞུགས་བྱིས་པ་དེ་དག་གིས།
ཁྱིམ་བླ་དག་གི་ནོར་ཚུང་དང་། སྣོད་རྣམས་དལ་གྱིས་བརླབ་པར་བྱས།། 5

མ་དང་ཕ་ཡི་དུལ་བ་ཡི་ནི་ཉུང་བ་ཉིད་འགྱུར་ཞིང་།
དེ་ཡི་བདང་སྐྱོམས་ཉིད་ཀྱིས་འདུལ་བ་མིན་པའི་གཡང་ལ་ལྷུང་།
རང་གི་སྐྱེ་བ་སྔོན་བག་ཆགས་དག་དང་འབྲེལ་བ་ལས།
བྱིས་པ་རྣམས་ནི་ཤེལ་བཞིན་གཞན་གྱི་རང་བཞིན་སྟེན་པར་བྱེད།། 6

पञ्चनवतितमः पल्लवः।

उत्सार्य्य पापविपुलं तिमिरावतारं
सद्यः प्रकीर्णकरुणाकिरणप्रकाशः।
दोषापहश्च परितापहरश्च कोऽपि
सन्मार्ग मादिशति बुद्धसहस्ररश्मिः॥ १॥

पुरा पुरे राजगृहे भगवान् वेणुकानने।
कलन्दकनिवापाख्ये विजहार तथागतः॥ २॥

तस्मिन् पुरे सार्थपते रर्थदत्तस्य दारकौ।
अभूतां निश्चिताख्यायां जायायां युगपद्यथा॥ ३॥

तौ सङ्कुसन्धिदत्ताख्यौ याते पितरि पञ्चताम्।
क्षीणे धने परिजने मात्रा कृच्छ्रेण वर्द्धितौ॥ ४॥

तौ मातु र्वचसा बालौ शनकैः प्रतिवेशिनाम्।
चौर्य्यप्रवृत्तौ स्वल्पार्थभाण्डानां चक्रतुः क्षयम्॥ ५॥

मातुः पितुश्च नियमेन भवन्ति योग्याः
श्वभ्रे पतन्त्यविनये तदुपेक्षयैव।
पूर्व्वोदितस्वजनवासनयैव विद्धा
बाला स्त्रियो इव परप्रकृतिं भजन्ते॥ ६॥

རིམ་གྱིས་དེ་དག་ཆེར་སྐྱེས་ཏེ། ཆོས་ཀུན་དར་བབ་ཉིད་དུ་གྱུར།
འཛོག་དང་མཚམས་འབིགས་ལ་སོགས་ཀྱིས། གྲོང་ཁྱེར་པ་ཡི་ནོར་རྣམས་བླངས།། 7

དེ་དག་བྲུ་བ་ཅན་རྣ་ཡིས། ཤེས་ནས་རྒྱལ་པོ་མ་སྐྱེས་དགྲས།
དེ་དག་མ་དང་བཅས་པ་ནི། སྐད་ཅིག་ཉིད་ཀྱིས་གསོད་པར་སྦྱིངས།། 8

གཞན་གྱི་ནོར་གྱིས་གང་ཞིག་ཟ་བྱེད་གང་ཞིག་འཐུང་བར་བྱེད།
བདེ་བའི་བསམ་པས་ལུས་ཀྱི་ལམ་ནི་གང་ཞིག་ཉམས་སྨྱོང་བྱེད།
མ་དཔྱད་དགའ་བར་བྱེད་པའི་བདེ་ལ་གུས་པ་དེ་ཉིད་ནི།
སྨིན་པར་གྱུར་པ་སྲོག་ནི་ཉམས་བྱེད་མི་ཟད་ཟིང་དག་ཡིན།། 9

ལུས་ཀྱི་བདུང་བས་རྒྱགས་ཤིང་འཁྲུགས་པ་རྣམས་ཀྱི་ཆགས་པ་གང་།
ཀུ་དང་སྡིག་དང་གསོད་པས་ཐོབ་པའི་ནོར་གྱིས་རབ་བསྐྱེད་པ།
དེ་ནི་ཡོངས་སྨིན་ཀང་ལག་བཅད་དང་གསལ་ཤིང་ལ་ཞོན་པས།
ཡོངས་ཟགས་ཁྲག་གི་རྒྱུན་གྱིས་ཕྱི་རོལ་དག་ཏུ་འབྱུང་བར་འགྱུར།། 10

དེ་ནས་གསོད་པའི་འཕྲེང་བས་མཚན། སྔོན་དམར་གོས་ཀྱིས་གཡོགས་དེ་དག།
ལྟ་རུ་འོངས་པའི་སྐྱེ་བོས་བསྐོར། གསོད་པའི་གནས་སུ་ཉེ་བར་སོང་།། 11

བརྩེ་ལྡན་ཀུན་མཁྱེན་གྱིས་མཁྱེན་ནས། རང་ཉིད་ས་དེར་མངོན་ཕྱོགས་ཏེ།
རྗེས་སུ་གཟུང་བའི་བཀའ་དྲིན་གྱིས། བཅིངས་པ་དག་དང་བྲལ་བར་མཛད།། 12

ཀུན་མཁྱེན་བཀའ་ཡིས་དེ་དག་ནི། རྒྱལ་པོས་བཏང་ཞིང་སྡིག་པ་གྲོལ།
བཅོམ་ལྡན་འདས་ཀྱི་བསྟན་པ་ལ། རབ་ཏུ་བྱུང་ནས་དགྲ་བཅོམ་ཐོབ།། 13

क्रमेण वर्द्धमानौ तौ प्रौढ़चौरत्व मागतौ ।
उल्लङ्घसन्धिच्छेदाद्यैः पौराणां जह्रतु र्द्धनम् ॥ ७ ॥

अजातशत्रुणा राज्ञा चारै र्विज्ञाय तत्क्रियाम् ।
विसृष्टौ वध्यवसुधां तौ माचा सहितौ क्षणात् ॥ ८ ॥

यद् भुज्यते परधनेन निपीयते यत्
सौख्याशया विषमवर्त्म विगाह्यते यत् ।
तस्याविचाररमणीयसुखोदरस्य
प्राणावसानपणदारुण एव पाकः ॥ ९ ॥

संजायते विषयपानमदाकुलानां
य श्चौर्य्यदाहवधलब्धधनेन रागः ।
निर्यात्यसौ परिणतः करपादपात-
शूलाधिरोहणपरिस्रुतरक्तपूरैः ॥ १० ॥

तत स्तौ वध्यमालाङ्कौ नीलरक्ताम्बरावृतौ ।
प्रेक्षागतजनाकीर्णां वध्यस्थान मुपागतौ ॥ ११ ॥

ज्ञात्वा दयावान् सर्व्वज्ञः स्वय मभ्येत्य तां भुवम् ।
प्रसादानुग्रहेणैव चक्रे विगतबन्धनौ ॥ १२ ॥

सर्व्वज्ञस्याज्ञया राज्ञा तौ त्यक्तौ मुक्तपातकौ ।
प्रव्रज्यया भगवतः शासनेऽर्हत्त्व मापतुः ॥ १३ ॥

ཡི་ཤེས་འབྱོར་འབར་དེ་དག་ནི། མ་དང་བཅས་པ་མཐོང་གྱུར་ནས།
དགེ་སློང་གིས་དྲིས་དགེ་མཚན་ལས། དེ་གཏམ་བདེ་བར་གཤེགས་པས་གསུངས།། 14

སྔོན་གྱི་སྐྱེ་བ་དག་ལ་ཡང་། འདི་དག་བདག་གིས་རབ་ཏུ་བསྲུངས།
དེ་ཚེ་འདི་དག་ཉིད་ཀྱི་མ། སྟག་མོ་འཇིགས་རུང་གཟུགས་ལྡན་གྱུར།། 15

དེ་དུས་བྱང་ཆུབ་སེམས་དཔའ་ནི། བརྩེ་བས་ལུས་ཅན་རྣམས་ཀྱི་གཉེན།
སྙིང་རྗེའི་རྟུལ་ཞེས་བྱ་བ་ཡི། ས་སྐྱོང་བུར་ནི་ང་ཉིད་གྱུར།། 16

ཉམ་ཞིག་བཀྲེས་པས་ཉེན་པ་ཡིས། ཕྲུག་གུ་འདི་དག་ཟ་རྩོམ་པའི།
སྟག་མོ་དེ་ནི་རང་གི་ལུས། བྱིན་ནས་བདག་གིས་རྣམ་པར་བཟློག།། 17

ལས་ཀྱི་ལྷག་མས་ད་ལྟ་ཡང་། འདི་དག་ཆོས་ཀུན་ཉིད་དུ་གྱུར།
སྟག་མོ་དེ་ནི་མ་འདི་སྟེ། འདི་དག་བདག་གིས་རང་དུ་བསྲུངས།། 18

ཞེས་གསུངས་བཅོམ་ལྡན་ཐུགས་རྗེ་ཡི། རྒྱ་མཚོ་འབྱུང་པོ་ལ་དགོངས་པ།
དགེ་སློང་ཚོགས་དང་བཅས་པ་དག། རྒྱལ་བྱེད་ཚལ་དུ་རབ་ཏུ་གཤེགས།། 19

བདུད་རྩི་རོ་ཡི་ཆར་བཞིན་མི་འདོད་སེལ།
འདོད་པ་དམ་པའི་གཟིགས་པ་གང་ལྷུང་བས།
ལྷུང་བ་རྣམས་ཀྱང་བསོད་ནམས་ཀྱིས་མཐོ་བའི།
བསྟུགས་པར་འོས་པར་མཛད་པ་རྒྱལ་གྱུར་ཅིག།། 20

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སྟག་མོ་འི་རྟོགས་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་ལྔ་པའོ།།

जननीसहितौ दृष्ट्वा तौ ज्ञानविभवोज्ज्वलौ ।
तत्कथाकौतुकात् पृष्टो भिक्षुभिः सुगतोऽभ्यधात् ॥ १४ ॥

मयैव रक्षितावेतौ पूर्व्वस्मिन्नपि जन्मनि ।
एतयो र्जननी व्याघ्री घोररूपा तदाभवत् ॥ १५ ॥

तस्मिन् काले कृपाबन्धु र्बोधिसत्त्वः शरीरिणाम् ।
अहं करुणरेखाख्यः क्षितिपालसुतोऽभवम् ॥ १६ ॥

कदाचिदेतौ क्षुत्क्षामा पोतकौ भोक्तु मुद्यता ।
स्वशरीरं मया दत्त्वा व्याघ्री सा विनिवारिता ॥ १७ ॥

अद्य तावेव चौरत्वं कर्म्मशेषादुपागतौ ।
मया संरक्षितौ व्याघ्री माता सैवेय मेतयोः ॥ १८ ॥

इत्युक्त्वा करुणासिन्धु र्भगवान् भूतभावनः ।
भिक्षुसङ्घेन सहितः प्रययौ जेतकाननम् ॥ १९ ॥

अमृतरसदृष्टि रिष्टा दृष्टि
रनिष्टापहा सतां जयति ।
पतितेव पतित मपि या
कुरुते पुण्योन्नतिं श्लाघ्याम् ॥ २० ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
व्याघ्र्यवदानं पञ्चनवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་བཅུ་རྩ་དྲུག་པ།

ཟླ་བའི་ཀུན་དགའ་ཉི་མའི་རབ་གསལ་དང་།
མེ་ཡི་ཚ་བ་རླུང་གི་མགྱོགས་པ་དང་།
སྙིང་རྗེ་ལ་དགའ་སྐྱེ་བོ་ཆེ་རྣམས་ཀྱིས།
གཞན་མ་ཕན་པ་ལྷན་སྐྱེས་རང་བཞིན་ཡིན།། 1

འཕགས་རྒྱལ་སྐྱིད་མོས་ཚལ་དུ་སྤྱོན། རྒྱལ་པོ་དཔལ་ལྡན་འཆར་བྱེད་ནི།
རྩེ་དགའི་རོ་དང་ལྡན་པ་དག། བཙུན་མོར་བཅས་པ་རྣམ་པར་གནས།། 2

དེ་ཡི་མཛེས་མ་ཨུཏྤ་ལ་མིག། མེ་ཏོག་འཐུ་ལ་ཆགས་པ་རྣམས།
ཐུབ་པ་བརྒྱ་ཕྲག་ལྔ་རྣམས་ནི། འདོད་དགར་འོང་བ་དག་གིས་མཐོང་།། 3

ཕྲག་དོག་ཁྲོ་བ་སྐྱོང་བ་དེས། དགའ་མར་མིག་བཀོད་དེ་དག་རྣམས།
རྐང་ལག་བཅད་པའི་ཁྲག་གིས་ནི། འདམ་ལ་ཉལ་བ་དག་ཏུ་བྱུས།། 4

མི་བཟད་གནོད་བཅད་ཚོ་ང་ཡིས། གཟིར་ཅིང་ཚོ་ང་ལྡན་དེ་དག།
སངས་རྒྱས་བཅོམ་ལྡན་ཐུགས་རྗེ་ཡིས། སྨྲས་པའི་སྤྱན་གྱིས་རབ་ཏུ་གཟིགས།། 5

དེ་ཡི་གཟིགས་པ་བདུད་རྩི་ཡི། ཆར་ལྷུང་རེག་པས་དེ་དག་རྣམས།
སྡོག་བཟུང་རྐང་ལག་ལེགས་པར་འགྱུར། གདུང་བ་དང་བྲལ་ཡང་དག་ལངས།། 6

षण्णवतितमः पल्लवः ।

ह्लादः शशाङ्कस्य रवेः प्रकाशः
तापः कृशानोः पवनस्य वेगः ।
परोपकारः करुणारतानां
महाजनानां सहजः स्वभावः ॥ १ ॥

उद्याने केलिरसिकः श्रीमानुदयनः पुरा ।
अवन्तिविषये राजा विजहार वधूसखः ॥ २ ॥

तस्य पुष्पोच्चयासक्ताः कान्ताः कुवलयेक्षणाः ।
यदृच्छयागतैर्दृष्टा मुनीनां पञ्चभिः शतैः ॥ ३ ॥

तान् प्रियान्यस्तनयनानीर्ष्यामन्युपरायणः ।
स चक्रे पाणिचरणच्छेदासृक्पङ्कशायिनः ॥ ४ ॥

तानार्त्तनादिनस्तीव्रमर्म्मच्छेदव्यथातुरान् ।
ददर्श भगवान् बुद्धः करुणास्निग्धलोचनः ॥ ५ ॥

तद्दृष्ट्यामृतवृष्ट्येव स्पृष्टास्ते श्रुतजीविताः ।
संश्लिष्टपाणिचरणाः समुत्तस्थुर्गतव्यथाः ॥ ६ ॥

དེ་ནས་རབ་རྫོགས་དེ་དག་ལ། བཅོམ་ལྡན་འདས་ཀྱིས་ཆོས་བསྟན་མཛད།
གང་གིས་མྱུར་དུ་དེ་དག་རྣམས། ཕྱིར་མི་འོང་འབྲས་དར་བ་ཐོབ།། 7

དེ་མཐོང་དགེ་སློང་མཚར་བཅས་པས། དྲིས་ཤིང་བཅོམ་ལྡན་རྒྱལ་བ་ཡིས།
གསུངས་པ་སྔོན་ཡང་འདི་དག་རྣམས། བདག་གིས་བརྩེ་བ་ཉིད་ཀྱིས་བཟུང་།། 8

པཱ་རཱ་ཎ་སི་དག་ཏུ་སྔོན། རྒྱལ་པོ་ཚངས་བྱིན་དག་གིས་ནི།
འབྱེད་བྱེད་སྡིག་པ་བྱས་པ་ཡིས། བློན་པོ་ལྔ་བརྒྱ་ངེས་པར་བསྐྱད།། 9

རྒྱལ་པོའི་འཇིགས་པས་ཡང་དག་གདུང་། མྱ་ངམ་ལམ་དུ་འགྲོད་དེ་དག།
སོ་ཀ་གྲིབ་མ་ཆུ་མེད་པར། མི་བཟད་སྐོམ་པས་ལྡུང་བར་གྱུར།། 10

བྱང་ཆུབ་སེམས་དཔའ་གཉིས་འཁྲུང་ཚེ། བཟང་པོ་ཞེས་པས་དེ་དག་མཐོང་།
དེ་དག་ཆོ་ངའི་མདངས་ཤུགས་ནས། སྙིང་རྗེས་གདུང་བ་དང་བཅས་གྱུར།། 11

ཆུ་དང་རྩ་བ་འབྲས་ཕྱིར་དེས། རིང་པོ་རིང་པོ་དག་ནས་ཆུ།
ལག་པ་ཤིན་ཏུ་ཆེ་བས་བླངས། དེ་དག་སྐོམ་པ་དང་བྲལ་བྱས།། 12

དེ་ཡིས་དགའ་བ་རྟག་ཏུ་ནི། སྲོག་གི་ཟུངས་དག་ངེས་པར་བསྟན།
རྒྱ་ཆེ་ངལ་བར་རབ་ཞི་བ། དེ་དག་དེར་ནི་ངལ་བསོས་ཐོབ།། 13

དེ་ནས་དུས་ཀྱིས་སོ་ལྡན་པ། ལུས་ནི་བཏང་བ་དེ་ཉིད་ཀྱིས།
ལུས་དག་སྤངས་ནས་དེ་དག་གིས། ལྷ་ཡ་འོས་པའི་མཆོད་པ་བྱས།། 14

तत स्तेषां प्रपन्नानां भगवान् धर्म्मदेशनाम् ।
व्यधाद्यया शु ते प्रापु रनागामिफलोदयम् ॥ ७ ॥

तद्दृष्ट्वा भिक्षुभिः पृष्टः साश्चर्य्यै र्भगवान् जिनः ।
जगाद पूर्व्वं मय्येते दययैव मयोद्धृताः ॥ ८ ॥

वाराणस्यां पुरा राज्ञा ब्रह्मदत्तेन मन्त्रिणाम् ।
शतानि पञ्च भिन्नानां निरस्तानि कृतागसाम् ॥ ९ ॥

ते राजभीत्या सन्तप्ता मरुमार्गप्रवासिनः ।
ग्रीष्मे निरुदकच्छाये निपेतु स्तीव्रतृष्णया ॥ १० ॥

विलोक्य बोधिसत्त्व स्तान् भद्रो नाम महाद्विपः ।
तत्प्रलापेषु निर्भिन्नः कारुण्यात् सव्यथोऽभवत् ॥ ११ ॥

दूरात् सलिल मादाय स हस्तेन महीयसा ।
तान् वीततृष्णान् विदधे पयोमूलफलप्रदः ॥ १२ ॥

तेनैव सततं पृष्टान्निर्द्दिष्टप्राणधारणाः ।
विश्रान्तिं तत्र ते प्रापुः प्रशान्तविपुलश्रमाः ॥ १३ ॥

कालेन त्यक्तदेहस्य तत स्ते तस्य दन्तिनः ।
कृत्वा शरीरसत्कारं पूजां चक्रुः सुरोचिताम् ॥ १४ ॥

དགོན་པར་བདག་ནི་གླང་པོ་ཤིས། སྡུག་བསྔལ་དེ་ལས་གློན་པོ་ནི།
སྔོན་བསྐལ་དེ་དག་ད་ལྟ་ཡང་། ཐུབ་པ་དེ་དག་མི་འདོད་ལས།། 15

ཞེས་པ་གསུངས་ནས་བཅོམ་ལྡན་འདས།
སེམས་ཅན་ཀུན་གྲོལ་བརྟུལ་ཞུགས་ཅན།
ཐུབ་པའི་ཚོགས་ཀྱིས་མཆོད་བྱེད་ཅིང་།
རང་གི་དཀའ་ཐུབ་ནགས་སུ་གཤེགས།། 16

སྟོན་པའི་ཐུགས་རྗེ་བདུད་རྩིའི་ཆུ་བོ་ནི།
མ་ལུས་བདེ་དང་དགེ་བའི་ཡོ་ཉ་སྟེ།
སྲིད་པའི་རྒྱ་ངམ་གདུང་བསིལ་གྲིབ་མ་དང་།
མ་བཞིན་སྐྱེད་པར་བྱེད་པ་རྒྱལ་གྱུར་ཅིག།། 17

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གླང་པོའི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་དྲུག་པའོ།།

कुञ्जरेण मयारण्ये तरुते मन्त्रिणः पुरा ।
कृच्छ्रात् सन्तारिता स्तस्मान्मुनय श्चाद्य वैशसात् ॥ १५ ॥

इत्युक्त्वा भगवान्
सर्व्वसत्त्वसन्तारणव्रतः ।
पूज्यमानो मुनिगणै
र्जगाम स्वं तपोवनम् ॥ १६ ॥

अखिलसुखकुशलदूती
भवमरुसन्तापशीतलच्छाया ।
जयति जननीव जननी
करुणामृतवाहिनी शास्तुः ॥ १७ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
हस्त्यवदानं षण्णवतितमः पल्लवः ॥

ཡལ་འདབ་དགུ་བཅུ་རྩ་བདུན་པ།

རྣམ་སྣང་སྒྲོན་གྱི་དུག་གིས་ཡིད་ནི་སྨུན་ཕྱུང་གྱུར་རྣམས་ཀྱིས།
དམ་པ་དག་ལ་གནོད་པ་བསྒྲུབ་ལ་འབད་པ་རབ་རྣོ་གང་།
དེ་ཉིད་གཞལ་དུ་དེ་ཡི་ཡོན་ཏན་རབ་འབར་རྗེས་བྱེད་པར།
གྱུར་ནས་སྲིད་འདིར་སྲུ་ཞིག་རྒྱ་ཆེར་གནོད་དང་ལྡན་པ་གྱུར། 1

རྒྱལ་བ་རྒྱལ་པོ་འི་ཁབ་དང་ནི། འོད་མའི་ཚལ་ན་རྒྱུ་བ་ན།
ལྷས་བྱིན་གྱིས་ནི་སྡང་བས་སྨོན། རབ་ཏུ་བསྐུལ་བའི་དཀའ་ཐུབ་པ། 2

དེ་ཡིས་བྱིན་པའི་མཚོན་ཆ་ཅན། སྨིན་འཁྲུག་འཇིགས་སྲུ་རྩང་བ་བཞིན།
ཁྲོ་བས་དུལ་བ་ཉམས་གྱུར་པའི། རྩོམ་པ་ཆེན་པོས་མངོན་པར་གཙེས། 3

བརྒྱ་ཕྲག་ལྔ་ཡི་དཀའ་ཐུབ་ཅན། དེ་དག་གིས་འཕངས་མཚོན་གྱི་ཆར།
བཅོམ་ལྡན་འདས་ཀྱི་སྐུ་ལ་ནི། པདྨ་ཨུཏྤལ་ཚོགས་ཉིད་གྱུར། 4

དམ་པ་རྣམས་ལ་རྣོན་པོ་ཡི། མཚོན་ཡང་འཇམ་པ་སྟེན་བྱེད་དེ།
སྡང་བའི་དུག་གིས་བྲུགས་གྱུར་པ། སྡིག་པ་ཅན་གྱི་སེམས་ནི་མིན། 5

སྟོན་པའི་སྐུ་ནི་སྒྲིབ་བྱེད་པ། ནོར་བུའི་རང་བཞིན་ཁང་པ་བརྩེགས།
ནམ་མཁའི་འོད་ནི་རབ་འཁྲུངས་དེ། ལྷ་བ་དག་ནི་བརླག་མ་གྱུར། 6

དེ་ནས་དཀའ་ཐུབ་ཅན་དེ་དག། ངལ་ཞིང་ངོ་ཚ་བཞིན་དུད་པས།
བཟོད་པའི་རྒྱ་མཚོ་རབ་དང་བས། སྟོན་པ་ཡི་ནི་ཞབས་ལ་གཏུགས། 7

सप्तनवतितमः पल्लवः ।

विद्वेषदोषविषदूषितमानसानां
यत् साधुबाधनविधौ निशितः प्रयत्नः ।
स्याच्चेत्तदुज्ज्वलगुणानुकृतौ स एव
तत् को भवेत् पृथुपराभववान् भवेऽस्मिन् ॥ १ ॥

जिने राजगृहोपान्ते वेणुविजनचारिणि ।
विद्वेषा देवदत्तेन प्रेरिता स्तापसाः पुरा ॥ २ ॥

भ्रूभङ्गभीमवदना स्तदृत्तविविधायुधाः
अभ्याद्रवन् सुसंरब्धाः क्रोधविध्वस्तसंयमाः ॥ ३ ॥

पञ्चभि स्तापसशतैः क्षिप्ता स्तेऽस्त्रप्रवृष्टयः ।
ययु र्भगवतः काये कमलोत्पलजालताम् ॥ ४ ॥

निशितान्यपि शस्त्राणि श्रयन्ते यत् सुमार्दवम् ।
विद्वेषविषदिग्धानि नतु चित्तानि पापिनाम् ॥ ५ ॥

प्रादुरासीन्मणिमयं कूटागारं नभःप्रभम् ।
शरीरच्छादनं शास्तु र्न तु दृष्टिनिवारणम् ॥ ६ ॥

ततस्ते तापसाः श्रान्ता लज्जावनमिताननाः ।
निपेतुः पादयोः शास्तुः क्षमासिन्धोः प्रसादिनः ॥ ७ ॥

བཅོམ་ལྡན་གྱིས་ཀྱང་བུ་ལ་བཞིན། རབ་ཏུ་དང་ལྡན་དེ་དག་ལ།
གནོད་བྱེད་ལ་ཡང་ཁྲོ་མེད་པས། ཆོས་ནི་རབ་ཏུ་བསྟན་པ་མཛད།། 8

ཆེན་པོ་འདི་ནི་འཁྲུགས་པའི་རྣམ་འཕྲུལ་མེད་པ་ཡིས།
བདེ་དང་ཞི་བ་ལ་བརྟེན་བསོད་ནམས་བཟོད་པ་དག་གི་རྒྱུ།
དྲི་མེད་བསིལ་བ་དག་དང་ལྡན་པ་ཕན་མིན་འཇུག་པ་མིན།
དེ་ཐོབ་ཁྲོ་བའི་རྩལ་གྱིས་རྟོག་པ་དག་ཏུ་ཡོངས་མི་འགྱུར།། 9

སྟོན་པས་ཆོས་བསྟན་རབ་བྱུང་གིས། བསམ་པ་རབ་ཕྱིས་དེ་དག་གིས།
ཟག་པ་ཀུན་ལས་རྣམ་གྲོལ་བའི། དགྲ་བཅོམ་ཉིད་ནི་རབ་ཏུ་ཐོབ།། 10

སྐབས་དེར་འོངས་པའི་དགེ་སློང་ནི། གདམས་དེ་ཐོས་ཤིང་ངོ་མཚར་དང་།
བཅས་པས་འདི་ཅི་ཞེས་པ་དྲིས། རྒྱལ་བས་དེ་དག་ལ་གསུངས་པ།། 11

སྔོན་གྱི་སྐྱེ་བ་དག་ལ་ཡང་། ཤིན་ཏུ་གནོད་བྱས་འདི་དག་ལ།
རྣམ་འགྱུར་མེད་པ་བདག་གིས་ནི། རབ་ཏུ་དང་བས་ངེས་པར་བལྟས།། 12

རྒྱ་མཚོ་དག་ཏུ་འགྲོ་བ་ལ། གཟིངས་ནི་ཆག་པར་གྱུར་ཚེ་སྔོན།
འདི་དག་ཀ་ཤིའི་ཡུལ་སྐྱེས་པའི། ཚོང་པས་སྒྲོག་ལ་ཐེ་ཚོམ་ཐོབ།། 13

དེ་ལ་བདག་ནི་རྩིས་སྤྲུལ་གྱིས། རྒྱབ་ཏུ་བཀོད་ནས་རབ་ཏུ་བསྒྲལ།
འཚོ་བ་ཐོབ་ཅིང་ཕ་རོལ་ཏུ། ཕྱིན་ནས་ངལ་གསོ་རྣམ་པར་བསྟེན།། 14

རབ་ཏུ་བསྒྲལ་བས་ཉེ་ངལ་དེ། བདག་ནི་སྐད་ཅིག་གཉིད་ལོག་ཚེ།
བདག་ལ་ཟ་འདོད་དེ་དག་རྣམས། ཐམས་ཅད་བདག་ནི་གསོད་པར་བརྩོན།། 15

भगवानपि पुत्राणामिव तेषां प्रसादिनाम् ।
निकारेणापि निर्मन्यु र्विदधे धर्म्मदेशनाम् ॥ ८ ॥

अक्षोभविभ्रमसुखं शम माश्रितानि
पुण्यक्षमासलिलनिर्म्मलशीतलानि ।
नो मानसानि महता महितप्रवृत्त-
दुर्व्वृत्तिमन्युरजसा कलुषीभवन्ति ॥ ९ ॥

धर्म्मदेशनया शास्तुः प्रव्रज्योन्मार्जिताशयाः ।
ते सर्व्वाश्रमनिर्म्मुक्ता महत्त्वं प्रतिपेदिरे ॥ १० ॥

अत्रान्तरे समायातै र्भिक्षुभिः श्रुततत्कथैः ।
किमेतदिति साश्चर्य्यैः पृष्ट स्तानवदज्जिनः ॥ ११ ॥

कृतापकाराः सुतरां पूर्व्वस्मिन्नपि जन्मनि ।
मयैते निर्व्विकारेण प्रसादादवलोकिताः ॥ १२ ॥

एते समुद्रयात्रायां वणिजः काशिदेशजाः ।
भग्ने प्रवहणे प्रापुः पुरा जीवितसंशयम् ॥ १३ ॥

कच्छपेन मया तत्र पृष्ठ मारोप्य तारिताः ।
पार मासाद्य विश्रान्तिं भेजिरे लब्धजीविताः ॥ १४ ॥

तत्तारणपरिश्रान्ते मयि निद्रावृते क्षणम् ।
मन्मांसाहारकामा स्ते सर्व्वे मां हन्तु मुद्ययुः ॥ १५ ॥

རྫོ་ཡི་ཚར་ཆེན་རབ་སྦྲོས་ཀྱང་། ཁོག་པ་རབ་ཏུ་བརྟན་ལྡན་ཞིང་།
གོང་བུའི་དབྱིབས་ཅན་བདག་གིས་ནི། ལུས་ནི་ནམ་ཡང་ཉམས་མ་གྱུར།། 16
དེ་ནས་བཀྲིས་པས་ཡོངས་ཉིན་དེ། མཐོང་ནས་སྙིང་རྗེས་བདག་འཁྲུགས་པས།
རང་གིས་དེ་དག་རྣམས་ལ་ལུས། བྱིན་ནས་བྱ་བ་བྱས་ཉིད་གྱུར།། 17
སྔོན་གྱི་ཚོང་པ་དེ་དག་རིང་། དཀའ་ཐུབ་ཅན་ནི་འདི་དག་གྱུར།
གནོད་པ་བྱས་ཀྱང་སྙིང་རྗེ་ཡིས། བདག་གིས་དགེ་བ་དག་ལ་བཀོད།། 18
དེ་དག་སྔོན་ཚེ་བདག་ཉིད་ཆེ། སྟོན་པ་འོད་སྲུངས་བསྟན་པ་ལ།
རབ་བྱུང་ཐོབ་ནས་དེ་ཡིས་འབྲས། ད་ལྟ་སྐལ་ལྡན་དག་ཏུ་སྐྱེས།། 19
དེ་བཞིན་གཤེགས་པས་གསུངས་པ་འདི། ཐོས་ནས་དགེ་སློང་རྣམས་ཀྱིས་ནི།
དེ་ཡི་བཟོད་པ་ས་གཞི་བཞིན། ཁུར་དག་བཟོད་པ་རབ་ཏུ་བསྟགས།། 20

གང་ཞིག་ཚུལ་ཁྲིམས་དྲི་མེད་བསིལ་བའི་ཆུ་ལྡན་སེམས་ཅན་
བསམ་པ་དབུགས་འབྱིན་བྱེད།
ཁོན་གྱི་རྡུལ་ནི་རབ་ཏུ་དག་བྱེད་བཟོད་པའི་ཆུ་བོ་སེམས་ལ་རྟག་གནས་པ།
དེ་དག་གློག་དཀའ་དགྲ་ཡི་གནོད་ལ་ཁོ་བའི་མེ་འབར་འཕྲེང་
བས་ཉམ་བསླད་པས།
བསྒྲིག་པར་རབ་བསྐྱེད་རྒྱ་ཆེར་གདུང་བས་ཡོངས་འདྲིས་རྣམ་
འགྱུར་དག་ཏུ་འགྱུར་མ་ཡིན།། 21

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཙུས་སྦལ་གྱི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་བདུན་པའོ།

तदुत्सृष्टाश्मवृष्ट्यापि महत्या पिण्डिताकृतेः ।
काये दृढकपाटस्य न मे काचिदभूत् क्षतिः ॥ १६ ॥

तत स्तान् क्षुत्परिक्षामान् दृष्ट्वाहं करुणाकुलः ।
स्वयं तेभ्य स्तनुं दत्त्वा प्रयातः कृतकृत्यताम् ॥ १७ ॥

तएते वणिजः पूर्व्वं मद्य तापसतां गताः ।
कृतागसोऽपि कारुण्यात् प्रापिताः कुशलं मया ॥ १८ ॥

ते शास्तुः शासने पूर्व्वं काश्यपस्य महामुनेः ।
प्रव्रज्यां प्राप्य सञ्जाता स्तत्फलस्याद्य भागिनः ॥ १९ ॥

तथागतेन कथितं श्रुत्वैतद् भिक्षवः क्षमाः ।
प्रशशंसुः परन्तस्य क्षमामिव भरक्षमाम् ॥ २० ॥

येषां निर्म्मलशीलशीतलजला सत्त्वाशयाश्वासिनी
नित्यं वैररजःप्रमार्जननदी क्षान्तिः स्थिता चेतसि ।
दुर्वारारिनिकारकोपदहनज्वालावलीविप्लव-
श्रावोद्भूतपृथुव्यथा परिचितां नायान्ति ते विक्रियाम् ॥ २१ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कच्छपावदानं सप्तनवतितमः पल्लवः ॥ ० ॥

ཡལ་འདབ་དགུ་བཅུ་རྩ་བརྒྱད་པ།

རིགས་ཀྱི་རི་བོ་དག་གི་རྩེ་མོ་ཤིན་ཏུ་མཐོ་བ་དང་།
དམའ་ཞིང་མི་གཙང་ཚོགས་དང་ཕྱུག་དར་ཁྲོད་ཀྱིས་གང་བར་ཡང་།
ཉིན་མོ་འདྲེན་པའི་སྣང་བ་མཚུངས་པར་ཕན་བྱེད་བདག་ཉིད་ཅན།
འདི་ནི་བྱེ་བྲག་མེད་པར་འཇུག་པར་ངེས་པར་བབ་པ་ཉིད།། 1

གྲོང་ཁྱེར་རྒྱལ་པོའི་ཁབ་ཏུ་སྔོན། འོད་མའི་ཚལ་བཞུགས་རྒྱལ་བ་ལ།
སྨུ་གེའི་ཚེ་ན་བཀྲེས་པ་ཡིས། ཡོངས་ཉེན་གྲུད་རྣམས་སྐྱབས་སུ་སོང་།། 2

སྙིང་རྗེའི་དཔག་བསམ་ཤིང་འཕྲུང་གིས། མངོན་པར་འདོད་པའི་ཟས་བྱིན་ནས།
གནས་སྐབས་ངན་པ་ཞི་བའི་སླད། དེ་དག་རྣམས་ལ་ཆོས་བསྟན་མཛད།། 3

བཅོམ་ལྡན་འདས་ཀྱིས་རྗེས་བཟུང་གིས། དགེ་བ་རྒྱས་པ་ཐོབ་པ་རྣམས།
དགྲ་བཅོམ་གནས་ནི་ཐོབ་གྱུར་ནས། འགྲོ་བས་མཆོད་བྱ་ཉིད་དུ་གྱུར།། 4

དམན་པ་ཤིན་ཏུ་མཐོ་གྱུར་པ། དེ་མཐོང་གྲོང་ཁྱེར་གནས་པ་རྣམས།
རྟག་ཏུ་དེ་དག་རིགས་ལ་ནི། སྨོད་ཅིང་ཕྲག་དོག་ལྡན་པར་གྱུར།། 5

ཀྱི་མ་དག་པའི་བསྟན་པ་ལ། བཅོམ་ལྡན་འདས་ཀྱི་སླ་སློའི་གྲུད།
འདིས་མིན་རྣམས་ལ་དགྲ་བཅོམ་གནས། ངེས་པར་བསྟན་ཅེས་དེ་དག་སྨྲ།། 6

अष्टनवतितमः पल्लवः।

अत्युन्नतेषु शिखरेषु कुलाचलानां
निम्नेषु चाप्युच्चयावकरोत्करेषु।
आलोक एष निपतत्यविशेषवृत्त्या
तुल्योपकारमहिमा दिननायकस्य ॥ १ ॥

जिनं वेणुवनासीनं पुरे राजगृहे पुरा।
दुर्भिक्षे क्षुत्परिक्षामा मल्लाः शरण माययुः ॥ २ ॥

दत्त्वाभिमत माहारं करुणाकल्पपादपः।
दुर्दशाशान्तये तेषां विदधे धर्मदेशनाम् ॥ ३ ॥

अनुग्रहाद् भगवतः संप्राप्तकुशलोदयाः।
अर्हत्पदं समासाद्य ते जगत्पूज्यतां ययुः ॥ ४ ॥

नीचानभ्युन्नतिं यातान् दृष्ट्वा तान् पुरवासिनः।
बभूवु र्मत्सरा स्तेषां नित्यजात्यपवादिनः ॥ ५ ॥

अहो भगवता म्लेच्छमल्लानां शुद्धशासनम्।
अर्हत्पद मनर्हाणां निर्दिष्ट मिति ते ऽवदन् ॥ ६ ॥

ཆུང་ངུ་འཁོར་བ་མི་ཆུང་ལ། གསར་པའི་སྤྲོ་དགའ་མི་བཟོད་པའི།
སྐྱེ་བོ་ངོ་ཚ་སྐྱིད་བྱེད་པའི། སྐྱེ་བ་མཆོག་ཏུ་རབ་གསལ་བྱེད།། 7

རྒྱལ་བའི་བཀའ་ཡིས་སྨྲ་མ་སྐྱན། གླིང་དུ་མཁའ་ལས་འགྲོ་འོང་བྱས།
མཐུ་ཡིས་གྱུད་ནི་དེ་དག་རྣམས། མི་བདག་སྐྱེ་བོར་བཅས་པས་མཆོད།། 8

དེ་དག་གྲོང་པས་ཕྲུག་བྱས་དེ། རབ་དང་བཀུར་བྱས་དེ་དག་རྣམས།
རང་ཡོན་ཡོན་དན་མཆོད་འོས་པས། དགེ་སློང་རྣམས་ཀྱི་མཆོག་ཉིད་གྱུར།། 9

དེ་ནས་དེ་མཐུས་ཡ་མཚན་པའི། དགེ་སློང་རྣམས་ཀྱིས་བཙོམ་ལྡན་ལ།
དེ་ཡི་བསོད་ནམས་རྒྱུ་མཚན་དྲིས། དེ་ལ་ཐམས་ཅད་མཁྱེན་པས་གསུངས།། 10

སྔོན་གྱི་སྐྱེ་བར་ཀཱ་ཤི་ཡི། ཡུལ་མཐའི་དཀའ་ཐུབ་ཚལ་དུ་བདག།
མངོན་ཤེས་ལྔ་ལྡན་དཀའ་ཐུབ་ཅན། དགེ་བའི་ངང་ཚུལ་ཞེས་པར་གྱུར།། 11

དེར་ནི་རྫོང་གི་གྱུད་འདི་དག། སྔོན་ཚེ་ཐུབ་པ་དག་ཏུ་གྱུར།
བདག་གིས་དགེ་བསྙེན་དེ་དག་རྣམས། མངོན་ཤེས་ལྔ་པ་ཉིད་དུ་གྱུར།། 12

སྐྱེ་བ་འདིར་ཡང་བསོད་ནམས་དེའི། བག་ཆགས་གོམས་པའི་དགའ་བ་ཡིས།
གྱུད་འདི་རྣམས་ནི་འཁོར་བ་ཡི། ཉོན་མོངས་དག་ལས་བདག་གིས་བསྒྲལ།། 13

འདི་དག་རྣམས་སྔོན་སྔོན་པ་ནི། འོད་སྲུངས་དྲུང་དུ་རབ་བྱུང་སྟེ།
རྒྱལ་པོའི་གནས་སུ་གནས་པར་གྱུར། དེ་ཡི་ད་ལྟ་གྱུད་ཉིད་གྱུར།། 14

अल्पस्यानल्पविभवं नवोत्साहासहः परम् ।
करोति लज्जाजननं जनो जन्मप्रकाशनम् ॥ ७ ॥

जिनाज्ञया कुरुद्वीपे व्योम्ना कृतगतागतान् ।
प्रभावान्नृपति र्मल्लान् सजन स्तानपूजयत् ॥ ८ ॥

ततः प्रसादिताः पौरै र्मानिताश्च प्रणम्य ते ।
सुगुणै र्गुणवत्पूज्यै र्भिक्षूणामग्र्यतां ययुः ॥ ९ ॥

भिक्षुभि स्तत्प्रभावेन विस्मितै र्भगवांस्ततः ।
तत्पुण्यकारणं पृष्टः सर्व्वज्ञ स्तानभाषत ॥ १० ॥

अभवं काशिदेशान्ते पञ्चाभिज्ञ स्तपोवने ।
अहं कुशलशीलाख्यः पूर्व्वजन्मनि तापसः ॥ ११ ॥

कोटमल्लाश्च तत्रैव बभूवु र्मुनयः पुरा ।
ते मया दिष्टकल्याणाः पञ्चाभिज्ञत्व मागताः ॥ १२ ॥

तत्पुण्यवासनाभ्यासप्रीत्यास्मिन्नपि जन्मनि ।
त एते संसृतिक्लेशान्मल्लाः सन्तारिता मया ॥ १३ ॥

एते प्रव्रजिताः शास्तुः काश्यपस्यान्तिके पुरा ।
बभूवुः कटुकालापा याता स्तेनाद्य मल्लकाः ॥ १४ ॥

ཅེས་པ་གྲུད་རྣམས་དག་གི་ནི། སྐྱེ་བ་སྔར་བྱུང་བཅོམ་ལྡན་འདས།
ཐམས་ཅད་གཟིགས་པས་གསུངས་པ་དག། ཐོས་ནས་དགེ་སློང་ཡ་མཚན་གྱུར།། 15

གཟའ་ཡི་བདག་པོས་སྣང་བས་རྗེས་བཟུང་བས།
སྨུན་པའི་ཚོགས་ཀྱི་རྣམ་པར་ཟུམ་གྱུར་པའི།
འདམ་སྐྱེས་ཆུ་དང་བཅས་པ་རྣམས་དག་ཀྱང་།
མཁས་པའི་ཅོད་པན་དུ་འོས་ཉིད་དུ་འགྱུར།། 16

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་བརྗོད་པ་
དཔག་བསམ་འཁྲི་ཤིང་ལས་དཀའ་ཐུབ་པའི་རྟོགས་པ་བརྗོད་
པའི་ཡལ་འདབ་དགུ་བཅུ་རྩ་བརྒྱད་པའོ།

इति प्रागृजन्मवृत्तान्तं मल्लानां सर्व्वदर्शिना ।
श्रुत्वोदितं भगवता भिक्षवो विस्मयं ययुः ॥ १५ ॥

तिमिरभरनिमीलितानां
सुजनानां विबुधशेखरार्हत्त्वम् ।
अपि भवति पङ्कजानां
आलोकानुग्रहाद् ग्रहाधिपतेः ॥ १६ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
तापसावदान मष्टानवतितमः पल्लवः ॥ ० ॥

ཡལ་འདབ་དགུ་བཅུ་རྩ་དགུ་པ།

ལུས་ཅན་ལུས་དང་དེ་བཞིན་ཡིད་ཀྱིས་ནི།
སྲིད་པའི་རང་བཞིན་ནད་ཆེན་འཕྲོག་བྱེད་པ།
འཇིག་རྟེན་ཀུན་གྱི་འཇིག་རྟེན་ཕ་རོལ་གཉེན།
སངས་རྒྱས་བཅོམ་ལྡན་བདུད་རྩིའི་གཏེར་ཉིད་དོ།། 1

མཉན་ཡོད་དུ་སྔོན་བཅོམ་ལྡན་འདས། རྒྱལ་བའི་གཟིགས་པ་བདུད་རྩི་ཡིས།
སྐྱེ་བོ་ནད་ཀྱིས་གཟིར་རྣམས་དང་། དགེ་སློང་ཚོགས་ཀྱང་བསོས་པར་མཛད།། 2

མཉེས་གཤེན་གྱི་ནི་ཡ་མཚན་པའི། དགེ་སློང་ཚོགས་ལ་དེས་གསུངས་པ།
སྔོན་གྱི་སྐྱེ་བ་དག་ལ་ཡང་། བདག་གིས་ཁྱེད་རྣམས་བསོས་པར་བྱས།། 3

བདག་སྔོན་བཱ་རཱ་ཎ་སེར་ནི། མི་བདག་པདྨ་ཅན་ཞེས་པ།
གཟིར་བ་ཐམས་ཅད་སེལ་ལ་ཆགས། སྐྱེ་རྒྱུའི་ཕ་དང་མཚུངས་པར་གྱུར།། 4

ནམ་ཞིག་གནམ་གྱི་སྐྱོན་གྱིས་ནི། ཡུལ་དང་དུས་ནི་མི་བཟད་ལས།
གྲོང་པ་རྣམས་ལ་བཟོད་དཀའ་ཡིས། ནད་ནི་རབ་ཏུ་རྒྱས་པར་གྱུར།། 5

སྨན་པ་སྨན་གྱི་ཚོགས་དང་ནི། ཞི་དང་ཤེས་པའི་སྦྱོར་བ་ཡིས།
བདག་གིས་ཕུན་ཚོགས་བསྒྲུབས་བྱས་པ། དེ་དག་བསོས་པ་ཉིད་མ་གྱུར།། 6

དེ་དག་ནད་ནི་ཟློག་པ་ལ། ཉ་ཆེན་རོ་ཧི་ཏ་ཞེས་པ།
མཚན་ཉིད་ཤེས་པའི་སྨན་པས་བསྟེན། ཉ་པས་འགའ་ཡང་ཐོབ་མ་གྱུར།། 7

नवनवतितमः पल्लवः ।

कायिकं हरति मानसं तथा
देहिनां भवमयं महाभयम् ।
बुद्ध एव भगवान् सुधानिधिः
सर्व्वलोकपरलोकबान्धवः ॥ १ ॥

श्रावस्त्यां भगवान् पूर्व्वं रोगाक्रान्तजनं जिनः ।
विदधे भिक्षुसङ्घञ्च स्वस्थ मालोकनामृतैः ॥ २ ॥

वात्सल्यविस्मितं सोऽथ भिक्षुसङ्घ मभाषत ।
मया यूयं कृताः स्वस्थाः पूर्व्वस्मिन्नपि जन्मनि ॥ ३ ॥

अभवं पद्मकाख्योऽहं वाराणस्यां नृपः पुरा ।
सर्व्वार्त्तिहरणासक्तः प्रजानां जनकोपमः ॥ ४ ॥

कदाचिद्दैवदोषेण वैषम्याद्देशकालयोः ।
दुःसहः सर्व्वपौराणा मभूद्व्याधिसमुद्भवः ॥ ५ ॥

भिषग्भैषज्यसंभारै र्मायाविहितसम्पदः ।
शान्तिस्वस्तिकयोगैश्च न ते स्वास्थ्यं समाययुः ॥ ६ ॥

रोहिताख्यो महामत्स्य स्तेषां रोगनिवृत्तये ।
लक्षज्ञवैद्यै रादिष्टः कैश्चित् प्राप्तो न धीवरैः ॥ ७ ॥

ཉ་དེ་མེད་པས་སྐྱེ་བོ་རྣམས། སྲོག་ལ་བྲེ་ཚོམ་གྱུར་ཆེ་བདག།
དེ་དག་ཚེ་ང་མ་བཟོད་པས། སྡུག་བསྔལ་གྱིས་གཟིར་སྙིང་རྗེ་ལས།། 8
ནད་པ་ཀུན་ལ་ཕན་འདོས་པ། རོ་ཧི་ཏ་ཡི་ཉར་ནི་བདག།
གྱུར་ཅེས་སྨོན་ལམ་བརྟུལ་ཞུགས་ཀྱིས། བ་གམ་ངོས་ནས་ལུས་དག་འཕངས།། 9
གཟིར་བའི་སྨོན་ལམ་དེ་ཡིས་ནི། ཆུ་བོ་བ་ར་དག་གི་ཆུར།
སྐད་ཅིག་གིས་བདག་རོ་ཧི་ཏའི། ཉ་ནི་ཤིན་ཏུ་ཆེན་པོར་གྱུར།། 10
དེ་ཡི་ཤ་ནི་ཉེར་སྦྱར་བས། གྲོང་ཁྱེར་ན་གནས་དེ་དག་ཀུན།
བདུད་རྩི་ཡིས་ནི་བཀང་བ་བཞིན། འཕྲལ་ལ་བསོས་པ་ཉིད་དུ་གྱུར།། 11
དེ་ཉིད་དགེ་སློང་ཁྱེད་རྣམས་དེ། དེ་རིང་བདག་གིས་ནད་ལས་བསྒྲལ།
སེམས་ཅན་རྣམས་ཀྱི་ནད་བསྐྱབས་པས། རྟག་ཏུ་བདག་ནི་ནད་དང་བྲལ།། 12
བདེ་གཤེགས་འཁོར་བའི་ནད་ཀྱིས་ནི། སྨན་པས་དེ་སྐད་གསུང་པ་དག།
དགེ་སློང་བསོས་པ་དེ་དག་གིས། ཐོས་ནས་དགའ་མགུ་རངས་པ་ཐོབ།། 13

ཤིན་ཏུ་ཆུང་བའི་རྩྭ་དང་མཚུངས་པ་ཡིས།
ལུས་དང་སྦྱིན་པ་གང་ལ་རྟེ་དགའ་ཅན།
གཞན་ཕན་ཡིད་དང་བྲལ་བ་མིན་རྣམས་ཀྱིས།
སྙིང་སྟོབས་བཅས་པ་ཅི་ཡང་རྣམ་པར་གསལ།། 14

ཞེས་པ་དགེ་བའི་དབང་པོས་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་པདྨ་ཅན་གྱི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་དགུ་བཅུ་རྩ་དགུ་པའོ།

अभावे तस्य मत्स्यस्य जनानां प्राणसंशये ।
मया दुःखार्त्तकारुण्यात् तत्प्रलापासहिष्णुना ॥ ८ ॥

रोहितः स्यामहं मत्स्यः पथ्यार्हः सर्व्वरोगिणाम् ।
प्रणिधानबलेनेति क्षिप्तं हर्म्यात्तदा वपुः ॥ ९ ॥

तेनार्त्तिप्रणिधानेन वारायाः सरितोऽम्भसि ।
क्षणेनैवाह मभवं सुमहान् रोहित स्तिमिः ॥ १० ॥

तन्मांसेनोपयुक्तेन सर्व्वे ते पुरवासिनः ।
सहसैव ययुः स्वास्थ्य मम्रृतेनेव पूरिताः ॥ ११ ॥

त एव भिक्षवो यूय मद्य रोगान्मयोद्धृताः ।
रोगत्राणेन सत्त्वानां सदैवाहं निरामयः ॥ १२ ॥

संसारव्याधिवैद्येन सुगतेनेति भाषितम् ।
स्वस्था स्ते भिक्षवः श्रुत्वा हर्षोत्साहं प्रपेदिरे ॥ १३ ॥

अविरतपरहितमनसां कोऽपि स समत्वविकाशः ।
तनुरपि तनुतृणतुलया दत्तो यत्र— —विलासः ॥ १४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पद्मकावदानं नवनवतितमः पल्लवः ॥

ཡལ་འདབ་བརྒྱ་ཐམས་པ།

གང་གི་བསམ་པར་ཟླ་མེད་བྱང་ཆུབ་འདོད།
བདུད་རྩིའི་ཡོ་ཀ་དང་པོ་ཟླ་ཆེ་བཞིན།
བསོད་ནམས་ཀྱིས་ནི་གསར་དུ་འཛུག་བྱེད་པ།
སྙིང་སྟོབས་རྒྱ་མཚོ་སྲུ་ཞིག་དེར་ཕྱུག་འོས།། 1

རྒྱལ་བྱེད་ཚལ་བཞུགས་རྒྱལ་བ་ལ། དཔལ་ལྡན་ཀོ་ས་ལ་ཡི་དབང་།
གསལ་རྒྱལ་དགེ་མཚན་ལ་ཆགས་ཤིང་། རབ་དུ་བདུད་པས་སྨོན་ཞུས་པ།། 2

ཁྱོད་ཀྱི་ཡང་དག་རྫོགས་པ་ཡི། བྱང་ཆུབ་བག་ཆགས་དང་པོ་ནི།
སྨོན་གྱི་སྐྱེ་བ་གང་ལས་སྐྱེས། འོད་ཟེར་རྒྱ་ཆེ་བཅོམ་ལྡན་གསུངས།། 3

ས་བདག་གིས་འདི་དྲིས་དེ་ལ། ཆེམས་ཀྱི་འོད་ཟེར་ཡིད་ཀྱི་རྫིང་།
གཙང་མའི་ངང་པའི་འཕྲིང་སྟོན་ཅིང་། བཅོམ་ལྡན་འདས་ཀྱིས་སྐར་གསུངས་པ།།
4

གྲོང་ཁྱེར་འོད་ལྡན་དག་ཏུ་སྔོན། རབ་གསལ་ས་བདག་གཏེར་དུ་ནི།
གང་ཚེ་བདག་གྱུར་དེ་ཚེ་བདག། རྫོགས་པའི་བྱང་ཆུབ་བློ་གྲོས་གྱུར།། 5

སྣང་པོ་ཆགས་ལྡན་སྣང་མོ་ལ། དགའ་བའི་ཞགས་པས་རབ་དུ་དྲངས།
ནགས་སུ་འཁྲུམ་ནས་གང་གི་ཚེ། དེ་ཚེ་ཉི་བར་འོངས་གྱུར་པ།། 6

शततमः पल्लवः ।

सत्वोदधिः कोऽपि स वन्दनीयः
करोति पुण्यै रमृताग्रदूतौ ।
यस्याशयेऽनुत्तरबोधिवाञ्छा
शीतांशुलेखेव नवावतारम् ॥ १ ॥

जिनं जेतवनासीनं पप्रच्छ प्रणतः पुरा ।
कौतुकप्रणयी श्रीमान् कोशलेन्द्रः प्रसेनजित् ॥ २ ॥

भगवन् कथ्यतां कस्मिन् प्रथमं ते पृथुद्युतेः ।
पूर्व्वजन्मनि संजाता सम्यक् संबोधिवासना ॥ ३ ॥

भगवानिति भूपेन पृष्ट स्तं प्रत्यभाषत ।
शुचिमानसहंसाली दर्शयन् दशनद्युतिम् ॥ ४ ॥

पुर्य्यां पुरा प्रभावत्यां प्रभासो भूभुजां निधिः ।
यदाहमभवं सम्यक् बोधिधी र्मे तदाभवत् ॥ ५ ॥

करिणीप्रेमपाशेन समाकृष्टः स कुञ्जरः ।
यदा विगाह्य गहनं रागी पुनरुपागतः ॥ ६ ॥

དེ་ཚེ་གླང་ཆེན་སྣ་ཆེན་པོ། ཀུན་དུ་བགྲོད་ཀྱིས་དེ་ལ་སྨྲས།
ས་བདག་བདག་གི་བསླབ་པ་ཡིས། གླང་པོ་དག་ནི་རབ་ཏུ་འོངས།། 7

འདོད་ཆགས་ཀྱིས་ནི་ཡང་དག་དྲངས། རྡུལ་བ་བརྗེད་པའི་གླང་པོ་འདི།
ཡོན་ཏན་དཀྱིལ་འཁོར་ཡིད་བརྟན་པ། ངེས་པར་རྣམ་འགྱུར་དག་ཏུ་གྱུར།། 8

ལུས་འཛིན་འདོད་ཆགས་དྲན་པས་རབ་བསྐྱེད་དྲན་འཕྲོག་བརྟན་པ་འཇོམས་པ་ནི།
མེ་དང་ཉི་མ་མིན་པས་གདུང་ཞིང་དམོད་པ་མིན་པས་དམྱལ་བར་བྱེད།
ལོང་དང་མཚན་མོ་མིན་པའི་རབ་རིབ་ལག་འགྲོ་འི་རྫས་མིན་མི་བཟད་དུག།
ཆང་མིན་མྱོས་བྱེད་དམའ་མིན་ལྷུང་བྱེད་འབྱུང་པོ་མིན་པའི་སྨྱོ་བྱེད་དོ།། 9

ཞེས་པ་ཀུན་བགྲོད་ཀྱིས་སྨྲས་ཚེ། དེ་ལ་མི་བདག་གིས་སྨྲས་པ།
ཆགས་བྲལ་ཡུལ་ལ་ཆགས་མེད་པ། འགའ་ཞིག་འཁོར་བ་ན་ཡོད་དམ།། 10

ཞེས་པ་ས་ཡི་བདག་པོས་དྲིས། ཀུན་དུ་བགྲོད་ཀྱིས་དེ་ལ་སྨྲས།
འགྲོ་བ་འདི་ན་དེ་བཞིན་གཤེགས། འཁོར་བ་མེད་པ་འདོད་ཆགས་བྲལ།། 11

དམ་པའི་སྤྱོད་དང་ཡོན་ཏན་ཅན། སེམས་ཅན་ཀུན་ལ་ཕན་མཛད་པ།
རྒྱལ་པོ་སངས་རྒྱས་སྒྲོན་མ་ཡིས། འོད་ཀྱིས་ཐམས་ཅད་གསལ་བར་མཛད།། 12

དེ་དག་ཐོས་ནས་ས་ཡི་བདག། མཆོག་ཏུ་རབ་དང་སེམས་ལྡན་པའི།
སྙིང་ལ་རྫོགས་པའི་བྱང་ཆུབ་ཀྱི། བག་ཆགས་འཕྲལ་ལ་རབ་ཏུ་འཁྲུངས།། 13

तदा हस्तिमहामात्रः संयात स्त मभाषत ।
प्रत्यायातः क्षितिपते कुञ्जरः शिक्षया मम ॥ ७ ॥

एष रागसमाकृष्टः कायविस्मृतसंयमः ।
जगाम विक्रियां हस्ती विश्रम्भगुणमण्डलः ॥ ८ ॥

अहृर्य्याग्नि स्तापः क्षतधृति रशापश्च निरयः
तमश्चानुत्क्रान्त्यं विषमविष मद्रव्यभुजगम् ।
असह्यं क्षीवत्वं निपतन मनिम्नं तनुभृता-
मभूच्चोन्मादः स स्मरजनितरागः स्मृतिहरः ॥ ९ ॥

संयातेनेति कथिते नृप स्तं प्रत्यभाषत ।
अप्यस्ति रागः संसारे कश्चिद्विषयनिस्पृहः ॥ १० ॥

इति पृष्टः क्षितीशेन संयात स्त मभाषत ।
निःसंसारा जगत्यस्मिन् वीतरागा स्तथागताः ॥ ११ ॥

सत्पात्राणां गुणवतां सर्व्वसत्त्वोपकारिणाम् ।
राजन् बुद्धप्रदीपानां रुचा विश्वं प्रकाश्यते ॥ १२ ॥

एतदाकर्ण्य भूभर्त्तुः परं चित्तप्रसादिनः ।
प्रादुर्बभूव हृदये सद्यः संबोधिवासना ॥ १३ ॥

སྨོན་གྱི་བསོད་ནམས་མཐུ་ཡིས་ནི། དགེ་བ་རྒྱས་པ་ཡང་དག་ཐོབ།
དེ་ཡི་ཡང་དག་རྫོགས་པ་ཡི། བྱང་ཆུབ་ཐོབ་སླད་སྨོན་ལམ་བྱས།། 14

དེ་ནི་སྨོན་གྱི་སྐྱེ་བ་ལ། ཛ་མཁན་ཁྲིམ་བདག་ཅེས་པར་གྱུར།
དེ་ཡི་དབུལ་ཚོ་གུས་པ་ཡིས། ཐུ་རམ་གཟན་གྱིས་རྒྱལ་བ་མཆོད།། 15

དེ་ཡི་བསོད་ནམས་སྨོན་ལམ་གྱིས། རབ་གསལ་ཉིད་ཐོབ་དེ་ཡི་ནི།
སེམས་ལ་བྱང་ཆུབ་མྱུ་གུ་བསྐྲུན། ད་ལྟ་བདག་ལ་འབྲས་འདི་གྲུབ།། 16

དང་པོར་དགེ་བའི་བྱང་ཆུབ་སེམས་བསྐྱེད་པ།
དེ་བཞིན་གཤེགས་པས་གསུངས་པ་དེ་ནི་དེར།
བདུད་རྩི་བཞིན་དུ་ཐོས་པའི་འཁོར་བ་ཡིས།
ཀོ་ས་ལ་དབང་དེས་འཕྲུངས་རྒྱལ་སར་སོང་།། 17

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་བསོད་ནམས་རབ་གསལ་གྱི་རྟོགས་
པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་པའོ།།

पूर्व्वपुण्यप्रभावेण संप्राप्तकुशलोदयः ।
सम्यक्संबोधिलाभाय प्रणिधानं चकार सः ॥ १४ ॥

सोऽभूद्गृहपतिर्नाम कुलालः पूर्व्वजन्मनि ।
स्नेहे गुडोदनै स्तेन दीनेन पूजितोजिनः ॥ १५ ॥

तत्पुण्यप्रणिधानेन तस्यास्तस्य प्रभासताम् ।
बोधि रङ्कुरिता चित्ते फलितेयं ममाधुना ॥ १६ ॥

कथितमिति तथागतेन तच
प्रथमतरोदितशुद्धबोधिचित्तम् ।
अमृतमिव निपीय कोशलेन्द्रः
श्रुतिचुलुकैः स जगाम राजधानीम् ॥ १७ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
पुण्यप्रभासावदानं शततमः पल्लवः ॥

ཡལ་འདབ་བརྒྱ་རྩ་གཅིག་པ།

གང་ཞིག་སྐྱིད་བྱེད་ཚ་ཟེར་ལྡན་པ་རྒྱུ་བའི་ཞབས་ནི་ཉི་བར་བསྟེན་པ་འཛིན།
གང་གི་མ་ནི་ཐོ་རངས་སྣང་བ་མཆོད་འོས་རྟག་པར་རྒྱུན་དུ་རབ་གསལ་འཆར།
སྐྱེ་བོ་ཐམས་ཅད་དགའ་བའི་སྔ་དྲོ་ དེ་ཉིད་ཉིན་མོ་དག་ལ་བསྔགས་པར་འོས།
དེ་ཡི་རྗེས་འབྲང་འཇིག་རྟེན་འདི་འམ་གཞན་དུ་འགར་ཡང་ཐུན་པས་རིག་
མི་འགྱུར།། 1

ས་དབང་ཟས་གཙང་གྲགས་པ་ལྷག་མ་ཡི།
གནས་སྐབས་གྱུར་ཆེ་དེ་ཡི་ལུས་ལ་ནི།
དེ་བཞིན་གཤེགས་དག་མཆོག་ཏུ་གསལ་མཛད་པ།
གྲུས་པས་མཆོད་མཛད་མཆོད་རྟེན་དག་ཀྱང་མཛད།། 2

དབེན་པའི་སྤྱོད་ཚུལ་འཇིག་རྟེན་ཐུན་མོང་མིན།
ཇི་ལྟར་བཞེད་པར་འཇིག་རྟེན་ལམ་འཇུག་པ།
དེ་ལ་ཐེ་ཚོམ་ཡ་མཚན་གྱིས་གང་བའི།
དགེ་སློང་ཚོགས་ཀྱིས་མངོན་དུ་ཕྱོགས་དེ་དྲིས།། 3

མི་ཉམས་བླ་ན་མེད་པའི་བྱང་ཆུབ་གནས།
ཆགས་པ་སྤངས་པས་འཇིག་རྟེན་སྤྱོད་བཏང་བ།
འགྲོ་བའི་བླ་ཁྱོད་བླ་མ་ལ་གུས་པས།
ཐ་སྙད་སྤྱོད་ལ་འཇུག་པ་འདི་ནི་ཅི།། 4

एकाधिक शततमः पल्लवः ।

कल्यः सर्व्वजनप्रियः सततमासक्तप्रकाशोदयः
श्लाघ्यो वासर एष यस्य जननी पूज्या प्रभातद्युतिः ।
यस्याग्रे जनकस्य चण्डमहसः पादोपसेवाश्रुतिः
लोकेऽस्मिन्नपरत्र वा तदनुगः स्पृष्ट स्तमोभिः क्वचित् ॥ १ ॥

याते यशःशेषदशां क्षितीशे
शुद्धोदने शुद्धवरप्रकाशे ।
भक्त्या चकारास्य शरीरपूजां
तथागतः स्तूप मकारयच्च ॥ २ ॥

अलोकसामान्यविविक्तवृत्तं
यदृच्छयालोकपथप्रवृत्तम् ।
संपूरितः संशयविस्मयाभ्यां
पप्रच्छ तं भिक्षुगणः समेत्य ॥ ३ ॥

अनुत्तरानत्ययबोधिधाम्नः
स्पृहाप्रहाणोर्जितलोकवृत्तेः ।
जगद्गुरो स्ते गुरुगौरवेण
केयं प्रवृत्ता व्यवहारचर्य्या ॥ ४ ॥

བཅོམ་ལྡན་ཆོས་གཟིགས་དག་གིས་དེར་གསུངས་པ།
དག་པའི་གནས་སུ་གྱུར་པའི་ཡུལ་དག་གི།
རྒྱུར་གྱུར་ཕ་མ་དག་ནི་མཁས་རྣམས་ཀྱི།
བླ་མ་ཡིས་ཀྱང་མཆོད་འོས་ཞེ་སར་འོས།། 5

དང་པོར་མཐའ་དག་བསོད་ནམས་ལ་འཇུག་པའི།
ཕ་མ་གང་གིས་རྟག་ཏུ་མི་མཆོད་པ།
དེ་དག་ཆོས་ཀྱང་ཆོས་མིན་ཉིད་འགྱུར་ཞིང་།
ཡེ་ཤེས་སྣང་བ་ནག་པོ་ཉིད་དུ་གྱུར།། 6

སྐྱེ་བ་གཞན་ལ་གྲུས་དང་ཞེ་ས་ཡིས།
དཀའ་ཐུབ་ལ་ཞུགས་ཕ་མ་ཡོང་བ་དག།
ཁྲིམ་ལ་ཆགས་བདང་བདག་གིས་མཆོད་པ་ཡིས།
ལྷ་བཞིན་རྟག་པའི་ཉིད་དུ་མཉིས་པར་བྱས།། 7

ཀ་ཤིའི་གྲོང་དུ་གཉིས་སྐྱེས་གཉེན་བཅས་ཀྱི།
རྩང་མ་གོ་ཏ་མི་ཀ་ཞེས་ལ་སྨོན།
རིགས་ནི་དག་ཅིང་གཙང་བར་བྱེད་པའི་བུ།
ཀློ་ལྡན་སྣ་བསངས་ཅན་ཞེས་བྱ་བ་བྱུང་།། 8

ཁྲོ་ཤུག་དེ་དག་རྐུས་པས་ཡོང་བ་ཐོབ།
བུ་ལ་ཁྲིམ་བཀོད་ནགས་མཐའ་དག་ཏུ་སོང་།

तान् धर्म्मदर्शी भगवान् बभाषे
पूज्यौ गुरूणामपि गौरवार्हौ ।
कायस्य कल्याणनिकेतनस्य
निमित्तभूतौ पितरौ बुधानाम् ॥ ५ ॥

धर्म्मोऽप्यधर्म्मत्व मुपैति तेषां
ज्ञानद्युति र्व्यामलतां प्रयाति ।
समस्तपुण्यप्रथमावतारौ
न पूजितौ यैः पितरौ सदैव ॥ ६ ॥

जन्मान्तरेऽप्यादरगौरवेण
तपःप्रवृत्तौ पितरौ मयान्धौ ।
आराधितौ त्यक्तगृहस्पृहेण
सपर्य्यया दैवतवत् सदैव ॥ ७ ॥

द्विजन्मनः काशिपुरे सुबन्धोः
पत्न्यां पुरा गोमतिकाभिधायाम् ।
पुत्रः पवित्रीकृतशुद्धवंशः
श्यामाकनामा मतिमान् बभूव ॥ ८ ॥

तौ दम्पती वृद्धतयान्ध्य मातौ
यातौ सुतन्यस्तगृहौ वनान्तम् ।

མཁས་པ་རྣམས་ནི་གྲུ་བས་འཇུག་པ་ན།
དབེན་པ་མཆོག་ཏུ་དར་བ་ཉིད་དུ་གྱུར།། 9

དེ་དག་བུ་ནི་ཀུན་སྤྱོད་ཡོན་ཏན་གྱིས།
རྒྱལ་པོས་མདུན་ན་འདོན་དུ་རབ་ཕྱུས་ཀྱང་།
ཕ་མའི་མཆོད་པ་ལ་ཆགས་ལང་ཚོ་ཅན།
བསོད་ནམས་དཀའ་ཐུབ་ནགས་དེར་དེ་ཚེ་སོང་།། 10

མཁས་པ་དེ་ཡིས་འབད་པས་རྩ་བ་དང་།
འབྲས་བུ་ཆུ་དང་བཅས་པ་ས་རིམ་གྲོ་བྱས།
ཚིག་ཞེས་ཡིད་ནི་རབ་ཏུ་དང་བ་སྐྱེས།
དེ་ཡི་ཕ་མ་དག་གིས་རབ་དགའ་ཐོབ།། 11

དེ་ནས་ནམ་ཞིག་རྫོན་ལ་རྩེ་བ་ཡི།
དེ་དག་བསྟི་གནས་དང་ཉེ་ཆུ་ཀླུང་འགྲམ།
མ་དེ་གཉིས་འཕྲུང་དབང་གིས་མི་དམན་པའི།
ས་དེར་མི་ཡི་བདག་པོ་ཚངས་བྱིན་འོངས།། 12

སྐབས་དེར་དེར་ནི་རི་དགས་ཀླགས་པས་མཚན།
ཆུས་གང་བུམ་པ་ལེན་པའི་སྒྲོ་བསངས་ཅན།
རི་དགས་དོན་གཉེར་རྒྱལ་པོས་རིང་པོ་ནས།
རྣ་བའི་བར་དུ་དྲངས་པའི་མདའ་ཡིས་བསྣུན།། 13

मनीषिणामेव जराऽवतारे
परं विवेक स्तरुणत्व मेति ॥ ९ ॥

ततस्तनु राचारगुणेन राज्ञा
पुरोहितत्वं भृश मर्थितोऽपि ।
पित्रोः सपर्य्यारसिक स्तदेव
ययौ युवा पुण्यतपोवनं तत् ॥ १० ॥

तेन प्रयत्नात् परिचर्य्यमाणौ
मनीषिणा मूलफलैः सतोयैः ।
सन्तोषसञ्जातमनःप्रसादा
दवापतु स्तत्पितरौ प्रमोदम् ॥ ११ ॥

ततः कदाचिन्मृगयाविहारी
तदाश्रमोपान्तसरित्तटान्ते ।
मही महीनां महिषद्विपेन्द्रै-
स्तां ब्रह्मदत्तो नृपति र्जगाहे ॥ १२ ॥

अत्रान्तरे तत्र मृगाजिनाङ्क-
मम्भोभृतं कुम्भ मपाददानम् ।
श्यामाक माकर्णस्तेन राज्ञा
जघान दूरादिषुणा मृगार्थी ॥ १३ ॥

མི་བསྣུན་ཚིག་གིས་བཞིན་དུ་མདའ་རྡོ་ནི།
བདེ་མེད་ལས་ཀྱིས་ཉེ་བར་གནས་པ་དེ།
གནད་དུ་ཟུག་པས་དུག་དུ་ཞུགས་པ་དེས།
རྣམ་པར་གསོ་ཞིང་དཔལ་གྱིས་རབ་སྐྲུས་པ།། 14

ཀྱེ་མ་ཤིན་དུ་འཕགས་པ་མིན་པ་སྲུ།
སྙིང་རྗེའི་བསམ་པ་མེད་པས་རྒྱུ་མེད་དུ།
སྡིག་པ་མ་སྤྱད་བྱ་མིན་ལ་ཆགས་ནས།
སྡིག་ནི་འཕྲོག་པར་བྱེད་པའི་མདའ་འདི་འཕངས།། 15

ཉགས་ན་ཕ་མའི་ལུས་འཛིན་དུ་གནས་པ།
མིག་རབ་ཉམས་པའི་དབྱིག་པར་གྱུར་པ་བདག།
ཀྱེ་ཧུད་བསད་ཚེ་རེ་མེད་དེ་དག་བསད།
གསུམ་གསོད་དྲག་པོའི་བསད་འདི་སུ་ཞིག་གིས།། 16

ཞེས་པ་གདུང་བས་འཁྲུལ་སྨྲ་བྲམ་ཟེ་དེ།
སྨྲ་རའི་རི་མོ་གསར་ཆགས་མི་བདག་གིས།
བྱུང་བ་དང་བཅས་ཙུ་ད་གསར་བ་དག།
ཤིང་མཁན་དག་གིས་བཅད་བཞིན་མདུན་དུ་མཐོང་།། 17

བླ་མའི་ཉོན་མོངས་ཁྲུད་པར་བསམས་པས་གདུང་།
འབར་བའི་མེ་ལྕེ་ལྟ་བུར་སྤྱོད་པའི་མདའ།

अशर्म्मकर्म्मोपनतेन तेन
शितेन विद्धः खलनर्म्मणेव ।
मर्म्मावसन्नेन शरेण तीव्रं
विघूर्णमानः स शनै र्जगाद ॥ १४ ॥

अहो वतानार्य्यतरेण केन
निष्कारणं निष्करुणाशयेन ।
अकार्य्यसङ्गादविचार्य्य पापं
प्राणापहारी प्रहितः शरोऽयम् ॥ १५ ॥

पित्रो र्वने देहभृतो र्निविष्टे
दृष्टिप्रलोभान्मयि यष्टिभूते ।
कष्टं हते तौ निहतौ निराशौ
कस्याय मुग्र स्त्विवधे प्रयत्नः ॥ १६ ॥

इति व्यथाविह्वलितप्रलापं
विप्रं नवश्मश्रुनिलीनलेखम् ।
नृपः सभृङ्गं नवचूत मग्रतः
तं कान्तिकच्छिन्न मिवालुलोक ॥ १७ ॥

शरं गुरुक्लेशविशेषचिन्ता-
सन्तापदीप्ताग्निशिखायमानम् ।

སྨྲོས་མཚན་སློག་གི་མི་མཐུན་ཕྱོགས་གྱུར་པས།
གསེར་གྱི་ལྗོང་ཅན་སྐྱིད་ལ་འཛོན་བྱེད་ཅིང་།། 18

ཆུ་ཀླུང་ངོགས་ན་འགྲོ་ལྡོག་བྱེད་པ་དེ།
མཐོང་ནས་མི་དབང་བརྟན་པ་རབ་ཏུ་ཉམས།
གཟི་བྱིན་བྲལ་བ་རང་གི་མདའ་དེ་ཡིས།
བསྣུན་པ་བཞིན་དུ་རྒྱ་ཆེར་གདུང་བར་གྱུར། 19

དེ་ལ་དེས་སྨྲས་ཐུབ་པ་རི་དགས་ཀྱི།
པགས་པས་ལུས་སྟོད་གཡོགས་པ་ཁྱོད་ནི་བདག།
རབ་ཏུ་སྨོངས་པས་བཅོམ་མོ་དམ་པ་ཀྱི།
བདག་ཉིད་དམོད་པའི་མེ་ཡིས་གཞོམ་མི་འོས།། 20

ཞེས་པ་རྒྱལ་པོ་གཟིར་བའི་ཚིག་ཐོས་ནས།
རལ་པའི་ཚོགས་བཀྲམ་གཞོན་ནུ་རང་བཞིན་གྱིས།
ཁྲོ་མེད་ཡིད་ལྡན་སྙིང་སྟོབས་གཏེར་གྱིས་ནི།
སྡུག་པོར་གདུང་བ་བཟོད་བྱས་དེ་ལ་སྨྲས།། 21

རྒྱལ་པོ་དཀའ་ཐུབ་དམོད་པས་འཇིགས་དོན་མེད།
ཁྲོ་བྲལ་བདག་དང་བདག་གི་ཕ་མ་དག།
ལོང་བ་སྐྱོག་འཁྱོག་གནོད་པ་འདི་ལ་ཡང་།
ཁྱོད་ལ་དམོད་པ་དག་ནི་འདོར་མི་འགྱུར།། 22

पक्षाङ्कितं प्राणविपक्षभूतं
सुवर्णपुंखं हृदये वहन्तम् ॥ १८ ॥

विचेष्टमानं तटिनीतटान्ते
दृष्ट्वा त माक्रष्टधृति र्नरेन्द्रः ।
हृतः प्रतीपोपगतेन तेन
स्वशायकेनैव पृथुव्यथोऽभूत ॥ १९ ॥

तं बभाषे न मुने मया त्वं
मृगाजिनाच्छादितपूर्व्वकायः ।
प्रमोददोषाभिहतेन साधो
शापाग्निना नार्हसि मां निहन्तुम् ॥ २० ॥

श्रुत्वेति वाक्यं व्यथितस्य राज्ञः
तीव्रव्यथां सत्त्वनिधि र्नियम्य ।
त मब्रवीत् कीर्णजटाकलापः
स्वभावनिर्मन्युमनाः कुमारः ॥ २१ ॥

अलं तपःशापभयेन राजन्
अहं विमन्युः पितरौ ममान्धौ ।
अस्मिन्नपि प्राणहरापकारे
शापोपसङ्गं न करिष्यत स्ते ॥ २२ ॥

སྲིད་པར་སྡིག་ཆགས་རང་གིས་བྱས་པའི་ལས།
འཁྲུལ་མེད་འབྲས་བུ་ཅན་རྣམས་དུས་སུ་ནི།
བདེ་དང་སྡུག་བསྔལ་ཡོན་དན་རྒྱས་པ་དང་།
སྐྱོན་དང་དམོད་པ་གསོད་པའི་སྐད་དུ་འགྱུར།། 23

གང་ཞིག་ལམ་ནས་དལ་གྱིས་འགྲོ་བ་ལྷུང་ཞིང་ལུས་ནི་རབ་དུ་ཉམས་པ་ཐོབ།
གང་ཞིག་ལམ་བྲལ་གཡང་སར་ཡོངས་སུ་འཁྱམ་ཞིང་རྒྱུག་པ་ཉམས་པ་
མེད་པར་འཇུག།
གང་ཞིག་ལན་གཅིག་མ་ཡིན་མཁས་པ་ཉམས་ཤིང་དཔལ་བསྟེན་ལེ་ལོ་ཅན།
ལས་ཀྱི་རི་མོ་རྩིག་པ་མེད་པར་བདག་ཉིད་ཀུན་གྱིས་བཀོད་དེ་རྣམ་པར་བཀྲ།། 24

བདག་གི་ཆུ་བུམ་ཕྱི་མ་མེད་པ་འདི།
ཕ་མ་སྐྱོམ་པས་གཟིར་ལ་འཚོ་བར་ནི།
གཞུང་བཟང་ལ་བརྟེན་བརྩེ་བས་བརླན་པའི་བློས།
སྐྱུར་བར་སོང་སྡེ་ཁྲིད་ཀྱིས་སྨིན་པར་བྱ།། 25

ཞེས་པ་མགྲིན་པའི་བར་དུ་སྒྲོག་རྒྱུ་ཞིང་།
དབུགས་བརྩེགས་ངལ་བས་སྨྲ་བསྒྲིགས་ཆུང་ཙུར་བརྗོད།
བཞིན་ནི་ཕྱི་རོལ་ཕྱོགས་པའི་མདའ་དག་ལ།
ཐུབ་པ་དེས་ནི་སྐྱིངས་པ་སྟོན་བཞིན་མཛད།། 26

དེ་ནས་ས་དབང་མཆོག་དུ་རབ་གདུང་བས།
ཐུམ་པ་བླངས་ནས་དེ་དག་བསྡི་གནས་ཕྱིན།

सुखाय दुःखाय गुणोदयाय
दोषाय शापाय वधाय काले ।
कर्म्माण्यसम्भ्रान्तफलानि जन्तोः
स्वयं कृतान्येव भवे भवन्ति ॥ २३ ॥

सन्मार्गेण शनैर्व्रजन्निपतितः प्राप्तोऽतिभङ्गं तनोः
यः श्वभ्रेषु परिभ्रमोत्पथगते धावन् विशत्यक्षतः ।
यत् सीदत्यसकृत्प्रयत्नचतुरः श्रीसंश्रय श्वालसः
तद्दैचित्र्य मभित्तिचित्ररचनं सर्व्वात्मनां कर्म्मणाम् ॥ २४ ॥

अपश्चिम स्त्वेष ममाम्बुकुम्भ-
स्तृष्णार्त्तयो र्जीवित मेव पित्रोः ।
सौजन्य मालम्ब्य धिया दयार्द्रं
गत्वा त्वया तूर्णतरं प्रदेयः ॥ २५ ॥

उक्त्वेति कण्ठान्तरवर्त्तिजीवः
श्वासप्रयासस्थगितान्यवर्णः ।
मौनी स चक्रे विनताननस्य
वैलक्ष्यदीक्षामिव शायकस्य ॥ २६ ॥

कुम्भं समादाय ततः क्षितीशः
तदाश्रमं प्राप्य भृशं प्रतप्तः ।

ཀུན་ཏོར་བུ་གཅིག་ལྷན་པ་དེ་དག་མཐོང་།
དེ་དག་གམ་དུ་འགྲོ་བ་ཡོངས་མ་ནུས།། 27

རིང་ནས་རྟོག་སྒྲ་དག་ལ་རྣ་གཏོད་ཅིང་།
མཛའ་བས་རབ་ཏུ་འདོད་ལྡན་བུ་ཞེས་པ།
སྒྲ་བ་དེ་དག་ལ་ནི་ཉེར་བཏུད་དེ།
དམོད་པས་ཉམས་པ་མི་འདོད་རྒྱལ་པོས་སྨྲས།། 28

གླང་ཆེན་སྐྱེས་པའི་ཚུལ་གྱིས་ཨ་སྨྲའི་ཤིང་།
འཛོམས་བཞིན་གང་གིས་གཞོན་ནུ་རབ་བཙོམ་པ།
སྐྱེས་མཆོག་འཁྲི་ཤིང་དག་གི་སྟ་གྲི་རྩུབ།
སྡིག་པའི་སྐལ་ལྡན་བདག་ནི་ཁྱོད་སྨྲས་མིན།། 29

བདག་གི་མདའ་ཡིས་ལུས་བཅོམ་ཁྱོད་ཀྱི་སྨྲས།
དེ་ནི་སྡུག་བསྔལ་གྱུར་ནས་ཆུ་འགྲམ་ཉལ།
སྡིག་པའི་གདུང་བ་ཆེ་ལས་ཚ་གྲང་དང་།
བཅས་པའི་དམོད་དྲག་བདག་གི་སྤྱི་བོར་དོར།། 30

ཉོར་འཛིན་བདག་པོས་དེ་སྐད་བརྗོད་ཙམ་ལ།
རྗེ་རྗེས་བཅོམ་བཞིན་བརྟན་པ་ཉམས་དེ་དག།
ཤིན་ཏུ་བཟོད་དཀའི་མྱུ་ངན་ལ་འཇིགས་བཞིན།
རབ་ཏུ་ཚ་བ་སྨོངས་པའི་ཕྲུག་ནང་ཞུགས།། 31

तावेकपुत्रौ स्थविरौ विलोक्य
तदन्तिकं नैव शशाक गन्तुम् ॥ २७ ॥

पुत्रेति दूरात् पदशब्ददत्त-
कण्ठौ समुत्कण्ठितमानसौ तौ ।
स्नेहाद्रुवाणावुपसृत्य राजा
जगाद शापात् क्षय मोहमानः ॥ २८ ॥

न पापभागी युवयोः सुतोऽहं
सौजन्यवल्लीकठिनः कुठारः ।
मातङ्गहत्त्याभ्रतरुं निपात्य
मत्तेन येनोन्मथितः कुमारः ॥ २९ ॥

मच्छायकस्यूततनुः स शेते
युष्मत्सुतः कच्छगत स्तटान्ते ।
निधीयतां मूर्ध्नि ममोग्रशापः
स शीतलोऽस्मात् पृथुपापतापात् ॥ ३० ॥

इत्युच्यमाने वसुधाधिपेन तौ
वज्राग्निदग्धाविव भग्नधेयौ ।
भीत्येव शोकस्य सुदुःसहस्य
महीयसीं मोहगुहां प्रविष्टौ ॥ ३१ ॥

དེ་ནས་རྒྱལ་པོས་རྩ་གྲང་གཏོར་དེ་དག།
ཛཱི་ཞིག་ལྷུར་སྡེས་འདུ་ཤེས་ཆ་ཤས་ཐོབ།
ས་བདག་ཁྱོད་ཀྱིས་བདག་ཅག་བྲུ་རྡུང་དུ།
ཁྲིད་ཅེས་སྙིང་རྗེ་རབ་སྨྲ་དེ་དག་སྨྲ།། 32

དེ་ནས་དེ་ཡིས་ཆུ་སྐྱུང་ཉེ་བར་ཁྲིད།
གླིང་དང་སྔོན་མི་ཉེ་བར་བྱེད་གྱུར་པ།
ལག་པས་མདའ་བསྣུན་བྲུ་ལ་རེག་བྱས་ནས།
དེ་ཡི་མདའ་ཡིས་ཕྲུག་བཞིན་དེ་དག་འགྲེལ།། 33

བྲ་གཅིག་བླ་མ་དག་ལ་མཉེས་ག་ཤིན་ཡང་།
ཕ་མ་ཀུན་ཡོང་མགོན་མེད་བདང་ནས་ནི།
ཅི་སྐད་གླེ་བུར་མཐོ་རིས་ཁྱོད་འགྲོ་ཞེས།
དེ་དག་གིས་ནི་དེ་ལ་དམ་འཁྲིད་སྨྲས།། 34

བྲ་ཁྱོད་མི་ཡི་སྨིན་སྲིག་ལ་དགའ་ཞིང་།
བླ་མའི་ལྷ་དང་ལྡན་པས་བདག་ཅག་ནི།
ཟློལ་མེད་གསུམ་པའི་མཆོད་པས་མཉེས་བྱས་པའི།
བདེན་པ་དེས་ཁྱོད་ཟུག་རྔུ་མེད་གྱུར་ཅིག།། 35

ཅེས་པ་བླ་མ་དག་གི་སྙིང་སྟོབས་རྫོགས།
སྙིང་རྗེས་གཟིར་བའི་བདེན་ཚིག་བརྗོད་ཅམ་ལ།

सिक्तौ ततः शीतजलेन राज्ञा
तौ लब्धसंज्ञावयवौ कथञ्चित् ।
पुत्रान्तिकं भूप नय त्वमावा
मित्यूचतु स्तौ करुणप्रलापौ ॥ ३२ ॥

नीतौ तत स्तेन सरित्समीप
मद्वीपदीपे व्यसने निमग्नौ ।
हस्तेन संस्पृश्य सुतं शरार्त्तं
तद्बाणविद्धाविव पेततु स्तौ ॥ ३३ ॥

कस्मादकस्माद् गुरुवत्सलोऽपि
वृद्धावनाथौ पितरौ त्व मन्धौ ।
त्यक्त्वा दिवं गच्छसि पुत्रकेति
गाढं परिष्वज्य त मूचतु स्तौ ॥ ३४ ॥

आराधितौ भक्तिसपर्य्ययैव
निर्व्याज मावां गुरुदैवतेन ।
त्वयाग्निहोत्राभिरतेन पुत्र
सत्येन तेनास्तु भवान् विशल्यः ॥ ३५ ॥

इत्युक्तमात्रे करुणार्त्तिसत्य-
सत्त्वोपपन्ने वचने गुरुभ्याम् ।

བརྒྱ་བྱིན་མངོན་ཕྱོགས་བདུད་རྩིས་བྲན་པ་ཡིས།
གཞོན་ནུ་ཟླ་དང་བྲལ་ཞིང་བསོས་པར་བྱས།། 36

བདག་ནི་དེ་ཚེ་དེར་གུས་བརྟུལ་ཞུགས་ཅན།
ཐུབ་པའི་གཞོན་ནུ་སྨོ་བསངས་ཅན་དེར་གྱུར།
ཤཱ་ཀྱའི་རིགས་འཁྲུངས་མཆོད་བྲ་བདག་གིས་ཀྱང་།
འབད་ནས་མཆོད་བྲ་ཕ་མ་དེ་དག་གོ །། 37

དེ་ལྟར་རྣམ་མང་ཆོས་ཀྱི་རྩ་བ་ནི།
བདེ་བར་གཤེགས་ཀྱིས་གསུངས་དགེ་སློང་གིས་ཐོས་ནས།
བླ་མ་བསྟེན་པའི་བརྟུལ་ཞུགས་དང་མཚུངས་པ།
དམ་པའི་སྤྱོད་པ་གཞན་དག་མེད་པར་སེམས།། 38

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སྨོ་བསངས་ཅན་གྱི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་རྩ་གཅིག་པའོ །།

शक्रः समभ्येत्य सुधाप्रसेकै-
रजीवयन्निर्विवरं कुमारम् ॥ ३६ ॥

श्यामाकनामा स मुनेः कुमारः
तदाभवं तद्विनयव्रतोऽहम् ।
तावेव मे शाक्यकुलोद्भवेऽपि
पूज्यस्य पूज्यौ पितरौ प्रयत्नात् ॥ ३७ ॥

इति विविधधर्म्ममूलं
गदितं सुगतेन भिक्षवः श्रुत्वा ।
गुरुसेवाव्रतसदृशं
नान्य ममन्यन्त सद्वृत्तम् ॥ ३८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
श्यामाकावदानमेकाधिकशततमः पल्लवः ॥ ० ॥

ཡལ་འདབ་བརྒྱ་རྩ་གཉིས་པ།

དམན་པའི་སྦྱིན་པས་སྐྱེ་བོ་དམན་པ་རྣམས་ཀྱི་གདུང་བ་སེལ།
ཚུལ་ཁྲིམས་ཀྱིས་ནི་སྐྱེ་བོ་དམ་པའི་ཡིད་དག་ཚིམ་པར་བྱེད།
ཤེས་རབ་སྟོབས་ཀྱིས་ཀྱང་ནི་དབེན་པ་དང་བྲལ་གཏི་མུག་འཇོག།
བརྩོན་འགྲུས་ཀྱིས་ནི་འཇིགས་སུ་རུང་བའི་འཇིགས་པ་ཟློག་པར་བྱེད། 1

ཆོས་ཀྱི་བཀའ་ཡིས་མཚན་ཡོད་ན། དགེ་བ་སེམས་ཅན་ལ་སྟོན་ཅིང་།
རྒྱལ་བ་རྒྱལ་བྱེད་ཚལ་བཞུགས་ལ། དགེ་སློང་རྣམས་ཀྱིས་སྟོན་དྲིས་པ།། 2

བཅོམ་ལྡན་ཁྱོད་ཀྱིས་བརྒྱ་བྱིན་དང་། ས་བདག་གཟུགས་ཅན་སྙིང་པོ་དང་།
དགེ་སློང་ཀུན་ཤེས་ཀཽ་ཎྜི་ནྱ། བདེན་པ་མཐོང་བ་དག་ལ་བཀོད།། 3

དེ་ཡི་ཞར་ལ་ལྷ་རྣམས་ནི། འབུམ་ཕྲག་གཉིས་དང་དེ་བཞིན་དུ།
ཁྲི་ཕྲག་བཞི་ཡིས་བདེན་པ་ནི། མཐོང་བའི་སྣོད་ཉིད་རབ་ཏུ་ཐོབ།། 4

ཀུན་ལ་ཕན་མཛད་ཁྱོད་ཀྱི་འདི། ལྷན་ཅིག་སྐྱེས་པའི་རང་བཞིན་ནམ།
ཡོན་ཏན་བསོད་ནམས་རྗེས་འགྲོ་འམ། སྐྱེ་བར་གོམས་པའི་རབ་དང་ཡིན།། 5

དགེ་སློང་རྣམས་ཀྱིས་འདི་བརྗོད་གསན། བཅོམ་ལྡན་འདས་ཀྱིས་སྨྲར་
གསུངས་པ།
བདག་གི་བློ་གྲོས་གཞན་ཕན་ལ། གོམས་པས་ལྷན་ཅིག་སྐྱེས་པ་ཉིད།། 6

द्व्यधिकशततमः पल्लवः ।

दानेन दीनजनताव्यसनानि हन्ति
शीलेन तोषयति सज्जनमानसानि ।
प्रज्ञाबलेन च हरत्यविवेकमोहम्
वीर्य्येण वारयति भीरुभयानि धीरः ॥ १ ॥

श्रावस्त्यां सत्त्वकुशलं दिशन्तं धर्मशासनैः ।
जिनं जेतवनासीनं पप्रच्छु भिक्षवः पुरा ॥ २ ॥

भगवन् भवता शक्रो बिम्बिसारश्च भूपतिः ।
भिक्षुश्चाज्ञातकौण्डिन्यः प्रापिताः सत्यदर्शनम् ॥ ३ ॥

लक्षद्वयं देवतानां तथायुतचतुष्टयम् ।
तत्प्रसङ्गेन संप्राप्तं सत्यदर्शनपात्रताम् ॥ ४ ॥

स्वभावः सहजो वायं गुणः पुण्यान्वयोऽपि वा ।
जन्माभ्यस्तप्रसादो वा तव विश्वोपकारिणः ॥ ५ ॥

इत्युक्तं भिक्षुभिः श्रुत्वा भगवान् प्रत्यभाषत ।
सहजैव ममाभ्यासात् परोपकृतये मतिः ॥ ६ ॥

སྐྱེ་བ་འདིར་བདག་སེམས་ཅན་ལ། ཕན་པར་དགའ་བ་ཅི་ཞིག་མཚར།
དྲག་ཏུ་གོམས་པས་སེང་གེ་དང་། གླང་སོགས་སྐྱེ་བ་འདི་ལ་གྱུར། 7

སྔོན་ཚེ་དེད་དཔོན་ལྷ་ཕྱུགས་པ། དྲག་པོར་འཕྲངས་པའི་དུད་མེད་དང་།
དོན་མཐུན་འབུམ་ཕྲག་གཉིས་རྫས་འཕྲང་། ཆུ་གཏེར་དག་གི་ངོགས་སུ་ཕྱིན། 8

དེ་དུས་དུས་ནི་གཞན་པ་བཞིན། འགྲོ་བ་ཟླ་བ་ལ་ཆགས་པ།
འཇིགས་རུང་ལུས་རྒྱས་སྦྲུལ་ཆེན་ནི། ཕམ་པ་ཞེས་པ་བྱུང་བར་གྱུར། 9

སྐྱེ་བོ་ཀུན་གྱི་ཉོན་མོངས་ཀྱི། སྨག་པ་བཞིན་དུ་བཟོད་དཀའ་དེ།
མཐོང་ནས་བརྟན་པ་རྣམ་པར་ཉམས། དེ་དག་དཀྲུགས་པ་བཞིན་དུ་གྱུར། 10

གདེངས་ཅན་དེ་ཡི་ལུས་ཀྱིས་ནི། ལམ་དག་ཀུན་ནས་བསྐོར་བའི་ཚེ།
བསམ་བྲལ་དུས་ཀྱི་ཁ་སྐོར་གནས། དེ་དག་རྣམས་ཀྱི་ཆེ་ངེ་བདོན། 11

མ་ལུས་ལྷ་རྣམས་བསྟོད་པ་ཡིས། སྐྱབས་པའི་སྒྲ་ལྡན་དེ་དག་གིས།
ཆེ་ངེ་ཕྱོགས་ཀུན་ཁྱབ་བྱེད་པ། སྙིང་རྗེའི་སྒྲ་ནི་རྒྱས་པར་གྱུར། 12

དེ་ནས་སེང་གེ་རི་ཕུག་གནས། གྲགས་པའི་རལ་ཅན་ཞེས་པ་དང་།
དེ་ཡི་གྲོགས་པོ་གླང་པོ་ཆེ། མན་དྷ་ར་ཡིས་སྒྲ་དེ་ཐོས། 13

རྒྱུད་པ་སྐྱོབ་པ་ལ་ཆས་ཤིང་། ཡིད་ནི་སྙིང་རྗེས་དྲངས་གྱུར་པ།
དོན་མཐུན་སྐྱོབ་ལ་གུས་བྱས་པའི། བརྟན་པ་དེ་དག་འོངས་པར་གྱུར། 14

अस्मिन् जन्मनि किं चित्रं मम सत्त्वहिते रतिः ।
अप्यभूत् सतताभ्यासात् सिंहहस्त्यादिजन्मसु ॥ ७ ॥

दाक्षिणात्याः पुरा सार्थवाहा गाढाग्रहाः त्रयः ।
जग्मु र्जलनिधे स्तीरं सार्द्धलक्षद्वयानुगाः ॥ ८ ॥

तस्मिन् काले जगद्ग्रासव्यग्रः काल इवापरः ।
अभूदजगरो घोरः कङ्काख्यः स्फारविग्रहः ॥ ९ ॥

ते तं सर्व्वजनायासं संत्रासमिव दुःसहम् ।
विनष्टधैर्य्या दृष्ट्वैव बभूवु र्घट्टिता इव ॥ १० ॥

भोगेन भोगिनानेन समन्तादेष्टिते पथि ।
निश्चेष्टाः कालवक्त्राग्रवर्त्तिन स्ते प्रचुक्रुशुः ॥ ११ ॥

तेषा मशेषचित्दशस्तवैः शरणराविणाम् ।
आक्रन्दः सर्व्वदिग्व्यापी प्रोद्ययौ करुणस्वनः ॥ १२ ॥

यशःकेशरसंज्ञोऽथ सिंहः शैलगुहाशयः ।
तं शब्दं मन्दरः श्रुत्वा तद्वयस्यश्च कुञ्जरः ॥ १३ ॥

आपन्नत्राणसन्नद्धौ करुणाकृष्टमानसौ ।
धीरावाजग्मतुः सार्थसंरक्षणकृतक्षणौ ॥ १४ ॥

དེ་ནས་གླང་ཆེན་རི་བོ་ཡི། ལུས་ཅན་དག་ལ་སེང་གེ་ཞོན།
ཤུགས་ཀྱིས་བསྣུར་ནས་སྤྲུལ་ཆེན་ནི། སྲོག་དང་བྲལ་བ་དག་ཏུ་བྱས། ། 15

དེ་ཡི་སྲོག་ནི་འགྲོ་དུས་སུ། དབུགས་ཀྱི་རླུང་ནི་སྲེག་བྱེད་དག།
རབ་ཏུ་འབར་བས་སེང་གེ་དང་། གླང་པོ་དག་ནི་ཐལ་བར་བྱས། ། 16

དེ་ནས་དེད་དཔོན་དེ་རྣམས་ཀྱིས། དེ་དག་ལུས་ལ་མཆོད་པའི་སླད།
མཆོད་རྟེན་བྱས་ནས་དེ་དག་གིས། གྲགས་པ་དང་འགྲོགས་ཕྱོགས་སུ་སོང་། ། 17

ང་ཉིད་དེ་ཚེ་དོན་མཐུན་ལ། སྲོག་སྟེར་སེང་གེ་དག་ཏུ་གྱུར།
ལྷས་བྱིན་དག་ནི་སྤྲུལ་ཆེན་ཏེ། ཤཱ་རིའི་བུ་ནི་གླང་པོ་ཆེ། ། 18

སྙིང་སྟོབས་ཟླ་བ་དེ་ཡི་སྤྱོད་པ་ལེགས་བྱས་རབ་ཏུ་གསལ།
ཀུན་ལ་ཕན་པར་བྱེད་མཁས་གྲགས་ཞིང་ཆེན་པོ་དག་ཏུ་འོས།
རྒྱལ་བས་གསུངས་པ་དེ་དག་ཐོས་ནས་དགའ་བ་ཐོབ་གྱུར་པའི།
དགེ་སློང་དེ་དག་རྣམས་ཀྱིས་ཚིག་གིས་སོ་སོར་རབ་ཏུ་བསྔགས། ། 19

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་པའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་སེང་གེའི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་བརྒྱ་རྩ་གཉིས་པའོ།

ततः सिंहः समारुह्य गजेन्द्रं गिरिविग्रहम् ।
वेगान्निपत्याजगरं चकार गतजीवितम् ॥ १५ ॥

प्राणप्रवाससमये तस्य निश्वासमारुतः ।
चकार दहनोद्गारौ भस्मसात् सिंहकुञ्जरौ ॥ १६ ॥

तयोः शरीरपूजायै ततस्ते सार्थनायकाः ।
स्तूपं विधाय प्रययु र्दिश स्तद्यशसा सह ॥ १७ ॥

अहमेव तदा सिंहः सार्थत्राणप्रदोऽभवम् ।
महाहि र्देवदत्तोऽसौ शारिपुत्रश्च कुञ्जरः ॥ १८ ॥

तत्तस्य सत्त्वशशिनः सुकृतप्रकाशम्
विश्वोपकारचतुरं चरितं महार्हम् ।
श्रुत्वा जिनेन कथितं प्रथमं सहर्षा-
स्ते भिक्षवः प्रतिपदं प्रशशंसुरेव ॥ १९ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
सिंहावदानं द्व्यधिकशततमः पल्लवः ॥ ० ॥

ཡལ་འདབ་བརྒྱ་རྩ་གསུམ་པ།

རྡོ་ཞལ་རབ་གསལ་གོས་མཆོག་ཅོད་པན་དང་།
གདུགས་དང་རྔ་ཡབ་དཀར་པོས་འཛུམ་པའི་དཔལ།
མཆོག་གི་ལོངས་སྤྱོད་སྐལ་བཟང་དགའ་སྟོན་གྱིས།
བདག་ཉིད་ཆེན་པོ་འི་ལེགས་བྱས་གསལ་བར་བྱེད།།

ཆོས་ཀྱི་འཁོར་པ་རབ་རྒྱས་པའི། མཐུ་ནི་རྒྱས་པ་མཐོང་བ་ལས།
ཡ་མཚན་དགེ་སློང་ཚོགས་ལ་ནི། བཅོམ་ལྡན་འདས་ཀྱིས་སྟོན་གསུངས་པ།། 2

སྐྱེ་བ་གཞན་ལ་ཟླ་མེད་ཀྱི། ཡི་ཤེས་གཟི་བྱིན་མ་ཐོབ་ཀྱང་།
བདག་ལ་ངོ་མཚར་བཅས་པའི་དཔལ། ལེགས་བྱས་གསལ་བར་བྱེད་པ་བྱུང་།། 3

བྱང་གི་ཕྱོགས་ཀྱི་གྲོང་ཁྱེར་དག། རྡོ་རྗེ་ཅན་ཞེས་བྱ་བར་ནི།
རྒྱལ་པོ་ཕྱུག་ན་རྡོ་རྗེ་བཞིན། རྡོ་རྗེ་གསུམ་པོ་ཞེས་པར་བྱུང་།། 4

གྲོང་ཁྱེར་གང་གཱའི་བདག་པོ་ནི། ས་བདག་ལྷུན་པོ་བདུལ་ནས་དེའི།
བུ་མོ་སྣར་མ་ཞེས་བྱ་བ། རིས་ཐོབ་བདུད་རྩིའི་ཟེར་གྱིས་བཞིན།། 5

དེ་ཡིས་དེ་ལ་བུ་དག་ནི། ཉི་མའི་འོད་དང་མཚུངས་པ་བསྐྱེད།
གང་ལ་ནོར་བུའི་གདུགས་དག་ནི། བཀྲ་བ་ལྷན་ཅིག་སྐྱེས་པས་མཛེས།། 6

त्र्यधिकशततमः पल्लवः ।

तारहारवरवस्त्रशेखर-
च्छत्रचामरसितस्मिताः श्रियः ।
दिव्यभोगसुभगाः सुखोत्सवैः
सूचयन्ति सुकृतं महात्मनाम् ॥ १ ॥

प्रवृद्धधर्म्मविभवप्रभावोद्भवदर्शनात् ।
विस्मितं भिक्षुसङ्घातं बभाषे भगवान् पुरा ॥ २ ॥

अप्राप्तानुत्तरज्ञानमहसोऽप्यन्यजन्मनि ।
बभूवु र्मम साश्चर्य्याः सुकृतव्यञ्जकाः श्रियः ॥ ३ ॥

वज्रवत्यभिधानायां नगर्य्या मुत्तरापथे ।
वज्रचण्डाभिधो राजा वज्रपाणि रिवाभवत् ॥ ४ ॥

गङ्गाधिपत्ये नगरे मेरुं जित्वा महीपतिम् ।
तत्सुतां रोहिणीं नाम स सुधांशुरिवाप्तवान् ॥ ५ ॥

तस्या मजीजनत् पुत्रं स मित्रसदृशप्रभम् ।
चित्रं यस्य मणिच्छत्रं सहजातं व्यराजत ॥ ६ ॥

དེ་ཡི་བསོད་ནམས་མཐུ་ཡི་ནི། །རྟག་ཏུ་བསམས་པས་ཉེར་གནས་པ།
ལྷ་ཡི་རྒྱན་དང་ལོངས་སྤྱོད་དག །གྲོང་ཁྱེར་པ་ཡིས་ཉམས་མྱོང་གྱུར།། 7

ལོངས་སྤྱོད་དགའ་བའི་གོང་བུ་དེས། །གང་ཕྱིར་གྲོང་ཁྱེར་ཡོངས་བདུང་བ།
དེ་ཕྱིར་ས་བདག་སྲས་དེ་ནི། །དགའ་བའི་གོང་བུ་ཞེས་པར་གྱུར།། 8

ཕ་ཡི་མཇུག་ཏུ་རྒྱལ་སྲིད་ཐོབ། །གྲགས་པ་རྒྱས་དེས་ཕྱོགས་རྣམས་སུ།
འབྱུང་པོ་ཀུན་ལ་རང་འདོད་ཀྱི། །ལོངས་སྤྱོད་ཕུན་སུམ་ཚོགས་པ་བསྟན།། 9

བློན་པོ་བློ་ངན་བློ་ངན་ཞེས། །བུ་བ་དེ་ལ་ཆགས་བྲལ་གྱུར།
ཡོན་དན་ཅན་ལ་སྣང་བ་ནི། །བདག་ཉིད་ངན་པའི་རང་བཞིན་ཡིན།། 10

དེ་ཡི་མ་མེས་ས་བདག་ནི། །ལྷུན་པོའི་སྤྲིང་ཡིག་རྣམས་ཀྱིས་དེས།
སྔོན་གྱི་གནོད་པ་དྲན་པ་ཡིས། །གཡུལ་ལ་མངོན་པར་ཕྱོགས་པར་བྱས།། 11

ཁྲོ་བ་མཆོག་ཏུ་རབ་འབར་བ། །འཕྲལ་ལ་རྒྱས་ཤིང་གསོད་བརྩོན་དེས།
སྟོབས་རབ་རྒྱས་པས་པོ་ཉ་སྤྲིངས། །བུ་མོའི་བུ་ལ་རབ་བསྟན་པ།། 12

བུ་མོའི་བུ་ཁྲིད་དགྲ་ཡི་བུ། །བདག་ཉིད་ངན་པ་ཁྲིད་ཀྱི་ཕས།
དཀྱིལ་འཁོར་ཉམས་པ་ཁྲིད་བྱས་ནས། །གྲགས་པ་བཞིན་དུ་བུ་མོ་བྲིགས།། 13

མ་ཉམས་ས་འདི་རང་འདོད་ཀྱིས། །སྐྱུ་ལ་ཅིག་གལ་དེ་མ་ཡིན་ན།
རང་ཉིད་འོངས་ཁྲིད་མཐའ་འཁོབ་དུ། །སྐྱབས་པའི་མགྲོན་དུ་བདག་གིས་བྱ།། 14

तस्य पुण्यप्रभावेण सङ्कल्पोपनतः सदा ।
दिव्याभरणवस्त्रान्नभोगोऽभूत् पुरवासिनाम् ॥ ७ ॥

भोगपिण्डैः प्रियै स्तेन यस्मात् सम्पूरितं पुरम् ।
स तस्मात् प्रियपिण्डाख्यः क्ष्मापते रभवत् सुतः ॥ ८ ॥

पितुरन्ते समं प्राप्तराज्यः प्राज्ययशा दिशाम् ।
दिदेश सर्व्वभूतानां स्वच्छन्दां भोगसम्पदम् ॥ ९ ॥

दुर्म्मति दुर्मति र्नाम मन्त्री तस्य विरक्तताम् ।
प्रययौ गुणविद्वेषः स्वभावो हि दुरात्मनाम् ॥ १० ॥

मेरुं मातामहं तस्य गूढ़लेखैः स भूपतिम् ।
पूर्व्वापकारस्मृत्येव चकार समरोन्मुखम् ॥ ११ ॥

स दूतैः सहसोद्भूतमन्युः प्रज्वलितः परम् ।
सन्दिदेश बलोत्सेकात् दौहित्रनिधनोद्यतः ॥ १२ ॥

दौहित्रः शत्रुपुत्र स्त्वं त्वत्पित्रा मदनात्मना ।
मण्डलं खण्डतां नीत्वा हृता कीर्त्तिरिवात्मजा ॥ १३ ॥

आच्छिन्ना मुर्व्वरी मेतां प्रयच्छस्वेच्छया न चेत् ।
स्वयमेत्य करोमि त्वां प्रत्यस्तशरणातिथिम् ॥ १४ ॥

མ་མེས་ཀྱིས་ནི་རབ་བསྟན་པ། དེ་དག་ཐོས་ནས་ས་ཡི་བདག།
སྐྱེས་པོ་རླག་ལ་སྙིང་རྗེ་བས། དེ་ལ་དང་བར་བྱེད་ལ་སོང་།། 15

དམག་དཔུང་རིང་ཞིང་གཡུལ་གྱི་ནི། ཟླུམས་ལ་ཆས་དེས་བྱུ་དག་གིས།
གང་གཱའི་འགྲམ་ན་གནས་པ་ཡི། མ་མེས་གྲོང་ཁྱེར་དག་ཏུ་ཕྱིན།། 16

སྔོན་པོ་གཡོག་སྡེ་དང་བཅས་པ། དེ་ཡི་ཀུན་རྟོག་རྩེ་དགའ་ཡིས།
ལྷ་ཡི་ཟམ་ནི་རབ་འཁྲུངས་པ། ས་བདག་ལྷུན་པོས་མཐོང་གྱུར་ནས།། 17

འདི་ནི་ལྷ་ཞེས་ངེས་བྱས་ཏེ། རང་ཉིད་དེ་ཡིས་བྲུང་སོང་ནས།
མཆི་མ་ཟག་ཅིང་མགྲིན་པར་བཟུང་། རིན་ཆེན་ཀུན་གྱིས་རབ་ཏུ་མཆོད།། 18

དེ་ཡི་གུས་པས་མཆོད་པ་དེས། རང་གི་གྲོང་ཁྱེར་ཕྱིན་ནས་ནི།
འཛམ་གླིང་སྐྱེ་བོ་ལྷ་ཡི་ནི། ལོངས་སྤྱོད་རབ་རྒྱས་ལྷག་པར་བསྒྲུབས།། 19

དེ་སྤྱོད་ཕུན་ཚོགས་ལ་མཚོན་ཏེ། དགེ་སློང་གིས་དྲིས་རྒྱལ་བ་ནི།
ཀུན་མཁྱེན་གྱིས་ཀྱང་དེ་དག་ལ། དེ་ཡི་ཕུན་ཚོགས་རྒྱུ་མཚན་གསུངས།། 20

བཱ་རཱ་ཎ་སིར་སྐྱེ་གཞན་དེ། བྲམ་ཟེ་རྩ་བ་ཅན་ཞེས་གྱུར།
དེ་ཡི་ནད་ཀྱིས་གཟིར་བ་ཡིས། རང་སངས་རྒྱས་ལ་སྨན་དག་ནི།། 21

བསོས་པའི་མཚམས་ལ་ཕུག་པར་བྱས། གདུང་བ་གང་ལ་གདུགས་ཀྱང་བཟུང་།
བསོད་ནམས་དེས་རྒྱལ་གདུགས་ཅན་དེ། ལྷ་ཡི་ལོངས་སྤྱོད་སྤྱོད་དུ་གྱུར།། 22

मातामहेन सन्दिष्ट मेतदाकर्ण्य भूपतिः ।
जनसङ्क्षयकारण्यात् तं प्रसादयितुं ययौ ॥ १५ ॥

सन्धिविग्रहसन्नद्धः स नौभि र्दूरसैनिकः ।
मातामहपुरं प्राप गङ्गापुलिनसंश्रयम् ॥ १६ ॥

सामात्यभृत्यवर्गस्य तस्य सङ्कल्पलीलया ।
उद्भूतं दिव्य माहारं दृष्ट्वा मेने महीपतिः ॥ १७ ॥

देवोऽय मिति तं मत्वा स्वयं गत्वा तदन्तिकम् ।
कण्ठग्रहोच्छलद्बाष्पः सर्व्वैरत्नै रपूजयत् ॥ १८ ॥

प्रणयान्मानित स्तेन स गत्वा नगरीं निजाम् ।
दिव्यभोगोद्भवोदग्रं जम्बुद्वीपजनं व्यधात् ॥ १९ ॥

तच्चरितं जिनः पृष्टो भिक्षुभिः सम्पदं प्रति ।
सर्व्वज्ञोऽप्यवदत्तेषु तस्य सम्पत्तिकारणम् ॥ २० ॥

वाराणस्यां स विप्रोऽभून्मूलिकाख्यो ऽन्यजन्मनि ।
तेन प्रत्येकबुद्धस्य रोगम्लानस्य भेषजम् ॥ २१ ॥

स्वास्थ्यावधि कृतं चित्रच्छत्रञ्च धृत मातपे ।
तत्पुण्याच्छत्रवान् राजा सोऽभूद्दिव्योपभोगभाक् ॥ २२ ॥

ང་ནི་དགའ་བའི་གོང་བུ་དེ། གློ་ངན་དེ་ཡང་ལྷས་བྱིན་ནོ
ཞེས་པ་བཅོམ་ལྡན་གྱི་གསུངས་པ། ཐོས་ནས་དགེ་སློང་ཡ་མཚན་གྱུར།། 23

ཀྱེམ་གང་ཞིག་ཡོན་དན་འཛིན་དང་འགྱུར་བའི་མཐུ་དང་ནི།
ལྷ་ཡི་ཉེ་བར་ལོངས་སྤྱོད་སྐལ་བཟང་སྲིད་པའི་བདག་པོ་དང་།
ཡིད་དུ་གནས་ཤིང་སྡུག་པར་གྱུར་པའི་གཉུང་པར་ལྷུང་བ་དག།
སྐྱེབ་ཅིང་ལོངས་སུ་འདོན་པ་དེ་དག་བསོད་ནམས་རྣམ་འཕྲུལ་ཡིན།། 24

ཞེས་པ་དགེ་བའི་དབང་པོ་འི་བྲིས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་དགའ་བའི་གོང་བུའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་རྩ་གསུམ་པའོ །།

प्रियपिण्डोऽहमेवासौ देवदत्तश्च दुर्मतिः ।
श्रुत्वेत्युक्तं भगवता भिक्षवो विस्मयं ययुः ॥ २३ ॥

यद्विस्मयावहमहो विभवप्रभाव-
दिव्योपभोगसुभगं भुवनाधिपत्यम् ।
दीर्घामयाश्रयघनव्यसनावसन्न-
संवाहनोद्भवपुण्यविजृम्भितं तत् ॥ २४ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
प्रियपिण्डावदानं अधिकशततमः पल्लवः ॥ ० ॥

ཡལ་འདབ་བརྒྱ་རྩ་བཞི་པ།

ལེགས་པའི་ལམ་ལ་ཡིད་ལ་རེ་བ་རབ་རྒྱས་གྲུབ་གྱུར་ཅིག།
དམ་པའི་ལེགས་བྲིས་དྲི་མེད་འཛུག་ངོགས་གཙང་མ་བསྒྲུགས་པར་འོས།
འཛིགས་རུང་འཁོར་བའི་ཆུ་སྲིན་འབྱུང་གནས་དག་གི་ཟམ་སྟེགས་གྱུར།
དམ་པའི་གྲོགས་ཉིད་དགེ་བ་སྐྱོ་བའི་རང་བཞིན་པ་ཞ་ཡིན།། 1

མཉན་དུ་ཡོད་པ་དག་དུ་སྦྱོར། ཁྱིམ་བདག་པ་དྨ་ཞེས་པའི་བུ།
ངང་པ་ཞེས་བྱ་བཅོམ་ལྡན་གྱིས། འབད་པས་དགྲ་བཅོམ་གནས་ལ་ནི།། 2

རབ་དང་དྲི་མེད་སྙིང་རྗེ་ཡི། གཟིགས་པ་བདུད་རྩིས་བཟུང་མཐོང་ནས།
རྗེས་འཛིན་བརྩོན་པས་བྲེལ་འདི་ལ། དགེ་སློང་རྣམས་ཀྱིས་རབ་གཏོལ་བ།། 3

བཅོམ་ལྡན་རིགས་ཀྱི་བུ་འདི་ནི། ཕག་ཆགས་ལྷག་མ་དག་གིས་ཡུལ།
དྲན་པ་མ་ཞི་རབ་བྱུང་ཡང་། ཁྱིམ་ལ་མངོན་པ་ཕྱོགས་པར་འགྱུར།། 4

དེ་ནི་རབ་འབད་བཅོམ་ལྡན་གྱིས། འདུལ་བ་དག་ལ་རྣམ་པར་སྦྱར།
ཀྱི་མ་རྗེས་བཟུང་ཆེན་པོ་ཡིས། ཀུན་སྨོངས་དག་དང་བྲལ་བར་མཛད།། 5

དེ་སྐད་དགེ་སློང་ཡ་མཚན་ཞིང་། དགའ་བའི་བདུད་རྩིས་བྲན་པས་ཞུས།
གུས་ལ་མཉེས་གཞིན་བཅོམ་ལྡན་འདས། ཐམས་ཅད་མཁྱེན་པས་དེར་
གསུངས་པ།། 6

चतुरधिकशततमः पल्लवः ।

सन्मार्गसंभृतमनोरथसिद्धिरूढः
श्लाघ्यः सतां सुकृतनिर्मलतीर्थपूतः ।
संसारघोरमकराकरसेतुभूतः
सत्सङ्ग एव शुभसर्गनिसर्गहेतुः ॥ १ ॥

श्रावस्त्यां कमलाख्यस्य पुत्रं गृहपतेः पुरा ।
हंसाभिधं भगवता यत्नेनार्हत्पदे धृतम् ॥ २ ॥

दृष्ट्वा प्रमादविशदैः करुणालोकनामृतैः ।
अनुग्रहाग्रहव्यग्रं तमभाषन्त भिक्षवः ॥ ३ ॥

भगवन् कुलपुत्रोऽयं प्रव्रज्यापि गृहोन्मुखः ।
बभूव वासनाशेषदशान्तविषयस्मृतिः ॥ ४ ॥

स प्रयत्नेन भवता विनयं विनियोजितः ।
अहो महानुग्रहेण संमोहरहितः कृतः ॥ ५ ॥

उक्ते हर्षामृतासिक्तैर्विस्मितैरिति भिक्षुभिः ।
तानभाषत सर्वज्ञो भगवान् भक्तवत्सलः ॥ ६ ॥

སྨོན་ཡང་བདག་གིས་དགེ་བ་ལ། འདི་ནི་འབད་ནས་རྣམ་པར་བཀོད།
སྨོན་འདི་དཀའ་ཐུབ་ནགས་སུ་ནི། ཐུབ་པ་བརྟུལ་ཞུགས་བཟང་ཞེས་གྱུར།། 7

དེ་དུས་དེ་ཡི་གནས་སུ་བདག། རི་བོང་གསལ་བར་སྨྲ་བྱེད་པ།
དེ་ཡི་གདམ་ལ་ཡིད་གཙུགས་སྐྱེས། མཛའ་བ་དང་ལྡན་རྟག་གནས་གྱུར།། 8

དེ་ནས་ཆར་མེད་ཀྱིས་བཙོས་སྡེ། རྩ་བ་འབྲས་བུ་ཆུ་བསྐམས་ཚེ།
ནགས་སུ་ཡིད་བྱུང་ཐུབ་པ་དེ། གྲོང་མཐར་འགྲོ་བར་འདོད་པར་གྱུར།། 9

བདག་གིས་གུས་པས་དེ་ལ་སྨྲས། དམ་པ་ཁྱོད་ནི་རྣམ་པར་མཁས།
དཀའ་ཐུབ་ནོར་ཅན་དཀའ་ཐུབ་ཀྱི། ནགས་ནི་ཡོངས་བཏང་ཅི་ལྟར་རིགས།། 10

རྣམ་མང་བྲལ་བའི་མྱ་ངན་དུ། བྱིང་བའི་སྐྱེ་བོས་གང་བའི་ཁྱིམ།
སྨོངས་པའི་གདོན་གྱི་ཉོན་མོངས་ཀྱིས། བརྫུང་བར་གྱུར་པ་གྲོང་གི་ས།། 11

བུད་མེད་ལྷུགས་སྒྲོག་སྨུ་ཅོར་བཟློད་དཀའ་བྲུ་ཡི་ཞགས་པ་དང་།
གཡོག་འཁོར་གྱིས་དཀྲིགས་བརྟན་པའི་གཉེན་གྱི་དྲ་བ་དང་།
མི་བསྲུན་ཚོགས་པའི་ནད་དང་གློ་ངན་གྱིས་བཅིངས་སྨུན་ཆེན་ཅན།
བདང་བའི་ཁྱིམ་ལ་གློ་ལྡན་སུ་ཞིག་སྐྱར་ཡང་རེག་པར་བྱེད།། 12

སྣ་ཚོགས་འབྲལ་བའི་མྱ་ངན་སྡུག་བོས་ཡང་ཡང་སྨོངས་པ་སྐྱེད་པར་བྱེད།
ནོར་ནི་ལན་ཚྭ་རི་ཟས་རྣམས་ཀ་གིས་ཕྱིད་པ་མཆོག་ཏུ་ཡོངས་སུ་སྤྲེལ།

पूर्व्वमप्येष कुशलं मया यत्नान्निषेवितः ।
तपोवने मुनि रसौ सुव्रताख्यः पुराभवत् ॥ ७ ॥

तस्मिन् काले स्फुटालापः शशकोऽहं तदाश्रमे ।
तत्कथाजातविस्रम्भः प्रीतिमानवसं सदा ॥ ८ ॥

अथानावृष्टिहते काले शुष्कमूलफलोदके ।
सोऽभून्मु निर्व्वनोद्वेगाद् ग्रामान्तगमनोन्मुखः ॥ ९ ॥

स मया प्रणयेनोक्तः साधो तव विपश्चितः ।
तपोवनपरित्यागः कथं युक्त स्तपोधन ॥ १० ॥

वियोगविविधोद्वेगनिमग्नजनसङ्कुलाः ।
गृहमोहग्रहायासग्रहा ग्रामभूमयः ॥ ११ ॥

स्त्रीशृङ्खलामुखर-दुःसहपुत्रपाश-
भृत्याकुला निविड़बान्धवबन्धजालम् ।
त्यक्तं पुनः स्पृशति कः खलसङ्गघोरम्
धीमान् गृहं कुमतिवन्धमहान्धकारम् ॥ १२ ॥

विदधति मुहु र्मोहं नानावियोगघनाः शुचो
द्रविणलवणाहारै स्तृष्णा परं परिवर्द्धते ।

མི་བཟད་ཡུལ་ལ་ཆགས་པ་གོམས་པས་སེམས་ནི་བླུན་པར་བྱས་གྱུར་པ།
ཉོན་མོངས་ཞིང་གི་ཁྱིམ་ན་གནས་པ་རྣམས་ཀྱིས་དགེ་བ་ཟད་པར་འགྱུར།། 13

སྐྱེ་བོ་མེད་པའི་ནགས་སུ་ཞི་བའི་ཁྱད་པར་དག་གིས་ཆོས་པ་རྣམས།
ཡུལ་གྱི་ལོངས་སྤྱོད་ལ་ཆགས་ཆང་གིས་བློ་གྲོས་མྱོས་ཤིང་གཡོ་མི་འགྱུར།
མཛའ་བོ་དང་བྲལ་དུ་བ་རྒྱས་པས་མིག་ནི་མཆི་མས་འཁྲུགས་མི་འགྱུར།
གཟིར་དང་འཐབ་མོ་ཁྲོ་དང་གྲུང་བའི་ཚོགས་རྣམས་དག་གིས་སྨིག་མི་འགྱུར།། 14

ནགས་ལས་ཡིད་འབྱུང་གྲོང་ལ་ཆགས། གྲོང་ལས་ཡིད་འབྱུང་ནགས་ཚལ་དྲན།
སྐྱེས་བུ་རྣམས་ནི་རབ་ཞི་ལས། ཕྱིར་ཕྱོགས་ཞར་ལ་འབྱུང་བ་ཡིན།། 15

གྲོང་གི་དུལ་བའི་གཡོན་ལ་ཁྱོད། དུས་མིན་བློ་གྲོས་ཡོངས་ས་བྱེད།
གྲོང་དག་འགྲོགས་པས་ཡུལ་ལ་ནི། ཆགས་རྣམས་ཐོག་མ་ཉིད་དུ་འཆིང་།། 16

དུས་ཀྱི་འདི་ཉིད་དུ་ནི་ཁྱོད། འབྲས་བུ་ཐོབ་པ་འབྱུང་བ་འགྱུར།
བདག་གི་ཤ་ནི་དག་པ་ཡིས། ད་ནི་སྲོག་གི་ལྷུངས་དག་མཛོད།། 17

ཅེས་པ་བརྗོད་ནས་བདག་གི་ནི། ཉེ་བའི་མེ་ལ་རང་ཉིད་མཆོངས།
དེས་ཀྱང་མྱུར་དུ་རབ་བླངས་ནས། ཡོངས་སུ་འཁྱུད་དེ་བདག་ལ་སྨྲས།། 18

གཟུ་ལུམས་དྲག་པོའི་འགལ་བ་འདི། ཁྱོད་ནི་ཅི་ཡི་སླད་དུ་བྱེད།
ནགས་འདི་ལས་ནི་བདག་མི་འགྲོ། ཁྱོད་མཚུངས་མཛའ་བོ་ག་ལས་རྙེད།། 19

विषमविषयस्नेहाभ्यासैर्जडीकृतचेतसां
व्रजति कुशलं क्लेशक्षीणे क्षये वसतां क्षयम् ॥ १३ ॥

न धीर्मदविघूर्णिता विषयभोगरागासवैः
न बाष्पकलिला दृशः प्रियवियोगधूमोद्गमैः ।
न दाहनिवहव्यथाः कलहकोपतापोद्भवैः
भवन्ति विजने वने शमविशेषसन्तोषिणाम् ॥ १४ ॥

ग्रामस्पृहा वनोद्वेगाद् ग्रामोद्वेगाद्वनस्मृतिः ।
पुंसां प्रशमवैमुख्यात् प्रसङ्गेनैव जायते ॥ १५ ॥

ग्रामे नियमवामे त्वं मा कामेन मतिं कृथाः ।
प्रागेव विषयस्निग्धान् बध्नाति ग्रामसङ्गतिः ॥ १६ ॥

इहैव तव कालेन फललाभो भविष्यति ।
शुद्धैः सम्प्रति मन्मांसैः क्रियतां प्राणधारणम् ॥ १७ ॥

इत्युक्त्वा हंस मासन्ने वह्नौ निपतितः स्वयम् ।
स च तूर्णं समुत्क्षिप्य परिष्वज्य जगाद माम् ॥ १८ ॥

किमेतत् साहसं तीव्रं विरुद्धं भवता कृतम् ।
न गच्छामि वनादस्मात् त्वत्प्रीति लभ्यते कुतः ॥ १९ ॥

དེ་ཡི་གསུས་པས་དེ་བརྗོད་ཅིང་། བདག་གིས་མཁའ་ལ་བལྟས་པའི་ཚེ།
འཕྲུལ་ལ་ཆར་ནི་རབ་བབས་པ། གང་གི་ས་གཞི་འབྲས་བཅས་གྱུར།། 20

དེ་ནས་གསུས་བཅས་ཐུབ་པ་དེས། མངོན་པར་ཤེས་པ་ལྔ་ཐོབ་ནས།
བདག་ལ་སྨྲས་པ་དགག་པ་ཡི། སྙིང་སྟོབས་འདི་ཡིས་ཁྱོད་ཅི་བཞེད།། 21

ཅེས་པ་དེ་ཡིས་གསུས་པས་དྲིས། དེ་ནས་བདག་གིས་དེ་ལ་སྨྲས།
བདག་ནི་སྤྱོད་པ་འདི་དག་གིས། ཡང་དག་རྫོགས་པའི་བྱང་ཆུབ་འདོད།། 22

སྐྱེ་བ་གཞན་ལ་འགྲོ་བ་རྣམས། བསྒྲལ་སླད་རྒྱལ་བར་བདག་གྱུར་ཅིག།
ཅེས་བརྗོད་དེ་ཡིས་བདག་ལ་སྨྲས། ཁྱོད་ནི་ང་བཞིན་གཤེགས་པར་འགྱུར།། 23

གང་ཚེ་ཡང་དག་རྫོགས་སངས་རྒྱས། ཐམས་ཅད་མཁྱེན་པར་ཁྱོད་གྱུར་པ།
དེ་ཚེ་བདག་གི་ལུས་གཞན་ནི། ཁྱོད་ཀྱི་རྗེས་སུ་གཟུང་བར་བྱ།། 24

དམ་པ་དེ་ཡི་ཚིག་འདི་ནི། མཛའ་བས་བདག་གིས་ཁ་ཡིས་བླངས།
རི་བོང་དེ་ང་སྐྱེ་བ་འདིར། སངས་རྒྱས་ཉིད་ནི་ཡང་དག་ཐོབ།། 25

ཁྲིམས་བདག་བྲུ་ནི་ངང་པ་འདི། ཐུབ་པ་བརྟུལ་ཞུགས་བཟང་ཞེས་པ།
དེ་ཡིན་སྔོན་གྱི་རབ་འབད་ནི། དྲན་ནས་བདག་གིས་དགེ་ལ་བཀོད།། 26

དེ་ལྟར་གསུས་ལ་མཉེས་གཤིན་པ། ཐམས་ཅད་གཟིགས་པ་རྒྱལ་བ་ཡིས།
རང་གི་སྔོན་བྱུང་གསུངས་པ་དག། ཐོས་ནས་དེ་དག་ཡ་མཚན་གྱུར།། 27

प्रणयादिति तेनोक्ते व्योम्नि चालोकिते मया ।
पपात वृष्टिः सहसा सफला भू रभूद् यया ॥ २० ॥

पश्चाभिज्ञत्व मासाद्य स ततः सादरो मुनिः ।
मा मूचे शुद्धसत्त्वेन किमनेन महीयसे ॥ २१ ॥

प्रणयादिति तेनाहं पृष्ट स्त मवदं ततः ।
अनेन चरितं नाहं सम्यक्सम्बोधि मर्थये ॥ २२ ॥

सन्तारणाय जगतां जिनः स्या मन्यजन्मनि ।
मयेत्युक्ते स मा माह भविष्यसि तथागतः ॥ २३ ॥

यदा तु सम्यक्सम्बुद्धः सर्व्वज्ञ स्त्वं भविष्यसि ।
तदा ममान्यदेहस्य कर्त्तव्योऽनुग्रह स्त्वया ॥ २४ ॥

एतत्तस्य वचः साधोः स्नेहादङ्गीकृतं मया ।
संप्राप्तः शशकः सोऽह मस्मिन् जन्मनि बुद्धताम् ॥

सुव्रताख्यो मुनिः सोऽयं हंसो गृहपतेः सुतः ।
पूर्व्वस्मृत्यैव यत्नेन प्रापितः कुशलं मया ॥ २६ ॥

प्रपन्नवत्सलेनेति कथितं सर्व्वदर्शिना ।
जिनेन निजवृत्तान्तं श्रुत्वा ते विस्मयं ययुः ॥ २७ ॥

ཛྷ་མཁན་བཞིན་དུ་མ་ཆང་མེད་པའི་འབྲས།
སྐྱིད་བྱེད་དགེ་བའི་སྤྱོད་པས་འདི་ན་གནས།
ཉིན་མོའི་བདག་དང་ཡོངས་འཁྲིས་བཏང་གྱུར་བ།
བསིལ་ཟེར་མཛེས་པའི་དཔལ་ནི་མཚུངས་མེད་བཞིན།། 28

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རི་བོང་གི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་རྩ་བཞི་པའོ།།

अविकलफलप्रसवः
शुभचरितैः सहवासः ।
दिनपतिपरिचयनिचितरुचेः
औरसमा हिमभासः ॥ २८ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शशकावदानं चतुरधिकशततमः पल्लवः ॥

ཡལ་འདབ་བརྒྱ་རྩ་ལྔ་པ།

ལྕེ་གཉིས་གང་ཞིག་ཁྲིམས་པས་ཀུན་སྤྱོད་གཙང་མ་རྣམས་ལ་ནི།
རྫུན་གྱིས་སྐྱོན་བརྗོད་མི་བཟད་དུག་ནི་རབ་ཏུ་སྤྲོ་བྱེད་པ།
སྡིག་དམོད་ཡོངས་སུ་གདུང་བ་རྒྱུད་མས་གཟིར་བ་དེ་དག་ནི།
མི་བཟད་འདོད་བྱ་མིན་པའི་རབ་རིབ་ཁྲོད་དུ་འཇུག་པར་འགྱུར།། 1

ཁ་ཆེར་རི་ཡི་གནས་སུ་ནི། རཻ་བ་ད་ཀ་ཞེས་པ་སྤྱོན།
འབྱུང་པོ་ཀུན་ལ་བརྩེ་བར་གནས། དགེ་སློང་བརྟུལ་ཞུགས་གཙང་བ་བྱུང་།། 2

ནམ་ཞིག་དེ་ཡི་ཐུམ་ནང་དུ། ཤིང་ཤུན་ཚུར་སྒྲིག་དག་གི་ནི།
ནགས་ཚལ་དབེན་པའི་ཕྱོགས་སུ་ནི། ཆོས་གོས་ཁ་ནི་བསྒྱུར་བ་བྱས།། 3

སྐབས་དེར་རྡུས་མའི་བེའུ་ཉམས། བྲམ་ཟེ་ཕྲ་མ་ཅན་ཞེས་པ།
སྐྱེ་བོ་བ་གླང་ཟ་བར་ནི། དོགས་པ་དང་ལྡན་འཚོལ་དུ་འོངས།། 4

དེ་ཡི་རི་ལ་རིང་པོ་ནས། ཆོས་གོས་ཚོས་ཁ་འཚེད་པ་ཡི།
མེ་ལས་སྐྱེས་པའི་དུ་བ་དག། མཐོང་ནས་བེའུ་བཙོས་པར་བསམས།། 5

དེ་ནས་མཚོན་ཆ་ལག་རྣམས་དང་། ལྡན་ཅིག་གཉིས་སྐྱེས་རི་ལ་འཛེགས།
དགེ་སློང་རཻ་བ་ད་ལ་ནི། མངོན་ཕྱོགས་དུལ་བས་རབ་དྲིས་པ།། 6

पञ्चाधिकशततमः पल्लवः ।

कौर्य्येण ये द्विरसनाः शुचिचेष्टितानां
मिथ्यापवादविषयं विष मुत्सृजन्ति ।
ते पापशापपरितापपरम्परार्त्ताः
तीब्रव्यलीकतिमिरं विवरं विशन्ति ॥ १ ॥

पुरा रैवतको नाम काश्मीरेषु शुचिव्रतः ।
भिक्षुः शैलविहारेऽभूत् सर्व्वभूतदयाश्रयः ॥ २ ॥

तरुत्वचः कषायेन स कदाचिद् घटान्तरे ।
विविक्तकाननोद्देशे चक्रे चीवररञ्जनम् ॥ ३ ॥

अत्रान्तरे धेनुवत्सान् नष्टानन्वेष्टु माययौ ।
ब्राह्मणः पिशुनो नाम गोभक्ष्यजनशङ्कितः ॥ ४ ॥

स दूराच्चीवरक्वाथपाके वह्निसमुद्गतम् ।
पर्व्वते धूम मालोक्य वत्सपाक ममन्यत ॥ ५ ॥

ततः शैलं समारुह्य सहितः शस्त्रपाणिभिः ।
अभ्येत्य रैवतं भिक्षुं पप्रच्छ विनयाद्द्विजः ॥ ६ ॥

འཕགས་པ་འདི་དག་ཅི་ཞིག་མཛད། ཅེས་པ་དེ་ཡིས་གུས་པས་དྲིས།
བཟང་པོ་འདི་ནི་གོས་འཚོད་ཅེས། ཇི་བ་དྲ་ཡིས་དེ་ལ་སྨྲས།། 7

གནས་སྐབས་དེར་ནི་སྟོན་མེད་ཀྱི། དེ་ཡི་ལས་ཀྱི་རྣམ་སྨིན་གྱིས།
འཚོད་པ་དེ་ནི་བ་ལང་གི། ཤ་ཁྲག་རྒྱུ་དང་བཅས་པར་གྱུར།། 8

སྐྱབ་བྱེད་འཁྲུགས་པར་གྱུར་པ་ན། བདེ་བ་སྡུག་བསྔལ་ཉིད་འགྱུར་ཞིང་།
དཀར་པོ་དག་ཀྱང་ནག་པོར་འགྱུར། ཆོས་ཀྱང་ཆོས་མིན་ཉིད་དུ་འགྱུར།། 9

རྫུན་གྱི་སྡིག་པ་གསལ་བྱེད་དང་། སྐྱེ་བོ་ཁྲི་དང་གནས་ནས་སྐྱུང་།
འདི་དག་བསོད་ནམས་མ་ཡིན་པ། ཡོངས་སྨིན་མཚན་ཉིད་མངོན་སུམ་ཡིན།། 10

སྐྱེས་བུ་རྣམས་ཀྱི་ཉེས་བྱས་སྟོན་བསྐྱབས་སྨིན་པའི་དུས་སུ་ནི།
སྐྱོན་རྣམས་རབ་དུ་རྒྱས་ཤིང་ཡོན་ཏན་དག་ནི་ཉམས་པར་འགྱུར།
བྱ་བ་ཕྱིན་ཅི་ལོག་འགྱུར་བློ་གྲོས་རྣམ་པར་བསླད་པར་འགྱུར།
མངོན་པར་འཇོམས་པ་ཆེན་པོས་ངེས་པར་སྲུ་དང་སྲུ་མི་ལྡང་།། 11

འགལ་བའི་ཤ་ཨི་དྲི་དང་ནི། ཁྲག་གིས་ཀྱང་ནི་བསྒོས་པ་ཡི།
བྲམ་ཟེ་དེ་ཡིས་བྲུམ་པར་ནི། ཆོས་གོས་ཤ་ཉིད་གྱུར་པར་བལྟས།། 12

སྐྱོན་ནི་མངོན་སུམ་མཐོང་གྱུར་ནས། ཁྲོ་བའི་རྣམ་འགྱུར་དབྱིབས་ལྡན་ཞིག།
མི་བཟད་སྡིག་པས་འདར་བ་དེས། སྨོད་ཅིང་དེ་ལ་རབ་སྨྲས་པ།། 13

किमेतदार्य्य क्रियते पृष्ट स्तेनेति गौरवात् ।
तत्र चीवररागोऽयमिति तं रैवतोऽब्रवीत् ॥ ७ ॥

अस्मिन्नवसरे तस्य पूर्व्वकर्म्मविपाकतः ।
गोमांसरक्तसलिलः स पाकः समपद्यत ॥ ८ ॥

सुखं दुःखत्व मायाति शुक्लमप्येति कालताम् ।
विधौ विधुरतां याते धर्म्मोऽप्यायात्यधर्म्मताम् ॥ ९ ॥

मिथ्यापापप्रकटनं जनकोपः पदच्युतिः ।
अपुण्यपरिपाकाणामेतत् प्रत्यक्षलक्षणम् ॥ १० ॥

दोषः समुन्मिषति यात्यगुणः प्रकाशम्
कार्य्यं विपर्य्ययमुपैति विशीर्य्यते धीः ।
पुंसां पुराविहितदुष्कृतपाककाले
के के न नाम निपतन्ति महाभिघाताः ॥ ११ ॥

विरुद्धामिषगन्धेन रुधिरेण च शङ्कितः ।
सोऽपश्यद्ब्राह्मणः कुम्भं चीवरं मांसतां गतम् ॥ १२ ॥

प्रत्यक्षं दोष मालोक्य स क्रोधविकृताननः ।
त मभाषत निर्भर्त्स्य तीव्रवैशसकम्पितः ॥ १३ ॥

ཀྱེ་མ་དམ་པའི་ཀུན་སྤྱོད་ལྡན། མི་མེད་ནགས་སུ་གནས་པ་འདི།
གང་གི་ལས་ནི་འདི་འདྲ་བ། འདིར་ནི་སུ་ཡང་མཐོང་བ་མེད།། 14

རབ་ཏུ་བྱུང་བས་ལུས་བསྐུར་ཅིང་། གྲུ་བ་ཀླུ་ཀློ་སྐྱེ་བོར་འོས།
སྡིག་པ་བསྒྲིབས་པའི་རྫུན་གྱིས་ནི། བརྟུལ་ཞུགས་ཞི་ཉིད་སུ་ཡིས་ཤེས།། 15

ཞེས་དེས་སྨྲོད་བཅས་བརྗོད་པའི་ཚེ། རི་བ་ད་ཡིས་རབ་བསམས་པ།
སྐྱོན་ནི་མངོན་སུམ་མཚོན་འདི་ལ། ལན་མེད་བདག་ནི་ཅི་ཞིག་སྨྲ།། 16

བདག་གི་འདི་ནི་ལྷས་བཅོམ་ཞེས། བརྗོད་ཀྱང་སུ་ཞིག་བདེན་པར་འཛིན།
མངོན་སུམ་གསང་བའི་སྐྱེ་བོ་ནི། བཞད་གད་དག་གི་གནས་སུ་གྱུར།། 17

མི་སྨྲ་འབའ་ཞིག་ལ་བརྟེན་ཏེ། ཉེ་བར་གནས་པ་ཀུན་བཟོད་བྱ།
བདག་ལ་བཅོས་སུ་མེད་པ་འདི། རྒྱུ་ལས་མི་ནི་རབ་ཏུ་འབྱུངས།། 18

སྐྱོན་ལ་ཡོན་ཏན་ཕྲལ་བྱུང་སྒྱུར་དུ་ཡོན་ཏན་དག་ལ་སྐྱོན།
བདུད་རྩིའི་གནས་ལ་དུག་དང་དུག་ལ་ཡང་ནི་བདུད་རྩི་སྟེ།
ངེས་པར་སྤྱོད་བྱ་དུས་ནི་མིག་འཕྲུལ་བྱེད་པའི་ཐུབ་མེད་འདི།
རྟག་ཏུ་རྨད་བྱུང་རང་བཞིན་ཉིད་ནི་རབ་ཏུ་སྟོན་པར་བྱེད།། 19

ཅེས་སེམས་དེ་ནི་མི་སྨྲ་བས། གཉིས་སྐྱེས་ལྷག་པར་ཁྲོས་གྱུར་ཏེ།
སྡིག་པ་བཞིན་དུ་སྦོམ་པ་ཡི། དབྱུག་པ་མགོ་ལ་ཡང་དག་བསྣུན།། 20

अहो वत सदाचारः स्थितोऽयं विजने वने ।
यस्येदृशानि कर्म्माणि न कश्चिदिह पश्यति ॥ १४ ॥

प्रव्रज्यारञ्जितः कायः क्रिया म्लेच्छजनोचिता ।
जानाति च्छन्नपापानां कः कूटव्रतशान्तताम् ॥ १५ ॥

इत्युक्ते तेन साक्षेपं रैवतः समचिन्तयत् ।
दोषे प्रत्यक्षलक्ष्येऽस्मिन् किं ब्रवीमि निरुत्तरः ॥ १६ ॥

मम दैवोपघातोऽय मित्युक्ते कोऽनुमन्यते ।
हास्यायतनता मेति प्रत्यक्षापह्नवी जनः ॥ १७ ॥

उपस्थितं सहं सर्व्वं मौन मालम्ब्य केवलम् ।
अयं मे निष्प्रतीकारः सलिलादग्निरुत्थितः ॥ १८ ॥

दोषे गुणातिशय माशु गुणेऽपि दोषं
पीयूषधाम्नि विष मप्यमृतं विषे च ।
सन्दर्शयत्यनिश मद्भुतरूपमेव
कालेन्द्रजालिकवधू र्भवितव्यतेयम् ॥ १९ ॥

इति चिन्तयत स्तस्य मौनात् क्रुद्धोऽधिकं द्विजः ।
मूर्द्ध्नि पापमिव स्थूलं लगुडं समपातयत् ॥ २० ॥

ཁྲག་གིས་བསྒོས་དེ་སྦྲོན་སྤྱིས་དེ། བཅིངས་ནས་ས་བདག་མདུན་སར་ཁྲིད།
དེ་བཞིན་ཞ་དང་བཅས་པ་བསྟན། བཙོན་ཁང་དག་གི་མགྲིན་དུ་བྱས། ‖ 21

སྐྱོན་མེད་དག་ནི་ཉོན་མོངས་སྤྱོད། སྡིག་པ་སྤྲས་པ་དར་གྱུར་པ།
དབང་མེད་མཚར་བའི་རྣམ་པ་ལ། སུ་ཡི་དག་པ་སུ་ཡིས་ཤེས ‖ 22

བཙོན་ཁང་དག་དུ་བཅིངས་པ་དེ། དུས་ཀྱི་བརྗིད་པར་གྱུར་པ་ན།
པའུ་ཐྲོབ་ནས་གཉིས་སྐྱེས་ནི། རྒྱལ་ངན་ངོ་ཚས་ཅན་མི་སྨྲ ‖ 23

དེ་ནས་ལོ་ནི་བཅུ་གཉིས་ན། ནམ་མཁའི་སྐད་ཀྱིས་རྟོགས་བྱས་ཞིང་།
དེས་སློབ་ཀྱིས་སྨྲན་མི་བདག་གིས། དགེ་སློང་བཅིངས་པ་དག་ལས་བཀྲོལ ‖ 24

བཙོན་ར་དག་ལས་ཀྱང་རྩུས་བཞིན། རིད་པའི་རྣམ་པ་མདོག་མི་སྡུག།
གོས་མེད་སྐྲ་ནི་གྱེན་དུ་ལངས། དེ་ནི་ཡི་དགས་བཞིན་དུ་འདྲོན ‖ 25

སྐྱེ་མ་རྡོ་སྡིང་རི་མོ་བཞིན། ལས་ཀྱི་རྒྱུན་ནི་གཡོ་བ་མེད།
གང་ཕྱིར་མངོན་ཤེས་ཐོབ་པས་ཀྱང་། དྲག་པོའི་ཉོན་མོངས་སྡུག་བསྔལ་ཐོབ ‖ 26

དེ་མཐོང་ས་བདག་དགའ་བོ་ནི། དྲག་པོར་འགྱོད་པས་རབ་གདུངས་པ།
བག་མེད་ལས་བྱུང་བདག་ཉིད་ཀྱིས། བསོད་ནམས་དམན་པ་ཉིད་ལ་སྨད ‖ 27

དེ་ཡིས་དགེ་སློང་ཞབས་ལ་གཏུགས། དག་བྲུས་གོས་ཀྱིས་གཡོགས་ནས་སྨྲས།
མི་ཤེས་ལས་སྐྱེས་བདག་གི་སྐྱོན། འཕགས་པ་ཁྱོད་ཀྱིས་བཟོད་པར་འོས ‖ 28

तं बद्धा भूपतिसभां नीत्वा रक्ताक्ष मग्रजः ।
तद्वत् स मांसं सन्दर्श्य चक्रे कारागृहातिथिम् ॥ २१ ॥

निर्दोषः क्लेश मश्नाति जृम्भते गुप्तपातकः ।
कः कस्य शुद्धिं जानाति चित्राकारेष्वसाक्षिषु ॥ २२ ॥

निबद्धे बन्धनागारे तस्मिन् कालेन विस्मृतम् ।
प्राप्य वत्सान् द्विजः किञ्चिन्नोचे दौर्जन्यलज्जया ॥ २३ ॥

अथ द्वादशभि र्वर्षै र्व्योमवाणीविबोधितः ।
मुमोच बन्धनाद् भिक्षुं तच्छिष्यस्मारितो नृपः ॥ २४ ॥

कारागारात् कृशाकारः कङ्काल इव धूसरः ।
ऊर्द्धकेशो विवसनः स प्रेत इव निर्ययौ ॥ २५ ॥

अहो ग्रावाग्रलिखिता निश्चला कर्म्मसन्ततिः ।
प्राप्ताभिज्ञोऽपि यत्प्राप क्रूरक्लेशकदर्थनाम् ॥ २६ ॥

तीव्रानुशयसन्तप्त स्तं दृष्ट्वानन्दभूपतिः ।
निनिन्द मन्दपुण्यत्वं प्रमादोद्भूत मात्मनः ॥ २७ ॥

स भिक्षुपादपतितः प्रसाद्याच्छाद्य वाससा ।
उवाचाज्ञानजं दोषं ममार्य्य क्षन्तु मर्हसि ॥ २८ ॥

གཉིས་སྐྱེས་དེ་ཡིས་དེ་ཚེ་ཉིད། བའུ་དག་ནི་ཐམས་ཅད་ཐོབ།
སྡིག་ཅན་བདག་ནི་གདི་སྨུག་གིས། ཁྱོད་ཉིད་བཅིངས་པ་བརྗེད་པར་གྱུར།། 29

མདུན་སར་ཁྱོད་ནི་སུ་ཡིས་ཀྱང་། སྐལ་པ་ཞན་པས་ཡོངས་མ་ཤེས།
ས་བདག་ལྟུང་བ་ཐོབ་པ་ནི། དགག་པ་རྣམས་ལ་ཆད་པ་ལྟུང་།། 30

ས་ཡི་མགོན་པོས་འདི་བརྗོད་ཚེ། བཟོད་པས་བསམས་པ་རབ་བཀུས་པ།
རི་བ་ད་ཡིས་དེ་ལ་སྨྲས། རྒྱལ་པོ་བདག་ལ་ཁྲོ་བ་མེད།། 31

ཅི་ཡང་ཁྱོད་ཀྱིས་གནོད་མ་བྱས། ཉོན་མོངས་རྒྱ་ཆེར་ལྡང་གྱུར་པ།
བདག་ལ་རང་ལས་མཚུངས་པའི་འབྲས། སྨིན་པ་དེ་ནི་ཉེ་བར་གནས།། 32

གང་ཞིག་འདོད་ལྡན་ཉིད་ཀྱིས་རྒྱུད་པ་ཀུན་གྱི་མགྲིན་ནས་
འཛིན་པར་བྱེད་པ་དང་།

གང་ཞིག་ཕུན་ཚོགས་ཡན་ལག་ཐམས་ཅད་ལྷག་པའི་
ལོངས་སྤྱོད་སྐལ་བཟང་ཉམ་བྱེད་དང་།

གང་ཞིག་རང་འདོད་བདེ་བའི་གནས་སུ་རྣམ་བར་རྩེ་
དང་གང་ཞིག་རིང་དུ་འཆང་བྱེད་པ།

དེ་དག་སྐྱེས་བུ་རྣམས་ཀྱི་རང་ལས་འཁོར་བའི་འཁྲི་
ཤིང་སྨིན་པའི་འབྲས་བུ་བཀྲ།། 33

ཞེས་སྨྲ་དེ་ལ་མི་བདག་གིས། དགེ་མཚན་དག་ལ་རབ་སྨྲས་པ།
བློ་བཟང་ཁྱོད་ཀྱིས་འདི་ཡང་ནི། ལས་ངན་ཅི་ཡི་འབྲས་བུ་ཡིན།། 34

དེས་སྨྲས་བ་ར་ཎ་སིར་སྔོན། ཀུ་ཐ་ཞེས་པ་གདུག་སྤྱོད་ཅན།
བ་ལང་བཀྲུ་ཞིང་དེ་ཡི་ཤས། ཟས་ནི་བསྒྲུབས་པ་དག་ཏུ་གྱུར།། 35

तत्रैव वत्सकाः सर्व्वे लब्धा स्तेन द्विजन्मना ।
त्वद्बन्धनन्तु पापस्य मोहेन मम विस्मृतम् ॥ २९ ॥

परिज्ञातः सभायां त्वं मन्दभाग्येन केनचित् ।
दण्डः पतति शुद्धेषु प्राप्तपापे महीपतौ ॥ ३० ॥

इत्युक्ते क्षितिनाथेन क्षान्तिप्रक्षालिताशयः ।
तं रैवतोऽवदन्मन्यु र्मम राजन्न विद्यते ॥ ३१ ॥

न त्वयापकृतं किञ्चिद्विपुलक्लेशपातिना ।
तन्ममोपनतं पाके स्वकर्म्मसदृशं फलम् ॥ ३२ ॥

यत् सोत्कण्ठतयेव सर्व्वविपदः कुर्व्वन्ति कण्ठग्रहं
सर्व्वाङ्गप्रसभोपभोगसुभगाः क्लिश्यन्ति यत् सम्पदः ।
यत् स्वाच्छन्द्यसुखास्पदं विहरणं दौर्गन्ध्य यद्बन्धनं
तत् पुंसां निजकर्म्मपाकशबलं संसारवल्लीफलम् ॥ ३३ ॥

इति ब्रुवाणं नृपति स्त मवोचत् कुतूहलात् ।
तवापि सुमते कस्य फल मेतत् कुकर्म्मणः ॥ ३४ ॥

सोऽब्रवीदभवं पूर्व्वं वाराणस्यां कुठाभिधः ।
गोचौरः क्रूरचरित स्तन्मांसविहिताशनः ॥ ३५ ॥

ནམ་ཞིག་བ་ལང་བསད་པ་ཡི། ཤ་བརྫུང་འཛིགས་ནས་བྲོས་པ་བདག།
བ་ལང་བསྲུང་བ་འཁོར་བཅས་རྣམས། བྲོས་པ་ཡིས་ནི་མངོན་པར་བཅོས༎ 36
དེ་ནས་བདག་གིས་ཉེ་བར་ནི། གསར་པའི་ཤ་དག་རབ་བཀོད་ནས།
རང་སངས་རྒྱས་ནི་ཆོས་ཀུན་ནི། ཞེས་བ་དེ་དག་རྣམས་ལ་བསྟན༎ 37
བ་ལང་གསོད་སྡིག་དྲག་པོས་བྲོས། དེ་དག་གིས་དེ་ཤ་མཐོང་ནས།
འབད་ནས་འདི་ནི་གསད་བྱ་ཞེས། ཚོགས་པ་རྣམས་ཀྱིས་བཅིངས་ཏེ་བརྡུང་༎ 38
དེ་ནས་འགྱོད་པས་བདག་གིས་ནི། ཉི་མ་བཅུ་གཉིས་མ་སོང་སྟེ།
བདག་གིས་སྡིག་བྱས་ཞེས་བརྗོད་ནས། དེ་ནི་བཙོན་ར་དག་ནས་བཏང་༎ 39
སྡིག་པ་དེ་སྨིན་བདག་གིས་ནི། དམྱལ་བར་ཡུན་རིང་ཉམས་མྱོང་ནས།
སྐྱེ་བ་འདིར་ཡང་ཉོན་མོངས་ནི། ལོ་ནི་བཅུ་གཉིས་རབ་ཏུ་ཐོབ༎ 40
ཅེས་བརྗོད་མི་བདག་ལ་གསོལ་ནས། ལྷ་དང་ལྷ་མིན་རབ་འདུད་ཐོབ།
རྫུ་འཕྲུལ་བསྟན་ནས་རི་བ་ཏ། དགེ་སློང་རྣམས་དང་ལྷན་ཅིག་སོང་༎ 41

བ་ཉིན་མེད་སྐྱོན་གྱིས་བྱེ་བྲག་རིག་པ་ནི།
མངོན་སུམ་དུ་མཆོད་མི་ཉམས་མཚན་ཉིད་ཀྱིས།
བརླང་པོས་ཟིལ་མནན་སྐྱེ་བོ་དམ་པ་ནི།
ཡུལ་གཞན་དག་ཏུ་བཅོངས་བཞིན་ཅི་ཞིག་བརྗོད༎ 42

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་རེ་བ་ཏའི་རྟོགས་པ་བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་རྩ་ལྔ་པའོ༎

कदाचिद् गोविघातात्तमांसं मां भयविद्रुतम् ।
गोरक्षिणः सानुचराः कोपात् समभिदुद्रुवुः ॥ ३६ ॥

तत्समीपे विनिक्षिप्य प्रत्यक्षपिशितं मया ।
प्रत्येकबुद्ध श्चौरोऽय मिति तेषां प्रदर्शितः ॥ ३७ ॥

सर्व्वै र्गोवधपापोग्रक्रोधैः पिशितदर्शनात् ।
वध्योऽय मिति यत्नेन निबद्धो बन्धने धृतः ॥ ३८ ॥

पश्चात्तापात्तथाभ्येत्य मया द्वादशभि र्दिनैः ।
कृतपापोऽह मित्युक्ता कारागारात् स मोचितः ॥ ३९ ॥

तत्पापपाकं नरकेष्वनुभूय मया चिरम् ।
जन्मन्यस्मिन्नपि प्राप्तः क्लेशो द्वादशवार्षिकः ॥ ४० ॥

इत्युक्ता नृप मामन्त्र्य प्रणामात्तसुरासुराम् ।
ऋद्धिं प्रदर्श्य प्रययौ रैवतः सह भिक्षुभिः ॥ ४१ ॥

असत्यदोषेण विशेषयुक्त्या
प्रत्यक्षलक्ष्यीकृतलक्षणेन ।
अलङ्कृतः साधुजनः खलेन
किं वक्ति विक्रीत इवान्यदेशे ॥ ४२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
रैवतावदानं पञ्चोत्तरशततमः पल्लवः ॥

ཡལ་འདབ་བརྒྱ་རྩ་དྲུག་པ།

རྒྱལ་བར་འདོད་རྣམས་བཞིན་དུ་སྟོབས་ཀྱིས་ནི།
བཟོད་དཀའ་འཁོར་བའི་དགྲ་ཡི་སྟོབས་བཅོམ་ནས།
དམ་པའི་ཆོས་ཀྱིས་རྒྱལ་སྲིད་ཆེན་པོ་ནི།
རྒྱས་པ་བརྟན་པ་རྣམས་ཀྱིས་ཐོབ་པར་འགྱུར༎ 1

གང་ཆེ་གྲོང་ཁྱེར་ལྷ་བུའི་མདོ། བཅོམ་ལྡན་གྱིས་གསུངས་དེ་ཡི་ཚེ།
དགེ་སློང་རྣམས་ཀྱིས་དགེ་མཚན་ལས། དྲིས་པ་དེ་ཡིས་རབ་གསུངས་པ༎ 2

གྲོང་ཁྱེར་གསེར་ཅན་ཞེས་པ་ནི། སྐྱེ་བོ་མཐོ་རིས་འདོད་ལྡན་བྱུང་།
དེར་ནི་མི་བདག་འོད་དང་ལྡན། གསེར་ཞེས་བྱ་བ་བྱུང་བར་གྱུར༎ 3

དེ་ཡི་དགའ་བ་མཆོག་ཏུ་ནི། རབ་ཏུ་རྒྱས་པ་དག་གི་གནས།
བུ་ནི་གསེར་གྱི་གོ་ཆ་དང་། བུ་མོ་གསེར་འོད་དག་ཏུ་གྱུར༎ 4

དུས་ཀྱི་ལང་ཚོ་ལ་འཇོགས་ཤིང་། ཉུ་མའི་མེ་ཏོག་ཕུར་བུས་མཛེས།
མཛེས་པ་དེ་མཛེས་དབྱིད་ཀྱི་ནི། ཡིད་འོང་དབྱིབས་ཅན་འཁྲི་ཤིང་བཞིན༎ 5

གཞོན་ལ་མཛའ་བས་ཡོངས་འདྲིས་པ། བློན་པོ་འི་བུ་གཉེན་འོད་ལྡན་ནི།
འདོད་པའི་སྙིང་པོ་ཞེས་པ་ཡིས། དེ་ལ་དལ་གྱིས་འདོད་པ་བསྟེན༎ 6

षड्धिकशततमः पल्लवः ।

विजिगीषव इव तरसा
दुःसहसंसाररिपुबलं हत्वा ।
आसादयन्ति धीराः
प्राज्यं सद्धर्म्मसाम्राज्यम् ॥ १ ॥

यदा सूत्रं भगवता व्याख्यातं नगरोपमम् ।
ततोऽस्य कौतुकात् पृष्टो भिक्षुभि स्तानभाषत ॥ २ ॥

अभूत् कनकवत्याख्या जिनस्वर्गप्रभा पुरी ।
तस्या मासीन्नरपति र्द्युतिमान् कनकाभिधः ॥ ३ ॥

तस्य प्रवृद्धमानस्य प्रीत्यैकायतनं परम् ।
पुत्रः कनकवर्म्माभूत् सुता च कनकप्रभा ॥ ४ ॥

कालेन यौवनारूढ़ा स्तनस्तवकशोभिनी ।
लतेव सा बभौ कान्ता वसन्तलतिकाकृतिः ॥ ५ ॥

बालप्रीत्या परिचित स्तां मन्त्रितनयो युवा ।
कामसाराभिधः स्वैर मकामयत कामुकः ॥ ६ ॥

མོ་ཏོག་དུས་སུ་རབ་ཞུགས་ཤིང་། ཡང་ཚོ་ཅན་གྱི་བདུན་འཕྲོག་ཆེ།
སྐྱེ་མ་དང་འགྲོགས་བྱུང་བ་ནི། ཡང་དག་རྒྱུ་བ་སུ་ཡི་བློགས། 7

བུ་མོ་སྤྱོད་ཚུལ་ཉམས་པ་དག། ཞེས་ནས་ས་བདག་ཁྲིམས་ལྡན་ནི།
མི་བཟད་སྲུ་ངན་ཁྲོ་བ་ཡི། མི་གཉིས་དག་ལ་མཚུངས་པར་ཞུགས། 8

ཁྲིམས་པ་བསྟན་པ་རྣམས་ལ་བསོད་ནམས་ཀྱིས།
མཆོད་འོས་རིགས་ནི་བུ་མོས་དམན་པར་གྱུར།
བསྐྱང་བྱ་མིན་པར་སྐྱོང་བའི་གདོང་བཞིན་དུ།
སྐད་ཅིག་གིས་ནི་བུ་མོས་རིགས་ཉམས་བྱེད། 9

དེ་ནས་ས་ཡི་བདག་པོའི་བཀས། བུ་མོ་བློན་པོའི་བུ་དེ་ཡང་།
བཀའ་ནི་བྱེད་པ་རྣམས་དག་གིས། བླངས་ནས་གསོད་པའི་གནས་སུ་ཁྲིད། 10

དེ་ནས་སྐབས་ནི་ཞུ་བྱེད་པ། དེ་དག་སྙིང་རྗེ་རྒྱས་པ་ཡི།
རྒྱལ་སྲས་ཀྱིས་ནི་རང་གྲོང་ལས། གྲོང་ཁྱེར་གཞན་པ་དག་ཏུ་ཁྲིད། 11

དེ་ནས་ས་བདག་བརྩེ་མེད་ཅིང་། ཁྲོས་པས་དགྲ་ནི་དྲག་པོ་བཞིན།
བུ་ནི་ངེས་པར་རབ་བསྐྲད་དེ། མཐའ་འཁོབ་ནགས་ཀྱི་མགྲིན་དུ་བྱུས། 12

སྙིང་སྟོབས་རྒྱ་གཏེར་ཡས་བསྐྲད་དེ། འཇུག་ངོགས་ནགས་ཚལ་སར་འཁྲམས་ནས།
དགའ་བའི་སྐྱེད་ཚལ་པདྨ་ཅན། མི་མེད་གྲོང་ཁྱེར་མཛེས་པ་ཐོབ། 13

प्रवृत्ते पुष्पसमये धैर्य्यहारिणि यौवने ।
भृङ्गः प्रसङ्गसञ्चारी मञ्जर्य्याः केन वार्य्यते ॥ ७ ॥

तनयां नष्टचरितां ज्ञात्वा मानी महीपतिः ।
तुल्यं विवेश विषमं शोकक्रोधानलद्वयम् ॥ ८ ॥

कन्याविहीनानि कुलानि पुण्यैः
भवन्ति मान्यान्यभिमानभाजाम् ।
अयाच्ययाचैव सुखं क्षणेन
कुलं हि कन्या मलिनीकरोति ॥ ९ ॥

शासनादथ भूभर्त्तुः कन्या मन्त्रिसुतश्च सः ।
आकृष्य बध्यवसुधां नीतौ शासनकारिभिः ॥ १० ॥

याचमानौ परित्राणं तत स्तौ करुणाकुलः ।
राजपुत्रः स्वनगरान्निनाय नगरं परम् ॥ ११ ॥

ततः क्रुद्धः क्षितिपतिः पुत्रं शत्रु मिवोत्कटम् ।
निष्काश्य निष्कृप श्चक्रे प्रत्यन्तगहनातिथिम् ॥ १२ ॥

पित्रा निरस्तः सत्त्वाब्धि र्भ्रान्त्वा तीर्थवनावनौ ।
रम्योद्यानाब्जिनीकान्तं पुरं प्राप स निर्जनम् ॥ १३ ॥

དེར་ནི་སྡིང་མོ་གསེར་གྱི་འོད། སྐྱེ་བོ་དང་བྲལ་སྐྱོ་བ་ནི།
གྲོང་ཁྱེར་དག་གི་ལྷ་མོ་བཞིན། གཅིག་པུ་ཉིད་ནི་མཐོང་བར་གྱུར།། 14

དེ་ཡི་ས་སྟོང་པའི་རྒྱུ་དག་དྲིས། དེ་ཡི་མིང་པོར་ཡོངས་ཤེས་ནས།
མཛོད་བས་མཆི་མའི་ཆར་འབེབས་ཤིང་། དེ་ལ་ལན་ནི་རབ་སྨྲས་པ།། 15

མིང་པོ་ནུ་གྲོ་དྷ་བརྟེན་པའི། གནོད་སྦྱིན་སྟོབས་ཆེན་སྨུན་བྱེད་པ།
དྲུག་ཅུའི་གྲངས་ཀྱི་གྲོང་ཁྱེར་འདི། སྐྱེ་བོ་མེད་པ་དག་ཏུ་གྱུར།། 16

འདི་བརྟག་ལྷག་མ་ར་ལྷུ་ནི། བདག་དང་བློན་པོ་འི་བུ་དེ་སྟེ།
དེ་ནི་ཁྱོད་ཀྱི་དཔུང་པ་ཡི། སྟོབས་མཐུས་བདག་ཅག་སྐྱོབ་པ་ཉིད།། 17

ཅེས་པ་སྡིང་མོའི་ཚིག་ཐོས་ནས། རྒྱལ་པོའི་བུ་ཡིས་མདའ་རྣམས་ཀྱིས།
གནོད་སྦྱིན་འཕྲེང་བ་འོངས་པ་དག། གནོད་སྦྱིན་གཅིག་གི་ལྷག་མར་གྱུར།། 18

གནོད་སྦྱིན་ཀོ་ཊ་ར་ཞེས་པ། དེ་ཉིད་ལ་ནི་སྐྲབས་སོང་ཞིང་།
འབང་གི་དངོས་པོ་ཐོབ་པ་དེས། དེ་ཡི་རྒྱལ་བ་བསྒྲགས་པ་གྱུར།། 19

སླར་ཡང་གྲོང་དེ་གྲོང་ཁྱེར་ནས། ཁེངས་ཤིང་འཚོ་བ་མེད་པ་ན།
སྡིང་མོའི་བདག་པོ་བློན་པོའི་བུ། རྒྱལ་སྲས་ཀྱིས་ནི་རྒྱལ་པོར་བྱས།། 20

ངོ་མཚར་དང་བཅས་བུ་ཡི་མཐུ། ཉན་རྣ་དག་གིས་བཤད་ཐོས་ནས།
ས་ཡི་བདག་པོ་གསེར་གྱིས་ནི། སྤྲིང་ཡིག་དག་གིས་འབད་པས་བོས།། 21

ददर्शैकाकिनीं तत्र भगिनीं कनकप्रभाम् ।
खिन्नां जनवियोगेन नगरस्येव देवताम् ॥ १४ ॥

सा भ्रातरं परिज्ञाय प्रीत्या बाष्पाम्बुवर्षिणी ।
शून्यताकारणं तेन पृष्टा तं प्रत्यभाषत ॥ १५ ॥

भ्रात र्निर्जनतां नीतं पुर मेतत् प्रहारिभिः ।
षष्टिसंख्यैर्महानागैर्यक्षै र्न्यग्रोधसंश्रयैः ॥ १६ ॥

संप्रत्यस्मिन् क्षये शेषावहं मन्त्रिसुतश्च सः ।
अधुना त्वद्भुजबलप्रभाव स्त्राणमेव नौ ॥ १७ ॥

इति स्वसु र्वचः श्रुत्वा राजपुत्रः समागतः ।
एकयक्षावशेषां तां चक्रे यक्षावलीं शरैः ॥ १८ ॥

स यक्षः कोटरो नाम तमेव शरणं गतः ।
प्रपन्नदासभावोऽस्य विदधे जयघोषणाम् ॥ १९ ॥

पुनः पौरैः समाकीर्णे पुरे तस्मिन्नविप्लवम् ।
नृपं राजसुत श्चक्रे मन्त्रिसूनुं स्वसुः पतिम् ॥ २० ॥

पुत्रप्रभावं साश्चर्यं श्रुत्वा चारै र्निवेदितम् ।
कनकः क्ष्मापति र्लेखप्रणयेनानिनाय तम् ॥ २१ ॥

ཡབ་ཀྱིས་ཅོད་པན་བཅིངས་གྱུར་ཅིང་། རྒྱལ་ཚབ་གཟི་བརྗིད་ལྡན་གྱུར་པ།
དབང་པོ་དབང་གྱུར་དེ་ཡིས་ས། གླིང་བཞི་ལྡན་པ་དབང་དུ་བྱས།། 22

འཁོར་བའི་བཞིན་དུ་དགྲ་ཡི་སྡེ། གང་གིས་ཀུན་དུ་བརླག་བྱས་པ།
དཔལ་ལྡན་རྒྱལ་པོ་འི་གཞོན་ནུ་དེར། ང་ཉིད་དེ་ཡི་དུས་ན་གྱུར།། 23

སྙིང་སྟོབས་མཛེས་ལྡན་དམ་ཆོས་སེང་གེའི་ཁྲི་ལ་སྤྲོ་བ་ཡིས་ནི་ཉེར་
བཞུགས་ཤིང་།
ཚུལ་ཁྲིམས་གཙུག་ཏོར་དང་ལྡན་དབེན་པའི་ཆུ་ཡིས་མངོན་པར་
དབང་བསྐུར་དཔལ་ཐོབ་པ།
མི་བཟད་རྒྱ་ཆེ་སྲིད་པའི་ཉོན་མོངས་འཁྲིང་བ་རྒྱུད་མར་གྱུར་པའི་
དགྲ་བཅོམ་ནས།
རབ་ཞི་ཐོབ་ཅིང་ཀུན་ལས་རྒྱལ་བ་དག་གིས་སྤྱང་འདས་ས་དེ་སྤྱོད་པར་བྱེད།། 24

གནོད་སྦྱིན་དང་མཚུངས་ཉོན་མོངས་བརླག་བྱས་ནས།
ཤིན་དུ་དྲི་མེད་གྲོང་ཁྱེར་ལྷ་བུ་ཡི།
མྱ་ངན་འདའ་བ་འགའ་ཞིག་དག་གིས་ཐོབ།
ཅེས་པ་གསུངས་ནས་བཅོམ་ལྡན་རྣམ་པར་གནས།། 25

ཞེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་
དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་གསེར་གྱི་མགོ་ཚའི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་བརྒྱ་ཙ་དྲུག་པའོ།།

स बद्धमुकुटः पित्रा युवराजः प्रतापवान् ।
वशे वश्येन्द्रिय श्चक्रे चतुर्द्वीपवतीं महीम् ॥ २२ ॥

श्रीमान् राजकुमारोऽसावहमेव तदाभवम् ।
संसारस्येव यश्चक्रे शत्रुवर्गस्य सङ्क्षयम् ॥ २३ ॥

उत्साहादुपविश्य सत्त्वरुचिरे सद्धर्मसिंहासने
शीलोष्णीषवता विवेकसलिलप्राप्ताभिषेकश्रिया ।
हत्वा शत्रुपरम्परां पृथुभवक्लेशावली मक्षयां
सा लब्धप्रशमेन विश्वजयिना निर्वाणभू भुंज्यते ॥ २४ ॥

नगरोपम ममलंतरं
निर्व्वीसं यक्षसन्निभान् शत्रून् ।
क्लेशानाक्षपयित्वार्त्तं
कैश्चिद् भगवानुक्तेति विरराम ॥ २५ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
कनकवर्म्मावदानं षड़धिकशततमः पल्लवः ॥

ཡལ་འདབ་བརྒྱ་རྩ་བདུན་པ།

བསོད་ནམས་རབ་འབར་བསམ་པ་དྲི་མེད་རྣམས།
ཡོན་ཏན་ལ་ཆགས་ནམ་ཡང་ནོར་ལ་མིན།
རྣལ་འབྱོར་ལ་སྦྱོར་ལོངས་སྤྱོད་དག་ལ་མིན།
རྟུལ་གྱི་ཆགས་བྲལ་ལ་དགའ་འདོད་ལ་མིན།། 1

བསོད་ནམས་རི་བོ་བཙམ་ལྡན་འདས། དེ་བཞིན་གཤེགས་པ་བསོད་ནམས་མཐུ།
དེ་ཡི་བསོད་ནམས་ལ་གྲུས་པས། ཡ་མཚན་དགེ་སློང་གིས་དྲིས་གསུངས།། 2

བཱ་རཱ་ཎ་སིར་རྒྱལ་པོ་ནི། ཚངས་བྱིན་དག་གིས་ས་བསྐྱངས་ཚེ།
ཁྱིམ་བདག་ཟས་ནི་གཙང་མ་དག། ནོར་སྦྱིན་དང་ནི་མཚུངས་པ་བྱུང༌།། 3

རྒྱ་མཚོར་འགྲོ་བས་རབ་བསྐྱབས་པ། ནོར་བུ་མུ་ཏིག་ཚོགས་རྣམས་ཀྱིས།
སློང་བ་དག་གི་དཔག་བསམ་ཤིང༌། དེ་ཡི་ཁྱིམ་ནི་ཡོངས་གང་གྱུར།། 4

ནམ་ཞིག་རིན་ཆེན་གླིང་གཞན་ནས། འོངས་པ་དེ་ནི་ས་བདག་ལ།
སྐྱེས་སུ་མུ་ཏིག་དོ་ཤལ་དག། ཁྱེར་ནས་བཞྭ་རྟུ་སོང་བར་གྱུར།། 5

ས་བདག་སྔོན་དུ་ལངས་བྱས་ནས། གུས་པས་མཆོད་པ་དེ་ཡིས་ནི།
དཔལ་གྱི་རྩེ་དགའ་སྐྱོད་པ་བཞིན། གསལ་བའི་དོ་ཤལ་དེ་ལ་ཕུལ།། 6

सप्ताधिकशततमः पल्लवः ।

गुणे स्पृहा न द्रविणे कदाचित्
योगेऽभियोगः प्रसभं न भोगे ।
पुण्योज्ज्वलानां विशदाशयानां
रजोविरागाभिरति र्न कामे ॥ १ ॥

पुण्यप्रभावं भगवान् पुण्यशील स्तथागतः ।
बभाषे भिक्षुभिः पृष्टः तत्पुण्यादरविस्मितैः ॥ २ ॥

वाराणस्यां महीं राज्ञि ब्रह्मदत्ते प्रशासति ।
शुद्धोदनो गृहपति र्बभूव धनदोपमः ॥ ३ ॥

तस्यार्थिकल्पवृक्षस्य समुद्रगमनार्जितैः ।
मणिमौक्तिकसम्भारैः परिपूर्ण मभूद् गृहम् ॥ ४ ॥

रत्नद्वीपान्तरायातः स कदाचिन्महीपतिम् ।
द्रष्टुं ययौ समादाय मुक्ताहार मुपायनम् ॥ ५ ॥

प्रत्युद्गतेन प्रणयान्मानितः स महीभुजा ।
तारहारं ददौ तस्मै लीलाहासमिव श्रियः ॥ ६ ॥

འོད་ལྡན་སྐྱིད་པར་ཡང་དག་ཆགས། རྒྱུ་སྐར་གྱི་ནི་ཚོགས་ལྟ་བུ།
ཡོན་ཏན་ལྡན་པའི་དེ་ཞལ་གྱིས། ས་བདག་སྙིང་ནི་བརྫུང་བ་བྱས།། 7

གནས་སྐབས་དེར་ནི་རྒྱལ་པོ་ཡི། བུ་མོ་གཞོན་ནུ་དབྱངས་ཅན་མ།
བ་གམ་ཅན་གྱི་ནང་སོང་བས། ལེགས་ལྡན་ཚིག་གི་ལེགས་བཤད་བླངས།། 8

ན་བའི་བདུད་རྩི་འདོད་པ་ཡི། ལེགས་བཤད་ཁྲིམ་བདག་གིས་ཐོས་ནས།
སྦྱུ་ལོང་སྒྱུ་གཟུའི་རྣམ་པ་ཅན། དེ་ཡི་རང་བཞིན་རང་ཁྲིམ་སོང་།། 9

དེ་ནས་ཟས་དང་རྩེ་དགའ་བདང་། ལེགས་བཤད་ཀྱིས་ནི་བསམ་པ་ཕྲོགས།
གཉིད་ཀྱིས་དབུལ་དུ་དེ་ཡིས་ནི། རང་གི་ཁྲིམ་དུ་ཡུན་རིང་བསམས།། 10

ཀྱི་མ་རྒྱལ་པོའི་བུ་མོ་དེས། ལེགས་པའི་ལེགས་བཤད་གླུར་བླངས་པ།
གང་དེ་ཡོངས་སུ་མ་སྤྱད་ཀྱང་། བདུད་རྩི་དག་ནི་བྱིན་པ་བཞིན།། 11

བདག་གིས་ལོ་ནི་བཅུ་གཉིས་ཀྱིས། རིན་ཆེན་ཚོགས་ནི་ཡངས་པ་དག།
ཐོབ་དེ་ལེགས་བཤད་རིན་ཆེན་ནི། འགའ་ཞིག་ལས་ཀྱང་ཉེར་མ་བསྒྲུབས།། 12

འབད་པ་བརྒྱ་ཡིས་བསགས་པ་ཡི། རྡོ་ལྡི་རིན་ཆེན་རྣམས་ཀྱིས་ཏེ།།
དམ་པའི་ལམ་ནི་གསལ་བྱེད་པའི། ལེགས་བཤད་དེ་ལྟར་རིན་ཆེན་ཡིན།། 13

ཞེས་པ་བསམས་ནས་མི་བདག་གི། ཁང་པར་སྐྱེས་བུ་རབ་བཏང་སྟེ།
ལེགས་བཤད་རྒྱལ་པོའི་བུ་མོ་ལས། སྟོང་ན་པོ་མིན་དེ་ཡི་བསླངས།། 14

स रश्मिस्तबकसंसक्ततारकानिकरोपमः ।
भूमिभर्त्तुर्गुणी हार श्चकार हृदयग्रहम् ॥ ७ ॥

अस्मिन्नवसरे राज्ञः सुता बालसरस्वती ।
सुभाषितं भव्यगिरा हर्म्योत्सङ्गगता जगौ ॥ ८ ॥

स्वक्तं गृहपतिः श्रुत्वा श्रवणामृत मीप्सितम् ।
पुलकाङ्कुरिताकार स्तन्मयः स्वगृहं ययौ ॥ ९ ॥

त्यक्ताहारविहारोऽथ सुभाषितकृताशयः ।
निद्रादरिद्रः स्वगृहे स चिरं समचिन्तयत् ॥ १० ॥

अहो नु राजपुत्र्या तद् गीतं साधु सुभाषितम् ।
अपर्य्यालोचितेनापि येनामृत मिवार्पितम् ॥ ११ ॥

मया द्वादशभि र्वर्षै र्विपुलो रत्नसञ्चयः ।
संप्राप्तः स्वक्तरत्नन्तु न कुतश्चिदुपार्जितम् ॥ १२ ॥

रत्नैः किं मध्यमगुरुभिः प्रयत्नशतसञ्चितैः ।
सन्मार्गालोकने रत्नं तद्विधन्तु सुभाषितम् ॥ १३ ॥

इति सञ्चिन्त्य पुरुषं विसृज्य नृपमन्दिरम् ।
स चक्रे राजदुहितुः स्वक्तयाच्ञा मयाचकः ॥ १४ ॥

འཛུམ་པའི་བཞིན་ལྡན་དེས་སྨྲས་པ། ལེགས་བཤད་རིན་གྱིས་ཐོབ་པར་འགྱུར།
དེ་ཡི་རིན་དང་མཚུངས་པའི་ནོར། གལ་ཏེ་ཉུས་ན་སྦྱིན་པར་མཛོད།། 15

ཇི་སྲིད་ལོ་ནི་བཅུ་གཉིས་སུ། བདེན་པའི་ངང་ཚུལ་དེ་ཡིས་ནི།
རིན་ཅན་དམ་འདི་ཚོགས་བསྒྲུབས་པ། རིན་དུ་འོས་པ་དེ་སྦྱིན་མཛོད།། 16

ས་སྐྱོང་བུ་མོ་དག་གི་འཕྲིན། འདི་དག་པོ་ཉམས་བཤད་པ་ནི།
ཐོས་པས་ཁྱིམ་བདག་གུས་བཅས་པས། རིན་ཅན་ཐམས་ཅད་བླངས་བྱས་ནས།།
17

རང་ཉིད་རྒྱལ་པོའི་ཁྱིམ་སོང་སྟེ། དེ་ལ་རྩ་ཡིས་རྩེ་དགའ་བྱིན།
དེ་རྩེ་ལེགས་བཤད་རིན་ཅན་ཐོབ། དགའ་བས་ཡང་དག་ཡང་དུ་བརྗོད།། 18

གང་གང་ཁྱིའམ་ནང་གི་བདེ་བ་དཔེ་མེད་ཙུང་ཟད་དག་དང་ནི།
གང་གང་སྙིང་སྟོབས་ཀྱིས་བསྐྲུན་ཡ་མཚན་རྒྱས་པ་གྲུབ་པའི་སྤྲོར་བ་དང་།
གང་གང་སྲིད་པ་རབ་ཞི་དྲི་མེད་རྒྱུན་དུ་དགའ་བ་ཐོབ་པ་དག།
དེ་དེས་བསོད་ནམས་དཔག་བསམ་ཤིང་གི་འབྲས་བུ་སྨིན་ཅིང་རྒྱས་པའི་ཁུར།། 19

རྒྱ་ཆེར་གྱུར་པའི་གཏེར་དེ་ཡིས། རིན་ཅན་ཀུན་གྱིས་ལེགས་བཤད་ནི།
བླངས་པ་ཐོས་ནས་མི་ཡི་བདག། ཡ་མཚན་བཅས་པས་དེ་ལ་དྲིས།། 20

ཅི་སླད་རིན་ཅན་རབ་བཏང་ནས། ལེགས་བཤད་ཙམ་ནི་ཁྱོད་ཀྱིས་བཟུང་།
བུ་མོ་འདི་ཡི་ཚིག་དག་ལ། དྲང་པོ་ཁྱོད་ནི་ཡིད་ཆེས་ལྡན།། 21

सा बभाषे स्मितमुखी स्रक्तं मूल्येन लभ्यते।
तस्यार्घतुल्यं द्रविणं दीयतां यदि शक्यते॥ १५॥

यावद्द्वादशभि र्वर्षै स्तेन तद्रत्नसञ्चयः।
विहितः सत्यशीलेन पण्यार्होऽसौ समर्प्यताम्॥ १६॥

एतद् भूपालदुहितुः सन्देशं दूतभाषितम्।
श्रुत्वा गृहपतिः सर्व्वं रत्नान्यादाय सादरः॥ १७॥

स्वयं राजगृहं गत्वा दत्त्वास्यै तृणलीलया।
स्रक्रत्नं तदादाय पपाठोत्कण्ठितो मुहुः॥ १८॥

यद् यत्किञ्चित् सुखमनुपमं वाह्य माभ्यन्तरं वा
यो यः सत्त्वप्रसर्वविलसद्विस्मयः सिद्धियोगः।
ये ये तृष्णाप्रशमविमलाः सन्ततानन्दलाभाः
पाकोत्सिक्तः समफलभरः पुण्यकल्पद्रुमस्य॥ १९॥

औदार्य्यनिधिना तेन सुरत्नेन सुभाषितम्।
गृहीतं नृपतिः श्रुत्वा पप्रच्छ तं सविस्मयः॥ २०॥

रत्नानि कस्मादुत्सृज्य स्रक्तमात्र मिदं त्वया।
गृहीतं बालिकावाक्ये सरलः प्रत्ययी भवान्॥ २१॥

ལེགས་པ་བཤད་ཀྱི་ནི་ས་གཞི་གང་། ནོར་ནི་ཚོགས་ཆེན་དག་གིས་འཐོབ།
ཟས་དང་བྲལ་ན་སུ་ཞིག་གིས། ལེགས་པ་བཤད་དག་ནི་བཟའ་བར་ནུས།། 22

ཞེས་པ་ས་བདག་མཛའ་བ་ཡིས། བརྗོད་པ་ཁྱིམ་བདག་གིས་ཐོས་ནས།
ལེགས་པ་བཤད་རྙེད་པ་ཆེན་པོ་ཡིས། ཆོས་པས་དེ་ལ་རབ་སྨྲས་པ།། 23

གང་གིས་སྤྲུལ་བཞིན་སྐྱེས་བུ་ལ། ཆགས་སྡང་དུག་ནི་སྐྱེད་བྱེད་པ།
རྒྱལ་པོ་འབད་བསྐྱངས་ཉམས་པ་ཡི། རིན་ཅེན་དག་གིས་ཅི་ཞིག་བྱ།། 24

ལེགས་པ་བཤད་ནོར་བུ་ལེགས་ལྡན་རྣམས་ཀྱི་སྙིང་ཁར་བརྟན་པའི་
ཡོན་དན་གྱིས་བརྟགས་ཤིང་།
དམ་པའི་ལམ་གྱི་སྒྲོན་མ་དང་མཚུངས་དྲི་མེད་རྒྱས་པའི་འོད་ཟེར་སྒྲོ་བྱེད་པ།
འཆོད་པ་ལས་ཐར་གསེར་བཟང་མཛེས་པའི་གནས་ལ་རབ་སྦྱར་
གནས་པ་ཐོབ་པ་ཡི།
རིན་དེ་ནོར་གྱི་བློ་གྲོས་རྒྱ་མཚོ་འི་སྐྱི་རགས་དང་ལྡན་ཀང་པའི་ཆ་ལའང་ཆུང་།།
25

ཞེས་དེ་དཔལ་ལྡན་ཁྱིམ་བདག་ནི། དགེ་ལ་བརྩོན་ལྡན་ཕྱིར་ཐོས་ནས།
གསེར་གྱི་གླིགས་བུ་ལ་བྲིས་དེ། ལེགས་པ་བཤད་ཚོགས་རྣམས་དག་ཏུ་སྦྱངས།། 26

དེ་ཡི་ཚེ་ན་ང་ཉིད་ནི། ཁྱིམ་བདག་ཟས་གཙང་ཅན་གྱུར་དེ།
ལེགས་པ་བཤད་བསོད་ནམས་ཉེར་སྟོན་པའི། དོན་ལ་བརྟོག་ཀུན་བདང་བས་གྱུར།།
27

དགེ་སློང་ཤཱ་རིའི་བུ་འདི་ཡང་། ས་བདག་བྲུ་མོ་དེར་གྱུར་དོ།
ཞེས་པ་དེ་བཞིན་གཤེགས་པ་ཡིས། འགྲོ་ཀུན་དགེ་བའི་སླད་དུ་གསུངས།། 28

पूर्णा सुभाषितैर्भूमिं धनं कृच्छ्रेण लभ्यते ।
न भक्तविरहे भुक्तं सूक्तं शक्तेन केनचित् ॥ २२ ॥

इति श्रुत्वा गृहपतिः स्नेहादुक्तं महीभुजा ।
सूक्तेन तेन महता सन्तुष्ट स्तमभाषत ॥ २३ ॥

राजन् किं क्रियते रत्नै र्यत्नरक्षै र्विनाशिभिः ।
सर्पाणामिव यैः पुंसां रागद्वेषो विषोपमः ॥ २४ ॥

वैमल्योपचितां रुचिं रचयतः सन्मार्गदीपोपमां
भव्यानां हृदये सुभाषितमणे र्गाढं गुणालम्बिनः ।
पाकोत्तीर्णसुवर्णसुन्दरपदप्राप्तप्रबन्धस्थितेः
मूल्यं सागरमेखला वसुमती पादांशकेऽप्यल्पकम् ॥ २५ ॥

इति श्रीमान् गृहपति र्निगद्य कुशलोद्यतः ।
सुवर्णपत्रलिखितं सूक्तं दिक्षु न्यवेशयत् ॥ २६ ॥

शुद्धोदनो गृहपतिः सोऽहमेव तदाभवम् ।
सूक्तैः पुण्योपदेशार्थैं सर्व्वस्वेनापि सादरः ॥ २७ ॥

शारिपुत्रोऽप्ययं भिक्षुः सा भूपतिसुताभवत् ।
इत्युवाचाखिलजगत्कुशलाय तथागतः ॥ २८ ॥

དགེ་བའི་པདྨོ་ཅན་ནི་རྩ་བ་བརྩུགས་ནས་རབ་སྐྱིད་དང་པོའི་རྒྱུ།
སྣ་ཚོགས་ཕུན་ཚོགས་གསར་པ་གསར་པའི་འཁྲི་ཤིང་རབ་སྐྱེད་སྐྱེད་ཚལ་ས།
སྨིད་པའི་གདུང་བ་རབ་དུ་ཞི་བྱེད་ཁ་བའི་འཛུམ་ལྡན་གང་གཱའི་རྒྱུན།
དམ་པའི་ལམ་མཆོག་གསལ་བར་བྱེད་མཁས་སྣང་བ་དག་ནི་བསོད་ནམས་ཉིད།། 29

ཅེས་པ་དགེ་བའི་དབང་པོས་བྱས་པའི་བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་
པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་ལས་ཟས་གཙང་མའི་རྟོགས་པ་
བརྗོད་པའི་ཡལ་འདབ་སྟེ་བརྒྱ་རྩ་བདུན་པའོ ༎

आद्यः स्कन्दः कुशलनलिनीमूलबन्धप्रसूतेः
नानासम्पन्नवनवलतासम्भवोद्यानभूमिः ।
तृष्णातापप्रशमनहिमस्मेरगङ्गाप्रवाहः
सन्मार्गाग्रप्रकटनपटुः पुण्यमेव प्रकाशः ॥ २९ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
शुद्धोदनावदानं सप्तोत्तरशततमः पल्लवः ॥ ० ॥

INTRODUCTION.

BY

SOMENDRA.

རྒྱལ་བའི་དབང་པོས་བསྐྲུབས་པ་གཙུག་ལག་ཁང་ཆེན་དག་གི་ཚོགས།
མཆོད་རྟེན་ཁྲམས་སུ་གསེར་གྱི་རི་མོ་འི་ཕྲུག་གི་ཁང་པར་ནི།
སངས་རྒྱས་རྟོགས་བརྗོད་རྣམ་མང་རྨད་བྱུང་དཔག་བསམ་འཁྲི་ཤིང་འདི།
མིག་གི་བདུད་རྩི་རབ་སྐྱེད་ཡི་གེའི་རང་བཞིན་དག་ཏུ་འབྱུངས། 1

ཞིགས་བྱུས་ཀྱིས་གང་བཀྲ་བའི་གཙུག་ལག་ཁང་དུ་དྲན་པ་
རྣམས་ནི་དགེ་བའི་སླད།
ཁྲིད་པར་གྱིས་ནི་བཀྲ་བར་བཀོད་ཅིང་དགའ་བའི་རྟོགས་
བརྗོད་འཕྲེང་བ་གཟུགས་ཅན་དག།
སྟོང་ཕྲག་རྣམ་གསལ་བསོད་ནམས་རབ་སྤྲུར་འབར་བ་
དེ་ཉིད་དག་བའི་དབང་པོ་ཡིས།
བསྐལ་པའི་བར་དུ་འགྲོ་བ་དེ་བྲལ་འཁྲུགས་པར་མ་གྱུར་
ཅིག་ཅེས་གསལ་བར་བཀོད།། 2

དེ་ཡིས་བྱང་ཆུབ་སེམས་དཔའི་སྤྱོད། བརྒྱ་རྩ་བདུན་པོ་འདི་དག་བྱས།
བཀྲ་ཤིས་གྲངས་ནི་རྫོགས་པ་ལ། གཅིག་ནི་རབ་ཏུ་འབད་པས་བྱ།། 3

དེ་ནས་ཟླ་དབང་ཞེས་པ་དེ་ཡི་བུ།
མིང་གཞན་ནུ་ཀོ་ཞེས་བརྗོད་སྙན་དངགས་མཁན།
རྒྱལ་བའི་གདམས་རྒྱུད་རྒྱ་ཆེ་སྤྲུར་བ་འདིར།
རྟོགས་པ་བརྗོད་པ་ལྷག་མ་སྐོང་བྱེད་གྱུར།། 4

अष्टोत्तरशततमः पल्लवः ।

उपक्रमः ।

एषा जिनेन्द्रविहितोरुविहारवर्य्य-
चैत्याङ्गने कनकचित्रगुहागृहेषु ।
चित्रामृतप्रचितलेख्यमयी बभूव
बुद्धावदानविविधाद्भुतकल्पवल्ली ॥ १ ॥

सैवेयं कुशलाय पूर्णसुकृते चित्ते विहारे सताम्
क्षेमेन्द्रेण विशेषचित्ररचनारम्यावदानावली ।
आकल्पप्रतिमासहस्रविकसत्पुण्यप्रबन्धोज्ज्वला
माभूत्तद्विरहाकुलं जगदिति व्यक्तं प्रतिष्ठापिता ॥ २ ॥

सप्तोत्तरशत मेतत् तेन कृतं बोधिसत्त्वचरितानाम् ।
मङ्गलसंख्यापूरण मेकं कार्य्यं प्रयत्नेन ॥ ३ ॥

सोमेन्द्रनामा तनयोऽथ तस्य
कवि र्निरुद्धापरनामधेयः ।
अस्मिन् जिनोदारकथाप्रबन्धे
संपूरयिष्यत्यवदानशेषम् ॥ ४ ॥

འཚམས་སྦྱོར་ཀ་ར་ལ་ཡི་བྲུ་མོའི་སྐྲ་ཚོགས་རྣམ་པ་མཆོག་ཏུ་ཡང་དག་འབྲེལ།
ཅི་ཡང་རབ་ཏུ་དང་བ་རྒྱས་པ་ཀ་རིའི་མཛེས་མའི་འགྲམ་པ་ཤིན་ཏུ་མཉེན།
རོ་ཡི་གཏེར་གྱུར་གང་གིས་འཁྲུག་ཚིག་གཡོ་ལྡན་ཀ་ཊ་ཀ་མའི་མིག་གིས་ཟེར།
ཡོངས་འདྲིས་ཟླ་བའི་བར་དུ་འགྲོགས་ལྡན་ལེགས་བཤད་རྒྱ་གཏེར་དེ་ནི་
ཕྱུག་གྱུར་ངེས།། 5

གང་གིས་ཨོཾ་ཡིག་དག་ལས་གྲུ་གྲུ་ཁོ་ན་མཆོག་ཏུ་བསླབས་ཀྱིས་གཞན་མ་ཡིན།
གང་གི་ཁ་ནས་སུ་སྨྲིའི་ཚིག་ནི་གསལ་བ་ནམ་ཡང་ངེས་པར་མི་འབྱུང་ཞིང་།
ཁྲོ་བ་འབར་བས་བཞིན་ནི་མདོག་བྲལ་མི་སྨྲུན་རིག་བྱེད་གཏེར་གྱུར་དེ་དག་གིས།
དྲག་པོ་འདི་གནོད་པ་བཞིན་དུ་རྒྱ་ཆེ་གདམས་ཀྱི་སྙན་དངགས་དག་ནི་ཟེ་ལྷུར་བཟོད།།
6

དགེ་དབང་ཞེས་པའི་སྙན་དངགས་མཁན་གྱི་རྟོགས་བརྗོད་དཔག་
བསམ་འཁྲི་ཤིང་འདི་བྲིས་ནས།
ད་ནི་དམ་པའི་ཆོས་ཀྱི་སྨོན་ལམ་འདི་དག་བློ་གྲོས་ནོར་ལྡན་བློ་ཡིས་འཛིན།
རྒྱལ་བའི་ཡོན་དན་སློགས་བྱེད་བསྒྲིབས་ལས་བདག་གིས་བསོད་
ནམས་གང་ཞིག་ཉེར་བསྒྲུབས་པ།
དེ་ཡིས་སྐྱེ་བོ་འདི་ནི་སེམས་ཅན་མཐའ་དག་དགེ་ལ་རྟག་ཏུ་བརྩོན་གྱུར་ཅིག།། 7

འཁོར་བས་ཚེ་བར་ཡོངས་སུ་ངལ་ཞིང་འདོད་པའི་ཚང་གིས་
སྲོས་བ་ཉིད་འཛིན་ལ།
གཏི་མུག་རྒྱས་པའི་མུན་པ་དག་གིས་མིག་རྫུམ་ཅལ་ཞིང་དྲན་པ་ཉམས་པ་ཡི།

बन्धः केरलकामिनीकुचभराकारः परं संहतः
काञ्चीकान्तकपोलकोमलतरः कोऽपि प्रसादोदयः ।
कार्णाटीनयनच्छटापरिचिता कर्णान्तरासङ्गिनी
भङ्गि र्यस्य तरङ्गिणी रसनिधे र्वन्द्यः स सूक्तोदधिः ॥ ५ ॥

ॐकारात् कुटिलत्वमेव परमं यैः शिक्षितं लीलया
यस्य स्वस्तिपदं कदाचिदपि न स्पष्टं मुखान्निर्गतम् ।
क्रोधाध्माततया विवर्णवदना स्तीव्रापराधोपमम्
ते विद्यानिधयः कथं पृथुकथं काव्यं क्षमन्ते खलाः ॥ ६ ॥

कृत्वेमा मवदानकल्पलतिकां क्षेमेन्द्रनामा कविः
सद्धर्म्मप्रणिधान मेतदधुना धत्ते धिया धीधनः ।
पुण्यं यत् समुपार्जितं जिनगुणाख्यानप्रबन्धान्मया
भूयात्तेन समस्तसत्त्वकुशले नित्योद्यतोऽयं जनः ॥ ७ ॥

संसारोरुपरिश्रमस्य दधतः कामासवक्षीवता-
रोहं मोहतमो निमीलितदृशः सुप्तस्य लुप्तस्मृतेः ।

འགྲོ་བ་རབ་ཏུ་རྟོགས་པར་བསྒྲུབ་ལ་ཆས་ཤིང་སྐྱོན་རྣམས་མ་ལུས་
འཇོམས་བྱེད་པ།
འོད་དང་ལྡན་པའི་བཙོམ་ལྡན་སངས་རྒྱས་རབ་ཏུ་སད་པ་ཉིད་ལ་རྟག་ཏུ་བསྟོད།། 8

ཀུན་དགའི་གཉེན་གྱུར་ལན་གཅིག་མིན་པར་རྒྱ་རྩེ་ཡིད་ཅན་ལ།
ལེགས་བཤད་འོད་ཀྱི་བདེ་བ་ཀུན་གྱི་ཉེ་བར་བསྟན་པ་སྒྲུབ།
དྲི་མེད་རང་རིག་ཆུ་གཏེར་དག་གི་ཟླ་བ་དགེ་བའི་དབང་།
གྲགས་པ་གསལ་བ་སྐྱིད་བྱེད་ཡབ་ལ་བདག་ནི་ཕྱག་འཚལ་ལོ།། 9

རྒྱལ་བའི་རྟོགས་པ་བརྗོད་པ་དག་བྱེད་ཚིག་ནི་སྨིན་པའི་གཏེར།
སྤྲུལ་བྱེད་བསོད་ནམས་རྟག་པ་དགེ་བའི་མངོན་པར་སྦྱོར་བ་འདི།
བླ་མ་ལེགས་བྱས་ལྡན་པ་བཀའ་ནི་རབ་ཏུ་སྦྱིན་མཛད་པས།
ཡོངས་སུ་རྫོགས་པའི་སྐད་དུ་བདག་ལ་སྐལ་བའི་ཆ་ཤས་མཛད།། 10

གང་ཞིག་ཕྱུག་ཏུ་རྒྱལ་བའི་རྟོགས་བརྗོད་དང་།
གསེར་གྱི་གཟུགས་བརྙན་རབ་ཏུ་རྒྱས་པར་གྱུར།
མིག་གི་བ་དུད་རྩི་བཀྲ་བའི་རི་མོ་ཆགས།
དེ་ནི་གཙུག་ལག་ཁང་ནི་དུས་ཀྱིས་འདའ། 11

དབྱངས་ཅན་པིར་གྱིས་རྣམ་པར་བཀྲ་བ་ཡི།
རྟོགས་པ་བརྗོད་པ་ཡི་གེའི་རིམ་པས་བྲིས།
གང་འདི་བསོད་ནམས་རང་བཞིན་གཙུག་ལག་ཁང་།
དོན་ཆེན་དམ་པ་དགའ་བྱེད་ཡབ་ཀྱིས་བསྒྲུབས།། 12

सन्नद्धं जगतः प्रबोधनविधौ निःशेषदोषापहम्
भास्वन्तं भगवन्तमेव सततं बुद्धं प्रबुद्धं नुमः ॥ ८ ॥

आनन्दबन्धु मसकृत् पृथुमानसानाम्
सूक्तांशुभि र्विहितसर्व्वसुखोपदेशम् ।
क्षेमेन्द्र मुज्ज्वलनिजाभिजनाब्धिचन्द्रम्
कीर्त्तिप्रकाशजनकं जनकं नमामि ॥ ९ ॥

वाक्पाकपावनविधानजिनावदान-
निर्म्माणपुण्यकलनाकुशलाभियोगे ।
अस्मिन् कृतः सुकृतिना दिशता नियोगं
सम्पूरणाय गुरुणा मम संविभागः ॥ १० ॥

येषां सुवर्णप्रतिमाप्रतान-
जिनावदानान्यभवन् गुहासु ।
संसक्तनेत्रामृतचित्रचित्राः
कालेन ते तेऽपि गता विहाराः ॥ ११ ॥

सरस्वतीतूलिकया विचित्र-
वर्णक्रमैः सङ्कलितावदानः ।
तातेन योऽयं विहितो महार्थः
सन्नन्दनः पुण्यमयो विहारः ॥ १२ ॥

ཕྱོགས་སྐུ་པོ་དེའི་འཕྲེང་བ་རབ་བཀོད་པའི།
གཟུགས་བརྙན་ཚོགས་ནི་བརྟན་པ་རབ་ཆགས་པ།
དེ་ནི་ཆུ་དང་མེས་བསྐྱེད་ཉེར་འཚོ་ཡི།
དུ་བཞི་འཛིག་ཀྱང་ཉམས་པ་ཡོད་མ་ཡིན༎ 13

དེ་ལ་རྟོགས་བརྗོད་གཅིག་གི་གཟུགས་བརྙན་འདི།
མི་བཟད་བསོད་ནམས་ལ་ཆགས་བདག་ཀྱང་འགོད།
བདག་ཉིད་ཆེན་པོ་དེར་གནས་རྗེས་འབྲང་བ།
ཞིན་དུ་ཆུང་ཡང་འབད་མེད་ཆེན་པོར་གྱུར༎ 14

ཐོས་པའི་སྐྱོགས་ཀྱིས་བདུང་བྱའི་བདུད་རྩི་སྙན་པ་དག་གི་རྒྱུན།
དྲི་བཟང་ཁང་པ་བཞིན་ཀྱི་པ་དྨ་འི་གནས་སུ་སྒྲོགས་བྱེད་པ།
བྱང་བའི་ན་ཆུང་དང་མཚུངས་ཡབ་ཀྱི་སྐད་ལ་བདུད་ནས་ནི།
སྙན་ངག་རྒྱ་ཆེའི་ཁྱད་པར་ལྷག་མ་བདག་གིས་རྫོགས་པར་བྱས༎ 15

न तस्य नाशोऽस्ति युगक्षयेऽपि
जलानलोल्लासपरिस्रवेन ।
दिक्षु प्रतिष्ठापितपुष्पपाली-
स्थिरप्रसक्तप्रतिमागणस्य ॥ १३ ॥

तस्मिन् मयाप्यक्षयपुण्यलोभा-
देकावदानप्रतिमार्पितेयम् ।
महात्मनां प्रौढपदानुसारी
स्वल्पोऽप्ययत्नेन महत्त्व मेति ॥ १४ ॥

माधुर्यधुर्यं ममृतं श्रुतिपानपेय-
मामोदसद्म-मुखपद्मपदे ध्वनन्तीम् ।
भृङ्गाङ्गनामिव पितुः प्रणिपत्य वाणीं
सम्पूरयामि पृथुकाव्यविशेषशेषम् ॥ १५ ॥

ཡལ་འདབ་བསུམ་ཅུ་རྩ་བརྒྱད་པ།

མཛེས་མ་གསར་དུ་འགྲོགས་པའི་དགའ་སྟོན་ཅན་དང་ལྷ་ཡི་
མགྲུ་ལྡན་དཔལ་དང་ནི།
དར་བབ་རྒྱུན་གྱི་ཉེ་བར་ལོངས་སྤྱོད་ན་རླབས་རྩ་ཡི་རྩེ་དགའ་བདང་བྱས་ནས།
ཀྱུས་བཅས་གང་དག་བརྩེ་བས་གཞན་གྱི་སྲོག་ནི་བསྐྱབ་པར་
བསྐྱབ་ལ་རང་གི་ལུས།
ཟོལ་མེད་སྦྱིན་པར་བྱེད་ལ་གཡོ་བ་མེད་པ་དེ་ལ་བདག་ཅག་ཕྱག་འཚལ་ལོ། ། 1

དཔལ་ལྡན་རིག་པ་འཛིན་པའི་དབང་། སྤྲིན་གྱི་དོག་ནི་སྤྲིན་བཞིན་དུ།
སྐྱོང་བའི་གདུང་བ་འཇོམ་པ་དག། གྲོང་ཁྱེར་གསེར་དུ་བྱུང་བར་གྱུར། ། 2

གང་གི་དཔག་བསམ་ཤིང་ལས་འཁྲུངས། རྟག་ཏུ་གསར་པ་གསར་པའི་དཔལ།
གྲགས་པའི་མེ་ཏོག་བསོད་ནམས་ཀྱི། དྲི་བཟང་རྒྱས་པ་རྣམ་པར་མཛེས། ། 3

ཆུ་གཏེར་ལ་ནི་ཟླ་བ་བཞིན། སྤྲིན་གྱི་བཞོན་པ་དེ་ཡི་སྲས།
ཤིན་དུ་ལྷག་པའི་བསོད་ནམས་རྣམས། གསར་དུ་ཚོགས་པ་བཞིན་དུ་གྱུར། ། 4

རྣམ་པའི་སྐྱེ་བོ་ལེགས་བྱས་དང་། ཡོན་ཏན་ལྡན་པ་དུལ་བ་དང་།
འཁོར་པ་ལྡན་པ་གཏོང་བས་བཞིན། དེ་ནི་སྲས་པོ་དེ་ཡིས་མཛེས། ། 5

དེ་ཡིས་བུ་ལ་དཔག་བསམ་ཤིང་། རྒྱལ་སྲིད་ཆེ་དང་བཅས་བཏང་ནས།
དཀའ་ཐུབ་སྐད་དུ་ཞི་བའི་གནས། མ་ལ་ཡར་ནི་དབེན་པར་སོང་། ། 6

ཡབ་ནི་བཙུན་མོ་དང་འགྲོགས་དེ། དཔལ་བདང་དཀའ་ཐུབ་ནགས་སོང་ཚེ།
སྤྲིན་གྱི་བཞོན་པ་འཁོར་པ་དག། ཐོབ་པ་ཡིས་ནི་རབ་བསམས་པ། ། 7

कान्तां नूतनसङ्गमोत्सववतीं दिव्यप्रभावां श्रियम्
तारुण्याभरणोपभोगलहरीं त्यक्त्वा तृणक्रीड़या ।
प्राणत्राणविधौ परस्य कृपया कुर्व्वन्ति ये सादराः
निर्व्याजं निजदेहदान मचला स्तानेव वन्दामहे ॥ १ ॥

बभूव काञ्चनपुरे श्रीमान् विद्याधरेश्वरः ।
जीमूतकेतु र्जीमूत इव तापहरोऽर्थिनाम् ॥ २ ॥

यस्य कल्पद्रुमोद्भूताः सदा नवनवाः श्रियः ।
चकाशिरे यशःपुष्पाः पुण्यसौरभनिर्भराः ॥ ३ ॥

जीमूतवाहन स्तस्य पुत्र श्चन्द्र इवोदधेः ।
अभूदत्युग्रपुण्यानां प्रत्यग्र इव सञ्चयः ॥ ४ ॥

गुणवान् विनयेनेव त्यागेनेव विभूतिमान् ।
स बभौ तेन पुत्रेण सुकृतेनेव सज्जनः ॥ ५ ॥

कल्पद्रुमं ससाम्राज्यं पुत्राय प्रतिपाद्य सः ।
तपसे शान्तिनिलयं मलयं प्रययौ नृपः ॥ ६ ॥

जायासखे श्रियं त्यक्त्वा याते ताते तपोवनम् ।
जीमूतवाहनः प्राप्तविभवः समचिन्तयत् ॥ ७ ॥

བླ་མ་བསྟེན་པ་དང་བྲལ་བ། བདག་ལ་དཔལ་ནི་བདེ་མེད་གྱུར།
མིག་གིས་དམན་པ་དག་ལ་ནི། རི་བོ་འི་གནས་དག་འབྲས་མེད་བཞིན།། 8

ཡབ་ཀྱི་ཞབས་ལ་གདུགས་ཚོ་སེན་མོའི་འོད་ཀྱི་འཕྲེང་བ་ཡིས།
རྣམ་པར་མཛེས་པའི་ཅོད་པན་དང་ལྡན་དེ་ཡི་བཀའ་ཉན་པའི།
ནོ་རྒྱན་གྱིས་བརྒྱན་དཔལ་ནི་ཇི་ལྟར་བདག་ལ་སྨིན་གྱུར་པ།
ད་ལྟ་འཁོར་ལོ་སྒྱུར་བའི་འབྱོར་པ་དག་ལ་དེ་ལྟ་མེད། 9

ཅེས་བསམས་དེ་ཡི་འཇིག་རྟེན་ནི། ཀུན་ལ་ཕན་སྨྲ་རང་ཉིད་ཀྱིས།
དཔག་བསམ་ཤིང་འཕྲུང་གསེར་གྱི་ཚར། འབེབས་པ་དག་ཏུ་བསྐུར་བྱས་ནས།།
10

རྒྱལ་སྲིད་ཆེན་པོ་རབ་བཏང་སྟེ། ཡབ་ཀྱི་བསྟི་གནས་དག་ཏུ་སོང་།
འཇིག་རྟེན་གསུམ་གྱི་སྙིང་པོ་ཡི། དབང་ཕྱུགས་སེམས་ཡངས་རྣམས་ལ་ཙ།།11

རྒྱལ་སྲིད་ཆེན་པོ་བཏང་ནས་དེ། མ་ལ་ཡ་ཡི་རིར་སོང་ཚེ།
དཔག་བསམ་ལྗོན་པས་ས་གཞི་ནི། གསེར་གྱི་ཡོངས་བཀང་མཁའ་ལ་སོང་།།12

སྨིན་གྱི་བཞིན་པས་རི་བོ་ནི། དཔལ་གྱི་དུམ་བུས་བརྒྱན་པར་ཕྱིན།
ཕ་མའི་ཞབས་པད་བསྟེན་པ་ཡི། འཁྲུལ་བའི་གདུང་བ་རབ་ཏུ་བཏང་།། 13

སྐབས་དེར་ཙན་དན་འཁྲི་ཤིང་ལྕུང་གཞོན་གྱིས།
བསྐྱོད་ཅིང་ཤུགས་རིང་སྐྱལ་བ་བསྟེན་རྣམས་ལ།

गुरुसेवावियुक्तस्य मम निःसुखतां गता ।
इयं श्री नैवहीनस्य चित्रशालेव निष्फला ॥ ८ ॥

तातस्य पादपतने नखरश्मिमाला-
विभ्राजमानमुकुटस्य यथा पुराभूत् ।
तच्छासनश्रवणकुण्डलमण्डितस्य
नो चक्रवर्त्तिविभवेऽद्य तथा मम श्रीः ॥ ९ ॥

इति संचिन्त्य स निजं ज्ञात्वा कनकवर्षिणम् ।
सर्व्वलोकोपकाराय सन्नद्धं कल्पपादपम् ॥ १० ॥

प्राज्यं साम्राज्य मुत्सृज्य प्रययौ पितुराश्रमम् ।
त्रैलोक्यसार मैश्वर्य्यं तृणं विपुलचेतसाम् ॥ ११ ॥

तस्मिन् साम्राज्य मुत्सृज्य प्रयाते मलयाचलम् ।
हेम्ना कल्पद्रुमः पृथ्वीं परिपूर्य्य दिवं ययौ ॥ १२ ॥

जीमूतवाहनः प्राप्य गिरिं श्रीखण्डमण्डनम् ।
वियोगतापं तत्याज पित्रोः पादाब्जसेवया ॥ १३ ॥

अत्रान्तरे चन्दनवल्लरीणां
दिदेश बालानिललोलितानाम् ।

འདོད་པའི་གྲོགས་པོར་གྱུར་བ་དབྱིད་ཀྱིས་ནི།
མངོན་པར་འདོད་པའི་སྤྱོད་ཚུལ་རབ་ཏུ་བསྟན།། 14

ཁྱོད་བྲལ་འདོད་ལྡན་མ་ཡི་མི་མཐུན་ཕྱོགས།
ལྷོ་ཕྱོགས་རླུང་ནི་ཡང་ཡང་རབ་ཏུ་ལྡང་།
འགྲོ་ལ་རྒྱལ་སྣང་ཉ་ཡི་རྒྱལ་མཚན་གྱིས།
རླུང་གི་མཆོན་ནི་འཕྲལ་ལ་རབ་སྦྱར་བཞིན།། 15

ཁང་དྲུག་དཀྱིལ་འཁོར་དག་གིས་མ་སྨྲས་པ།
སྨུག་པོས་རྒྱས་པས་ལྷི་བ་ཉིད་གྱུར་པའི།
ཙུ་ཏའི་ཤིང་གིས་མི་ཕྱེད་ཕྱག་རྒྱ་བཅིངས།
ལང་ཚོ་ཅན་ལ་མངོན་འདོད་བསྐྱབ་པ་བྲུས།། 16

དབྱིད་ཀྱི་དཔལ་མོ་དག་གི་རྣ་བའི་རྒྱན།
རི་བོ་འི་ངོས་ལ་སྨྱ་ངན་མེད་པ་མཛེས།
གྲོང་ཁྱེར་མ་ཡི་ཁང་པས་ར་བ་བསྐུན་པས།
ཡལ་འདབ་གསར་པ་དག་ལ་ཆོན་འཐོས་བཞིན།། 17

མཛེས་མའི་ཁ་ཡི་ཚང་གི་དགའ་ལྡན་པ།
འདོད་པའི་ཐབས་ནི་སྐལ་ལྡན་གདག་ཉིད་ལ།
ཞེས་དེ་བ་ཀུ་ལ་ཤིང་མེ་ཏོག་གི།
རྩོལ་གྱིས་དགའ་ཞིང་འཛུམ་པའི་དཔལ་སྐྱེས་བཞིན།། 18

उच्छ्वासिनीना मभिलाषदीक्षां
जृम्भाजुषां कामसुहृद्वसन्तः ॥ १४ ॥

अदक्षिणः प्रोषितकामिनीनां
ववौ मुहु र्दक्षिणमातरिश्वा ।
जगज्जयायेव झषध्वजेन
वायव्यमस्त्रं सहसा प्रयुक्तम् ॥ १५ ॥

आह्वनैः षट्पदमण्डलानां
घनप्रह्वनै र्गुरुतां प्रयाताः ।
चूतद्रुमा श्वक्रु रभिन्नमुद्रा-
बन्धेन यूना मभिलाषदीक्षाम् ॥ १६ ॥

वसन्तलक्ष्मीश्रवणावतंसा-
श्चकाशिरे शैलतटेष्वशोकाः ।
पादप्रहारैरिव नागरीणां
संक्रान्तरागा नवपल्लवेषु ॥ १७ ॥

धन्यस्य कान्तावदनासवेन
ममैव रम्यः स्मरदोहदोऽयम् ।
इतीव जाता वकुलद्रुमस्य
हर्षस्मितश्रीः कुसुमच्छलेन ॥ १८ ॥

ཁྲིངས་ལྷན་མ་རྣམས་ཁྲིངས་པ་རབ་བདང་ཞིང་།
མི་སྨྲ་སྤྲངས་ནས་ཀྲང་པ་རབ་བརྟུད་དེ།
མཛོའ་པོ་དགུ་ལ་དང་བར་བྱེད་མཐོང་ནས།
སིནྡུ་བཱ་ར་མེ་ཏོག་གིས་ཀྲོད་བཞིན། 19

གེ་སར་རྒྱས་པའི་ཁྲུར་བསྟེན་པ་ལ་ཤའི།
འཕྲེང་བ་མཛེས་པ་དབྱིད་ཀྱི་སེང་གེ་ཡིས།
ཁྲིངས་ལྷན་མ་ཡི་ཁྲིངས་པ་གླང་པོ་ལ།
བསྟུན་པའི་ཁྲག་བགོས་སྤེར་མོ་འི་འཕྲེང་བ་བཞིན། 20

ཉ་བར་སྐྱན་སྐྲོགས་ཁྲ་བྱུག་བྱུ་མོ་ཡིས།
རིག་ལས་ཤི་རི་ཀྵ་མིག་ཀ་རྟི་ཀར།
སྣ་ལ་གེ་སར་རྡུལ་ཚོགས་རྒྱས་པ་ཡིས།
མེ་ཏོག་འབྱུང་གནས་དཔལ་གྱི་དགའ་ཚར་ཕབ། 21

བྱང་བའི་ན་ཚུང་རྣམ་འཕྲུལ་ལོངས་སྤྱོད་ལྷན།
སྤྲང་རྩིས་རྒྱོས་ཤིང་རྣམ་པར་འཁྲུམ་དུས་རེར།
མེ་ཏོག་རབ་རྒྱས་འཁྲི་ཤིང་ཚལ་གྱི་གཞིར།
རིག་འཛིན་རྒྱལ་པོ་འི་སྤྲས་ནི་རྣམ་པར་རྒྱུ། 22

དེས་དེར་གསེར་ལས་བསྒྲུབས་པའི་ཁང་པར་ནི།
གྲུབ་པས་རབ་ཏུ་གནས་བྱུས་རིན་ཆེན་གཟུགས།

मानं समुत्सृज्य विहाय मौनं
पादप्रणामेन मनस्विनीभिः ।
प्रसाद्यमानं दयितं विलोक्य
जहास पुष्पैरिव सिन्धुवारः ॥ १९ ॥

वसन्तसिंहस्य पलाशपाली
बभौ स्फुरत्केशरभारभाजः ।
मनस्विनीमानगजावघात-
रक्ता च सिक्ता नखरावलीव ॥ २० ॥

कर्णे क्वणत्कोकिलकामिनीभिः
स्पर्शे शिरीषै र्दृशि कर्णिकारैः ।
घ्राणे सरत्केशररेणुपूरै-
र्ववर्ष हर्षं कुसुमोत्करश्रीः ॥ २१ ॥

तस्मिन् मधुक्षीबविघूर्णमान-
भृङ्गाङ्गनाविभ्रमभोगकाले ।
उत्फुल्लवल्लीषु वनस्थलीषु
चचार विद्याधरराजसूनुः ॥ २२ ॥

स तत्र हेमप्रतिबद्धधाम्नि
सिद्धप्रतिष्ठापितरत्नमूर्त्तिम् ।

གཱི་རི་མཆོད་ནས་རྒྱུད་མང་གླུ་ལེན་པའི།
ཀླྀ་བ་གསར་པ་ལྷ་བུའི་བུ་མོ་མཐོང་ ॥ 23

ཡིད་སྨུབས་འཚོ་སྐྱོད་གཱི་རི་མཉེས་པ་ཡི།
སྒྲུབ་བྱེད་ལ་ནི་རབ་ཏུ་གནས་བྱས་པ།
འདོད་པའི་ཆུང་མ་གཞན་བཞིན་དེ་མཐོང་ནས།
སྲིན་གྱི་བཞོན་པ་ཡ་མཚན་རྒྱ་ཆེར་གྱུར ॥ 24

དེ་ནས་རི་དགས་མིག་ཡངས་ངོ་ཚ་ཡིས།
དུད་པས་གླུ་མཐར་རྒྱུད་མང་ཕང་པ་ནས།
དལ་གྱིས་ཕབ་པས་རིག་འཛིན་རྒྱལ་པོ་འི་བུ།
མངའ་བཞག་འདོད་པ་དག་དང་མཚུངས་པ་མཐོང་ ॥ 25

མིག་ཟེར་མཛེས་པའི་རྒྱན་ལྡན་མངོན་འདོད་དེས།
ཕན་ཚུན་ལྷ་བར་བྱེད་པའི་རྣམ་འཕྲུལ་གྱིས།
ཡིད་ནི་ཉེ་བར་མཚམས་སྦྱོར་པོ་ཉ་བཞིན།
དེ་དག་བར་དུ་འགྲོ་དང་འོང་བ་བྱས ॥ 26

གསར་མཐོང་ལ་ཡང་ཕྱོགས་སུ་ལྷུང་བཅས་པ།
འདོད་པ་པད་མཚོ་འི་ངང་པའི་རྒྱལ་མོ་དེས།
སྐྱེ་བ་གཞན་དུ་གོམས་པའི་རོ་ལས་བཞིན།
དེ་ཡི་ཡིད་མཚོ་ཆེ་ཞིང་དངས་པར་ཞུགས ॥ 27

अभ्यर्च्य गौरी मुपवीणयन्तीं
ददर्श कन्यां कलिका मिवेन्दोः ॥ २३ ॥

गौर्याः समाराधनसंविधान-
बद्धस्थितिं मन्मथजीवनाय ।
विलोक्य तां कामबधू मिवान्यां
जीमूतवाहः पृथुविस्मयोऽभूत् ॥ २४ ॥

शनै रथाङ्कादवतार्य्य वीणां
गीतावसाने हरिणायताक्षी ।
लज्जानता व्यक्तशरस्मराभं
ददर्श विद्याधरराजपुत्त्रम् ॥ २५ ॥

परस्परालोकनविभ्रमेण
नेत्रांशुशोभाभरणोऽभिलाषः ।
गतागतानीव तयोश्चकार
मध्येमनः सन्धिनिबद्धदूतः ॥ २६ ॥

सा कामपद्माकरराजहंसी
सपक्षपाता नवदर्शनेऽपि ।
जन्मान्तराभ्यासरसादिवास्य
स्वस्थं महन्मानस माविवेश ॥ २७ ॥

རིན་ཅན་ལྷ་བས་དྲི་མེད་རི་བོང་དང་།
བུ་མོ་འི་ཚོགས་ཀྱིས་འབེན་ལ་དྲན་པའི་མདའ།
རབ་རྒྱས་པདྨོ་དག་དུ་བྱུང་བ་བཞིན།
ཆགས་ལྡན་དེ་ཡི་སེམས་ལའང་དེ་ཕྱུགས་གྱུར། 28

གྲོགས་མོ་བུ་མོའི་གཉིས་པ་དང་བཅས་དེར།
འདོད་པ་གསར་སྐྱེས་ངོ་ཚས་སྐྱུན་བྱེད་ཅིང་།
བརྟན་ཡང་རྨད་བྱུང་གཟུགས་ཀྱིས་དྲངས་གྱུར་པ།
རིག་འཛིན་ལྷ་བས་དབེན་པར་མངོན་ཕྱོགས་སླས། 29

སྨིན་ལེགས་ཅི་སྙད་སྨོན་དུ་འོང་བ་ལ།
ཞབས་སླུས་བཀུར་བའི་ཆ་ཉི་ཁྲོད་མི་བྱེད།
དམ་པའི་ཀུན་སྤྱོད་ཡོན་དན་གྱིས་མཛེས་གཟུགས།
ལེགས་ལྡན་རིགས་ཀྱི་རྗེས་མཐུན་རྣམ་པར་འཛིན། 30

ཁ་ན་མ་ཐོ་མེད་ལུས་ཁྲོད་ལུས་མཆོག
དྲན་པའི་རྒྱན་ནི་གསར་བ་ལྷ་བ་ལྟར།
མཛེས་པ་སྒྲ་དྲིག་ནོར་བུ་ཉིད་འདི་ནི།
རབ་དུ་མཐོ་བའི་རིགས་སྨིན་གང་ལས་ཐོབ། 31

ཡང་ན་མཛེས་མ་ཁྲོད་ནི་མཐོང་གྱུར་པ།
བདུད་རྩིས་བཀླན་པས་ངེད་ལ་རིམ་གྲོ་བྱས།

शशाङ्करत्नं विमलं शशीव
कन्याकुलं लक्ष्यमिव स्मरेषुः ।
तस्याः सरागं स विवेश चित्त-
मिन्दिन्दिरः फुल्ल मिवारविन्दम् ॥ २८ ॥

अभ्येत्य तां बालसखीद्वितीयां
लज्जानिमज्जन्नवकामजृम्भाम् ।
विद्याधरेन्दु र्विजने जगाद
धीरोऽपि रूपाद्भुतकृष्यमाणः ॥ २९ ॥

सम्भाषणेन क्रियते न कस्मात्
सुभ्रु त्वयाभ्यागतसंविभागः ।
बिभर्त्ति भव्याभिजनानुरूपं
रूपं सदाचारगुणेन शोभाम् ॥ ३० ॥

इदं नवालङ्करणं स्मरस्य
तवानवद्याङ्गि शशाङ्ककान्तम् ।
दिव्यं वपुः कस्य समुन्नतस्य
वंशस्य मुक्तामणिता मवाप्तम् ॥ ३१ ॥

तवाथवा सुन्दरि दर्शनेन
वयं सुधार्द्रेण कृतोपचाराः ।

མཛེས་སྡུག་དགག་སྤྱིར་རི་བོང་གིས་མཚན་པའི།
རི་མོ་སྤུ་ལ་ཕེབས་པར་སྨྲ་བར་བྱེད།། 32

འོན་ཀྱང་དགའ་བས་ངད་ཀྱི་དགེ་མཚན་ཙམ།
གསལ་བའི་སྣད་དུ་ཁྱེད་ཀྱིས་འདིར་སྨྲོས་ཤིག།
དག་པའི་ཕྱོགས་ལྡང་མངོན་ཕྱོགས་བྱེད་པ་ཡི།
སྤུ་ཡི་རིགས་ནི་ཁྱེད་ཀྱིས་བརྒྱན་པར་བྱས།། 33

ཞེས་པ་རིག་འཛིན་ཅོད་པན་དག་གི་ཚིག།
འདོད་དགོངས་སྙིང་པོ་ཅན་དེ་ཐོས་གྱུར་ནས།
ངོ་ཚས་དེ་ནི་མི་སྨྲ་ལྷན་གྱུར་ཀྱང་།
དེ་ཚེ་གྲོགས་མོ་མ་དུ་ལི་ཀས་སྨྲས།། 34

གཞོན་ནུ་རིག་འཛིན་རྒྱལ་རིགས་བདུད་རྩི་ཡི།
ཆུ་གཏེར་གྱི་ནི་ཟླ་བ་ཁྱོད་འདིར་གྲགས།
ངད་ཀྱི་གྲོང་ན་གྲུབ་པའི་རྩེ་དགའ་མས།
ལུས་མེད་ལུས་ལྡན་ཁྱོད་ནི་སྨྲ་ཡིན་བྱེད།། 35

དཔག་བསམ་ཤིང་སྐྱིན་རྩེ་དགས་རབ་གྲགས་པ།
ཁྱོད་ཀྱི་གྲགས་པ་ཡོན་ཏན་མཐུ་ཡིས་བརྒྱན།
ཟླ་ལྟར་དཀར་བ་འདི་ཡི་རྣ་རྒྱན་དུ།
མིང་པ་ནོར་གྱི་བ་ཞེས་གཉེན་དག་གིས་བྱས།། 36

करोति लावण्यवितीर्णहर्षा
सम्भाषणं कस्य शशाङ्कलेखा ॥ ३२ ॥

इदन्तु नः कौतुकमात्रमेव
प्रीत्यापनेतुं भवती ब्रवीतु ।
सत्पक्षपाताभिमुखेन धात्रा
कस्यान्वयस्याभरणीकृतासि ॥ ३३ ॥

ध्यात्वेति विद्याधरशेखरस्य
वच स्तदौत्सुक्यविभागगर्भम् ।
ह्रियाभवन् मौनवती यदासौ
तदा सखी मालतिका जगाद ॥ ३४ ॥

कुमार विद्याधरराजवंश-
सुधाब्धिचन्द्र स्त्वमिव प्रसिद्धः ।
अस्मत्पुरे सिद्धविलासिनीभि-
र्यन्नीयसे विग्रहवाननङ्गः ॥ ३५ ॥

प्रख्यातकल्पद्रुमदानशीलं
गुणप्रभावाभरणं यश स्ते ।
अस्याश्च मित्रावसुनानुजेन
कर्णावतंसीकृत मिन्दुशुभ्रम् ॥ ३६ ॥

སེམས་དཔའ་ཆེན་པོ་དེ་ཁྱོད་གྲོགས་མོས་གདམས།
དར་མའི་ཉེར་སྤྱོད་བྱ་བས་ཟི་ལྷར་འོས།
ཁྱད་པར་ཆེ་རྣམས་མདུན་དུ་བུ་མོ་ནི།
ངོ་ཚས་རྣམ་པར་ཐུལ་བའི་རང་བཞིན་འགྱུར། ། 37

བུ་མོ་འདི་ནི་གཟུབ་རིགས་རྒྱ་གཏེར་གྱི།
ཟླ་བ་གཟུབ་བདག་སྣ་ཚོགས་ནོར་གྱི་སྤྱི།
གང་གི་མཛེས་པ་སྐྱིད་ཚལ་དུ་རྩེ་ཚོ།
ལྷག་པ་ཉིད་དུ་ཀུན་སྨད་རྒྱས་པར་བྱེད། ། 38

མ་ལ་ཡར་སྐྱེས་འཁྲི་ཤིང་གསར་བཞིན་ཕྲ།
དང་པོར་འཁྲུངས་གྱུ་ཡལ་འདབ་ལྷར་དམར་མཆུ།
བདུད་རྩིའི་རང་བཞིན་མ་ལ་ཡ་ཅན་འདི།
ལྷག་ཏུ་ལྷ་དང་ལྷ་མིན་མངོན་འདོད་པ། ། 39

ཞེས་རིས་སྨྲས་པར་གྱུར་པ་ན། ཉུག་རུམ་ཀུན་པོ་མངོན་ཕྱོགས་དེ།
སྒྱུར་བར་འོང་བའི་ཤུགས་བཅས་པས། གཟུབ་བདག་བུ་མོ་ལ་སྨྲས་པ། ། 40

དགེ་མ་ནོར་གྱི་བ་ཤེས་གཉེན་དང་། ལྷན་ཅིག་པོ་བྲང་འཁོར་ན་འཁོད།
ཁྱོད་ཀྱི་བག་མའི་གདམ་ལ་ཆགས། ཡབ་ནི་ཁྱོད་ལ་ལྷ་བར་འཚལ། ། 41

स त्वं महासत्त्व कथं कथार्हैः
प्रौढोपचारक्रिययैव सख्याः ।
भवन्ति लज्जाविजितस्वभावाः
विशेषतोऽग्रे महतां हि कन्यकाः ॥ ३७ ॥

सिद्धान्वयाम्भोधि धाधिकस्य
विश्वावसोः सिद्धपतेः सुतेयम् ।
उद्यानकेलीषु करोति यस्याः
सर्व्वैव कान्तिः कुसुमावबोधम् ॥ ३८ ॥

नवमलयजवल्लरीव तन्वी
प्रथमसमुद्गतपल्लवारुणोष्ठी ।
इय ममृतमयी सुरासुराणां
मलयवती सतताभिलाषभूमिः ॥ ३९ ॥

इति तस्यां ब्रुवाणायां स्थविरोऽभ्येत्य कञ्चुकी ।
त्वरागमनसोच्छ्वासः प्राह सिद्धाधिपात्मजाम् ॥ ४० ॥

कल्याणमित्रावसुना सहितोऽन्तःपुरस्थितः ।
त्वद्विवाहकथासक्तः पिता त्वां द्रष्टु मिच्छति ॥ ४१ ॥

ཞེས་པ་དེ་ཡིས་བརྗོད་པའི་འཕྲུལ། གྲོགས་མོ་དང་བཅས་མིག་བཟང་མ།
ཡིད་ནི་སྨྲིན་གྱི་བཞིན་པ་ལ། རྣམ་པར་བཀོད་ནས་དལ་གྱིས་སོང་།། 42

གྲོགས་མོ་ཕྱི་ན་འཁོར་དེ་ལ། གཏམ་ཀྱི་ཟློལ་གྱིས་ཡང་དང་ཡང་།
མཛེས་པ་རྣམ་པར་ལྷ་བྱེད་ཅིང་། ལེ་ལོའི་གོམས་པས་འགྲོ་བའི་ཚེ།། 43

མངོན་འདོད་གསར་པ་ལ་བརྟེན་ཅིང་། ཕྲག་དོག་གིས་བཞིན་བརྟན་པ་བཏང་།
ལམ་དེར་མིག་ནི་གཏད་པ་ཡི། གཞོན་ནུ་ཡིས་ནི་རབ་བསམས་པ།། 44

ཀུ་མ་རི་དགས་ཕྲུག་གུའི་མིག། ཕ་ཡི་དྲུང་དུ་འགྲོ་བྱེད་མ།
དེ་ཡིས་འཇིགས་བཞིན་ཆགས་བཅས་ཀྱི། ཡིད་ནི་བདག་ལ་གཏམས་པར་བྱས།། 45

དབུགས་ཀྱི་ངལ་དུབ་འབབ་པས་འགོག་ལ་ཆགས་ཤིང་སྐྲ་མེད་
དག་དུ་རྣམ་པར་གནས།
མཐོང་བའི་འཇིགས་ལས་ཤིན་དུ་དོགས་པས་འཁྲུགས་ཤིང་
དབེན་པ་རུ་ཡང་རབ་འདར་བཅས།
ཡིད་སྲུབ་དག་གི་མདའ་ཡིས་རབ་དུ་བསྣུན་ཚེ་སྙིངས་པ་ཡི་
ནི་ཆགས་ཤིང་གནས།
ལུས་ཕྲ་ཆོས་ཀུན་མ་དེ་བདག་ཡིད་ལ་ཞུགས་ལས་གང་ནས་ནི་ཡོངས་མི་ཤེས།། 46

ཞེས་པ་ཡུན་རིང་བསམས་ནས་རྗེ་ལ་འཁོད།
ཡིད་སྲུབ་བཀའ་ཡི་ཡུལ་དུ་གྱུར་པ་དེས།
ཀུན་རྟོག་པིར་གྱིས་མདུན་དུ་རི་དགས་མིག་ནི།
ཡང་ཡང་མངོན་བྲིས་མིག་ནི་གཡོ་མེད་གྱུར།། 47

इत्युक्त्वा सहसा तेन सह सख्या सुलोचना ।
जीमूतवाहनन्यस्तमानसा सा शनैर्ययौ ॥ ४२ ॥

तस्यां पश्चात्स्थितसखीकथाव्याजैः पुनः पुनः ।
कान्तं निरीक्षमाणायां व्रजन्त्या मलसैः पदैः ॥ ४३ ॥

तत्पथे दत्तनयनः कुमारः समचिन्तयत् ।
नवोत्कण्ठाश्रयो धृत्या त्यज्यमान इवेर्ष्यया ॥ ४४ ॥

अहो नु मृगशावाक्ष्या व्रजन्त्या पितुरन्तिकम् ।
सरागं तद्वयेनेव मयि न्यासीकृतं मनः ॥ ४५ ॥

श्वासायासनिरोधयत्ननिरता निःशब्दसंवादिनी
सोत्कम्पा विजनेऽपि दर्शनभयादत्यन्तशङ्काकुला ।
तन्वी मन्मथमार्गणाभिपतने वैलक्ष्यलीनस्थितिः
नो जाने कतमेन सा मम पथा चौरी प्रविष्टा मनः ॥ ४६ ॥

चिरं विचिन्त्येति शिलातलस्थः
स मन्मथाज्ञाविषयं प्रयातः ।
संकल्पवर्त्त्या पुरतोऽभिलिख्य
मुहुर्मृगाक्षीं स्तिमितेक्षणोऽभूत् ॥ ४७ ॥

དེ་ནས་མི་དོག་རྡུལ་དང་རྡུལ་གྱིས་གང་།
ནགས་ཚལ་དབེན་པར་རྐང་པའི་མཚོ་སྐྱེས་རྒྱུ།
འཁོར་ལོ་རྒྱལ་མཚན་གྱིས་མཚན་རྗེས་འབྲངས་ནས།
དེ་ཡི་རྒྱང་དུ་ཅིད་གྲོགས་གཉེན་བཟང་འོངས། 48

མཐོན་འདོད་གསར་པའི་ཁྲུད་པར་བསམས་པ་ཡིས།
སེམས་ནི་རབ་ཏུ་བཀག་དེ་རེས་མཐོང་ནས།
དྲན་པའི་བཀའ་ཡིས་བརྟན་པ་བཙོངས་པ་ལ།
ངོ་མཚར་བཅས་པའི་རྣམ་འགྱུར་རྒྱུ་དག་ཐྲིས། 49

གྲོགས་པོ་བརྟན་པའི་གཏེར་གྱུར་ཁྲིད་ལ་ཡང་།
ཤིན་དུ་གདུང་བའི་གནས་ནི་ཉེར་བསྟན་ཅིང་།
བསམ་པ་ལ་བདེན་མིག་ནི་ཡོད་མེད་པ།
བརྟན་མེད་རྣམ་པ་ཅི་ཞིག་ཉམས་སུ་སྨོང་། 50

ཞེས་པ་ཡིད་གཙུགས་གནས་ནི་གྲོགས་པོ་དག།
རབ་དུ་འབད་ཅིང་ཤུགས་པས་ཐྲིས་པ་ནི།
ཤུགས་རིངས་མཐུན་ཕྱོགས་རླུང་གིས་རྗེས་དཔག་བྱ།
དྲན་པའི་མདའ་ལྷུང་གཞོན་ནུས་དེ་ལ་སྨྲས། 51

གྲོགས་པོ་སྔོན་སྦྲོས་སྨྲེ་ལ་སྐྱོ་ལྷར་པའི།
ཕྲེད་པོ་ཡིས་ནི་གཟུགས་གསར་རི་མོ་དག།

अथाययौ पुष्पपरागरेणु-
पूर्णे वने पादसरोजमुद्राः ।
चक्रध्वजाङ्का विजनेऽनुसृत्य
तस्यान्तिकं नर्म्मसुहृत् सुबन्धुः ॥ ४८ ॥

स तं विलोक्याभिनवाभिलाष-
विशेषचिन्ताप्रतिबद्धचित्तम् ।
विक्रीतधैर्य्यं स्मरशासनेन
पप्रच्छ साश्चर्य्यविकारहेतुम् ॥ ४९ ॥

कोऽयं सखे धैर्य्यनिधे स्तवापि
नितान्तसन्तापपदोपदेष्टा ।
चिन्ताश्रयान्निश्चललोचनस्य
विभाव्यते कोऽप्यधृतिप्रकारः ॥ ५० ॥

इति प्रयत्नप्रणयेन पृष्टो
विश्रम्भधाम्ना सुहृदा कुमारः ।
त मब्रवीन्निश्वसितानुमेय-
सपक्षपातस्मरबाणपातः ॥ ५१ ॥

सखे सखेदस्य पुराणसर्गे
वर्गे विधे र्नूतनरूपरेखा ।

གྲུབ་རིགས་རྒྱ་མཚོའི་ཟླ་བའི་རི་མོ་བཞིན།
མཛེས་པའི་རང་བཞིན་བུ་མོ་བདག་གིས་མཐོང་ ॥ 52

དེ་ཡི་བཞིན་གྱི་པདྨོ་མཛེས་སྡུག་རྒྱས་པས་གཟི་བྱིན་ཉམས་པའི་ཟླ་བ་དང་།
དེ་ཡི་མིག་དག་མཛེས་པས་མིག་གི་དཔལ་ནི་རབ་ཏུ་ཉམས་པའི་རི་དགས་དག།
གྲགས་པ་ཞི་ཞིང་སྡུག་བསྔལ་མཚུངས་པས་མཚན་མོ་སོ་སོར་སྐྱེངས་ཏེ་
ཞུམ་པ་ཡི།
བདག་ཉིད་དག་ནི་བསམ་པ་གཡོ་མེད་འགྲོགས་པ་འདི་ཉིད་མཐོང་བར་བདག
རྟོག་གོ ॥ 53

མཐོང་བའི་རྣམ་འཕྲུལ་གསར་པ་ཡིན་མོད་ཀྱང་།
མིག་གི་མཛེས་པ་ན་བའི་རྒྱུན་བྱས་རེས།
མངོན་འདོད་གསར་པ་ཉམས་སུ་མྱོང་བྱེད་པའི།
རང་གི་ངོ་བོ་བདག་ལ་གསལ་བར་བྱས ॥ 54

དེར་ནི་གློ་བུར་འདར་ཞིང་གཡོ་ལྡན་སྐྲ་དག་སྐྲོགས་པར་བྱེད་པའི་འོག་དཔག་ལ།
འཇིགས་པས་རབ་ཏུ་ཞི་བར་བྱེད་བཞིན་ཡང་ཡང་གོས་དག་བྱིན་ནས་ཕྲུག
པར་བྱས།
ངོ་ཚས་མི་སྨྲ་དང་ལྡན་བཞིན་དུ་དེ་ཡི་ན་བའི་ཨུཏྤ་ལ་ལྷུང་བ་ལ།
འཁོར་ཞིང་རྒྱུ་བའི་བུང་བ་རྣམས་ཀྱིས་སྨྲ་ཡིས་བདག་ལ་ལེགས་པར་འོངས་
སམ་བྱས ॥ 55
རཞིན་ལ་ཟླ་བ་བརྒྱ་ཕྲག་དང་ནི་མིག་གཉིས་དག་ལ་ཨུཏྤ་ལ་སྔོན་པོའི་ནགས།
ལག་པ་དག་ལ་པད་མ་གཞོན་ནུ་ཀ་ཀང་པར་པདྨའི་འབྱུང་གནས་རབ་རྒྱས་པ།
ལུས་མཆོག་སྐྱིལ་ལ་ཕྲ་རབ་རྟུལ་དག་གལ་ཏེ་འདོད་པས་རབ་ཏུ་བཀོད་པ་ན།
མེ་ཡི་རང་བཞིན་བཞིན་དུ་དེ་ཡིས་བདག་ཡིད་མཛའ་བས་ཐུག་པ་ཅི་སླད་སྲེག ॥ 56

दृष्टा मया कान्तिमयीव कन्या
सिद्धान्वयाम्भोधिसुधांशुलेखा ॥ ५२ ॥

इन्दो स्तद्वदनारविन्दविलसल्लावण्यलुप्तद्युतेः
सारङ्गस्य च तद्विलोचनरुचिप्रत्यस्तनेत्रश्रियः ।
मन्येऽहं समदुःखयोः प्रतिनिशं वैलक्ष्यलीनात्मनोः
चिन्तानिश्चल एष शान्तयशसोः संदृश्यते सङ्गमः ॥ ५३ ॥

कर्णावतंसीकृतनेत्रकान्तिः
नवेऽपि सन्दर्शनविभ्रमे सा ।
विभाव्यमानाभिनवाभिलाषं
मयि स्वभावं प्रकटीचकार ॥ ५४ ॥

तस्मिन् कम्पतरङ्गिणि व्यतिकरं व्याहारिणीं मेखलाम्
मूकीकृत्य सुसान्त्वितामिव भयाद्वस्त्रप्रदानै र्मुहुः ।
लज्जामौनवती विनम्रवदना सा स्रस्तकर्णोत्पला-
दुच्चच्चञ्चुरचञ्चरीकविरुतै श्चक्रे मम स्वागतम् ॥ ५५ ॥

वक्त्रे चन्द्रशतानि लोचनयुगे नीलोत्पलानां वनम्
बाह्वो र्बालमृणालिका श्चरणयो रुत्फुल्लपद्माकराः ।
निर्माणे परमाणुतां वरतनोः कामेन चेत् प्रापिताः
तत्किं वह्निमयीव सा दहति मे स्नेहानुविद्धं मनः ॥ ५६ ॥

འདོད་པའི་ཀུ་མུད་ཚལ་གྱིས་ཟླ་བའི་རི་མོ་སྲུ་ཞིག་དེ།
མིག་གི་པདྨོ་རྣམ་པར་རྒྱས་པའི་རྒྱུར་ནི་བདག་གིས་མཐོང་།
གང་གིས་མཛེས་པའི་རྣམ་འཕྲུལ་བདུད་རྩིའི་ཆུ་བོ་འཕྲངས་པ་ཡིས།
ཚ་བའི་དུག་དུ་གསལ་བྱེད་མྱོངས་པ་དྲག་ཏུ་གྲུས་པར་འགྱུར།། 57

མ་ལ་ཡ་ཙན་ཞེས་པའི་བུ་མོ་རི་དགས་མིག་ཅན་དེ།
རྩེ་དགའི་བླ་མ་མེ་ཏོག་མཆོན་གྱི་རོལ་རྩེད་སྐྱེད་བྱེད་མ།
དྲི་མེད་གྲུབ་རིགས་བདུད་རྩིའི་ཆུ་གཏེར་དག་གི་རྒྱུ་སྐར་བདག།
ལྷ་ཚོགས་ནོར་བདག་གིས་ནི་བུ་མོ་ཡིན་ཞེས་བདག་གིས་ཐོས།། 58

ཞེས་པ་རིག་འཛིན་རྒྱལ་པོ་དག་གི་བུ།
ཡིད་སྤྲུང་གསར་པ་རྒྱས་པའི་ཚིག་ཐོས་ནས།
དྲི་ཟའི་གཞོན་ནུ་ཡིད་གཙུགས་དག་གི་ས།
གུས་ལྡན་གཉེན་བཟང་གིས་ནི་དེ་ལ་སྨྲས།། 59

གྲོགས་པོ་དགའ་བས་ཁྱོད་ཀྱི་མངོན་འདོད་འདི།
ཡོན་ཏན་མཐུ་དག་མཚུངས་པའི་གནས་ལ་སྨྲོས།
ལེགས་བྱས་ལྡན་པ་རྣམས་ཀྱི་རེ་བ་ནི།
ངེས་པར་དམ་པའི་ལམ་དུ་འགྲོ་བར་འགྱུར།། 60

ལྷ་ཡི་བུ་མོ་བལྟས་པས་མི་གཡོ་བ།
ཁྱོད་ཀྱི་བརྟན་པ་གང་གིས་གཡོ་བཞིན་བྱེད།

सा कापि कामकुमुदाकरचन्द्रलेखा
दृष्टा मया नयनपद्मविकाशहेतुः ।
यत्कान्तिविभ्रमसुधातटिनी निपीता
मूर्च्छां विषोष्मपिशुना मनिशं तनोति ॥ ५७ ॥

विश्वावसो विमलसिद्धकुलाख्यवार्द्धि-
ताराधवस्य तनयेति मया श्रुता सा ।
बाला विलासजननी कुसुमायुधस्य
लीलागुरो र्मलयवत्यभिधा मृगाक्षी ॥ ५८ ॥

श्रुत्वेति विद्याधरराजसूनो-
र्वाक्यं नवोद्भूतमनोभवस्य ।
उवाच गन्धर्व्वकुमारक स्तं
विस्रम्भभूमिः प्रणयी सुबन्धुः ॥ ५९ ॥

दिष्ट्या सखे तुल्यगुणानुभावात्
स्थाने तवायं प्रसृतोऽभिलाषः ।
भवत्यवश्यं सुकृतोचितानां
मनोरथः सत्पथपान्थ एव ॥ ६० ॥

धन्येव लोकत्रयलक्ष्यभूता
सा वैजयन्ती रतिवल्लभस्य ।

དགའ་མའི་བདག་པོ་དག་གི་རྩ་མཚོན་དེ།
སྐལ་ལྡན་འཇིག་རྟེན་གསུམ་གྱི་མཚོན་བུ་ཉིད།། 61

འགྲོ་ལ་ཉ་ཡི་མཚན་མོ་རྒྱལ་བ་དང་ལྡན་གཅིག་པུ་མཆོག་དུ་མཛེས།
སྤོ་བསངས་སྤྲི་ལ་མཆོག་གི་འཁོར་བ་འཛིན་པ་དེ་ཉིད་སྐལ་བ་བཟང་།
གང་དང་བྲལ་བས་མཚན་མོ་སོ་སོར་བདུད་རྩིའི་ཟེར་ནི་གཟི་བརྗིད་ཉམས།
དལ་གྱིས་སེན་མོ་འི་ཁ་རིས་གསར་པ་སྦྲ་བ་ཉིད་འཛིན་ལུས་དང་ལྡན།། 62

བརྟན་པ་སྟེན་ཅིག་ཁྱོད་ཀྱི་འདོད་པ་གང་།
དེ་ནི་འབད་མེད་ལག་པའི་རྩེ་ན་གནས།
གྲུབ་བདག་སྣ་ཚོགས་ནོར་ལས་བུ་མོ་དེ།
ཁྱོད་ཀྱི་ཡབ་ཀྱིས་ཁྱོད་ཀྱི་དོན་དུ་བསླངས།། 63

འདོད་ལྡན་ཟླ་བས་མཚན་མོ་ལ་བཞིན་གང་གི་བུ་མ་ལ།
འགྲོ་གསུམ་དགའ་བས་ཡང་དག་སྦྱོར་བ་བདག་ནི་སྐལ་བ་བཟང་།
ཞེས་པ་བརྗོད་ནས་གྲུབ་པའི་བདག་པོ་གུས་དང་དགའ་བས་གང་།
བུ་མོ་ཡིས་ནི་བག་མའི་དགའ་སྟོན་དེ་ཉིད་སྐྱོང་བར་གྱུར།། 64

གྲོགས་པོ་ནང་པར་ཁྱོད་ཀྱི་རྩེ་དགའི་དགའ་སྟོན་ཡངས་པ་དག།
མཛེས་མ་དང་འགྲོགས་བདུད་རྩིའི་འབྲས་བུ་ལྡན་པ་དེ་བྱུང་སྟེ།
གང་ལ་ཡོན་ཏན་མཚུངས་པ་འགྲོགས་པ་དག་ནི་མཐོང་བས་ན།
སྐྱེ་བོ་ཤིན་དུ་ཡུན་རིང་བྱེད་པོ་བསྔགས་པ་བྱེད་པར་འགྱུར།། 65

सुराङ्गनालोकननिश्चलस्य
यथा धृतिस्ते तरलाक्षतैव ॥ ६१ ॥

परं राजत्येका जगति जयिनी पूर्वरजनी
वरं श्यामावर्गं वहति विभवं सैव सुभगा ।
यया हीनः क्षीणद्युति रमृतरश्मिः प्रतिनिशं
शनै र्धत्ते तन्वीनतनखमुखोल्लेखतनुताम् ॥ ६२ ॥

भजस्व धैर्यं तव वाञ्छितं यत्
तदप्रयत्नोपनतं कराग्रे ।
विश्वावसोः सिद्धपते त्वदर्थे
कन्यार्थिता त्वज्जनकेन सा हि ॥ ६३ ॥

धन्योऽस्मि यस्य तनया त्रिजगत्प्रियेण
संयुज्यते द्युतिमता शशिना निशेव ।
उक्त्वेति सिद्धपति रादरहर्षपूर्णः
कन्याविवाहमहतत्परता मवाप्तः ॥ ६४ ॥

प्रातः सखे स भविता विमुखोत्सव स्ते
कान्तासमागमसुधासफलो विवाहः ।
यस्मिन् समानगुणसङ्गमदर्शनेन
धातुः करिष्यति जनः सुचिरात् प्रशंसाम् ॥ ६५ ॥

ཞེས་པ་གྲོགས་པོའི་ཚིག་དེ་ཐོས་གྱུར་ནས།
དགའ་བའི་རང་བཞིན་ཡངས་པ་འཕྲུལ་རྒྱས་དེ།
ཉིན་མོའི་ལྷག་མ་དུ་མའི་དུས་མཚུངས་པར།
བློ་ཡིས་རྟོག་ཅིང་རང་གི་གནས་སུ་སོང་། ༎ 66

དེ་ནས་ཐུན་མཚམས་བུ་མོ་དང་། འགྲོགས་པས་གྱུར་གྱུམ་འཕོས་པ་བཞིན།
ནམ་མཁའ་ཡི་ནི་སྐྱེད་ཚལ་དུ། ཉི་མ་ཆགས་རྟག་ལྷན་པར་གྱུར༎ 67

པདྨོ་ཅན་དགའ་ཉིན་མོའི་མཐར། ནུབ་རིའི་ངོས་ལ་འཁོར་པ་ན།
དེ་ཡི་མཇུག་ཏུ་ཐུན་མཚམས་ནི། ཀྱང་པ་བསྙེན་པ་ལ་ཆགས་མཛེས༎ 68

དེ་ནས་ནུབ་ཕྱོགས་རྒྱ་གཏེར་དུ། ཉིན་མོའི་དབང་ཕྱུག་རབ་ལྟུང་ཆེ།
དེ་ལས་འཕྲོར་བས་ཕྲིགས་པས་བཞིན། སྐར་མ་རྣམས་ཀྱིས་ནམ་མཁའ་གང་༎ 69

དལ་གྱིས་སྣུན་པ་ཆུང་ཟད་གནག། མཚན་མོས་སྤྱོད་པའི་སྐྱོད་དགུ་ལས།
ཐུན་མཚམས་དམར་བའི་ཆང་འཐུངས་ནས། མྱོས་པ་བཞིན་དུ་སྐད་ཅིག་འཁྱམས༎ 70

དེ་ནས་བདེ་སོགས་མཛེས་པ་ཡི། རྩེ་དགའ་གནས་པ་ཤར་གྱི་ཕྱོགས།
ཟླ་འཆར་སྣང་བ་ཉེ་བ་ནི། ཙན་དན་དག་གིས་མཚན་བཞིན་མཛེས༎ 71

དེ་ནས་བདུད་རྩི་སྐྱེད་པ་ནི། ལོངས་སྤྱོད་ཅན་གྱི་ལོངས་སྤྱོད་ཀྱི།
སྐལ་བཟང་རྩེ་དགའ་ཁྲིད་པར་ཅན། སྤོ་བསངས་གདོང་གི་ཁྲིད་ཅན་ཤར༎ 72

इति सुहृद्वचनं सहसोच्छल-
द्विपुलहर्षमयः स निशम्य तत् ।
निजपदं प्रययौ कलयन् धिया
दिवसशेष मनेकयुगोपमम् ॥ ६६ ॥

अथ सन्ध्यावधूसङ्गादिव संक्रान्तकुङ्कुमः ।
जगाम गगनोद्याने तिग्मांशु र्गाधरागताम् ॥ ६७ ॥

दिनान्ते पद्मिनीकान्ते विश्रान्ते ऽस्ततटान्तरे ।
पादसंवाहनासक्ता सन्ध्या तस्यान्तिके बभौ ॥ ६८ ॥

ततश्च पश्चिमाम्भोधिं प्रविष्टे वासरेश्वरे ।
ख मपूर्यत नक्षत्रै स्तदुत्थैरिव शीकरैः ॥ ६९ ॥

शनैः स्तोकतमश्यामा श्यामा भुवनभाजनात् ।
सन्ध्यारागासवं पीत्वा क्षीबेवाघूर्णत क्षणम् ॥ ७० ॥

ततः प्राची शचीकान्तविलासवसतिः ककुप् ।
आसन्नेन्दूदयालोकचन्दनेन विराजिता ॥ ७१ ॥

अथोद्ययौ सुधासूतिः श्यामामुखविशेषकः ।
भोगिनां भोगसौभाग्यलीलासुखविशेषकः ॥ ७२ ॥

ཟླ་བའི་རྩེ་དགའ་མངོན་ཕྱོགས་པའི། ཀུ་མུད་ལྡན་པ་མཐོང་གྱུར་ནས།
ཁྲོ་བས་ཁྱུམ་བཞིན་པདྨ་ཅན། གཟི་བརྗིད་ཉམས་ཞིང་ཟུམ་པར་གྱུར། 73

ཟླ་བའི་ཐིག་ལེ་གསར་པ་དང་། སྐར་མའི་ཚོགས་ཀྱི་དོ་ཤལ་ཅན།
སྤོ་བསངས་མ་དེ་ཐུབ་པ་ནི། རྡུལ་བའི་མི་མཐུན་ཕྱོགས་ཉིད་གྱུར། 74

དེ་ནས་མཚན་དེ་ཁང་བཟང་དུ། སྲིད་ལྡན་མ་ལ་ཡ་ཅན་མ།
གཉིད་མེད་སྨིན་གྱི་བཞོན་པ་ཡི། བསམ་གདན་ལྡན་པས་རབ་བསམས་པ། 75

བདག་ནི་བག་མར་ཉེ་བ་ཡི། བར་ན་གནས་པའི་མི་མཐུན་ཕྱོགས།
མཚན་མོ་འདི་ནི་ཐུན་བརྒྱ་དང་། ལྡན་པ་བཞིན་དུ་ཡོངས་མི་འཛད། 76

ཀྱེ་མ་ནམ་མཁའི་སྐྱིད་མོས་ཚལ། རྒྱ་སྐར་མི་རྟོག་འཛུམ་ལྡན་པ།
རི་བོང་ཅན་འགྲོགས་དགའ་བ་ཡི། མཚན་མོ་ཡིས་ནི་གཏོང་མི་བྱེད། 77

ཤིན་དུ་རིང་བའི་མཚན་མོ་འདི། བདག་གི་དགའ་བའི་གེགས་སུ་གྱུར།
རང་ཉིད་བདེ་བའི་རོར་ཆགས་པ། སུ་ཡིས་གཞན་གྱི་གདུང་བ་ཤེས། 78

ཞེས་པ་དེ་ཡི་བསམ་པ་ནི། གདུང་བྱེད་རྗེས་སུ་འབྲེལ་བ་ཡི།
དོར་བཞིན་དུ་ནི་མཚན་མོ་དེ། དལ་གྱིས་མཐོང་བ་མིན་པར་གྱུར། 79

དེ་ནས་སྐྱ་རེངས་གོས་དང་ལྡན། འབྲེལ་བས་ཟླ་བའི་མེ་ལོང་ཟགས།
དགའ་སྟོན་ཉེ་བ་ལ་ཆས་བཞིན། སྣང་བ་ལྡན་པ་ཐོ་རངས་མཛེས། 80

विलासहासाभिमुखीमिन्दो वीक्ष्य कुमुद्वतीम् ।
मन्युलीनेव नलिनी निमिमील गलद्युतिः ॥ ७३ ॥

प्रत्यग्रचन्द्रतिलका तारानिकरवाहिनी ।
कामं जगाम सा श्यामा मुनिसंयमवामताम् ॥ ७४ ॥

तस्यां निशायां सोत्कण्ठा हर्म्ये मलयवत्यथ ।
जीमूतवाहनध्याननिर्निद्रा समचिन्तयत् ॥ ७५ ॥

इयं मम समासन्नविवाहान्तरवर्त्तिनी ।
न परिक्षीयते वामा शतयामेव यामिनी ॥ ७६ ॥

अहो नु गगनोद्याने शशिसङ्गमनिर्वृता ।
तारकाकुसुमस्मेरं रजनी न विमुञ्चति ॥ ७७ ॥

आयामिनी यामिनीयं याता मे प्रियविघ्नताम् ।
स्वयं सुखरसासक्तः को जानाति परव्यथाम् ॥ ७८ ॥

इति चिन्तानुबन्धेन तस्याः सन्तापकारिणा ।
सानुरोधेव रजनी जगामादर्शनं शनैः ॥ ७९ ॥

अथारुणांशुकवती त्वरासक्तेन्दुदर्पणा ।
आसन्नोत्सवसज्जेव प्रभा प्राभातिकी बभौ ॥ ८० ॥

པདྨི་ཅན་གྱི་དགའ་བ་ཤར། མཚན་མོ་མུན་པ་ཞི་བ་ན།
འབྱུང་པོ་ཐམས་ཅད་བདེ་བའི་སྐད། མིག་གི་དགའ་སྟོན་དག་ཏུ་གྱུར། ॥ 81

དེ་ནས་པདྨ་ལྡན་པ་ཡིས། ཉིན་བྱེད་ཟེར་འཛིན་ལ་ཞུགས་ཚེ།
བྱང་བའི་ན་ཚུང་འགྲོགས་པ་ཡིས། བཀྲ་ཤིས་གླུ་དག་རབ་ཏུ་བསྐུན། ॥ 82

དེ་ནས་གྲུབ་པའི་བདག་པོ་ནི། ཕུན་ཚོགས་མང་བའི་ཁྱིམ་དག་དུ།
བུ་མོ་བག་མའི་དགའ་སྟོན་དག། རྫོམ་པའི་ཆས་ནི་རབ་ཏུ་བསྟན། ॥ 83

ཅི་སྟེ་གྲུབ་པའི་ན་ཚུང་གིས། ལྷ་ཡི་གོས་དང་རྒྱན་རྣམས་ཀྱིས།
བུ་མོ་བརྒྱན་པ་མཐོང་གྱུར་ནས། ལྷ་མོ་རྣམས་ཀྱིས་ཕན་ཚུན་སྨྲས། ॥ 84

འདི་ནི་ནུ་མ་རབ་མཛེས་པ། དོ་ཤལ་ཁྲར་གྱི་རབ་ཏུ་བསྒྲིབས།
མཛེས་སྡུག་སྒྲིབ་པར་བྱེད་པ་ཡི། ཤིན་ཏུ་མང་བའི་རྒྱན་གྱིས་ཅི། ॥ 85

གྲོགས་མོ་ལུས་ཕྲ་ནུ་མའི་ངོས་ལ་རིན་ཅན་འཕྲེང་བའི་ཁུར་གྱིས་ཅི་ཞིག་བྱེད།
ཁྱོད་ནི་བཀྲ་བར་རྒྱན་ལ་མཁས་དེ་མིག་བཟང་དག་ལ་མིག་སྨན་འདེངས་ཀྱང་ཅི།
བཞིན་རས་ཟླ་བའི་དཀྱིལ་འཁོར་དག་ལ་ཁྱོད་ཀྱིས་འབད་ནས་དགའ་བར་
བསྐྲུབས་པའི་མཆོད།
གླུ་ཅི་དག་གི་དོག་པ་རྣམས་ནི་དྲི་མ་ཆགས་པར་བྱེད་པ་འདི་ལ་ལྟོས། ॥ 86

དེ་ལྟར་ཀུན་ཏོག་བརྗོད་པ་ཡིས། གྲོགས་མོས་རྒྱན་གྱི་རྣམ་འཕྲུལ་ནི།
བཀྲ་ཤིས་སྐད་དུ་བརྡགས་གྱུར་པ། ཤིན་ཏུ་ཆུང་བ་དག་ཀྱང་མཛེས། ॥ 87

उदिते पद्मिनीकान्ते शान्ते तमसि शार्व्वरे ।
बभूव सर्व्वभूतानां सुखाय नयनोत्सवः ॥ ८१ ॥

ततः प्रवृत्ते पद्मिन्या दिवाकरकरग्रहे ।
उच्चयु र्मङ्गलललनासङ्गमङ्गलगीतयः ॥ ८२ ॥

ततः सिद्धाधिनाथस्य भवने भूरिसम्पदः ।
सुतापरिणयारम्भसम्भारः समवर्त्तत ॥ ८३ ॥

अथ सिद्धपुरन्ध्रीभि र्दिव्यांशुकविभूषणैः ।
दृष्ट्वा प्रसाधितां कन्या मूचु रस्परसो मिथः ॥ ८४ ॥

हारोऽस्याः कुचयो र्भारः परिहारः परं रुचेः ।
लावण्यव्यवधानेन भूयसा भूषणेन किम् ॥ ८५ ॥

तन्वङ्ग्याः सखि किं कृतः स्तनतटे रत्नावलीभि र्भरः
चित्रं मण्डनमण्डितासि सुदृशः किं वाञ्जनेनामुना ।
रम्यानञ्जनदुग्धलेशा विहिता वक्त्रेन्दुबिम्बे त्वया
पश्येयं कुरुते कलङ्ककलनां कस्तूरिकामञ्जरी ॥ ८६ ॥

सखीभिरिति संकल्पजल्पै राकल्पिते भ्रमः ।
कल्पितो मङ्गलायैव स्वल्पोऽप्यस्या व्यराजत ॥ ८७ ॥

དེ་ནས་ནམ་མཁའ་གཞལ་ཡས་ཁང་། ནོར་བུ་འཕྲེང་བའི་ཟེར་འཕྲེང་ཅན།
དོ་ཤལ་བ་གམ་ཅན་ལྷ་བུས། སྤྲིན་གྱི་བཞོན་པ་རབ་ཏུ་འོངས།། 88

ཡོན་ཏན་ལ་གུས་འཛིག་རྟེན་གསུམ་གྱིས་མཆོག།
གྲུབ་པའི་མགོན་པོས་མཆོད་པར་གྱུར་བ་དེས།
རིག་འཛིན་འཕྲེང་བ་བརྒྱ་ཕྲག་རྗེས་འབྲང་ཞིང་།
བསྐོར་བྱས་བཀྲ་ཤིས་ས་གཞི་དག་ཏུ་ཕྱིན།། 89

དེ་ནས་རིན་ཅན་གཞལ་ཡས་ཁང་གནས་པ།
ཡིད་སྐྱེས་རྩེ་དགའི་འཁྲི་ཤིང་བུ་མོ་ནི།
བག་མ་ལ་དགའ་མཛེས་པའི་ཚ་དག་གིས།
ཕྱོགས་ལ་རྒྱན་དག་སྟེར་བ་བཞིན་དུ་འོངས།། 90

གྲོགས་མོ་འི་ལག་པས་བསྐྱོད་པའི་རྫ་ཡབ་རྩེས།
ནུ་བའི་ཨུཏྤ་ལ་ཡལ་འདབ་ལྷུང་གྱུར་པ།
འགྲམ་པར་རེག་པས་སྐད་ཅིག་དེ་རབ་མཛེས།
དྭགས་ཡོན་ཟླ་བས་བརྒྱན་པའི་མཚན་མོ་བཞིན།། 91

དེ་ནས་བག་མའི་དགའ་སྟོན་ཆེན་པོ་ལ།
ཆོ་ག་བཞིན་ཞུགས་གྲུབ་བདག་བུ་མོ་ཡི།
ལག་བཟུང་རིག་པ་གསར་བའི་བདུད་རྩི་ཡིས།
རིག་འཛིན་རྒྱལ་པོ་འི་བུ་ནི་དགའ་བར་གྱུར།། 92

अथाययौ विमानेन मणिमालांशुमालिना ।
हरिहर्म्यायमानेन व्योम्ना जीमूतवाहनः ॥ ८८ ॥

जगत्त्रयीपूज्यगुणादरेण
सिद्धाधिनाथेन स पूज्यमानः ।
विद्याधरश्रेणिशतानुयातः
सज्जीकृतां मङ्गलभूमि माप ॥ ८९ ॥

अथाययौ रत्नविमानसुस्था
कन्या मनोजन्मविलासवल्ली ।
विवाहहर्षद्युतिसंविभागै-
र्विभूषणानीव दिशां दिशन्ती ॥ ९० ॥

सखीकरान्दोलितचामराग्र-
विस्रस्तकर्णोत्पलपल्लवेन ।
कपोललग्नेन बभौ क्षणं सा
न्यस्ताङ्कचन्द्राभरणा निशेव ॥ ९१ ॥

ततः प्रवृत्ते विधिवद्विवाह-
महोत्सवे सिद्धनृपात्मजायाः ।
पाणिग्रहस्पर्शनवामृतेन
ननन्द विद्याधरराजसूनुः ॥ ९२ ॥

ཁྲོ་ཤུག་དེ་དག་ལུས་ནི་བག་མའི་ཚོ།
དོ་ཤལ་ཆེ་འོས་རིན་ཅེན་ལ་འཕོས་མཛེས།
མཛོའ་བས་སྙིང་ལ་གོ་སྐབས་ཐོབ་གྱུར་པ།
ཕན་ཚུན་རབ་ཏུ་དང་བས་ཞུགས་པ་བཞིན།། 93

བག་མའི་ཚོ་གས་རབ་ཏུ་སྤྲུར་བྱས་པ།
མཆོད་ཡོན་བསྙེན་པ་དེ་དག་རྒྱལ་པོ་འི་ཁྲིམས།
གླུ་དང་གར་ལྡན་མཐོ་རིས་ལྷུར་མཛེས་པ།
རིན་ཅེན་སྟུན་བཀོད་དགའ་སྟོན་འོས་པར་སོང་ །། 94

དེ་ནས་དགའ་སྟོན་སྤྲོ་བའི་ཁྲིད་པར་གྱིས།
གར་གྱིས་ངལ་བཞིན་འདབ་བརྒྱའི་སྦྲང་རྩི་འཐུངས།
ཚ་ཟེར་ལྡན་པའི་ཟེར་འཕྲེང་ཉུབ་རི་ཡི།
ངོས་ལ་འཁོད་པས་དལ་གྱིས་ངལ་གསོ་བསྟེན།། 95

དེ་ནས་འོད་ཆགས་ཉིན་མོ་འི་དཔལ་དང་ནི།
ཆགས་ལྡན་ཐུན་མཚམས་དག་ཀྱང་ཁྲིད་བྱས་ནས།
འོད་ཟེར་འཕྲེང་བ་སྐྱིད་ཚལ་ལ་ཆགས་བཞིན།
སྐྱུན་པོ་འི་ཕ་རོལ་ངོས་ཀྱི་ས་གཞིར་སོང་ །། 96

རྒྱ་སྐར་གཡོ་ལྡན་མཚན་མོ་རི་དགས་མིག
ཉིན་མོ་འི་མཇུག་ཏུ་གོས་སྔོན་ལྡན་པ་མཐོང་ །

तौ दम्पती हारमहार्हरत्न-
संक्रान्तदेहौ बभतु विवाहे ।
प्रीत्येव लब्ध्वा हृदयेऽवकाशं
परस्परं स्वस्थतया प्रविष्टौ ॥ ९३ ॥

निर्वर्त्तितोद्वाहविधिप्रबन्धौ
तौ गीतनृत्योचितनाककान्तम् ।
विन्यस्तरत्नासन मर्घ्यभाजौ
राजाङ्गनं जग्मतु रुत्सवार्हम् ॥ ९४ ॥

अथोत्सवोत्साहविशेषनृत्त-
खिन्नेव पीत्वा मधु शातपत्रम् ।
विश्रान्ति मस्ताद्रितटे निषण्णा
भेजे शनैरंशुमतोऽंशुमाला ॥ ९५ ॥

ततः समादाय करावलम्बनां
दिनश्रियं रागवतीश्च सन्ध्याम् ।
उद्यानलोभादिव रश्मिमाली
मेरो र्जगामापरपार्श्वभूमिम् ॥ ९६ ॥

नीलाम्बराहश्यत वासरान्ते
विलोलतारा रजनी मृगाक्षी ।

འཛིགས་ཤིང་འཁྲུལ་བས་ཡང་ཡང་ཕྱོགས་རྣམས་སུ།
རྣམ་པར་བལྟ་ཞིང་མངོན་པར་འགྲོ་བ་བཞིན།། 97

དེ་ནས་ཤར་གྱི་རི་རྩེར་རི་བོང་ཅན།
འོད་ཟེར་འཕྲེང་བ་ཞལ་གྱི་དྲ་བས་བསྐྱམས།
བ་གམ་ཆེར་འཛེགས་དགའ་སྟོན་ཆེན་པོ་ལ།
གྲུབ་པའི་བུ་མོ་འི་གར་ལ་བལྟ་བ་བཞིན།། 98

རྒྱུ་སྐར་རྒྱུ་དང་འབྲས་ཡོས་མི་ཏོག་གཏོར།
མཚན་མོ་འི་ཟླ་བས་བག་མར་བླངས་པ་དེར།
སྦྲང་རྩིའི་བརྟུལ་ཞུགས་སྦྲང་རྩིས་མྱོས་པ་ཅན།
ཀུ་མུད་འབྱུང་གནས་ཅི་ཡང་རབ་དཀར་གྱུར།། 99

དེ་ནས་ཉམས་དགའ་དགའ་སྟོན་ཆེན་པོ་དེར།
འཕྲེང་བ་དོ་ཤལ་རབ་འབར་དབྱུ་བ་གཡོ།
གྲུབ་པའི་ན་ཆུང་འཛིག་རྟེན་རྣམ་པར་མཛེས།
ཟླ་ཤར་བདུད་རྩིའི་རྒྱ་མཚོ་འཕྱུར་བ་བཞིན།། 100

དེ་ནས་ལྷ་རྡོ་དགའ་སྟོན་ཆེན་པོ་ནི།
ཡོངས་སུ་རྒྱས་ཚེ་གྲོགས་དང་ཐྲད་པ་ཡིས།
ཉི་འོད་གཞོན་ནུས་ལི་ཁྲིའི་ཚོགས་ཀྱིས་བཞིན།
གྲུབ་པའི་གྲོང་དུ་གྲོང་པའི་རྩེ་དགའ་བྱུང་།། 101

विलोकयन्ती भयसम्भ्रमेण
मुहुर्दिगन्तानभिसारिकेव ॥ ९७ ॥

अथोदयाद्रेः शिखरं शशाङ्कः
करावलीस्फाटिकजालपद्दम् ।
महोत्सवे सिद्धपुरन्ध्रिनृत्यं
द्रष्टुं महाहर्म्यमिवारुरोह ॥ ९८ ॥

प्रकीर्णतारक्षतलाजपुष्पे
तस्मिन्निशाचन्द्रमसो विवाहे ।
अभून्मधुक्षीवमधुव्रतानां
कोऽपि प्रमोदः कुमुदाकराणाम् ॥ ९९ ॥

महोत्सवोत्साहरसेऽथ तस्मिन्
विलोलफेणोज्ज्वलमाल्यहारः ।
नृत्यन् बभौ सिद्धपुरन्ध्रिलोकः
चन्द्रोदयोद्भूत इवामृताब्धिः ॥ १०० ॥

ततः प्रभाते परिवर्द्धमाने
महोत्सवे मित्रसमागमेन ।
बालातपे सिद्धपुरे बभूव
सिन्दूरपूरैरिव पौरकेलिः ॥ १०१ ॥

དགའ་སྟོན་ཆེན་པོ་རྨད་བྱུང་དགའ་བའི་ས།
ཉི་མ་དྲུག་ནི་དཔལ་གྱིས་རབ་འདས་ཏེ།
ཉི་མ་བདུན་གྱི་དང་པོ་རི་ངོས་ལ།
རིག་འཛིན་རྒྱལ་པོའི་བུ་ནི་རྣམ་པར་རྒྱ།། 102

དེར་ནི་གདེངས་ཀའི་ནོར་བུའི་འོད་ཟེར་དག།
རབ་གསལ་དྲ་བའི་སྣང་བ་རྒྱས་བྱེད་པ།
ཟླ་བའི་དཀྱིལ་འཁོར་ཡོངས་རྫོགས་བཞིན་རས་ཅན།
ཀླུ་གཞོན་པ་དང་བཅས་པ་མདུན་དུ་མཐོང་།། 103

མཆི་མ་སྨུག་པོར་རབ་འབབ་ཐིགས་པ་ཡི།
འཕྲེང་བས་ཉ་མའི་དཀྱིལ་འཁོར་དཀྲིགས་གྱུར་ཅིང་།
རབ་དྲག་ཀླུ་ངན་གྱིས་བཅོམ་འདར་བ་དེའི།
སྙིང་རྗེའི་ཆོ་ངེ་རབ་དུ་གསང་བ་ཐོས།། 104

ཀྱི་ཧུད་མཉེས་ག་ཤིན་ས་འོག་ནོར་བུའི་སྒྲོན།
རྗེ་ལྟར་ཁྱོད་ནི་བརླག་ལ་ཉེ་བ་ཐོབ།
ཁྱོད་གདོང་ཆུ་སྐྱེས་ཀུན་དགའི་ཚོགས་བཞིན་མཛེས།
འདི་ནི་བདག་གིས་ཕྱི་ནས་གང་དུ་མཐོང་།། 105

ཀྱི་ཧུད་དགའ་མའི་དགའ་བའི་འཁྲི་ཤིང་དཔྱིད།
ཡིད་སྨུབས་འཚམས་སྦྱོར་བོ་ཉ་ལང་ཚོ་འདིར།

शनैः प्रयातेषु दिनेषु षट्सु
महोत्सवस्याद्भुतहर्षभूमेः ।
गिरे स्तटे सप्तमवासराग्रे
चचार विद्याधरराजसूनुः ॥ १०२ ॥

ददर्श तत्र स्फुटरश्मिजाल-
फणामणिस्फीतकृतप्रकाशम् ।
मात्रानुयातं परिपूर्णचन्द्र-
बिम्बाननं नागकुमार मग्रे ॥ १०३ ॥

तस्याः प्रसर्पद्घनबाष्पबिन्दु-
मालावकीर्णस्तनमण्डलायाः ।
अत्युग्रशोकाहतिकम्पितायाः
शुश्राव तारं करुणप्रलापम् ॥ १०४ ॥

हा वत्स पातालमणिप्रदीप
समीप मात्तोऽसि कथं क्षयस्य ।
द्रक्ष्यामि कान्तं क्व पुन स्तवेद-
मानन्दसन्दोह मिवाननाब्जम् ॥ १०५ ॥

अस्मिन् प्रियप्रीतिलतावसन्ते
किं यौवने मन्मथसन्धिभूते ।

ཛི་ག་གཉེན་གྱི་སྲོག་གྲུར་ཁྱོད་ཟླ་འགྱུར།
དུས་ཀྱི་གཉིས་འཕྲུང་གི་བཙེམ་ཚུ་ད་བཞིན།། 106

ཞེས་པ་དེ་ཡི་སྙིང་རྗེའི་སྒྲ་ཐོས་ནས།
མྱ་ངན་ཟུག་རྔུ་ནང་དུ་རབ་ཟུག་པ།
རིག་འཛིན་རྒྱལ་པོའི་བུ་ཡི་མངོན་ཕྱོགས་དེ།
དེ་ལ་བཟོད་དཀའི་སྡུག་བསྔལ་རྒྱུ་དག་དྲིས།། 107

མ་མ་ཁྱོད་ཀྱི་ཚེ་ངེ་དྲག་པོ་འདི།
སྡུག་བསྔལ་དྲག་པོའི་གསལ་བྱེད་ཅི་ལས་སྐྱེས།
དགེ་བའི་གཟུགས་ཅན་དམ་པ་འདི་ལ་ཁྱོད།
དྲག་པོ་ཀུན་དུ་འདར་བྱེད་ཅི་ཞིག་རེགས།། 108

ངེས་པར་དགེ་བ་དག་ལ་འོས་པའི་ལུས།
སྐྱེ་བོ་བཟང་པོ་དང་འགྲོགས་བདེ་བ་སྤྱེར།
རྣམ་པ་འདི་ལྟ་བུ་ནི་རབ་འཛེམས་པའི།
རྒྱུད་པའི་གནས་ཉིད་རབ་ཏུ་མི་འགྱུར་རོ།། 109

ཞེས་པ་དེ་ཡིས་སྡུག་བསྔལ་དུག་འཐོས་འཁྲུགས།
བརྩེ་བའི་རང་བཞིན་དེ་ཡིས་དྲིས་ལ་དེས།
འབྲལ་བས་འཛིགས་ནས་བུ་ཡི་བཞིན་ལ་མིག།
ཕུར་པ་བཙུགས་བཞིན་དེ་ལ་རབ་སྨྲས་པ།། 110

हा भक्ष्यसे बान्धवजीवभूत
कालद्विपाक्रान्त इवासि मुच ॥ १०६ ॥

कस्मात् तवायं घनदुःखशंसी
मातः प्रजातः प्रसभं प्रलापः ।
किं तीव्र माकम्पक मस्य साधोः
कल्याणमूर्त्तें रभिशङ्कयेत् कम् ॥ १०७ ॥

वपूंषि कामं कुशलोचितानि
सौजन्यसंवादसुखप्रदानि ।
एवंविधानि प्रतियातनानां
नैवास्पदत्वं विपदां प्रयान्ति ॥ १०८ ॥

संक्रान्ततद्दुःखविषाकुलेन
पृष्टेति सा तेन दयामयेन ।
त मब्रवीत् कीलितलोचनेव
वियोगभीत्या वदने सुतस्य ॥ १०९ ॥

བཅོས་ཐབས་མེད་པར་གྱུར་པ་ངེད་ཀྱི་ནི།
བསྡུག་བསྔལ་མེད་དག་ཐོས་པས་ཁྱོད་ལ་ནི།
ལས་ངན་སྨིན་པ་ཉེར་གནས་བཟོད་དཀའ་ཡི།
རྣམ་པ་འདི་ནི་བདག་ལ་དུས་མིན་ལྟུང་ ༎ 110

རྒྱ་ཆེ་གྲགས་འབར་དུང་སྐྱོང་རིགས་ཉིད་ཀྱི།
སྨྱུ་གུ་བདག་གི་བུ་གཞོན་འདི་ལ་ནི།
ཁྱེད་པོ་གདུག་པས་རྩ་བ་འཇོམས་པ་ཡི།
སྤུ་གྲི་རྣོན་པོ་འདི་ནི་ཆས་སུ་བྱས༎ 111

རྟག་ཏུ་ཟླ་བར་སྟོན་བྱེད་མཁའ་ལྡིང་ལ།
ཐམས་ཅད་བརྟག་པ་བསྐྱུང་སྐྱིད་རེ་མོས་ཀྱི།
གདེངས་ཅན་འཛིན་པ་དག་གིས་ཀླུ་དེ་ནི།
གོས་དང་རྟགས་ཀྱིས་མཚོན་པ་སྐྱིང་བར་བྱེད༎ 112

གང་འདི་ཁ་བའི་རི་ནི་བཀོད་པ་ཡི།
ཕུང་པོ་ཕ་རོལ་མཐོང་མིན་མཐོང་གྱུར་པ།
འདི་ནི་གདེངས་ཅན་ལུས་ཟློས་དོར་བ་ཡི།
ཀང་རུས་འཕྲེང་བས་བསྒྲུབས་པའི་རུས་ཕུང་ཡིན༎ 113

མཐར་བྱེད་སོ་ཡི་དྲུང་དུ་སོང་གྱུར་ཅིང་།
གོས་དམར་བཀའ་ནི་རབ་ཏུ་བཟུང་བྱས་པ།

किं निष्प्रतीकारसमुद्गमेन
श्रुतेन ते सद्व्यसनानलेन ।
अकालपाती मम दुःसहोऽयं
दुष्कर्म्मपाकोपनतप्रकारः ॥ ११० ॥

विशालकीर्त्त्युज्ज्वलशङ्खपाल-
कुलाङ्कुरे वत्सतरे ममास्मिन् ।
मूलाभिघाती विधुरेण धात्रा
सज्जीकृतोऽयं कठिनः कुठारः ॥ १११ ॥

एकः सदा भक्षणदीक्षितस्य
तार्क्ष्यस्य सर्व्वक्षयरक्षणाय ।
वारेण नागः फणिनायकेन
विसृज्यते पाटलपट्टचिह्नः ॥ ११२ ॥

योऽयं तुषाराचलसन्निवेशः
संदृश्यते राशि रदृश्यपारः ।
स एष भुक्तोज्झितभोगिकाय-
कङ्कालमालाकलितोऽस्थिकूटः ॥ ११३ ॥

वारक्रमेणाद्य ममास्य सूनोः
कृत स्तदद्यान्तिक मागतस्य ।

བདག་གི་བུ་འདིས་དེ་རིང་རིམ་གྱིས་ནི།
ངེད་རིགས་རྩ་བ་འཛོམས་པའི་རེས་འདི་ཐོབ།། 114

ཅེས་པ་འཛིགས་པས་སྐྱུར་དུ་སྨྲ་བྱེད་ཅིང་།
བུ་དེ་ཡི་ནི་དབུགས་དག་འབྱིན་བྱེད་པ།
དེ་ཡིས་དེ་ནི་གོས་འདབ་ཀྱིས་བསྒྲིབས་ནས།
སྙིང་རྗེའི་ང་རོ་གསང་པོར་ཆེ་ངེ་བཏོན།། 115

ཀྱི་ཧུད་དུང་གི་གཙུག་ཕུད་འགྲོ་བའི་རྒྱན།
གསེར་བར་འགྲོ་ལ་འདི་ལྟར་ཁྱོད་རིང་ཅི།
ཞེས་བརྗོད་བུ་ཡི་མགྲིན་བཟུང་དེ་ཡི་ནི།
ཕྲག་པར་བཞིན་བཀོད་མ་དེ་སྨྱོངས་པར་གྱུར།། 116

དལ་གྱིས་འདུ་ཤེས་ཐོབ་ཅིང་སྐྲག་མ་དེ།
བུའུ་གཅིག་ལྷན་པ་བཞིན་གཞན་ཀུན་མཐོང་།
དེ་ཡི་སྡུག་བསྔལ་ནགས་མེ་ཟློག་པའི་ཐབས།
བཙེ་བས་བརླན་པའི་བློ་ཡིས་རབ་བསམས་པ།། 117

སྙིང་རྗེས་དམན་པ་གང་གི་དྲག་དུ་ནི།
གཞན་དག་བཅོམ་ནས་ལུས་ཅན་གསོ་བྱེད་པ།
ཀྱེ་མ་འདབ་ཆགས་དབང་གིས་འབད་པ་ནི།
གདུག་པས་རྗེས་སུ་འབྲེལ་འདི་རབ་དུ་དམན།། 118

प्राप्तोऽय मस्मत्कुलमूलघाती
गृहीतशोणांशुकशासनस्य ॥ ११४ ॥

इति ब्रुवाणा विनयेन तूर्ण-
माश्वास्यमाना तनयेन तेन ।
सा तं पिधायांशुकपल्लवेन
चुक्रोश तारं करुणस्वरेण ॥ ११५ ॥

हा शङ्खचूड़ त्वरसे किमेवं
गन्तुं जगन्मण्डन वध्यभूमिम् ।
उक्त्वेति सा कण्ठगृहीतपुत्रा
तत्स्कन्धविन्यस्तमुखी मुमोह ॥ ११६ ॥

दृष्ट्वाप्तसंज्ञां शनकैः कुमार-
स्तां कातरां धेनु मिवैकवत्साम् ।
अचिन्तयद्दुःखदवानलेऽस्याः
निवारणोपायधिया दयार्द्रः ॥ ११७ ॥

अहो वतायं पतगेश्वरस्य
क्रौर्य्यानुबन्धी मलिनः प्रयत्नः ।
पुष्णाति नित्यं करुणाविहीनः
परोपघातेन शरीरकं यः ॥ ११८ ॥

བྲུ་དང་བྲལ་བར་གྱུར་པ་བྲུ་མེད་གི།
མ་འདི་ངས་པ་ཉིད་དུ་འཚོ་མ་ཡིན།
གཞོན་ནུ་ཞིན་དུ་གཞོན་པའི་ལུས་ཅན་འདི།
རང་གི་ལུས་བྱིན་བདག་གི་བསྲུང་བར་བྱ།། 119

སྐད་ཅིག་འདི་བསམས་དེ་ཡིས་དེར་སྨྲས་པ།
མ་གཅིག་ཁྱོད་ནི་བྲུ་བཅས་རང་སར་སོང་།
ཀླུ་དག་གསོད་པའི་གནས་སུ་བདག་མཆི་ཡིས།
གོས་དམར་མཚན་མ་འདི་ནི་བདག་ལ་སྩོལ།། 120

ཞེས་པ་བརྩེ་ལྡན་དེ་ཡིས་བརྗོད་ཙམ་ལ།
ཡན་ལག་འཁྲི་ཤིང་འདར་དེས་དེ་ལ་སྨྲས།
འགལ་བ་འདི་ནི་ཁྱོད་ཀྱིས་བརྗོད་མི་བྱ།
ཁྱོད་ནི་དུང་གཙུག་ལས་ལྷག་བདག་གི་བུ།། 121

བདེ་མེད་ལས་ཀྱི་ཉེར་གནས་གདིང་མེད་མཚོ།
སྐྱོངས་པའི་ཐ་རྒྱབས་ལྡན་པར་བདག་འཇུག་གོ།
ཉེས་པ་བྱེད་པ་རྣམས་ལ་སྡུག་བསྔལ་ནི།
དུས་མིན་སྤྲོགས་ཀྱི་རྡོ་བ་བཟོད་དཀའ་ལྡང་།། 122

དམ་པའི་སྙིང་སྟོབས་རྒྱ་གཏེར་ཁྱོད་ཀྱི་ལུས།
འགྲོ་བའི་མིག་དང་སྲོག་གྱུར་བསྐལ་པ་ནི།

वियुज्यमाना तनयेन नेयं
जीवत्यवश्यं जननी विवत्सा ।
अयं कुमारः सुकुमारमूर्त्ति-
र्मयैव रक्ष्यः स्वतनुप्रदेन ॥ ११९ ॥

क्षणं विचिन्त्येति स तामुवाच
मातर्व्रज त्वं ससुता स्वभूमिम् ।
गच्छाम्यहं पन्नगवध्यधाम
प्रयच्छ शोणांशुकचिह्नमेतत् ॥ १२० ॥

इत्युक्तमात्रे सदयेन तेन
सा कम्पमानाङ्गलता तमूचे ।
न वाच्यमेतद्भवता विरुद्धं
त्वं शङ्खचूड़ादधिकः सुतो मे ॥ १२१ ॥

अहन्तु मोहोर्म्मिमगाधसिन्धु-
मशर्म्मकर्म्मोपनतं विशामि ।
अकालयन्त्रोपलदुःसहानि
दुःखान्यलं दुष्कृतिनः पतन्ति ॥ १२२ ॥

साधो सुधासन्निधिराश्रितानां
सत्त्वोदधे स्वस्तिमती तनुस्ते ।

འཇིག་ཀྱང་མི་འཇིག་མངོན་སྨུམ་རྟེན་བྱེད་ཀྱི།
བདུད་རྩི་ཉེ་འདི་ལེགས་པར་ལྷན་གྱུར་ཅིག ༎ 123

ཅེས་པ་དེ་ཡིས་བརྗོད་ཅིང་འབད་པ་དེས།
རྗེས་སུ་བཅིངས་བྱས་རང་ལུས་སྦྱིན་པ་ལ།
གང་ཆེ་སེམས་སྤྱོད་གཡོ་བ་མེད་གྱུར་པ།
དེ་ཚེ་དུང་གཙུག་གིས་ཀྱང་དེ་ལ་སྨྲས ༎ 124

མཁའ་ལྡིང་ཟས་སུ་བདག་སྤྲིས་དང་པོར་གྱུབ།
འདི་ལ་བྱེད་པོ་ལ་ནི་ཅི་ཞིག་བྱ།
རྒྱ་མེད་མཉེས་ག་ཤིན་དག་ལས་གནས་མིན་འདིར།
ཁྱོད་ནི་ལོག་པའི་བསམ་པ་བྱར་མི་འོས ༎ 125

ཁྱོད་ཀྱི་ལུས་ནི་ཡོན་དན་རྒྱན་དང་ལྡན།
ཚུལ་བཟང་ཡོངས་སུ་རྫོགས་པ་བདུད་རྩིའི་གཏེར།
སྲིད་གསུམ་འཚོ་བ་ཡིས་ཀྱང་བསྐྱང་བྱ་འདི།
ཙུ་མཚུངས་བདག་དོན་ཇི་ལྟར་གཏང་བར་འོས ༎ 126

སྲིད་པའི་ནགས་ཚལ་འདིར་ནི་བདག་ལྟ་བུ།
ཀ་ཤིའི་འདབ་མ་དང་མཚུངས་རྟག་ཏུ་འབྱུང་།
བདུད་རྩིའི་སྨྲིན་ཟླར་གྱུར་པ་ཡོངས་འདུའི་ཤིང་།
ཁྱོད་ལྟ་བུ་ནི་ཕྱི་ནས་འབྱུངས་མ་ཡིན ༎ 127

भूयाज्जगल्लोचनजीवभूता
कल्पक्षयेऽप्यक्षयसाक्षिणीयम् ॥ १२३ ॥

इत्युच्यमानः स तया प्रयत्नात्
बद्धानुबन्धः स्वतनुप्रदाने ।
यदाभवन्निश्चलचित्तवृत्ति-
स्तं शङ्खचूडोऽपि तदा जगाद ॥ १२४ ॥

तार्क्ष्यस्य भक्ष्या वय मादिसर्गे
सिद्धाः किं मत्र क्रियते विधातुः ।
मिथ्यैव निष्कारणवत्सलत्वात्
न कर्त्तुं मर्हस्यपदेऽत्र चित्तम् ॥ १२५ ॥

इदं गुणालङ्करणं वपुस्ते
संपूर्णसौजन्यसुधानिधानम् ।
त्रैलोक्यजीवैरपि रक्षणीयं
त्याज्यं तृणस्येव कथं ममार्थे ॥ १२६ ॥

भवन्ति नित्यं भवकाननेऽस्मि-
न्नस्मद्विधाः काशपलाशतुल्याः ।
भवद्विधस्यामृतसोदरस्य
न पारिजातस्य पुनः प्रसूतिः ॥ १२७ ॥

སྐྱེ་གཞན་བསོད་ནམས་ཞིང་གི་ཚུལ་བཟང་ཁྲོད།
བདུད་རྩི་བདུད་རྩིའི་ཟེར་མཐོང་དང་བར་མཛོད།
བདག་གི་ཐུགས་ཁྲལ་དག་གིས་ཡིད་གདུང་འདི།
བདག་ཉིད་ཀུན་གྱིས་ཁྲོད་ནི་ཡོངས་མ་མཛད།། 128

རྒྱ་མཚོའི་དྲུང་དུ་ལུས་བཀོད་གོ་ཀ་ཏི།
ཤ་སྦྲར་གྱུར་དུ་ཕྱིན་ནས་ཕྱག་འཚལ་དེ།
མ་ཉིས་འོག་ཁང་པར་རྣམ་སྤྲིངས་ནས།
མཁའ་ལྡིང་རྡོ་རིར་སྐྱེ་མེད་བདག་མཆི་འོ།། 129

ཞེས་བརྗོད་མགོ་ཡིས་སྤྱིན་གྱི་བཞིན་པ་ལ།
རབ་དུ་བདུད་ནས་ཀླུ་ཉི་མ་དང་བཅས།
ཐ་རླབས་ཆེན་པོ་འི་ལག་པས་དབུ་པའི་འཕྲེང་།
རབ་བཀོད་གོ་ཀ་ཏིའི་ངོས་སུ་སོང་།། 130

རིག་འཛིན་བདག་པོ་དག་གི་བུ་ཡང་དེར།
དེ་ཡི་སྒྲིག་ནི་རབ་བསྒྲུངས་ངེས་པ་ཡི།
འགྲོ་བ་མདུན་དུ་ཉུག་རུམ་པ་དག་ནི།
ལག་ན་གོས་དམར་ཐོགས་ནས་འོང་བ་མཐོང་།། 131

དེ་ནས་ཉུག་རུམ་པ་དེས་ཕྱག་འཚལ་ནས།
བཀྲ་ཤིས་གོས་ཟུང་དེ་ནི་དེ་ལ་ཕུལ།

प्रसीद जन्मान्तरपुण्यपण्यै-
र्दृष्टोऽसि सौजन्यसुधासुधांशुः ।
अस्मद्विषादेन मनःप्रयासः
सर्व्वात्मनायं भवता न कार्य्यः ॥ १२८ ॥

गत्वार्णवं स्वस्वनिविष्टमूर्त्तिं
गोकर्णसत्त्वं प्रणिपत्य तूर्णम् ।
पातालगेहं जननीं विसृज्य
गच्छामि तां तार्क्ष्यशिलामखिन्नः ॥ १२९ ॥

उक्तेति नागः प्रणिपत्य मूर्द्ध्ना
जीमूतवाहं जननीसहायः ।
जगाम गोकर्णतटं महाब्धि-
तरङ्गहस्तार्पितफेनमालम् ॥ १३० ॥

विद्याधराधीशसुतस्तु तत्र
तत्प्राणसंरक्षणनिश्चयेन ।
व्रजन् ददर्शारुणपट्टपाणि-
मायान्तमन्तःपुरिकं पुरस्तात् ॥ १३१ ॥

स वर्षवर्य्यः प्रणिपत्य तस्मै
दत्त्वाथ तन्मङ्गलपट्टयुग्मम् ।

དགའ་སྟོན་ཞག་བདུན་དག་གི་ཁྲུས་ཀྱི་སྐྱིད།
ཆོ་ག་བསྐྱར་བས་གྲོན་པར་མཛད་ཅེས་སྨྲས།། 132

བཟང་པོ་སྨོན་ལ་ཁྲིད་སོང་རྫིས་ནས་ནི།
ཐོགས་འགོར་མེད་པར་བདག་འོང་ཞེས་པར་མཛོད།
ཅེས་བརྗོད་མྱུར་དུ་དེ་བཏང་དགའ་བ་ཡི།
གཞོན་ནུ་སྙིང་སྟོབས་བློ་ཡིས་རབ་བསམས་པ།། 133

ཀླུ་དག་གསོད་པའི་རྟགས་གྱུར་གོས་དམར་ཟུང།
འདོད་པ་འདི་ནི་འབད་པ་དང་བྲལ་བར།
ཨ་ལ་བདག་གིས་ཐོབ་པས་མྱུར་ཉིད་དུ།
ལག་འགྲོ་དགྲ་ཡི་རྗེ་ཅན་འགྲོ་བར་བྱ།། 134

ཞེས་བསམས་གཙུག་ནི་ནོར་བུའི་འོད་ཟེར་ནི།
རབ་འབར་ཚོགས་མཚུངས་གོས་ནི་སྤྱི་བོར་བཀོད།
གཞན་གྱི་བློ་གྲོས་དག་དུ་ཆགས་བྱས་ཏེ།
མཁའ་ལྡིང་བབས་རྟགས་ལྡན་རྗེ་ཅན་སོང་།། 135

བརྟན་ཆགས་སྤྲུལ་གྱི་ཞག་གི་དྲན་གྱུར་ཅིང།
ངོས་ནི་ཁྲག་གིས་དམར་བ་དེར་ཕྱིན་ནས།
འཛོམས་དེ་མཁའི་ལྡིང་འོང་བ་མཐོང་འདོད་པས།
དེ་ནི་ལུས་ཀྱི་སྟོད་བསྒྲིབས་རྣམ་པར་གནས།། 136

आगम्यता मुत्सवसत्तराज-
स्नानाय सज्जो विधि रित्युवाच ॥ १३२ ॥

भद्र त्वं मग्रे व्रज निर्विलम्ब-
मवेहि मा मागतमेव पश्चात् ।
तूर्णं न मुक्तेति विसृज्य हर्षा-
दचिन्तयत् सत्वधिया कुमारः ॥ १३३ ॥

दिष्ट्या मया पन्नगवध्यचिह्नं
समीहितं पाटलपट्टयुग्मम् ।
यत्नाद्विनावाप्त मिदं व्रजामि
क्षिप्तां शिलामेव भुजङ्गशत्रोः ॥ १३४ ॥

ध्यात्वेति चूडामणिदीप्तरश्मि-
पुञ्जोपमं मूर्ध्नि निधाय पट्टम् ।
हृतोत्तरीयप्रणयः परेण
स तार्क्ष्यपाताङ्कशिलां जगाम ॥ १३५ ॥

आसाद्य तां शोणितशोणपार्श्वा-
माश्यामलीनाह्विवसावसेकाम् ।
आरुह्य तार्क्ष्यागमनाभिकाङ्क्षी
तस्थौ स संच्छादितपूर्व्वकायः ॥ १३६ ॥

དེ་ནས་གསེར་གྱི་ཁྲ་བའི་ཟ་རླབས་ལྟར།
མཛེས་པའི་གློག་དྲག་ཚོགས་ཀྱི་སྤྲིན་དག་ནི།
རབ་ཏུ་གསལ་བར་གྱུར་བཞིན་གང་གིས་མཁའ།
རྔ་གདོང་མེ་འབར་རྒྱ་མཚོའི་ཆུ་བཞིན་གྱུར།། 137

དེ་ནས་གཡོག་པ་བསྐྱོད་པར་རབ་བསྐྱེད་རྒྱས་པར་རབ་དཀྲིགས་
རླུང་གི་ཆུ་གཏེར་འཁྲུག་བྱེད་ཅིང་།
ཉི་མའི་འོད་ཟེར་གྱིས་མཐན་གསེར་གྱི་རི་བོ་དང་མཚུངས་བདབ་
ཆགས་དབང་པོ་རིང་ནས་མཐོང་།
གང་གིས་དམན་པའི་འགྲོས་དག་གི་ནི་ལྡོན་པ་མངའ་དག་གཟུགས་
པར་གྱུར་ཅིང་ས་འཛིན་གྱི།
རྩེ་མོའི་ཆ་དག་ལྷུང་བའི་སྒྲ་དྲག་གནོད་པས་འཇིགས་པ་བཞིན་
དུ་ས་གཞི་འཁྲུགས་པར་གྱུར།། 138

དེ་ནས་རི་ལ་འཇིགས་རུང་རྡོ་རྗེ་བཞིན།
བརྟན་པའི་ལུས་ཅན་དེ་ཡི་རྒྱབ་ཏུ་ནི།
རྡོ་རྗེ་ལྟར་དྲག་སྡེར་མོ་ལྕགས་ཀྱུའི་རྩེའི།
དྲག་པོར་སྨུན་བྱེད་ཀླུ་དབང་དགྲ་དག་ལྷུང་།། 139

འཕྲལ་ལ་མཁའ་ལྡིང་དག་གིས་བསྟུན་ཞིང་ལུས་ནི་གདུགས་པར་གྱུར་མོད་ཀྱང་།
གཞན་སྲོག་བསྲུང་ལ་རབ་མང་སྦྲུ་ལོང་གི་བརྒྱན་ལུས་ཅན་གཉེན་ཉུ་དག།
བརྟན་པ་ཡངས་པས་རྟག་ཏུ་བདག་གི་ལུས་འདི་སྡུག་བསྔལ་གྱིས་གཟིར་བའི།
གདུང་བ་ལྡན་པའི་ཚོགས་རྣམས་བསྲུང་བའི་ཉེར་འཁོར་གྱུར་ཅིག་ཅེས་པ་
བསམས།། 140

अथ द्रवत्काञ्चनवीचिरोचि-
श्चण्ड स्तडित्पुञ्जघनप्रकाशः ।
समुद्ययौ येन नभो बभूव
सवाड़वोद्गार मिवार्णवाम्भः ॥ १३७ ॥

पक्षीन्द्रोऽहश्यतारादथ तरणिकराक्रान्तहेमाचलाभः
पक्षाक्षेपप्रवृत्तप्रततपरिसरन्मारुतक्षोभिताब्धिः ।
यत्संपातावहेलाशकलितसकलानोकहभ्रष्टभूभृत्-
प्राग्भारस्फारघोषव्यतिकरचकितेवाकुला भू र्बभूव ॥१३८॥

भोगीन्द्रशत्रुः स्थिरविग्रहस्य
तस्याथ वज्रोग्रनखाङ्कुशाग्रः ।
घोराशनिस्फोट इवाचलस्य
पपात पृष्ठे कठिणप्रहारः ॥ १३९ ॥

कुमार स्तार्क्ष्येण क्षतदलितगात्रोऽपि सहसा
परप्राणत्राणप्रबलपुलकालङ्कृततनुः ।
प्रदध्यौ दुःखार्त्तव्यसनिगणरक्षोपकरणं
शरीरं मे भूयात् सततमृत मित्यायतधृतिः ॥ १४० ॥

དེ་ནས་ཐུག་ཆོམ་འཛིགས་རུང་སྐྲ་ལྷན་ཁ་ཡིས་མངོན་བཅོམ་ཞིང་།
ངེས་པར་གདུགས་ཀྱང་དེ་ནི་གཡོ་མེད་ཅིང་སྟོབས་བརྟན་ལྡན་ཆེ།
ལག་འགྲོ་འདི་ནི་སྲུ་ཞེས་དེར་ནི་འདབ་ཆགས་རྒྱལ་པོ་དག།
ཡ་མཚན་ལ་ཆགས་རྣམ་པར་ངེས་སླད་གཡོ་བ་མེད་པར་གྱུར།། 141

དེ་ནས་འདབ་ཆགས་བདག་པོ་རབ་དྲག་ཏི་མའི་འཕྲེང་བ་བཞིན།
གཟི་བྲིན་སེར་སྐྱ་རྒྱ་ཆེན་ཚོགས་ཀྱིས་ཕྱོགས་ནི་སེར་བྱེད་པས།
སྤྲར་ཡང་མངོན་བདབ་ཤུར་དུ་དེ་ཡི་དུམ་བུ་དག།
ནོར་བུ་འོད་དམར་རབ་འབར་ཁྲག་རྒྱུན་ལྟ་བུར་རབ་གསལ་བླངས།། 142

གནས་སྐབས་དེར་ནི་གཞོན་ནུ་ཡིས། ཏ་རི་ཙན་དན་ནགས་ཚལ་དུ།
སྤྲིན་གྱི་དོག་ནི་བཙུན་མོ་དང་། ལྷན་ཅིག་མནའ་མ་དང་ལྷན་གནས།། 143

ཆུ་གཏེར་ཟླ་བ་འདོད་པ་བཞིན། བུ་ནི་བལྟ་བར་འདོད་གྱུར་ཅིང་།
སྙིང་ལ་དོགས་པ་གནས་པ་ཡིས། བསམ་པས་ནོན་པ་བཞིན་སྨྲས་པ།། 144

ཀྱེ་མ་ཅི་ཞིག་ད་དུང་ཡང་། བུ་ནི་སྤྲིན་གྱི་བཞོན་པ་དག།
རི་མཆོག་མཐའ་ལ་བལྟ་བ་ཡི། དགེ་མཚན་ཅན་དེ་མ་མཐོང་ངོ་།། 145

རི་འདིའི་ངོས་ལ་མཁའ་ལྡིང་གིས། དུས་འདི་འབར་བ་རབ་ཏུ་ཞུགས།
གང་གིས་ནམ་མཁའ་མི་བཟད་པའི། ཕྱོགས་སྤྲིག་འབར་བ་ལྟ་བུར་རྟོགས།།
146

निर्घातघोरतरघोषमुखाभिघात-
निर्दारितेऽप्यचलसत्त्वहृढेऽथ तस्मिन् ।
कोऽयं भुजङ्ग इति तत्र विहङ्गराजः
संसक्तविस्मयविनिश्चयनिश्चलोऽभूत् ॥ १४१ ॥

अथ पुनरभिपत्योच्चण्डमार्त्तण्डमाला-
कपिलविपुलतेजःपुञ्जपिञ्जीकृताशः ।
खगपति रहणांशुव्यक्तरक्तप्रवाह-
प्रकटमखिलमकार्षीत् खण्डमस्याशु मूर्द्ध्नः ॥ १४२ ॥

अस्मिन्नवसरे बालहरिचन्दनकानने ।
जीमूतकेतुरासीनः पत्न्या सार्द्धं स्नुषान्वितः ॥ १४३ ॥

पुत्रदर्शनसोत्कण्ठश्चन्द्रोत्सुक इवोदधिः ।
शङ्काविषण्णहृदयश्चिन्ताक्रान्त इवाब्रवीत् ॥ १४४ ॥

अहो वत किमद्यापि वत्सो जीमूतवाहनः ।
न दृश्यते गिरिवरप्रान्तालोकनकौतुकी ॥ १४५ ॥

दीप्ता गरुड़वेलेयं प्रवृत्तास्य गिरेस्तटे ।
यया विभाव्यते व्योम दिग्दाहोद्गारदारुणम् ॥ १४६ ॥

འཇིགས་པས་ལུས་ཉམས་ལག་འགྲོ་གང་། ཟ་འདོད་གདོངས་ཅན་དགྲ་ཡིས་ནི།
ཀུན་ཏུ་འབིགས་བྱེད་བསྣུན་པའི་སྐྲ། འཇིགས་སུ་རུང་བ་དུས་འདིར་འཇུག། 147

དེ་ལྟར་ཕྲ་ཆོམ་རབ་རྒྱས་ཤིང་། འཇིགས་བཅས་དོགས་པ་ལ་གནས་ཚེ།
གཙུག་གི་ནོར་བུ་ཁྲག་གིས་བསོས། མཁའ་ལས་དེ་ཡི་མདུན་དུ་ལྷུང་།། 148

མི་བཟད་པ་ཡི་ལྟས་ངན་བཞིན། མདུན་དུ་ཤ་དང་སྐྲ་དང་ནི།
ཁྲག་བཅས་ཀྱིས་གང་དེ་མཐོང་ནས། འཕྲལ་ལ་དེ་ནི་བརྒྱལ་བར་གྱུར།། 149

བདག་པོའི་གཙུག་གི་ནོར་བུ་དག། ལྷུང་མཐོང་མ་ལ་ཡ་ཅན་ཡང་།
སྨོངས་པས་མདོན་བཅོམ་སྐྱུག་མོ་དང་། ལྷན་ཅིག་ས་གཞི་དག་ཏུ་ལྷུང་།། 150

དལ་གྱི་འདུ་ཤེས་ཐོབ་གྱུར་ནས། བཙུན་མོ་མཆའ་མ་དབུགས་ཕྱུང་སྟེ།
བློ་ལྡན་རིག་འཛིན་བདག་པོ་ཡིས། ཕྲ་ཆོམ་བསམས་ནས་རབ་སྨྲས་པ།། 151

བུ་ནི་ཕྱིན་གྱི་བཞོན་པ་དག། རང་ཉིད་སོང་སྟེ་བདག་གིས་བལྟ།
མཁའ་ལྡིང་དུས་ནི་འཇིགས་རུང་འདི། ལུས་ལ་ཕྲ་ཆོམ་སྟེར་བྱེད་ཡིན།། 152

གཙུག་གི་ནོར་བུ་འདི་ལྷུང་ཡང་། ངེས་པ་ཉིད་དུ་མི་བརྟག་སྟེ།
འདི་ནི་གདོངས་ཅན་མཁའ་ལྡིང་གིས། ཟ་བ་དག་གི་ཡིན་ཡང་སྲིད།། 153

འཇིགས་པའི་རླུང་གིས་བསྐྱུན་པ་ཡི། རྒྱ་སྐར་རབ་ཏུ་གཡོ་བ་བཞིན།
གདོངས་ཅན་རྣམས་ཀྱི་ནོར་བུ་ནི། དག་ཏུ་འདི་ལྟ་ངེས་པར་ལྷུང་།། 154

भयभग्नाङ्गभुजगग्रासगृध्नः फणिद्विषः ।
आविद्धापातनिर्घातघोरोऽयं वर्त्तते क्षणः ॥ १४७ ॥

इत्युन्मेषिणि सातङ्कशङ्काशायिनि संशये ।
तस्याग्रे न्यपतद्रक्तसिक्त चूडामणि र्दिवः ॥ १४८ ॥

तं निरीक्ष्य पुरःकीर्णमांसकेशरशोणितम् ।
दुर्निमित्त मिवासन्नं सहसैव मुमोह सः ॥ १४९ ॥

चूडामणिं च्युतं दृष्ट्वा पत्यु र्मलयवत्यपि ।
पपात मोहाभिहता श्वश्र्वा सह महीतले ॥ १५० ॥

शनैः संज्ञां समासाद्य जाया माश्वास्य सस्नुषाम् ।
उवाच संशये ध्यात्वा धीमान् विद्याधराधिपः ॥ १५१ ॥

पश्याम्यहं स्वयं गत्वा वत्सं निर्जनचारिणम् ।
घोरा गरुडवेलेयं देहसन्देहदायिनी ॥ १५२ ॥

चूडामणि श्च्युत श्चायं निश्चयाय न कल्पते ।
एष संभाव्यते तार्क्ष्यभक्ष्यमाणस्य भोगिनः ॥ १५३ ॥

एवम्विधाः पतन्त्येव मणयः फणिनां सदा ।
उत्पातवातनिर्घाततरला स्तारका इव ॥ १५४ ॥

ཞེས་པ་བརྗོད་ནས་རིག་འཛིན་དབང་། དེ་གཉིས་དང་འགྲོགས་རྗེས་འབྲང་བཅས།
གདོངས་ཅན་གསོད་པའི་རྡོ་བ་ཅན། ས་འཛིན་དག་གི་ངོས་སུ་སོང་།། 155

གནས་སྐབས་དེར་ནི་དུང་གི་གཙུག། གསོད་པའི་གོས་དམར་དག་དང་ལྡན།
ཆུ་གཏེར་ངོགས་སུ་གོ་ཀ་རྞར། ཕྱག་འཚལ་ནས་ནི་མྱུར་དུ་སོང་།། 156

སྤྲིན་གྱི་བཞོན་པ་མཁའ་ལྡིང་གིས། བསྟུན་ཅིང་གདུབས་པ་མཐོང་གྱུར་ནས།
ཀྱི་ཧུད་བཅོམ་མོ་བསླུས་སོ་ཞེས། རྣམ་པར་སྨྲ་ཞིང་ས་ལ་འགྲེལ།། 157

ཡང་ཡང་རི་ཕྱུག་སྨྲ་བརྟན་གྱི། ཚོ་ངེ་དག་དང་ལྷན་བྱེད་ཅིང་།
མཆི་མ་རབ་ཟགས་དེ་ཡིས་ནི། ལྷབ་ལྷིབ་སྐྲ་ཡིས་ཚོ་ངེ་བྱས།། 158

ཀྱི་ཧུད་རྒྱ་མེད་གཉེན་གྱུར་གུང་བ་ཅན་གྱི་སྙིང་རྗེ་བསོད་ནམས་དག་གི་མཚམས
གཞན་གྱི་གུང་བ་ཞི་བྱེད་སྲོག་རབ་སྤྲིན་ལ་མངོན་ཕྱོགས་མཉེས་ག་ཤིན་འདི་ནི་ཅི།
ཀྱི་ཧུད་རྩོལ་བཟང་གཏེར་དག་ཁྱོད་དང་བྲལ་བས་འགྲོ་བ་དག་ནི་མུན་པར་གྱུར།།
བདུད་རྩིའི་ཟེར་ནི་སྒྲ་གཅན་གྱིས་ཟོས་ནས་མཁའི་མཛེས་
པ་ལྷུ་བུ་དག་ལ་བརྟེན།། 159

གཞན་ལ་བརྩེ་བས་སྲོག་ནི་བསྐྱབ་པར་བསླབ་ལ་སྐྱེ་མ་སྲོག་ནི་གཏོང་བྱེད་པ།
ཁྱོད་ཀྱི་ལུས་ནི་བསྐལ་པའི་བར་གནས་གྲགས་པའི་རང་བཞིན་དག་ཏུ་ཡང་
དག་སྐྱེས།
ཁྱོད་ཀྱི་སྡིག་ཅན་དུང་གི་གཙུག་ནི་སྡིག་པའི་འདམ་རྫབ་དོག་ཅིང་ཉམ་ང་བ།
རྟག་ཏུ་འཚོ་དང་བརླག་པའི་གནས་གྱུར་འཇིགས་རུང་སྨད་པའི་ཁོངས་སུ་
ཅི་སྨད་འཕངས།། 160

इत्युक्त्वा सहितस्ताभ्यां सानुगः क्षितिभृत्तटीम् ।
विद्याधरेन्द्रः प्रययौ भोगिवध्यशिलावतीम् ॥ १५५ ॥

अत्रान्तरे शङ्खचूडः शोणवध्यपटान्वितः ।
गोकर्णं मर्णवतटे प्रणम्याशु समाययौ ॥ १५६ ॥

स दृष्ट्वा गरुडाघातदीर्णं जीमूतवाहनम् ।
हा हतो वञ्चितोऽस्मीति पपात विलपन् भुवि ॥ १५७ ॥

स चुक्रोश भृशं वाष्पविगलद्गद्गदस्वरः ।
कुर्व्वन् मुहुर्गिरिगुहाः सप्रलापाः प्रतिस्वनैः ॥ १५८ ॥

हा निष्कारणबान्धव व्यसनिनां कारुण्यपुण्यावधे
केयं पेशलता परार्त्तिशमने प्राणप्रदानोन्मुखी ।
हा सौजन्यनिधे त्वया विरहितं जातान्धकारं जगत्
राहुग्रस्तसुधामयूखगगनच्छायां समालम्बते ॥ १५९ ॥

प्राणत्राणविधौ परेषु कृपया हा जीवितत्यागिनः
संजातैव यशोमयी तव तनुः कल्पान्तरस्थायिनी ।
पापः पातकशङ्कुसङ्कुलतरे घोरापवादोदरे
क्षिप्तः संक्षयधाम्नि नित्यनिधने किं शङ्खचूड़स्त्वया ॥ १६० ॥

ཞེས་པ་སྨུ་ཅོར་རབ་སྨྲ་ཞིང༌། མཁའ་ལྡིང་ལྡང་དུ་འགྲོ་བ་ཡི།
གདེངས་ཅན་གྱིས་ནི་སྤྲིན་གྱི་ཏོག། ཛེས་འཕྲང་བཅས་པ་འོང་བ་མཐོང༌།། 161

དེ་ལ་བྱུང་བའི་མཐའ་བ་ཤད་ནས། ཀླུ་ནི་ཀླུ་ངན་གྱིས་འཁྲུགས་པས།
དཔུང་པ་བླངས་ནས་འདབ་ཆགས་ཀྱིས། གང་ཟག་ལ་ནི་སྨད་བཅས་སྨྲས།། 162

གདེངས་ཅན་ལ་འོས་རྟགས་ནི་ཅུང་ཟད་ཉིད་ཀྱང་མ་བརྟགས་པར།
རིག་འཛིན་འདི་ནི་ཅི་སྨད་བཅོམ་ཞིང་ངེས་བསད་ནམ་མཁའ་ལྡིང༌།
ཁྲོད་ཀྱིས་དང་པོར་མ་དཔྱད་ཕྱིང་དུ་ཡོངས་རྫོགས་སྡིག་པ་ཡིས།
གདུང་བའི་ལམ་བསྟེན་ཐུབ་ཚོང་འདི་ཡིས་མཚར་བས་མཚར་བ་བྱུས།། 163

འདི་ཐོས་སྤྲིན་གྱི་བཞོན་པ་ནི། མདུན་དུ་ལུས་ཉམས་མཐོང་གྱུར་ནས།
སྤྲིན་གྱི་ཏོག་ནི་བཙུན་མོ་དང༌། བཅས་པ་རབ་དུ་བརྒྱལ་བར་གྱུར།། 164

དེ་ནས་མ་ལ་ཡ་ཅན་གྱིས། མདུན་དུ་མཁའ་ལྡིང་དག་གིས་ཁྲོ།
དྲག་བསྙུན་གདུབས་པའི་དབྱིབས་ཅན་དག། མཐོང་ནས་འཚོ་བ་ཕྱེད་ཐོབ་གྱུར།།
165

བརྟན་ཡང་རི་ཤོད་ལྷུང་བ་བཞིན། མ་བཅོམ་ན་ཡང་དེ་བཅོམ་བཞིན།
འཚོ་བ་ལྡན་ཡང་འཚོ་མེད་བཞིན། རབ་དུ་འཁྲུམ་ཡང་གཡོ་མེད་གྱུར།། 166

བརྟན་པའི་སྒྲོགས་བཞིན་བརྒྱལ་བ་ཡིས། ཡན་ལག་ཀུན་ལ་འཁྲུད་ཅིང་བསྐུམས།
མོངས་པས་དབང་དང་བྲལ་བ་དེ། ཡུད་ཙམ་ཅི་ཡང་རིག་མ་གྱུར།། 167

इतिप्रलापमुखरः प्रसर्पन् गरुडान्तिकम् ।
जीमूतकेतु मायान्त मपश्यत् सानुगं फणी ॥ १६१ ॥

तस्मै निवेद्य वृत्तान्तं नागः शोकविशृङ्खलः ।
बभाषे भुज मुत्क्षिप्य साक्षेपः पक्षिपुङ्गवम्* ॥ १६२ ॥

अलमलमविचारप्राप्तपर्य्यन्तपाप-
व्यसनसरनिभाजा साहसेनामुना ते ।
फणिसमुचितचिह्नं किञ्चिदेवानवेक्ष्य
क्षतनिरत हतः किं तार्क्ष्य विद्याधरोऽयम् ॥ १६३ ॥

एतदाकर्ण्य जीमूतकेतु दीर्णतनुः पुरः ।
जीमूतवाहनं दृष्ट्वा मुमोह महिषीसखः ॥ १६४ ॥

प्रियं पतङ्गराजोग्रप्रहारदलिताकृतिम् ।
दृष्ट्वा मलयवत्यग्रे कण्ठप्राप्तार्द्धजीवितम् ॥ १६५ ॥

स्थिताप्यधश्च्युतेवाद्रे रहताप्याहतेव सा ।
सजीविताप्यजीवैवं समुद्भ्रान्तापि निश्चला ॥ १६६ ॥

दृष्ट्वा सर्व्वाङ्ग मालिङ्ग्य गाढं सख्येव मूर्च्छया ।
मुहूर्त्तं मोहविवशा सा विवेद न किञ्चन ॥ १६७ ॥

---

* In the Tibetan text पुङ्गवम् (གང་ཟག) exists.

དལ་གྱིས་འདུ་ཤེས་ཐོབ་གྱུར་ཅིང་། ཐམས་ཅད་གདུང་བ་སྤྲ་བ་ན།
མཁའ་ལྡིང་ཆགས་བྲལ་སྐྱོངས་པ་ཡིས། ཀྱི་ངན་ལྷན་པ་དག་ཏུ་གྱུར།། 168

དེ་དུས་འཚོ་བ་གཏོང་བར་ནི། ངེས་པས་བརྟན་པ་བཟུང་བ་ཡིས།
པ་མ་དག་གིས་སྦྱིན་གྱི་ནི། བཞོན་པ་ལུས་ཟོས་ལ་སྐྲུས་པ།། 169

བྲ་མིན་འདི་ལ་རབ་ཞུགས་སྒྲ། ངེད་ཀྱི་སྲོག་ནི་འཕྲོག་བྱེད་པ།
གཞན་ལ་སྙིང་རྗེའི་ངང་ཚུལ་ཅན། ཁྱོད་ཀྱི་རྩུབ་པོ་འདི་ནི་ཅི།། 170

འགྲོ་བའི་ཚོགས་ནི་རྒྱུད་པ་དག། བསྲུང་བའི་རིན་ཆེན་ལུས་འདི་ནི།
ངེས་པར་མ་བསྲུངས་བྱ་ཁྱོད་ཀྱིས། ལེགས་བྱས་དག་ནི་ཅི་ཞིག་བྱས།། 171

ཞེས་པ་སྨྲ་བའི་ཕ་མ་ལ། སྤྱི་བོ་འདར་བས་ཕྱག་བཙལ་ནས།
བཟོད་དཀའ་སྲོག་ནི་རབ་གསོ་ཞིང་། ཡི་གེ་འཐོར་བར་རབ་སྤྲུས་པ།། 172

ཡབ་གཅིག་ཁྱོད་ཀྱི་བཀའ་མེད་པར། རང་གིས་འདི་བྱས་བདག་གི་ནི།
ཕྱི་མ་མེད་པའི་ཕྱག་འདི་ཡིས། ཁྱོད་ལ་རབ་ཏུ་དང་བ་མཚོན།། 173

སྐད་ཅིག་འཇིག་པའི་ལུས་འདི་ནི། ཡོངས་སུ་བསྒྱུར་བ་མི་མཆོན་ཆེ།
ལུས་ཅན་རྣམས་ཀྱི་སྐྱེ་བ་ཡི། བགྲོད་པ་གཞན་ཕན་སྙིང་པོ་ཉིད།། 174

ལུས་ཅན་རྣམས་ཀྱི་ཚེ་འདི་མགྲོགས་པའི་རླུང་གི་རྩེ་དགའ་ཡིས།
བསྐྱོད་པའི་འཁྲི་ཤིང་འདབ་མ་ལ་གནས་ཆུ་ཐིགས་རྣམ་པ་གཡོ།

शनकैः लब्धसंज्ञेषु सर्व्वेष्वार्त्तप्रलापिषु ।
वैराग्यालक्ष्यवैलक्ष्यविषादो गरुड़ोऽभवत् ॥ १६८ ॥

गृहीतधैर्य्यौ तत्कालं जीवितत्यागनिश्चयात् ।
ऊचतु र्जननौ स्रस्तगात्रं जीमूतवाहनम् ॥ १६९ ॥

परकारुण्यशीलस्य केयं पुत्र कठोरता ।
तव प्रवृत्ता कायेऽस्मिन्नावयो र्जीवहारिणी ॥ १७० ॥

इद मापन्नजनतारक्षारत्न मरक्षता ।
शरीरं भवता पुत्र किं नाम सुकृतं कृतम् ॥ १७१ ॥

इति ब्रुवाणौ पितरौ शिरःकम्पेन निःसहः ।
स प्रणम्योच्चलत्प्राणः प्रकीर्णाक्षर मभ्यधात् ॥ १७२ ॥

तवाज्ञया विना तात ममेदं कुर्व्वतः स्वयम् ।
अपश्चिमः प्रणामोऽयं त्वत्प्रसादनलक्षणः ॥ १७३ ॥

क्षणक्षयिणि कायेऽस्मिन्नलक्ष्यपरिणामिनि ।
परोपकारसारैव जन्मयात्रा शरीरिणाम् ॥ १७४ ॥

जवनपवनलीलावल्लिवल्लीदलोद्यत-
सलिललवविलोलं देहिना मेतदायुः ।

རྒྱན་དུ་གཟིར་བ་ལ་ཕན་གསོད་ནམས་གནས་ལ་ཡོ་བྱད་ནི།
བསྐྱབས་བྱས་བདུད་རྩི་ཐོབ་པས་བརྟན་བའི་གནས་སུ་འགྲོ་བར་འགྱུར།། 175

ཕ་མ་མཆི་མ་ཅན་ལ་ནི། བཟོད་ནས་མདུན་དུ་འདབ་ཆགས་དབང་།
འཁྱོད་པ་ཆེན་པོས་རང་གིས་ནི། ཉེས་བྱས་སྐྱོད་ཅིང་གནས་པ་དག། 176

དེ་ཡི་སྙིང་སྟོབས་འབབ་པ་ནི། ཆགས་བྲལ་བླ་མས་དག་བྱས་ནས།
ཀླུ་ནི་ཟ་བ་ལས་ཟློག་ལ། ཀུན་དུ་རྟོག་པ་བརྟན་པོ་བྱས།། 177

དེ་ནས་མི་བཟད་མཐའ་ཡི་དབུགས། ཡི་གེ་རབ་དུ་འཁྲུལ་པ་ཅན།
མིག་ནི་རབ་དུ་ཟུམ་པ་དེ། སྙིང་སྟོབས་གསལ་བའི་ལྷག་མར་གྱུར།། 178

དེ་ནས་སྲིག་ཁང་རབ་སྨྲས་པ། འོས་ཤིང་མེ་ཏོག་གོས་ཀྱིས་སྤྲས།
མ་ཡི་མདུན་དུ་མངོན་ཕྱོགས་དེ། འཇུག་འདོད་དེ་ཡི་དགའ་མས་སྨྲས།། 179

བདག་གིས་གུས་པས་མཉམ་བྱས་པ། འབྱུང་པོའི་དགའ་མ་བཅོམ་ལྡན་མས།
རིག་འཛིན་ཀུན་གྱི་འཁོར་ལོ་སྒྱུར། མཆོག་ནི་བདག་ལ་རབ་དུ་བྱིན།། 180

གང་ཞིག་ཞག་བདུན་ཉིད་ཀྱིས་བདག། བུ་མོ་ཕྱུག་མའི་སྐལ་ལྡན་གྱུར།
དག་པའི་ཚིག་འདི་བདག་ལ་ནི། ཚེ་སྔད་བདེན་པ་མིན་པར་གྱུར།། 181

བདག་གི་སྐྱེ་བ་གཞན་དུ་ཡང་། འོས་པ་འདི་ཉིད་ང་དག་གྱུར་ཅིག།
ཅེས་བརྗོད་དེ་ཡིས་མན་དརའི། མེ་ཏོག་སྐྱིམ་པ་མེ་ལ་གཏོར།། 182

स्थिरपद मम्रताख्या सन्तताम्नोपकारे
कृतपरिकरबन्धं पुण्यधाम्नि प्रयाति ॥ १७५ ॥

इत्युक्ता जनकौ साध्वी पुरः प्राप्तं खगेश्वरम् ।
आह तापेन महता निन्दन्तं निजदुष्कृतम् ॥ १७६ ॥

वैराग्यगुरुणा सत्त्वप्रणयेन प्रसह्य सः ।
चकार स्थिरसंकल्पं नागाशननिवृत्तये ॥ १७७ ॥

ततः पर्य्यन्तविषमश्वासप्रस्खलिताक्षरः ।
सत्वप्रकाशशेषोऽभूत् स निमीलितलोचनः ॥ १७८ ॥

अथोचितां सुरचितां पुष्पांशुकचितां चिताम् ।
प्रवेष्टुं तत्प्रिया वह्नेरग्रमेत्य समभ्यधात् ॥ १७९ ॥

भक्त्या मया भगवती तोषिता भववल्लभा ।
आदिशन्मे वरं सर्व्वविद्याधरचक्रवर्त्तिनम् ॥ १८० ॥

तदिदं वितथं कस्माज्जातं मम सतीवचः ।
यदहं सत्वराचेण बालवैधव्यभागिनी ॥ १८१ ॥

जन्मान्तरेऽपि मे भूयादयमेवोचितः पतिः ।
उक्तेति साध्वी चिक्षेप मन्दारकुसुमाञ्जलिम् ॥ १८२ ॥

དེ་ནས་བདུད་རྩིའི་བུམ་པ་ཡིས། ལག་པའི་མཚོ་སྐྱེས་བྲིལ་བ་ཡིས།
ཨི་སྐྱེས་རང་ཉིད་མངོན་ཕྱོགས་དེ། དགའ་བས་བུ་མོ་ཁྲིད་ཀྱི་བདག། 183

དེ་ནི་འཚོ་ཞིས་ཇོད་བྱེད་ཅིང་། བཞིན་གྱི་འོད་ཀྱིས་ཕྱོགས་བཀང་སྟེ།
བདུད་རྩིའི་ཆར་རྒྱུན་དག་གིས་ནི། སྤྲིན་གྱི་བཞོན་པ་རབ་ཏུ་བསོས། 184

ཨི་སྒྲས་མི་སྣང་གྱུར་པ་ན། སྤྲིན་གྱི་བཞོན་པ་རབ་བསོས་ནས།
བསད་པའི་སྐྱུ་རྣམས་བསོས་པ་ནི། མཁའ་ལྡིང་དག་ལ་སླར་ཡང་ཞུས། 185

དེ་ནས་དེ་ཡིས་བདུད་རྩིའི་ཆར། སྤྲོས་པས་གདེངས་ཅན་ཐམས་ཅད་ནི།
གདེངས་ཀའི་ནོར་བུའི་འོད་རྒྱས་པའི། སྣང་བ་དང་ལྡན་རབ་ཏུ་ལངས། 186

དེ་ནས་དགའ་དང་རྨད་བྱུང་ཡིད་སྤྲུབས་རྣམས།
མཚུངས་པར་མངོན་པར་སྒྱུར་བས་འདར་བྱེད་ཅིང་།
དཔག་བསམ་འཁྲི་ཤིང་ཡང་དག་རྒྱུ་བ་བཞིན།
གྲུབ་པའི་བུ་མོ་བདག་པོའི་དྲུང་དུ་སོང་། 187

དེ་ནས་ལྷུན་པོ་ག་ཤིག་པ་ལྡན་པ་བཞིན།
འདབ་ཆགས་དབང་པོས་གཞོན་ནུ་མངོན་མཆོད་སོང་།
སྤྲིན་གྱི་བཞོན་པ་དག་ལ་མངོན་ཕྱོགས་པའི།
དུང་གི་གཙུག་ནི་ལྷ་བས་ཚེམས་མ་གྱུར། 188

ततः पीयूषकलशव्यग्रपाणिसरोरुहा ।
स्वयमभ्येत्य गिरिजा प्रीत्या जीमूतवाहनम् ॥ १८३ ॥

अयं जीवति ते पुत्रि पतिरित्यभिधायिनी ।
अजीवयत् सुधासारैः पूरिताशामुखांशुभिः ॥ १८४ ॥

अन्तर्हितायां पार्व्वत्यां स्वस्थो जीमूतवाहनः ।
तार्क्ष्यं ययाचे नागानां हतानां जीवितं पुनः ॥ १८५ ॥

ततः सर्व्वे समुत्तस्थु स्तत्सृष्टामृतवृष्टिभिः ।
सालोकाः फणिनः स्फीतफणामणिमरीचिभिः ॥ १८६ ॥

ततः प्रहर्षाद्भुतमन्मथानां
तुल्याभियोगेन विघूर्णमाना ।
समाययौ सिद्धसुता समीपं
सञ्चारिणी कल्पतेव पत्युः ॥ १८७ ॥

याते तमभ्यर्च्य ततः कुमारं
खगेश्वरे पक्षवतीव मेरौ ।
जीमूतवाहाभिमुखस्य दृष्टि
र्न शङ्खचूड़स्य जगाम तृप्तिम् ॥ १८८ ॥

དེ་ནས་བྱང་ཆུབ་སེམས་དཔའི་སྤྱི་བོར་ལྷ་ཡི་བདག་པོ་ཡིས།
མཛེས་པའི་ལག་པའི་པདྨ་རབ་གཏེར་མེ་ཏོར་ཁྲུས་པའི་ཆར།
བྱུང་བའི་ཚོགས་ཀྱི་སྒྲ་ཡིས་ཡོན་ཏན་བསྟོད་གྲུས་སྒྲ་དབྱངས་བཞིན།
འཆི་མེད་དགའ་བའི་ཚོགས་ཀྱིས་ཕྱོགས་ནི་ཡོངས་སུ་གང་བ་བབས།། 189

ཕ་མ་དག་ལ་ཕྱག་འཚལ་དེ་དག་ཞབས་ཀྱི་པདྨར་གཙུག་གི་ནོར་བུ་ཆགས།
དེ་དག་དགའ་བའི་མཆི་མ་ཟགས་པས་དབང་བསྐུར་
དགའ་སྟོན་ལེགས་པར་བསྒྲུབས།
སྙིང་སྟོབས་ཆུ་གཏེར་བསོད་ནམས་ཚོགས་ནི་ཡོངས་
རྫོགས་སྤྲིན་གྱི་བཞོན་པས་སྐད་ཅིག་ལས།
གསལ་བར་འཁོར་ལོ་སྒྱུར་བའི་དཔལ་གྱི་མཚན་མ་
རིན་ཅན་རྣམས་ནི་ཡང་དག་ཐོབ།། 190

དེ་ནས་ལྷ་ཡི་བདག་པོ་གུས་པ་དང་ལྡན་པ།
དགའ་བས་མངོན་ཕྱོགས་རང་གི་སྟན་ལ་མངོན་དབང་བསྐུར།
སྐབས་གསུམ་ཚོགས་ཀྱིས་ཕྱག་བྱར་ངེས་པའི་གྲགས་པ་ཅན།
འཁོར་ལོས་སྒྱུར་བ་དེ་ཡི་ཡུན་རིང་དཔལ་དག་བསྟེན།། 191

དེ་ལྟར་རང་གི་སྐྱེ་བ་གཞན་གྱི་ཚུལ་འདི་དག།
བསོད་ནམས་ཉེར་བསྟན་དག་ལ་རྒྱལ་བས་གསུངས་པ་ནི།
བདག་གིས་བསྡེབས་པས་དགེ་བའི་མཆོག་ནི་གང་ཐོབ་དེས།
སེམས་ཅན་ཐམས་ཅད་མངོན་པར་འབྱུང་བ་ཉིད་གྱུར་ཅིག།། 192

བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་དགེ་བའི་
དབང་པོས་མཛད་པ་ལས་དེ་ཉིད་ཀྱི་སྲས་ཟླ་བའི་དབང་པོས་
མཛད་པའི་སྤྲིན་གྱི་བཞོན་པའི་རྟོགས་པ་བརྗོད་པའི་
ཡལ་འདབ་སྟེ་བརྒྱ་རྩ་བརྒྱད་པའོ།།

अथ सुरपतिकान्तापाणिपद्मप्रयुक्ता
विकचकुसुमवृष्टि र्बोधिसत्त्वस्य मूर्ध्नि ।
न्यपतदमलरत्नासारसंपूरिताशा-
कृतगुणनुतिशब्दैर्वाकुलालिस्वनेन ॥ १८९ ॥

वन्दित्वा पितरौ तदङ्घ्रिकमलव्यासक्तचूडामणिः
हर्षाश्रुस्रुतिभि स्तयोः सुविहितः प्रेमाभिषेकोत्सवः ।
सत्त्वाब्धिः परिपूर्णपुण्यनिवहै र्जीमूतवाहः क्षणा-
द्रत्नानि स्फुटचक्रवर्त्तिकमलाचिह्नानि स प्राप्तवान् ॥१९०

अथ सुरपतिना समेत्य हर्षात्
प्रणयवता स्वयमासनेऽभिषिक्तः ।
श्रिय मभजत वन्द्यमानकीर्त्तिः
त्रिदशगणैः स चिराय चक्रवर्त्ती ॥ १९१ ॥

इति स्वजन्मान्तरवृत्त मेतत्
पुण्योपदेशे कथितं जिनेन ।
कृत्वा मयाग्र्यं कुशलं यदाप्तं
तत्सर्वसत्त्वाभ्युदयाय भूयात् ॥ १९२ ॥

इति क्षेमेन्द्रविरचितायां बोधिसत्त्वावदानकल्पलतायां
तदात्मजसोमेन्द्रकृतं जीमूतवाहनावदान
मष्टोत्तरशततमः पल्लवः ॥

ཀུན་ལས་མཆོག་ཞིང་བདེ་གཤེགས་ཡོན་ཏན་དག་དང་ལྡན།
བཟང་ཞིང་རབ་མང་བརྩོན་འགྲུས་སྟོབས་དང་བཟོད་པ་ཅན།
མི་དགེ་རྩ་བ་སྤྱིད་པའི་ལྡོན་པ་རབ་འཇོམས་པ།
གྲགས་པ་ཟློག་མཛད་བཅོམ་ལྡན་དེ་ལ་ཕྱག་འཚལ་ལོ།། 1

འཇིག་རྟེན་དུ་ནི་ཇི་སྲིད་སྐྱོལ་མ་སྐྱིང་ཇི་དར་བབ་ཀྱིས་གཟིགས་ཤིང་།
ཀླུབ་སྐྲད་གྲུས་ལྡན་དགེ་བ་རྣམས་ལ་མ་ཚང་མེད་པའི་འབྲས་བུ་སྒྲུབ།
ཇི་སྲིད་འཇིག་རྟེན་མགོན་པོ་དྲི་མེད་དགེ་བའི་བསམ་གཏན་བློ་ལྡན་པ།
དེ་སྲིད་མཁས་པའི་ཞལ་གྱི་དགའ་སྐྱེད་སངས་རྒྱས་གདམ་འདི་གནས་
གྱུར་ཅིག།། 2

ཇི་སྲིད་སངས་རྒྱས་སྲིད་པ་མཐའ་དག་བསྐལ་སྐད་རབ་ཏུ་རྒྱས་གྱུར་ཅིག།
ཇི་སྲིད་ཆོས་ནི་ལེགས་བྲུས་ལམ་དག་རབ་གསལ་རིན་ཆེན་སྒྲོན་མར་གྱུར།
ཇི་སྲིད་དགེ་འདུན་ཆགས་ལྡན་ཡིད་ལ་དགེ་བའི་ཚོགས་སྦྱིན་དེ་སྲིད་དུ།
དཔག་བསམ་འཁྲི་ཤིང་གསར་པ་རྒྱལ་བའི་ཡོན་ཏན་གདམ་འདི་གནས་
གྱུར་ཅིག།། 3

ཇི་སྲིད་ས་གཞི་རབ་མང་ས་འཛིན་ལས་འབབ་གཡོ་བའི་
ཆུ་ཡི་འཁྱིང་ལྡན་ལྷག་མ་ཡི།
མགོ་ལ་གདེངས་ཀ་རིན་ཆེན་འོད་ཟེར་རྒྱས་པས་རྨ་བྱའི་
གདུགས་ཀྱིས་མཛེས་པའི་རྗེས་སུ་སྐྱོང་།

सर्व्वोन्नताय सुगताय गुणान्विताय
भद्राय भूरितरवीर्य्यबलक्षमाय ।
उन्मूलिताकुशलमूलभवद्रुमाय-
तस्मैनमो भगवते मदवारणाय ॥ १ ॥

यावत्तारा तरुणकरुणालोकिनी भक्तिभाजां
कल्याणानां कुलमविकलं सिद्धये सन्निधत्ते ।
लोके यावद्विमलकुशलध्यानधी र्लोकनाथः
तावद्दौद्धी विबुधवदनामोदिनीयं कथास्ताम् ॥ २ ॥

यावद्बुद्धः सकलभुवनोत्तारणाय प्रबुद्धो
यावद्धर्म्मः सुकृतसरणिस्वैररत्नप्रदीपः ।
यावत्सङ्घः शरणमनसां दत्तकल्याणसङ्घः
स्थीयात्तावज्जिनगुणकथाकल्पवल्ली नवेयम् ॥ ३ ॥

यावद्भू भूरिभृत्सुतसलिलचलन्मालिका शेषशीर्षं
मायूरच्छत्रशोभा मनुभवति फणारत्नरश्मिप्रतानैः ।

ཇི་སྲིད་ས་གཞི་པདྨ་དཀར་ལ་ལྷུན་པོ་ཟླ་འབྲུའི་རྣམ་པའི་
མཛེས་པ་འཛིན་བྱེད་པ།
དེ་སྲིད་སྨོན་པའི་གནས་འདི་འགྲོ་བའི་ཉ་རྒྱུན་དག་ཏུ་
རབ་ཏུ་གནས་པ་སྨིན་གྱུར་ཅིག ༎ 4

བྱང་ཆུབ་སེམས་དཔའི་རྟོགས་པ་བརྗོད་པ་དཔག་བསམ་གྱི་འཁྲི་ཤིང་སྙན་
ངགས་མཁན་ཆེན་པོ་དགེ་བའི་དབང་པོས་མཛད་པ་རྫོགས་སོ ༎

धत्ते यावत्सुमेरुः क्षितितलकमले कर्णिकाकारकान्तिं
शास्तुस्तावत्कथेयं कलयतु जगतां कर्णपूरप्रतिष्ठाम् ॥४॥

समाप्ता बोधिसत्त्वावदानकल्पलता कृतिरियं
महाकवेः क्षेमेन्द्रस्य ॥

COLOPHON.

A FEW WORDS ABOUT THE TEXT, ITS COLLATION WITH THE ORIGINAL AND ITS TRANSLATION IN TIBETAN VERSE.

ཡོན་ཏན་ཕུལ་དུ་བྱུང་བ་དཔག་ཏུ་མེད་པས་སྤྲས་པའི་བླ་མ་དམ་པ་ཆོས་ཀྱི་རྒྱལ་པོ་དང་། མིའི་དབང་པོ་དཔོན་ཆེན་ཤཱཀྱ་བཟང་པོ་འི་བཀའ་ལུང་གིས་རྒྱ་གར་གྱི་མཁན་པོ་སྨན་དངགས་མཁན་ཆེན་པོ་ལ་ཀྵྨཱི་ཀ་ར་དང་བོད་ཀྱི་ལོ་ཙཱ་བ་དགེ་སློང་ཤོང་སྟོན་གྱིས་མང་ཡུལ་འཕགས་པའི་བྱུང་དགེ་འདུན་བཞི་སྡེའི་གཙུག་ལག་ཁང་དུ་བསྒྱུར་ཅིང་ཞུས་ཏེ་གཏན་ལ་ཕབ་པའོ།

དཔལ་ས་སྐྱའི་གཙུག་ལག་ཁང་དུ་རྒྱ་དཔེ་དང་གཏུགས་ནས་ཞུ་དག་ཚང་བར་བྱས་སོ།། སྐད་གཉིས་ཀ་ལ་ཞུ་ཆེན་ཞིབ་པ་ཅིག་གྲུབ་པས་གཞན་ལས་ཁྱད་དུ་འཕགས་སོ།།

རྒྱལ་བའི་རྟོགས་བརྗོད་སྙན་ངག་ཆེན་པོ་དཔག་བསམ་འཁྲི་ཤིང་ཞེས་བྱའི་བསྟན་བཅོས་སྐད་གཉིས་ཟུང་དུ་སྦྱར་བ་འདིར་ཡི་གེ་པ་དང་དག་བྱེད་པ་ཡི་སྐྱོན་ལས་ཡིག་འབྲུ་ལྷག་ཆད་བརྗ་བོར་འཁྲུལ་བ་ཇི་སྙེད་མཆིས་པ་རྣམས་འདི་ཡི་སྐད་གཉིས་ཟུང་སྦྱར་ཐོག་མར་བྱེད་པོ་འཛིག་རྟེན་མིག་གྱུར་ཆོས་སྐྱོང་བཟང་པོ་ཞེས་བྱའི་དགེ་སློང་གིས་ལེགས་སྦྱར་གཞུང་དང་སློབ་སྦྱོར་བསྟན་བཅོས་བོད་སྐད་བརྡ་ཡི་བསྟན་བཅོས་དང་བསྡུན་བློ་གྲོས་ཞིབ་མོས་དག་པར་བགྱིས།།

དགེ་ལེགས་འཕེལ།།

This colophon is contained in the Tibetan edition. It was added during the Sakya Hierarchy when Tibet was ruled by *Pon-chen* (Governor) Shakya Zang-po. The first and earliest edition was issued under his orders.

नेत्राक्ष्यब्धियुताब्दके च समये राधे सिते पक्षके
आशायाञ्च तिथौ दिवाकरदिने वाहद्विषट्पक्षके ।
श्रीमद्बुद्धसुतावदानशतकं वस्वङ्कितं मोक्षदम्
राज्ये श्रीमदनन्तमल्लनृपते लक्ष्म्या व्यलेखि स्वयम् ॥

लक्ष्मीभद्रकवे विधाय विधिवद्व्याख्यान मत्यद्भुतं
क्षेमेन्द्रेण कृतं गभीरमधुरं बुद्धावदानं मया ।
नेपाले भुवि मञ्जुभद्रसुधिया यत्पुण्यमासादितं
सत्त्वा स्तेन भवाब्धिमध्यपतिता बुद्धा भवन्तु स्फुटम् ॥

शुभमस्तु ॥

This colophon is contained in the Nepalese manuscript of the second volume, which only was extant in Nepal during King Ananta Malla's reign.